(12, 18) आ परितोषाद्विदुषां न साधु[2] मन्ये प्रयोग-विज्ञानम्[3]।
(12, 15) बलवदपि शिक्षितानामात्मन्य-प्रत्ययं[4] चेतः ॥२॥

Manager—Good Lady, I shall tell you the (*exact*) truth.[1] I deem no skill[3] in acting perfect,[2] till the learned (*expert*) are satisfied. The mind of those that are vastly-instructed (*person*) (*or the mind of the learned though strong—N*) has no confidence[4] in itself.(2)

V. L.—"परिहास्यते'——R. V. M. N. B.'परिहापयिष्यते'—S

नटीति—'सुविहितः' (७।४।४२) सम्यक् अनुष्ठितः 'प्रयोगः' अभिनयः येन, तस्य भावः सुविहित-प्रयोगता ('तस्य भावस्त्व-तलौ'–५।१।११९) तया, 'न किमपि परिहास्यते' न न्यनं भविष्यति, प्रागेव कुशीलवानां सुशिक्षितत्वादिति भावः, किमति दोषस्पृष्टं न भविष्यतीति नट-स्तुतिः। (परिहास्यते इति जहातेः कर्म-कर्तरि लृटि रूपम्)।

सूत्रधार इति—'भूतः' सत्यं ('भूतं क्ष्मादौ पिशाचादौ जन्तौ क्लीवं त्रिषूचिते। प्राप्ते वृत्ते समे सत्ये देवयोन्य-न्तरे तु ना' इति मेदिनी) 'अर्थः' वस्तु तत्त्वम् इति यावत् ('अर्थोऽभिधेय-रै-वस्तु-प्रयोजन-निवृत्तिषु' इत्यमरः) तम्। आ इति—'विदुषां' विपश्चिताम् 'आपरितोषात् परितोषं मर्यादीकृत्य। यावत् परितोषः न भवति इत्यर्थः। ['आङ्मर्यादावचने'–(१।४।८९) इति कर्मप्रवचनीयत्वे 'पञ्चम्याङ्-परिभिः' (२।३।१०) इति ५मी; 'आङ्मर्यादाऽभिविध्योः' (२।१।१३) इति समासस्य विभाषितत्वात् न समासः, समासपक्षे तु 'आपरितोषम्' इति स्यात्] 'प्रयोगस्य' अभिनयस्य 'विज्ञानं' नैपुण्यं, 'साधु' सुन्दरं निर्दोषम् इति यावत् ('साधुः वार्धूषिके चारौ' इति विश्वः) अर्थात् विद्वत्-परीक्षणीयं मम प्रयोगविज्ञानम् इति व्यज्यते, अतएवात्र ['पर्यायोक्तमलङ्कारः'। तथाचोक्तं भामहेन—'पर्यायोक्तं प्रकारेण यदन्येनाभिधीयते। वाच्य-वाचक-शक्तिभ्यां शून्येनावगमात्मना'] 'न मन्ये'। तत्समर्थकमाह 'बलवदि'ति 'बलवत्' अधिकमपि ('बलवत् सुष्ठु किमुत स्व-त्य-

तीव निर्मरे' इत्यमर:) 'शिक्षितानां' शिक्षा सञ्जाता एषामिति 'शिक्षिता:' (तारकादिभ्य: इतच्-५।२।३६) तादृशानां पुरुषाणां ('विशेषण-मात्र-प्रयोगे विशेष्य-प्रतिपत्तौ' इति वामन:) 'चेत:' चित्तं (यद्वा न्यायपञ्चानन-मते 'शिक्षितानां चेत: बलवदपि' सुदृढमपि,) 'आत्मनि' स्वविषये 'अप्रत्ययम्' अविश्वासि (अत्र—'क्व नासि शुभप्रद:" इतिवत् हि-शब्दानुपादानेऽपि 'अर्थान्तरन्यासोऽलङ्कार:' अर्थापत्त्या संकल्प्यते। 'श्रुत्यनुप्रासश्च'॥ विश्वासस्य चेतोधर्म्मत्वेनार्थ-पौनरुक्त्यं विश्वासा-भावस्य विधेयत्वात् 'अविमृष्ट—विधेयांशता'। तद्दोष-परिहाराय "स्वस्मिन् प्रत्येति न चेत:" इति पठनीयम्। आर्या जाति:। अत्र सूत्रधारस्य प्रशंसा-करणेन सभ्यानामुन्मुखी-करणात् प्ररोचना-नाम् भारतीवृत्तेरङ्गत्वम्। तल्लक्षणं यथा दर्पणे—"उन्मुखीकार: प्रशंसात: प्ररोचना" ॥२॥

4n.—1. सुविहित &c.—वि+धा+क्त=विहित:, (धा=हि,) 'दधाते: हि:' (7. 4. 42) ; सुष्ठु विहित:=सुविहित: प्रादितत्—Well directed ; सुशिक्षित—R ; 'owing to efficient management regarding the cast of characters. 'By reason of good acting'—C. Cf."प्रयोग-प्रधानं हि नाटय-शास्त्रम्"—Māla. I. ; **2. परिहास्यते**—(to be defective) Either in कर्मकर्तृवाच्य, or in कर्मवाच्य in which case 'किम्' is 'उक्ते कर्मणि प्रथमा'। Cf. 'तदेव अस्मत्तो न किञ्चित् परिहास्यते'—MR. 'न किंचित् परिहीयते'—*Rām. I.* 13 ; हा लट् जहाति ; लोट्—'जहाहि' जहीहि' and 'जहिहि' ('आ च हौ- 6.4. 117.) ; क्त: हीन: (8. 2. 45) ; (150 n. I) **3. ते**—An instance of क्रियायोगे चतुर्थी (*by the rule of VM*—'क्रिया-ग्रहणमपि कर्तव्यम्')। Cf. 'तस्मै शशंस प्रणिपत्य नन्दी'—Ra. II. 68 ; IX. 77 ; 'अस्मत्प्रार्थनाममन्त:पुरेभ्य: कथयेत्'—II. infra. MBh, however, includes all such cases under 'कर्मणा यमभिप्रैति सोऽपि सम्प्रदानम्'—1. 4. 32. But T remarks "एतच्च क्रियार्थो-पपदस्य च कर्मणि स्थानिन: (२।३।१४) इत्यनेन सिद्धम्।" **4. भूतार्थम्**—भूत—Lit. which has exactly happened, hence true (*Com.*). Exact state of the case, i. e. there is no room for self-complacence. Cf. "कथयामि ते भूतार्थं नाहं शासनशतेन विद्या-विक्रयं करोमि"—*PT*. "क: श्रद्धास्यति भूतार्थं सर्वो मां तुलयिष्यति"—MK. III ; also (201 n. 6). **5. विदुषां**—विद्+विकल्पे शतृस्थाने वसु=विद्वस्; ('विदे:शतुर्वसु:' 7. 1. 36.) तेषाम्। Optionally—'विदत्' with शतृ। "विद्वान् विदंश्च" इत्यमर:।

6. बलवदपि etc.—"Either connect बलवत् (अव्यय— Com.) अपि, with शिक्षितानाम्, (*the mind of those that are* **vastly** *trained*), or [बल+मतुप्—**adjective**) with चेत: :—(*the mind of the learned though* **very strong**—N). Cf. "स्मृतो विरोधे न्यायस्तु बलवान् व्यवहारत: । अर्थशास्त्रन्तु 'बलवत् धर्मशास्त्रमिति स्थिति:" ।।-Y]. The idea of 'बलवत्त्व' **of** "मनस्" **is very common in** Indian Philosophy and Literature. Cf. "अहोऽतिधीरं बलवच्च ते मन:'—BC. IV. 97.=(Ah! thy mind must be very firm and strong &c.— E.B. Cowell); "ममापि कामं हृदयं सुदारुणं शिलामयम् वाप्ययसापि वा कृतं"—My heart also must be stern—yeh made of rock or even fashioned even of iron, which does not break when his lord has gone to the forest—Ibid. VIII. 69 ; 68. While commenting on "चञ्चलं हि मन: कृष्ण प्रमाथि बलवत् दृढम्" (Gītā. VI. 34.) the great Śaṅkarācārya observes "न केवलमत्यर्थं चञ्चलं प्रमाथि च प्रमथनशीलम् किञ्च बलवत् न केनचित् नियन्तुम् शक्यम् । दुर्निवारत्वात्" । Again बलवत् विचारेणापि जेतुमशक्यम्"——Śrīdhara. "बलवत् स्वप्रशमकमौषधमपि बलवान् रोगो यथा न गणयति तथैव स्वभावादेव बलिष्ठं मन:" &c—Viśvanātha ; 'अत्यर्थं चञ्चलं मन: प्रमाथि *** किञ्च बलवत् न केनचिद् नियन्तुमशक्यम्"—Hanumān ; "न केवलमत्यर्थं चञ्चलम् ** किंच बलवत् अभिप्रेतात् विषयात् केनापि उपायेन निवार-यितुमशक्यं ** तस्यातिदृढतया बलवतो बलवत्तया मनसो निग्रहं &c"—Madhusūdana. "बलवत्-स्वामिकम् अविशुद्धागमं च धनं भुञ्जानस्य कुतो मनस्समाधि:"—MN on Ki. I. 7; बलवद-रि-निवह-वक्षस्तट &c.—PC. (प्रस्तावना), "बलवत्-समीरण-वेगात्" VS. II. It is a **sheer mistake** to say that "बलवत् मन:" is not good Sanskrit and that **Adj. use of** बलवत् is *Un-Kālidāsian.* (Vide 89 n. 3.) 7. **अप्रत्ययं** (Diffident) चेत:—Until and unless you have faced the audience and passed the test of their criticism, there is no room for self-satisfaction. Here is the fault named अविमृष्ट-विधेयांशत्वम्". Cf. "विधेयस्यांशस्य विमर्शाऽभावेन गुणीभूतत्वम् **अविमृष्ट-विधेयांशत्वम्**"—SD. VII. i.e. if the predicate is not mentioned at all, or a subordinate or wrong position is

assigned to it, we have the above-mentioned fault. Often the subject and the predicate are compounded and not separately mentioned. Hence if अप्रत्ययम् is substituted by 'न प्रत्यति then there arises no doubt as to the true nature of अप्रत्ययम् *i.e.* whether it is a part of the predicate or an attribute to the subject (Com). For similar idea, Cf. "प्राय: प्रत्ययमाधत्ते स्वगुणेषूत्तमादर:"—Ku. VI. 20. The figure is पर्यायोक्त as the fact to be intimated i.e. manager's apprehension about the success of the play, is expressed in a round-about way. According to HS there is अर्थापत्ति as well as अर्थान्तरन्यास also.

Text :—**नटी—एव्वं णेदम्। अनन्तर-करणिज्जं[१] दाव अज्जो आणवेदु** [एवम् नु इदम्। अनन्तर-करणीयं तावत् आर्य आज्ञापयतु]।

Lady Manager—Quite so. Let my Lord command what[1] is to be done next.[1]

सूत्रधार:—किमन्यदस्या: परिषद:[२] श्रुतिप्रसादनत:[३] ? तदिममेव तावदचिर[४]-प्रवृत्तमु-पभोग-क्षमं[५] ग्रीष्म-समयमधिकृत्य गीयताम्। सम्प्रति हि—

आर्या
(12, 18) **सुभग-सलिलावगाहा:[७] पाटल-संसर्ग-सुरभि-वनवाता:[८]।**
(12, 15) **प्रच्छाय-सुलभ-निद्रा 'दिवसा: परिणाम-रमणीया:[६] ॥३॥**

Manager—What else but pleasing[2] the ears of the audience[3]? So please sing, touching this very late-returned[4] enjoyable[5] summer-tide. For, now are the days charming[6] towards the close,[6] when exhilarating[7] are baths in water[7], when the sylvan[8] gales turn fragrant in contact with Pātala flowers (*roses*)[9] and when sleep[9] creeps softly on beneath the deepening shade[9]. (3)

V. L. 'तदिममेव'—R ; B ; V. 'तदमुमेव'—S. 'नन्विममेव'—M.

नटीति—'एतत्' भवान् यद् वदति तत् 'एवम्' सत्यमित्यर्थ:। 'अनन्तरम्' अधुना यत् 'करणीयम्' कर्तव्यम् तत् 'आज्ञापयतु' आदिशतु इति। **सूत्रधार इति**—'परिषद:' सभाया:, समवेतानां सामाजिक-वर्गाणाम् इत्यर्थ: 'श्रुते:' कर्णस्य

'प्रसादनतः' (२।३।२९) सन्तोषात् 'अन्यत्' अपरम्, 'किं करणीयमस्ति' ? न किमपि इति भावः। 'तत् तस्मात् हेतोः 'अचिरं' 'प्रवृत्तः' प्रारब्धः तम्' ['अत्यन्त-संयोगे च' (२।१।२९) इति द्वितीयया सह समासः] ॥ अतएव 'उपभोगस्य' चन्दना-वगाहनाऽद्यु-पभोगस्य 'क्षमः' योग्यः तम् ; 'इमम् ग्रीष्म-समयम्' निदाघर्तुम् 'अधिकृत्य' आश्रित्य 'गीयता म्' इति। ('ऋतुञ्च कञ्चित् प्रायेण भारतीं वृत्तिमा-श्रितः' इति दर्पणोक्तेः ऋतु-ग्रहणम्) ॥ 'सम्प्रति' ग्रीष्मागमे हि' इत्यत्र अवधारणे। ('हि हेतावक्धारणे' इत्यमरः) ॥ **सुभगेति**—'सुष्ठु' अतिशयेन 'भगः' यत्नः ('भग-शब्दः यशो-ज्ञान-वीर्य-यत्नार्क-योनिषु' इति धरणिः) येषु तादृशाः प्रीतिप्रदा इत्यर्थः। 'सलिले' जले 'अवगाहाः' निमज्जनानि यत्र तादृशाः ; 'पाटलानां' पुष्प-भेदानां ('पाटलं **गोलाबाख्य**-पुष्पम् इति शब्दकल्पद्रुमः) 'संसर्गेण' सम्बन्धेन 'सुरभयः' सुगन्धयः ('सुगन्धे च मनोज्ञे च सुरभिर्वाच्यवन्मत' इति विश्वः) 'वनवाताः' वनानिलाः येषु तादृशाः ; प्रकृष्टा 'छाया' अनातपः यस्मिन् ('छाया सूर्य-प्रिया कान्तिः प्रतिबिम्बम्, अनातपः इत्यमरः) तानि प्रच्छायानि वृक्षमूलानि इत्यर्थः तेषु 'सुलभाः' (३।३।१२६) अकृच्छ्रेण लभ्याः 'निद्राः' येषु, (अनेन. रत-श्रम-हृरत्वं ध्वन्यते) तादृशाः 'दिवसाः' निदाघ-वासराः 'परिणामे' दिवसावसाने-'रमणीयाः' मनोरमाः [**बाहुलकात् कर्तरि अनीयर्** (३।३।११३) ; सहसुपेति समासः] भवन्तीति शेषः। सर्वैर्विशेषणैः प्रकृत-स्वीय-परिश्रम-खेद-विनोदः ध्वन्यते, (अतएव विशेषण-साभिप्रायत्वात् **परिकरालंकारः**। 'विशेषण-साभिप्रायत्वे **परिकरः**' इति तल्लक्षणात्। अपिच दिवसानां गानेन वर्णनीयता-प्रतिपादनं प्रति सुभग-सलिला-वगाहत्वादि-**बहु-कारणो-पन्यासात् समुच्चयालंकारश्च**। **श्रुति-वृत्त्यनुप्रासौ**। यथावत् वस्तु-वर्णनात् **स्वभावोक्तिश्च**। **आर्या जातिः**।) ॥३॥

5n.—1. गीयताम्—Cf. "गृहं गत्वा गृहिणीमाहूय संगीतमवतारयामि"—PC. I. **सुभग** &c.—भग means यत्न effort, hence सुभग 'that for which great effort is made', hence 'delightful enough to lead men to such efforts' (*Com.*) 'अ' of अव in 'अवगाह' is **optionally dropped** according to Bhāguri.——'वष्टि **भागुरिरल्लोपम् अवाऽप्यो-रुप** सर्गयोः। आपञ्चापि हलन्तानां यथा वाचा निशा दिशा।" *Cf.* "पूर्वापरौ-तोयनिधी **वगाह्य**'—Ku. I. I ; Ra. XIV. 76. 'भुजङ्ग-पिहितद्वारं'—Ra. I. 80. 'स्थिता **वहस्येव** पुरं मघोनः'—Bk. I. 6. 2. **पाटल** &c.—पाटल means **'Rose'**—(Kalpa). R explains सुरभि as **मनोज्ञ**, otherwise, according to him, tautology will arise, as fragrance is already implied by पाटल-संसर्ग। 3. **परिणाम-रमणीयाः**—'एतेन शुभाऽऽयतित्वं द्योत्यते"—*R. i.e.*

the word suggests that Duṣyanta will have pleasant days at the end. *Cf.* 'विशेष-सूर्यः स्पृहणीय-चन्द्रमाः सदावगाहक्षम-वारि-सञ्चयः। दिनान्तरम्यः अभ्युपशान्तमन्मथो निदाघकालोऽयमुपागतः प्रिये—RS. 8. According to KP & SD, **many** significant epithets are necessary for परिकरालङ्कार (Com.) but according to Pradīpa, Udyota and their followers even a *single*, significant epithet is sufficient for this figure.

Remark—It appears that in this Śloka, some **later happenings** are **obliquely** referred to. 'सलिलावगाहाः' might foreshadow the **dropping of the signet ring** into the waters of शचीतीर्थ (Act. V). The loss and recovery of the ring are ultimately **benign** (सुभग) because through suffering and separation, both Śakuntalā and Duṣyanta are purified and their love which was at first so much mixed with the desire of the flesh, finds its culmination in a co-mingling of souls. Without the dropping of the ring, all this could not have happened. "पाटल (Rose)—संसर्ग" may very beautifully signify the charming अप्सरस् who lifted up शकुन्तला when she had been rejected by the King. "सुरभि-वनवाता" in a sense may be taken to signify the **calm and quiet** hermitage of the sage मारीच। The shadow (प्रच्छाय) of Durvāsā's curse falls on Duṣyanta's mind resulting in **amnesia**—a temporary loss of recognition (०सुलभ-निद्रा). The curse leads at last to something extremely pleasant (परिणामे दिवसा रमणीयाः) i.e., the souls of the lovers are purified of all earthly dross and their meeting takes place in a supramundane plane.

Text :—नटी—सह (तथा)। (गायति)। Lady Manager—Quite so.

(*Sings*)

गीतिः

ईसीसि-चुम्बिआइं भमरेहिं सुउमार-केसर-सिहाइं।
ओदंसअन्ति दअमाणा पमदाओ सिरीस-कुसुमाइं ॥४॥
(ईषदीष-च्चुम्बितानि भ्रमरैः सुकुमार-केशर-शिखानि।
अवतंसयन्ति दयमानाः प्रमदाः शिरीष-कुसुमानि ॥)

Sympathetic[4] ladies are making ear-trinkets[3] of Śirīṣa flowers (*Meemosa Seereessa*) which are gently kissed by the drones[1] ; and the tips[2] of whose filaments are (*extremely*) delicate.[2] (4)

सूत्रधारः—आर्ये, साधु गीतम् । अहो राग-बद्ध-चित्तवृत्ति[5]रालिखित[6] इव सर्वतो रङ्गः[7] । तदिदानीं कतमत् प्रकरणमाश्रित्य एनमाराधयामः[8] ?

Manager—Beautifully sung, my lady. The audience[7], with[5] its minds rivetted on your strain,[5] appears all round, as it were, painted[6] (*in a portrait*). Now, which, Prakaraṇa (*a variety of Drama*) shall we take up to greet[8] them ?

ईषदिति—'दयमानाः' सदयाः 'प्रमदाः' युवत्यः 'सुकुमाराः' कोमलाः ; ("सुकुमारं तु कोमलं मृदुलं मृदु" इत्यमरः) 'केशराणां' किञ्जल्कानां ('केशरं हिंगुनि क्लीवं किञ्जल्के न स्त्रियां पुमान् । सिंह-सटायां पुन्नागे वकुले नागकेशरे' ति मेदिनी) 'शिखाः' अग्रभागाः येषां तानि शिरीष-कुसुमानि इत्यनेन सुतनुः नायिका शकुन्तला लक्षिता । पुनः कोमलत्वात् 'भ्रमरैः' भृङ्गैः 'ईषदीषत्' मन्दमन्दम् (केशराग्राणां सौकुमार्यात् ईषच्चुम्बनं भ्रमराणां, सकृच्चुम्बनेन अतृप्तत्वात् द्विरुक्तिः । ['प्रकारे गुणवचनस्य (८।१।१२) इति प्रकारे द्विर्भावः ; यद्वा ['नित्य-वीप्सयोः' (८।१।४) इति नित्यार्थे द्विरुक्तिः] 'चुम्बितानि' स्पृष्टानि 'शिरीषकुसुमानि' । ('भ्रमरैः कामुकैः दुष्यन्तैः च इति भावः । तथा चोक्तं मेदिन्यां "भ्रमरः कामुके भृङ्गे' इति । अतः अनेन नायक-नायिकयोः तृतीयाङ्कस्थं सम्मेलनं व्यज्यते) । 'अवतंसयन्ति' अवतंसं कर्ण-भूषणं कुर्व्वन्ति ('पुंसि उत्तंसाऽवतंसौ द्वौ कर्णपुरे च शेखरे' इत्यमरः । 'तत् करोति तदाचष्टे' इति गण-सूत्रात् णिच् ; ततो लटि रूपम्), यद्वा 'प्रमदाः' प्रकृष्टः मदः यासां ता युवतयः 'दयमानाः' सकृपाः । अकठोरं स्पृशन्त्य इति यावत् (इति राघवः) 'अवतंसयन्ति ॥' (अनेन मेनकाविभिः शकुन्तलायाः परिपालनं द्योत्यते, तत् तु पञ्चमाङ्कावसाने द्रष्टव्यम् । **वृत्त्यनुप्रासः काव्यलिङ्गञ्च । गीतिः छन्दः**) ॥४॥ **सूत्रधार इति**—'साधु' सुन्दरं यथा तथा 'गीतं' भवत्या गानं कृतम् । 'अहो' इति विस्मये ('अहो ही च विस्मये' इत्यमरः) 'रङ्गः' "**मञ्चाः क्रोशन्ति**" इत्यादिवत् **लक्षणया** नाटयालय-स्थितः प्रेक्षकः जनः 'रागेण' गीतस्य माधुर्येण 'बद्धा' संयता आकृष्टा इति यावत् 'चित्तवृत्तिः' यस्य तथाभूतः सन् 'सर्व्वतः' सर्वासु दिक्षु इति सप्तम्यां तसिल् ('इतराभ्योऽपि दृश्यन्ते'—५।३।१४) ॥ 'आलिखितः' चित्रार्पित इव आस्ते । सुमधुर-

गीत-श्रवणेन सर्वं एव प्रेक्षका: तन्मयचित्ता निष्पन्दा: सन्त: चित्र-न्यस्ता इव प्रतिभान्ति। 'तत्' तस्माद् हेतो: 'इदानीम्' अधुना ['दानीं च' (५।३।१८) इति दानीम्] 'कतमत् प्रकरणम्' रूपक-विशेषम् 'आश्रित्य' अवलम्ब्य 'एनं' सामाजिकवर्गम् 'आराधयाम:' तोषयाम इत्यर्थ:–(३।३।१३१)।

6n.—1. **अवतंसयन्ति**—अवतंस्यते अनेन इति अव+तंस्+घञ् करणे=अवतंस—Ear-ring ; तंस (तसि)–A सौत्रधातु means "to decorate" "तसि: सौत्र: भूषार्थ:"—BhD ; Optionally 'वतंस'–(*Com*.&5n. 1.) 2. **केशर** &c. There is difference of opinion as to the spelling of **केशर**। Raghunātha quotes from गर्दसिंह—सटायां केशरो वस्य:'—To mean 'manes (*of lions*) स is dental. *Cf*. 'सिंह-केशर-सटासु'-Ku. VIII. 46. But 'केशरी इश्नन्त: तालव्य-मध्योऽपि' इति महेश्वर:। Medini (*Com.*) is of the same opinion. Puruṣottama Deva, is against **केशर**। BhD follows suit. RM differs—'आन्दोल-कुसुम-केशर-शरेण-मुखी' इति वासवदत्तायां तालव्य-मध्यदर्शनात् इति मुकुट:॥ *Cf*. 'शिरीष-प्रसवाऽवतंसा:'—Ra. XVI. 61 ; *Ku. II.* 14 'च्यूतं न कर्णादपि कामिनीनां शिरीष-पुष्पं सहसा पपात'–Ra. *XVI*. 48 ; *MD*. 67 ; Act *VII*, 18,. infra. 3. **रागबद्ध** &c. राग=रञ्ज्+घञ् in the **करणवाच्य**, Upadhā न् is elided by 'घञि च भाव-करणयो:' (6. 4. 27). But no elision of न् in **अधिकरणवाच्य**—'नेह, रजन्ति लोका यस्मिन् स रङ्ग:'— *Prabhā*. Cf. "आकर्ण्य स्वरमस्य चित्रार्पिताङ्गा इव मर्मैते हया:"—Karṇabhāram 4. **कतमत्**—किम्+डतमच् by ('वा बहूनां जाति-परिप्रश्ने डतमच्' ; जातिनिर्धारणे किं ? भवतां का' देवदत्त:?-*Prabhā*. 5.3.93.). In the neuter gender अदट् comes in giving 'कतमत्' by 'अदड्डतरादिभ्य: पञ्चभ्य:' (7. 1. 25). Now see (232n. I). last line. 5. **प्रकरणम्**—One of the ten kinds of रूपक, e.g. 'नाटकमथ प्रकरणं भाण-व्यायोग-समवकार:-डिमा:। ईहामृगाङ्क-वीथ्य: प्रहसनमिति रूपकाणि दश'—SD..—'भवेत् प्रकरणे वृत्तं लौकिकं कविकल्पितम्।' शृङ्गारोऽङ्गी नायकस्तु विप्रोऽमात्योऽथवा वणिक्। * * नायिका कुलजा क्वापि वेश्या क्वापि द्वयं क्वचित् &c.—Ibid. **प्रकरण** generally contains **ten acts**. Here the term प्रकरण has been, purposely and nicely too, used to show that the Manager himself was also captivated by the melodious music, and forgot (Cf. 'सम्यक अनुबोधित:' &c. Infra) what he had already told Natī *i.e.* that they were going to stage a नाटक of Kāl-

dāsa and not a प्रकरण ; प्रकरण here cannot be taken as a synonym of नाटक, for Natī also reminds him that they are going to stage a नाटक (and not a प्रकरण) ; *Cf.* 'प्रथममेव आज्ञप्तम् अभिज्ञान-शकुन्तलं नाम अपूर्वं नाटकम् (*Infra.*). आश्रित्य=अधिकृत्य। *Cf.* 'वृत्तिमाश्रित्य वेतसीम्"—Ra. IV. 35. 6. एनम्—"इदमोऽन्वादेशे (*repetition*) द्वितीयायाम् एनादेशः 'द्वितीया-टौ-स्स्वेनः' (2. 4. 34). इति सूत्रात्॥ यथा अनेन व्याकरणम् अधीतम्, एनंछन्दोऽध्यापयेति"—SK. 351 ; Bharata Mallika, supported by Durgadāsa admits the existence of a **different** एन-शब्द— ('इदमः समानार्थकस्य एन-शब्दस्य रूपम्'), as otherwise the following uses of एन is difficult to be justified, "कण्डयमानेन*त्वगस्य। अथैनमद्रेस्तनया शुशोच" —R.V. II., Here एन can't be used for genitive. (ii) "जहातु नैनं कथमर्थसिद्धिः संशय्य कर्णादिषु तिष्ठते यः"—Ki. ; (Here एन can't be used for यद्) ; "विद्यामथैनं विजया" &c.—Bhatti. II. (Here there is absence of इदम्, एतद् and अन्वादेश ; why has एन not been substituted in—"नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापय" —GG, "There is a different इम-शब्द"—Says Śrī Rāma-Tarka-Vāgīṣa. According to Bopadeva and Kalāpa "एनत्" and "एनम्" are derived from 'एतद्' and "इदम्" respectively in the *Neuter* ; but Pāṇini and संक्षिप्तसार differ. 7. For the metre गीति—See Appendix I.

Remark—नटी may be supposed to have sung the song in सारङ्ग (commonly known as सारं) —a Śāstrika राग (a variety of —मेघ-राग)। It belongs to औरव group, being shorn of गान्धार (ग) and, धैवत (ध) and has two kinds of निषाद (नि). It has 7 important varieties including one invented by Tānsen viz. वृन्दावनी—बड़हंस-सारं; मधुमाधवी-सारं; गोड़-सारं; सुर-सारं ; सामन्त-सारं; मिञा-सारं; Read "योऽसौ ध्वनि-विशेषस्तु स्वरवर्ण-विभूषितः। रञ्जको जनचित्तानां स रागः कथितो बुधैः"॥ "कर-धृत वीणा सख्या सहोपविष्टा च कल्पतरूमूले। दृढ़तर-निबद्धकवरी सारङ्गी सा सुरङ्गिणी प्रोक्ता।" The poet has very skilfully insinuated this highly captivating सारङ्ग-राग in "तवास्मि गीत-रागेण * * सारङ्गेण &c"—Śl. 5. Infra.

Text : नटी—णं अज्जमिस्सेहिं पढमं एव्व आणत्तं अहिण्णाण-सउन्दलं णाम

अपूव्वं णाडअं पओए अहिकरीअदु त्ति (ननु आर्यमिश्रैः प्रथममेव आज्ञप्तम् अभिज्ञान-शकुन्तलं नाम अपूर्वं नाटकं प्रयोगे[1] अधिक्रियताम् इति) ।

Lady Manager—Well, has it not been ordered by your honour, in the very beginning, that the new drama, Abhijñāna-Śakuntalām by name, be[1] enacted on the stage[1] ?

सूत्रधारः—आर्ये, सम्यक् अनुबोधितोऽस्मि । अस्मिन् क्षणे विस्मृतं खलु मया । कुतः ?—

श्लोक तवास्मि[1] गीत-रागेण हारिणा[2] प्रसभं[3] हृतः ।
एष राजेव दुष्यन्तः सारङ्गेणा[4]ऽतिरंहसा ॥५॥ (निष्क्रान्तौ)

(इति प्रस्तावना)

Manager—I am well reminded, my lady. I[1] quite forgot it this moment, for, by the ravishing[2] melody of your song (**Sung in Sāranga Rāga**), I was perforce[3] led away, exactly as this king Duṣyanta by the dappled gazelle[4] (Sāranga) too fleet. (5) *Exeunt ambo*).

(*End of the Prologue.*)

V. L.—'दुष्यन्त'— R. V. M. 'दुष्मन्त' —B ; Bhāgabata ; Mahā. Trikāṇḍaśeṣa ; 'प्रस्तावना'—R. V. M. B. "स्थापना"—S.

नटीति—'ननु' इत्यवधारणे प्रश्ने वा ('प्रश्नाऽवधारणाऽनुज्ञाऽनुनयाऽऽमन्त्रणे ननु' इत्यमरः) 'आर्याश्च' अभ्यर्हिताश्च मिश्राश्च' पूज्याश्च तैः (आर्य मिश्रैः' मान्यैर्भवद्भिरित्यर्थः । ('पूज्ये मिश्र-वचनं नित्यं बहुवचनान्तम्' इति रङ्गनाथः ; 'स्यात् उत्तरपदे मिश्रस्त्रिषु श्रेष्ठार्थगोचर' इति । 'मिश्रा वेदान्तवादिनः" इति जगद्धरः । 'प्रथममेव आदौ एव ('प्रथमस्तु भवेदादौ प्रधानेऽपि च वाच्यवत्' इति मेदिनी) । 'प्रयोगे' अभिनये 'अधिक्रियताम्' प्रयुज्यताम् 'इति आज्ञप्तम्' । रङ्गं प्रविष्टायामेव मयि, नाटकस्याभिनयं सन्दिश्य कथमिदानीं प्रकरणस्य अभिनयम् आदिशति भवान् इति प्रश्नः । सूत्रधार इति—'अनुबोधितः' स्मारितः 'अस्मि ' भवामि । 'अस्मि' इति अहमर्थे अव्ययं वा । ('अस्मि' इत्यस्मदर्थानुवादे अहमर्थेऽपि इति गणव्याख्याने । 'दासे कृतागसि भवत्युचितः प्रभूणां पादप्रहार इति सुन्दरि नास्मि दूये' इति प्रयोगात्) । 'अस्मिन् क्षणे' मुहूर्ते 'विस्मृतं खलु मया' । 'कुतः' इति हेतुमाह तवेति—साधु हरति चित्तम् इति 'हारी' ['साधुकारिणि उपसंख्यानम्', (वाः—३।२।७८) इति णिनिः] तेन मनोहारिणा इत्यर्थः "सारङ्गेण" तन्नामक-राग-विशेषेण । 'तव्यं सूक्तं प्राक्' । 'गीत-

रागेण' सङ्गीत-माधुर्येण 'अति' सातिशयं 'रंहः' वेगः यस्य ("रंहस्तरसी रयः स्यदः जवः' इत्यमरः) तेन वेगवता 'सारङ्गेण' मृगेण (सारम् अङ्गम् यस्य—'शकन्ध्वादिषु पर-रूपम्'—वाः (६।१।९४), यद्वा, सारं गच्छति इति खच् 'गमेः सुपि वाच्यः'—वाः-(३।२।३८) ; 'अन्यत्र साराङ्गः मुनिः' रिति दुर्वासा अपि द्योत्यते) 'एषः' पुरतः दृश्यमानः 'राजा' दुष्यन्त 'इव प्रसभं' बलात् ('क्लीवे तु प्रसभं हठः' इति वोपालितः) 'हृतः' आसक्त-चित्तः विषयान्तरं प्रापितः इति यावत् "अस्मि' भवामि, यद्वा 'अस्मि' पूर्ववत् अस्मदर्थे अव्ययम्। राजपक्षे तु 'हृतः' स्व-सेनायाः अपि च शकुन्तलायाः दूरं प्रच्यावितः। (रसनाकाव्यलिङ्गम् उपमा च। श्रुति-वृत्त्यनुप्रासौ। श्लोको वृत्तम् ॥५॥) निष्क्रान्ताविति—निष्क्रान्ताच निष्क्रान्तश्च इति 'निष्क्रान्तौ' रङ्गमञ्चात् बहिर्गतौ ['पुमान् स्त्रिया' (१।२।६७) इति पुंलिङ्गैकशेषः]। प्रस्तावनेति। तल्लक्षणं तु दर्पणे "नटी विदूषको वापि पारिपार्श्विक एव वा। सूत्रधारेण सहिताः संलापं यत्र कुर्वते। चित्र-वाक्यैः स्वकार्योत्थैः प्रस्तुताक्षेपिभिर्मिथः। आमुखं तत्र विज्ञेयं नाम्ना प्रस्तावनापि सा" ॥ अत्र वर्णन-कारमते सादृश्योपन्यासेन दुष्यन्त-प्रवेशरूप-कार्यान्तर-प्रसाधनात् अवलगिताख्यः प्रस्तावनाभेदः प्रयुक्तः। तल्लक्षणं यथा—"यत्रैकत्र समावेशात् कार्यमन्यत् प्रसाध्यते। प्रयोगे खलु तज्ज्ञेयं नाम्नाऽवलगितं बुधैः" ॥

7n.—1. आर्यमिश्रैः—'वाच्यौ नटी-सूत्रधारौ आर्यनाम्ना परस्परम्'—SD. 6 ; 'मिश्र' is a title of respect (Com.) belonging to मतल्लिकादि class. "मतल्लिकोद्घ-मिश्राः स्युः प्रकाण्ड-स्यल-भित्तयः। हस्त-पाश-तटाः पाद-पाली-मर्चचिकादयः—GM. पूर्वनिपात by 'प्रशंसा-वचनैश्च (2. 1. 66). Or, say आर्याणां मिश्राः प्रधानाः श्रेष्ठाः, तैः। 'प्रधाने मिलिते मिश्रः'—धरणिः। 2. अनुबोधित (Reminded) &c.—For बुध्, read 'बोधते धर्मविद्यां यः क्षत्रविद्यां च बोधति। नित्यम् अध्यात्म-युक्तात्मा ब्रह्मविद्यां च बुध्यते—KR. 'अस्मि' here and in the following verse, can be taken as an अव्यय in the sense of 'अहम्'। *Cf.* "निःसंशयं तत् यद्बोधम् अस्मि"–BC. I.72. 'एवम् "त्वाम् अस्मि वच्मि" इत्यत्र अस्मि इत्यहमर्थे तिङन्त-प्रतिरूपकम् (अव्ययम्)—JS. MN's discussion under आ संसृतेरस्मि जगत्सु जातः'—Ki. III. 6. ; 'अन्यत्र कुसुमावचयं कुरुध्वमत्राऽस्मि करोमि सख्यः'—KPr. III. 20. ; 3. अस्मिन् क्षणे विस्मृतम् &c.—This is an explanation for the use of 'प्रकरण' instead of नाटक in 'इदानीं कतमत् प्रकरणम्' &c. प्रगता सभा विचारः अस्मादिति प्रसभं-(Perforce)—Gitā. II. 60. 4. एष राजेव दुष्यन्तः &c.— राज्. दीप्तौ+कनिन्=राजा

(उ—162) ; वेण, father of पृथु was a notorious king and was slain like Charles I by his subjects. His son पृथु was the **first man** to get the eipthet राजा, on account of his pleasing his subjects. *Cf.*' पृथुं वैणं प्रजा दृष्ट्वा "रक्ताः स्मेति" यदब्रुवन्। ततो राजेति नामास्यानुरागादजायत।' Also, 'पित्राऽपरञ्जिता स्तस्य प्रजास्तेनाऽनुरञ्जिताः। अनुरागात् ततस्तस्य नाम राजेत्यभाषत।'— VP. I. Ch.13. (Vide 165n. 3). 5. **सारङ्गेण**—(Com.& 6n—Remark). 'शारङ्गः चातके ख्यातः शवले हरिणेऽपि च' इति अजयः। अतएव सारङ्ग दन्त्यादिस्तालव्यादिश्च' इति भरतः। Kāli, generally uses this word in the sense of deer. Very rarely, it means चातक। *Cf.*:—'प्रवृद्ध इव पर्जन्यः सारङ्गैरभिनन्दितः'—Ra. XVII. 15. Here it is a double entendre (Com.) **अतिरंहसा**—अति रंहः यस्य तेन **समासान्तविधेरनित्यत्वात्** न कप्—Vide T and JK on (870) & 'प्रतेरंश्वादयस्तत्पुरुषे' (6.2.193) respectively. Also (192n. 4). 6. **प्रस्तावना—VK quotes this very Śloka as** an instance of प्रस्तावना of **अवलगित** variety—(*SD. VI.*) which is the case when in a performance another business (Viz. **The hinting of the entrance of the hero and the like**) is performed in unison with it —it is designated by the learned—अवलगित—SD. VI.

But R calls it **प्रयोगातिशय** for the plot of the play is opened by hinting the approach of the hero. "**एषोऽयमित्युपक्षेपात्** सूत्रधारप्रयोगतः, पात्रप्रवेशो यत्रैष **प्रयोगातिशयो** मतः—DR. III. 10. **प्रयोगातिशय** is the case when an actor appears on the stage after he has been referred to by the stage-manager with some such sentences as "Here comes so & so" (in this particular case "एष राजेव दुष्यन्तः &c"

Remark—The forgetfulness on the part of the manager is very significant. It is the keynote of the drama. Not only does the manager forget the name of the drama to be staged, but Śakuntalā, (the hostess) also forgets to receive the sage Durvāsā, and as a result was thrown into the abyss of oblivion, and this failure of memory is repeated when Duṣyanta also forgot Śakuntalā.

प्रथमोऽङ्कः

Text :—

(ततः प्रविशति मृगानुसारी सशर-चाप-हस्तो राजा रथेन सूतश्च)

(*Enter in a chariot, the king, with a bow and arrow in hand chasing a deer attended by the charioteer*).

सूतः—(राजानम् मृगञ्चावलोक्य)—आयुष्मन्—

श्लोकः कृष्णसारे ददच्चक्षुस्त्वयि चाधिज्य-कार्मुके।
मृगानुसारिणं साक्षात्[1] पश्यामीव पिनाकिनम्[2] ॥६॥

Charioteer—(*Looking at the king and the stag*) O Long-lived Sir, lending my gaze on the stag and on you with your bow strung, I see,[1] as it were, the Pinãka-holder (*S'iva*)[2] pursuing the deer in a visible[3] form. (6)

तत इति—ततः प्रस्तावनयाः अन्ते 'सशर-चाप-हस्तो' धृत-धनु-र्बाणः 'सूतश्च' सारथिश्च ('सूतश्च सारथौ तक्षिण, क्षत्रियाद् ब्राह्मणी-सुते इति विश्व-मेदिन्यौ) 'रथेन सहार्थे ३या ['विनापि तद्योगं तृतीया। "वृद्धो यूना तल्लक्षणश्चेदेव विशेषः" (१।२।६५) इति निर्देशात्' इति भट्टोजिः]। [अत्र "ततः प्रविशति" इत्यारभ्य द्वितीयाङ्के "उभौ परिक्रम्योपविष्टौ" इत्यन्तेन सार्धाङ्केन मुख-संधिः। तल्लक्षणं तु दर्पणे "यत्र बीज-समुत्पत्तिर्नानार्थ-रस-सम्भवा। प्रारम्भेण समा-युक्ता तन्मुखं परिकीर्तितम्"। आरम्भ-बीजयोर्लक्षणे पुनः तत्रैव—"भवेदारम्भ औत्सुक्यं यन्मुख्य-फल-सिद्धये" इति। यथात्र "राजा—भवतु। तामेव पश्यामि" ॥ "अल्पमात्रं समुद्दिष्टं बहुधा यद्विसर्पति। फलस्य प्रथमो हेतुर्बीजं तदभिधीयते।" यथात्र—"पुत्रमेवं-गुणोपेतं चक्रवर्तिनमाप्नुहि" इति। यथा च 'वैखानस—इदानीमेव दुहितर शकुन्तलम् अतिथि-सत्काराय नियुज्य" इति ॥] सूत इति—

सूतस्य संस्कृतं पाठ्यं ('पुरुषाणामनीचानां संस्कृतं स्यात् कृतात्मनाम्" इति दर्पणः ; अतः "आयुष्मान् इति वाच्यस्तु रथी सुतेन सर्वदा" इति भरतोक्तेः (१७।७४) 'आयुष्मन्' इति संबुद्धिः।) कृष्णेति—"कृष्णः" च 'सारः' शबलः विविध-वर्णश्च इति 'कृष्णसारः ('वर्णो वर्णेन'–२।१।६९ इति समासः) तस्मिन् धावमाने मृगे, ज्याम् अधिगतम् इति 'अधिज्यम्' ('अत्यादयः क्रान्ताद्यर्थे द्वितीयया'-वा:(२।४।७९ इति प्रादिसमासः) गुण-समन्वितं 'कार्मुकं' कर्मणे युद्धाय प्रभवति यत् ('कर्मण उकञ्'–५।१।१०३) धनुः यस्य, तस्मिन् 'अधिज्य-कार्मुके त्वयि' वुष्यन्ते 'च चक्षुः' (जात्यैकवचनं) 'ददत्' अर्पयन्, ['नाऽभ्यस्तात् शतुः' (७।१।७८) इति नुमभावः। 'च'-कारेण तुल्य-कालता द्योत्यते। ततश्च एकस्य चक्षुषो युगपत् अनेकत्र वर्तमानत्वात् विशेषालंकारः।] 'मृगानुसारिणं' (३।२।७८) दक्ष-यज्ञे हरिण-रूप-धर-पलायमान-यागाऽनुसारिणं 'साक्षाद्' प्रत्यक्षं मूर्तिमन्तम् इति यावत् ('साक्षात् प्रत्यक्ष-तुल्ययोः'—इत्यमरः) 'पिनाकिनं' पिनाकः अजगवं नाम धनुः अस्य अस्ति इति पिनाकी (५।२।११५ ; 'पिनाकोऽस्त्रि रुद्रचापे पांशुवर्ष-त्रिशूलयोः' इति मेदिनी) तं शिवं, 'पश्यामीव' (अत्र पिनाकिनः साक्षात्वाभावेऽपि तत्-सम्भा-वनावशात् भावाभिमानिनी क्रियोत्प्रेक्षालंकारः। अत्र नोपमा। 'नोपमानं तिङन्तेन' इति भामहोक्तेः। 'ददच्चक्षुः', 'पश्यामीति' क्रियाद्वय-ग्रहणाच्च। उपमायां तु "पिनाकिनमिव साक्षात् पश्यामि" इत्येवं योजने ददच्चक्षुरित्येनन पौनरुक्त्यमेव। अपि च, परोक्षस्यापि पिनाकि-व्यापारस्य प्रत्यक्षायमाणत्व-वर्णनात् भाविकालङ्कारश्च, तल्लक्षणं यथा दर्पणे—अद्भुतस्य पदार्थस्य भूतस्याथ भविष्यतः। यत् प्रत्यक्षायमाणत्वं तद्भाविकमुदाहृतम्"। श्रुति-वृत्त्यनुप्रासौ श्लोकः छन्दः) ॥६॥

8n.—1. अङ्कः—'अन्तर्निष्क्रान्त-निखिल-पात्रोऽङ्क इति कीर्तितः'–SD. VI. In a Sanskrit drama an Act means that period at the end of which 'all the *Dramatis Personae* leave the stage.' **2.** सूत—सुवति गयमति अश्वान् इति सू+क्त–BhD., 'क्षत्रियात् विप्र-कन्यायां सूतः भवति जातितः–MS. X. 2. The Sūtas (सारथि) though they follow the profession of a charioteer (*Cf.* 'सूतानाम् अश्व-सारथ्यम्'–MS. X. 47) are to be endowed with multifarious qualifications. *Cf.* 'निमित्त-शकुन-ज्ञानी हय-शिक्षा-विशारदः। हयाऽऽयुर्वेद-तत्त्वज्ञः भूरिभाग-विशेषवित्॥ स्वामि-भक्तो महोत्साहः सर्वेषाञ्च प्रियंवदः। शूरश्च कृत-विद्यश्च सारथिः परिकीर्तितः"—MP. Ch. 189. In old times सारथिs were highly respected. The charioteer *Sumantra* was the 8th minister of Daśaratha—"सुमन्त्र

स्थाष्टमोऽर्थवित्" । Lord Kṛṣṇa and king Śalya also played the part of charioteers in Kurukṣetra war. 3. आयुष्मन्—The charioteer is to address the रथी as आयुष्मन्, probably because he had to accompany the king in times of war and hunting-excursion which involved risk of life. (*Com.*) 4. कृष्णसारे—सार (*variegated*) includes black colour (कृष्ण) also, hence tautology. [*Cf.* 'सद्रत्न-मुक्ता-फल-वज्रभाञ्जि'—Bk. 1. 7. where रत्न includes मुक्ता (*pearl*) and वज्र (*diamond*).] To avoid difficulty, say शबलत्वेऽपि कृष्णवर्णस्य आधिक्य-द्योतनार्थं 'कृष्ण' इत्यस्य पृथग्निर्देशः। 5. मृगानुसारिणं—Refers to the **Horse-sacrifice of Dakṣa, where all gods but S'iva were invited. In course of the sacrifice, words of insult were uttered against S'iva in the presence of Satī, wife of S'iva. Mortified at this Satī renounced her body on the spot. Then came S'iva, highly indignant, killed Dakṣa, drove away the guests and pursued the 'Yajña' that fled through the air in the guise of a fleet gazelle, with** (पिनाक=अजगव) **bow in his hand. The Mahā.** (सौप्तिक, १८) **gives a different story. It was the gods that instituted the sacrifice where no portion of the offering was offered to S'iva and this was the cause of his ire.** *Cf.* The idea with 'विद्रुत-क्रतु-मृगानुसारिणं येन बाणमसृजद् वृषभध्वजः'—Ra. XI. 44 ; Rat. I. 3. VaP. Ch. 30. 156-157, where, वीरभद्र by the order of Śiva pursued the deer. Also Mahā. Śānti, 290, Anuśāsana. 265 ; Kāśīkhaṇḍa, 289.

Text:—राजा—सूत, दूरममुना सारङ्गेण वयमाकृष्टाः। अयं पुनरिदानीमपि—

स्रग्धरा (म र भ न य य य)

ग्रीवा-भङ्गाभिरामं[१] मुहुरनुपतति स्यन्दने बद्ध-दृष्टिः[२] ।
पश्चार्धेन[३] प्रविष्टः[४] शर-पतन-भयाद्[५] भूयसा पूर्वकायम्[६] ॥
दर्भैरर्धावलीढैः[७] श्रम-विवृत-मुख-भ्रंशिभिः[८] कीर्ण-वर्त्मा ।
पश्यो-दग्र-प्लुतत्वाद्[९] वियति बहुतरं[१०] स्तोकमुर्व्यां[११] प्रयाति ॥७॥

तदेषः कथमनुपतत एव मे प्रयत्न-प्रेक्षणीयः[१२] संवृत्तः ?

King—Charioteer, we have been brought far away by this dappled hart. Even now—flinging glances,[2] ever and anon, on the chasing car gracefully[1] by bending the neck,[1] having[3] with the major portion of his hind-half, entered his forepart[3] dreading[4] the descent of the arrow,[4] having his path strewn with half-chewed[5] Darva grass[5] falling[6] from his mouth agape through exhaustion[6]—behold, how he, by reason of his lofty bounds[7], is treading mostly in the air[8] and very[9] little on the earth.[9] (7) How is it that he has become hardly visible, though I am pursuing him (*closely*) ?

V. L.—'बद्ध-दृष्टिः'—R. V. M. S. 'दत्त-दृष्टिः'—B. P. HS.

राजेति—'वयम्' ['अस्मदो द्वयोश्च' (१।२।५९) इति द्विवचनार्थे बहुवचन-प्रयोगः] 'आकृष्टाः' प्रापिताः। **अयमिति**—'पश्य' इत्यस्य सम्पूर्ण-वाक्यं कर्म। यद्वा 'पश्य' इति विस्मये। (**'पश्य' इति अव्ययं** प्रशंसार्थे विस्मयार्थे च शब्दरत्नावल्यां दृश्यते), 'अयं' पुरतो दृश्यमानः कृष्णसारः 'पुनरिदानीमपि 'अनुपतति' पश्चात् धावति 'स्यन्दने' रथे ('स्यन्दनं तु स्तुतौ नीरे तिनिशे ना रथेऽस्त्रियाम्" इति मेदिनी) 'मुहुः' वारंवारं ("पौनः-पुन्ये भृशार्थे च सद्यो वा स्यान्मुहुः पदम्' इति वैजयन्ती) 'ग्रीवायाः' कन्धरायाः 'भङ्गेन' परावर्तनेन 'अभिरामं' रम्यं यथा स्यात् तथा 'दत्तो' न्यस्ता 'दृष्टिः' चक्षुः (करणे क्तिन् ३।३।९४। 'दृष्टिः ज्ञानेऽक्ष्णि दर्शने' इति हैमामरौ)। येन सः, **कियद्दूरे स्यन्दनो वर्तते इत्याशयेन मुहुर्मुहुः परिवृत्य विलोकयन् इत्यर्थः**। 'शरस्य' बाणस्य 'पतन-भयात्' स्वगात्रे पतनाऽऽशङ्कया, 'भूयसा' (६।४।१५८) आधिक्येन 'पश्चार्धेन पूर्वकायं प्रविष्ट इव [इति **गम्योत्-प्रेक्षा**।] अस्मिन् भागे एव शरः पतिष्यति इति त्रासेन संकुचित-पश्चाद्भाग इति हृदयम्। भय-त्रपादिभिः अङ्ग-संकोचे प्रायशः 'प्रवेश'-पदस्य प्रयोगो लक्ष्यते। (अपरः अर्धः, इति पश्चार्धः, 'पश्चात्' (५।३।३२) इति सूत्रेण 'अर्धोत्तरपदस्य दिक-पूर्वपदस्याऽपर-शब्दस्य'पश्च'-भावो वक्तव्यः' इत्युक्त्वा 'अर्धं विनापि पूर्वपदेन पश्च-भावो वक्तव्य.' इति वार्तिकेन पश्चार्ध इति सिद्धम्, यद्वा 'पश्चात् अर्धः इति पश्चार्धः इति पृषोदरादित्वात् साधु (६।३।१०९)। 'श्रमेण धावन-जन्य-क्लेशेन 'विवृतं' प्रकटितं यत् मुखम्' आननं तस्मात् 'भ्रंशिभिः' अधः पतद्भिः अर्धम्' अपरिसमाप्तं यथा स्यात् तथा 'अवलीढैः' चर्वितैः' 'दर्भैः' कुशैः 'कीर्ण-वर्त्मा' चिह्नित-मार्गः सन् 'उदग्रम्' उन्नतं ('उच्च-प्रांशू—न्नतो-दग्रो-च्छ्रिताः तुंगे' इत्यमरः)—'प्लुतं' लम्फः यस्य, तस्य भावः, उदग्र-प्लुतत्वं तस्मात्, 'वियति' आकाशे (वि-पूर्वात् यमेः 'अन्येभ्योऽपि दृश्यते' (३।१।७५) इति क्विप्। '**क्वौच गमादीनाम्**', वाः—(६।४।४०) इति

म-लोपे तुक्-(६।१।७१) 'बहुतरम् अधिकतरम् 'उर्व्याम्' पृथिव्यां 'स्तोकम्' अल्पं 'प्रयाति' प्रकृष्टं गच्छति। अनेन गमनस्य प्रकर्षः उक्तः। 'भया' भूयेति, 'यतियाती'-ति छेक श्रुति-वृत्त्यनुप्रासाः। श्रमेण इत्यत्र रसनाकाव्यलिङ्गम्। तल्लक्षणं यथा—'प्रत्युत्तरोत्तरार्थं यत्पूर्व-पूर्वार्थं-हेतुतः। रसनाकाव्यलिङ्गं तत्' इति। यथा-वद्वस्तु-वर्णनात् स्वभावोक्तिश्च। स्रग्धरा वृत्तम्॥७॥) तदिति—'मे' ('कृत्यानां कर्तरि वा' (२।३।७१) इति प्रेक्षणीय इत्यस्य कर्तरि षष्ठी पाक्षिकी) "प्रयत्नेन आयासेन 'प्रेक्षणीयः दर्शनीयः' 'संवृत्तः' जातः। 'कथम्' इति साश्चर्यप्रश्ने।

9n.—1. 'अयम् पुनः, etc.—'अयम्' is expected to take २या, being the object of पश्य, while as a nominative of 'धावति' (54n. 4) it is to take १मा। To avoid difficulty, parse **'पश्य' as an अव्यय** (*Com.*), or justify the use of प्रथमा विभक्ति by the dictum "अपादान-सम्प्रदान-करणाऽऽधारकर्मणाम्। कर्तुश्चान्योऽन्यसन्देहे परमेकं प्रवर्तते॥" Strictly speaking this कारिका is not necessary, as the arrangement of कारक's in Pāṇini's grammar is sufficient for the removal of all doubts. Pāṇini's arrangement is as follows :— 'ध्रुवम् अपाये अपादानम्' (१।४।२४) ; 'कर्मणा यमभिप्रैति स सम्प्रदानम्' (१।४।३२) ; 'साधकतमं करणम्' (१।४।४२) ; 'आधारोऽधिकरणम् (१।४।४५) ; 'कर्तुरीप्सित-तमं कर्म (१।४।४९) ; 'स्वतन्त्रः कर्ता' (१।४।५४) ; Now apply the dictum "विप्रतिषेधे, परं कार्यम् (१।४।२) which will give the same result. In fact the whole sentence "अयं वियति...प्रयाति" is the object of 'पश्य'। 'पश्य मृगो धावति' इत्यादौ तु मृग-कर्तृकं गमनं दृशि-क्रियायाः कर्म, प्रधानं दृशि क्रियेव—Prabhā. पुनः implies भेद —Difference ; 'पुनरप्रथमे मतम्। अधिकारे च भेदे च तथा पक्षान्तरेऽपि च' इति मेदिनी। Though he has been running for a long time, there is no difference in his speed. **2.** स्यन्दने—स्यन्दन lit. means that which runs fast, hence a chariot. Mark the propriety of the word. **3.** दत्त-दृष्टिः—Found in the **oldest Mss.** is decidedly a **better** reading than **'बद्ध-दृष्टिः'** (*Cf.* Ra. 1-40) which requires the gaze of the stag to **be fixed on** the car, which is highly improbable with his running in full speed for life. Besides **मुहुः** suggestive of **frequent interruption** in the look is not in consonance with it. The competitors in any athletic sports for hundred yards race will

corroborate that steadfast look causes retardation and not acceleration. Curiously enough R reads 'बद्ध-दृष्टिः' but explains it in the Com. as 'वारंवारं दत्त-चक्षुः'which clearly supports our view. 4. पश्चार्धेन—'धान्येन धनवान् इतिवत् अभेदे करणे ३या, for it is the पश्चार्ध which was considerably drawn by the antelope (*to avoid the descent of arrows*), but our poet identifies the antelope with the hind part (haunch). 5. शर-पतन-भयात्—'विभाषा गुणेऽस्त्रियाम्' (2. 3. 25) इति हेतौ पञ्चमी। The hinder part of the body is specially drawn in, for it is the hinder part that will be wounded when the arrow is hurled from behind. 6. पूर्वकायम्—Forepart of the body. चीयते अन्नादिभिः इति चि+घञ् करणे=कायः by (च=क)- ('निवासचिति &c.—३।३।४१). पूर्वं implies a certain part (अवयव) of the body, hence एकदेशी समासः (पूर्वं कायस्य) by 'पूर्वाऽपर—(2. 2. 1), and this bars षष्ठीतत्। 7. कीर्णवर्त्मा—"The path is strewn", but the compound does not mention with which the path is strewn, and the सापेक्ष word दर्भैः is left uncompounded. This is faulty. दर्भैः should have been first compounded with 'कीर्णः' and then with 'वर्त्मन्' giving the form दर्भ-कीर्ण-वर्त्मा, but this sort of uses is allowed if the meaning is 'गमक' i.e. **easily understood**. ("सापेक्षत्वेऽपि गमकत्वात् समासः"). Read—सापेक्षे प्रत्ययो न स्यात्, समासो वा कथञ्चन। सापेक्षं तत् विजानीयात् असमस्त-विशेषणम्॥ विशेषणान्यसापेक्षे नं समासो विशेषनैः। तैरेवोभ्युत्थिताकाङ्क्षे नं समासो निवर्तते॥" Also 'प्रतियोगि-पदादन्यद् यदन्यत् कारकादपि। वृत्ति-शब्दैकदेशस्य सम्बन्धस्तेन नेष्यते॥ तरुण्यो वृषलीभार्यः, प्रवीरं पुत्रकाम्यति। ऋद्धस्य राज-मातङ्गा इति न स्युः प्रयुक्तयः। चैत्रस्य दास-भार्येयं, लून-चक्रो रथो मया। शरैः शातित-पत्रोऽयं वृक्षादिति सतां मतम्॥"——The gist is that no एकदेशान्वय (i. e. गमकत्व) is valid unless the relation between the separated word (दर्भैः) and one of the compounded words (कीर्ण) is either of प्रतियोगिपद((i.e. शेषे षष्ठी), or that of *Kāraka*. Here the relation being one of Kārakas (i.e. करण), गमकत्व is justified. Vide Ra. I. 15; XIII. 25; XIV. 25; II. 27 Bk. I. 11; Rat. I. 7; (228. n1). 8. अवलीढैः—अव+

लिह्+क्त कर्मणि अवलीढ़ाः तैः— Eaten ; ('होढः,' 8. 2. 31.) इति हस्य ढत्वम्। 9. प्लुतत्वात् &c.—'प्लु' means to swim, so owing to continuous and long boundings of the stag, his feet remaining more in the sky and skimming the ground hardly touched it, so it appeared that they were swimming through the air. "अमन्यीच्च परानीकमप्लोष्ट च निरङ्कुशः"—BK. XV. 46. उदग्रः—High. lofty. Vide Ra. II. 53 ; IV. 22 ; VI. 32.

Remark :—This stanza is quoted by KPr as an instance of भयानक-रस। There are दुःश्रवत्व-दोष owing to 'उर्व्याम्', and **'वाच्यानभिधान-दोष'** as (समुच्चयार्थक) 'च' has not been used after 'उर्व्याम्'। "याति भूमौ च किञ्चित्" इति पाठे तयोः समाधानम्—HS.

Text :—सूतः—आयुष्मन्, उद्घातिनी[1] भूमिरिति मया रश्मि-संयमनाद्[2] रथस्य मन्दीकृतो[3] वेगः। तेन मृग एष विप्रकृष्टान्तरः[4]। सम्प्रति सम-देश-वर्तिनस्ते न दुरासदो[5] भविष्यति।

Charioteer—O Long-lived Sir, the ground being undulatory[1] I have lessened[3] the speed of the car, by[2] tightening the reins.[2] Hence the distance[4] of the deer (*from us*) has become very great.[4] Now that you are on even ground, it will not be difficult[5] to overtake[5] him.

V. L.—'उद्घातिनी'–R. V.B. .'उत्खातिनी'—M. S. R has 'संवृत्तः' after 'विप्रकृष्टान्तरः'। 'समदेशवर्तिनस्ते'—R. V. M. S. 'समदेशवर्ती न ते'—B. P. HS.

राजा—तेन हि मुच्यन्तामभीषवः[1]।

King—Then do slacken the reins.[1]

सूतइति—अस्मिन् प्रदेशे 'भूमिः उद्घातिनी' स्खलन-योग्या ('उद्घातः कथ्यते पाद-स्खलने समुपक्रमे' इति विश्वः, तत्र मत्वर्थीय इनिः) क्वचित् उन्नता क्वचित् अवनता इत्यर्थः। 'इति' हेतोः मया 'रश्मीनां' प्रग्रहाणां। ('रश्मिः पुमान् दीधितौ स्यात् पक्ष्म-प्रग्रहयोरपि' इति मेदिनी) 'संयमनात्' आकर्षणात् 'रथस्य वेगः मन्दीकृतः अल्पी-कृतः 'तेन' हेतुना 'एष मृगः विप्रकृष्टम्' अतिदूरं ('नेदिष्टमन्तिकतमं, स्याद् दूरं

विप्रकृष्टकम्' इत्यमरः) 'अन्तरं' देशाऽवकाश-रूपं यस्य तादृशः संवृत्तः। भवतः सकाशात् मृगस्य व्यवधानम् अतिमहत् जातमित्यर्थः। 'समे' उद्घात-रहिते देशे 'वर्तते' यः तथाविधस्य 'ते' तव सम्बन्धे 'दुरासदो खलु' दुष्प्रापः 'न भविष्यति' ('न लोका-व्यय-निष्ठा-खलर्थ-तृनाम्' (२।३।६९) इति निषेधात्, अत्र शेषे षष्ठी।) राजेति—'तेन हि' तस्मात् हेतोः 'अभीषवः' रश्मयः ('अभीषुः प्रग्रहे रश्मौ' इति मेदिन्य-मरौ। 'अभीशुः' इत्यपि साधुः,छन्दसि अस्य बहुल-प्रयोगात्) 'मुच्यन्तां' शिथिलीक्रियन्ताम् इति।

10a.—1. उद्घातिनी—Bumpy, उद्घातः— stumbling of feet, (Com.)—jolting, Ra. II. 72 ; VS. II. 28]+इनि or उत्+हन्+णिनि ताच्छील्ये, स्त्रियां ङीप् (3. 2. 78). **मन्दीकृतः—'च्वि' actually comes** when the change is **real** and not **metaphorical.** This is the intention of Lord Pāṇini. Vide (3. 1. 76). **2. सम-देशवर्तिन स्ते—** Is to be **preferred**, as the reading of (B) gives the stag scope enough for occupying the even ground which but increases the distance, while with the former reading the king gets the advantage. (B) may be justified, if सम-देशवर्ती refers to the king's chariot and **'ते' (indeclinable) is explained as 'त्वया'** । *Cf.* 'ते'-'मे' शब्दौ निपातेषु'—KSV. V. 2. 9. i.e., the indeclinables **'ते'** and **'मे'** mean **'त्वया'** and **'मया'** । Hence construe thus—'सम्प्रति यतः' तव रथः समदेशवर्ती' अतः स मृगः 'न ते' (**त्वया**) 'दुरासदः भविष्यति'। ते (न दुरा-सदः)—शेषे षष्ठी-'सर्वोऽयं कारक-षष्ठयाः प्रतिषेधः, शषे षष्ठी तु स्यादेव'—SK. 627.

Text : सूतः—यथाज्ञापयत्यायुष्मान्। (रथवेगं निरूप्य) आयुष्मन्, पश्य पश्य—

मुक्तेषु[1] रश्मिषु निरायत-पूर्व-काया[2]
वसन्ततिलका निष्कम्प-चामर-शिखा निभृतोर्ध्व-कर्णाः[3]
(त भ ज ज ग ग) आत्मोद्धतैरपि रजोभिरलङ्घनीया[4]
धावन्त्यमी मृग-जवाक्षमयेव[5] रथ्याः[6] ॥८॥

Charioteer—As the long-lived Sir commands. (*Gesticulating speed of the car*). Behold, long-lived Sir, behold. The reins being loosened,[1] the horses[6] with[2] their fore-frames fully out-

stretched,[2] with their yak-tail-crests (*on their heads*) motionless, and their ears erect[3] and still[3], and not[4] outfled even by the dust[4] raised by themselves,[1] are galloping, as if jealous[5] of the speed of the antelope.[5] (8).

V. L.— 'यथा—B. 'यत्—R. V. M. The last three lines occur in B, P thus—'स्वेषामपि प्रसरतां रजसामलङ्घ्याः। निष्कम्प-चामर शिखाश्च्युतकर्णभङ्गा धावन्ति वर्त्मनि तरन्ति नु वाजिनस्ते ॥ [* * *These steeds gallop on the road, nay (I think) they swim along.]

सूत इति—'रथवेगं निरूप्य' हस्त-पादादि-सञ्चालनेन नाटयित्वा इति कवि-वचनम्। 'पश्य-पश्य' इति विस्मये द्विरुक्तम् ('विवादे विस्मये हर्षे खेदे दैन्येऽव-धारणे। प्रसादने संभ्रमे च द्विस्त्रिरुक्तं न दुष्यति' इति)। **मुक्तेष्विति**—'रश्मिषु' प्रग्रहेषु 'मुक्तेषु' शिथिलीतेषु ('यस्य च भावेन भाव-लक्षणम्'-२।३।३७ इति सप्तमी) 'अमी रथ्याः' रथ-वाहकाः अश्वा ('तद्वहति' रथयुगप्रासङ्गम्'४-४-७६) इति यत्; 'रथ्यः वोढ़ा रथस्य यः' इत्यमरः) 'मृगस्य' पलायमान-हरिणस्य 'जवः' वेगः ('जवो वेगवति त्रिषु; पुलिङ्गस्तु भवेत् वेगे चोड्रपुष्पे जवा मता' इति मेदिनी) तस्मिन् 'अक्षमया' ईर्ष्यया सोढुम् अशक्ततया इति यावत् 'इव' (इति **हेतूत्प्रेक्षा**)। ('ईर्ष्या अक्षमा' इति क्रुध-द्रुहेर्ष्या—'(१।४।३७) इति सूत्र-व्याख्यायां दीक्षितः)। 'निःशेषेण आयतः' विस्तारितः 'पूर्वकायः' येषां तादृशाः, 'निष्कम्पाः' स्थिराः (अति-वेगात् कम्पो न लक्ष्यते) 'चामराणां' चमराख्य-मृग-विशेषाणां पुच्छ-लोम-निर्मित-व्यजन-विशेषाणां शोभार्थं शिरसि बद्धानां 'शिखा' अग्रभागा येषां तादृशाः, ('चामरा चामरं व्याल-व्यजनं रोम-गुच्छकम्' इति रभसः) 'निभृतौ' निश्चलौ 'ऊर्ध्वौ' उन्नमितौ च 'कर्णौ' येषां तादृशाः, 'आत्मभिः उद्धतैः' उत्थापितैः 'अपि' ('नेम्युत्थितैस्तु सुतराम् इत्यपि-शब्दार्थः) 'रजोभिः' धूलिभिः; 'अलङ्घनीया' अनतिक्रमणीयाः सन्तः 'धावन्ति'। (इति **सम्बन्धेऽपि असम्बन्ध-रूपाऽतिशयोक्तिः**। विशेषण-चतुष्टयेन वेगा-तिशयो व्यज्यते। "निरायत-पदेन किमतिदीर्घ उत निर्धनादिवत् आयतत्वा-भावविशिष्टो बोद्धव्य इति संदेहात् **सन्दिग्धता-दोषः**। स तु "महायत-पूर्वकाया" इति पाठेन परिहार्य" इति सिद्धान्तवागीशाः। **स्वभावो-क्तिरलंकारः। वृत्त्यनुप्रासश्च। वसन्ततिलकावृत्तम्**।) ॥८॥

11n.—1. निरूप्य—Having gesticulated to create an impression of the speed of the car. In fact "chariot with horses' or a 'real deer' was left to the imagination of the audience,

and was never intended to be brought on the stage. 2. **निरायत-पूर्वकाया** &c.—The four attributes indicate great speed of the steeds. 3. **निष्कम्प-चामर** &c.—चमर+अण् स्वार्थे= 'प्रज्ञादिभ्यश्च (5. 4. 38). Optionally 'चामरा' with टाप् (Com.); चामर is a kind of fan made of the white bushy tail of 'chamara' (*Yak or Bos Grunniens*) and is used for whisking flies. It was in ancient times used by the king (Vide भोजराज-कृत-युक्ति-कल्पतरु) and was also placed as an ornament between the ears of the horses. *Cf.* 'चित्रारम्भ-**विनिश्चलं** हरिशिरस्यायामवच्चामरम्'—Vk. 1. 4. 4. निभृत &c.—'निभृत' means **विनीत** ('निभृत विनीत-प्रश्रिताः समा' इत्यमरः), and sometimes 'निर्जन' as in ('निभृत-निकुञ्जगृह गतया निशि रहसि'—GG.; also **'still'**, **"motionless"**. *Cf.* 'निभृत-द्विरेफं'—Ku. III. 42; VI. 2; MD. II. 7. अनिभृताः चञ्चलाः चपलाः —MN—therein. Ki. III. 60; XIII. 66. M without citing any authority explains it as **"ears turned backwards"**, and observes that this position will give least resistance to the wind Most likely M was thinking of 'नभसा निभृतेन्दुना तुलाम्' &c.—Ra. VIII. 15, where 'निभृत' means **'setting or falling downwards.**' 5. **आत्मोद्धतैः** &c—Ra. I. 45; IV 71. The steeds were moving with such speed that they left the dusts raised by their hoofs far behind them before they could rise to the height of their backs. This also suggests that the wind was favourable. The wheels being behind the horses, the dusts raised by the wheels have been rightly overlooked by the poet. *Cf.* 'रजश्चाश्वोद्धुतं पतति पुरतो नानुपतति'——PN. III. 2.; ŚPB. XII. 12. 6. **मृगजव** &c.— 'जव' means both **'speed'** and **'speedy'**, in the latter sense it is derived with अच् (not अप्) in the कर्तृवाच्य (3. 1. 134). 7. **रथ्याः**—'रथ्यः' means **'horse'**, but 'रथ्या' (*Fem.*). means **'path.'** *Cf.* Bengali—'रास्ता'। 88. *Cf.*—The idea with 'अनेन रथवेगेन पूर्व-प्रस्थितम् वैनतेयमपि आसादयेयम्'—Vik. 1.

राजा—सत्यमतीत्य हरितो हरींश्च वर्तन्ते वाजिनः। तथाहि—

शिखरिणी　यदालोके[1] सूक्ष्मं व्रजति सहसा तद्विपुलताम्[2]
(यमन-　यदर्द्धा[3] विच्छिन्नं भवति कृत-सन्धानमिव[4] तत्।
सभलग)　प्रकृत्या[5] यद्वक्रं तदपि सम-रेखं[6] नयनयोर्
न मे दूरे किञ्चित् क्षणमपि न पार्श्वे रथ-जवात् ॥९॥

सूत, पश्यैनं व्यापाद्यमानम्।　(इति शर-सन्धानं नाटयति)।

King—In sooth, the horses are (*now*) outstripping the coursers of the Sun (*Harit*) and Indra (*Hari*). For, because of the speed of the car, that which is minute to the view[1] presently assumes magnitude,[2] that which is really[3] disjointed seems at once to be joined[4] together; that which is naturally[5] bent appears straight[6] to (*my*) eyes ; nothing remains afar nor anear even for a moment. (9)

Charioteer, see him being killed (*Gesticulates aiming of the shaft.*)

V. L.—'यदद्धा'--B. 'यर्द्धे'—R.M.S. 'यदन्तः'—V. 'मे दूरे न पार्श्वे' —R. B. M. S. 'मे पार्श्वे'—'न दूरे'—V.

राजेति—'सत्यम्' उत्प्रेक्षा-द्योतकमिदम्। 'वाजिनः' मम अश्वाः [अवश्यं वजति। वज गतौ। 'आवश्यकाऽऽधमर्ण्ययोः णिनिः' [३।३।१७०] इति णिनिः; यद्वा, वाजा वेगाः पक्षाः वा सन्ति अस्य इति इनिः (५।२।११५)] 'हरितः' सूर्याश्वान् ('हरति तमः स्वभासा इति हरित्' इति यास्कः। 'सूर्याश्वे वाताट-हरितौ समौ' इति त्रिकाण्डशेषः), 'हरीन्' इन्द्राश्वान् ('हरी इन्द्रस्य, हरितः आदित्यस्य' इति निरुक्त-वचनात् ॥१।१५॥) 'च अतीत्य' वेगेन पराजित्य 'वर्तन्ते'। ('अति-शब्दः प्रशंसायां प्रकर्षे लंघनेऽपि च' इति विश्वः, अपि च 'विक्रमाऽतिक्रमा-बुद्धि-भृशार्थाऽति-शयेष्वितिः' इति गणकारः)। 'तथाहि' तमेवार्थं जानीहि (**तथेत्यगण-परिपठितो धातु गतौ इति कातन्त्र-परिशिष्ट-टीकायां गोपीनाथपादाः**)। **यदिति**—'रथस्य जवात्' वेगात् (हेत्वर्थे ५मी २।३।२७) 'आलोके' दर्शने ('आलोकस्तु पुमान् द्योते दर्शने वन्दिभाषणे' इति मेदिनी) 'यत् सूक्ष्मम्' अतिक्षुद्रं दृश्यते दूरत्वात्, 'तत्' वस्तु 'सहसा' अकस्मादेव, तस्मिन्नेव क्षणे इति यावत्। 'विपुलतां' पृथुलतां 'व्रजति' प्राप्नोति। समीपाऽऽगमनात् स्थूलं दृश्यते इत्यर्थः। ('विपुलः पृथुलेऽगाधे मेरु-पश्चिम-भूधरे' इति विश्व-मेदिन्यौ)। ("सूक्ष्मं विपुलतां व्रजतीति" इति **विरोधा-भासालंकारः**') ('यत्' वस्तु 'अद्धा' तत्त्वतः सत्यमित्यर्थः (विच्छिन्नं' द्विधाभूतं

दृश्यते, 'तत्' वस्तु 'सहसा कृतं सन्धानं' संयोगः मेलनमिति यावत् यस्य तत् अवि-भक्तम् 'इव भवति' प्रतिभाति इत्यर्थः। 'यत्' वृक्ष-विटपादिकं वस्तु 'प्रकृत्या' स्वभावेनैव 'वक्रं' कुटिलं 'तदपि सहसा नयनयोः' सम्बन्धे एव न तु वस्तुतः 'समा' तुल्या 'रेखा' यस्य तत् 'समरेखम्' ऋजु इत्यर्थः, प्रतीयते इति शेषः। (**स्वभावोक्तिरलंकारः। उत्प्रेक्षा च**) 'क्षणमपि' मुहूर्तमपि न 'किञ्चित्' किमपि वस्तु 'मे दूरे' ('दूरा-न्तिकार्थः षष्ठयन्यतरस्याम्', [२।३।३४] इति षष्ठी, पक्षे ५मी) तिष्ठति, 'न पार्श्वे' निकटे च तिष्ठति, रथ-जवस्तु दूरदृष्टं नेदयति, आसन्नं च दवयति झटितीति भावः ('पार्श्वोऽवयवभेदे स्याच्चक्रोपाय-समीपयोः' इति धरणिः')। (**यथासंख्यालङ्कारः। रथ-जवादिति हेतुश्च।** 'यदा यदेति' 'वति वतेति 'नय नयो-रिति **छेकानुप्रासस्य वृत्त्यनुप्रासेन सह संसृष्टिः।** ताभ्यां च सह **श्रुत्यनुप्रासस्य** एकवाचकाऽनुप्रवेश-लक्षणः संकरः। अन्त्यपादे समुच्चयार्थकः 'च-कारः' 'वा-कारो' वा वक्तव्यः, किन्तु नोक्तः, अतो **वाच्यानभिधान-दोषः।** स तु 'न दूरे किञ्चिद्वा क्षणमपि न पार्श्वे रथजवात्' इति पाठेन समाधेयः। **शिखरिणी** वृत्तम्) ॥९॥ **सूतेति**—'व्यापाद्यमानं (व्यांपूर्वात् णिजन्तात् पदधातोः कर्मणि भविष्यति शानच्) (३. ३. १३१.) मया निहन्यमानम् हरिणमिति शेषः।

12n.—1. हरितः—Corresponding to the '*Greek Charites*'. Max Muller derives it from घृ *to shine*, *Cf.* ('घृणि घृत') which he says, has been replaced by हृ in Classical Sanskrit. Sāyaṇa explains **हरितः**—as सूर्य-रश्मयः which are considered to be the **seven horses** of the Sun (ṚV. 150, 8 ; 115, 4). Hence the sun is called 'हरिदश्व' (AK.) **2. हरीन्**—Thousand horses of Indra. Cf. 'रथं हरि-सहस्र-युजंनिनाय'—Ra. XII. 103 ; also "त्वक्केश-वलि-रोमाणि सुवर्णाभानि यस्य तु। हरि स्स वर्णतोऽश्वस्तु-पीत-कौशेय-सप्रभः"—Śālihotra. Vide Dr. Wilson's ṚV. P. 7. note. (1. 16. 1 ; 101, 10 ; 52, 8.) and hence Indra is called **हरिहय** ('जम्भभेदी हरिहयः स्वाराण् नमुचि-सूदनः'—AK), also '**हरिवाहन**' in Vik. III ; R explains हरित् as "green" ('पलाशो-हरितोहरित्'—AK) and explains '**च**' in the sense of **अपि**—'**चोऽप्यर्थे।** वेगेन सूर्याश्वा अपि एभिर्जिताः। अन्येषां का गणना इत्य-पि-शब्दार्थः'। Cf. 'हरिभिश्च वाजिभिः"—Ra. III. 43. **3. तथाहि**—(Ra. I. 29). This brings forth reasons for the justification of the exaggeration in सत्यम्। तथा (गतौ)+लोट् हि= **तथाहि**—

(Com.) 4. सहसा—(Ra. XII. 11.)—Goes with 2nd and 3rd lines also ; 'all on a sudden', hence it is suggestive of great speed. 5. अद्धा—तत्वतः—'तत्त्वे तु अद्धाऽञ्जसा द्वयम्,—AK.—'Which is really disconnected' ; अन्तः means मध्ये—Which is disconnected in the middle. The former seems to be preferable. 6. कृत-सन्धानम्—सहसा इति भावः। सम्—धा+ल्युट् भावे=सन्धानम्—Joining together. *Ra. XII.* 101 ; *I.* 11 *infra.* 7. पार्श्वे—पर्शूनां समूहः इति पर्शू+णस् by 'पर्श्वा णस् वक्तव्यः' (वाः ४।२।४३) ; [सित्वात् (१।४।१६) ; पदत्वेन भत्वाऽभावात् 'ओर्गुणः' (६।४।१४६) इति न]—A collection of ribs in the part of the body below the armpit, hence side in general. 'पार्श्वमन्तिके। कक्षाधोऽवयवे चक्रोपान्ते पर्शुगणेऽपि च' इति हैमः। 8. न मे दूरे &c.—*Cf.* the idea with 'अथ पुरुजवयोगान्नेवयद् दूरसंस्थं ववयवतितिरश्रेण प्राप्तमुर्वी-विभागम्'—BK. II. 55. This Śloka clearly testifies to Kāli's power of observation and delineation of natural phenomena. Now *Cf.* this Śloka with 'द्रुमा धावन्तीव द्रुत-रथ-गति" &c.—Pratimā. III. 2.

Text :—(नेपथ्ये) भो भो राजन्, आश्रम-मृगोऽयं न हन्तव्यो, न हन्तव्यः।

(*In the tiring room*)—Ho ! Ho ! King ! This stag belongs to the hermitage. It should not be killed, it should not be killed.

सूतः (आकर्ण्यावलोक्य च)—आयुष्मन्, अस्य खलु ते बाण-पथ-वर्तिनः कृष्ण-सारस्याऽन्तरे तपस्विन उपस्थिताः।

Charioteer (*Hearing and observing*)—Long-lived Sir, (*some*) anchorites have come in between the antelope that is (*now*) within the range of your dart (*and yourself*).

राजा (ससम्भ्रमम्)— तेन हि प्रगृह्यन्तां[1] वाजिनः।

King—(*Distractedly*)—Then indeed let the horses be reined[1] in.

सूतः—तथा। (इति रथं स्थापयति)।

Charioteer—As you command. (*Stops the car*).

V. L.—'बाणपथ'—V. M. 'बाण-पात'—R. B. S.

नेपथ्य इति। अप्रविष्टमेव यज्जवनिकान्तरे वदति तत् नेपथ्यम् इत्युच्यते।

[अन्तरसन्धिश्चायम्, (Intermediate Junctures) प्रकृतार्थ-सूचकत्वेन । 'स्वप्नो दूतश्च लेखश्च नेपथ्योक्तिस्तथैव च । आकाश-वचनञ्चेति ज्ञेया ह्यन्तरसंश्रय' इति मातृगुप्तपादाः] । 'मृगः अयं न हन्तव्य इत्यत्र संभ्रमे द्विरुक्तिः । सूत इति । 'बाणस्य पन्थाः' 'बाणपथः' । ['ऋक्पुरब्धूः पथामानक्षे' (५।४।७४) इति समासान्त-ग्रहणम्] तस्मिन् वर्तते यः तस्य, बाण-गोचरस्य 'कृष्णसारस्य अन्तरे' मध्ये ('अथ अन्तरेऽन्तरा । अन्तरेण तु मध्ये स्युः' इत्यमरः), 'तपस्विनः' तापसाः ('तपः सहस्राभ्यां वीनीनी'—५।२।१०२) । राजेति । 'वाजिनः प्रगृह्यतां', प्रग्रहाऽऽकर्षणेन स्थिरीक्रियन्ताम् । (प्र-पूर्वात् गृह्णातेः कर्मणि लोट्) । अन्यथा बाण-पथ-वर्ति-तापसा अश्वैःपिष्टाः स्युः ॥

13n.—1. बाणपथ &c.—The Samāsa is either with पथिन् (Com.) or with अकारान्त 'पथ' । *Cf.* 'वाटः पथश्च मार्गश्च'—Trikāṇḍaśeṣa, and Süvūticandra, 'त्वचि त्वचः किरोपि स्यात् किरौ प्रोक्तः पथः पथि' इति द्विरूपेषु विश्वः । "पथेन गतवांस्तेन राजा मृग-वधोत्सुकः" इति प्रयोगश्च"—Raghunātha. This indicates extreme proximity.

Text :—(ततः प्रविशति आत्मना-तृतीयो वैखानसः) । वैखानसः (हस्तमुद्यम्य))—राजन् आश्रम-मृगोऽयं न हन्तव्यो, न हन्तव्यः ।

न खलु न खलु बाणः सन्निपात्योऽयमस्मिन्
मालिनी मृदुनि मृग-शरीरे तूल-राशाविवाग्निः ।
(न न म क्व बत हरिणकानां जीवितं[1] चातिलोलं[2]
य य) क्व च निशित-निपाता[3] वज्र-साराः[4] शरास्ते ॥१०॥

श्लोक तत् साधु कृत-सन्धानं प्रतिसंहर[5] सायकम् ।
आर्त-त्राणाय[6] वः शस्त्रं न प्रहर्तुमनागसि[7] ॥११॥

(*Then enter a hermit with two others.*) Hermit (*Raising his hand.*)—Oh ! King, the deer belongs to the hermitage, it should not be killed, it should not be killed. Not indeed this dart should be allowed to descend on the tender body of this fawn—not indeed to be allowed, like fire on down in masses. Where, forsooth, is the existence[1] of these poor fawns all fickle,[2] and (*ponder*) where are your adamantine[4] shafts with keen[3] tips[3] ? (10) Withdraw, therefore, your arrow that has been well-aimed. Your weapon is to protect the distressed and not to smite the innocent (11).

V. L.—'सशिष्यो वैखानसः'—B. V. 'आत्मना-तृतीयो वैखानसः'—R. M. S.—'तूल'—B. P. HS. 'पुष्प'—S. M. 'तत् साधु'—R. V. M. तत् आशु'—B.'वः शस्त्रम्'—R. B. M. 'ते शस्त्रम्'—V. R & S omit Sl. 10

ततइति। 'ततः' स्थापिते स्यन्दने इत्यर्थः। 'आत्मना-तृतीयो' द्वाभ्याम् अन्याभ्यां सह इत्यर्थः। ['आत्मनश्च' (६।३।६), 'पुरणे इति वक्तव्यम्' इति तृतीयायाः अलुक्।] 'वैखानसः' तापसः (वैखानसः वनेवासी वानप्रस्थश्च तापस' इति वैजयन्ती)। **वैखानस इति** । अस्य संस्कृतं पाठयम्। (तदुक्तमादि-भरते––"परिव्राण्मुनि-शाक्येषु तापस-श्रोत्रियेषु च। द्विजा ये चैव लिङ्गस्थाः संस्कृतं तेषु योजयेत्"।) 'हस्तं' दक्षिण-हस्तम् 'उद्यम्य' उत्तोल्य निषेधार्थमिति-भावः। (**'राजन् इति ऋषिभिर्वाच्य'** इति भरतोक्तेः 'राजन्' इति संबुद्धिः)। **नेति**। 'मृदुनि' सुकोमले 'अस्मिन् मृगशरीरे अयं बाणः' साधुकृत-संधानः शरः तूलानां राशौ' समूहे 'अग्निरिव' (इति **श्रौतोपमा**) 'न खलु न खलु सन्निपात्यः' प्रयोक्तव्यः। (खलु इत्यनुनये। अत्र सम्भ्रमे प्रसादने वा द्विरुक्तिः। 'निषेध-वाक्यालंकारे जिज्ञासाऽनुनये खलु' इत्यमरः।) तत्र हेतुमाह **क्वेति**। 'हरिणकानाम्' अनुकम्पितानां हरिणानाम् (अनुकम्पायां ह्रस्वे वा कः) 'अतिलोलम् अतिचञ्चलं 'जीवितञ्च' जीवनञ्च ('कृदभिहितो भावो द्रव्यवत् प्रकाशते' इति) 'बत' इति निन्दायां (**'निन्दायां विस्मये बत'** इति अभिधानरत्नमाला। 'बत' इति अनुकम्पायां वा। **'बत खेदेऽनुकम्पायां हर्षे संबोधनेऽद्भुते'** इत्यजयः) 'क्व' कुत्र। 'निशिता' तीक्ष्णाः ['शाच्छोरन्यतरस्याम्' (७।४।४१) इति इकारोऽन्तादेशः, पक्षे '**निशातः**'] 'निपाताः' अग्रभागाः येषां तादृशाः, 'वज्रस्य' सार इव 'सारः' बलं येषां ते 'वज्रसाराः' अतिकठिना इत्यर्थः (इति **लुप्तोपमा**। 'सारो बले स्थिरांशे च' इति मेदिनी) तथाविधाः 'ते शराश्च' पुनः 'क्व' कुत्र (क्वेति वीप्सयो र्महदन्तरं सूचयति। **विषमालङ्कारः**। **अर्थान्तरन्यासश्च** । **मालिनीवृत्तम्**।)॥१०॥ **तदिति**। 'तत् तस्मात् अस्मिन् मृगे शर-निपातस्य अवैधत्वात् 'साधु' सम्यक् 'कृतं संधानं' धनुषि संयोजनं यस्य तथाविधं 'सायकं' बाणं प्रतिसंहर' प्रत्यावृत्य तूणीरं प्रापयेत्यर्थः। 'वः' युष्माकं क्षत्रियाणां राज्ञां 'शस्त्रम् आर्तानां' पीड़ितानां 'त्राणाय' रक्षणाय ('तादर्थ्ये चतुर्थी वाच्या'-वाः १।४।४४ इति ४र्थी) अविद्य-मानम्, 'आगः' अपराधः यस्य तस्मिन् अनागसि निरपराधे ('पापाऽपराधयोः आगः' इत्यमरः।) 'प्रहर्तुं न' (इति **व्यतिरेकः**। उभयविधेयं **काव्यलिङ्गम्**। **अर्था-न्तरन्यासश्च**। साधु संधेति र्तर्तुत्रास्त्रेति **छेक-अन्त्यनुप्रासौ**। "त्रातुमार्तं हि वः शस्त्रं **न प्रहर्तुमनागसम्**" इति पठित्वा **प्रक्रम-भङ्ग-दोषः** समाधेयः। **श्लोकोवृत्तम्**॥११॥)

14.—1. वैखानसः—ब्रह्मन् is called 'विखनस्' in the Bhāgavata. Cf. "न खलु गोपिकानन्दनो भवानखिलदेहिनामन्तरात्मदृक्। विखनसा-र्थितो विश्वगुप्तये सख उदेयिवान् सात्त्वतां कुले" ॥—10th. Skanda, Ch. 31 qtd. Kalpa. Hence विखनसः विखनसस्य वा इमे वैखानसाः। (4. 3. 120). —Those who have renounced the world for Brahman, hence ascetics Vide Rām. III. 6. 2. and Com. thereon, HD on गौतम-धर्मसूत्रः Also Cf. 'पुष्प-मूल-फलैर्वापि केवलै वर्तयेत् सदा। कालपक्वैः स्वयं शीर्णै वैखानसमते स्थितः' ॥ **2. आत्मना-तृतीयः**—With himself making the third. An अलुक् समासः (Com.) 'जनार्दनश्च आत्म-चतुर्थः'—अत्र आत्मा चतुर्थः यस्य इति बहुव्रीहिः'—Prabhā. 'पाण्डवा मातृ-षष्ठाः'—Mahā. 'छाया-द्वितीयो नलः'—Nala. V. 25. 'वेदान् आख्यान-पञ्चमान्'—Ibid. VI. 9. Cf. Gr. 'pe'mptes autos'—Thucydides I. XI. VI ; Herodotus—I. 15-50. तृतीय=त्रि+तीय पूरणार्थे—('त्रः सम्प्रसारणञ्च'—५।३।५५) 3. **तूलराशौ—(Oldest reading)** is preferable to **पुष्पराशौ**, as तूल on account of its combustible nature, fits in well with the idea of fire. The idea of "putting fire to flower" is **rare**, while 'putting fire to तूल' is **an extremely common expression in Sanskrit Literature**. Cf. 'तन्मे दहति गात्राणि तूल-राशिमिवानलः'—Mahā. Vana. 141 ; 263 ; Viṣma. 88. 'अग्नि प्राप्य यथा सद्यः तूल-राशिर्विनश्यति'—DP. XV ; PP III. 20. 80 ; 80. 5 ; VII. 82. 127 ; Rām. VI. 88. 7. Besides **अतिलोलत्वम् fits very well with** तूल। Some, however. perfer **पुष्पराशौ** as great impropriety of the act is brought out by comparing the deer in point of beauty and tenderness to a collection of flowers. अनेन तस्याऽतिकोमलत्वं ताड़नाऽनर्हत्वं च सूचितम्'। The great poet Ravindranātha seems to prefer this reading Cf. ' मृदु ए मृग देहे मेरो ना शर। आगुन देवे के हे फुलेर पर"। (सङ्कलन) —P. 114. **4.** खलु—Signifies entreaty. **5. बत**—Implies censure or entreaty. (Com.). **6. निशित**—&c.—नि+शो+क्त कर्मणि=निशितः or **निशातः** (Com.). **निपातः** करणे घञ्—The edges. 7. **वज्रसाराः**—(उष्ट्रमुख-वत् उत्तर-पद-लोपी बहुव्रीहिः)। वज्र implies that the king's power is equal to that of Indra. 'अस्याधिज्ये धनुषि विजयं पौरहूते च वज्रे'—II. 15. Infra. **8. क्व- -क्व**—An instance of **विषमालंकारः**।

The double use of the particle (क्व) is frequently employed to express vast disparity between two things and ideas. Cf. 'क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः'—Ra. 1. 2 ; 'भाव्याब्धिः क्वातिगम्भीरः क्वाहं मन्दमतिस्ततः'—KT ; MD. I. 5 ; Ku. V. 4 ; Ki. I. 6 ; VI. 44 ; Māla. III. 2 ; Śak. II. 18 ; प्रतिसंहर—Withdraw. Śak. VI 4 ; Mahā. Vana. 772 ; Ra. III. 64 ; (225n. 5). 9. वः शस्त्रं—This is to remind the king of the past practice of his ancestors. आर्त-त्राणाय—(To shield the distressed)—Not a case of तुमर्थे ४र्थी—Vide (51n. 3.) Cf. "क्षतात् किल त्रायत इत्युदग्रःक्षत्रस्य शब्दो भुवनेषु रूढ़:"— Ra. II. 53. "परित्राणाय साधूनाम्"—Gitā. II 3. 10. अनागसि—विवक्षया ७मी specially with roots like अस्, क्षिप्, मुच् &c. —On such cases Hari remarks—'अनेक-शक्ति-युक्तस्य विश्वस्य अनेक-कर्मणः। सर्वदा सर्वथा भावात् क्वचित् किञ्चित् विवक्ष्यते ॥" Cf. "रुद्रौजसा न प्रहृतं त्वयाऽस्याम्"—Ra. II 54 ; VII. 59 ; IX 58.

Text :—राजा—एष प्रतिसंहृतः (इति यथोक्तं करोति)।

King—Here, it is withdrawn (*Does as said*).

वैखानसः—सदृशमेतत् पुरु-वंश-प्रदीपस्य भवतः।

श्लोक जन्म यस्य पुरोर्वंशे युक्त-रूपमिदं[1] तव।
पुत्रमेवंगुणोपेतं चक्रवर्तिन[2]माप्नुहि ॥१२॥

Hermit—This is highly becoming of you, the light of the Puru's race. This is extremely[1] befitting[1] you, whose birth is in the dynasty of Puru. May you get a son possessing like virtues and lording[2] over the whole world[2] (12).

राजा (सप्रणामम्)—प्रतिगृहीतम्। King (*Bowing*)—Accepted.

राजेति—'एष' 'प्रतिसंहृतः' अविलम्बेन तूणीरे स्थापित इत्यर्थः। वंशेति—'पुरो' ययातेः पुत्रस्य यो 'वंशः' तस्य यः 'प्रदीपः' यशसा वीर्येण च प्रदीपवत् उद्दीपकः। तस्य 'भवत एतत्' ऋषि-वाक्यात् शरस्य प्रतिसंहरणम् 'सदृशं' युक्तम्। जन्मेति—'यस्य ते पुरोः' तदाख्यस्य राजर्षेः 'वंशे जन्म' तस्य 'तव इदं' ब्राह्मणा-ऽनुवर्तित्वं 'युक्त-रूपम्' अतिशयेन युक्तं ['प्रशंसायां रूपप्' (५।३।६६) इति रूपप् ; युक्तरूपत्वे प्रथम-चरणार्थ-हेतुत्वोपादानात् काव्यलिङ्गम्] 'एवं' ईदृशैः विनयादिभिः 'गुणैः उपेतम्' अन्वितं 'चक्रवर्तिनं' सार्वभौमं ('चक्रवर्ती सार्वभौम' इत्यमरः, अपि च,

'सर्वेभ्यः क्षितिपालेभ्यः नित्यं गृह्णाति वै करम्। स सम्राडिति विज्ञेयश्चक्रवर्ती स एव हि" इति चण्डेश्वरः) ॥ 'पुत्रम् आप्नुहि' लभस्व। (श्लोकः छन्दः) ॥१२॥

15n.—1 प्रतिसंहृतः &c.—Instantaneous (एषः) withdrawal of arrow by the king who is about to kill his much coveted deer, is indicativee of his great strength of mind and control of passion. (15n. 3). **सदृशम्**—"वाच्यलिङ्गाः समस्तुल्यः सदृक्षः सदृशः सदृक्"—A. (कञ्, क्विन्, क्स,—३।२।६०). Cf. 'सदृशमिदं सोम-वंश-प्रदीपस्य'—Vik. I. 2. **पुरु-वंश-प्रदीपस्य**—Cf.'कुल-प्रदीपो नृपतिः दिलीपः'—Ra. VI. 74. Puru, son of Yayāti, was imprecated by Śukrācārya to be old in his youth but was allowed, after a great deal of importunities, to transfer his infirmities to any one of his five sons who would take it. Only Puru consented to take his decrepitude. After a thousand years Puru was given back his youth and Yayāti conferred upon him a boon that he would be the ancestor of a famous royal dynasty. Act IV. 7 *infra*. **युक्त-रूपम्**—(Extremely befitting)—BC. X. 165.—Cf. 'दृष्ट-रूपम्'—Mahā. Karṇa 86; 46; 'क्रुद्ध-रूप'—Droṇa, 139. 3. "प्रशस्तः वैयाकरणः "**वैयाकरण-रूपः**" **छात्र-रूपः**। **वृषल-रूपोऽयं** यः पलाण्डुना सुरां पिबति। **चौर-रूपोऽयं** यः अक्ष्णोरपाञ्जनं हरति॥ **तिङन्तात्**—प्रशस्तं पचति— पचति-रूपम्। प्रशस्तं पचन्ति पचन्ति-रूपम्। क्लीवत्वं लोक-प्रयोगात्" —Prabhā. **पुत्रम्** &c.— "पुनाति" "पूयते" वा पूञ् (पवने)+क्त्र by पुवो ह्रस्वश्च—Unādi, 614; or पुत्—त्रै+क कर्तरि=पुत्र (3. 2. 4.)—'पुन्नाम्नो नरकात् यस्मात् त्रायते पितरं सुतः। तस्मात् पुत्र इति प्रोक्तः स्वयमेव स्वयम्भुवा'—PP. III. Cf. 'पुत्रं लभस्वाऽऽत्मगुणानुरूपम्'–Ra. V. 34. The birth of सर्वदमन is hinted very ingenously here as the आशीर्वाद of a Brahmin must be fulfilled. (*Vide* 133n. 6.) 4. **चक्रवर्तिनम्**—'चक्रे' भूचक्रे राजमण्डले वा वर्तितुं शीलमस्य इति ताच्छील्ये णिनिः। "**अतिरक्तः करो यस्य प्रथिताङ्गुलिको** मृदुः। चापाङ्कुशाङ्कितो यस्य चक्रवर्ती भवेद् ध्रुवम्" —A paramount lord of the earth. Ra. IX. 15. Duṣyanta's son **सर्वदमन (भरत)**, the twentieth king from Puru was one of the **Seven** चक्रवर्तीs. Cf. 'भरताऽर्जुन—मान्धातृ-भगीरथ-युधिष्ठिराः। सगरो नहुषश्चैव सप्तैते **चक्रवर्तिनः**'॥ (244n. I.)

Remark—Our poet is very particular about the rules of Prosody. He is ready to **misspell** a word for the sake of metre. In Ku. IV. 16 he has 'रति-दूतिपदेषु कोकिलाम्'—where 'दूति' has been used for 'दूती' evidently for the sake of metre. (Cf. "अपि 'माषं' 'मषं' ' कुर्यात् छन्दोभङ्गं त्यजेद् गिरम्") । 'पुरु' (of Sl. 12 has been used as 'पूरु' in "सैव पूरुमवाप्नुहि"—IV. 7. *infra.*, evidently for the sake of metre.

Text :—वैखानसः—राजन्, समिदाहरणाय प्रस्थिता वयम्। एष खलु काश्यपस्य कुलपतेरनुमालिनी-तीरमाश्रमो दृश्यते । न चेदन्य-कार्यातिपातः[1] प्रविश्य प्रतिगृह्यतामातिथेयः सत्कारः। अपिच—

आर्या (12.18 12.15)

रम्यास्तपोधनानां प्रतिहत-विघ्नाः क्रियाः समवलोक्य ।
ज्ञास्यसि कियद्भुजो मे रक्षति मौर्वी-किणाङ्क[2] इति ॥१३॥

Hermit—Oh king, we are out in quest of faggots ; yonder, on the banks of the Mālinī, is seen the hermitage of Kāśyapa, the patriarchal sage (*lit. the teacher and supporter of ten thousand disciples*). If other[1] duties[1] are not transgressed,[1] deign to enter (*it*) and accept the hospitality due to guests. Moreover—Surveying the sacrifices of the ascetics, performed without (*any*) let and (*therefore*) pleasant, you will perceive how (*efficiently*) your arm, scarred[2] by the bowstring,[2] protects (*the people*) (13).

V. L.—'कण्वस्य'—R. B. M. S. 'काश्यपस्य'—V. 'उपमालिनी' only M. 'महर्षेः' for 'कुलपतेः'—M.

वैखानस इति । 'समिधां' यज्ञ-काष्ठानाम् 'आहरणाय' संग्रहार्थं 'वयं प्रस्थिताः' ('कर्तरि क्तः-(२।४।७२) । 'अनुमालिनीतीरं' ('यस्य चायामः' (२।१।१६) इति अव्ययीभावः । तीर-दैर्घ्य-सदृश-दैर्घ्योपलक्षित इत्यर्थः, यद्वा विभक्त्यर्थे अव्ययीभावः 'तृतीया-सप्तम्योर्बहुलम्' (२।४।८४) इति पक्षे अम्भावो न स्यात्, तत्रपक्षे 'अनुमालिनीतीरे' इत्येवं स्यात्), 'कुलपतेः' बहुशिष्य-पोषकस्य मुनि-कुले-श्वरस्य (तथाचोक्तं पाद्मे, 'आचार्यो बहु-शिष्याणां मुनीनामग्रणीस्तु यः । व्रत-यज्ञादि-कर्माढ्यः स वै कुलपतिः स्मृतः') 'काश्यपस्य कण्वस्य । 'चेत्' यदि 'अन्यस्य कार्यस्य अतिपातः' अतिक्रमः राजकार्यस्य क्षतिः इत्यर्थः ('पर्ययोऽतिक्रम-स्तस्मिन्नतिपात उपात्य' इत्यमरः) 'आतिथेयः' अतिथि-योग्यः 'सत्कारः' अभ्यर्थना

'प्रतिगृह्यतां' स्वीक्रियताम्। ('वैखानसः—राजन् समिदाहरणाय'— इत्यादिना 'सत्कार'—इत्यन्तेन 'उल्लेखः' नाम नाटयालंकारः उपक्षिप्तः, तल्लक्षणं यथा दर्पणे 'कार्यदर्शक उल्लेखः'।) रम्या इति ॥ 'तपोधनानां' वैखानसानां 'प्रतिहताः' निवारिताः 'विघ्नाः' अन्तरायाः यासां ताः, अतएव 'रम्याः' 'क्रियाः' यागादि-कर्माणि। आरम्भ-शिक्षा-देवतादि-पूजनं संप्रधारणम् अर्थानां विचारचेष्टा च, अतएव बहुवचनम्। (तथा चोक्तममरेण—'आरम्भो निष्कृतिः शिक्षा पूजनं सम्प्रधारणम्। उपायः कर्म चेष्टा च चिकित्सा च नव क्रियाः ॥') 'समवलोक्य' स्वयं सम्यक् दृष्ट्वा न तु चारमुखेण, "चारैः पश्यन्ति राजानः" इति भारतवचनात्। मूर्वा तृण-विशेषः। तस्याः विकारः इति 'मौर्वी'ज्या इत्यर्थः ('मौर्वी ज्या शिञ्जिनी गुणः' इत्यमरः। 'अवयवे च, प्राण्यौ-षधि-वृक्षेभ्यः' (४।३।१३५) इति अण्। (स्त्रियामीप्) तस्याः 'किणः' ज्याघात-चिह्नः ('किणः शुष्क-व्रणेऽपि च' इति त्रिकाण्डशेषः) स एव 'अङ्कः' भूषणम् ('अङ्कः भूषण-लक्ष्मसु' इति हैमः) यस्य तादृशः 'मे भुजः' (एकवचनेन पराऽनपेक्षत्वं ध्वनितम्) 'कियत्' [किं-शब्दात् परिमाणाथ वतुप्। 'किमिदंभ्यां, वो घः (५।२।४०) इति वस्य घादेशश्च ७।१।२] कि परिमाणं 'रक्षति इति' अपि 'शास्यसि' (१७४३) (पूर्वार्धे परिकरालंकारः। वृत्त्यनुप्रास-श्रुत्यनुप्रासौ। 'किणाङ्क' इति पुनरुक्तवदाभासः। काव्यलिङ्गमपि। अत्र ज्ञप्तिर्नाम नाटय-लक्षणम्। तथा च दर्पणे 'ज्ञप्तिः केनचिदंशेन किंचिद् यत्रानुमीयते'। आर्या जातिः) ॥१३॥

16n.—1. **समिदाहरणाय** &c.—सम्+इन्ध्+क्विप्=समित् (f)—Faggots. Ra. I. 49; XIV. 70 समिदाहरणं कर्तुम् इत्यर्थः। Hence ४र्थी by 'क्रियार्थोपपदस्य च कर्मणि स्थानिनः' (2. 3. 14), or तादर्थ्ये ४र्थी **Don't say** 'तुमर्थाच्च भाववचनात्' इति ४र्थी,, **for reasons read (51n. 1).** Mark how ingeniously our poet takes away the hermits with the plea of collecting faggots, thus giving the king an opportunity of entering the hermitage and also of meeting Śakuntalā alone. 2. **काश्यपस्य**—The disciples do not say 'कण्वस्य' (R), for reasons vide (82n.8), **कुलपतेः—"मुनीनां दश-साहस्रं योऽन्न-दानादि- पोषणात्। अध्यापयति विप्रर्षिरसौ कुलपतिः स्मृतः'**—Qtd. R; (also Com.). 3. **आतिथेयः सत्कारः**—अतति गच्छति इति अतिथिः—अत्+इथिन्—U. 450. Lit. one who is habitually an itinerant. Or, **अविद्यमाना तिथिः यस्य**—(Parāśara I. 42.)—who comes without any previous notice—

"यस्य न ज्ञायते नाम न च गोत्रं न च स्थितिः। अकस्मात् गृहमायाति सोऽतिथिः कथ्यते बुधैः॥ एकरात्रिन्तु निवसेत् अतिथिः गृहिणो गृहम्। अत ऊर्ध्वं निवसन् सः अभ्यागतः प्रकीर्तितः॥" Also MS. III. 102; Nirukta IV. 5. अतिथि+ढञ् (by 'पथ्यतिथि-वसति-स्वपते र्ढञ्'—4. 4. 104)=आतिथेयः; सत्कारः—'सत्' (आदरार्थे अव्ययम्)+कृ+घञ् कर्मणि भावे वा। गतिसमासः। For सत् is a गति by 'आदरा-नादरयोः सदसती' (1.4.63.) 4. **तपोधनानां**—तपः एव धनमिव यस्य—KB. 'तपः' is not धनम् actually, but it is as dear as धनम्। 5. **क्रियाः**—For the force of the plural number see Com. 6. **कियद् भुजो मे रक्षति** &c.—Mark that **indirect narration** is absent in Sanskrit. **ज्ञास्यसि**—Opt. Atmp. Vide SK. 2743. **मौर्वी-किणाङ्कः**—Having a scar produced by the bowstring [made from the fibres of the मूर्वा plants (Aletris)]. "मौर्वी-जीवा-गुणो गव्या-ज्या"—Dhanañjaya. Cf. "ज्याघात-प्रचित-किणोल्वण-प्रकोष्ठः"—Avimāraka. I. 8; Ra. 18, 48; 16. 84; Act III. 12, infra. "कोदण्ड-ज्या-किणाङ्कैः"—VS. II. 27.

Text :—राजा—अपि सन्निहितोऽत्र कुलपतिः ?

King—Is the Patriarch present there ?

वैखानसः—इदानीमेव दुहितरं शकुन्तलाम् अतिथि-सत्काराय नियुज्य दैवमस्याः[1] प्रतिकूलं[2] शमयितुं[3] सोमतीर्थं गतः।

Hermit—Having recently directed his daughter Śakuntalā to entertain guests, he has gone to Soma-tīrtha, with a view to appeasing[3] her forward[2] destiny.[1]

राजा—भवतु, तामेव पश्यामि। सा खलु विदित-भक्तिं मां महर्षेः कथयिष्यति।

King—Well, even her I will see. Surely she will speak of my devotion to the sage.

V. L. Dr. Burkhard has 'प्रभासं' for 'सोमतीर्थं'

राजेति॥ 'अपि' इति प्रश्ने ('गर्हा-समुच्चय-प्रश्न-शङ्का-संभावनास्वपि' इत्यमरः) तपोवने 'सन्निहितः' 'किं' (सन्निहित इति दधातेः अविवक्षिते कर्मणि कर्तरि क्तः। 'दधातेः हिः' (७।४।४२) इति धा-धातोः स्थाने 'हि-धातोः' आदेशः)। **वैखानस इति।** 'सत्काराय' पूजायै (२।३।१४ इति कर्मणि ४र्थी) 'नियुज्य' (अनेन

मुनेर्जीवित-सर्वस्वत्वं ध्वन्यते) 'अस्याः' शकुन्तलायाः 'प्रतिकूलं' विपरीतं क्रुद्धमित्यर्थः 'दैवं' भाग्यम् 'शमयितुं तपसा निवारयितुं 'सोमतीर्थं' प्रभास-तीर्थम् (इति त्रिकाण्डशेषः)। राजेति॥ 'भवतु' इति अङ्गीकार-द्योतकमव्ययम्। ('अस्तु इति निषेधाऽसूयाऽङ्गीकारयोः। भवतु इति अस्तु-वत्' इति गणकारः) 'विदिता' ज्ञाता 'भक्तिः' कण्वे अनुरागः यस्य तं 'विदित-भक्ति' ('कर्म-साधनस्यैव भक्ति-शब्दस्य प्रियादिषु पाठात् भवानी-भक्ति- रित्यादौ कर्म-साधनत्वात् पुंवद्भाव-प्रतिषेधः। दृढ़-भक्तिरित्यादौ तु भाव-साधनत्वात् पुंवद्भाव-सिद्धिः पूर्व-पदस्य" इति सरस्वती-कण्ठाभरणे भोजराजः) 'मां महर्षेः' (विवक्षावशात् षष्ठी') 'कथयिष्यति' विज्ञापयिष्यति। ('जन्म यस्य'—इत्यादिना 'तां द्रक्ष्यामि' इत्यन्तेन मुखसंधेः 'उपक्षेपः' इति अङ्गम् उपक्षिप्तम्। तल्लक्षणं तु दर्पणे—"काव्यार्थस्य समुत्पत्तिः उपक्षेपः इति स्मृतः') ।

17n.—1 दुहितरं—Śak. was given the charge of receiving the guests, in spite of the presence of so many learned disciples. This shows that she was the all-in-all of the sage's life. Besides merits that will accrue from the reception of guests may avert her adverse destiny. (*See next*). **नियुज्य**—(after assigning the duty). Generally युज् takes Locative of the object or purpose assigned. Cf. 'आश्रमधर्मे नियुङ्क्ते' 'धर्माधिकारे नियुक्तः', 'आलवाल-पूरणे नियुक्ता'—Infra ; Ra. V. 29 ; MM. 1. 9; **2. दैवमस्याः प्रतिकूलं** &c.—Suggests that Śak. though cursed by Durvāsā (Act IV) and forsaken by the king (Act V) will be reunited with him. Read 'प्रतिकूलतामुपगते हि विधौ विफलत्वमेति बहुसाधनता'—ŚPB. IX. 6. (शम्+णिच्,) gives **शमयति** and **शामयति** but with (उपसर्ग) only (**प्र**)**शमयति**—(60n. 2). दैवं means actions performed in previous birth. "पूर्व-जन्मकृतं कर्म तद्दैवम् इति कथ्यते"—Y. The reaction of दैव can both be **diminished** or **increased**. Cf. 'दैवं वर्धयितुं शक्यं क्षयं कर्तुं सलीलया'—BrP. Also "प्रतिकूलं यथा दैव पौरुषेण विहन्यते। मङ्गलाचरण-युक्तानां नित्यमुत्थान-शीलिनाम्—MP ; ŚPB. IX. 6. **3. सोमतीर्थं** or प्रभासतीर्थम् (*Com.*) is a place of pilgrimage in Kathiwar in western India, near the temple of **Somanatha**. Here 'Soma' was cured of consumption inflicted on him by the imprecation of Dakṣa. 'यत्र तप्तं तपस्तेन

सोमेन सुमहात्मना । पञ्चवर्ष-सहस्राणि एकपादेन तिष्ठति ॥—VhP. (After the sack of the temple of Somanātha by Sultan Mahmud, its beautiful gates were taken to Ghazni. Later on these gat s were brought back from Ghazni by Lord Ellenborough's order in 1842 and are now to be seen in the arsenal at Agra). Our poet shows his foresightedness by keeping Kaṇva out of the hermitage ; for his absence not only helps Duṣyanta in the progress of his love-affair but also affords a chance for the demons to obstruct the sacrifices (Vide तत्रभवतः कण्वस्य महर्षेः असान्निध्यात् &c.—Act. II.) in consequence of which the king who was at a loss to know how to reenter the hermitage to make further progress in his love-affair, was requested by the hermits to enter the hermitage for their chastisement. **4. पश्यामि**—'वर्तमान-सामीप्ये वर्तमानवद् वा' (३।३।१३३) इति भविष्यति लट् । **5. विदित-भक्ति**—**Sixteen words such as** भक्ति, प्रिया, कान्ता, क्षान्ता, &c. form the प्रियादि group with which there can be no **पुंवद्-भाव** of the first members by 'स्त्रियाः पुंवद्, भाषित-पुंस्काद् अनूङ् समानाधिकरणे स्त्रियाम् अ-पूरणी-प्रियादिषु' (831). **Bhoja** opines that भक्ति of the प्रियादि class is derived with क्तिन् in the **कर्मवाच्य** when it means **the object of worship**, hence the rule of prohibition (in विदिता) does not apply, as it is derived with क्तिन् in the **भाववाच्य** । **'भाव-वाच्य-साधिते तु पूर्वपदस्य पुल्लिङ्गता स्यादेव'**—Prabhā under 6. 3. 34. Vide (*Com.*) ; BD following KV (5. 2. 72) remarks,—'सामान्ये नपुंसकम् । दृढं भक्तिः यस्य स दृढभक्तिः'—831. 'अदार्ढ्य-निवृत्तिपरे दृढ-शब्दे लिंग-विशेषस्य अनुपकारकत्वात् स्त्रीत्वम-विवक्षितमेव'—Nyāsakāra. 'दृढं भक्तिरस्येति नपुंसक-पूर्वपदो बहुव्रीहिः'—गणव्याख्यानकारः । "**दर्शित-शिष्यभक्तिः**'—Ra. II 40 ; '**निरतिशय-भक्ति**'—PN. II. 14 ; MN. on '**वृद्ध-भक्तिरिति** ज्येष्ठे'—Ra. XII. 19. '**दृष्टभक्तिर्भवान्या**'—MD. 39. "महर्षेः **विदितभक्तिम्**"—'सापेक्षत्वेऽपि **गमकत्वात्** समासः' । (Vide 9n. 7) For **विद्** read :-'**वेत्ति** सर्वाणि शास्त्राणि, गर्वो यस्य न **विद्यते** । **विन्ते** धर्मं सदा सद्भिः, तेषां पूजाञ्च **विन्दति**'—KR. 25. **महर्षेः कथयिष्यति**—Note the use of **षष्ठी**, Cf. '**आख्याहि** भद्रे प्रियदर्शनस्य,' 'दर्दुर-राजस्य **विज्ञप्तम्**'—PT "**आर्यस्य निवेदये**"—MR. "**चारुदत्तस्य** नाख्यास्यसि"—MK. I.

Text :—वैखानसः—साधयामस्तावत्[1] । (इति सशिष्यो निष्क्रान्तः) ।

Hermit—(*So*) we go[1] now. (*Exit with disciples*).

राजा—सूत, चोदयाऽश्वान्[2] । पुण्याश्रम-दर्शनेन आत्मानं पुनीमहे[3] ।

King—Charioteer, urge[2] the horses[2] on ; we shall sanctify[3] ourselves with a sight of the hallowed (holy) hermitage.

सूतः—यथाज्ञापयत्यायुष्मान् । (इति भूयो रथवेगं निरूपयति) ।

Charioteer—As the long-lived Sir commands. (*Again notices the speed of the car*).

राजा—(समन्तादवलोक्य) सूत, अकथितोऽपि ज्ञायते एवायम् आभोग स्तपोवनस्येति ।

King—(*Looking around*) Charioteer, though not spoken to, these are indeed known as the environs of the penance grove.

सूतः—कथमिव ? Charioteer—How is it ?

V. L.—'आभोगः तपोवनस्य'—B.M.S. 'आश्रमाभोग—R. 'आश्रमः' तपोवनस्य'—V. Some Mss. read 'नोदय' for 'चोदय' ।

वैखानस इति । 'साधयामः' गच्छामः ('प्रायेण ण्यन्तकः साधिर्गमेः स्थाने युज्यते' इति विश्वनाथः) 'तावत्' इति वाक्यालङ्कारे । राजेति । 'चोदय' प्रेरय । 'पुनीमहे' पवित्रं कुर्महे । (विनयवचनमेतत् । नृपाणां नित्य-पुण्यत्व-श्रवणात्) । राजेति । 'अकथितोऽपि' केनचित् अनिवेदितोऽपि 'तपोवनस्य आभोगः' पूर्णता सीमारम्भ इति यावत् ('आभोगः वरुणच्छत्रे पूर्णता-यत्नयोरपि' इति विश्व-मेदिन्यौ) । 'इति ज्ञायते' लक्षणानि संवीक्ष्य अनुमीयते ।

18n.—1. साधयामः—साध्+णिच् often in **dramas** means 'to go' (*Com.*), but *Cf.* Act V. 27 infra ; 'अयि साधव साधयेप्सितं स्मरणीयाः समये वयं वयः'—*MC. II* 62. 'साधयाम्यहमविघ्नमस्तु ते'—*Ra. XL.* 91 'साधयामि गच्छामि'—MN. "स्वस्ति भवते । साधयाम"—HC. III. 28 ; 2. **चोदय**—The root चुद् (चुरादि उभयपदी) meaning "to drive" is **extremely common** in both Vedic and Classical Sanskrit. Cf. 'यो रध्रस्य चोदिता'—RV. II. 12. 6. MB. "ईडि-स्तुति—चोदना-याच्ञासु दृष्टः प्रेरणे चापि वर्तते"—(M.Bh.) "तं स्वस्थं चोदयन्तीव"—BC. IV. 37. 'चोदयति अश्वम्'—Vopadeva ; 'शिष्यान् समानीयाचार्यः

अर्थम् अचोदयत्'—Mahā ; 'सञ्चोदयामास "शीघ्रं याहीति, सारथिम्'—
—Rām ; 'चोद्यमानः सिसृक्षया'—MS. I.75 ; 'गुणान् सर्वान् प्रचोदयन्'—
Ibid. III. 228, Kāli. has already used it several times. 'रात्रि-चोदिता'—KU. VIII. 60, 'तच्चोदितश्च* नृपतिः शशंस'—Ra. IX, 77 ; 'भर्तृचोदिताः'—XII. 59 ; 'चोदयन्त्य इव भार्गवं शिवाः'–XI 61 ; The root नुद् (प्रेरणे) means the same thing and has also been used by our poet. 'मन्दं-मन्दं नुदति पवनस्त्वाम्'—MD. 9; 'नोदयामास वासवः'—KU.II. 29 'नोदयिता भव'—III 21 ; 'सारथि-प्रणोदितेन'—XV. 45. But here 'चोदय' seems to be the **genuine reading as in exactly similar circumstances** Kāli. writes–'सूत, ऐशानीं दिशं प्रति **चोदय अश्वान्** आशुगमनाय"–Vik. Act.I. **पुण्याश्रम**:&c.–The king is also considered **always** to be **पुण्य** । *Cf.* 'पुण्यः महाब्रह्म-समूह-जुष्टः'—*BK. I* 4. 'भवद्विधा भागवतास्तीर्थीभूता स्वयं प्रभो । तीर्थीकुर्वन्ति तीर्थानि स्वान्तःस्थेन गदभृता'–*Bhāgabata. I*, hence the speech only bespeaks his modesty. 3. **आभोग**—आ+भुज्—घञ् भावे=आभोगः—'परिपूर्णता'—Ś—Completion, hence by लक्षणा the thing that completes *i.e.* extent, precincts ("गण्डाभोग"—MD. 90 ; MM. IX. 16). 4. **कथमिव**—सूत is not a **keen observer** like the king, hence he asks the kings to explain how he could know that a hermitage was near by.

राजा—किं न पश्यति भवान् ? इह हि—

शार्दूल-विक्रीडितं (मसजसत तग)

नीवाराः[1] शुकगर्भ-कोटर-मुख-भ्रष्टा[2] स्तरूणामधः
प्रस्निग्धाः[3] क्वचिदिङ्गुदी-फल-भिदः[4] सूच्यन्त एवोपलाः[5] ।
विश्वासो-पगमाद-भिन्नगतयः[6] शब्दं सहन्ते मृगास्
तोया-धार-पथाश्च वल्कल-शिखा-निष्यन्द-रेखाऽङ्किताः[7] ।१४।

King—What ! Don't you observe ? For here (*in some places*) beneath the trees are grains of wild rice[1] fallen[2] from the mouths of the tree-holes with parrots nestling within.[2] Somewhere (*again*) intensely[3] oily[3] (*i.e. smooth*) slabs of stones[5] are indicated[4] as being the cleavers of the fruits of '*Hermit's tree*'.[4] The deer, by reason of their confidence[6] (*in man*), brook the sounds of the car, without varying their gait ; and the paths to the pool are[7] marked with lines of the drippings from the fringes of bark-garments.

सूतः—सर्वमुपपन्नम् । Charioteer—All this is true.

V. L.—'शुक-गर्भ-कोटर'—R. V. M. S. 'शुक-कोटरार्भक'—B :

नीवारा इति । अस्मिन् इत्यर्थे 'इह' ("इदमो हः"—५।३।१०) हि', 'क्वचित्' (इति वाक्य-चतुष्टये संबध्यते) कुत्रचित् भागे । 'तरूणाम् अधः' तले 'शुकाः' कीराः ('शुको व्यास-सूते कीरे रावणस्य तु मन्त्रिणि । शिरीष-पादपे पुंसि, ग्रन्थि-पर्णे नपुंसकम्' इति मेदिनी) 'गर्भे' अभ्यन्तरे येषां तथाविधानां ('गड्वादेः परा सप्तमी', वाः—२।३।३५ इति सप्तम्यन्तस्य पर-निपातः) 'कोटराणां' विवराणां 'मुखेभ्यः भ्रष्टाः' गलिताः 'नीवाराः' दृश्यन्ते (इति क्रियासामान्य-योगात् न्यून-पद-दोषा-भावः । एवमन्त्य-वाक्येऽपि) । 'क्वचित् प्रस्निग्धाः' तैल-सद्भावात् प्रकर्षेण मसृणाः चिक्कणाः ('चिक्कणं मसृणं स्निग्धम्' इत्यमरः) 'उपलाः' प्रस्तराः ('उपलः प्रस्तरे रत्ने शर्करायां तु योषिति' इति मेदिनी) । 'इङ्गुदी' तापसतरुः (इत्यमरः) । तस्य 'फलानि' भेत्तुं शीलमेषाम् इति 'एव 'सूच्यन्ते' स्वयं ज्ञाप्यन्ते, दृष्टौ आविर्भवन्ति इत्यर्थः । (सूच्यन्ते' इति कर्म-कर्तरि) । मुनयः इङ्गुदी-फलानि पाषाणैः भित्वा तैलं निःसारयन्ति इति प्रसिद्धिः । अतः पाषाणानां तैल-लिप्तत्वात् इङ्गुदी-फलभिद एव ते इत्यनुमानम् । तेन च आश्रमाऽऽभोगत्वे लिङ्गम् । क्वचित् अन्यत्र 'विश्वासस्य उपगमः' आजन्मतः प्राप्तिः इत्यर्थः, तस्मात् विश्व-स्तत्वात् - 'अभिन्ना' अविकृता यथापूर्वं 'गतिः' सञ्चारः येषां त्रास-विरहितत्वात् तथाविधाः 'मृगाः शब्दं' रथस्य घर्घर-ध्वनिम् अश्रुतपूर्वमपि' 'सहन्ते' श्रृण्वन्ति. न तु पलायन्ते इत्यर्थः । क्वचित् 'च तोया-धाराणा' जलाशयानां 'पन्थानः' (५।४।९) 'वल्कलानां ' वृक्ष-त्वङ् निर्मितानां मुनिवस्त्राणां 'शिखाभ्यः' अन्तेभ्यः 'निष्यन्दानां' (८।३।७२ प्रस्नुतजलानां या 'रेखाः' धाराः ताभिः 'अङ्किताः' चिह्निताः दृश्यन्ते इति शेषः । (च-कारः पूर्ववाक्य-त्रय-समुच्चये । **स्वभावोक्तिः, क्रिया-समुच्चयालंकारः काव्यलिङ्गञ्च । वृत्त्यनुप्रासः श्रुत्यनुप्रासश्च । शार्दूलविक्रीडितं छन्दः**) । (१४)

सूत इति । "सर्वम् उपपन्नम्' अयं तपोवनस्य आभोग इति यत् भवता उक्तं तत् युक्तियुक्तमेव इत्याशयः ।

19n.—1. नीवाराः—'स्वयम् उत्पन्नत्वात् क्षेत्रिभिः न व्रीयन्ते ये ते नीवारास्तृण-धान्यानि'—*Prabhā.* नि+वृ+घञ् कर्मणि=नीवाराः ('नौ वृ धान्ये'—(3. 3. 48.) 'उपसर्गस्य घञ्यमनुष्ये बहुलम्' (6. 3. 122) इति दीर्घः । *Cf.* 'धान्ये किम् ? नीवराः (३।३।४८) कन्या'—Sk. 3221. वृ (also व्रीञ्) is variously conjugated. *Cf.* 'यो व्रीणाति जयश्रियं रणमुखे'

धर्मं वृणीते अध्वरे। तेजोभिः जगदाऽऽवृणोति, वरति ज्ञातीन् यथार्हं धनैः॥ सत्कीर्तिञ्च वृणाति, यो वरयति क्षेमं, यशो व्रीयते, युद्धे वारयति द्विषो, नि-वरते नित्यं प्रजोपद्रवम्"—KR. II. 2. **इङ्गुदी-फल-भिदः** &c.—Iṅgudī is called *Nagelia Putrañjiva* due to its supposed prolific efficacy. The hermits used its fruits for extracting oil for lamp and medicine. Cf.. 'ता इङ्गुदी-स्नेहकृत-प्रदीपम्'—Ra. XIV.81.'व्रण-विरोपणमिङ्गुदीनां'—Act IV. 14. The stone-slabs are excessively oily with its fruits, and this fact suggests that a hermitage is near. **प्रस्निग्धाः**—here means **'oily'**and not **'resplendent'** as in "कनक-निकष-स्निग्धा सौदामिन्या" —MD. **सूच्यन्ते**(Reveal, indicate)—Ra. XVII. 50. 3.—**शब्दं सहन्ते** is significant and corroborates the previous conjecture of the king. A little before a deer was running away at the sight of the king, but here the case is reverse, as herds of deer are roaming freely and do not run away at the sight of men with rattling chariot. This shows that they are domesticated by some hermits. For such a sense of security from molestation is possible only in a hermitage. Cf. 'क्षुद्रान् न जक्षुर्हरिणान् मृगेन्द्रा विशश्वसे पक्षिगणैः समन्तात्'—BK. II. 25 ; Ra. 1. 50—53 ; JH. V. 4 ; VI. 6. 'इह वीतभयास्तपोऽनुभावाज्जहति व्यालमृगाःपरेषु वृत्तिम्'—Ki. Also the description of आश्रम of Jāvāli, Kād. P.147. and कैलाश-वर्णना of Bhārata Chandra. For Conjugation of सह्, Cf. **साहयति** आहवे क्षोभं, **सहति** द्रविण-व्ययम्। अन्यायं **सहते** नासौ, **सह्यति** क्षितिरक्षणे—KR. 31. 4. O**निष्यन्दः**| &c.—नि+स्यन्द्+घञ् भावे—"निष्यन्दः" —(Dropping of water), Opt. '**निस्यन्दः**' by 'अनु-वि-पर्यं-भि-निभ्यः स्यन्दतेः अप्राणिषु' (8. 3. 72). प्राण्य-प्राणि—समुदायेऽपि इति केचित्। अनुस्यन्देते (अनुष्यन्देते वा मत्सोदके। प्राणिषु षत्वं मा भूत्—उदके मत्सः अनुस्यन्दते'—Prabhā. This Śloka is quoted by **आनन्दवर्धन** in his **धन्यालोक** । **उपपन्नम्**—Gitā. II. 2 ; Act. II, before Śl. 14 infra.

Remark—Jimūta-vāhana in NN, and a ब्रह्मचारी in SV in a somewhat similar manner ascertained a certain place to be a penance-grove. Read "नायक, सम्यगुपलक्षितम्। तपोवनमेवैतत्। कुतः। वामोऽयं दययेव नातिपृथवः कृत्तास्तरूणां त्वचो, भग्नालक्ष्यजरत्कमण्डलुरजः स्वच्छं

पयोनैर्झरं। दृश्यन्ते त्रुटितोज्झिताश्च वटुभिः मौञ्ज्यः क्वचित् मेखला, नित्याकर्णतया शुकेन च पदं साम्नामिदं पठ्यते'—NN. 1. 10 'अभितस्तपोवनेन भवितव्यम्। विस्रब्धं हरिणाश्चरन्त्यचकिता देशागतप्रत्ययाः' &c.—SV. I. 12. After Śloka, 14, some Mss. read 'कुल्याम्भोभिः पवन-चपलैः शाखिनो धौतमूला, भिन्नो रागः किसलय-रुचामाज्यधूमोद्गमेन। एते चार्वागुपवनभुवि-च्छिन्नदर्भाङ्कुरायां नष्टाशङ्का हरिण-शिशवो मन्दमन्दं चरन्ति'—(शार्दूलविक्रीडितं छन्दः [The roots of the yonder (branching) trees are washed by the waters of the dikes that are tremulous on account of wind ; the glowing lustre of the fresh leaflets is dimmed by the smoke rising from (the oblations of melted) ghee ; and here in front, the little fawns are listlessly grazing without (any) fear on the forest lawns where the sprouts of Darva (grass) have been cropped.] But this Śloka is rightly considered to be spurious, as it does not suit the आमोग of a hermitage.

Text :—राजा—(स्तोकमन्तरं गत्वा) तपोवन-निवासिनामुपरोधो[1] मा भूत्। एतावत्येव रथं स्थापय यावदवतरामि।

King—(*Advancing a little*) Let there be no disturbance[1] to the denizens of the penance-wood. So stay the chariot here that I may alight.

सूतः—धृताः प्रग्रहाः[2]। अवतरत्वायुष्मान्।

Charioteer—The reins[2] are held in. Let the long-lived Sir get down.

राजा (अवतीर्य)—सूत, विनीत-वेषेण[3] प्रवेष्टव्यानि तपोवनानि नाम। इदं तावत् गृह्यताम्। (सूतस्य आभरणानि धनुश्च उपनीय) सूत, यावदाश्रम-वासिनः प्रत्यवेक्ष्याहमुपावर्ते, तावदार्द्र-पृष्ठाः[4] क्रियन्तां वाजिनः।

King—(*Alighting*) Charioteer, penance-woods should be entered in a[3] humble guise.[3] This then, please hold. (*Delivering his ornaments and the bow to the charioteer*) Charioteer, by the time I return after visiting the denizens of the hermitage, let these steeds be made [4]wet-backed with water.[4]

सूतः—तथा। (निष्क्रान्तः)।

Charioteer—As your Majesty commands. (*Exit*).

V. L.—'सूतस्य'—B. R. M. 'सूताय'—V. 'उपनीय'—M.S. 'उपनीय' 'अर्पयति'—B. R. V. 'प्रवेष्टव्यानि'—B. R. M. V. S. 'प्रवेश्यानि'—D. Dr.

राजेति। 'स्तोकं' स्वल्पं 'अन्तरम्' दूरं 'गत्वा' तपसः वनं 'तपोवनम्' (अश्व-घासादिवत् तादर्थ्ये षष्ठीसमासः) तस्मिन् ये 'निवसन्ति' तपस्विनः तेषां (कर्मणि षष्ठी) 'उपरोधः' पीड़ा 'मा भूत्' न भवतु इति हेतोः, 'एतावति एव' इयति दूरे एव नातःपरम्। 'यावत् इत्यवधारणे। **राजेति।** 'तपोवनानि नाम' ('नाम कोपेऽभ्युपगमे विस्मये स्मरणेऽपि च। सम्भाव्य-कुत्सा-प्राकाश्य-विकल्पेष्वपि दृश्यते' इति मेदिनी ।। अतः अभ्युपगमे प्राकाश्ये वा नाम-शब्दः अत्र प्रयुक्तः, यद्वा अभ्यस्तस्य आचारस्य स्मरणात् अत्र नामशब्दः स्मरणार्थे वर्तते)। ('विनीते' त्यादिना **नीति-नामा नाट्यालंकार** उक्तः। तल्लक्षणंतु दर्पणे– '**नीतिः** शास्त्रेण वर्तनम्')। 'प्रत्यवेक्ष्य' दृष्ट्वा। 'उपावर्ते' प्रत्यागच्छामि। 'तावत्' मदागमनपर्यन्तं 'वाजिनः' अश्वाः 'आर्द्राणि' जलसिक्तानि 'पृष्ठानि' येषां तथोक्ताः। 'क्रियन्ताम् ' अर्थात् अश्वानां श्रमाऽपनोदनं विधेहि।

20n.—1. उपरोध (Disturbance) &c.—**'मा भूत्'**— लुङ्'is used for any tense, (here for future) by 'माङि लुङ्' (3. 3. 175), and the augment 'अ' (अभूत्) is prohibited by 'न माङ्योगे' (6. 4. 74). Cf. 'मा भूत् आश्रमपीड़ेति परिमेयपुरःसरौ—Ra. 1. 37 ; V. 24 ; MM. I. 32. **2. विनीत-वेषेण**—विनीत means शुद्ध *i.e.* not gaudy, plain. This testifies to the great regard of the King for the feelings of the anchorites. Cf. "तमाश्रमं जातपरिश्रमौ तावुपेत्य काले सदृशानुयात्रौ। राजर्धिमुत्सृज्य विनीत चेष्टावुपेयतुर्भार्गव-धिष्ण्यमेव ।।"——BC. IX ; 2 "विहाय वेषं मदनानुरूपं संस्कार-योग्यं स वपुर्बभार—" Ibid. IV. 38. "देवाभिगमने चैव मङ्गले नियमे स्थिते। वेषस्तत्रभवेत् शुद्धः ये चान्ये प्रयतानराः।" Also 'विनीतवेषाऽऽभरणः पश्येत् कार्याणि कार्यिणाम्'—MS. VIII. 2. 'काऽप्यभिख्या तयोरासीत् व्रजतोः शुद्ध-वेषयोः'—Ra. 1. 46 ; PP. V. 15, 101. **3. नाम**—It has the force of 'स्वीकार' or 'स्मरण' (*admittance or remembrance of the injunction of the Scriptures or of the practices of the great*) or प्राकाश्य (*as is well-known*). **4. सूतस्य**—'कथं रजकस्य वस्त्रं ददाति', 'राज्ञो दण्डं ददाति', 'घ्नतः पृष्ठं ददाति' ? अभि-प्रेत्यर्थस्य अ-विवक्षितत्वात् यथा 'मा प्रयच्छेश्वरे धनम्'—*Prabhā*. Hence शेषे

षष्ठी। 'दशसुवर्णान् अस्यैव प्रयच्छ'——MK. II. 5. आर्द्र-पृष्ठाः—Cf. 'सूत, एकान्ते विश्रामयाश्वान्'—PN. IV. वाजिनः—More than two horses may be gorgeous but quite unsuited for hunting in woods. 6. उपावर्ते —(Return)—लट् is used here for **future tense** by 'यावत् पुरा-निपातयोः लट्' (2783, Ra. VIII. 53).

Text :—राजा (परिक्रम्याऽवलोक्य च) इदमाश्रमद्वारम्। यावत् प्रविशामि। (प्रविश्य निमित्तं सूचयन्)'

आर्या (12. 18) 12. 15) **शान्त[1]मिदमाश्रम-पदं, स्फुरति[2] च बाहुः कुतः, फलमिहास्य।**
अथवा भवितव्यानां[3] द्वाराणि भवन्ति सर्वत्र ॥१५॥

King—(*Walking and seeing*). This is the door-way to the hermitage. I will go in. (*Entering and showing an omen*). Peaceful[1] is the atmosphere of this hermitage and yet my (*right*) arm throbs.[2] Where is the possibility of its fruition here ? Or, things[3] destined to be[3], have doors everywhere. (15)

नेपथ्ये—इदो इदो सहीओ (इत इतः सख्यौ)।

(*In the tiring room*)—This way, friends, this way.

राजेति। 'द्वारं' प्रवेशमार्गः। 'निमित्तं' दक्षिण-हस्त-स्फुरण-रूपं 'सूचयन्' अभिनीय आह इति ('निमित्तं हेतु-लक्ष्मणोः' इत्यमरः)। शान्तेति। 'इदं' मया प्रविश्यमानम् 'आश्रम-पदम्' आश्रमस्थानं ('पदं व्यवसिति—त्राण-स्थान-लक्ष्माऽङ्घ्रि वस्तुषु' इत्यमरः) 'शान्तं' शम-प्रधानं ('वा दान्त-शान्त-पूर्ण-दस्त-स्पष्ट-च्छन्न-ज्ञप्ताः' ७।२।२७) इति साधुः, पक्षे 'शमितम्'। अत्र कुत्रापि सांसारिक-धर्मस्य प्रसरो नास्ति इत्यर्थः)। 'बाहुः' दक्षिणो मे भुजः 'च स्फुरति' स्पन्दते (अत्र च-शब्दः समुच्चयं विरोधञ्च द्योतयति) 'इह' अत्राश्रमे 'अस्य' दक्षिण-बाहु-स्पन्दनस्य 'फलं' वर-स्त्रीलाभ-रूपं 'कुतः' कथं सम्भवति, न कथमपि इत्यर्थः। (दक्षिण-बाहु-स्पन्दने वर-स्त्री-लाभः स्यात्। तथा चोक्तमद्भुतसागरे—वामेतर-भुज-स्पन्दः वर-स्त्री-लाभ-सूचक" इति)। 'अथवा' इत्याक्षेपे। 'भवितव्यानाम्' अवश्यम्भाविनां पदार्थानां (बाहुलकात् कर्तरि तव्यः—३।३।११३) द्वाराणि' उपायाः, आगमनोपाया इत्यर्थः। ("द्वारं निर्गमेऽभ्युपाये' इति हैमः) 'सर्वत्र भवन्ति' ईश्वरेच्छावशात् शान्ताश्रमेऽपि न तेषां कोऽपि व्याघात इति भावः। (अर्थान्तरन्यासः। आक्षेपालंकारश्च। 'आक्षेपः स्वयमुक्तस्य प्रतिषेधो विचारणात्'

इति तल्लक्षणात्। प्रथम-यतौ वृत्त्यनुप्रासः। उत्तरत्र श्रुत्यनुप्रासः। अन्त्यदले 'भविभवे'ति 'वितवन्ती'ति छेकानुप्रासश्च। आर्या जातिः)। (१५)

21n.—1. इदमाश्रमद्वारम् &c.—exactly occurs in PN. V. निमित्तं—(36n. 3). An auspicious omen in the shape of the throbbing of the right arm. **2. सूचयन्**—The fact that his (right) arm was throbbing should be gesticulated and showed to the audience. **3.** स्फुरति च बाहुः—The throbbing of the (right) side of a male is a good sign. Cf. "वाम-भागस्तु नारीणां श्रेष्ठः **पुंसां तु दक्षिणः**। दाने देवादिपूजायां स्पन्दे शृङ्गारणेऽपि च" इति निमित्तनिदाने॥ Also *BRŚ Qtd. Hemādri on Ra. XIV.* 49. Then again the throbbing of the **right** hand of a man prognosticates **marriage** with a beautiful woman (*Com.*) Cf. 'अयं मां स्पन्दितैः बाहुराश्वासयति दक्षिणः'—*Vik. III.* 9 'वामेतरः संशयमस्य बाहुः' &c.—*Ra. VI.* 68; *BK. I.* 27; *Ra.* X*II.* 90; 161*n.* 7; (240*n.* 9). The use of बाहुः for (**right**) hand gives rise to **विशेषे अविशेषाख्य-बोधः**। स च "शान्त आश्रमो बाहुः स्फुरति च दक्षिणः, कुतः फलमिहास्य" इति पाठेन समाधेयः—HS. **4. अथवा**—Denotes आक्षेप *i.e.* it introduces an alternative to correct the previous statement. Cf. 'अथवा कृतवाग्द्वारे"—Ra. I. 4. 'अथवा मृदु वस्तु हिंसितुम्'—Ibid. VIII. 45. 'अथवा रामेण किं न दुष्करम्'—*UC. VI.* 40. **5. भवितव्यानां द्वाराणि** &c.—Cf. 'को नाम पाकाभि-मुखस्य जन्तुर्द्वाराणि दैवस्य पिधातुमिष्टे'—Bhavabhūti 'द्वीपादन्यस्मादपि मध्यादपि जलनिधेर्दिशोऽप्यन्तात् आनीय झटिति घटयति विधिरभिमतमभिमुखीभूतः'—*Rat. Prologue*; (201*n.* 8). **6. इत इतः** &c.—"नायिकानां सखीनां च शौरसेनी प्रकीर्तिता" इति भरतोक्तेः आसां शौरसेनी भाषा।

Text :—राजा (कर्णं दत्त्वा)—**अये, दक्षिणेन वृक्ष-वाटिकाम् आलाप इव श्रूयते। यावदत्र गच्छामि।** (परिक्रम्यावलोक्य च) **अये, एतास्तपस्वि-कन्यकाः स्व-प्रमाणाऽनुरूपैः[1] सेचन-घटैः बाल-पादपेभ्यः पयो दातुमित एवाऽभिवर्तन्ते।** (निपुणं निरूप्य) **अहो, मधुरमासां दर्शनम्।**

आर्या (1:,18 12,15) शुद्धान्त-दुर्लभमिदं[2] वपुराश्रम-वासिनो यदि जनस्य।
दूरीकृताः[3] खलु गुणै रुद्यान-लता वन-लताभिः ॥१६॥

यावदिमां छायामाश्रित्य प्रतिपालयामि[1]। (इति विलोकयन् स्थितः)।

King—(*Listening*) Hark ! to the right of the bower of trees something like speech is heard. I will go thither. (*Walking and looking around*) Lo ! the maidens of the anchorities are approaching this very way, with water-pots proportionate[1] to their size,[1] with a view to watering the saplings. (*Marking closely*) Oh ! how graceful they look. If such a body, rare[2] even in (*my*) seraglio,[2] be possessed by one living in a hermitage, then indeed are the creepers of the garden out-done[3] in points of excellence, by the woodland creepers. (16)

I will wait[1] remaining in this shade. (*Stands gazing*).

राजेति। 'अये' इति सम्भ्रमे ('अये कोपे विषादे च सम्भ्रमे स्मरणेऽपि च' इति मेदिनी) 'दक्षिणेन वृक्ष-वाटिकाम्' ['एनपा द्वितीया च'-(२।३।३१); 'एनपेति योगविभागात् षष्ठी अपि' इति दीक्षितः, (६१०)। अतः षष्ठी अपि साधुः] पुष्पोद्यानस्य अदूरे दक्षिणे भागे इत्यर्थः। 'आलापः' आभाषणं 'श्रूयते इव'। अत स्तत्रैव गन्तु युक्तम् इति भावः। 'कन्यकाः' कुमार्यः 'स्वासां प्रमाणस्य अनुरूपैः' स्व-शक्ति-योग्यैः क्षुद्रैरित्यर्थः। सेचनार्था घटाः 'सेचनघटाः' [उत्तर-पद-लोपी कर्मधारयः (७३९); 'इत्थंभूत-लक्षणे' (२।३।२१) इति ३या]। तैः 'वालपादपेभ्यः' क्षुद्रवृक्षेभ्यः 'पयोदातुम् इत एव' यत्राहं स्थितोऽस्मि तद्भागे एव 'अभिवर्तन्ते' आगच्छन्ति। 'निपुणम्' अवधानेन सह 'निरूप्य' दृष्ट्वा आह। ('अहो' इति विस्मये ('अहो ही च विस्मये' इत्यमरः)। दृश्यते यत् यत् 'दर्शनं (३।३।११३) रूपम्। 'मधुरं' प्रियं नयन-सुभगमिति यावत् ['मधुरं' रसवत् स्वादु प्रियेषु मधुरः अन्यवत्' इति विश्वः। 'ऊष-शुषि-मुष्क-मधो रः' (५।२।१०७) इति मत्वर्थे रः)

शुद्धान्तेति। 'यदि आश्रमे वसति' यः तस्य विलास-वेष-भूषादि-रहितस्य तपस्या-क्लिष्टस्य तपोवनवासिनः 'जनस्य' सामान्यस्य लोकस्य 'इदं' मनोमोहकरं 'वपुः' शरीरं लावण्यं वा ('वपुः शरीरे लावण्ये जले दीप्तौ च सज्जने' इति केशवः। जातावेकवचनम्) 'शुद्धान्ते' (अपि) राज्ञः अन्तःपुरे अपि ('शुद्धान्तोऽन्तःपुरे गुह्यकक्षभेदे च भूपतेः' इत्यजयः) 'दुर्लभम्' (अत्र विशेषे प्रस्तुते सामान्यस्योक्तेः अप्रस्तुतप्रशंसा') तदा अतियत्नेन परिपालिताः 'उद्यानस्य लता', अयत्न-लालिताभिः 'वनलताभिः' कर्त्रीभिः 'गुणैः' सौगन्ध्यादिभिः दूरीकृताः' तिरस्कृताः 'खलु' इति

निश्चये वाक्यालङ्कारे वा। (उद्देश्य-प्रतिनिर्देश्यत्वात् अत्र कथित-पद-दोषा-भावः। छेक-वृत्त्यनुप्रासौ। असंभवद्वस्तु-संबन्ध-रूप-निदर्शना-लङ्कारश्च। न तु दृष्टान्तः, निरपेक्षयोः वाक्ययोः बिम्ब-प्रतिबिम्बभावे दृष्टान्तस्य उक्तेः। नापि प्रतिवस्तूपमा। 'प्रतिवस्तूपमा तु सा। सामान्यस्य द्विरेकस्य यत्र वाक्यद्वये स्थितिः' इति प्रकाशकार-कृत-लक्षणात्। इयमार्या)॥ (१६)॥ यावदिति। "प्रति-पालयामि' आगमनम् प्रतिपालयन् अवस्तिष्ठे इत्यर्थः।

22n.—1. **दक्षिणेन**—एनप् comes in place of १मा and ७मी by 'एनब् अन्यतरस्याम् अदूरेऽपञ्चम्या।'—V. 3. 35. कथं तर्हि "तत्रागारं धनपति-गृहादुत्तरेण अस्मदीयम्" इति ? अत्र तु "उत्तरेण" इति तृतीयान्त-तोरणेन इत्येतेन समानाधिकरणं बोध्यम् इति प्रौढमनोरमा॥ 2. **कन्यकाः**=कन्या+कन् स्वार्थे। Opt. **कन्यिका**। कन्या=कन्य by 'केऽणः' VII. 5. 13 ; (109n. 2). "**कन्यका**" is sanctioned by शब्दरत्नावली of मथरेशपण्डितः। 'अष्टवर्षा भवेत् गौरी, नववर्षा तु रोहिणी। दशमे कन्यका प्रोक्ता, अतऊर्ध्वं रजस्वला' इति स्मृतिः। But here it has a general sense. 3. **स्व-प्रमाण** &c.—Cf. 'पयोघटैः आश्रम-बाल-वृक्षान् संवर्द्धयन्ती स्व-बलानुरूपैः। असंशयं प्राक् तनयोप-पत्तेः स्तनन्धय-प्रीतिमवाप्स्यसि त्वम्'—Ra. XIV. 78. **निपुणं**—*Cf.* 'निपुणमन्विष्यन् उपलब्धवान्'—DC. 4. **शुद्धान्त** &c.—Here the intended sense will not be clear unless we supply 'अपि' after it (*Com.*), hence we have **अनभिहित-वाच्यता-दोष** *i.e.*, what is intended, is not clearly expressed by suitable words. 5. **वपुः**—Either body or beauty (*Com.*). 6. **यदि**—Implies king's unwillingness to admit the existence of such a nonpareil beauty in a hermitage.

Remark—The figure here is निदर्शना (*Com.*) प्रतिवस्तूपमा, दृष्टान्त अर्थान्तरन्यास and निदर्शनाare somewhat similar in nature. The first two are but different ways of stating resemblance between two sentences. In **प्रतिवस्तूपमा**, the resemblance is of the nature of *identity* (वस्तु-प्रतिवस्तु-भाव) between the common properties, while in **दृष्टान्त** it is that of *similarity* (बिम्ब-प्रतिबिम्ब-भाव)। When the relation between two propositions or objects (possible or impossible failing to be one of *identity*, is *reduced to one of similarity*, the figure is **निदर्शना**। Both निदर्शना and दृष्टान्त have

बिम्ब-प्रतिबिम्ब-भाव as their basis, but in the former the बिम्ब-प्रतिबिम्ब-भाव is expressed by **one** sentence, while in the latter it is expressed by **two** sentences. In दृष्टान्त the two sentences between which resemblance is implied are *independent* of each other, but they are mutually *dependent* in निदर्शना। The beauty of निदर्शना lies in the conception of identity between the senses of two words or two clauses ending in the conceived resemblance between them and not in the implied resemblance between two things. Hence this purpose of निदर्शना cannot be served by व्यङ्ग्योपमा। In निदर्शना there is no साधारण-धर्म। In दृष्टान्त, सामान्य is supported by सामान्य, and विशेष by विशेष, while in अर्थान्तरन्यास, सामान्य is supported by विशेष and vice-versa, and if words like हि, यत्, यतः are used in supporting statement, the relation of the confirmer and the confirmed, is वाच्य, otherwise it is व्यङ्ग्य। It should further be noted that similarity in प्रतिवस्तूपमा is *implied* (गम्य) and not *expressed* (वाच्य) by इव, यथा &c.—as in वाक्यार्थोपमा। So "दिवि स्थितो भानुरिव भूस्थस्त्वं भ्राजसे नृप" is an instance of वाक्यार्थोपमा and not of प्रतिवस्तूपमा। (Vide अलंकारसर्वस्व)।

Text:—(ततः प्रविशति यथोक्त-व्यापारा[1] सह सखीभ्यां शकुन्तला)
शकुन्तला—इदो इदो सहीओ (इत इतः सख्यौ)।

(*Enter Śak. with her two lady friends, engaged*[1] *in the aforesaid manner*).[1] Śak.—This way, this way, (*my*) friends.

अनसूया—हला सउन्दले, तुवत्तो वि ताद-कस्सवस्स इमे अस्सम-रुक्खआ पियदरेत्ति तक्केमि। जेण णोमालिआ-कुसुम-पेलवा[2] वि तुमं एदाणं आलवाल-पूरणे[3] णिउत्ता (हला शकुन्तले, त्वत्तोऽपि तात-काश्यपस्य इमे आश्रम-वृक्षकाः प्रियतरा इति तर्कयामि। येन नव-मल्लिका-कुसुम-पेलवापि[2] त्वम् एतेषाम् आलवाल-पूरणे[3] नियुक्ता)।

Anasūyā—Dear Śakuntalā, methinks these plants in the hermitage are dearer even than you, to Father Kāśyapa ; for though delicate[2] as the Jasmin flower,[2] you have been employed in filling[3] their basins.[3]

शकुन्तला—हला अनसूए, ण केअलं ताद-णिओओ एव्व, अत्थि मे सोदर-सिणेहो वि एदेसु (हला अनसूये, न केवलं तात-नियोग एव, अस्ति मे सोदर-स्नेहः अपि एतेषु)। (इति वृक्ष-सेचनं रूपयति)।

Śakuntalā—Dear Anasūyā, surely (*that*) is not merely my father's command, (*but*) I, too, cherish a fraternal affection for them. (*Represents watering the trees*).

V. L.—'येन'—R. V. B. M. 'यदनेन'—S. 'पेलवा'—R. V. B. M. 'पेशला'—S. 'न केवलम्'—R. V. S. 'हला अनसूये, न केवलम्'—M. HS.

ततइति। उक्तम् अनतिक्रम्य 'यथोक्त', तत् अस्ति अस्य इति अचा यथोक्तः। तथाविधः 'व्यापारः' यस्याः सा वृक्ष-सेचनार्थं घट-हस्ता इति भावः। **अनसूयेति**। 'हला' इति सख्याः आमन्त्रण-पदं ('हण्डे, हञ्जे हलाऽऽह्वाने नीचां चटीं सखीं प्रति' इत्यमरः), 'आश्रमवृक्षकाः' ('ह्रस्वे'-५।३।८५ इति कः। कन् इति केचित्। म प्रमाद एव) 'त्वत्तोऽपि (२।३।५२) प्रियतरा' अतिशयेन वल्लभा। एषु आश्रम-वृक्षेषु कण्वस्य यादृशी ममता, त्वयि तु तादृशी न, इत्येव मे धारणा इत्याशयः। 'येन' यस्मात् हेतोः 'नव-मल्लिका-कुसुमम्' इव 'पेलवा' कोमला 'अपि' ('पेलवं कोमले तनौ' इति शाश्वतः)। 'आलवालस्य' जलाधारस्य ('आलवालं विदुः धाराधारणं द्रवतोऽम्भसः' इति)। **शकुन्तलेति**। 'तातस्य' पितुः ('दूतनिभ्यां दीर्घश्च (उः—२७७) इति क्तः। 'अनुदात्तो—(३।४।६७) इति न-लोपः। 'तातः अनुकम्पये पितरि' इति हेमचन्द्रः) 'नियोगः' आदेशः।

23n.—1. **अनसूया**—Lit. one without any desire to find fault with the merits of others—"असूया तु दोषारोपो गुणेष्वपि"——A. **हला**—समानाभिस्तथा सख्यो हला भाष्या परस्परम्'—Bharata. 2. **त्वत्तः**—'पञ्चमी विभक्ते:' (2. 3. 42.) इति ५मी। त्वत्+तस्। 3. **नव-मल्लिका** (*R's Com.*) &c.—**पेलव** (कोमल) is a very happy epithet with Kāli. in spite of the fact that VM, MB and others have prohibited the use of **'पेलव'** in literature, as it is expressive of *obscene ideas*. Cf. 'पाणिः पल्लव-पेलवः। पेलव-शब्दस्य आद्याक्षरे अश्लीले'—SD. VII. Bhoja also cites the following Śloka as an example of वाक्यगत-व्रीडा-व्यञ्जकाश्लीलता—'विद्यामभ्यस्यतो रात्रावेति या भवतः प्रिया। वनिता गुह्यकेशानां कथं मे पेलवं धनम्'। **Constant use of such a prohibited**

word is a clear proof of his flourishing at an early period when rules of rhetorics were not observed strictly. Mark that **नव-मल्लिका** (Jasmin—"सप्तला नवमल्लिका"—A qtd. R.) blooms in the Spring, (Ra. IX. 42.), whereas '**नव-मालिका**' in Autumn. (RS. III. 18.). Vide Time Analysis, Act. I. The former is **whitish**, the latter being **red** in colour. **4. आलवाल-पूरणे**— आ समन्तात् जलस्य लव (विन्दुम्) आलाति (गृह्णाति) इति आ+लव्+ आ+ला+क [क-प्रकरणे मूलविभुजादिभ्यः उपसंख्यानम्' (वा:—3. 2. 5) —BhD]. "अम्भसां यत्र धारणम् । स्यादालवालमाऽऽवालमाऽऽवाप." इत्यमरः— A basin dug at the root of a tree for holding water. The act of watering the saplings of the hermitage generally devolves upon the hermit-girls. Cf. Ra. 1. 51. JH. V. 3 ; Vik. II (end). **नियुक्ता**—(Appointed)—(17n. 1). **5. न केवलं** &c.—Ra. III. 31. The idea is—I would have watered these plants even in the absence of my father's order to that effect, for I cherish a fraternal affection for them. **6. सोदर-स्नेहः**—सोदरः means **समानम् उदरम् अस्य**—(Coming out of the same womb), but the rule '**विभाषा उदरे**' (6. 3. 81 ; 1016.) cannot change '**समान**' into '**स**' as उदर is not followed by '**यत्**'। The rule '**समानस्य छन्दसि अमूर्धप्रभृत्युदर्केषु**, (6. 3. 84 ; 1012.) can change **समान** into '**स**' but it is **restricted to the Vedas only**. Hence BD following, VM says (*i*) '**समानस्य**' **इति योगो विभज्यते** । तेन 'सपक्षः' 'साधर्म्यं', 'स्वजातीयम्' इत्यादि सिद्धम् इति 'काशिका' ; (*ii*) अथवा **सह-शब्दः सदृश-वचनः** अपि अस्ति । सदृशः सख्याः ससखी इति यथा । तेनायम् अ-स्वपद-विग्रहो बहुव्रीहिः । Hence समानम् उदरं यस्य सः सोदरः by (*i*), *i.e.* by the rule 'समानस्य' obtained from योगविभाग of the rule (6. 3. 84.), or सदृशम् उदरम् यस्य सः सोदरः by (*ii*),—Bahuvrīhi (अस्वपद-विग्रह-नित्यसमासः) । HD, however, rejects (*i*) and explains all these by (*ii*).—Cf. समाना जातिरस्य 'वोपसर्जनस्य' (६।३।८२ ; ८४९) इति सभावः । समान-शब्दस्य तु समानजातीय इत्यादि भवति । योगविभागे तु तस्य **नित्यत्वात्**, नैतत् सिध्यति । **अतएव भाष्य-वार्त्तिकयोः योगविभागस्य नोपन्यासः**—PM. '**न केवलम्**'—Cf. 'न केवलं तद्गुरुरेकपार्थिवः क्षितावभूद् एक—धनुर्धरोऽपि सः"—**Ra. III. 31.**

एतेषु—For सप्तमी vide (242n. 5). रूपयति=अभिनयति—Shows by action. तत्राभिनयः—"नलिनी-पद्मकोशौ कृत्वा स्कन्धप्रदेशं नीत्वा अवधूतेन शिरसा मनाङ्नामितया देहयष्टया च सहाधोमुखौ (अव)नीताविति। तल्लक्षणं—"अश्लिष्ट-स्वस्तिकौ सन्तौ शुकतुण्डावधोमुखौ। मिथः पराङ्मुखौ कृत्वा यौ कृतौ पद्मकोशकौ"—R.

Text :—राजा—कथमियं सा कण्व-दुहिता। असाधु-दर्शी[१] खलु तत्रभवान् काश्यपः। य इमाम् आश्रम-धर्मे नियुङ्क्ते[३]।

वंशस्थ (जतजर) (इदं किलाऽव्याज-मनोहरं[४] वपुस्तपःक्षमं[५] साधयितुं य इच्छति। ध्रुवं[६] स नीलो-त्पल-पत्र-धारया[७] शमी-लतां[८] छेत्तुमृषिर्व्यवस्यति[९] ॥१७॥)

भवतु। पादपाऽन्तरित एव विस्रब्धां[१०] तावदेनां पश्यामि। (तथा करोति)।

King—Can this be the daughter of Kaṇva ? Undiscriminating[1] must his Holiness[2] Kāśyapa be, (*since*) he has appointed[3] her to the duties of the hermitage. The hermit, who hopes to make this[4] guilelessly graceful form[1] inured[5] to penance,[5] surely[6] strives[9] to cleave (*in twain*) a Śamī (*Acacia Suma*)—branch[8] with[7] the edge of the petal of a blue-lotus.[7] (17). Well, remaining concealed by the trees, I will gaze at her unreserved.[10] (*Does so*).

शकुन्तला (स्थित्वा)—सहि अणसूए, अदि-पिणद्धेण वक्कलेण पिअंवदाए णिअन्तिद म्हि। सिढिलेहि दाव णं (सखि अनसूये, अतिपिनद्धेन[११] वल्कलेन प्रियंवदया नियन्त्रिताऽस्मि[१२]। शिथिलय तावदेतत्)। Śakuntalā—(*Having stopped*) Friend Anasūyā, I am hard-pressed[12] with a bark (*cloth*)[11] fastened very tightly[11] by Priyaṁvadā. Just loosen it.

अनसूया—तह (तथा)। (इति शिथिलयति)।

Anasūyā—Very well. (*Loosens it*).

प्रियंवदा (सहासम्)—एत्थ दाव पओहर-वित्थारइत्तअं अत्तणो जोव्वणं उवालह (अत्र तावत् पयोधर-विस्तारयितृ आत्मनो यौवनम् उपालभस्व १३)।

Priyaṁvadā—(*Laughing*). In this case, rather blame[13] your youth which has swelled up your busts.

V. L.—'शमीलताम्'—B. V. M. 'समिल्लताम्'—S. R. 'विस्रब्धाम्'—B. V. 'विश्रब्धम्'—R. S. 'विश्वस्ताम्'—M. HS. After 'उपालभस्व M reads 'मां किमुपालभसे'।

राजेति। 'कथं' हर्षे, सम्भ्रमे, संभावनायां वा। 'इयं सा' वैखानस-वर्णिता यद्दर्शनाभिलाषी समागतोऽहम्। 'तत्रभवान्' पूज्यः 'काश्यपः असाधुदर्शी खलु' नूनं स न सुविवेचक इति भावः। 'यः' (यच्छब्दस्य उत्तर-वाक्य-गतत्वेनोपादाने सामर्थ्यात् पूर्ववाक्ये तच्छब्दस्यार्थत्वम्, अतएव पूर्ववाक्ये तच्छब्दस्य अनपेक्षा) 'इमां' कुसुम-पेलवां शकुन्तलाम् 'आश्रमस्य धर्मे' कठिने तपश्चरणे 'नियुङ्क्ते' व्यापारयति। वक्ष्यमाण-श्लोके असाधुदर्शित्वे कारणं निर्दिशति। **इदमिति।** 'य ऋषिः' कण्वः (ऋषति जानाति ब्रह्म इति 'इगुपधात् कित्' उ—५६९ इतीन्। 'ऋषि र्वेदे वसिष्ठादौ दीधितौ च पुमान् अयम्' इति मेदिनी) 'अव्याजम्' आहार्य-शोभा-रहितञ्च 'मनोहरं' निसर्ग-सुन्दरम् च 'इदं' पुरःस्थितं 'वपुः' शरीरं 'तपसः क्षमं' योग्यं ('योग्ये शक्तौ हिते क्षमम्' इति धरणिः) 'साधयितु' कर्तुम् 'इच्छति' अभिलषति 'स' कण्वः' 'ध्रुवं' निश्चित ('स्थिरे नित्ये निश्चिते च' ध्रुवं क्लीवं प्रकीर्तितम्' इति मेदिनी) 'नीलोत्पलस्य' इन्दीवरस्य यत् 'पत्रम् अतिकोमलं, तस्य 'धारया' पार्श्वभागेन 'शम्याः' वृक्षविशेषस्य 'लतां' शाखां ('व्रततिस्तु लता ख्याता, लता शाखा च शाखिनां') 'छेतु व्यवस्यति' उद्यच्छते 'किल' इत्यरुचौ ('किल संभाव्य-वार्तयोः। हेत्व-रुच्योः अलीके च' इति हैमः) ('अभवन् वस्तु-सम्बन्धः उपमा-परिकल्पकः। 'निदर्शना', इति लक्षणात् समस्तवाक्ये असम्भवद्वस्तु-सम्बन्धरूपा निदर्शनाऽलंकारः। 'अव्याज-मनोहरम्' इत्यत्र विभावना च। श्रुत्यनुप्रास-वृत्त्यनुप्रासयोः एकवाचकानुप्रेशरूपः संकरः। ध्रुवम् इत्युत्प्रेक्षा। वंशस्थविलं वृत्तम्। अनेन अभिप्राय-रूपं भूषणम् उपन्यस्तम्। तथाचोक्तं दर्पणे—'अभिप्रायस्तु सादृश्यात् भूतार्थस्य कल्पना'। शकुन्तलां प्रति प्रागुत्पन्नस्य नृपानुरागस्य बाहुल्यात् अत्र परिकर-नामाङ्गमुपक्षिप्तम्। 'समुत्पन्नार्थ-बाहुल्यं ज्ञेयः परिकरः पुन' इति दर्पणलक्षणात्॥(१७)॥ **भवत्विति।** 'भवतु' काश्यपः साधुदर्शी नवेति विचारेणालम्। इदानी 'पादपैः' वृक्षैः 'अन्तरितः' प्रच्छन्नः सन् 'एनां शकुन्तलां 'विस्रब्धाम्' अत्र कोऽपि नास्ति इति विश्वास-युक्ताम्, अतः स्वच्छन्दतः आलपन्तीं ('समौ विस्रम्भ-विश्वासौ' इत्यमरः'। ('विश्वस्ता इति पाठस्तु न मनोरमः। 'विश्वस्ता' नाम विधवा'। तथाचोक्त ममरेण—'विश्वस्ता-विधवे समे' इति)। **शकुन्तलेति।** 'अतिपिनद्धेन' दृढ़वद्धेन ('आमुक्तः प्रतिमुक्तश्च पिनद्धश्चाऽपिनद्धवत्' इत्यमरः) 'वल्कलेन' वृक्षत्वचा 'नि-यन्त्रिता' सुतरां पीड़िता। 'शिथिलय' शिथिल कुरु। **प्रियंवदेति।** 'अत्र' अस्मिन् नियन्त्रण-विषये 'आत्मनः' स्वकीयस्य 'पयोधरयोः' स्तनयोः 'विस्तारयितृ' विस्तारम् आपादयितृ 'यौवनं' यूनः भावं ('हायनान्त-युवादिभ्योऽण्' (५।१।१३०); 'अन्' (६।४।१६७) इति प्रकृति-भावः)। 'उपालभस्व' तिरस्कुरु ('यः सनिन्द

उपालम्भस्तत्र स्यात् परिभाषणम्' इत्यमरः।) वल्कलं पुरातनमेव, परन्तु इदानीं यौवनारम्भस्ते जातः, अतः स्तनद्वयमितराङ्ग-वत् सुतरां विस्तृतं जातम्। तेना-तिपिनद्धत्व-प्रतीतिरितिभावः॥

24n.—1. कथमियं—The king could not first recognize Śak. Later on he could know her from her reply to Anasūyā, thus कथम् expresses delight accompanied by surprise. 2. असाधु-दर्शी—One who does not take a correct view of things, the reason for which follows. 3. तत्रभवान्—'स भवान्' इति तत्रभवान् इति सहसुपेति समासः। It is an honorific address and is *generally* used with respect to persons who are *absent*, while "अत्रभवान्" is used with persons that are present. 'त्रल्' is used in the sense of प्रथमा by 'इतराभ्योपि दृश्यन्ते' (5. 3. 14, 1963). 'भवत्-प्रभृति-शब्दयोगेऽभिधानम्। भवान्-दीर्घायु-र्देवानांप्रिय-आयुष्मान् इति भवदादयः'—Prabhā. 4. अव्याज &c.—वि+अज्+घञ् करणे=व्याजः ('हलश्च' 3. 3. 121.)—Artificial—'व्याजः शाठ्येऽपदेशे च' इति विश्वः। अव्याजेन मनोहरम्—Fascinating without the interference of art. (Com.) तपःक्षमं—क्षम—Fit, capable of enduring penance (Com.). Cf. 'आत्मकर्म-क्षम'—*Ra. I.*13 ; 'स्पर्श-क्षमं'—*I.* 25. infra ; 'दास्यमपि क्षमं'—*Śak. V.* 27 ; 'गीत-क्षमं'-*VII.* 5 ; 'उपभोग-क्षमं'—Act. *I. Supra.* 'यः साधयितुम् इच्छति"=सिसाधयिषुः। 5. नियुङ्क्ते—Atmp. by 'स्वराद्य-न्तो-पसृष्टात् इति वक्तव्यम्'—Vārt. (1. 3. 64.)—'कथं केवलात्—'प्रजासु वृत्तिं यम् अयुङ्क्त वेदितुम्।" कर्त्रभिप्राये भविष्यति'।— Prabhā. युज्—"नियुङ्क्ते भमिपालान् यो, नियोजत्यतिरक्षकान्। नियोजयति सामन्तान् स्वयमात्मनि युज्यते"—*KR.* 42—(17*n.* 1). 6. नीलोत्पल—&c.—नीलोत्पल is a kind of water-lily ('नील सापला इति भाषा'—Kalpa.) This is purposely selected by the poet on account of its exceedingly tender nature. It blooms only in the moon-shine ('अह्नि अम्भोजं, निशायां विकशति कुमुदम्'——*SD.* 7.) and hence **too delicate to endure the rays of the sun.** (212*n.* 4). 7. शमी-लतां—'लता' means 'branch' (*Com.*), शमी tree is supposed to contain fire inside. Vide (126n. 4); 'शमीमिवाऽभ्यन्तर-लीन-पावकाम्'—Ra. III. 9.

The tree being one of the hardest woods, the disproportionateness between the cutter and the cut is beautifully expressed. This tree has been mentioned purposely, as its branches are always required by the ascetics for kindling fire. (MS. VIII. 247). The Śloka is quoted by VK (SD. VI). For a parallel idea, Cf. 'भेत्तुं वज्रमणिं शिरिष-कुसुम-प्रान्तेन संनह्यते'—NŚ. 5 ; 'ज्वलितं व्यजनेन पावकं न तु निर्वापयितुं हि कः क्षमः'—RH. IV. 58.'फुल-दल दिया, काटिला कि विधाता शाल्मली तरुवरे ?—Michael—(मेघनाद-वध-काव्य) । **व्यवस्यति**—Strives. Cf. 'गन्तुमाशु व्यवस्येत्'—MD. 23.'न वेत्ति व्यवस्यन्'—V. 19, infra ; (2n. 4). **8. भवतु**—An अव्यय,, generally used when a topic is taken up, leaving aside the old one. (*Supra*). **9. एनां विस्रब्धां पश्यामि**—This act of the king is not at all unbecoming. For, **unmarried girls** can be minutely observed, as otherwise all love-marriages will have to be stopped. Elsewhere our hero remarks-'भवतु । अनिर्वर्णनीयं **पर-कलत्रम्**'(164n. 1) ; 'अनार्यः खलु परदार-व्यवहारः'-(248n. 1) where "कलत्र or "दार" means a **'married woman.'** Besides the king waited for a suitable opportunity to meet his hostess lest she be confused. Cf. "नायकः —कः दोषः । **निर्दोष-दर्शनाः कन्यका** भवन्ति । किन्तु कदाचित् अस्मान् दृष्ट्वा बाल-भाव-सुलभात् साध्वसात् न चिरमिह तिष्ठेत् तदनेनैव तमाल-जालान्तरेण पश्यामः"—*NN. I.* '**कन्यका-दर्शनं निर्दोषम्**'—PY. III. वि+स्रम्भ्+क्त कर्तरि=विस्रब्धा—At ease, (because Śak. is unconscious of the fact that she is being watched). The reading **विश्रब्धा** seems to be wrong, for it means '*forgotten*'. Vide (163n. 2). **10. अतिपिनद्धेन** अपि—नह्+क्त कर्मणि='अपिनद्धम्'or पिनद्धम्'–(Fastened too tightly) (5n. 1). **वल्कलेन**—Cf. Eng. and Danish *Bark* ; Icelandic '*Borkr*. **11. नियन्त्रिता**—नि+यन्त्र्—('तत्करोति तदाचष्टे' वाः—२५७३) णिच्+क्त कर्मणि—Restrained, Tied up, pinioned—शिथिलं कुरु इति शिथिल+णिच्+लोट् हि=**शिथिलय**—a denominative verb. **अस्मि**= अहम् (7n. 2 ; 225n. 7.) **12. प्रियंवदा**–प्रियं वदति या सा इति कर्तरि खच् by "प्रिय-वशे वदः खच्" (3. 2. 38), "अरुर्द्विषदजन्तस्य मुम्" (6. 3.67) इति मुमागमः । **पयोधर** &c.—धरति इति धरः । पयसः धरः=पयोधरः ।

With 'अण्' 'पयोधारः'। (Vide 222n. 7) ; Cf. *Ku*. 1. 40. समास with तृच् (in विस्तारयितृ) is **barred** by 'तृज-काभ्यां कर्तरि' (2. 2. 15). 'शेष-षष्ठ्या समास इति कयटः'—BD. "केचित्तु **जनिकर्तुः**' (1. 4. 30), '**तत्-प्रयोजको** हेतुश्च'(1. 4. 55) 'इति निर्देशात् **अनित्योऽयं समासः** इत्याहुः। **तस्मन्दं** शष-षष्ठी-समासेन उक्त-निदशोपपत्तेः"—T; 13. **उपालभस्व**—उप्+आ+लभ् +लोट् स्व। "दुर्वादः स्यात् उपालम्भस्तत्र यः **स्तुतिपूर्वकः**। सोल्लुण्ठनंसनिन्दस्तु यस्तत्र परिभाषणम्'—*Jaṭādhara*. Apparently उपालम्भः is निन्दापूर्वक, but Anasūyā seems to use it slyly as **स्तुति-पूर्वकः**। She means to say that developed breast in woman is **a sign of beauty**. Cf. 'उन्नत-पयोधराऽऽढ्या"—KM. 265 ; 49 ; 187; so **you should praise your youth** which is responsible for this good to you. After उपालभस्व, (in B, P, HS. M.) the following occurs [राजा—सम्यगियमाह। 'इदमुपहित-सूक्ष्म-ग्रन्थिना स्कन्धदेशे स्तन-युग-परिणाहाच्छादिना वल्कलेन। वपुरभिनवमस्याः पुष्यति स्वां न शोभां कुसुममिव पिनद्धं पाण्डु-पत्रोदरेण"] —A most just observation. 'Her new (blooming) body (dressed) in bark, covering the orbs of her twin breasts and having its subtle knots tied on the region of her shoulders, does not manifest its proper beauty, like a flower wrapped within seared leaves.' —(मालिनीवृत्तम्)—The idea is certainly very nice.

Remark—From the above conversation it will be noticed that Anasūyā by nature is very meek and does at once what she is requested to do. But Priyaṁvadā is vivacious and saucy. and she at once retorts any charge brought against her.

Text :—

राजा—कामम्[7] अननुरूप[2]मस्या वपुषो वल्कलम्। न पुनरलङ्कारश्रियं न पुष्यति[3]। कुतः—

सरसिजमनुविद्धं[4] शैवलेनापि[5] रम्यं
मालिनी **मलिनमपि हिमांशोर्लक्ष्म[6] लक्ष्मीं तनोति[7]।**
(ननमयय) **इयमधिक-मनोज्ञा वल्कलेनापि तन्वी**
किमिव हि मधुराणां मण्डनं[8] नाकृतीनाम्॥१८॥

King—Granted[1] that the bark is ill-suited[2] to her figure, yet it is not that it does not foster[3] the beauty of an ornament. Because—a lotus even though fretted[4] by moss[5] (*Vallisneria*), is charming. The speck[6] though dark, enhances[7] the beauty of the cold-rayed (*moon*). This slender-bodied one is all the lovelier even with (*her*) bark-(*garment*). To grac ful forms what indeed is not an embellishment[8] ? (18)

V. L.—'वपुषो वल्कलम्'—M.B. C. 'वयसो वल्कलम्'—R. V. S.

राजेति। इदं 'वल्कलम् अस्याः' शकुन्तलायाः 'वपुषः' शरीरस्य 'कामम्' अत्यर्थं, रूपमनुगतम् इति अनुरूपं योग्यं, तत् न भवति इति 'अननुरूपं' सर्वथा अयोग्यं, यद्वा 'अननुरूपम्' अयोग्यम् इति 'कामं' मया स्वीकर्तव्यं ('कामं प्रकामेऽनुमतौ' इति विश्वप्रकाशः)। 'पुनः' इति भेदे ['पुनरप्रथमे मतम्। अधिकारे च भेदे च तथा पक्षान्तरेऽपि च' इति मेदिनी]। 'अलंकारस्य' भूषणस्य 'श्रियं' शोभां 'न पुष्यति' न वर्धयति' इति 'न' वधयत्येव इत्यर्थः। ('संभाव्य-निषेधनिवर्तने द्वौ प्रतिषेधौ' इति वामनः)। **सरसिजमिति।** 'शैवलेन' जलनीलिकया नाम तृणभेदेन ; ['शेवलश्चव शेवालः शैवलो जलनीलिका' इति वाचस्पतिः]। 'अपि' इति गर्हायाम् ('अपि सम्भावना-प्रश्न-शङ्का-गर्हा-समुच्चये' इति विश्वः) 'अनुविद्धं' वेधितं ('विद्धः स्यात् वेधिते क्षिप्ते सदृशे बाधिते त्रिषु' इति विश्व-मेदिन्यौ। प्रकृते तदर्थाऽसंभवात् संसक्तत्वं लक्ष्यते। अन्तराऽन्तरा संसक्तम् इति भावः)। सरस्यां कासारे ('कासारः सरसी सरः' इत्यमरः) जातम् इति 'सरसि-जम्'. ('सप्तम्यां जनेर्डः', ततः "ङ्यापो संज्ञा"—६।३।६३ इति ह्रस्वत्वम्) 'सरसिजं' पद्मं 'रम्यं' मनोहरम्। 'लक्ष्मं' चिह्नं कलङ्क इति यावत् कर्तृ ('लक्ष्म चिह्न-प्रधानयोः' इत्यमरः) 'मलिनमपि' कृष्णवर्णमपि ('मलिनं कृष्ण-दोषयोः' इति हैमः) 'हिमांशोः' चन्द्रस्य ('हिमांशुश्चन्द्रमाश्चन्द्र' इत्यमरः) 'लक्ष्मीं' शोभां ('शोभा सम्पत्ति-पद्मासु लक्ष्मीः श्रीरिव दृश्यते' इति शाश्वतः) 'वल्कलेनापि' तुच्छेन इति अपेरर्थः। (पूर्ववत् गर्हायाम् अपि)। 'तन्वी' कृशाङ्गी ('वोतो गुणवचनात्' इति विकल्पेन ङीष्—४।१।४४) 'इयं' पुरोदृश्यमाना शकुन्तला 'अधिकं मनोज्ञा' मनोहरा इति 'सहसुपेति समासः'। एतानि सर्वाणि समालोच्य मन्येऽहं 'मधुराणां' स्वभावतः शोभनानां ('मधुरौ स्वादु-शोभनौ' इति व्याडिः) 'आकृतीनां किमिव हि मण्डनं' भूषणं 'न'? अपि तु सर्वं भूषणतां प्रपद्यते इति। ('इव' इति वाक्यभूषायाम्। 'इवेति ईषदर्थो-पमोत्प्रेक्षा-वाक्यालङ्कारेषु' इति वर्धमानः)। [अत्र द्वितीय-चरणे उपमानस्याकर्तृत्वात् कर्तृ-प्रक्रम-भङ्गः। वाक्य-त्रयं पद-कदम्बकात्मकं, द्वितीयं तु क्रियाकारका-

न्वितेत्येतद्रूपम्, तेन वाक्य-प्रक्रम-भङ्गोऽपि। अतः "विधुरपि परिभिन्नो लक्ष्मणा लोभनीयः" (इति विद्याम्बुधिः), यद्वा "शिशिर-किरणमाली शोभनो लक्ष्मणापि" इति पठनीयम्। पुनः पादत्रये सौन्दर्यरूप-साधारण-धर्मस्य रम्य-लक्ष्मी-विस्तार-मनोज्ञ-पदैरभिधानात् माला-प्रतिवस्तूपमा। अन्त्यचरणे सामान्येन विशेष-समर्थन-रूपः अर्थान्तरन्यासः, अर्थापत्तिश्चेत्यनयोः संकरः। वृत्त्यनुप्रास-च्छेकानुप्रासयोः संसृष्टिः। मालिनी-वृत्तम्। अनेन 'माधुर्यं' नाम अयत्नजोऽलंकारः उक्तः। तल्लक्षणं तु दर्पणे (तृतीय-परिच्छेदे)—"सर्वावस्थाविशेषेषु माधुर्यं रमणीयता' इति। अनेन 'प्रसिद्धि' नाम भूषणमुपक्षिप्तम्। तल्लक्षणं तु तत्रैव 'प्रसिद्धिः लोकसिद्धार्थैः उत्कृष्टैरर्थसाधनः' इति) ॥ (१८)

25n.—1. **कामम् अननुरूपम्**—Either 'Exceedingly unsuitable' or '**granted** that it is unsuitable' (*Com.*). Cf. *Ku. V.* 44 ; *Ra. IV.* 13 ; *VI.* 22 ; *Śl.* 28. infra. 2. **न पुनः** &c.—पुनः implies भेद (*Com.*). It modifies what is admitted by कामम्। Bark garments are used in the 3rd stage of life, (Cf. "किमिति अपास्य आभरणानि यौवने त्वया वार्धक-शोभि वल्कलम्"-Ku. *V.* 44 ; Ra. VIII. 11), so these are quite ill-suited to Śak.'s young age, **still** they appeared fascinating to the king. This is suggested by the **adversative particle** 'पुनः'। Cf. "A simple maiden in her flowers, is worth a hundred coats of arms."—**Tennyson.** 3. **वपुषः**—R reads 'वयसः' for 'वपुषः', considering perhaps the previous speech of Priyaṁvadā which refers to Śak's youth, but 'वपुषः' is preferable as in the next *Śloka*, the king refers to her form (आकृति) and not to her age (वयस्)। 4. **न पुष्यति** &c.—Unlike Russian Language, two negatives make an affirmative in Sanskrit. Cf. "नेयं न वक्ष्यति"—III. 9 Supra. 'प्रत्युवाच तमृषिर्न तत्त्वतस्त्वां न वेद्मि पुरुषं पुरातनम्'—*Ra. XI.* 85 ; *VI.* 30 ; 'न च परिचितः न चाप्यगम्यः'—*Māla.* 1,11. *MS. VIII.* 335 ; *MD.* 63, 106 ; *ŚPB. I.* 35 ; *Vik. II.* 10. पुष् primarily means 'nurture', hence secondarily it means 'possess' or 'exhibit'. Cf. 'पुष्यति अनेकं सरयूप्रवाहः'—*Ra. XVI.* 58. 'एवमादिभिः आकीर्णः श्रियं पुष्यति अयं गिरिः'—*Rām.* II. There the commentator **Rāma** remarks '**पुष्यति वर्धयति**'। *Ra. VI.* 78 ; *XVIII.*

32 ; *IV.* 11 ; *III.* 32. *Ku. I.* 25 ; *VII.* 18, 78 ; **5. सरसिजम्**—सरसि जातम् इति सरसि+जन्+ड कर्तरि ('सप्तम्यां जनेर्डः'–3. 2 97.)= 'सरसिजम्' or 'सरोजम्' । ७मी is optionally (अलुक्) dropped by 'तत्पुरुषे कृति बहुलम्'—[(6. 3. 14). This is a **योगरूढः** word, hence though etymologically it means anything that grows in water or in a pond ['सरः नीर-तड़ागयोः')], yet by usage it means only lotus. Or, सरसी (pond)+जन्+ड=सरसिज, 'ई' is **shortened** by (6. 3. 66). (Read 3n. 4.) Cf. मन्दुरायां जातः मन्दुरा+जन्+ड=मन्दुर-ज। **6. अनुविद्धं**—अनु+व्यध्=क्त कर्मणि (व्यध्=विध् 6. 1. 16 ; 2412.)—Encased. **7. लक्ष्मीं**—Unlike नदी, लक्ष्मी has Visarga in the Nominative Singular. Cf. "अवी-तन्त्री-तरी-लक्ष्मी ह्री-श्री-धीनाम् उणादितः। स्त्रीलिङ्गानाम् अमीषान्तु न सु-लोपः कदाचन।" But Cf. again "वाला निदाघ-लक्ष्मीव तापयत्येव केवलम्"। "लक्ष्म लक्ष्मीं तनोति"—has been quoted by Daṇḍi in KA. I. 45. **8. किमिव** &c.—For similar idea. Cf. 'यथा प्रसिद्धैर्मधुरं शिरोरुहैः जटाभिरप्येवम-भूत् तदाननम्। न षट्पद-श्रेणिभिरेव पङ्कजं, स-शैवाल-सङ्गमपि प्रकाशते' —*Ku. V.* 9. 'अहो सर्वास्व-वस्थासु रामणीयकमाकृति-विशेषाणाम्'—*VI. Infra*. 'स्वभाव-सुन्दरं वस्तु न संस्कारमपेक्षते'—*Dṛṣṭānta-s'ataka*, 49. 'पतन्ति नास्मिन् विशदाः पतत्रिणो धृतेन्द्रचापा न पयोद-पंक्तयः। तथापि पुष्णाति नभः श्रियं परां न रम्यमाहार्यमपेक्षते गुणम्'—*Ki. IV.* 23. 'संपेदे श्रमसलिलो-द्गमः विभूषा रम्याणां विकृतिरपि श्रियं तनोति'—*VII.* 5. 'अथवा सर्व-मलंकारो भवति सुपुरुषाणाम्'—Avimāraka II ; 'सर्वरूपं शोभनीयं सुरूपं ; नाम'—PN. 1 ; 'सर्वास्व-वस्थासु चारुता शोभां पुष्यति'—Māla. II.

Remark—We are temp ed to quote the following passage from *LE THEATRE INDIEN* (PP. 368-371) in which Dr. Levi's imagination has conjured up "the memorable *premiėe* when *Śakuntalā* first saw the light."

......Suddenly the two pretty figurines placed between the curtains of the stage, draw the folds of the curtain aside and Duṣyanta with the bow and arrows in hand appears mounted on a chariot, his charioteer holds the reins as if bent in pursuit of an imaginary gazelle. They simulate by their

gesture the rapidity of the course; their picturesque and descriptive stances suggest to the imagination a *decor* which it will be impossible for painting to trace. They approach the hermitage; the king gets down to the ground, dismisses the charioteer and leaves the horse and the chariot, hears the voices of young girls and hides himself; an animated movement of curiosity shakes the spectators, Śakuntalā, daughter of an Apsarā, and creation of Kālidāsa possesses all the charms; can the actress respond to the expectation of the expert and knowledgable audience and attain the ideal? She presents herself dressed in a simple tunic of bark which appears to hide her forms and by dextrous contrast even embellishes them; the round delineation of her face, long eyes of dark blue hue, languorous, the massive breasts but ill-imprisoned, the delicate arms—all these let one guess the beauty which the ascetic constance conceals her attitude, her gestures simultaneously ravish the eyes and the hearts; she speaks and her voice is a song. The court of Vikramāditya trembles with a serene and profound emotion, a new masterpiece has just entered into the immortality. This book is without competition, the best work in which any of Sanskrit Literature has been treated, combining erudition, imagination and taste. It is itself a literature of high order."

But unfortunately, the passage is too long to be translated entire.

Text:—**शकुन्तला** (अग्रतोऽवलोक्य)—**एसो वादेरिद-पल्लव-ङ्गुलीहिं, तुवरेदि विअ मं केसर-रुक्खओ। जाव णं सम्भावेमि** (एष वातेरित-पल्लवाऽङ्गुलीभिः त्वरयतीव मां केशर-वृक्षकः। यावदेनं सम्भावयामि[1])। (इति परिक्रामति)।

Śakuntalā (*Looking forward*)—Yonder Vakula tree [**Mimusops elengi**] with its breeze-stirred-tendril fingers is beckoning me, as it were, in haste. I will just honour[1] it.

(*This said, walks round*).

प्रियंवदा—हला सउन्दले, एत्थ एव्व दाव मुहुत्तअं चिट्ठ।

(हला शकुन्तले, अत्र एव तावत् मुहूर्तकं तिष्ठ)।

Priyaṁvadā—Dear Śakuntalā! prithee, rest at this very place for a moment.

शकुन्तला—किं णिमित्तं? (किं निमित्तम्)? Śakuntalā—What for?

प्रियंवदा—जुए उवगदाए लदा-सणाहो विअ अअं केसर-रुक्खओ पडिभादि।
(त्वया उपगतया लता-सनाथ इव अयं केशर-वृक्षकः प्रतिभाति) ।

Privaṁvadā—For with thee by (*its side*), this Vakula tree appears as if wedded to a (twining) creeper.

शकुन्तला—अदो क्खु पिअंवदा सि तुमं । (अतः खलु प्रियंवदासि त्वम्) ।

Śakuntalā—Hence you are most appropriately named Priyaṁvadā. (i.e. **Speaker of flattering things**).

राजा—प्रियमपि तथ्यमाह शकुन्तलां प्रियंवदा। अस्याः खलु—

आर्या (12, 18 12, 15)

अधरः[1] किसलय-रागः[4]कोमल-विटपाऽनुकारिणौ[5] बाहू ।
कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम्[6] ॥१९॥

King—Priyaṁvadā has told Śakuntalā a truth[2] though (*it is*) a compliment. Truly—her lip[3] has[4] the redness of a fresh sprig[4]; her arms imitate[6] tender twigs[5] and her youth, alluring as flowers, pervades[6] all her limbs. (19).

शकुन्तलेति—"वातेन' वायुना 'ईरिताः' सञ्चालिताः 'पल्लवा' एव 'अंगुल्य स्ताभिः, 'केशरवृक्षकः ('ह्रस्वे'—५।३।८६ इति कः) 'मां त्वरयति' जल-सेचनार्थम् आह्वयतीव। ('पल्लवांगुलीभिः' इत्यत्र रूपकम्। 'अंगुली-सञ्चालनेन त्वरयति' इत्यनेन उत्प्रेक्षा च)। 'संभावयामि' जल-सेचनेन सम्मानयामि ('संभावना वासनायां गौरवे ध्यानकर्मणि' इति अजयपालः)। प्रियंवदेति। 'यावत्' इति स्तुतौ ('यावत् कार्त्स्न्येऽवधारणे प्रशंसायां परिच्छदे मानाधिकार-संभ्रमे' इति भानुजिधृत-मेदिनी) 'उपगतया' सम्मिलितया। 'लतया सनाथः' युक्तः। (अनेन शकुन्तलाया लता-सादृश्यं प्रदर्श्य तत्-सौन्दर्यं वर्णितम्। गुणोत्प्रेक्षा)। शकुन्तलेति। 'अतः' अनेन प्रियकथनेन 'त्वं प्रियंवदा' मधुरं भाषमाणा 'असि' ('प्रियवशे वदः खच्'—३।२।३८ इति खच्) ('अत्रैव तावत्' इत्यादिना 'अतः खलु' इत्येतदन्तेन निरुक्तिर्नाम भूषणमुपक्षिप्तम्। तल्लक्षणं तु दर्पणे—'पूर्वसिद्धार्थ-कथनं निरुक्तिरिति कीर्त्यते'। राजेति। यत् प्रियं प्रायेण हि तत् असत्यं, न कुत्राऽपि तूभयोःयुगपत् समागम इति प्रियेण सत्यस्य विरोधः अपि-शब्देन व्यज्यते। किन्तु अस्मिन् क्षेत्रे 'प्रियंवदा शकुन्तलां प्रियमपि' मधुरमपि 'तथ्यं' न तु अनृतम् ("सत्यं तथ्य मृतं सम्यक्" इत्यमरः) 'आह' कथयति। अधर इति। यत् प्रियंवदया लतात्वम् आरोपितम् अधुना तत् साधयति। 'अस्याः' शकुन्तलायाः 'खलु अधरः ओष्ठः ('अधरस्तु पुमानोष्ठे हीनेऽनूर्ध्वेऽपि वाच्यवत्' इति मेदिनी) 'किसलयस्य'

नूतन-पर्णस्य 'रागः' रक्तिमा इव 'रागः' रक्तिमा यस्य ('उष्ट्र-मुखवत्' उत्तर-पद-लोपी बहुव्रीहिः ८३०) तादृशः। 'बाहू' भुजौ 'कोमलौ' नम्रौ 'विटपौ' स्कन्धोर्ध्व-शाखे['स्कन्धादूर्ध्वं तरोः शाखा कटप्रो(पो) विटपो मत' इति कात्यः]तयोः 'अनुकारिणौ' सदृशौ इत्यर्थः' ('तस्य चानुऽकरोतीति शब्दाः सादृश्य-सूचका' इति काव्यादर्शे २।५७–६५) 'कुसुममिव लोभनीयं' (बाहुलकात् कर्तरि अनीयर) चित्ताकर्षकं 'यौवनं' तारुण्यम् 'अङ्गेषु' सर्वगात्रेषु 'सन्नद्धम्' आविर्भूतम् इत्यर्थः। (अत्र समासमा आर्थी,, समासगा गौणी,, पूर्णा श्रौतौ इत्युपमानां परस्पर-निरपेक्षतया संसृष्टिः। "बाहू मृदुल-विटपाविव प्रतनू" इति पठित्वा उद्देश्य-प्रतिनिर्देश्य-प्रक्रम-भङ्गः समाधेयः। अनेन पदोच्चय-नाम भूषणम् उपक्षिप्तम्। "सञ्चयोऽर्थानुरूपो यः पदानां स पदोच्चय"' इति तल्लक्षणात्। इयमार्या) ॥(१९।)॥

26n.—1. वातेरित &c.–ईर्+क्त कर्मणि=ईरिताः—Waved. Cf.'वसन्तः पवन-चालिताभिः पल्लवांगुलीभिः त्वरयतीव भवन्तम्'—*Māla. III*; JH. V.44; VII. 3 ; Ki. II. 50. 2. सम्भावयामि—सम्+भू means 'to think well of', hence 'to honour', Cf. 'एवं संभावयित्वा तु नारदं समुपस्थितम्'—PP. 1. 15. *Ra. V.* 11 ; *VII.* 8 ; *Śak. VII.* 3 ; JH. III. 31. 3. मुहूर्तकम्—हुर्च्छा (कौटिल्यगतौ)+क्त बाहुलकात् (उः- ३७६ । मुडागमश्च। 'राल्लोपः' (6. 4. 21). इति छ-लोपः। 'हलि च' (8. 2. 77.) इति दीर्घः। Or. "लिङ् चोर्ध्वमौहूर्त्तिके" (3. 3. 164) इति, पाणिनि-निर्देशात् वा मुहूर्तः—*BhD.* उपगतया—(By you being near in front). Note the appropriateness of the word in connection with 'नाथ' (husband). One is easily tempted to imagine that the king had hidden himself just behind the said tree. 4. स-नाथ—Lit. नाथेन सह वर्तमानः सनाथः, but here it means 'united with.' Cf. 'भक्ति-शोभा-सनाथं'—*Ku. VII.* 94. 'वितान-सनाथ'—II. infra. ; MD. 97 ; 'कुम्भ-सनाथ'—Vik. IV. अतः खलु &c.—Cf. 'चतुरिका खलु त्वम्'—NN. *II* ; 'परहृदय-ग्रहण-पण्डिता मदनिका खलु त्वम्''—MK. *II* ; 'विमर्द-सुरभिः बकुलावलिका त्वम्'-*Māla. III.* 5. प्रियमपि तथ्यम्—Though truth and agreeableness are irreconcilable, yet in this particular case, it is the truth which has been uttered by प्रियंम्वदा to Śak. Cf. 'तामूचतुस्ते प्रियमपि अमिथ्या'—*Ra. XIV.* 6. 'अवितथ-सूनृतेन सूनोः'-*VIII.* 92 'सुलभाः पुरुषा राजन् सततं प्रियवादिनः। अप्रियस्य

च पथ्यस्य वक्ता श्रोता च दुर्लभः'—*Râm.* *III.* 37. 2 ; 'हितं मनोहारि च दुर्लभं वचः'—*Ki.* I. 4. "अप्रियं हि हितं स्निग्धमस्निग्धमहितं प्रियं। दुर्लभं तु प्रियहितं स्वादु पथ्यमिवौषधम् ॥"—SN. XI, 16 ; 'बभाषे वाक्यमानन्दो मधुरोदर्कमप्रियम्"–SN.*XI.* 22. ऋतमपि जजल्प नाप्रियम्"–SN.III. 33 'हितं मित्रञ्च यो वक्ति न वचति अनृतं वचः"—KR. 94 ; also"सत्यं 'वदति' सर्वत्र सर्वस्य 'वदते' हितं। यन्न सत्यं न च हितं न 'वादयति' तद्वचः"—Ibid. 99. **6.** अधर &c.—'अधर' is the lower lip, while 'ओष्ठ' is the upper one, but read—यथा 'रदनच्छदौ 'दशन-वाससी' उभयत्र वर्तेते तथा ओष्ठाऽधरोऽपि उभयत्रेति नयनानन्दः। रायमुकुटोऽप्याह 'उपरवर्ती अधोवर्ती च ओष्ठः अधरोऽपि एवम्—*Kalpa P.* 18. **7.** कोमल-विटप (Branch) &c.—(*i*) (i) विटान् पाति 'इति आतोऽनुपसर्गे कः'—3. 2. 3. (*ii*) विटानां पानम्, पा पाने घञर्थे कः—(*Vārt.* 3. 3. 58). (*iii*) वेटति (आक्रोशे) इति कपन् —उः- ४३२ —BhD. **8.** लोभनीयं—Cf. "रमणीय, गेय, कर्म-प्रवचनीयम्, रम्यम् उद्यानम्, भवितव्यं भवत्येव—बाहुलकात् कर्तरि अनीयर्"–(3. 3. 113.) —Attractive, tempting. The king's latent desire to possess Śak. is made somewhat patent by this epithet. कुसुमम्—जात्यैक-वचनम्। **9.** सन्नद्धम्—(Fully developed referring to flowers ; fully permeated referring to youth.)—Cf. 'लतेव सन्नद्ध-मनोज्ञ-पल्लवा' *Ra. III.* 7.—अङ्गेषु–Read "बहुवचनेन वदने कान्तिमत्ता, नयनयोस्तरलता, कण्ठे कम्बु-त्रिरेखावत्वम्, वक्षसि स्तनोज्जृम्भणम्, नाभौ गम्भीरता, नितम्बे मध्य-निम्नत्वम् जघन-जंघा-जानु–मण्डलो-रु-देशानां मांसलत्वम् गतौ सविलासत्वम् इत्यादि ध्वनितम्"—R.

Text :—अनसूया—हला सउन्दले, इअं सअंवर-वहू[1] सहआरस्स[2] तुए किद-णामहेआ वण-जोसिणित्ति णोमलिआ। णं विसुमरिदा सि। [हला शकुन्तले, इयं स्वयंवर-वधूः सहकारस्य त्वया कृत-नामधेया वन-ज्योत्स्नेति नवमल्लिका। एनां विस्मृतासि ?]

Anasūya—Dear Śakuntalā here is the Jasmine, named by thee, 'Vanajyotsnā' (*Lit. the moonlight of the grove*), the self[1]-chosen bride[1] of the mango[2] tree. Hast thou forgot it ?

शकुन्तला—तदा अत्ताणं वि विसुमरिस्सं [तदा आत्मानमपि विस्मरिष्यामि]। (लतामुपेत्य अवलोक्य च) **हला, रमणीये क्खु काले इमस्स लदा-**

पाअव-मिहुणस्स वइअरो संवुत्तो । णव-कुसुम-जोव्वणा वणजोसिणी, बद्ध-पल्लवदाए उवभोअ-क्खमो सहआरो। (हला रमणीये खलु काले अस्य लता-पादप-मिथुनस्य[3] व्यतिकरः[4] संवृत्तः। नव-कुसुम-यौवना वनज्योत्स्ना, बद्ध-पल्लवतया[5] उपभोग-क्षमः[6] सहकारः) ॥ (इति पश्यन्ती तिष्ठति)।

Śakuntalā—Then even my own self I'll forget. (*Going up to the creeper and looking*) Dear Śakuntalā in a (*very*) delightful season, indeed the union[4] between the pair[3] of a tree and a creeper[3] had taken place. The 'Moon-light of the grove' has (*blooming*) youth (*marked with*) new flowers, and the mango-tree [5]with its newly put forth tendrils[5] is (*quite*) capable[6] of enjoyment[6].

(*This said, stands looking at it*)

V. L.—बद्ध'—B. M. V. S. 'स्निग्ध'—R.

अनसूयेति। 'सहकारस्य' आम्रस्य' ('आम्रश्चूतो रसालोऽसौ सहकारोऽतिसौरभ' इत्यमरः) स्वयं वृणीते या सा 'स्वयंवरा' ['संज्ञायां भृतवृजि—' (३।२।४६ ; २९६३) इति खच्] 'स्वयंवरा' चासौ 'वधू' श्चेति 'स्वयंवर-वधूः' ('वधुः स्नुषा नवोढा स्त्री'' इति विश्व.) । 'वनज्योत्स्ना इति त्वया' 'कृतं' विहितं 'नामधेयं' यस्याः सा 'नवमल्लिका' लता। 'एनां' नव-मल्लिकां 'विस्मृता असि' किम्। ['ज्ञानार्थत्वात् कर्तरि वर्तमाने क्तः। (जलं वृष्टो देव)-इतिवत् क्वचिदन्यतोऽपि कर्तरि क्त. वक्तव्यः' इति न्यायपञ्चाननपादाः]। शकुन्तलेति। 'रमणीये' इति बाहुलकात्—कर्तरि अनीयर्। 'लतायाः' वनज्योत्स्नायाः 'पादपस्य' रसालस्य च यत् 'मिथुनं' द्वन्द्वं स्त्रीपुंस-युगलम् इत्यर्थः ('मिथुनं न द्वयोः राशिभेदे स्त्रीपुंस-युग्मके' इति मेदिनी') तस्य, 'व्यतिकरः' मेलनं 'संवृत्तः' जातः। 'नवं' प्रथमोद्-गतम् अतएव मनोहरं 'कुसुमं' पुष्पं, रजोदर्शनं च, एव 'यौवनं यस्याः' तादृशी, 'वनज्योत्स्ना'। 'सहकारः' रसालः 'बद्धाः' सम्भूय जाताः 'पल्लवाः यस्य। तस्य भावः, तया, सञ्जात-किसलय-तया [इति नायक-व्यवहारारोपात् समासोक्तिः]। 'उपभोगस्य' वल्लरी-संश्लेष-रूपस्य 'क्षमः' योग्यः। (अत्र शोभा-नाम नाट्य-लक्षणं—'सिद्धैरर्थैः समं यत्राऽप्रसिद्धोऽर्थः प्रकाशते। श्लिष्ट-लक्षण-चित्रार्था सा शोभेत्यभिधीयते'' इति दर्पणलक्षणात्)।

27n —1. **स्वयंवर-वधूः** &c.—This sort of mock-marriage has been elsewhere described by Kāli. Cf. 'मिथुनं परिकल्पितं त्वया सहकारः फलिनी च नन्विमौ'—Ra. VIII. 61 ; Śak. IV. 12. For **स्वयंवर** &c.—

A girl is entitled to choose her own consort after waiting for 3 years. "त्रीणि वर्षाण्युदीक्षेत कुमार्यृतुमत्यपि। न चैवैनां प्रयच्छेत् तु गुण-हीनाय कर्हिचित्" ॥—MS. IX. 90. Vide also Ra. VI ; Nalodaya, I. 30 ; लक्ष्मी०—Vik. III ; Kuntala Jātaka ; Nacca Jātaka ; RV. X. 85, 13-15. 2. **वनज्योत्स्ना**—ज्योतिरस्ति अस्याम् इति ज्योतिस्+न मत्वर्थे—ज्योत्स्ना (निपातनात्) by 'ज्योत्स्ना-तमिस्रा—(5. 2. 114.) 3. **एतां विस्मृतासि**—No शेष-विवक्षा, hence no षष्ठी with स्मृ (2. 3. 52). "शेषे किम्? कर्म-विवक्षया द्वितीयैव, मातरं स्मरति, माता स्मर्यते"—**Prabnā**. स्मृ is सकर्मक, so कर्तरि 'क्त' is not available, hence विस्मृतम् इति भावे क्तः। विस्मरणम् इत्यर्थः। Then विस्मृतम् अस्ति अस्या इति अर्शआदित्वात् अच्। Cf. 'सौधवास मुटजेन विस्मृतः'-*Ra.—XIX*. 2. 'अत्र भवान् प्रणिपात-लंघनं विस्मृतः'—*Māla. IV*. (Read 152n. 8). **आत्मानमपि** &—Cf. 'चारुदत्तः—स्मर्तव्योऽसि कथान्तरेषु भवता। आर्यकः स्वात्मापि विस्मर्यते ?"—*MK. VII*. 4 **मिथुनस्य व्यतिकरः**—मेथति इति मिथ् (संगमे)+उनन् (उः- 342)—मिथुनम्= Couple. वि+अति+कृ+घ अधिकरणे (३।३।११८) —'व्यतिकरः'= Union. Cf.'तीर्थे तोय-व्यतिकरभवे'—*Ra. VIII*. 95 ; Māla. I. 4, MD. 15 ; ŚPB. IV. 53 ; VII.28. संवृत्तः—Taken place, happened-(26n. 3.) **बद्ध**—Produced—*Ra. XII*. 69; Ku. V. 60, '**उपभोग-क्षमः**'—Cf. 'एष उपारूढराग उपभोगक्षमः पुरतो तिष्ठति'—Māla.*III*. Vide (24n. 4).

Text :—प्रियंवदा ;—अणसूए, जाणासि किं सउन्दला वणजोसिणिं अदिमेत्तं पेक्खदि त्ति [अनसूये, जानासि किं शकुन्तला वनज्योत्स्नाम् अतिमात्रं प्रेक्षते इति]।

Priyaṁvadā—Do you know Anasūyā, why Śakuntalā gazes so intently at Vana-jyotsnā ?

अणसूया—ण क्खु विभावेमि। कहेहि [न खलु विभावयामि[1]। कथय।]

Anasūyā—I fail indeed to guess! Pray tell (*me*).

प्रियंवदा—जह वणजोसिणी अणुरूवेण पादवेण संगदा, अवि णाम एव्वं अहं वि अत्तणो अणुरूवं वरं लहेअं ति [यथा वन-ज्योत्स्ना अनुरूपेण पादपेन सङ्गता[1] अपि नाम एवमहमपि आत्मनः अनुरूपं[2] वरं लभेय इति]।

Priyaṁvadā—(**She wishes**) "As Vana-jyotsnā is united'[1] with a suitable tree, even so may I, too, get a consort worthy[2] of me".

शकुन्तला—एसो णूणं तुह अत्तगदो मणोरहो [एष नूनं तव आत्मगतो[1] मनोरथः[2]) ॥ (इति कलसमावर्जयति) ॥

Śakuntalā—This, surely, is the wish[2] in [1]your own mind[1].
(*This said, inverts the pitcher*).

V. L.—'जानासि किम्'——R. B. V. S.'जानासि किं निमित्तम्'—M.

प्रियंवदेति। 'अतिमात्रं' सातिशयम् औत्सुक्येन सह। अनसूयेति। 'न खलु विभावयामि' हेतुमवधारयामि। प्रियंवदेति। 'अनुरूपेण' योग्येन पादपेन' सहकार-वृक्षेण सह 'सङ्गता' मिलिता। 'अपि' इति प्रश्ने। 'नाम' इति संभावनायाम्। तद्योगे च लिङ्। किमेवं सम्भवेत् यद् 'अहमपि' (अपि रत्र समुच्चये) 'आत्मनः अनुरूपं' योग्यं 'वरं' वोढारं भर्तारम् इति यावत् ('वरो जामातरि वृतौ' इति मेदिनी) 'लभेय (३।३।१७२) इति' मनसि निधाय वन-ज्योत्स्नाम् अतिमात्रं प्रेक्षते इत्यर्थः। [राजा—'कथमियम्' इत्याद्येतदन्तेन 'विलोभनं नामाङ्गम् उपक्षिप्तम्। तल्लक्षणंतु दर्पणे—'गुणाख्यानं विलोभनम्']। शकुन्तलेति। 'आत्मानं' मनः 'गतः' (२या समासः २।१।२४) 'मनोरथः' अभिलाषः। त्वं स्वयमेव अनुरूपं वरं लब्धुमिच्छसि इत्यर्थः। 'आवर्जयति' सेचनार्थम् अवनमयति।

28n.—1. **विभावयामि**—I guess ; UC. II. 24 ; MM. I. 18. **अपि नाम**—'अपि' implies a query, while 'नाम', संभावना। The two together indicate a wish and introduce a question as to whether it will be satisfied. It has the sense of (*a*) 'is it likely', 'may it be' ; (*b*) 'would that', 'I wish that'—*AD*. *Cf.* 'अपिनाम भवदुपाध्याययजमानस्य निवृत्ता' &c.—*PR* ; 'तदपिनाम रामभद्रः पुनरपि इदं वनम् अलंकुर्यात्'—*UC. II.* 'अपिनाम दुरात्मा राक्षसो गृह्येत'—*MR. I* ;' अपिनामाऽहं पुरूरवा भवेयम्' —*Vik. II.* It has a different sense in JP (*Vide Bombay Ed. P.* 236), where it introduces a question but does not involve the wish as it does here and also generally. 2. **मनोरथः**—Desire is so termed, as it carries the mind of a man from one place to another, as does a chariot carry a man from one place to another. Cf. 'यदात्मना कृतं तन्मयि संभावयसि'—Rat. II. 3. **आवर्जयति**—आ+वृज्+णिच्+लट् ति—Inverts the pot in order to pour out its contents. Cf. 'आवर्जिताऽष्टापद-कुम्भ-तोयैः'— *Ku.*

VIII. 10. But आवर्जन generally means 'bending'. Cf. 'त्वदा—वर्जित-वारि-सम्भृतम्'—*Ku. V*. 34. 'आवर्जित-पूग-मालम्'—*Ra. XIII*. 17; *XIII*. 24 ; *XVI*. 19, (*MD*. 47. PA. II. 39).

Text :—राजा—अपि नाम कुलपतेरियमसवर्ण-क्षेत्र-सम्भवा स्यात् । अथवा कृतं सन्देहेन ।

वंशस्थ **असंशयं क्षत्र-परिग्रह-क्षमा,¹ यदार्यम²स्यामभिलाषि मे मनः ॥**
(जतजर) **सतां हि सन्देह-पदेषु³ वस्तुषु प्रमाण⁴मन्तःकरण-प्रवृत्तयः⁵ ॥२०॥**
तथापि तत्त्वत एनामुपलप्स्ये¹ ।

King—Can it be that this (*girl*) is sprung from a wife of an unlike caste of the patriarch ? Or, away with misgivings. She is doubtless [1]fit to be married by a Kṣatriya[1], since my noble[2] mind has a longing for her. For, to the good, [3]in matters of doubts,[3] the [5]promptings of their inner minds[5] are an [4]unerring index[4] (*of the truth*). (20)
Neverthele›s I will test[1] her rightly.

राजेति। 'अपि नाम' किमेवं सम्भवेत् यत् 'इयं' शकुन्तला 'कुलपतेः' कण्वस्य 'असवर्णम्' ब्राह्मणात् भिन्नं क्षत्रियादि यत् 'क्षेत्रं' कलत्रं ('क्षेत्रं शरीरे केदारे सिद्धस्थान-कलत्रयोः' इति विश्व-मेदिन्यौ) तस्मात् 'सम्भवः' उत्पत्तिः यस्याः तादृशी। 'स्यात्' ['शकि लिङ् च' (३।३।१७२) इति लिङ्] 'अथवा' इति पक्षान्तरे। 'सन्देहेन कृतम्' अलं ('कृतमिति निवारण-निषेधयोः' इति सरस्वती-कण्ठाभरण-वृत्तौ। 'गम्यमानापि क्रिया कारक-विभक्तौ प्रयोजिका' (५६८) इति **करणे तृतीया**)। **असंशयमिति**। 'असंशयं' निश्चितम् इयं शकुन्तला, क्षतः नाशात् त्रायते इति 'क्षत्रः' क्षत्रियस्य इत्यर्थः ("क्षत्रः क्षत्रिय-राजन्यौ' इति नाममाला) तस्य, 'परिग्रहः' स्त्रीत्वेन अङ्गीकारः ('परिग्रहः कलत्रे च मूल-स्वीकारयोरपि' इत्यजयः) तस्य 'क्षमा' योग्या। इयं निःसन्देहम् क्षत्रिय-पत्नी भवितुम् अर्हति इति भावः। (अत्र मत्-परिग्रह-क्षमा इति वक्तव्ये क्षत्रेति सामान्योक्तेः **अप्रस्तुतप्रशंसा**) 'यत्' येन हेतुना 'आर्यं' कदापि नासत्-पथ-प्रवृत्तम्, अतएव श्रेष्ठम् इत्यर्थः¹। 'मे' पुरुवंशोत्पन्नस्य जितेन्द्रियस्य मम 'मनः अस्यां' शकुन्तलायाम् "अभिलाषि" मस्पृहं वोढुमिच्छु इत्यर्थः। [महापुरुषाणाम् **आत्म-प्रशंसायां न दोषः**। तथा च रामायणे— '**आर्यरामस्य रामत्वं पश्यन्तु हरियूथपाः**') । 'संदेहस्य पदेषु' स्थानेषु

('पद व्यवसित-त्राण-स्थान-लक्ष्म्याऽङ्घ्रि-वस्तुषु' इत्यमरः) सन्देह-विषयीभूतेषु 'वस्तुषु' पदार्थेषु, कर्तव्यम् अकर्तव्य वा इति संशयास्पदेषु इत्यर्थः। 'सतां' शुद्ध-शीलानाम् 'अन्तःकरणस्य' चेतसः 'प्रवृत्तयः' गतयः 'हि' इत्यवधारणे ('हि हेताव-वधारणे' इत्यमरः) 'प्रमाणं' सत्याऽनृतयोः मानदण्ड-स्वरूपम्। ('संदेहपदेषु वस्तुषु' इत्यत्र पुनरुक्तवदाभास-नामाऽलंकारः। अर्थान्तरन्यास-काव्यलिङ्गाऽनुप्रासाः। अनेन 'परिन्यास' इत्यङ्गमुपक्षिप्तम्। तल्लक्षणं तु दर्पणे 'तन्निष्पत्तिः परिन्यासः'। वंशस्थविलं वृत्तम्)। (२०)। तथापीति। 'तथापि' शकुन्तलायाः मत्परिग्रह-योग्यत्वे निर्णीते सत्यपि। 'उपलप्स्ये' ज्ञास्ये। इयं ब्राह्मणेतर-क्षेत्र-सम्भूता नवेति पृष्ट्वा अवगमिष्यामि। (अनेन पूर्व-निर्णयेन अपरितोषः सूचितः)।

29n.—1. अपिनाम &c.—The previous conversation between Anasūyā and Priyaṁvadā gives the king an occasion for thinking about the possibility of his being an 'अनुरूपः वरः'। 2. **असवर्ण-क्षेत्र-सम्भवा—समानःवर्णः यस्य तत् 'सवर्णम्'। 'समान'—compounded with 'वर्ण'** is changed to 'स' by "ज्योतिर्-जनपद-रात्रि-नाभि-नाम-गोत्र-रूप-स्थान-वर्ण-वयो-वचन-बन्धुषु"–(6. 3. 8). Mr.Kale & Prof. G. have explained the formation of 'सवर्ण' with the help of 'योगविभाग' of the Sūtra 'समानस्य छन्दसि'—&c. 6. 3. 84. But the question of **योगविभाग cannot arise at all,** when the formation of a word is accounted for by an **independent** Sūtra (1013) where Pāṇini himself has **specifically** mentioned the word "**वर्ण**" (Vide 23n. 6) ; **क्षेत्रम्**—A wife. न सवर्णम् असवर्णम्। असवर्ण क्षेत्रम्=असवर्णक्षेत्रम्, A wife not of the same class. तस्मात् सम्भवःयस्याः सा= असवर्ण-क्षेत्र-सम्भवा—an instance of व्यधिकरण बहुव्रीहि sanctioned by VM : 'अवर्ज्यो हि बहुव्रीहिः व्यधिकरणः जन्माद्युत्तरपदः'—KSV. V. 2. 19. But in this particular case, **we can avoid it,** if we derive 'सम्भव' with अप् in the अपादानवाच्य—'सम्भवति अस्मात् इति सम्भवः' *i.e.* origin, (Cf. 'तम् प्रियसख्याः **प्रभवम्** अवगच्छ' — supra). hence 'असवर्णक्षेत्रम् सम्भवः' उत्पत्ति-स्थानम्) यस्याः सा' इति समानाधिकरण-बहुव्रीहिः। Vide *MS. III.* 12 & 13. If Śak. is असवर्ण-क्षेत्र-संभवा i.e. if her mother is other than a Brāhmaṇī, there is no bar to her being married by a क्षत्रिय king, as such marriage is sanctioned

by Manu (Vide notes 3 below). So our young king who is an ardent lover and at the present moment **completely engrossed with his own interest**, readily infers that कुलपति must be a married man with more than one wife of different castes. Later-on he himself remarks that कण्व is a **life-long celebate** ('शाश्वते ब्रह्मणि स्थित इति प्रकाशः'),but at the present moment he unconsciously forgets this well known fact, as the previous idea suits his own interest. This is **quite in keeping with the mental psychology of an ardent lover**. Now read *II.* ŚL. 1. & 2, and 'कामी स्वतां पश्यति'—Act II. 3. **कृतं सन्देहेन**—'कृतम्' (=अलम्) is an अव्यय =Enough, 'कृतं युगे, अलमर्थे स्याद्विहिते हिंसिते त्रिषु'—*Medinī.* Ra. XI. 41 ; Ki. II. 17. **करणे तृतीया ।** Read (250*n.* 2), *and MN on* **'अलं** महीपाल तव **श्रमेण'** in *Ra. II.* 24. **क्षत्र-परिग्रह-क्षमा**—For Manu says 'पुत्रा येऽनन्तर-स्त्रीजाः क्रमेणोक्ता द्विजन्मनाम् । तानन्तरनाम्नस्तु मातृदोषात् प्रचक्षते'—X. 14. Also III. 13. क्षतात् त्रायते इति क्षत+त्रै+कः=क्षत्रः—पृषोदरादित्वात् (6. 3. 109) साधुः । Cf. "क्षतात् किल त्रायत इत्युदग्रः क्षत्रस्य शब्दः भुवनेषु रूढः"—*Ra. II.* 53. 4. **सतां हि** &c.—प्रमाण (standard of guide, an authority) is always **neuter singular**. Now Cf. 'वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् । आचारश्चैव साधूनामात्मनस्तुष्टिरेव च' —*MS. II.* 6 ; 'मनोबुद्धिरहङ्कारश्चित्तं कारणमान्तरम् । प्रमाणं नित्यमर्यादा शास्त्रेषु सत्यवादिनि' । "अथवा नैतदेवं हि यन्मया परिशंकितम् । मनसो हि मम प्रीतिरुत्पन्ना तव दर्शनात्" ॥—*Rām. V.* 36. 17. This stanza and its latter half have been quoted in *DR* and in **तन्त्रवार्तिक of Kumārila Bhaṭṭa** respectively, while **Kuvalayānanda Kārikā** has quoted this as an instance of 'प्रमाणालंकारः' ।

Text :—शकुन्तला—(ससम्भ्रमम्) **अम्मो, सलिल-सेअ-संभमुग्गदो णोम-लिअं उज्झिअ वअणं मे महुअरो अहिवट्टइ**[अम्भो, सलिल-सेक-सम्भ्रमोद्गतः नव-मल्लिकाम् उज्झित्वा वदनं मे मधुकरः अभिवर्तते] । (इति भ्रमर-बाधां रूपयति) ।

Śakuntalā—(*In a flury*)—Dear me, stirred up by the disturbance caused by the sprinkling of water, a drone leaving the

Jasmine is making towards my face.

(*This said, gesticulates annoyance from the drone.*)

राजा—(सस्पृहमवलोक्य)—

चलापाङ्गां[1] दृष्टिं स्पृशसि बहुशो वेपथुमतीं[2]
शिखरिणी रहस्याख्यायीव[3] स्वनसि मृदु कर्णान्तिक-चरः।
(यमनस करं व्याधुन्वत्याः[4] पिबसि रति-सर्वस्व-मधरं
भलग) वयं तत्त्वान्वेषात् मधुकर! हता,[5] त्वं खलु कृती ॥२१॥

King—(*Looking wistfully*). We, through search for truth (*about her*), are undone. O drone! thou indeed art lucky (*here*). (*For*) many a time thou touchest her tremulous[3] eyes with[1] rolling corners[4]; flitting by her ears thou hummest gently as[3] if to whisper some secret[3] (*of love*). Despite her waving[4] the hand, thou kissest her lip which is the be-all of (*sexual*) pleasure. (21)

V. L.—'अभिवर्तते'—R. V. B. 'धन्यालोक'। 'अभिभवति'—S. M. 'करौ'—R.B. V. 'करम्'—HS. M. S. 'कर्णान्तिकचरः'—B. M. S. V. R's Com. 'कर्णे अन्तिकचरः'—R.

शकुन्तलेति। 'ससंभ्रमं सभयं ('संभ्रमः साध्वसेऽपि स्यात् संवेगादरयोरपि' इति मेदिनी)। 'अम्मो' इति विस्मये ('विस्मये दुःसहे अम्मो नित्यं स्त्रीभिः प्रयुज्यते' इति भरतः) 'सलिलस्य सेकेन' सेचनेन यः 'सम्भ्रमः' सञ्चलनं तस्मात् 'उद्गतः' उत्थितः। 'उज्झित्वा' विहाय 'वदनम् अभि' लक्षीकृत्य 'वर्तते' आगच्छतीत्यर्थः। ['अभिरभागे' (१।४।९१; ५५३) इति 'अभेः' कर्मप्रवचनीय-संज्ञा। तद्योगे द्वितीया (२।३।८)। 'भ्रमरात् बाधां' पीडां ['पीडा बाधा व्यथा दुःख' मित्यमरः] 'निरूपयति' भ्रमर-पतन-परिजिहीर्षया हस्त-क्षेपादिकं करोति इति भावः। चलेति। हे 'मधुकर' त्वं 'वेपथुः' कम्पः अस्ति यस्याः तां 'वेपथुमतीं' सकम्पाम् ('अथ वेपथुः कम्प' इत्यमरः। "ट्वितोऽथुच्"–(३।३।८९) इति अथुच्। अपि च 'चलः' चञ्चलः 'अपाङ्गः' नेत्रान्तः यस्याः तां चञ्चल-प्रान्ताम् ("अपाङ्गः त्वङ्गहीने स्यात् नेत्रान्ते तिलकेऽपि च' इति मेदिनी) तादृशीं 'दृष्टिं' चक्षुः [करणे क्तिन् (३।३।९४) 'दृष्टि र्ज्ञानेऽक्ष्णि दर्शने', इत्यमरः] 'बहुशः' बहुवारान् ('बह्वल्पार्थात् शस्—" (५।४।४२) इति शस्] 'स्पृशसि' चुम्बसि इत्याशयः 'रहस्यं' रहसि भवं गोपनीयं ['दिगादिभ्यो यत्' (४।३।५४)—'रहस्या स्त्री नदीभेदे,

गोपनीयऽभिधेयवत्' इति मेदिनी [तस्य 'आख्यायी इव' वक्ता इव] (इति क्रियोत्प्रेक्षा)। 'कर्णयोः अन्तिके' निकटे चरति इति 'कर्णान्तिक-चरः' सन् 'मृदु' अस्फुटं यथा स्यात् तथा 'स्वनसि' गुञ्जसि (इति स्वभावोक्तिः। अनेन कपोल-स्पर्शानभवः व्यज्यते)। 'करं' हस्तं 'व्याधुन्वत्याः' भ्रमर-निरासाय इतस्ततः कम्पयन्त्याः 'अस्याः' शकुन्तलायाः 'रति-सर्वस्वं' काम-सार-भूतम् 'अधरम्' ओष्ठं 'पिबसि' चुम्बसि। (तथा चोक्तम्—'कामिनाम् अधर-स्वादः सुरतात् अतिरिच्यते' इति) 'वयम्' अहम् ['अस्मदो द्वयोश्च' (१।२।५९) इति बहुवचनम्] 'तत्त्वस्य' किमियं क्षत्र-परिग्रह-क्षमा न वा इति स्वरूपस्य 'अन्वेषात्' विचारणात् 'हताः'' भग्नमनसः जाता ('मनोहतः प्रतिहतः प्रतिबद्धः हतश्च स' इत्यमरः) 'त्वं खलु कृती' कृतकार्य इत्यर्थः (भूमार्थे इनिः)। ('वयं हृस्तास्त्वं कृती' इति व्यतिरेकः। नीलोत्पलादिभ्रान्त्या भ्रान्तिमान्। 'मधुकरे' नायक-व्यवहार-समारोपात् समासोक्तिः। 'त्वं कृती' इत्यत्र चरण-त्रयं हेतुत्वेनोपात्तम् इति वाक्यार्थहेतुकम् काव्यलिङ्गम्। आद्य-वाक्यद्वये रसनाकाव्यलिङ्गम्। पुनः तत्त्वान्वेषणरूपः गुणः दोष-रूपेण कल्पितोऽतोऽत्र लेशनामालंकारः। "लेशस्तु दोष-गुणयोः गुण-दोषत्व-कल्पनम्" इति तल्लक्षणात्। श्रुत्यनुप्रासश्च। शिखरिणी वृत्तम्। अत्र प्राप्तिर्नाम अङ्गम् उपक्षिप्तम्। तल्लक्षणं तु दर्पणे' 'प्राप्तिः सुखागमः')। (२१)

30n.—1 वदनमभिवर्तते &c.—Shows that Śak. is a *woman of Padmini-type*. *Cf.* 'भवति कमल-नेत्रा नासिका क्षुद्र-रन्ध्रा, अविरल-कुच-युग्मा दीर्घ-केशी कृशाङ्गी। मृदु-वचन-सुशीला नृत्य-गीतानुरक्ता, सकल-तनु-सुवेशा पद्मिनी पद्म-गन्धा'—*Ratimañjarī* 2. सस्पृहमवलोक्य—The king already enamoured of Śak., is jealous of the bee on account of its dallying with Śak. before her very eyes. 3. करं—The waving of one hand seems to be more natural. व्याधुन्वत्याः—विशेषेण 'आ' समन्तात् धुन्वती (धू-शतृ—ङीप्) तस्याः। No 'नुम्' in the Fem. as 'आत् शी नद्योः नुम्' (7. 1. 80) does not apply. 'अवर्णान्तात् शब्दात् किम् ? (शृणु शतृ) शृण्वती, (कुरु शतृ) कुर्वती'—Prabhā. (धू)—"धूनोति चम्पक-वनानि, धुनोति अशोकम्। चूतं धुनाति धुवति स्फुटितातिमुक्तम्। वायुर्विधूनयति चम्पक-पुष्प-रेणून् यत् कानने धवति चन्दन-मञ्जरीश्च"—KR. 8 ; 4. रहस्याख्यायी—(As if communicating some secret in her ear). Cf. "विनिश्श्वास कर्णेऽस्य रहस्यं श्रूयतामिति"——BC. IV. 31. आ+चक्ष्+णिनि कर्तरि=आख्यायी। 'चक्ष्' becomes

'ख्या' with an आर्धधातुक-प्रत्यय by 'चक्षिङः ख्याञ्' (2. 4. 54) ; HD admits the existence of an independent 'ख्या' Dhātu, while *Nyāsakāra* and *BD* differ. 'ख्या प्रकथने। अयं सार्वधातुक-मात्र-विषयः'—SK. 2463 ; 'इदमसर्वधातुकविषयमिति आत्रेयादयः। अन्ये तु सामान्येन मन्यन्ते'–*Dhāturūpa Kalpadruma*. 'ख्या' प्रथने इति गोविन्दभट्टः प्रसिद्धिरित्यर्थः। प्रकथने इति चतुर्भुजः। ख्याति लोकः—Manoramā. **5. अधरं पिबसि**—Cf. 'अधरं पातुं प्रवृत्तः"—Vik ; Bhartṛ Hari. 1. 26. 'अधरमधुवधूनां भाग्यवन्तः पिबन्ति'——*Kirāta*. In fact the bee which was waved away by the movement of the hand, had not the chance to sit on Śak.'s lip. The king out of jealousy thinks it to be an aggressive lover. Note that the future endeavour of Duṣyanta's kissing Śak. against her will (Act IV. 22) has been cleverly fore-shadowed here. **6. वयं &c.** —कृती—Learned, "कृती स्यात् कर्मकुशले पण्डिते शर्ववर्मणि' इति कलापचन्द्र-धृत-कोषः। But, here it means "successful".–MN (*Ki. II.* 9). following Vardhamāna, derives it with इनि by 'इष्टादिभ्यश्च' (5. 2. 88) ; (अनेन कृतम् इति कृती)। BhD follows suit. But **neither VM nor BD includes 'कृत' in the इष्टादि class. Besides इष्टादि is not an** आकृतिगण। Hence say 'कृतम् इति भावे क्तः। कर्म इत्यर्थः'—Deed. Next भूमार्थे प्रशंसार्थे वा इनिः by 'अतः इनिठनौ'— 5. 2. 115 ; (Read 135n—4.) 'वयम्' (Plural)='अहम्' (Singular) in spite of its attribute 'हताः' (Disappointed)—For reasons (Vide 159n. 1.) Cf. the peculiar use of 'हत' in (197n. 3.)

Remark—B,P, HS, M read the following just before Śloka. 21. 'राजा—(विलोक्य सस्पृहम्) साधु बाधनमपि रमणीमस्याः। यतो यतः षट्चरणोऽभिवर्तते, ततस्ततः प्रेरित-लोल-लोचना। विवर्तितभ्रूरियमद्य शिक्षते, भयादकामापि हि दृष्टि-विभ्रमम्" ।। The King (looking wistfully) :

Beautiful ! there is "something charming even in her repulse.
Where'er the bee his eager onset plies
Now here, now there, she darts her kindling eyes;
What love hath yet to teach, fear teaches now
The furtive glances and the frowning brow"—M.

(Metre—वंशस्थ)

Text :—शकुन्तला—ण एसो धिट्टो विरमदि। अण्णदो गमिस्सं [न एष धृष्टो विरमति। अन्यतो गमिष्यामि) (पदान्तरे स्थित्वा। सदृष्टिक्षेपम्) कहं इदो वि आअच्छदि। हला, परित्ताअह, परित्ताअह, मं इमिणा दुव्विणीदेण दुट्ठ-महुअरेण, अहिहूयमाणं [कथम् इतोऽपि आगच्छति? हला परित्रायेथां, परित्रायेथां माम् अनेन दुर्विनीतेन[1] दुष्ट-मधुकरेण अभिभूयमानाम्[2]]।

Śakuntalā—This impertinent (*creature*) does not stop. I'll move elsewhere. (*Moving a few steps and glancing around*) What! even here it is coming! Help, my friends, help, I am being assailed[2] by this ill-bred[1] wicked drone.

उभे (सस्मितम्)—का वअं परित्तादुं। दुस्सन्तं अक्कन्द। राअ-रक्खिदव्वाइं तपोवणाइं णाम (का वयं परित्रातुम्। दुष्यन्तमाक्रन्द। राज-रक्षितव्यानि तपोवनानि नाम]।

Both (*Smiling*)—Who are we to deliver (*you*)! Call on Duṣyanta (*to your aid*). Penance-groves are said to be protected by the kings.

राजा—अवसरोऽयम् आत्मानं प्रकाशयितुम्। न भेतव्यम्। न भेतव्यम्। (इति [1]अर्धोक्ते स्वगतम्[1]) राज-भावस्तु[2] अभिज्ञातो[2] भवेत्। भवतु। एवं तावदभिधास्ये।
King—Here (*indeed*) is an (*excellent*) occasion for showing myself. "Don't be frightened". [[1]*Half-uttering* ; *aside*[1]] (*If I introduce myself in this way*) my kingship[2] will be disclosed.[2] Well, this then will I say.

शकुन्तला—(पदान्तरे स्थित्वा। सदृष्टिक्षेपम्) कहं इदोवि मं अणुसरदि [कथम् इतोऽपि मामनुसरति]। Śakuntalā—(*Stepping aside and glancing around*) What! even here it is following me.

V. L.—'दुष्टः' —R. S. 'धृष्टः'—M. B. V. 'न भेतव्यम्'—R. B. V. M. 'न भेतव्यम् कः कोऽत्र भोः'—S. S reads 'अथवा' before 'राजभावः' &c'.

शकुन्तलेति। 'धृष्टः' दुर्विनीतः ('धृष्टे धृष्णग् वियातश्च' इत्यमरः)। 'कथम्' इत्याश्चर्ये अव्ययम्। 'दुर्विनीतेन' अशिष्टेन। 'अभिभूयमानां' पीड्यमानाम्। उभे इति। 'परित्रातु' परित्राणे इत्यर्थः ('अव्ययकृतो भावे' इति परिभाषोक्तेः) 'वयम्' आवाम् ('अस्मदो द्वयोश्च'—१।२।५९) 'का' भवाम इति

ज्ञेयः। वयं परित्राण-विषये असमर्थाः ललना-मात्रत्वात् इति भावः। 'आक्रन्द' आत्म-त्राणाय उच्चैः आहूय ("आक्रन्दः क्रन्दनाऽऽह्वाने मित्रदारुणयुद्धयोः' इति मेदिनी)। 'तपोवनानि' राज्ञः विषयस्थितानि, अतस्तेनैव तानि 'रक्षितव्यानि' 'नाम' इति प्राकाश्ये। राजेति। 'आत्मानं' स्वं 'प्रकाशयितु 'दर्शयितुम् 'अयम् अवसरः' अवकाशः सुसमय इति यावत् ('काल-समय-वेलासु तुमुन्'–३।३।१६७ इति तुमुन्)। 'अर्धे' पूर्वार्धे 'उक्ते' सति अवशिष्टमनुच्चार्य 'स्वगतम् आह। अधुना गच्छेयं चेत् मम 'राज-भावः' नृप-स्वभावः ('भावः सत्ता-स्वभावाभिप्राय-चेष्टात्म-जन्मसु' इति मेदिनी)। 'अभिज्ञातः भवेत्' ता मां नृपं मन्येरन् इति नृपस्य आशङ्का।

31n.—1. **धृष्टः**—धृष्णोति इति धृष् प्रागल्भ्य+क्त कर्तरि [3. 4. 72.] by 'धृषि-शसी वैयात्ये'-(7. 2. 19). "निर्लज्जाऽर्थे क्त-क्तवतु-प्रत्यये परे, धृष्-धातोः, शस् धातोश्च इट् आगमो मा भूत्"—**Prabhā**. Hence **धृष्टः**, (**प्रगल्भः**) विशस्तः (निर्लज्जः), otherwise, **धर्षितः** (**पराभूतः**), **विशसितः** (विशेषेण) हिंसितः)॥ **विरमति**—रम् with वि, आ, परि, is परस्मैपदी by 'व्यांपरिभ्यो रमः' (1. 3. 83), but Cf. 'कथयन्तश्च मां नित्यं तुष्यन्ति च **रमन्ति च**'—Gītā. X. 9. **2.** **दुर्विनीतेन**—Wanting in decorum, rude, Cf. '**दास्याः** पुत्रैः मधुकरैः पीड़ितोऽस्मि'—SV. IV. This supplies the king an opportunity for making his appearance before the girls and he uses the same word in his next speech. Cf. '**कः पौरवे वसुमतीं** शासति शासितरि **दुर्विनीतानाम्**' । '**हला परित्रायेथाम्**' &c.—For reduplication, (vide P. 35, line 10.) Here is a sly reference to the king's endeavour to kiss Śak. inspite of her protests. Vide *Śak. III.* 13 & 14 ; (30n. 5). 'हला अशरणास्मि अन्यतरा युवयोरागच्छतु'—*III. Infra.* '**अभिभूयमाना**' (tormented) is preferable to '**परिभूयमानाम्**' as it is repeated in Anasūyā's next speech. **3.** **परित्रातुम्**—तुमुन् is used in **भाववाच्य** and hence though an **अव्यय**, it is equivalent to a noun *i.e.* 'परित्राणम्'—What are we in the matter of (*your*) protection ? Cf. '**का वयं**' भट्टिनीं नियोजयितुम्'—*Bhavabhūti*. '**का वयं** जेतुम्'—Māla. **4.** **नाम**—प्राकाश्ये—It is well-known. **5.** **प्रकाशयितुम्** —3. 3. 167. (Com.). **6.** **न भेतव्यं**—Regarding the absence of a stage direction here, Mr. Kale remarks—"The king says this

impulsively or rather the words escape his mouth and so there is no stage direction before these ; nor are the words heard by Śak. and her friends, as these are uttered by the king without going forward". 7. **स्वगतम्**— This stage direction means that the speech following it will be heard by the audience only, and not by the actors on the stage.—'**अश्राव्यं** खलु यद्वस्तु, तदिह **स्वगतं** मतम्'—(*SD. VI.*) **अभि+धा**=To speak. *Ku. III.* 63 ; *MS. I.* 42 ; *BK. VII.* 78 ; *Gītā. XVIII.* 68;

Text :—राजा—(सत्वरमुपसृत्य)—आः ।

आर्या (12. 18, 12, 15)

कः पौरवे वसुमतीं शासति शासितरि दुर्विनीतानाम् ।
अयमाचरत्यविनयं[1] मुग्धासु[2] तपस्वि-कन्यासु ॥२२॥

(सर्वा राजानं दृष्ट्वा किञ्चिदिव सम्भ्रान्ताः) ।

King—(*Advancing hastily*) Ah! Who is it that behaves[1] rudely[1] towards the innocent[2] (*young*) hermit-girls, whilst Paurava (*a descendent of Puru*), the chastiser of the ill-behaved, is ruling the earth ? (22)

(*All appear some-what distracted on beholding the king*).

अनसूया—अज्ज, ण क्खु किम्पि अच्चाहिदं । इअं णो पिअसही दुट्ठ-महुअरेण अहिहूयमाणा कादरीभूदा (आर्य, न खलु किमपि अत्याहितम् । इयमावयोः प्रियसखी दुष्ट-मधुकरेण **अभिभूयमाना** कातरीभूता) । (इति शकुन्तलां दर्शयति) ।

Anasūyā—Revered Sir, nothing indeed very dangerous. This, our dear friend, being assailed by a wicked drone, has been alarmed. (*This said, points to Śakuntalā*).

क इति ॥ 'दुर्विनीतानां' दुष्टानां 'शासितरि' दण्डादिना शासके 'पौरवे' पुरुवंशीये राजनि (परोक्ष-निर्देशस्तु राजभाव-गुप्त्यर्थम्) 'वसुमतीं' पृथिवी 'शासति' पालयति सति [भावे सप्तमी २।३।२७, यद्वा वसुमतीं शासतं पौरवम् अनादृत्य, 'षष्ठी चानादरे' (२।३।३७) इति सप्तमी]। कोऽयम्' इति क्रोधेनोक्तिः । 'मुग्धासु' रम्यासु अचतुरासु वा 'अविनयम्' अशिष्टम् 'आचरति' व्यवहरति । झटिति ब्रूहि येन दण्डं प्रदास्यामि । ['तपस्वि'-शब्देन अत्यन्ताऽसं-भाव्याऽविनयस्थानत्वं व्यज्यते । अत्र अप्रस्तुतप्रशंसा । छेक-वृत्त्यनुप्रासौ ।

अनेन दण्डलक्षणं संध्यङ्गान्तरमुपक्षिप्तम्। तल्लक्षणं यथा—'दण्डस्त्वविनयादीनां दृष्ट्या श्रुत्वा च तर्जनम्' ॥ आर्या जातिः) (२२)। 'किञ्चिद् इव' इति ईषदर्थे ['ईषदर्थोपमोत्प्रेक्षा-वाक्य-भूषणयोरिव' इति वर्धमानः)। अनसूयेति। 'अत्याहितं' महद्भयम् ('अत्याहितं महाभीतिः कर्म जीवानपेक्षि च' इत्यमरः)। अकातरा कातरा भूता इति 'कातरीभूता' ('कृ-भ्व-स्तियोगे सम्पद्यकर्तरि च्विः,-(५।४।५०), 'अस्य च्वौ'-(७।४।३२) इति अवर्णस्य ईकारः)।

32n.—1. कः पौरवे &c.—This indirect method is purposely resorted to, so that the girls may not suspect him to be a king. आः—implies anger. Vide Act. IV. 1. infra. 2. शासितरि—शास+तृच् ('ण्वुल्तृचौ'-3. 1. 133.) but if तृन्' is used ('तृन्'-3. 2. 135) षष्ठी in दुर्विनीतानाम् will be **barred** by 'न लोकाऽव्यय-निष्ठा-खलर्थ- तृनाम्' (2. 3. 69). 3. मुग्धासु—Innocent, too young to have any know-ledge of the world. This adds to the serious nature of the crime. 'प्रथमाऽवतीर्ण-यौवन-मदनविकारा रतौ वामा। कथिता मृदुश्च माने समधिक-लज्जावती मुग्धा'—*SD. III*. "The inexperienced has the desire of new youth, is coy in love and gentle in anger"—*Dr. Haas*. (DR). 4. तपस्वी &c.—For the force see Com. Cf. 'अभूमिरियमविनयस्य'——Śak. VII. 5. किञ्चिदिव—Their be-wilderment was only for a short while because the **novus home** who entered, was wearing a very plain and simple costume like an ordinary man. आर्य, न खलु &c.—Mark that it is Anasūyā, who first gathers courage to address the king. Her courteous reply bespeaks her great presence of mind and her knowledge of the ways of the worldly people. आर्य means a noble-minded **person who performs his duty**. (Vide 3n. 1) Here the epithet is very **significant**, as the duty of a Kṣatriya king or his officer is to succour the distressed. Cf. *Ra. II*. 53 ; 'सर्वस्यास्य यथान्यायं कर्तव्यं परिरक्षणम्'—*MS. VII* 2 ; *X*. 80. 6. अत्याहितम्— 'अतीव आधीयते स्म मनसि इति अत्याहितम्'—*BhD*.— What is seriously felt by the heart, hence, a great calamity. Cf. 'अत्याहितं, न खलु सावशेषः विषविकारः भवेत्'——*Māla. IV*.

'पाण्डुपुत्रैर्न किमप्यत्याहितमाचेष्टितं'——*VS.* II ; *PN. I.* after Śl. 14 ; Vik. IV and V.

Text :—राजा—(शकुन्तलामभिमुखो भत्वा) अपि तपो वर्धते ?
(शकुन्तला साध्वसादवचना तिष्ठति)

King (*Turning to Śakuntalā*)—Is your penance thriving ?
(*Śakuntalā stands silent through nervousness.*)

अनसूया—दाणीं अदिहि-विसेस-लाहेण । हला सउन्दले, गच्छ उडअं फल-मिस्सं अग्घं उवहर । इदं पादोदअं भविस्सदि (इदानीम् अतिथि-विशेष-लाभेन[1] । हला शकुन्तले, गच्छ उटजम् । फलमिश्रम् अर्धमुपहर । इदं पादोदकं भवि-ष्यति) । (इति घटं दर्शयति) ।

Anasūyā—(*Yes, it prospers*), now by[1] the acquisition of a noted guest.[1] O my Śakuntalā, go to the cottage (*and*) bring a (*respectful*) offering mixed up with fruit. This will serve to bathe his feet. (*This said, shows the pitcher*).

राजा—भवतीनां सूनृतयैव[1] गिरा कृतमातिथ्यम्[2] ।

King—Even by your courteous[1] words, the rites of hospitality[2] have been rendered.

राजेति । 'साध्वसात्' भयात् ('दर-त्रासौ भीतिर्भीः साध्वसं भयम्' इत्यमरः) 'अ-वचना' निरुत्तरा । अनसूयेति । 'अतिथीनां विशेषः' उत्तमः तस्य 'लाभेन' प्राप्त्या । भवादृशस्य विशिष्टस्य अतिथेः आगमनेन 'इदानीं तपो वर्धते', "नृ-यज्ञस्तु अतिथि-पूजनम्" इत्युक्तेः । (अनेन अनुवृत्ति-नामा नाट्यालंकार उपक्षिप्तः । तल्लक्षणं तु दर्पणे—'प्रश्रयादनुवर्तनम् अनुवृत्तिः) । 'उटजं' पर्णशालां ('मुनीनां तु पर्णशालोटजोऽस्त्रियाम्' इत्यमरः) । 'फलेन मिश्रः' सम्पृक्तः ('करम्बो करबो मिश्रः सम्पृक्तः खचितः समा' इति हेमचन्द्रः । तृतीयासमासः—२।१।३१) 'अर्घम्' अर्चन-द्रव्यम् 'उपहर' अस्मै देहि । 'इदं' सेचनार्थं कलस-स्थितं जलं 'पादोदकं' पाद-प्रक्षालनार्थम् जलं 'भविष्यति' (ननु पाद्यमेव प्रथममुपयुज्यते नतु अर्घः, इत्यत्र आह 'इदमिति'—न्यायपञ्चाननपादाः") । राजेति । 'भवतीनां सूनृतया' प्रियसत्येन ("सूनृतं मङ्गलेऽपि स्यात् प्रियसत्ये वचस्यपि') 'गिरा' वाचा 'एव आतिथ्यम्' अतिथिसत्कारः 'कृतम्' । अलम् अर्घादिना इति भावः ।

33n.—1. अपि तपः &c.—Cf. 'मैथिलि, अपि तपो वर्धते'——PN. V. "अपि स्थिरायुः भगवन्कुमारः"–BC. I. 69. शकुन्तला साध्वसादवचना—

&c.—The king first of all addresses Śak. as she is the hostess, but being addressed face to face by a city-bred *novus homo*, she is highly distracted. साधु सम्यक् अस्यति विक्षिपति चित्तं यत् तत् साधु + अस् + अच् पचादित्वात् (3. 1. 134) = साध्वसम्—Which completely upsets the mind, *i.e.* confusion, fear. 'साधून् अस्यति इति अच्'-RM. But **अच् is barred by 'कर्मण्यण्'** (3. 2. 1); Hence 'तत्र। तस्मात् साधूनाम् असनम् साध्वसम्'——BhD. *Note* that she had had no exchange of words with the King till the end of the Act. (See also 260n. 2). 2. **इदानीम् अतिथि-विशेष** etc.—&c.—The arrival of a noted guest has given us a chance to adore him and thereby enhance our piety. This reply of Anasūyā bespeaks great presence of mind on her part. This time also Anasūyā speaks on behalf of agitated Śak. **विशेष**'='Excellent', hence अतिथीनां विशेषः, अतिथिविशेषः means 'a distinguished guest'. "विशेषोऽवयवो द्रव्ये द्रष्टव्यो-त्तम-वस्तुनि'—इति शब्दार्णवः—MN on MD. 57; 'कदली-**विशेषान्**'——*Ku. I.*36. 'शिला-**विशेषान्**'—*Ra. XVI.* 49. 'नौ-**विशेष**'—*XIV.* 52; '**पुरुष-विशेष**'——*PN. II.* Here the rule 'न निर्धारणे' (2. 2. 10) does not bar षष्ठीतत्। Read :—"अथ कथं **पुरुषोत्तम**' इति ? 'यस्मात् निर्धार्यते, यश्च एकोदेशो निर्धार्यते, यश्च निर्धारण-हेतुः, एतत्-**त्रितय-सन्निधाने** सति एवायं निषेध' इति **कैयटः।** अन्येतु 'पुरुषेषु उत्तम' इति निर्धारण-सप्तम्याः 'संज्ञायाम्' (2. 1. 44) **इति** समासः। * * * **तन्मन्दम्। संज्ञायाम इति समासस्य नित्यत्वेन** स्वपद-विग्रहाऽसंगति-प्रसङ्गात्। तस्मात् कैयटोक्त-समाधानमेव **समीचीनमिति** नव्याः"—T on 704; also KT's भाष्यप्रदीप on (5. 3. 57). 3. **अर्घम् उपहर**—Anasūyā is now drawing Śak.'s attention to her duty of receiving guests as enjoined by Kaṇva. अर्ह्यते पूज्यते अनेन इति अर्ह्+घञ् करणे by 'हलश्च' (3. 3. 121). Next 'ह्'='घ' by '**न्यङ्क्वा**-दीनाञ्च' 7. 3. 53=अर्घः It will be very interesting to note that "अयं शब्दः सामगानां सर्वत्राभिलापे स-यकारो (**अर्घ्यं**) न पुंसक-लिङ्गेनैव प्रयोज्यः। अन्यवेदिनां-नि-र्यकारः (अर्घः) पुलिङ्गेन प्रयोज्य" इति श्राद्धतत्वम्—*Kalpa. P.* 52. Also 'पादार्घाभ्याञ्च' (5. 4. 25). **अर्घ** is a combination of eight things—"**आपः क्षीरं कुशाग्रञ्च दधिसर्पिः सतण्डुलम्। यवः सिद्धार्थकश्चैव**

अष्टाङ्गोऽर्घः प्रकीर्तितः। इति तन्त्रे काशीखण्डे च। 'रक्त-बिल्वाक्षतैः पुष्पैः दधि-दुर्वा-कुशैस्तिलैः। सामान्यः सर्वदेवानामर्घोऽयं परिकीर्तितः'—*Devī Purāṇa. qtd.* श्रीदत्त *in* आचारादर्श। Mark that water is not mentioned here at all. *Also Rām. I*-20. 9—10. **पादोदक**—Water for washing the feet is one of the first things invariably provided for a guest not only in India, **but also in many Eastern Countries**. Vide **Genesis**. XXIV 32; **Luke** VII. 4. 4. "Next my girl sprightly nymph, brings her napkin and lymph, Feet and ankles are quick in ablution"—Qtd. Dr. Wilson. "आकारय पादौ धावितुम्"—Mk.III. 'अहंकारः—आः; तुरस्क-देशाः प्राप्ता स्मः, यतः आत्रियानतिथीन् पाद्यादि-भिरग्रे गृहिणो नोपतिष्ठन्ते'—PC. II. 4. **सूनृतया**—सुष्ठु नृत्यन्ति जना अनेन हर्षात् इति सु+नृत्+क (करणे) मूलविभूजादित्वात् (*Vārt.* 3. 2. 5.)—*RM*, but the Vārt. is **applicable only in कर्तृवाच्य**—"तन्न। तस्य कर्तरि विधानात्"—*BhD*, hence he suggests **घञर्थे कः**' but that is also **defective**, as नृत् is not included in '**घञर्थे क-विधानं स्था-स्ना-पा-व्यधि-हनि-युध्यर्थम्**'। (*Vide* 3. 3. 58). Lastly *BhD* takes the help of 'हलश्च' (3. 3. 121), which gives 'संज्ञायाम् घञ्' in the **करणवाच्य**। No गुण, by 'संज्ञापूर्वकोविधिरनित्यः, (*optional*). Next 'अन्येषाम् अपि दृश्यते' (6. 3. 137) इति दीर्घः। To avoid cumbrousness proceed thus—सुष्ठु ऊणयति प्रीणयति इति सून् by 'क्विप्'–(3. 2. 76). Next सून् च ऋता च='सूनृता' सत्य-प्रिया इत्यर्थः (*Com.*) "सूनृतां वाचमाहुः'—UC. V. 30; Hito. I. 301. 5. **आतिथ्यम्**—अतिथि+ञ्य by 'अतिथेर्ञ्यः' (5. 4. 26). The king says so because he does not like that Śak. should leave his company.

Text :—**प्रियंवदा—तेण हि इमस्सिं पच्छाअ-सीअलाए सत्त-वण्ण-वेदिआए मुहुत्तअं उवविसिअ परिस्सम-विणोदं करेदु अज्जो** [तेन हि अस्यां प्रच्छाय-शीतलायां सप्तपर्ण-वेदिकायां मुहूर्तकम् उपविश्य परिश्रम-विनोदं करोतु आर्यः]।

Priyaṁvada—Then on this shady cool platform (*round*) the Saptaparṇa (*Alstonia scholaris*) tree, let Your Honour assuage His fatigue by sitting for a while.

राजा—नूनं यूयमपि अनेन कर्मणा परिश्रान्ताः।

King—Surely you, too, must have been fagged by this employment.

अनसूया—हला सउन्दले, उइदं णो पज्जुवासणं अदिहिणं।' एहि उवविसम्ह (हला शकुन्तले, उचितं नः पर्युपासनमतिथीनाम्[1]। एहि उपविशामः)

(इति सर्वे उपविशन्ति)।

Anasūyā—Dear Śakuntalā, it is our duty to sit[1] by the side of the guest.[1] Come let us sit (*here*). (*This said, all sit down*).

V. L.—S omits 'नूनम्'।

प्रियंवदेति। प्रकृष्टा छाया यत्र सा 'प्रच्छाया'। तादृशी चासौ 'शीतला' च इति 'प्रच्छायशीतला' तस्याम्। 'सप्तपर्णस्य'. वृक्षविशेषस्य ('सप्तपर्णो-विशालत्वक् शारदो विषमच्छद' इत्यमरः)। 'वेदिकायां' तद्वृक्ष-मूल-स्थित-वितर्दौ[*]। 'मुहूर्तकं' स्वल्पकालं ('मुहूर्तमल्पकाले स्यात् घटिका-द्वितयेऽपि च')। 'परिश्रमस्य' पथ-परिश्रमस्य 'विनोदं' प्रशमं 'करोतु'। **राजेति।** 'अनेन जल-सेचन-रूपेण कर्मणा 'नूनं' निश्चितम्। युस्माभिरपि मया सार्धं सप्तपर्ण-वेदिका सेवितव्या इति हृदयम्। **अनसूयेति।** 'पर्युपासनं' समीपे उपवेश-नादिना अभिप्रायाऽनुवर्त्तनम्। 'सर्वा' च नार्यः' सर्वश्च' राजा इति 'सर्वे'। ('पुमान् स्त्रिया' (१।२।६७) इति पुल्लिङ्गैकशेषः)।

34n.—1. **सप्तपर्ण—** (*Alstonia scholaris*) so termed as the tree has seven leaves per stalk ; also called '**विषम-च्छद**' (*having an odd number of leaves*), 'शारद' (*as it blooms in Autumn*) and 'विशालत्वक्' (*having a broad bark*). Ra. IV. 23 ; '**प्रच्छायशीतले** शिलापट्टे'—Māla. III. 2. **वेदिकायां—**'स्यात् वितर्दिस्तु वेदिका'—*AK.*—A quadrangular or circular raised seat round shady trees for repose or rest. Vide *Kalpa.* P. 1913. 3. **पर्युपासनम्—** परि+उप+आस्+ल्युट् भावे—Sitting near (*a guest*) for his diversion. '**पर्युपासन्ति** ते नित्यं देवाः सर्वे महर्षयः'—*PP. I. IX.* 25.

Text :—**शकुन्तला** (आत्मगतम्)— **किं णु क्खु इमं पेक्खिअ तवोवण-विरो-हिणो विआरस्स गमणीअम्हि संवुत्ता** (किं नु खलु इमं प्रेक्ष्य तपोवन-विरोधिनो[1] विकारस्य[2] गमनीयास्मि संवृत्ता)।

Śakuntalā (*Aside*)—How is it that at the sight of this (*man*) I have become susceptible to an emotion,[2] incompatible[1] with the penance-wood[1] ?

राजा (सर्वा विलोक्य)—अहो सम-वयो-रूप-रमणीयं भवतीनां सौहार्दम्।

King (*Looking at them all*)—Oh! How pleasing is your friendship on account of equal age and beauty.

प्रियंवदा (जनान्तिकम्)—अणसूए, को णु क्खु एसो महुर-गम्भीराकिदी, चउरं पिअं आलवन्तो, पहाव-वन्तो विअ लक्खीअदि [अनसूये, को नु खलु एष मधुर-गम्भीराकृतिः[1] चतुरं[2] प्रियम् आलपन् प्रभाववान्[3] इव लक्ष्यते)।

Priyaṁvadā (*Aside to Anasūyā*)—Anasūyā who's he, indeed, pleasing[1] and dignified in mien,[1] speaking cleverly[2] and sweetly, and seeming to[3] have majestic power[3] ?

V. L.—'मधुर-गम्भीराकृतिः चतुरम्'—B, C, Dr. P.HS. 'चतुर-गम्भीराकृतिः मधुरम्'—M. 'चतुर-गम्भीराकृतिः चतुरम्'—R. 'प्रभाववान् इव लक्ष्यते' —R. V. B. M.'प्रभवन् दाक्षिण्यमपि करोति'—S.

शकुन्तलेति। 'किम्" इति कुत्सायां जिज्ञासायाञ्च ('किम् कुत्सायां वितर्के च निषेध-प्रश्नयोरपि' इति मेदिनी)। 'नु' इति वितर्के (तथा च मेदिनी 'नु वितर्काऽवमानयोः)'। 'खलु' इत्यवधारणे। सर्वं वितर्क-गर्भाऽऽत्मगत-प्रश्नमुत्थापयति। 'तपोवनस्य विरोधिनः' विरुद्धस्य 'विकारस्य' आश्रमवासि-जनाऽनुचितस्य अन्यथाभावस्य मदन-भावस्य इत्यर्थः 'गमनीया' विषयीभूता। (अनेन अस्या 'भावो' नामाङ्गजो विकार उक्तः। 'निर्विकारात्मके चित्ते भावः प्रथम-विक्रिया' इति तल्लक्षणात्)। राजेति। 'अहो' इत्याश्चर्ये। 'सौहार्दं" प्रणयः। 'समानाभ्यां वयो-रूपाभ्यां 'रमणीयं' मनोहरम्, ('समैर्विरोधः मैत्री च न च पुष्टविपुष्टयोः' इति न्यायात्)। प्रियंवदेति। जनानाम् इष्टानाम् अन्तिकम् इति 'जनान्तिकम्' अप्रकाशम् (इति त्रिकाण्डशेषः)। 'को नु' इति वितर्क-गर्भः प्रश्नः। 'खलु' इति वाक्यभूषायाम्। 'मधुरा' मनोमोह-करा 'गम्भीरा' च दूर-धिगमा अधृष्या इति यावत् 'आकृतिः' यस्य तादृशः। 'चतुरं' निपुणं 'प्रियं' सुन्दरम् 'आलपन् प्रभावः' प्रतापः विद्यते यस्य स 'प्रभाववान्' प्रतापशाली इत्यर्थः। ('स प्रतापः प्रभावश्च यस्तेजः कोश-दण्डजम्' इत्यमरः)।

35a.—1. किं नु खलु—Śak. is at a loss to know the cause of her being subject to an emotion inconsistent with the penance-grove (किम्). Though not compatible with religious vows, it is no doubt (खलु) present in her mind. Hence she endeavours to find

out the cause (नु) of such an anomaly. (*Com.*). 2. **विकारस्य गमनीया** &c.—This is the first manifestation of feeling in Śak. who previous to this was without any emotion (*Com.*). (25ln. 5.). 3. **सौहार्दम्**—MN in *Ku. IV.* in explaining—'**क्षणभिन्न-सौहृद**' seems to derive 'सौहार्द' from 'सुहृत्', and 'सौहृद' from 'सुहृदय', and this, indeed, is the **right process**. 'सुष्ठु हृदयं यस्य सः सुहृदयः:—A man having a good heart. 'सुहृदयस्य' भावः कर्म वा, इति सुहृदय+अण्। ['हाय-नान्त-युवादिभ्यः 'अण्'—1795.]=सुहृत्+अण्, as '**हृदय**' becomes '**हृत्**' with अण् by 'हृदयस्य हृद्—लेख-यद्-अण् लासेषु'—989. Next '**उभय-पद-वृद्धि** (by 'हृद्-भग-सिन्ध्वन्ते पूर्वपदस्य च'–1133.) is **barred** by the **परिभाषा** 'लक्षण-प्रतिपदोक्तयोः प्रतिपदोक्तस्य' (256 ; 807 ; 2353). Hence we get **सौहृद**, (and not **सौहार्द** with उभयपदवृद्धि).—'**तद्धितेषु अचाम् आदेः**' (1075, 1133). Read '**हृत् इति प्रतिपदोक्तस्य उल्लेखात् हृदादेशस्य सौहृदम् इत्येके**'—**Prabhā** *on* (7. 3. 19). Now the **independent** 'हृत्' (n) also means 'हृदय' [हरतेः क्विप्—(3. 2. 178) ; 'तुक्'—(6. 1. 71). 'चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः.' इत्यमरः] । So सुष्ठु हृत् यस्य सः सुहृद् which also belongs to युवादि class ; hence सुहृद्+अण् (5. 1. 130).= **सौहार्दम्** (by 7. 3. 19). Read—"**सुहृदय**-शब्दात् अण्, **सौहृदम्** । हृच्छब्दान्तत्वाऽभावात् न उभय-पद-वृद्धिः । * * * सुहृच्छब्दात् अण् । **सौहार्दम्** । **क्लीबलिङ्ग-हृच्छब्दोऽपि** अस्ति" --**Prabhā** *on* (6. 3. 50). For सौहार्द see BC. IV. 84 ; *Ra. XIV.* 15 ; *MM. I.* 40 ; *MD.* 15 ; *Ku. IV.* 6. 5. **जनान्तिकम्** (=**अपवार्य**)—'*Personal address* is mutual conversation in the presence of other persons by shouting out to others in the middle of a story by the hand with three fingers raised'—**Dr. Haas.** The speech will be heard by the entire audience. But it will be **inaudible to the undesired actors** on the stage. 'त्रिपताक-करेणाऽन्यान् अपवार्याऽन्तरा-कथाम् । अन्योन्या-ऽऽमन्त्रणं यत् स्यात् तज्जनान्ते **जनान्तिकम्**' ।।—DR. 'स एव **त्रिपताकः** स्यात् वक्रिताऽनामिकाऽङ्गुलिः' ।—SR. 6. **मधुर-गम्भीर** &c.—Because his **आकृति** is **मधुर** (*charming*), hence it is **अधिगम्य**(*accessible*), and **because it is** **गम्भीर** (*grave*), hence it is **अधृष्य** (*inaccessible*). Cf. **this with the** description of दिलीप, in *Ra.* I. 16. 'अधृष्यश्चाभि-

गम्यश्च यादोरत्नैरिवार्णवः' । "Thou hast a **firm appearance** and the face bears a **command** in it"—**Corilinus.** IV. 6; "**Stately port** and **majestically** departure speed **sober steadfast demure**" —**Milton.** Mr. Kale prefers the reading 'चतुर-गम्भीराकृतिः मधुरम् आलपन्' because अनसूया in her next speech repeats the word मधुर । Cf. 'आर्यस्य मधुरालापजनितः' &c. But then चतुर being properly an epithet of man, by लक्षणा, is to be transferred to the body (आकृति) and should mean '*sweet*'. (Ra. IX. 47; Ku. III. 5); It is difficult to choose between these two readings. 7. **प्रभाव०—घञ्** is not **available after 'भू' with an उपसर्ग** by 'श्रि-णी-भुवोऽनुपसर्गे (3. 3. 24). "अनुपसर्गे किम्? '**प्रभावः**' प्रणवः 'प्रश्रयः' । कथं प्रभावः राज्ञः इति? प्रकृष्टः भाव इति प्रादिसमासः"—SK. 3195.

Text :—अनसूया—सहि, मम वि अत्थि कोदूहलं । पुच्छिस्सं दाव णं । (सखि, ममापि अस्ति कौतूहलम् । प्रक्ष्यामि तावदेनम्) । (प्रकाशम्) **अज्जस्स महुरालाव-जणिदो वीसम्भो मं मन्तावेदि । कदमो अज्जेण राएसि-वंसो अलङ्करीअदि, कदमो वा विरह-पज्जुस्सुअ-जणो किदो देसो, किण्णिमित्तं वा सुउमारदरो वि तवोवण—परिस्समस्स अत्ता पदं उवणीदो** (आर्यस्य मधुरालाप-जनितो¹ विस्रम्भो² मां मन्त्रयते³ । कतम आर्येण राजर्षि-वंशः, अलंक्रियते । कतमो वा विरह-पर्युत्सुक-जनः⁴ कृतो देशः । किं निमित्तं वा सुकुमारतरोऽपि तपोवन-परिश्रमस्यात्मा पदमुपनीतः) ।

Anasūyā—I, too, my friend, have (*the same*) curiosity. Well, I'll just ask him. (*Aloud*) The confidence,[2] produced[1] by the sweet words[1] of Your Worship, eggs[3] (or prompts) me (*to ask*)-- Which line of royal saints is adorned by Your Worship? Which country has its folk[4] rendered anxious, on account of (*Your*) separation[4], and for what purpose, though rather tender, has (*Your*) self been exposed to the toil (*of visiting*) a penance-grove?

V. L.—'तपोवन-परिश्रमस्य'–B.S.HS. 'तपोवन-गमन-परिश्रमस्य'—R.M.

अनसूयेति । 'कौतूहलं' ('रम्य-वस्तु-समालोके लोलता स्यात् कुतूहलम्' इति दर्पणः । स्वार्थे अण्-५।४।३८] । '**प्रकाशम्**' उच्चैः राजानम् आह ['सर्वश्राव्यं प्रकाशं स्यात्' इति दर्पणः) । 'मधुरेण आलापेन जनितः' उत्पादितः विस्रम्भः' विश्वासः 'मन्त्रयते' मुखरयति, वाक्य-प्रयोगे नियोजयति इति स्वौद्धत्य-परिहारः ।

'कतमः' अनेकेषु प्रख्यातेषु को वा 'राजर्षीणां वंशः अलंक्रियते' जन्म-परिग्रहेण इत्यर्थः। 'कतमः' अनेकेषु सुप्रसिद्धेषु देशेषु को 'देश विरहेण' अधुना भवता वियोगेन 'पर्युत्सुकाः' सोत्कण्ठाः 'जनाः" यस्मिन् तथाविधः कृतः ; कुत्र भवतः निवास इति सरलार्थः। 'सुकुमारतरोऽपि' अतिकोमलोऽपि ('सुकुमारं तु कोमलं मृदुलं मृदु' इत्यमरः) 'आत्मा' देहः ('आत्मा कलेवरे यत्ने' इति धरणिः) 'तपोवन-परिश्रमस्य' आश्रमाऽऽगमन-जन्य-क्लेशस्य 'पदं' स्थानम् 'उपनीतः' प्रापितः। (तपोवन-पदेन नात्यधिकं-प्रयोजनत्वं सूचयति। अतएव परिश्रम-पदम्। फलान्तराभावात् परिश्रम-मात्रम् इति भाव इति राघवचरणाः)।

36a.—1. **मन्त्रयते**—मन्त्र=To speak privately' ; 'मत्रि गुप्त-परिभाषणे' —Here it is in the ordinary sense of 'talking'. Cf. 'किमपि हृदये कृत्वा मन्त्रयेथे'—*Infra*. Sometimes it is used *Prmp*. 'किमेकाकिनी मन्त्रयसि'—*Śak. VI.* Here it is *casual*—'unreserve eggs me to talk'. Mark the extremely courteous address of Anasūyā. Cf. 'अतएव शुश्रूषा मां मुखरयति'—MR. III. 'तथापि कल्याणकरीं गिरं ते मां श्रोतुमिच्छा मुखरीकरोति'—*Ki. III.* 9 ; *Bk. X.* 73. "स्वामि-भक्तिर्मां मुखरयति"—VS. II "Pardon me, Caesar, for my dear love. To your proceeding bids me tell you this. And reason to my love is liable"—**Julius Caesar**. *II.* 2. 2. **राजर्षि-वंशः** &c.—Anasūyā seems to have recognised the king. 3. **निमित्तं**——ञिमिदा (स्नेहने)+क्त कर्तरि by 'ञीतः क्तः' (3. 2. 187) ; "ञि-शब्द-लोपि-धातोः परः, वर्तमान-काले क्त-प्रत्ययः स्यात्"—**Prabhā**. We do not get '**निमिन्नम्**' by 'र-दाभ्यां निष्टातो नः पूर्वस्य च दः' (8. 2. 42), for *Pānini himself writes* '**निमित्त**' in "स्नु-क्रमोर-नात्मनेपद-निमित्ते" (7. 2. 36) ; 4. **कतमः**—(see 232n. I) ; **विरह-पर्युत्सुक** &c. —(What country is mourning your absence ?) Cf. "तत कथय आगमनेन अपुण्यभाक् कतमो विजृम्भित-विरह-व्यथः शून्यतां नीतो देशः"—*HC.* 'कस्य वा देशस्य भवद्-विरह स्सुजनान् बाधते'—Bhoja Prabandha.'तमाहितौत्सुक्यम-दर्शनेन' &c.—*Ra. II.* 73. This is a clear proof of the kings' being much loved by the people in ancient times. 5. **आर्येण आत्मा पदम् उपनीतः**—(Your self has been subjected to the toils of journey). Note that in the passive voice there is no **change** in **पदं** (*indirect*

object) of नी । Read 'गौणे कर्मणि दुह्यादेः, प्रधाने नी-हृ-कृष्-वहाम्' । Cf. 'समाधिभीतेन किलोपनीतः पञ्चाप्सरो-यौवन-कूटबन्धम्'——*Ra. XIII.* 39.

Text——शकुन्तला (आत्मगतम्)—**हिअअ, मा उत्तम्म। एसा तुए चिन्तिदाइं अणसूया मन्तेदि** (हृदय, मा उत्ताम्य[1] । एषा त्वया चिन्तितानि अनसूया मन्त्रयते) ।

Śakuntalā (*Aside*)—O (*my*) heart, be not impatient. Here is Anasūyā giving utterance to your thoughts.

राजा (आत्मगतम्)—**कथमिदानीमात्मानं निवेदयामि, कथं वात्मापहारं[1] करोमि। भवतु। एवं तावदेनां वक्ष्ये।** (प्रकाशम्) **भवति, यः पौरवेण राज्ञा धर्माधिकारे[2] नियुक्तः, सोऽहम् अविघ्न-क्रियो-पलम्भाय[3] धर्मारण्यमिदमायातः।**

King (*Aside*)—How shall I now make myself known, or how shall I make a self-disguise[1] ? Well, thus will I say to her. (*Aloud*) Honoured maiden, I am the person that is appointed in the Department[2] of (*the Superintendence of*) Religion[2], by His Majesty, the descendant of Puru, and I have come to this sacred grove, to[3] ascertain, if rites are free from let[3].

V. L.——'चिन्तितानि'—B. R. V. HS. चिन्तितम्'—-M. S.

शकुन्तलेति। 'मा उत्ताम्य' मा खिद्यस्व। ('मास्म माऽलं च वारणे' इत्यमरः। दैवादिकात् तमेर्लोट्। "कथ मा कुरु गर्वम्, मा भवतु? **मा** शब्दोऽयं, **न माङ**" इति प्रभा)। 'मन्त्रयते' वदति (अनेन **हाव**-लक्षणो विकार उक्तः। 'भ्रू-नेत्रादि-विकारैस्तु सम्भोगेच्छा-प्रकाशकः। भाव एवाऽल्पसलक्ष्य-विकारः **हाव** उच्यते' इति तल्लक्षणात्)। **राजेति।** 'आत्मानं' निज-स्वभावं (**'आत्मा** कलेवरे यत्ने **स्वभावे** परमात्मनि' इति धरणिः) 'निवेदयामि' आत्मनः परिचयं दास्यामि इत्यर्थः। 'आत्मनः' स्व-स्वभावस्य राजभावस्य इति यावत् 'अपहारं' गोपनं 'करोमि'। 'भवति' इतिसंबुद्धिः। (तथाचोक्तं मानवे—'परपत्नी तु या स्त्री स्यादसम्बद्धा च योनितः। तां ब्रूयात् **'भवति** इत्येवं सुभगे, **भगिनीति** च'–२।१२९)। 'पौरवेण राज्ञा' अर्थात् **दुष्यन्तेन 'धर्माधिकारे'** तपश्चरणादीनाम् **अवेक्षणार्थं** 'यः नियुक्तः' 'सोऽहं' **कश्चित् राजपुरुष** इति **आत्म-गोपनम्।** पक्षान्तरे, 'पौरवेण' पुरुवंशोत्पन्नेन **'राज्ञा' दुष्यन्त-पित्रा** 'यः' **मल्लक्षणः जनः** 'धर्माधिकारे' राज्ये 'नियुक्तः' अभिषिक्तः' **'सोऽहं दुष्यन्त** तु इति **आत्म-निवेदनम्।** **'अविघ्ना'** विघ्न-रहिता याः 'क्रियाः' इज्यानुष्ठानानि तासाम् 'उपलम्भाय' अनु-**भवार्थम्** (**'उपलम्भस्त्वनुभव'** इत्यमरः) सम्यक्ज्ञानाय अभावाभियोग-निवारणाय

च इत्यर्थः । अत्रैकपताका-स्थानकमुक्तं, तल्लक्षणं यथा दर्पणे—"द्व्यर्थोवचन-विन्यासः सुश्लिष्टः काव्ययोजितः । प्रधानार्थान्तराक्षेपी पताकास्थानकं परम्" ॥ भोजराज-मते अत्र श्लेषालंकारः) ।

37n.—1. **मा उत्ताम्य**—(Be not troubled)—No लुङ् by '**माङि लुङ्**'—(3. 3. 175), as we have here '**मा**' and not '**माङ्**' (Com.). (Vide 34n. 4), **कथम् वा आत्मापहारम्** &c.—The king is in a fix, for he wanted to conceal his real character and at the same time refrain from speaking a lie. (Cf.— '**सत्यं ब्रूयात्** प्रियं ब्रूयात्' etc.—*MS. IV*. 138). In fact, if he fibs, he is an 'आत्मापहारक' **and is punishable by law**. For Manu says—'योऽन्यथा सन्तमात्मानम् अन्यथा सत्सु भाषते । स पापकृत्तमः लोके स्तेन '**आत्मापहारकः**'—*IV*. 255. Hence, he resorts to a quibble, but that also misleads the girls. He repeats the same process elsewhere a little after and also at the end of Act. II, on the eve of Vidūṣaka's departure from the forest. Hence **he comes under the charge of deception**. We can, however, justify his character, as mendacity in certain cases is **not a sin**. Cf.—'**विषयभेदे मिथ्या-भाषणे दोषाऽभावः** । शर्मिष्ठोवाच । "न नर्मयुक्तं वचनं हिनस्ति न स्त्रीषु राजन् न विवाहकाले । प्राणात्यये सर्वधनापहारे पञ्चाऽनृतानि आहुर-**पातकानि**'—*Droṇā*, 69.33. Also "कर्णपर्वणि अर्जुनं प्रति श्रीकृष्ण—वचनम्" *Kalpa. P.*1031. 2. **भवति**—The king addresses *Śak*. with '**भवति**', as she is not related to him in any way (Com.). Or, construe thus 'यः पौरवेण राज्ञा धर्माधिकारे नियुक्तः भवति', सोऽहम् etc. 3. **पौरवेण राज्ञा**—(*i*) By Duṣyanta—(A king born in the Puru clan). Also (*ii*) By a king of the Puru line *i.e.*, Duṣyanta's father. 4. **धर्माधिकारे**—(*i*) In the department or office **for supervising religious rites**. (*ii*) in the **seat of Judgment** i.e., **throne**. Cf. '**समः शत्रौ च मित्रे च** सर्वशास्त्र-विशारदः । विप्रमुख्यः कुलीनश्च **धर्माधिकरणो** भवेत्'—*MP*. 189. Again 'धर्मशास्त्राऽनुसारेण अर्थ-शास्त्र-निरूपणम् । यत्राऽधिक्रियते स्थाने **धर्माधि-करणं** हि तत्" ॥ इति वीरमित्रोदये कात्यायन-वचनम् । Thus the whole is a double *entendre*. It may mean : (i) I am an **officer appointed**

by Duṣyanta to **supervise religious rites in the penance[3] grove** (*meant for the girls*), or (ii) I am one appointed by Duṣyanta's father as a dispenser of justice in the seat of judgment. (See Com.) It will be interesting to note that Emperor Aśoka refers to this type of officers in the 5th **Rock-inscription (शाहबाजगढी)** – "On the 13th year after my coronation I have created the post of '**धर्ममहामात्र**' whose duty will be to look after **धर्म-पालन** (ध्रमधिथनये), **धर्मोन्नति** (ध्रम्मवढिये) and **सुख-स्वाच्छन्द्य** (**हितसुखये**) of all and sundry engaged in piety." **5. अविघ्न-क्रियो-पलम्भाय**—उप+लभ्+घञ् भावे=उपलम्भः। (नुम् by 'उपसर्गात् खल् घञोः' 7. 1. 67)—Ascertainment. **6. धर्मारण्यम्**—Some **wrongly** call it a compound of शाकपार्थिवादि (**मध्यम-पदलोपी**) class; for the Sūtra has '**उत्तरपद** and not **मध्यम-पद** (Värt. 739). *NG* remarks—'**उत्तरपद**-शब्दः समास-चरमाऽवयवे रूढः, पदे इत्येव सिद्धे उत्तर-ग्रहणात्' (*Laghu-Śabdendu-Śekhara on* 739-'अलुक् उत्तरपदे'-6. 3. 1; Sk. 831; 3n. 5.) In fact उत्तरपद the **last member** of the first compound is dropped 'शाकप्रियः' इति बहुव्रीहिः। तस्य पार्थिव-शब्देन समासे कृते, पूर्वसमासे यदुत्तरपदं '**प्रियः**' इति तस्य लोपः। तथा 'देव-ब्राह्मणः' इत्यत्र 'देवस्य पूजकः' इति' पूर्वस्मिन् षष्ठी-समासे **यदुत्तरपदम्** '**पूजक**' इति तस्य लोपः ज्ञेयः—. T. Hence धर्मस्य इदम्—धर्मार्थम्। धर्मार्थम् अरण्यम्—धर्मारण्य ; here अर्थम् (इदम्)—the उत्तरपद of the first compound, is dropped. This is शाकपार्थिवादिवत् **उत्तरपद-लोपी** कर्मधारयः। In fact 'धर्मार्थम्' and 'अरण्यम्' are **two पद**'s, and there cannot be any '**मध्यम-पद**' of **two** पदs. Vide also *BM. p.* 515. Or, say **धर्मस्य** अरण्यम् इति धर्मारण्यम्, **अश्व-घासादिवत् षष्ठी समासः** Sk–698; (Read 214n. 3).

Text :—**अनसूया—सणाहा दाणिं धम्म-चारिणो** (सनाथा इदानीं धर्म-चारिणः)।

(शकुन्तला शृङ्गार-लज्जां नाटयति)

Anasūyā —The workers of piety have now a guardian.

(*Śakuntalā betrays amorous bashfulness*).

१—(उभयोराकारं विदित्वा। जनान्तिकम्) 'हला सउन्दले, जइ एत्थ अज्ज तादो सण्णिहिदो भवे [हला शकुन्तले, यदि अत्र अद्य तातः सन्निहितोभवेत्]

The friends—(*Noticing the demeanour of the two—Aside to Śak.*) —Dear Śakuntalā, if (*our*) sire were (*but*) here to-day—.

शकुन्तला—तदो किं भवे [ततः किंभवेत्] ?

Śakuntalā—What then if he were (*here*) ?

सख्यौ—इमं जीविद-सव्वस्सेण वि अदिहि-विसेसं किदत्थं करिस्सदि (इमं जीवित-सर्वस्वेना'पि अतिथि-विशेषं कृतार्थं करिष्यति) ।

The friends—This (*our*) noted guest, even [1]with his life's all,[1] he would have honoured.

अनसूयेति। 'इदानीं' भवदागमनेन 'सनाथाः' सहायवन्तः इत्यर्थः। ['वयम्' इति विशेषे वक्तव्ये 'धर्मचारिण' इति सामान्योक्तेः अप्रस्तुत-प्रशंसा। अतिशयोक्तिश्च ध्वनिता)। 'शृङ्गार-लज्जां' नृपे अनुराग-जन्या लज्जा 'नाटयति' अवनतेन शिरसा, लज्जितया च दृशा दर्शयति (तल्लक्षणं यथा—'पराङ्मुखीकृत शीर्षं परावृत्तम् उदीरितम्। तत्कार्यं कोप-लज्जादि कृते वक्त्रापसारणे' इति। अत्र लज्जाऽनुभवे "मिथोऽभिगामि-पक्ष्माऽग्राप्यधस्तात् गततारका। पतितोर्ध्वपुटा दृष्टिर्लज्जायां लज्जिता मता"॥ अत्र लज्जाऽनुभवे नाथ-शब्दस्य पतिरिति व्यङ्ग्योऽर्थः निमित्तम्। अनेन हेला नाम अङ्गजः विकारः उक्तः। तल्लक्षण तु दर्पणे 'हेलाऽत्यन्त-समालक्ष्य-विकारः स्यात् स एव च'।] सख्याविति। 'उभयोः' शकुन्तलाया दुष्यन्तस्य च 'आकारम्' ['आकारः बहिराकृतिः' इत्यमरः] परस्पर-स्निग्धावलोकनम्। 'जनान्तिकं' राज्ञः अश्रुतम्। सख्याविति। 'जीवितस्य' जीवनस्य (भावे क्तः) यत् 'सर्वस्वं' धनं शकुन्तला-रूपं तेन, तदर्पणेन 'अपि अतिथि-विशेषं' विशिष्टातिथिं 'कृतार्थं' लब्ध-मनोरथं (अत्र जीवित-सर्वस्व-शब्देन विषय-निगरणात् शकुन्तलायाः उक्तेः पताकास्थानकम् अनेनोक्तम्। तल्लक्षणमादिभरते—'सहसैवार्थसंपत्तिः नायकस्योपकारिका। पताकास्थानकं संधौ प्रथमं तन्मतम्') ॥

38n.—1. शृङ्गार-(Sentiment of love) लज्जां नाटयति— स-नाथा-(*i*) having a protector of religious rites or (*ii*) having a husband. Śak. takes it in the second sense and hence exhibits amorous bashfulness. (Com.) For the first sense, Cf. 'आश्रमोऽयं त्वयाक्रान्तः सनाथ इव साम्प्रतम्'—*Rām. III. Ch. VII.* 8 ; *PN. II.* 15. 2. आकारं— (Com.)—External gesture (such as change of

colour etc.) giving an insight into one's mental thought. 3. जीवित-(life)-सर्वस्वेन (all wealth) &c.–Lit. by offering all which might be the substance of his very existence (i. e. Śak. Cf. "सा हि कुलपतेः उच्छ्वसितम्"—Act III), but the friends apparently refer to the choicest fruits etc. of the hermitage. कृतार्थं करिष्यति— It seems that the friends have guessed the king's love towards Śakuntalā. "इदानी मित्यनेन राज्ञः राजभावः प्रच्छादितोऽपि तया ज्ञात इति द्योत्यते"—Śaṅkara.

Text :— शकुन्तला—(सकृतक-कोपम्[1]) तुम्हे अवेध। किम्पि हिअए करिअ मन्तेध॥ ण वो स्सअं सुणिस्सं (युवाम् अपेतम्[2]। किमपि हृदये कृत्वा मन्त्रयेथे। न युवयो र्वचनं श्रोष्यामि)

Śakuntalā (*With seeming*[1] *anger*)—Avaunt[2] ! With something (*silly*) in your mind, you are speaking (*thus*). I won't listen to your speech.

राजा—वयमपि तावद्भवत्योः सखीगतं[3] किमपि पृच्छामः।

King—I, too, (*would like to*) ask something respecting your friend.

सख्यौ—अज्ज, अणुग्गहो एव्व इअं अब्भत्थणा (आर्य, अनुग्रह एव इयम् अभ्यर्थना[4])।

The friends—This request[4], Revered Sir, is indeed an honour.

राजा—भगवान् काश्यपः शाश्वते[5] ब्रह्मणि[6] स्थित इति प्रकाशः। इयञ्च वः सखी तवात्मजा इति कथमेतत् ?

King—It is well-known that the almighty Kāśyapa is living in eternal[5] celibacy[6]. How can then this your friend be his daughter ?

V. L.—'सकृतक-कोपम्'—B. P. HS.Others omit it. 'ब्रह्मणि वर्तते'— S. M. 'ब्रह्मणि स्थितः'—B. R. V. 'प्रकाशः'—R. B. V. S. 'प्रकाशम्'—M.

शकुन्तलेति। 'कृतकः' कृत्रिमः ('कृतकः स्यात् पुमान् कृष्णसर्परे वाप्य-सम्भवे। पुत्रभेदे कृत्रिमे च त्रिषु' इति शब्दाब्धिः) यः 'कोपः' तेन सहितं यथा स्यात् तथा। 'अपेतं' दूरीभवतम्। 'किमपि' अलीकं यत् मम हृदये नास्ति तत् युवयोः 'हृदये कृत्वा' निधाय 'मन्त्रयेथे' एवं वदथः। 'नाहं युवयोर्वचनं श्रोष्यामि'— जनान्तिकमेतत् ('राजा—आत्मगतम्' इत्यादिना एतदन्तेनोदाहरणं नाम भूषण-मुपक्षिप्तम्। तल्लक्षणं तु दर्पणे "यत्र तुल्यार्थयुक्तेन वाक्येनाभिप्रदर्शनात्।

साध्यतेऽभिमतश्चार्थं स्तदुदाहरणं मतम्' ॥) राजेति। 'वयमपि' अहमपि (१।२।५९) 'अपि' इति समुच्चये। 'सखीं गतं' (२या समासः २।१।२४) सखी-विषयकम्। सस्पर्शेति। 'अभ्यर्थना' याच्ञा, प्रश्न-याच्ञा इत्यर्थः। ['याच्ञा भिक्षाऽर्थनाऽर्दना' इत्यमरः। 'न्यास-श्रन्थो युच्' (३।३।१०७) इति युच्']। राजेति। 'भगवन् ('पूज्ये तत्रभवान् अत्रभवांश्च भगवानपि' इति) 'शाश्वते' नित्ये ('शाश्वत-स्तु ध्रुवो नित्य-सदातन-सनातनाः' इत्यमरः) 'ब्रह्मणि' तपसि ब्रह्मचर्ये इति यावत् ('वेदस्तत्त्वं तपो ब्रह्म' इत्यमरः) 'इति प्रकाशः' अतिप्रसिद्धः ('प्रकाशः अतिप्रसिद्धे स्यात् प्रहासाऽऽतपयोः स्फुटे' इति विश्वः) 'तस्य' नैष्ठिक-ब्रह्मचारिणः 'आत्मजा' औरसी कन्या इत्येतत् कथम् ?

39n.—1. सकृतक-कोपं—(Feigning Anger)—Cf. 'अलीक दक्षिणः'—(Feigning politeness)—MK. *IV*. For कृतक (Vide 141n.3). Feigned anger is essential to the enjoyment of real love. Cf. 'न बिना विप्रलम्भेन सम्भोगः पुष्टिमश्नुते", 'यदि कुप्यसि नास्ति रतिः कोपेन विनाऽथवा कुतः कामः"—MK. V. 34. किमपि—Something absurd. हृदये कृत्वा——Rām. II. 46. 8. 2. अभ्यर्थना—'अभ्यर्थना' or 'अर्थना' means-'a request'. Cf. 'अभ्यर्थनाभङ्ग-भयेन साधुः' &c.—*Ku. I*. 52 ; *NC. V*. 112. 3. शाश्वते—शश्वत् (अव्यय) means 'again and again'—(AK.) By 'तत्रभव' (4. 3. 53), we have शश्वत्+अण् but अण् is 'भ' ('यचि भम्'-1. 4. 185), so 'त्' is to be dropped by Vārt. 'अव्ययानां भ-मात्रे टि-लोपः' (1324). But, "The elision is optional'. 'अनित्योऽयं अव्ययानां टि-लोपः'। 'वहिः-षष्टिलोप—विधानात्'—SK. 1077 ; 1324. Hence शाश्वतः। The derivation is after BhD. The *regular form*, however, is 'शाश्वतिक' with ठञ् ['कालात् ठञ्'-4. 3. 11.] used by Pāṇini himself in 'येषाञ्च विरोधः शाश्वतिकः' (2. 4. 9). But शाश्वत is allowed as it has been used by Kātyayāna himself. Cf. 'शाश्वते प्रतिषेधो वक्तव्यः', ; 'यथोत्तरं मुनीनां प्रामाण्यम्'। Vide "शाश्वतम् इति प्रयुक्तेः"—KSV. V. 2.51. ब्रह्मणि—Kaṇva is a नैष्ठिक-ब्रह्मचारी (life-long celibate). Cf. 'योऽधीत्य विधिवद्वेदान् गृहस्था-श्रममाव्रजेत्। उपकुर्वाणको ज्ञेयो, नैष्ठिको मरणान्तिकः'—KP. 4. प्रकाशः—Well-known. It is reported. Cf. *Rā. III*. 48 ; *XVIII*. 21, where MN has 'प्रकाशः प्रसिद्धः। (Now read 29n. 2). 5. भवत्योः सखीगतं—'सापेक्षत्वेऽपि गमकत्वात् समासः',—

—(Vide 19n. 7.) 6. **तवात्मजा**—Though the king was definite (I. 20 Supra), yet to make sure doubly sure, he uses the term '**आत्मजा**' instead of '**कन्या**', for the latter may be **adopted**.

Text :—**अनसूया—सुणादु अज्जो। अत्थि को वि कोसिओ त्ति गोत्त-णाम-हेओ महा-प्पहावो राएसी** (श्रृणोतु आर्यः। अस्ति कोऽपि कौशिक इति गोत्र-नामधेयो[1]महा-प्रभावो राजर्षिः)।

Anasūyā—May Your Honour listen. There is a certain royal sage of great prowess whose family[1] name[1] is Kauśika.

राजा—अस्ति श्रूयते। King—There is, I hear.

अनसूया—तं णो पिअ-सहिए पहवं अवगच्छ। उज्झिआए सरीर-संवड्ढणा-ऽऽदिहिं ताद-कस्सवो से पिदा (तम् आवयोः प्रिय-सख्याः प्रभवम् अवगच्छ। उज्झितायाः[2] शरीर-संवर्धनाऽऽदिभिः तात-काश्यपः अस्याः पिता)।

Anasūyā—Know him to be the (*real*) father of our dear friend. Sire Kāśyapa is her father only by reason of (*his*) fostering her body &c., when (*she was*) "deserted"[2] (*by parents*).

राजा—उज्झित-शब्देन[3] जनितं मे कौतूहलम्। आ मूलात्[4] श्रोतुमिच्छामि।

King—My curiosity has been roused by the word[3] "deserted".[3] Right[4] from the beginning[4] I should like to hear (*it*).

अनसूयेति। "'कौशिक' इति 'गोत्रं नामधेयम्' अर्थात् गोत्र-सूचकं नाम यस्य-सः 'गोत्र-नामधेयः'। यत् एव तस्य गोत्रं तत् एव तस्य नामधेयम् आसीत् इति भावः। 'महाप्रभावः' महाप्रतापशाली ('स प्रतापः प्रभावश्च यस्तेजः कोशः-दण्डजम्' इत्यमरः) कोऽपि राजा ऋषिः इव इति 'राजर्षिः'। (तथाचोक्तं वायुना—'श्रेया ब्रह्मर्षयः पूर्वं तेभ्यो देवर्षयः पुनः। राजर्षयः पुनस्तेभ्यः ऋषि-प्रकृतयस्त्रयः॥ यस्मात् ऋषन्ति ब्रह्माणं तेन ब्रह्मर्षयः स्मृताः। ऋषन्ति देवान् यस्मात् तस्मात् देवर्षयः स्मृताः॥ ऋषन्ति रञ्जनात् यस्मात् प्रजा राजर्षयः स्मृता' इति)। 'प्रियसख्याः' शकुन्तलायाः 'प्रभवम्' (बाहुलकात् अपादाने अप्) उत्पत्तिहेतु ('प्रभवो जन्ममूले स्यात् जन्महेतौ पराक्रमे' इति मेदिनी)। 'उज्झितायाः' पितृभ्यां परित्यक्तायाः अस्याः 'शरीरस्य' 'संवर्धनादिभिः' पालनादिभिः' कण्वः 'अस्याः पिता' संवृत्त. (तथाचोक्तं भारते—'शरीरकृत् प्राणदाता, यस्य चान्नानि भुज्यते। क्रमेणैते त्रयोऽप्युक्ताः पितरो धर्मशासने' इति)। **अत्राख्यानं** नाम नाट्यालंकारः। 'आख्यानं पूर्ववृत्तोक्तिः'

इति तल्लक्षणात्। राजेति।। 'उज्झित-शब्देन' तस्य कर्तुरनिर्देशात् हेतोरन-भिधानाच्च इत्यर्थः। तस्मात् हेतोः। 'आ मूलात्' एवम् अनुक्रमेण इत्यर्थः (समासस्य विभाषितत्वात् न समासः। 'मूलमाद्ये शिफा-भयोः' इत्यमरः)।

40n.—1. कौशिक—is विश्वामित्र। According to the Rām. (*I. II.* 32 ; *VI.* 34 ; *LVII.* 18. 19.) he is the great-grandson of Kuśa or Kuśika (*Kuśa—Kuśanābha—Gādhi—Viśvāmitra*). VP does the same, except that it makes him the *grandson* of Kuśāmba instead of Kuśanābha. Mahā (*Ādi.* 191), however, makes him the *grandson* of Kuśika. (*Kuśika—Gādhi—Viśvāmitra*). **2. गोत्र-नामधेयः—गोत्र** has a **technical meaning in grammar.**'अपत्यं पौत्र-प्रभृति गोत्रम्'' (4. 1. 162). "पाणिनि-व्याकरणस्य अपत्यार्थक-प्रत्यय-प्रकरणे 'गोत्र-शब्दस्य × × × कश्चित् पारिभाषिकार्थः अस्ति, स उच्यते। जनस्य पौत्र-प्रपौत्र-वृद्ध-प्रपौत्रादि अन्तरापत्यं गोत्रम् उच्यते"—**Prabhā** ; Also BM on 1089. Hence any offspring of the progenitor from the **grandson onwards** will be termed 'गोत्र'। Now कौशिकः =कुशिकस्य गोत्रापत्यं (गोत्रं) पुमान्। Thus **कौशिक** is a **गोत्र**। Again विश्वामित्र's **name was** कौशिक। Hence 'गोत्र' and 'नामधेय' became **identical** in the case of विश्वामित्र। (*Now see Com.*). 3. **महा-प्रभावः**—Apart from his power of creating a second world or of rescuing Śunaśśepha from the clutches of Indra, there is a sly hint that he had the power of weapons (Com.). 4. **अस्याः पिता**—Cf. 'प्रजानां विनयाऽऽधानात् रक्षणाद् भरणादपि। स पिता, पितरस्तासां केवलं जन्महेतवः'—*Ra. I.* 24 ; (*Com.*) "अन्न-दाता भय-त्राता यस्य कन्या विवाहिता। जनयितोपनेता च पञ्चैते पितरः स्मृताः" ॥ 5. **अस्ति श्रूयते**—अस् (दीप्तौ)+क्तिच्, (3. 3. 174)=अस्ति (अव्यय) means 'So it is' ; or it is merely an expletive. Cf. "अस्ति इति तिङन्त-प्रतिरूपकमव्ययम्"—BM and T ; "अस्त्याह (शब्दौ) काल-सामान्ये तिङन्त-प्रतिरूपकौ"—Trikāṇḍaśeṣa. 'अस्ति सिंहः प्रतिवसति स्म' '—PT. **आ मूलात् श्रोतुं** &c.–Cf. 'विस्तरतः श्रोतुमिच्छामि'–Rat. III & IV; 'आदित एव'——MK. V. 40.

Text :—अनसूया—सुणादु अज्जो । पुरा किल तस्स राएसिणो उग्गे तवसि वट्टमाणस्स किम्पि जाद-सङ्केहिं देवेहिं मेअआ णाम अच्छरा पेसिदा णिअम-विग्घ-कारिणी । (शृणोतु आर्यः । पुरा किल तस्य राजर्षेः उग्रे[1] तपसि वर्तमानस्य, किमपि जात-शङ्कैः देवैः मेनका नाम अप्सराः प्रेषिता नियम-विघ्न-कारिणी[2] ।)

Anasūyā—May Your Honour listen. Formerly when that royal sage was in dire[1] austerities, a nymph, Menakā by name, as it is said, was sent to him as an[2] interruption to his devotion[2], by the gods whose fear was somehow aroused.

राजा—अस्ति एतत् अन्य-समाधि-भीरुत्वं देवानाम् ।

King—There is this dread of the gods about others' devotion.

अनसूया—तदो वसन्तो-दार-समये से उम्मादइत्तअं रूवं पेक्खिअ—(ततो वसन्ता-वतार[3]-समये अस्या उन्मादयितृ[4] रूपं प्रेक्ष्य)—

(इति अर्धोक्ते लज्जया विरमति) ।

Anasūyā—Then seeing her intoxicating[4] beauty at the advent[3] of spring time[3]—*(Half-uttering, stops on account of bashfulness)*

राजा—परस्तात् गम्यत एव । सर्वथा अप्सरः-सम्भवैषा ।

King—The rest is [4]easily[4] divined. At all events she is born of a nymph.

अनसूया—अहइं (अथ किम्) । Anasūyā—Just so.

V. L.—'पुरा'—B. V. S. 'गौतमीतीरे पुरा'—R. M.

अनसूयेति । 'पुरा' अतीतकाले ('स्यात् प्रबन्धे चिरातीते निकटाऽऽगामिके पुरा' इत्यमरः) 'किल' इति वार्तायां ('वार्तायामरुचौ किल' इति त्रिकाण्डशेष.) 'उग्रे' कठोरे 'तपसि वर्तमानस्य' तपश्चर्याम् आचरतः । 'नियमस्य' व्रतस्य ("नियमो यन्त्रणायाञ्च प्रतिज्ञानिश्चये व्रते" इति मेदिनी) 'विघ्नकारिणी' व्याघातं करोति या सा 'मेनका नाम अप्सराः' स्ववेंश्या ("अप्सु निर्मथनादेव रसात् तस्मात् वरस्त्रियः । उत्पेतुः मनुजश्रेष्ठ तस्मात् अप्सरसोऽभवन्"-इति रङ्गनाथ-धृत-रामायण-वाक्यम्-१।४२।३३) 'किमपि' केनचित् कारणेन 'जातशङ्कैः' भीतैः 'देवैः' प्रेषिता' प्ररिता । राजेति । 'अन्येषाम्' 'समाधेः' नियमात् ध्यानात् वा ('समाधिः ध्यानमनीवाक-नियमेषु समर्थने' इति विश्वः । 'उपसर्गे घोः कि.' (३।३।९२), इति किः] 'भीरुत्वं' भयम् । अनसूयेति । 'वसन्तस्य' ऋतुविशेषस्य 'अवतारः' आविर्भावः तस्य 'समये उन्मादयितृ' यत् दृष्ट्वा जना उन्मत्ता भवन्ति

तादृशम् इन्द्रियाणामुन्मत्तताकारि 'रूपम्'। राजेति—'परस्तात् इतः परं यत् संघटितं तदित्यर्थः। 'गम्यते' अनुक्तमपि बुध्यते 'एव'। (अत्र 'अनुक्त-सिद्धि' नाम भूषणम्। तल्लक्षणं यथा दर्पणे—'विशेषार्थोऽतिविस्तारोऽनुक्तसिद्धिस्वीर्यते) 'अथ किम्' इति स्वीकारे (इति शब्दरत्नावली)।

41n.—1.—पुरा—Implies both **past** and **future** (*Com.*). Hence sometimes लट्' is used with it to denote **future incident** by 'यावत्-पुरा-निपातयोः लट्'—(III. 3. 4). 'पुरा दृश्यते कल्की'—**Prabhā**, (265*n*. 6). 2. **किमपि—**किम् and अपि together signify "indefinitoness' i.e., 'by some reason or other', *Cf. MD.* 101 ; *Ra. II.* 57. **किल—**Such goes the rumour ; as they say (*Com.*)—Ra. VI. 38. **जातशङ्कः—**Cf. 'नष्टाशङ्काः'—Rā. XIII. 42. 3.—**मेनका—**Is the name of a nymph. Read. 'घृताची मेनका रम्भा उर्वशी च तिलोत्तमा। सुकेशी मञ्जुघोषाद्याः कथ्यन्तेऽप्सरसो बुधैः॥" 4. अप्सराः—So called from their orgination from अप् (*water*). (Com.) अद्भ्यः सरन्ति इति सरतेः असि (उ-६८६)। "अपसारयन्ति चित्तम्" इति असुनन्तो निपातितः —Raghunātha. It is always **plural**—'स्त्रियां बहुष्वप्सरसः स्वर्वेश्या उर्वशीमुखाः—*AK*. But *Patañjali* has used it in **singular** number.—"बहुषु इति प्रायोवादः। 'अनचि च' (*VIII.* 4. 47) इति सूत्रे 'अप्सरा' इति भाष्य प्रयोगात्"—*BhD*. Hence शब्दार्णव remarks— —'स्त्रियां बहुष्वप्सरसः स्यादेकत्वे अप्सरा अपि'। Cf. 'सा चैनं चन्द्रलेखाच्छवि काचित् अप्सरा भूत्वा'—*DC*. (153*n*. 6). 5. **नियम** &c.—'नियमस्तु स यत् कर्माऽनित्यमागन्तुसाधनम्'—It does not mean any **obligatory** rite, but it means those religious observances that are performed, **out of some desire** "शौचमिज्या तपो दानं स्वाध्यायो-पस्थ-निग्रहः। व्रत-मौनोपवासश्च स्नानं च नियमा दश।—Atri, 49. 6. **अन्य-समाधि-भीरुत्वं** &c.—Here देवानाम् (गौरवे बहुवचनम्) refers to Indra (शतक्रतु) who is always in fear lest his heavenly throne be wrested from him by some, undertaking to perform **one hundred** sacrifices, or undergoing some austere penance, and the chief instrument of interruption sent by him is a host of charming celestial damsels. Vide *Ra. III.* 48—50 and also Cf. "ऋषिर्मघोना

समाधिभीतेन किलोपनीतः पञ्चाप्सरो-यौवन-कूट-बन्धम्"—*Ra.* *XIII*. 39 ; 'तपोविशेष-शङ्कितस्य * * महेन्द्रस्य'—*VIK*. I. 'नालं विकर्तुं जनितेन्द्रशङ्कं सुराङ्गना-विभ्रम-चेष्टितानि'—*Ra.* *XIII.* 42 ; 'चरतः किल दुश्चरंतपः * परिशङ्कितः पुरा'—*VIII*. 79 ; *KU*. *III*, 4, 5. **7. वसन्तावतार** (Advent) &c.—Cf. 'पश्यन्तु भवान् वसन्तावतार-सूचकम्'—*Vik. II.* 'वसन्तावतार-सूचकानि रक्ताशोक' &c.—*Māla*. *III*. 'वसन्तावतार-सर्वस्व-भूत' &c.—*Ibid. III.* (R) reads उदार=Pleasant. Note that चैत्र and वैशाख, (and not) फाल्गुन, make वसन्त। मधुः माधवश्च वासन्तिकावृतुः' इति मलमासतत्त्व-धृता श्रुतिः ॥ 'द्वौ द्वौ मार्गादि-मासौ स्यादृतुः' इत्यमरः ॥ "मासैः मार्गाद्यैः क्रमात् षट् ऋतवःस्मृताः'। **8. अस्याः उन्मादयितृ**—(Maddening, bewitching). For षष्ठी—Vide 32n. 2. Cf. the idea with 'मासे मधौ मधुकर-कोकिल-भृङ्गनादैः नार्यः हरन्ति हृदयं प्रसभं नराणाम्—' RS. IV. 24. इत्यर्धोक्ते—Out of decorum Anasūyā was feeling shy to complete the narration. Cf. "आदिशति देव ! देवी "त्यर्धोक्ते ते सलज्जं" &c.—KM. 906. **9. परस्तात्** &c —Subsequent particulars. Mark the suggestive power of Kālidasa. He does not give a vivid description of what occurred, in the pleasant spring time. 'अस्ताति' may stand for १मा, ५मी, and ७मी by 'दिक्शब्देभ्यः सप्तमी--पंचमी-प्रथमाभ्यो' &c. (५।३।२७), Next पर+अस्ताति='परस्तात् by 'विभाषा परावराभ्याम्' (५।३।२९) **10. अथकिम्**—Implies assent. (बाढम्)। Cf. 'अङ्गीकारेऽपि चाथकिम्' इति हारावली।

Text :—राजा—उपपद्यते।

श्लोक मानुषीषु कथं वा स्यादस्य रूपस्य सम्भवः।
न प्रभा-तरलं[1] ज्योति[2] रुदेति वसुधा-तलात् ॥२३॥ } ग्र्य

(शकुन्तला अधोमुखी तिष्ठति)।

King—That's (*quite*) right. How else amongst mortal women, could such a beauty have its birth ? The flash[2] [1]quivering with effulgence[1] does (*never*) rise from the surface of the earth. (23). (*Śakuntalā stands with downdropt look.*)

राजा (आत्मगतम्)—हन्त लब्धावकाशो[1] मे मनोरथः।

King—(*Aside*) Ha ! my longing has[3] found scope[3].

राजेति । 'उपपद्यते' अस्याः अप्सरःसंभवत्वम् युज्यते । मानुषीष्विति ॥ मानुषीषु' मानवी-गर्भ-जातासु नारीषु 'अस्य' ईदृशस्य अलौकिकस्य 'रूपस्य' सौन्दर्यस्य (तल्लक्षणं यथा-"अंङ्गान्यभूषितान्येव प्रक्षेपाद्यैर्विभूषणैः । येन भूषित-वद्भान्ति तद्रूपमिति कथ्यते" ॥) 'सम्भवः' उत्पत्तिः 'कथं वा स्यात्' अपि तु न स्यादेव अर्थात् "क्व मानुष्यः क्व इदं रूपम्" ॥ (संभावनायां लिङ् । 'कथं' वा' इति निपात-समुदायः निषेधे) 'प्रभाभिः' दीप्तिभिः 'तरलं' चञ्चलम् उज्ज्वलं वा ('तरलं चञ्चलं विद्गे भास्वरेऽपि त्रिलिङ्गकम् । हार-मध्य-मणौ पुंसि यवागू-सुरयोःस्त्रियाम्" । इति विश्वमेदिन्यौ) 'ज्योतिः' विद्युत् 'वसुधा-तलात्' भूपृष्ठात् 'न उदेति' न प्रकटीभवति । भूतलात् यथा विद्युत् नोत्पद्यते, मानवीगर्भात् तथेदृशं रूपं न समुद्भवति । 'शकुन्तला अधोमुखी तिष्ठति' निज-रूप-स्तुति-श्रवणेन । तेन उत्तमत्वं ध्वनितम् । (पूर्वार्धे विशेषे प्रस्तुते सामान्योक्तेः अप्रस्तुत-प्रशंसा । उपमान-वाक्ये प्रसिद्धत्वात् निषेधोक्तिः । श्रुति-वृत्त्यनुप्रासौ । अत्र एकाप्युत्पत्ति-क्रिया पौनरुक्त्य-निरासाय सम्भवो-दय-पदाभ्या पृथक् निर्दिष्टा इति अतिशयोक्तिमूल-प्रतिवस्तूपमालंकारः । अत्र निदर्शनं नाम भूषणम् । तल्ल-क्षणं यथा दर्पणे—'यथार्थानां प्रसिद्धानां क्रियते परिकीर्तनम् । परपक्ष-व्युदासार्थं तन्निदर्शनमुच्यते' । श्लोको वृत्तम्) ॥२३॥

राजेति । 'हन्त' इति हर्षे । 'मे मनोरथ' शकुन्तलागतः अभिलाष इदानी तु 'लब्धः' प्राप्तः 'अवकाशः' अवसरः येन तादृश । इयं शकुन्तला अप्सर-सभवा अपि च राज-दुहिता, अतः सा मे उद्वाह-योग्या इति हर्षकारणम् ।

42n.—1. मानुषीषु—मनोः अपत्यं स्त्री इति मनु+अञ्+ ङीष्=मानुषी, (Lit. Female offspring of Manu) तासु । (मनोर्जातौ अञ् यतौ षुक् च' (४।१।१६१) इति षुक् (मानुषः), with यत्—'मनुष्यः' । ङीप् by 'टित्-ढाऽण् अञ्—(४।१।१५) । **2. रूपस्य सम्भवः**—(Origin of beauty in Śak.), R explains रूपं as 'one having beauty. 'रूप विद्यतेऽस्मिन् अस्य वा । मत्वर्थीयोऽर्श आदिभ्यः अच् । तेन रूपवतः इत्यर्थ. । अन्यथाऽस्य इत्यनेन अर्थपौनरुक्त्य स्यात्' । **3. प्रभा-तरलं ज्योतिः**—('Quivering lightning' with which fair ladies are generally compared (*Vik. IV.* 1 ; 'स्थास्नुरिव अचिर-प्रभा'—BK. II. 47 ; 'रराज राजपुत्री तु विद्युत् सौदामिनी यथा'— Rām. III. 53. 14. But 'ज्योतिश्चन्द्रादिः'—R. Against this HS remarks—"तदसत् । ज्योतिःपदस्य तेजोमात्र-वाचितया सूर्य-परत्व-व्याख्याने

विशेषे अविशेषाख्य-दोषापत्तेः" । Now Cf. 'प्रभामात्रं हि तरलं दृश्यते न तदाश्रयः' —*KA. II.* 129 ; "More than normal grace Speaks the descendant of Ethereal race"—**Pope.** 4. **लब्धावकाशो** &c.—My **desire has really a scope for its indulgence, because she is Kṣatriya's daughter, hence there is no hindrance in the way of her being married to me, a क्षत्रिय king. After this all excepting (*B*) read 'किन्तु सख्याः परिहासोदाहृतां वरप्रार्थनां श्रुत्वा धृत-द्वैधी-भावकातरं मे मनः'**— which has been omitted by us, as owing to the presence of the word 'धृत' in 'धृत-द्वैधी-भाव-कातरम्', 'च्वि' in द्वैधीभाव &c. becomes redundant. Such **loose** writings are not expected from a writer like Kālidāsa. (Vide 154n. 3.) For a similar idea, Cf. 'कथमियम् एवासौ विश्वावसो र्दुहिता मलयवती । अथवा रत्नाकरादृते कुतश्चन्द्र—लेखायाः प्रसूतिः—NN. II.

Text :—**प्रियंवदा**—(सस्मितं शकुन्तलां विलोक्य, नायकाभिमुखी भूत्वा[१])

—**पुणोवि वत्तुकामो विअ अज्जो** (पुनरपि वक्तुकामः[१] इव आर्यः) ।

(शकुन्तला सखीमङ्गुल्या तर्जयति[२]) ।

Priyaṁvadā (*Smilingly looking at Śak. and then turning towards the hero*)—Your Honour seems to be desirous[1] of asking[1] something further. (*Śak. threatens[2] her friend with finger.*)

राजा—सम्यगुपलक्षितं[३] भवत्या । अस्ति नः सच्चरित-श्रवण-लोभात्[४] अन्यदपि प्रष्टव्यम् ।

King—Rightly guessed[3] by Your Ladyship. Through my [4]longing for hearing the tale of the good[4], there is still something to be asked.

प्रियंवदा—अलं विआरिअ । अ-णिअन्तणाऽणुओओ तवस्सि-अणो णाम (अलं विचार्य[४] । अ-नियन्त्रणाऽनुयोगः[५] तपस्वि-जनो नाम) ।

Priyaṁvadā—Away with scruples[4]. Hermit-folk may be questioned unreservedly .

प्रियंवदेति ।। 'अभिमुखी' अभिगतं मुखं यस्याः सा अभिमुखी ['प्रादिभ्यः धातुजस्य वाच्यो वा चोत्तर-पदलोपः'—वाः (२।२।२४,८३०) इति बहुव्रीहिः । ङीप्

(४।१।५४), पक्षे टाप्) तादृशी 'भूत्वा' राजानं संबोध्य इत्यर्थः। 'वक्तुं कामः' यस्य तादृशः। शकुन्तला दुष्यन्तस्य आलापं शुश्रूषुरपि सखीं प्रियंवदाम् 'अंगुल्या' तर्जन्या 'तर्जयति' भर्त्सयति (अनेन ललित-नामा अङ्गविकारः दर्शितः। "प्रियजन-कथा-शुश्रूषुरपि बहिः तदन्यथा इति ललितम्" इति शङ्करः)। राजेति। 'सम्यक्' साधु यथार्थम् इति यावत् ('सम्यक् स्याद् वाच्यलिङ्गस्तु मनोज्ञे सङ्गतेऽपि च' इति विश्वः) 'उपलक्षितम्' अनुमितम्। सतां साधूनां 'चरित्रस्य' श्रवणं', तस्मिन् 'लोभः' अभिलाषः तस्मात् (हेतौ पञ्चमी २।३।२५)। 'नः' (१।२।२५) मम। 'प्रष्टव्यं' जिज्ञासितव्यम्। अनसूयेति। 'अलं विचार्य' ('अलं-खल्वोः प्रतिषेधयोः प्राचां क्त्वा' (३।४।१८) इति तुमुन्-प्रत्ययार्थे क्त्वा-प्रत्ययः) विचिकित्सया किं प्रयोजनम्। 'तपस्विजनः' तापसाः, 'अनियन्त्रणः' अप्रतिबन्धः 'अनुयोगः' प्रश्नः ('प्रश्नानुयोगः पृच्छा च' इत्यमरः) येषु तथाविधः, सकल-प्रश्नार्हं इत्यर्थः। 'नाम' इत्यभ्युपगमे, प्राकाश्ये वा ('नाम कोपेऽभ्युपगमे विस्मये स्मरणेऽपि च। संभाव्य-कुत्सा-प्राकाश्य-विकल्पेष्वपि दृश्यते' इति मेदिनी)।

43n.—1. सस्मितं &c.—Mark the naughtiness of Priyaṁvadā who wants to annoy Śak. by continuing the conversation. (56n. 5. end.) 2. वक्तुकामः—वक्तुं (वचने) कामः (desire) यस्य सः। 'म्' of वक्तुम् disappears by the maxim 'लुम्पेदवश्यमः कृत्ये तुं-काम-मनसोरपि। समो वा तत-हितयोर्मांसस्य पचियुड्घञोः'॥—Qtd. T. 1034. 3. तर्जयति—(Ra. IV. 28). 'तर्ज' is अनुदात्तेत्, , so we expect आत्मनेपद here by 'अनुदात्तङित आत्मनेपदम्' (1. 3. 12). But BD remarks "चक्षिङ् व्यक्तायां वाचि। इकार अनुदात्तः युजर्थः। ङ-कारस्तु अनुदात्तेत्व-प्रयुक्तम् आत्मनेपदम् अनित्यम् (प—९७) इति ज्ञापनार्थः"—2435, 2326. 2513. i. e. the अनुदात्तेत् roots are **not always** आत्मनेपदी, as will be evident from Pāṇini's attaching an **additional** 'ङ्' to 'चक्षि' which has already an 'इ' i.e. an अनुदात्त vowel. This 'ङ्' suggests the **optional nature** of the case. NB and others **differ**, as the above परिभाषा is **absent** in MBh. 'अनुदात्त-प्रयुक्तमात्मनेपदमनित्यम्' इति समाधानं तु अनुचितम्। तस्य भाष्यास्पृष्टत्वेन अप्रमाणिकत्वात्। अतएव 'व्यत्ययो बहुलम्' इति सूत्रभाष्ये 'प्रतीपमन्यऊर्मी युध्यति' इत्यत्र व्यत्ययेन परस्मैपदम् इत्येव समाहितम्—BM. Cf. also "प्रियामुख किम्पुरुष चुचुम्बे, मृतमप्यनुगच्छते विद्या। कदाचित् कुप्यते माता, यथा

संक्रमते रविः ॥ Śak., though willing to hear all that her lover had to say, yet by outward gestures appears to be the reverse (Com.). 4. अलं विचार्य—'अलम्', (also) 'खलु' imply प्रतिषेध । 'अलं भूषण-पर्याप्ति-वारणेषु निरर्थके' इति विश्वः। Hence the use of Gerund (ल्यप्)। Vide Com., Cf. 'अलम् अन्यथा संभाव्य'—Infra. 'अलम् अन्यथा गृहीत्वा'—Māla ; "खलु उक्त्वा खलु पौरुषम्—ŚPB. II. 15. 5. अ-नियन्त्रण &c.—नियन्त्रण—Restriction. अविद्यमानं नियन्त्रणं यस्मिन् सः अनियन्त्रणः—Unrestricted (PN. III. 13). अनुयोग——Question ; hence any question may be asked of the hermits. जनः—Has here a collective sense. 6. नाम—Implies अभ्युपगमः—I acknowledge that you have the right to query, or take it in 'प्राकाश्य'—It is well known that &c. (*Com.*).

Text :—राजा—इति सखीं ते ज्ञातुमिच्छामि—

वैखानसं[1] किमनया व्रतमा[2]-प्र-दानात्[3]
वसन्ततिलका व्यापार-रोधि[4] मदनस्य निषेवितव्यम्[5] ।
(तभजजगग) अत्यन्तमेव[6] सदृशे-क्षण-वल्लभाभिः[6]
आहो निवत्स्यति समं हरिणाङ्गनाभिः ॥२४॥

King—This, as to your friend, I like to know. Will the monastic[1] vow[2] opposed[4] to the course[4] of love, be observed[5] by her until[3] betrothal[3] (*to a king*)—["**till she is given to a lord**"—**Roby Dutta**], or will this one, beloved to these does, owing to similar eyes, actually stay for[6] ever[6] with them—the mates of stags. (24).

V. L.—'अत्यन्तमेव सदृशे'—B.V. '०मदिरे'—R.S. 'अत्यन्तमात्मसदृशे' —M राजेति। 'ते सखीं शकुन्तलासम्बन्धिनम् 'इति' एवंविधं वक्ष्यमाणं विषयम्। वैखानसमिति॥ 'किम्' इति प्रश्ने। 'अनया' राजर्षि-कन्यया शकुन्तलया 'मदनस्य' कामस्य 'व्यापारं' प्रवर्तनं रोद्धुं शीलमस्य इति 'व्यापाररोधि' 'वैखानसं' तपस्वि-सम्बन्धि 'व्रतं' नियमादि ब्रह्मचर्यम् इति यावत्। 'आ प्र-दानात्' 'प्रकृष्टाय उत्तम-प्रकृतये राज्ञे दानं' तस्मात्। प्र-दानादि-विशिष्टं विवाह मर्यादीकृत्य इत्यर्थः। (समासस्य विभाषित्वात् समासः पाक्षिकः। (२।१।१३) पक्षे 'आ-प्रदानम्'।

'पञ्चम्यपाङ् परिभिः' (२।३।१०) इति पञ्चमी] 'निषेवितव्यम्' आचरितव्यम् इति प्रथमः प्रश्नः। 'आहो'' अथवा ('आहो उताहो किमुत विकल्पे'—इत्यमरः) 'सदृशाभ्यां' स्व-समानाभ्याम् 'ईक्षणाभ्यां ' नेत्राभ्यां 'वल्लभाभिः'' प्रियाभिः ('वल्लभो दयितेऽध्यक्षे सल्लक्षण-तुरंगमे' इति विम्वमेदिन्यौ) 'हरिणाङ्गनाभिः' आश्रम-मृगीभिः 'समं' सह ('समं सहार्थे च' इत्यमरः) तपोवने इत्यर्थः। 'अत्यन्तमेव' यावज्जीवमेव 'निवत्स्यति' स्थास्यति इति द्वितीयः प्रश्नः। यदि सा शकुन्तला **क्षत्रिय-नृपस्य** विश्वामित्रस्य कन्या इति हेतोः कस्मैचित् **क्षत्रियाय राज्ञे** देया, तदा विवाह-पर्यन्तमेव अस्याः तपोवने वासः ब्रह्मचर्य-पालनञ्च, तदनन्तरम् अविरोधी कामोपभोगः। पक्षान्तरे यदीयं **तपोवने-पालिता** अतः हेतोः कस्मैचित् **तापसाय** दत्ता स्यात्, तदा मृग-मिथुनवत् तपोवने एव सदा स्थास्यति इति हृदयम्)। (सम-शब्दस्य तुल्यवाचित्वे **उपमा**। **वृत्त्यनुप्रासश्च**। **वसन्ततिलका** वृत्तम्] (२४)

44n.—1. निर्वेवितव्यम्—(To be observed)—नि+सेव्+तव्य कर्मणि। 'सेव' becomes 'षेव' by—'**परि-नि-विभ्यः सेव-सित**'—&c. (8.3. 70). **2. अत्यन्तमेव**—अतिक्रान्तम् अन्तः नाशः यस्मिन् कर्मणि तत् यथा स्यात् तथा—Up to the end *i.e.* throughout her life. **एव** is emphatic and implies **परिभव (disapproval)**—'**एवौपम्ये परिभवे** ईषदर्थेऽवधारणे'—*Haima*. The king does not like the idea of Śak.'s living with the does for ever. **वैखानसम्**—'तस्येदम्' इति अण्। Read (14n. 1.) Also 'ये नखास्ते वैखानसाः। ये बाला स्ते बालखिल्या इति श्रुतेः—Qtd. Rāma. **3. सदृशे-क्षण-वल्लभाभिः**—(३या तत्) adjective to 'हरिणाङ्गनाभिः'। समानः इव पश्यति इति समान+दृश्+कञ् ('त्यद्-आदिषु दृशो ञालोचने, कञ् च'—III. 2. 60). सदृशः—(Similar). पक्षे क्विन्-**सदृक्**। 'सदृक्ष'स्तु छान्दसः। 'समान'=स by 'दृग्दृश्वतुषु' (VI 3. 89). **ईक्षणम्**—Eye—करणे ल्युट्। 'ईक्षणं दर्शने दृशि'—*Medinī.* The epithet is very expressive, as it gives reason for Śak.'s prolonged stay in the hermitage. The does were very dear to Śak., as they possessed eyes similar to those of her. Hence it is quite natural that she should like to pass her days amongst those who are very dear to her. **4. अङ्गनाभिः**— अङ्गानि (कल्याणानि) सन्ति आसाम् इति अङ्ग+मत्वर्थे न ('अङ्गात् कल्याणे नः'—*Vārt.* 5. 2. 100=अङ्गनाः। '**अन्यथा अङ्गवती**'—**Prabhā**. Or, अगि (गतौ) +युच् (उ-२।७८)—**BhD.**

5. **निवत्स्यति** (VII. 4. 49.)—At the sight of Śak., the idea of marriage flashed in the mind of the king, as a little before his right arm had throbbed. Next from the conversation of the three girls he could know that Śak. would be **given in marriage.** (Cf. 'एवमहमपि आत्मनः अनुरूपं वरं लभेय' &c.) A little after Śak.'s life-story was narrated to the king from which he gathered the fact that she was born of a nymph-mother by a Kṣatriya. Hence there was no hindrance to his getting her. But all of a sudden two doubts arose in his mind. In this Śloka he asked for the solution of these two doubts viz. (*i*) Whether she, **daughter of a Kṣatriya king**, is to be given in marriage to a **Kṣatriya king** (प्र-दान), in which case the king has a chance. (*Interpretation of the first two lines*) (*ii*) Whether because she is **brought up in a hermitage**, so she is to be married to a **hermit youth**, so that she may live always in the hermitage in the company of the does. (*Interpretation of the last two lines*). (Vide Com). This explanation is suggested by R. Some explain—whether she is to be married (*after observing*)**ब्रह्मचर्यं until betrothal** or she is to observe **ब्रह्मचर्यं for life.** But this explanation seems to go against the saying of प्रियंवदा *i. e.* 'यथा वनज्योत्स्ना अनुरूपेण पादपेन सङ्गता अपि नाम एवमहमपि आत्मनः अनुरूपं वरं लभेय इति—' If **perpetual** celibacy of Śak. was intended by Kaṇva, then Priyaṁvadā would not have given *any insinuation of her marriage in that way even in joke.* The idea that she may be given to a *hermit youth* also occurs [to Vidūṣaka. Cf. '**मा कस्यापि तपस्विनः इङ्गुदी-तल-चिक्कण-शीर्षस्य हस्ते पतिष्यति**'—*Act.II.Infra.* (Vide 70n. 1.) Also Cf. 'भर्तारमात्मसदृशं—*Act. IV.* 13.

Text :—प्रियंवदा—अज्ज, धम्म-चरणे वि पर-वसो अअं जणो। गुरुणो उण से अणुरूव-वर-प्पदाणे संकप्पो (आर्य, धर्मचरणेऽपि परवशः[१] अयं जनः। गुरोः पुनरस्याः अनुरूप-वर-प्रदाने सङ्कल्पः[२])।

Priyaṁvadā—Revered Sir, this person is in [1]another's power[1] even in religious practices. Her father's intention,[2] however, is to give her away to a suitable bridegroom.

आर्या राजा (आत्मगतम्)—न खलु दुरवापेयं प्रार्थना[४]।
[12, 18 भव हृदय ! साभिलाषं सम्प्रति सन्देह-निर्णयो जातः।
12, 15] आशङ्कसे[५] यदग्निं तदिदं स्पर्श-क्षमं[६] रत्नम् ॥२५॥

King (*Aside*)—This (*my*) suit[4] is indeed not[3] unattainable.[3] Do cherish (*thy*) wish, (*my*) heart! Now is (*thy*) misgiving solved (*completely*). This, that thou dreadest[5] as fire, is a gem capable[6] of being touched[6] (25).

शकुन्तला (सरोषमिव)—अणसूए, गमिस्सं अहं (अनसूये, गमिष्याम्यहम्) ।

Śakuntalā (*With seeming anger*)—Anasūyā, I will go.

प्रियंवदेति। 'धर्म-चरणेऽपि परवशः' का कथा विवाह-रूपस्य महाव्यापारस्य इति अपेरर्थः। अस्याः कर्तृत्वं कुत्रापि नास्ति इति भावः। 'गुरोः' पितुः ("गुरुः पिता गुरुर्विप्रः' इति गदसिंहः) 'पुनः अस्याः शकुन्तलायाः 'अनुरूपः' योग्यः 'वरः' जामाता ('वरो जामातरि वृतो' इति मेदिनी) तस्मै, 'प्रदाने संकल्पः' इच्छा। (अनेन उत्तराऽलंकारः। 'उत्तरेण प्रश्नोन्नयन उत्तरम्' इति तल्लक्षणात्। 'राजा—वयमपि' इत्यादिना एतदन्तेन युक्ति-नामाङ्गमुपक्षिप्तम्। तल्लक्षणं यथा दर्पणे—'सम्प्रधारणमर्थाणां युक्तिः')। **राजेति।** 'प्रार्थना' शकुन्तला-लाभेच्छा 'दुरवापा' दुर्लभा (अवाप्नोतेः कर्मणि खल् (३।३।१२६), (६।३।६७) इति न मुमागमः)। **भवेति।** हे 'हृदय सम्प्रति सन्देहस्य' किमियं मुनि-कन्या क्षत्रिय-कन्या वा, मद्ग्राह्या न वा इत्याकारस्य संशयस्य 'निर्णयः' समाधानं 'जातः' (तेनात्र वाक्यार्थहेतुकं काव्यलिङ्गम्)। तस्मात् हेतोः 'साभिलाषम्' अभिलाषेण स्पृहया सह वर्तमानं यथा स्यात् तथा 'भव' शकुन्तला-लाभस्य आशां पोषय। 'यत्' वस्तु त्वम् 'अग्निम्' अग्नि-स्वरूपम् दाहकरम् "आशङ्कसे' अनलभयात् यत् स्प्रष्टुं त्वं नोत्सहसे (इति व्यस्त-रूपकम्) 'तदिदं' वस्तु 'स्पर्शक्षमं रत्नमि'ति (व्यतिरेकरूपम्)। अथच 'स्पर्शक्षमम्' उपभोग्यं 'रत्नम्' कन्यारत्नम् इत्यर्थः ('जातौ जातौ यदुत्कृष्टं तद्रत्नमिति कथ्यते' इति यादवोक्तेः) (वृत्त्यनुप्रासः। अत्र समाधान-नामकम् अङ्गमुपक्षिप्तम्। तल्लक्षणं तु दर्पणे-वीजस्याऽऽगमनं यत् तत् समाधानमुच्यते'। इयमार्या) ॥२५॥

45n.—1. परवशः :—Dependent on another i.e., her father. Vide (70n. 2). **अयं जनः**:—Cf. 'अनुपभुक्त-भूषणोऽयं जनः'—Act. IV. ['**जन**' here signifies an individual]. **न खलु दुरवापा**-(difficult to gain) &c.—Because Śak. is a Kṣatriya girl, besides she is not yet betrothed to any body, and her father wishes to give her to *any suitable husband*. So the king, (a क्षत्रिय), thinks that he has a fair chance. Mark the force of two negatives '**न**' & '**दूरे**' । 2. **आशङ्कसे** &c. —**Śak.** would be quite untouchable, like the flame of fire, to the king, if she were a Brāhmin girl or betrothed to a Brāhmin hermit. Śak. II. 7 ; BK. I. 23 ; Mahā I. 3010. (**सरोषम्**') **इव**—Cf. German *Etwa*—as it were.

Remark—HS refutes the theory of **अप्रस्तुतप्रशंसा** here—न 'पुनरप्रस्तुतप्रशंसा', 'यत्' 'तदिदम्' इति शब्द-त्रयेण प्रस्तुताया उपमेय-भूत-शकुन्तलाया अभिहितत्वात् प्रस्तुतानभिधानस्थल एव अप्रस्तुताभिधानेन तत्-प्रस्तुत-प्रतीतौ अप्रस्तुतप्रशंसाया अङ्गीकारात्'। **न वातिशयोक्तिः**, 'विशेषणाभावे च रूपकस्य। यथा 'राजा पाकशासन'' इति ब्रुवता दर्पण-कृतैव एवम्भूतस्थले रूपकस्य मीमांसितत्वात्।

Text—अनसूया—किण्णिमित्तं ? (किं निमित्तम्)

Anasūyā—For what reason ?

शकुन्तला—इमं असंबद्ध-प्पलाविणि पिअंवदं अज्जाए गोदमीए णिवेदइस्सं (इमामसंबद्ध-प्रलापिनीं[1] प्रियंवदामार्यायै गौतम्यै निवेदयिष्यामि)।

(इति उत्तिष्ठति)।

Śakuntalā—I shall report (*against*) this random-raving[1] Priyaṁvadā to revered Gautamī. (*This said, rises up*).

अनसूया—सहि, ण जुत्तं ते अकिद-सक्कारं अदिहि-विसेसं विसज्जिअ सच्छन्ददो गमणं (सखि, न युक्तम् ते अकृत-सत्कारम् अतिथि-विशेषं[2] विसृज्य सच्छन्दतो[3] गमनम्[4])। (शकुन्तला न किञ्चिदुक्त्वा प्रस्थितैव)।

Anasūyā—Friend, it is not meet to depart[4] at will[3] leaving a noted[2] guest[2] unwelcomed.

(*Śak. goes away without saying anything.*)

अनसूयेति। 'किं निमित्तं' गमिष्यसि ? ('निमित्त-पर्याय-प्रयोगे सर्वासां प्रायदर्शनम्' (वा:—६०८) इति प्रथमा)। **शकुन्तलेति**। 'असंबद्धम्' अस-

मञ्जसं यथेच्छम् इति यावत्। पुनः पुनः प्रलपति या ['बहुलम् आभीक्ष्णे' (३।२।८१) इति णिनिः] ताम्। प्रियंवदायाः असंबद्ध-प्रलापं निवेदयिस्यामि इत्यर्थः ['सविशेषौ हि विधि-निषेधौ विशेषणम् उपसङ्क्रामतः सति विशेष्ये बाधे' इति न्यायात्]। अनसूयेति। 'न कृतः' सत्कारः' अभ्यर्थनं यस्मै तादृशम् 'अतिथि-विशेषम्' उत्तमाऽतिथिं 'विसृज्य' परित्यज्य, 'स्वस्याः छन्दः' अभिप्रायः ('अभिप्रायः छन्द आशय' इत्यमरः) इति 'स्वच्छन्दः' ('वृत्तिमात्रे सर्वनाम्नः पुंवद्भावः'' इति पुंवद्भावः) तेन, इति तृतीयायां तसिः ('तसि प्रकरणे आद्यादिभ्य उपसंख्यानम्') स्वेच्छया इत्यर्थः। 'गमनं न युक्तं' न्याय्यम्। [अनेन 'उपविष्टं नाम नाट्यालंकारः उपक्षिप्तः। तल्लक्षणं यथा दर्पणे—''उपविष्टं मनोहारि वाक्यम् शास्त्राऽनुसारतः']।

46n.—1. असंबद्ध &c.—सम्+बन्ध्+क्त कर्मणि=संबद्धम्—Connected, coherent. न of बन्ध् is elided by 'अन्-इदितां हल उपधायाः क्ङिति' (6. 4. 24 ; 4150). न संबद्धम्—Disconnected, hence inconsequent, nonsensical. Next णिनि। **2. गौतम्यं**—(4n. 3) ; **3. न युक्तम्** (proper) &c.—Note the plain appeal of Anasūyā. Some verbs in Skt. are of the nature of Latin & Greek **deponents** i.e. they are **passive in form but active in sense**. (146n. 3 ; 171n. 9). **'न युक्तमशोको** वामपादेन ताड़यितुम्'—Māla. III ; (85n, 3 ; 94n 4). An **अतिथि** should always be welcomed. So says Manu—'आसनाऽशन-शय्याभिरद्भिः मूल-फलेन वा। नास्य कस्यचित् वसेत् गेहे शक्तितोऽनर्चितोऽतिथिः'-४।२८ Mark the argument. A guest should by all means be respected. But this one is an अतिथि-विशेष (32n. 3), hence the importance.

Text :—राजा—(स्वगतम्) आः ! **कथमियं गच्छति।** (ग्रहीतुमिच्छन् निगृह्यात्मानम्[1]। आत्मगतम्) **अहो चेष्टा-प्रतिरूपिका[2] कामि-जन-मनोवृत्तिः।**

अहं हि—

आर्या (12, 18 12, 15)

अनुयास्यन् मुनि-तनयां सहसा विनयेन[3] वारित-प्रसरः[4]।
स्थानादनुच्चलन्नपि गत्वेव पुनः प्रतिनिवृत्तः[5] ॥२६॥

King—(*Aside*) Ah ! How ! does she go ? (*Wishing to seize her, yet restraining*[1] *himself—Aside*)—Ah ! the activity of the mind of a lover has[2] a counterpart in his (*physical*) movement.[2] About to pursue the sage's daughter suddenly, (*but*) my course[4] arrested[4] by decorum,[3] I seem to have returned[5] back after having advanced, though I have not (*really*) moved from (*my*) place (26).

प्रियंवदा (शकुन्तलां निरुध्य)—हला ण दे जुत्तं गन्तुं [हला न ते युक्तं गन्तुम्] ।

Priyaṁvadā—(*Stopping Śak.*) Friend, you should not go.

शकुन्तला—(सभ्रूभेदम्)—**किण्णिमित्तं** (किं निमित्तम्) ?

Śakuntalā (*Knitting her brow*)—For what reason ?

प्रियंवदा—रुक्ख-सेअणे दुवे धारेसि मे । एहि दाव अत्ताणं मोआवेहि, तदो गमिस्ससि (वृक्ष-सेचने द्वे धारयसि मे । एहि तावदात्मानं मोचय । ततो गमिष्यसि) । (इति बलादेनां निवर्तयति) ।

Priyaṁvadā—You owe me the watering of two trees'. (—*Sir Jones* ; '*two waterings of trees*[2]—*M.*). Come (*and*) free yourself (*from debts*) and then shall you go.

(*This said, forcibly turns her back*).

V. L.—'चेष्टाप्रतिरूपिका'—R. V. S.—'चेष्टानुरूपिणी'—B. 'चेष्टा-ऽप्रतिरूपिका'—M. 'कामिजनः'—R. B. V. S. 'कामिनः'—M. 'मोचय'—B 'मोचयित्वा'—R.M.S.

राजेति ।। 'अहो' इति विस्मये ('विकल्पे विस्मयेऽप्यहो' इति रुद्रः) 'कामि-जनानां' मदनाऽऽसक्तानां 'मनसः वृत्तिः' प्रवर्तनं 'चेष्टायाः' कायिक-व्यापारस्य ('चेष्टा कायिक-व्यापार' इति **मुग्धबोध-टीकायां दुर्गादासः**) 'प्रतिरूपिका' समधर्मिणी, चेतसः यादृशोऽभिलाषः प्रवर्तते, चेष्टा अपि तु तदनुरूपा स्यात् इति भावः । शारीर-मानस-व्यापारयोः सम्बन्धं दृष्टान्तेन विशेषयन्नाह **अनुयास्य-न्निति** । 'मुनि-तनयां' प्रस्थितां शकुन्तलां 'सहसा' हठात् अविचारितम् इति यावत् ('अतर्किते तु सहसा' इत्यमरः । तत्र भानुजिः 'अतर्किते अविचारिते') । 'अनुयास्यन्' (३।३।२४) अनुगन्तुम् उद्यतः सन् 'विनयेन' विवेचनेन जितेन्द्रिय-तया इति यावत् ('इन्द्रियाणां जयं प्राह विनयं भरतो मुनिः' इत्युक्तेः) 'वारितः' रुद्धः 'प्रसरः' वेगः ('प्रसरः प्रणये वेगे' इति विश्वः) यस्य तादृशः, 'अहं दुष्यन्तः 'स्थानात्' आसनात् 'अनुच्चलन् अपि' अत्रैव स्थितोऽपि इत्यर्थः, मनसा अस्याः समीपं 'गत्वा प्रतिनिवृत्तः' प्रत्यागतः 'इव (इति **क्रियोत्प्रेक्षा** । 'अनुच्चलन् गतः'

इति विरोधाभासः। काव्यलिङ्गमनुप्रासश्च। अनेन 'परिभावना' इत्यङ्गम् उपक्षिप्तम्। तल्लक्षणं तु दर्पणे—'कुतूहलोत्तरा वाचः प्रोक्ता तु परिभावना' इति। आर्या जातिः) ॥२६॥ प्रियंवदेति। 'वृक्षे' द्विसंख्यकम् 'वृक्षसेचने' जल-सिञ्चन-रूप-कार्ये 'मे' ['धारेरुत्तमर्णः' (१।४।३५) इति चतुर्थी) 'धारयसि' त्वदर्थं मया द्वौ वृक्षकौ सिक्तौ, तन्मूल्यं मह्यं प्रदाय, यद्वा मदर्थं वृक्षक-द्वयम् अभि-षिच्य आत्मानम् अनृणां कृत्वा गच्छ इति भावः। 'बलात्' इति ल्यब्लोपे पञ्चमी (५९४)।

47n.—1. चेष्टा-प्रतिरूपिका &c.—प्रतिगतं रूपम् अस्या अस्यां वा 'प्रतिरूपा' बहु—Next स्वार्थे कन्—(127n. 1.). चेष्टायाः प्रतिरूपिका—Facsimile of physical movement.Cf. 'सुबन्त-प्रतिरूपकम-व्ययम्', 'तिङन्त-प्रतिरूपकम्'। "आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन च। नेत्र-वक्त्र-विकारैश्च गृह्यतेऽन्तर्गतं मनः"—*MS. VIII.* 26. 2. कामि-जन&c.—काम+अतिशायने इनि=कामिनः 'भूम-निन्दा-प्रशंसासु नित्ययोगेऽतिशायने। संसर्गेऽस्ति-विवक्षायां भवन्ति मतुबादयः'—*Vārt.* 1894.=Those that are stricken with intense desire. वृत्ति—Behaviour, condition. Cf.—"सखीवृत्तिं"—IV. 18. In an impulsive nature the ideas are often actualised. Here owing to the ardour of love in the king's mind and the intensity of his desire, his mental effort appeared to him like a physical one, *i.e.* though he did neither leave his seat, nor follow the girl, still it appeared to him that he had actually pursued the girl and returned. 3. मुनि-तनयां सहसा अनुयास्यन्——This is R's construction which we have followed, for, thoughtlessness resulted in the desire to follow the girl. मुनि in significant. To approach a fair sex rudely is bad, but it is worse in the case of a hermit-girl. तन्यते विस्तार्यते वंशः इति तन्+कयन ('बलि-मलि-तनिभ्यः कयन्', उ—549.)=तनय: 4. स-भ्रू-भेदम्—The bending of the brow is one of the acts of feminine coquetry called सुकुमार'—M.: Vide 175n. 6). 5. आत्मानं मोचय —According to our contract, I helped you in watering the plants on a previous occasion, now it is your turn to do the same for me. After repaying that debt of yours, you can go. Note the naughtiness of Priyaṁvadā for detaining Śak.

who could not be stopped on the plea of decorum by अनसूया। (Vide 46n. 3 ; 24n. and Remark). मुच्—(*to be free from*) though **transitive,** is here used **intransitively** by the maxim 'धातोरर्थान्तरे वृत्ते' &c.—(Vide 121n. 3.) आत्मानम्—२या by 'गतिबुद्धि' &c.—(1. 4. 52 ; 540).

Text :—**राजा—भद्रे, वृक्ष-सेचनादेव परिश्रान्तामत्रभवतीं लक्षये।**

तथाह्यस्याः।—

शार्दूल-विक्रीडितं (मसज सततग)

स्रस्तांसा[1]-वतिमात्र-लोहित-तलौ बाहू घटोत्क्षेपणाद्
अद्यापि स्तन-वेपथु[2] जनयति श्वासः प्रमाणाऽधिकः।
बद्धं कर्ण-शिरीष-रोधि[3] वदने घर्माऽम्भसां[4] जालकं
बन्धे[5] स्रंसिनि चैक-हस्त-यमिताः[6] पर्याकुलाः[7] मूर्धजाः[8] ॥२७॥

तदहमेनामनृणां करोमि।

(इति अंगुलीयं दातुमिच्छति। उभे नाम-मुद्राऽक्षराणि अनुवाच्य परस्परमवलोकयतः)।

King—Good maiden, I find her (*already*) exhausted even with watering the trees. For—By reason of raising the pitcher, her arms have the shoulders[1] drooping[1] and their palms extremely rufescent ; her inordinate breathing even now produces heaving[2] in her breast[2] ; on her cheeks have gathered drops[4] of perspiration[4] [3]impeding (*the play*) of the Śirīsa flowers in her ears,[3] and the fillet[5] of hair being constantly loosened[5], her tresses[3] restrained with one hand (*hang*) dishevelled[7] (27). I will, therefore, free her from debt. (*This said, desires to offer his ring. Both reading the letters of the signet-ring look at each other.*)

V. L.—'बद्धं'——B. M. S. 'स्रस्तं'——R. V.

स्रस्तांसाविति॥ 'घटस्य' सेचन-घटस्य, 'उत्क्षेपणात्' उत्तोलनात् हेतोः 'अस्याः' शकुन्तलायाः 'बाहू स्रस्तौ' नतौ 'अंसौ' स्कन्धौ ('अंशः स्कन्धे विभागे स्यात्' इति हैमः) स्वभावतस्तु नतौ, अधुना त्वतिनतौ इत्यर्थः। घट-घर्षणात् 'अतिमात्रं' पूर्वस्मात् अधिकम् 'लोहितं' रक्तम् 'तलं' कर-तलं ययोः तादृशौ जातौ। ('तल-शब्दः एकदेशेन भीमः भीम-सेनः, गोवा गोवा-वरी इतिवत् कर-तलमाह बाहु-सान्निध्यात्') 'प्रमाणात्' स्वमात्रायाः अधिकः द्वादशाऽङ्गुलाधिकः इत्यर्थः। (तथाचोक्तं—'देहं वाप्य स्वनाडीभिः प्रमाणं कुरुते बहिः। द्वादशांगुल-मानेन

तस्मात् प्राणः समीरितः' इति)। 'श्वासः' निश्वास-वायुः 'अद्यापि' इदानीमपि 'स्तनयोः वेपथुं' कुच-कम्पं ('ट्वितोऽथुच्'-३।३८९ इति अथुच्) 'जनयति' उत्पादयति। किञ्च 'वदने' मुखे—कपोले इत्यर्थः। ('सर्वं वा मुखमुच्यते' इत्युक्तेश्च वदन इत्युक्तिः) 'कर्णयोः शिरीषं' भूषणार्थं परिहितम् अर्थात् अवतंसीकृतम् शिरीषपुष्पं 'रोद्धुं', स्थिरीकर्तुम् शीलं यस्य तथाविधं 'घर्माऽम्भसां' स्वेदोदकानां ('घर्मः स्यात् आतपे ग्रीष्मे उष्ण-स्वेदाऽम्भसोरपि' इति विश्वः) जालमिव इति 'जालकम्' विन्दुसमूहः ('इवे प्रतिकृतौ'-५।३।९६ इति कन्) 'बद्धं' धृतं 'बन्धे' कवरी-बन्धने 'स्रंसिनि' भृशं विगलति सति ('बहुलम् आभीक्ष्ण्ये'-३।२।८१ इति णिनिः') मूर्ध्नि जायन्ते ये ते 'मूर्धजाश्च' केशा अपि ('सप्तम्यां जनेर्डः'-३।२।९७) 'एकेन हस्तेन' (७२६) अन्यहस्तस्य घट-धारणे व्यापृतत्वात् 'यमिताः' बद्धाः, अतएव 'पर्याकुलाः' इतस्ततः विक्षिप्ताः। शकुन्तलायाः परिश्रान्तत्व-समर्थन-कार्यं प्रति बहु-कारणोपन्यासात् समुच्चयोऽलङ्कारः। स्रस्तं स्रंसिनि इति अर्थावृत्तिः पदावृत्तश्चालङ्कारौ। काव्यलिङ्गं च। स्तन-वेपथु-जननेन हेतुना श्वासस्य प्रमाणाऽधिकत्वं साध्यम् इत्यनुमानालंकारश्च। अनुप्रासः। "अद्यापि स्तनवेपथोश्च जनकः श्वासः प्रमाणाधिकः" इति पठित्वा द्वितीय-पादस्य श्वास-सामानाधिकरण्याभावात् विशेषणत्वाभाव-रूपः प्रक्रम-भङ्गः समाधेयः। अनेन 'विष्टम्' इति भूषणम् उपक्षिप्तम्। तल्लक्षणं यथा दर्पणे—'देश-काल-स्वरूपेण वर्णना विष्टमुच्यते'। शार्दूलविक्रीडितं वृत्तम्)॥२७॥ तदिति। 'तत्, यत इयं वृक्षसेचने इदानीम् अशक्ता तस्माद्धेतोः 'अनृणाम्' ऋणमुक्ताम्। 'करोमि' प्रतिनिधि-द्रव्य-दानात् इति भावः। ('प्रियंवदा शकुन्तलां निरुध्य' इत्यादिना 'इच्छति' इत्यन्तेन करणं नामाङ्गम् उपक्षिप्तम्। "करणं पुनः। प्रकृतार्थ-समारम्भः" इति तल्लक्षणात्)। 'अनुवाच्य' पठित्वा। 'परस्परम्' अन्योन्यम्। 'उभे' अनसूया-प्रियंवदे।

48n.—1. भद्रे—is purposely used to please Priyaṁvadā, so that she may give up her demand. Cf. Eng.—'My good lady.' **2. लोहित-तलौ**—'तल' stands for 'कर-तल' i. e. plam. 'विनापि प्रत्ययं पूर्वोत्तर-पदयोर्वा लोपो: वक्तव्यः'-(Vārt. 5.3.83); Read गोदा गोदावरीनद्या, मथुरा मथुरापुरी। कविकं कविकायाञ्च गवेधौ च गवेधुका' इति शब्दभेद-प्रकाशः। —Owing to constant lifting up of the pitcher, the palms have become red. M explains 'तल' in the sense of the **forearm**, as pots being placed on the waist, are held by the forearm. 3. **अद्यापि**—

"अत्रापीति च त्रिषु स्थानेषु अन्वेति। अत्रापि स्रस्तांसौ, अत्रापि अतिमात्र-लोहित-तलौ, अत्रापि प्रमाणाधिक इति। तेन अतिशयमृदुता ध्वन्यते"—R. **प्रमाणाधिक**:—Abnormal i.e., of a length more than 12 fingers or slightly more than six inches (*Com.*) Cf. 'शय्या-प्रमाणाधिक'—MK. III. 18, 4. **बद्धं कर्ण-शिरीष-रोधि** &c.—कर्णस्थं शिरीषम् इति कर्णशिरीषम् इति उत्तर-पद-लोपी समास। "**मध्यम-पद-लोपी** समास:"**of R & others is wrong** (**Vide** 37*n.* 6.) For **शिरीष** as ear-trinkets, Cf. 'कृतं न कर्णार्पितबन्धनं सखे शिरीषमागण्डविलम्बि केसरम्'—*Śak. VI.* 18. 'धारु कर्णे शिरीषम्'—*MD. II.* 2 ; *Ra. XVI.* 48 ; *XVI.* 61. **कर्ण-शिरीष**+रुध्+णिनि ताच्छील्ये (III. 2. 78).—Obstructing the oscillation of the Śirīṣa flowers which adhere to the face on account of perspiration. Hence'**बद्धम्**'(*formed*) is better than '**स्रस्तं**' which suggests the idea of downward flow of perspiration, while we want the **formation** of the clusters of drops (जालक)। Besides '**स्रस्तं**' will be unnecessarily repeated. 5. **जालकं**—कोरका-कार-बिन्दु-समूह:—('जालकं कोरके दम्भे' इति मेदिनी) (*Com.*) R is unwilling to take it in the sense of 'समूह'। 'यदि समूह-मात्रं व्यङ्ग्यं स्यात्तदा धर्माम्भसां मण्डलम् इत्येव ब्रूयात्'—R. । Cf.'अस्य कर्कश-विहारसंभवं स्वेदमानन-विलग्न-जालकम्'—*Ra. IX.* 68. **एकहस्त**—(restrained with one hand) &c.—(१।१।४९) Cf. 'बिभ्राणा कर-पल्लवेन कबरीमेकेन पर्याकुलम्'—Puṣpa-bāṇa-vilāsa, 7. "अत्र स्वभावोक्तिरलंकार इति केचित् (R) प्रलपन्ति, तदसत्, स्वभावोक्ति-मूलीभूत-वैचित्र्यस्याभावात्"—HS. 6.. **अङ्गुलीयं**—अङ्गुलौ भवम् इति अङ्गुलि+छ: (by'जिह्वा-मूलाङ्गुले छ:' 4.3.62). छ=ईय–(7. 1. 2.,) 7. **नाम-मुद्रा**&c.—मुद्+अ भावे=मुद्रा। 'गुरोश्च हल:' (3.3.103). इति अ। नाम्न: मुद्रा नाममुद्रा-(A signet ring)."अलङ्कारार्थं तु 'मुद्रिका', नामाक्षर-युक्ता तु 'मुद्रा' इत्यनयोर्भेद:। 'नामरूपाणि' दुष्यन्त इति नाम-स्वरूपाणि यानि मुद्राक्षराणि इति समास:। नाममुद्राया: अक्षराणि इति विग्रह आर्थं पौनरुक्त्यं, मुद्रया इत्येतावता एव गतार्थत्वात्"—R. 8. **अनुवाच्य**—अनु+वच्+णिच् in **drama means to read to oneself**', Cf.'अनुवाचित-लेखममात्यमवलोक्य'—*MR. I.* 'देवी—अनुवाचय तावदेतत्। यद्विरुद्धं तत् श्रोष्यामि'—*Vik. II.* 'राजा—गृहीत्वा अनुवाच्य'——*Ibid.* Note that the **sylvan girls** also could read. 9. **परस्परम्**—Rām. V. 34. 7 ; 35. 33 ; 61. 17. On reading the name '**दुष्यन्त**' in the signet ring, each

looks at the other in wonder. Hence the **reciprocity of action** (कर्म-व्यतिहार)। Cf. **'परस्पर-करणमपि 'कर्म-व्यतिहार** उच्यते'—*KT*. So पराम् (सर्वनाम) is **doubled** by the Vārt. **'कर्म-व्यतिहारे** सर्वनाम्नः **द्वे वाच्ये**, समासवच्च बहुलम्' hence we get *hypothetically* 'पराम् पराम्' (अवलोकयतः)। The **doubled** elements are **optionally** compounded owing to the use of बहुलं in the Sūtra. Hence BD says—'बहुल-ग्रहणात् अन्य-परयो **नं समासवत्** (2147). Next 'अ-समासवद्भावे पुर्वपदस्य सुपः सु र्वक्तव्यः' *i.e.*, in **असमासवद्भाव**,the first element is always exhibited with 'स्' (:) hence परास् पराम्। Then feminine टाप् (आ) **disappears** by the Kārikā. 'दलद्वये **टाबभावः** क्लीवे चाङ्विरहः स्वमोः। समासे सोरलुक् चेति सिद्धं बाहुलकात् त्रयम्—SK. 2147. Hence we get परःपरम्=परस्परम्। 'अत्र **कस्कादित्वात्** (8. 3. 48). विसर्गस्य सः'—SK. Similarly **अन्योन्यानुरागः** (103n. 1).

Text :—**राजा—अलमस्मानन्यथा सम्भाव्य। राज्ञः प्रतिग्रहो'स्यम्।**

King—Don't suspect me otherwise. It is a royal gift[1].

प्रियंवदा—तेण हि णारिहदि एवं अंगुलीअअं अंगुली-विओअं। अज्जस्स वअणेण अणिरिणा दाणिं एसा। [तेन हि नार्हत्येतत् अंगुलीयकमगुली-वियोगम्। आर्यस्य वचनेन अनृणा इदानीमेषा]। (किञ्चिद् विहस्य) **हला सउन्दले, मोइदासि अणुअम्पिणा अज्जेण, अहवा महाराएण। गच्छ दाणिं** (हला शकुन्तले, मोचितासि अनुकम्पिनाऽऽर्येणाऽथवा महाराजेन। गच्छेदानीम्)।

Priyaṁvadā—Then surely it ought not to part from your finger. At Your Worship's word she is now freed from debt. (*Laughing slightly*) Dear Śakuntalā, you are freed by this kind gentleman, or (*perhaps*) by (*His most*) mighty Highness.

शकुन्तला (आत्मगतम्)—**जइ अत्तणो पहविस्सं** (यदि आत्मनः प्रभविष्यामि)। (प्रकाशम्), **का तुमं विसज्जिदव्वस्स रुन्धिदव्वस्स वा** (का त्वं विसृष्टव्यस्य रोद्धव्यस्य वा)।

Śakuntalā (*Aside*)—If I were my own mistress. (*Aloud*) Who are you to release or detain (*me*) ?

V. L—'प्रतिग्रहोऽयम्'—B. S. Dr. P. 'प्रतिग्रहोऽयम् इति राजपुरुषं मामवगच्छथ'—M 'परिग्रहोऽयम् इति राजपुरुषम् मामवगच्छत'—R. V. 'अङ्गुलीवियोगम्'— R. B. V. M.'अङ्गुली-वियोगस्य'-

राजेति। 'अन्यथा' अन्यप्रकारेण, यतः अंगुलीयं दुष्यन्त इति नामाङ्कितम्, अतः अयमेव महाराजः दुष्यन्तः इत्याकारेण, 'अलं सम्भाव्य' एवंविधेन विचारेण अलम्। ('अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा'–३।४।१८)। 'राज्ञः' दुष्यन्तस्य 'अयं प्रतिग्रहः' एतत् दुष्यन्तसकाशात् स्वीकृतं मया ('प्रतिग्रहः स्वीकरणे सैन्य-पृष्ठे पतद्‌ग्रहे' इति मेदिनी) इति आत्मानं गोपयति। अथ च 'राज्ञः' दुष्यन्तस्य सकाशात् 'अयं प्रतिग्रहः' (प्रियंवदायै) इति सत्यमाह आत्म-निवेदनार्थम्। प्रियंवदेति। 'तेन हि' राज्ञः प्रतिग्रहत्वेनैव हेतुना। 'न अर्हति' अयुक्तमित्यर्थः। 'अनृणा' ऋणमुक्ता ('तस्माद् नुड् अचि'–६।३।७४)। अतः इदानीमियं स्वच्छन्दतः गन्तुं शक्ता। नृपस्य वचन-भङ्ग्या दुष्यन्तोऽयम् इति सुचतुर-प्रियंवदया परिज्ञातम्, तेन "विहस्य" आह आर्येण महाराजेन वेत्यादि। शकुन्तलेति। यद्यहं मम देहस्य कर्त्री स्याम् तदा गच्छेयम्। अधुना आत्मा मे परवशीभूतः, अतोऽहं गमनाय नालम् इति सरलार्थः। 'विस्रष्टव्यस्य' (वि-पूर्वात् सृजतेः तव्य-प्रत्ययः भावे। 'अव्यय-कृत्-प्रत्यया भाववाच्ये भवन्ति' इत्युक्तेः) अतः 'विस्रष्टव्यं' नाम विसर्जनं, तस्य विसर्जनस्य सम्बन्धे, 'रोद्धव्यस्य' रोधनस्य सम्बन्धे वा 'त्वं का' न कापि इत्यर्थः (अनेन उद्भेद–नामकम् अङ्गम् उपक्षिप्तम्। तल्लक्षणं तु दर्पणे— 'बीजार्थस्य प्ररोहःस्यादुद्भेदः'। दशरूपके तु–'उद्भेदः गूढभेदनम्' इति। राजभावस्य गूढस्य उद्भेदनात्)।

49n.—1. अन्यथा सम्भाव्य—Cf. 'तत् अन्यथासंभाविनि'—*Rat. II*; (43*n*. 4). **राज्ञः प्रतिग्रहोऽयम्**—The king is still anxious to remain incognito and again takes the help of a quibble to mislead the girls. The sentence is an **elliptical one** First, it means,—It is a gift (*to me*) from the king (*Duṣyanta*)—'राज्ञः प्रतिग्रहः (*MS. V*. 84) अयं मे'; hence he, an able officer of the king, has perhaps been rewarded with the royal ring, in recognition of his good service, and thus King's previous speech. (Viz., 'यः पौरवेण राज्ञा धर्माधिकारे नियुक्तः) is **corroborated**. Next it means—This is a gift (*to you*) from the king (*Duṣyanta himself*)—'राज्ञः दुष्यन्तस्य प्रतिग्रहः अयं प्रियंवदायै'। **नार्हति वियोगम्**—For the same idea vide (257n. 6). **आर्यस्य वचनेन**—Priyaṁvadā **suspects** him to be the king, hence the presence of the smile (विहस्य) **2. आत्मनः प्रभविष्यामि**—Śak. is no longer the mistress of herself, King's presence has, as it

were, mesmarised her and she is thus unable to leave the place. 'अधीगर्थदयेशां कर्मणि' (2.3.52) इति षष्ठी (107n. 4). Cf. 'प्रभवति निजस्य कन्यकाजनस्य महाराजः'–*MM IV* ;'ननु प्रभवति आर्यं शिष्यजनस्य'–*Māla. I* 'इदानीम् त्वम् अस्याः प्रभवसि'—*Ibid V.* 'भवतु', कोपिष्यामि यदि आत्मनः प्रभवामि'–*UC. I.* 3. **विसर्जयिष्यस्य रोषयिष्यस्य**—are instances of peculiar *Prākṛta Idioms* the equivalents of which in Sanskrit will be'**विसर्जनाय**' and '**रोषनाय**'—M ; (186*n.* 5). Śak. is enamoured of the king's company and does not want to leave the place ; so she cunningly disputes the authority of Priyaṁvadā to order her to go or to stay.

Text :—राजा—(शकुन्तलां विलोक्य आत्मगतम्) **किं नु खलु यथा वयम् अस्याम्, एवम् इयमपि अस्मान् प्रति स्यात्। अथवा लब्धाऽवकाशा मे प्रार्थना। कुतः ?—**

वाचं न मिश्रयति[1] यद्यपि मद्वचोभिः

वसन्ततिलक　　**कर्णं ददात्यवहिता मयि भाषमाणे।**

(तभजजगग)　　**कामं[2] न तिष्ठति मदानन-सम्मुखीयं**

भूयिष्ठम[3]न्य-विषया न तु दृष्टिरस्याः ॥२८॥

King (*Surveying Śak.—Aside*)—May it possibly be that she is (*affected*) towards me as I am towards her ? Or, rather my desire has obtained scope. Because,—Although she does not mingle her words with mine, (*nevertheless*) she leans her ear (*all*) heedful when I speak. Granted[2] that her eyes stand not my gaze, still it is not cast long[3] upon other things. (28)

V. L.—.'सम्मुखीयं'—B. 'सम्मुखीना'—R. V. 'सम्मुखी सा'—S. M. '**अभिमुखं**'—R.S.V.M. '**अवहिता**'—B. P. HS.

राजेति। 'किं नु खलु' इति वितर्क-गर्भ-प्रश्नः। 'खलु' इति वाक्यालंकारे। '**यथा वयम्**' अहम् (१।२।५९) 'अस्यां' शकुन्तलायाम् अनुरक्ता 'एवं' तद्वत् '**किमियं**' शकुन्तला अपि '**अस्मान्** प्रति' **मां** प्रति। ('लक्षणे-त्थंभूताऽऽख्यान-भाग-वीप्सासु प्रति-पर्य-नवः' (१।४।९०) इति प्रतेः कर्मप्रवचनीयत्वम्। तद्योगे २या च –२।३।८) अनुरक्ता 'स्यात्' न वेति वितर्कः। 'अथवा' इति पक्षान्तरे। 'कुत' इति लब्धाऽवकाशत्वे हेतुमाह। **वाचमिति।** 'इयम्' शकुन्तला '**यद्यपि** मम वचोभिः' वाक्यैः सह 'वाचम्' स्वकीयं वाक्य 'न मिश्रयति' सगमयति

अर्थात् मया सह साक्षात् नालपति, तथापि 'मयि भाषमाणे' (२।३।३७) सखीभ्यां कथयति सति 'अवहिता' दत्तमनःसंयोगा सती 'कर्णं ददाति' आकर्णयति शृणोतीत्यर्थः। 'कामम्' इत्यनुमतौ। एतदपि मयाऽनुमन्तव्यम् यत् "मम आननस्य सम्मुखी' भूत्वा इयं शकुन्तला 'न तिष्ठति', 'अस्याः दृष्टिः' नयनं 'तु' इति भेदे। ('तु पादपूरणे भेदे समुच्चयेऽवधारणे' इति मेदिनी) 'भूयिष्ठम्' बाहुल्यं यथा स्यात् तथा 'अन्य-विषया न' मदानन-व्यतिरिक्त-विषया न, अन्तरा अन्तरा मामवलोकयति इति भावः। अतोऽहं मन्ये शकुन्तलापि मयि अनुरक्ता। (वसन्ततिलकावृत्तम्। समुच्चयोऽलंकारः। छेक-वृत्त्यनुप्रासौ। अनेन मुग्धाया नायिकायाः विलासः नाम भावः उक्तः। तल्लक्षणं तु दर्पणे—'यान-स्थानाऽऽसनादीनां मुख-नेत्रादि-कर्मणाम्। विशेषस्तु विलासः स्यादिष्ट-सन्दर्शनादिना'। अनुरागेङ्गितं च। तथाचोक्तं मदनोदये—'विकारो नेत्र-वक्त्रस्य तद्वाक्य-श्रवणादरः। अन्य-व्याजेन तद्वीक्षा अनुरागेङ्गितं भवेत्'। अत्र प्राप्तिर्नाम चाङ्गमुपक्षितम्। लक्षणं तूक्तं प्राक्) ॥२८॥

50n.—1. वयम्=अहम्—See (30n. 4). **मिश्रयति**—मिश्रं करोति इति मिश्र+णिच्+(लट् ति) by 'मुण्ड-मिश्र-**.णिच्'–(3. 1.19). "She does not mingle her speech with mine—" "This raises doubts in the king's mind about her reciprocation of his love. **2. कामं**—'अकामानुमतौ कामम् असूयोपगमेऽपि च'—*Rudra*. Granted that; I admit that. कामम्—अत्यर्थम् i. e. 'for a great length of time'—(*R*). But then 'तु' is not in consonance with it. Vide (25n. 1; 56n. 1).

Text :—(नेपथ्ये)—भो भोस्तपस्विनः, सन्निहिता[1]स्तपोवन-सत्त्व-रक्षायै भवत:। प्रत्यासन्नः[2] किल मृगया-विहारी पार्थिवो दुष्यन्तः।

पुष्पिताग्रा (ननरय नजजरग)
तुरग-खुर-हत[3]स्तथाहि रेणु[4]र्विटप-विषक्त-जलाऽऽर्द्र-वल्कलेषु[5]।
पतति परिणताऽरुण-प्रकाशः[6] शलभ-समूह[7] इवाऽऽश्रम-द्रुमेषु ॥२९॥

अपिच—
तीव्राऽऽघात-प्रतिहत-तरु-स्कन्ध-लग्नैक-दन्तः[8]।

मन्दाक्रान्ता (मभनत तगग)
क्रीडाऽऽकृष्ट-[9]व्रतति-वलयाऽऽसङ्ग-सञ्जात-पाशः।[10]
मूर्तो[11]विघ्नस्तपस इव नो भिन्न-सारङ्ग-यूथो[10]
धर्मारण्यं प्रविशति गजः स्यन्दनाऽऽलोक-भीतः[12] ॥३०॥

(सर्वाः कर्णं दत्वा किञ्चिदिव सम्भ्रान्ताः)।

(*In the green room*)—Ye hermits ! be[1] at hand[1] to protect the denizens of the penance-grove. Close[2] at hand[2], it is reported, is the lord of the earth, Duṣyanta, amusing (*himself*) with the hunting excursion. For the dust,[4] raised[3] by the hoofs of the steeds[3] and having[6] the (*faded*) sheen of sun-set[6], is falling like a swarm[7] of locusts[7], on the trees of the hermitage, on[5] the boughs of which are hung robes of bark, wet with water[5] (29). Moreover, [13]terrified at the sight of a chariot[13], an elephant,—having[8] one of his tusks fixed on the shoulder of a tree, which has been struck off with a violent blow,[8]—having[10] been tangled (*as it were*) in a net of creepers[10] dragged[9] along by his breast[9], and—having[12] scattered the herds of deer[12], is entering the sacred grove, like an embodied[11] hindrance to our rites. (30).

(*Listening, all are somewhat distracted*), ·

V. L—'प्रतिहृत-तरु-स्कन्ध-लग्नं-कदम्तः'—M. R's. Com. 'तीव्राघातादभिमुख-तरुस्कन्ध-भग्नैकदन्तः'—B.—'प्रतिहृत-तरु. स्कन्ध-लग्नैकदन्तः'—R. V. 'पादाकृष्ट'—R. V. M. 'प्रौढ़ाकृष्ट'—B. . 'क्रोडाकृष्ट'——Patankar. Dr. P. K.—'सञ्जसञ्जात'—R. V. M. 'सञ्जनाज्जात'—B.

नेपथ्य इति। जवनिकान्तराले कस्यचिदुक्तिः इयम्। 'सत्त्वानां' जन्तूनाम्। ('सत्त्वमस्त्री तु जन्तुषु' इत्यमरः) 'रक्षार्थः' रक्षणाय (तादर्थ्ये ऽर्थौ) 'सन्निहिताः' समीपस्थाः। 'मृगया-विहारी' आखेटार्थं परिभ्रमन् 'प्रयासन्नः' समुपस्थितः 'किल' इति वार्तायाम् ('वार्तायाम् अरुचौ किल' इति त्रिकाण्डशेषः) ('राजा प्रत्यासन्नः' इत्यनेन "ईति"—भीतिः प्रदर्शिता। तथाचोक्तं-'अतिवृष्टिः अनावृष्टिः शलभा मूषिका खगाः। प्रत्यासन्नाश्च राजानः षडेते ईतयः स्मृताः इति कामन्दकः। 'स्वचक्रं पर-चक्रञ्च सप्तैते ईतयः स्मृताः' इति केचित्॥ इयं चूलिका। 'अन्तर्जवनिकासस्थैः सूचनार्थस्य चूलिका' इति दर्पण-लक्षणात्। 'दुष्यन्त' इति राज-नाम-श्रवणात् शकुन्तलायाः प्रोत्सहनात् भेद-लक्षणमङ्गमुपक्षिप्तम्। 'भेदः प्रोत्साहना मता' इति तल्लक्षणात्। तुरगेति। 'तथाहि' तमेवार्थं जानीहि ('तथा" इत्यगण-परिपठितो धातुर्गतौ इति गोपीनाथपादाः) 'तुरगाणाम्' अश्वानाम्' (अनेन सेना-बाहुल्य ध्वनितम्) 'खुरैः हतः' उत्क्षिप्तः। 'परिणतः' अस्ताचलोन्मुखः यः 'अरुणः' सूर्यः। ('अरुण स्फुटरागे च सूर्ये सूर्यस्य सारथौ' इति धरणिः)। तद्वत् 'प्रकाशः' स्फुटः। (इति लुप्तोपमा।

'प्रकाशोऽतिप्रसिद्धे स्यात् प्रहासाऽऽतपयोः स्फुटे' इति विश्वः) तद्वद्वर्णः इत्यर्थः। 'रेणुः' धूलिः, 'शलभाः' पतङ्गाः ('समौ-पतङ्ग-शलभौ' इत्यमरः।) तेषां 'समूह इव' (इति **श्रौतोपमा**। अनेन रेणोर्बहुलत्वं घनत्वं च ध्वन्यते) 'विटपेषु' शाखासु 'विषक्तानि' शोषणार्थं लम्बितानि 'जलेन आर्द्राणि' सिक्तानि 'वल्कलानि' येषां तथाविधेषु "आश्रम-द्रुमेषु' तपोवन-वृक्षेषु 'पतति' उड्डीय संसजति, अतः यावन्न तानि मलिनीकृतानि तावत् तानि झटिति आनीयन्ताम्। (**वृत्त्यनुप्रासः**। अत्र पार्थिव-प्रत्यासन्नत्वे कारणे प्रस्तुते तत्कार्यं रेणूद्धूलनादिकमुक्तम् इति **अप्रस्तुत-प्रशंसा**। कार्यस्याऽप्रस्तुतत्वात् **न पर्यायोक्तम्**। पर्यायोक्ते तु कारणवत् कार्यमपि प्रकृतमेव। **काव्यलिङ्गं** च। **पुष्पिताग्रा** वृत्तम्) ॥२९॥

तीव्रेति। 'स्यन्दनानां' रथानाम्, अदृष्टचराणाम् इत्यर्थः 'आलोकेन' दर्शनेन ('**आलोकस्तु** पुमान् द्योते **दर्शने** वन्दिभाषणे' इति मेदिनी) 'भीतः' सन्त्रस्तः सन्, 'तीव्रेण' अतिप्रचण्डेन 'आघातेन' प्रहारेण 'प्रतिहतः'। (अतएव भग्नः:) यः 'तरुः' तस्य तरोः 'स्कन्धे लग्नः' संसक्तः 'एकः दन्तः' यस्य तादृशः। '**क्रोडेन**) आकृष्टः' यो 'व्रततीनां' लताना 'वलयः' मण्डलं ('बलि-मलि-तनिभ्यः कय' उ.-५४९) तस्य 'आ' समन्तात् 'सङ्गेन' संबन्धेन 'सञ्जातः' समुत्पन्नः 'पाशः बन्धनं यस्य तादृशः। ("पाशः पक्ष्यादि-बंधने" इति विश्वः) जालबद्ध इव लक्ष्यमाण इति भावः। "**भिन्नानि' विद्रावितानि** 'मारङ्गाणां' 'मृगाणां यूथानि' वृन्दानि दलाति इति यावत् ('यूथं तोर्यक्समूहेऽपि वृन्दमात्रेऽपि भाषितम्' इति विश्वः) येन तादृशः यद्वा, 'सारङ्गाणाम्' गजानां 'यूथं' सारङ्गयूथं, **'भिन्नं' परित्यक्तं** सारङ्गयूथं' येन तादृशः। ('सारङ्ग पुंसि हरिणे चातके च **मतङ्गजे**। शवले त्रिषु' इति मेदिनी)। कश्चित् 'गजः नः" अस्माकं 'तपसः' तपश्चर्यायाः 'मूर्तः' मूर्तिमान् देहधारी **इत्यर्थः**। ('**मूर्तः** स्यात् त्रिषु मूर्च्छाले कठिने **मूर्तिमत्यपि**' इति विश्वः 'विघ्न इव धर्मारण्यम्' (अश्व-घासादिवत् तादर्थ्ये षष्ठीसमासः) **'प्रविशति'** (विशेषण-चतुष्टयेन **त्वराऽतिशयो व्यज्यते**)। रथस्तु पूर्वं न कदापि दृष्टः। अतः तद्दर्शनेन महदस्य **भयमजनि**। ततः पलायन-सौकर्यं विधातुम् यत् यत् मार्गे स्थितमासीत् तत् तत् सर्वं तेनवोत्पाटितम्। दन्ताघातेन भग्नः कश्चित् तरु-स्कन्धः तस्य दन्ते एव लग्न आसीत्। लता-गुल्मानि क्रोड-निषक्तानि सन्ति निगतरवत् प्रतिभान्ति। मृग-यूथानि च तद्भयेन इतस्ततः विद्रुतानि। तन्मन्ये तपसः प्रत्यूहः गजरूपं धृत्वा आश्रमं प्रविशति। ('विघ्न इव' **इत्युत्प्रेक्षा**। पूर्वश्लोकोक्त-क्रमेण **अप्रस्तुत-प्रशंसा च**। पूर्वार्धे **वृत्त्यनुप्रास-श्रुत्यनुप्रासयोः** एकवाचकाऽनुप्रवेशलक्षणः **संकरः**। उत्तरार्धे **श्रुत्यनुप्रासः परिकर**ाऽलङ्कारश्च। अत्रापि भयानको रसः। **मन्दाक्रान्ता** वृत्तम्। पुनः 'प्रविशति' गजः' इत्यनेनैव **वाक्य-समाप्तौ** पुनर्गज इत्यस्य **विशेषण-**

-तया 'स्यन्दनालोकभीत' इत्यस्योपादानात् **समाप्तपुनरात्तता-दोषः**। स च 'प्रविशति रथालोकभीतः करीन्द्रः' इति पाठेन समाधेयः) ॥३०॥

51n..—1. भोः भोः——used in the reduplicated form, when an **address is made to a group,** Cf. 'भो भो पौराः' :—*PN. I* ; 'भो भोः जनस्थान-वासिनः'—*Ibid. VII* ; 'भो भोः शङ्करगृहाधिवासिनः'—*MM.* (*III* ; 135*n*. 2). **सत्त्व-रक्षार्थं**—तादर्थ्ये ४र्थी। (Vide 14*n*.9 ; 16*n*. 1). Don't say 'तुमर्थाच्च भाववचनात्' इति चतुर्थी, for here **तुमुन् cannot be substituted without altering the word 'तपोवनसत्त्व'** in as much as it is in a compound. *Hari Dikṣita* and his followers account for ४र्थी in such cases by the Vārtika. Hari **finds fault** with MN as, he asserts ४र्थी in '**द्विषां विघाताय**' &c. (Ki. I. 3), by 'तुमर्थाच्च' (2.3 15), for '**विघाताय' cannot be changed into 'विहन्तुम्' without changing the Vibhakti of द्विषाम्**' Vide **Śabdaratna** P. 533 and **Bhairavi** thereon. **प्रत्यासन्न** &c.—This prognosticates a bad omen. (Com. **किल**—Either in 'निश्चय', or in 'वार्त'–Surely the king is near, as the dusts are settling on the trees ; or it is reported etc. Cf. 'प्रत्यासन्नश्च मौहूर्तिकः'—PC. IV. 'प्रत्यासन्नोऽयं महाराज'—Ibid. *II*. **2. मृगया-विहारी**—(One fond of hunting)—मृग् (अन्वेषणे) + णिच् स्वार्थे + श भावे निपातनात्=**मृगया** by 'परिचर्या-परिसर्या-मृगया' &c.—(Vārt. 3. 3. 101). ताच्छील्ये णिनिः–(3. 2. 78). **पार्थिवः**– पृथिवी + अण् ('तस्य ईश्वरः-5. 1. 42.) **तथाहि**—(12n. 4). 3. **तुरग** &c.—तुरेण वेगेन गच्छति इति तुर + गम् + ड कर्तरि=तुरगः =Steed. 'अन्येभ्योऽपि दृश्यन्ते'—Vārt. (3. 2. 48).इति डः। **हतः** means 'निष्पिष्टः' =Struck up, and hence 'उत्थापितः'–Tossed up. From this it is inferred that the king is out a-hunting, Cf. 'विरक्तसन्ध्याकपिशं × × रजः पार्थिवमुज्जिहीते'—Ra. XIII. 64. **4. विटप-विषक्त**–विटप=Branch. '**शाखायां** पल्लवे स्तम्बे विस्तारे विटपोऽस्त्रियाम्' इति रभसः।'विषक्तः–Suspended. (षत्वं by 'उपसार्गात् सुनोति सुवति'–8.3.65.) Cf. 'निषक्त'—Ku. III. 7 ; 1. 10. **5. परिणतारुण**—&c.—Refers to रेणु (Mas. & Fem). It may also refer to **शलभ-समूह**—The flight of locust having the colour of the setting (Lit. bent down) sun. **6. द्रुमेषु**—द्रु Branch. 'द्रुम' =द्रु + म मत्वर्थे। '**द्युद्रुभ्यां मः**'–5. 2.

108). 'द्रुमस्तु पादपे पारिजाते किम्पुरुषेश्वरे'—*Haima.* 7. तीव्राऽऽघात-प्रतिहत &c.—तीव्रः आघातः—तीव्राघातः—A violent stroke,तेन प्रतिहतः—Struck back, as the frightened elephant came in violent collision through fear. तादृशः तरुस्कन्धः—A trunk of a tree so struck back, (**hence broken**). 'तस्मिन् लग्नः'—Stuck or fixed—सहसुपेति समासः। तादृशः एकः दन्तः यस्य—Having one of his tusks thrust into the trunk of a tree, which was struck back with a violent blow. 'एकं तरुस्कन्धमवस्कन्ध्य एकस्मिन् दन्ते निक्षिप्य आगच्छति'—Śaṅkara. The idea is—The elephant while rushing in hot haste through fear, collided violently with the trunk of a tree, *which was broken*, and adhered to the tusk, but such was the hurry that the tusker had no time to disentangle his tusk from it. R's 'स्कन्ध-लग्नैक-दन्तः'—means that his (*right*) tusk stuck fast on his (*right*) shoulder as he was running with his face turned (*to the right*, to see how far the chariot had come. To corroborate his explanation R quotes from पालकाप्य—'दक्षिणे वलितु शक्तो गजो वामे प्रयत्नतः' इति। But there is no reason to believe that the chariot was pursuing the elephant. R, of course, makes mention of our explanation given above taking the whole as one 'पद'। 8. क्रोडाकृष्ट-व्रतति &c.—वल्ली—Anything that entwines (Com.). आसक्त—Clinging, hence the whole means 'adhering coils of creepers'—Vide MN on 'उत्पलशेपचलैः'—*Ku. V.* 35. As the elephant was rushing, many creepers coiled and coiled round his **breast** like a noose (पाश) but he had no time to stop and disentangle his **bosom** (क्रोड) from those obstacles, owing to excessive fright and haste. क्रोडाकृष्ट is the **oldest reading**. In Ra. V. 46, we have a description of a wild **elephant dragging by his bosom the meshes** of moss (जालानि कर्षन् उरसा), so क्रोड **seems to be preferable.** Cf. 'कण्ठे कृत्वा शृङ्खलदाम कर्षन्'--Rat. II. 2. 9 मूर्तः—मुर्च्छ्+ अकर्मकत्वात् कर्त्तरि क्त., (3. 4. 72).–Incarnate.'च्छ'after 'र' is dropped by 'राद्-लोपः' (6. 4. 21) इट् is barred by'ओदितश्च'-(8. 2. 45). Thus we have मूर्+क्त and expect 'मूर्ण', but change of 'त into न (8. 2. 42), is

barred by 'न ध्या-ख्या-पॄ-मूर्च्छि-मदाम्'.(8.2.57). **10.** **'विघ्नः'**–is Masculine, while **'अविघ्न'** is Neuter. 'अविघ्नमस्तु ते'–*Ra.* 1.91 ; *XI.* 19. **11. भिन्नसारङ्ग** &c.—Having dispersed the herds of **deer**, or **strayed away** from the herds of **elephant** (Com.). **स्यन्दनाऽऽलोक-भीतः**—Implies that the tusker was a **wild** one and did not belong to the king's army. **12. धर्मारण्यं प्रविशति**–(Cf. 'अयं प्लवगः प्रविशति नृपतेर्मन्दिरम्'—Rat. II. 2). The tusker has not yet entered the penance-grove, so there is time yet for precaution. For rhetoric **fault** vide **Com.**

Remark :—The retinues of Bharata with horses and chariots, terrified the denizens of the forest in a similar way. Cf. 'वित्रासयन्ती मृग-पक्षि-संघान्'—Rām. II. 93. 40 ; 96. 8 ; *V.* 42. 16. Cf. also the *Elephant Episode in MK. II* and *Monkey Episode* in *Rat. II.* 2. The conversation between the king and the trio was becoming rather monotonous, being fraught with one sentiment of love. So the mixed feelings of fear and flurry (रसान्तर) are introduced by this episode.

Text :— **राजा** (आत्मगतम्)—**अहो धिक्, पौरा अस्मदन्वेषिण स्तपोवनम् उपरुन्धन्ति । भवतु । प्रतिगमिष्यामस्तावत् ।**

King (*Aside*)—O Fie, the citizens coming in quest of me are disturbing the penance-grove. Well, I will just go back.

सख्यौ—अज्ज इमिणा आरण्णअ-वुत्तन्तेण पज्जाउल म्ह । अणुजाणाहि णो उडअ-गमणस्स (आर्य, अनेन आरण्यक-वृत्तान्तेन[1] पर्याकुलाः स्मः । अनुजानीहि[2] नः उटज-गमनाय) ।

The friends—Revered Sir, we are greatly terrified by this report[1] of the wild (*elephant*)[1]. Allow[2] us, (*therefore*), to return to the cottage.

राजा (ससम्भ्रमम्)—**गच्छन्तु भवत्यः । वयमपि आश्रम-पीडा यथा न भविष्यति तथा प्रयतिष्यामहे ।** (सर्वे उत्तिष्ठन्ति) ।

King (*Distractedly*)—Go, noble (*ladies*). I, too, shall so arrange that no trouble will happen to the hermitage. (*All rise up*).

सख्यौ—अज्ज, असम्भाविदा-दिहि-सक्कारा भूयोवि पेक्खण-णिमित्तं लज्जेमो अज्जं विण्णविदुं (आर्य, असम्भाविताऽतिथि-सत्कारा:[1] भूयोऽपि प्रेक्षण-निमित्तं लज्जामहे आर्यं विज्ञापयितुम्) ।

The friends—Revered Sir, not[3] having rendered hospitality due to a guest (well)[3], we are ashamed to request (*the honour*) of a second visit from Your Worship.

V. L.—'पौरा:–'R. B. V. M. 'सैनिका:'–S. HS.–'ससम्भ्रमम्'–R.M.S. 'असम्भ्रमम्'—V 'सत्कारा:'—V.S. 'सत्कारं'—R. B. M.

राजेति। 'अहो' इति धिगर्थे (इति मेदिनी)। 'पौरा:' नागरिका:, अनुचरा:। 'उपरुन्धन्ति' पीड़यन्ति। **सख्याविति**। 'आरण्यकस्य' **गजस्य**। 'पर्याकुला:' भीता:। 'न:' अस्मान् उटेभ्य: जायते इति 'उटज:' पर्णशाला, तस्मिन् 'गमनम्' (सुप्सुपा), तस्मै (तादर्थ्ये ४र्थी) 'अनुजानीहि' अनुज्ञां देहि। **राजेति**। 'प्रयतिष्यामहे' चेष्टिष्यामहे। **सख्याविति**। 'न सम्भावित:' कृत: 'अतिथे:, सत्कार:' पूजनं याभि: तादृश्य: वयम् 'आर्यं भूयोऽपि' पुनरपि 'प्रेक्षण-निमित्तम्' अवलोकनार्थं 'विज्ञापयितुं' निवेदयितुं 'लज्जामहे'। पुनरागच्छेत् चेत् वयमतीव सन्तुष्टा भवाम इत्यर्थ: व्यङ्ग्य:।

52n.—1 धिक् पौरा: &c.—Not only soldiers but many city-people (पौरा:) also, such as Vidūṣaka, सारथि, यवनी ("अपनयन्तु भवत्य: मृगयावेषम्"—Act, II), 'वनग्राहिण:' etc. have accompanied the king in his hunting excursion. In the Mahā. I. 70. 40. even the **ministers** and **पुरोहित** came with the king. Further in Acts II & I, the king uses the term "अनुयात्रिकान्" and 'सैनिकान्',—"सर्वान् अनुयात्रिकान् (retinues) 'त्वयैव सह प्रस्थापयामि' । Note that पौरा: with धिक् takes १मा and not २या। For reasons vide (9n. 1). or say 'आत्मन: पीड़ायां न', here धिक् refers to his ownself. Cf.'किमाह सीता दश-वक्त्र-नीता हा राम, हा देवर, तात, मात:'—इति विदग्ध-मुखमण्डनम्। Also read—कथं "**धिङ्ग मूर्खं**" इति ? संबोधन-पदस्य क्रियान्वय इति धिक्-शब्दयोगाऽभावात् द्वितीया न प्रवर्तते इति "संबोधने च" प्रथमैव भवतीति। क्रियापदम् क्वचित् श्रुत क्वचिदाक्षिप्तम्। तथा च धिक् मूर्ख निषिद्धाचरणम् इत्येतदिह कल्प्यम्। मूर्ख-संबोध्यक-निषिद्धाचरणस्य निन्द्यतेति तु वाक्यार्थ:—*T* on 544; *Rām. III* 60. 35; *IV*. 25 40; *V*. 25 11..

2. **आरण्यक** &c—अर्यते गम्यते श्वापदैः इति ऋ+अन्य=अरण्यम्' (उ—398) अरण्ये भव इति अरण्य+वुञ्=आरण्यकः' by 'पथ्य्-अध्याय-न्याय-विहार-मनुष्य-हस्तिषु इति वाच्यम्'–Vārt. (4. 2. 129). Hence: '**आरण्यकः**' *मनुष्यः, हस्ती वा'—*SK*. ; *II.* 13. *Infra.* But always **आरण्यः** पशुः (अरण्य+ण by 'अरण्याद् णः', Vārt—4. 2. 104) ; '**आरण्यकः** पशुः,' however, may be justified by attaching स्वार्थे कन् after 'आरण्यः'—*Vide* (172*n*. 8). Thus M's '*by his* **'forest incident'** for '**आरण्यक-**वृत्तान्तेन' is **inaccurate.** **पर्याकुलाः** (terrified)—has a different meaning in *Śl.* 27. *Śupra.* **उटज-गमनाय**–For ४र्थी (51*n*. 1 ; 111*n*. 1). 3. **उत्तिष्ठन्ति**—As upward motion is implied hence Prmp. by 'उदोऽनूर्ध्वकर्मणि' (1. 3. 24). To Duṣyanta, duty is the foremost of all affairs, so he at once looks to the peace and tranquillity of the hermitage.—(15n. 1). **4. असम्भावित** &c.—The girls could not manage an adequate reception, thus they took the guilt on themselves, **indirectly making a strong appeal** to the king for a revisit. Cf.'अद्य या मम गोविन्द जाता त्वयि गृहागते। कालेनैषा भवेत् प्रीतिस्तवैवागमनात् पुनः'—KA. II. 276. 5. **विज्ञापयितुम्**—विज्ञापने —(31n. 3).

Text :— राजा—मा मैवम्। दर्शनेनैव भवतीनां पुरस्कृतोऽस्मि।

King—Nay, not so. I have been honoured by the very sight of Your Ladyships.

शकुन्तला—अणसूए, अहिणअ-कुस-सूइए परिक्खदं मे चलणं, कुरवअ-साहा-परिलग्गं च वक्कलं। दाव परिवालेध मं। जाव णं मोआवेमि (अनसूये, अभिनव-कुश-सूच्या[1] परिक्षतं[1] मे चरण, कुरवक-शाखा-परिलग्नं च वल्कलम्। तावत् प्रतिपालयतं[2] मां, यावदेनत् मोचयामि)।

(राजानमवलोकयन्ती सव्याजं विलम्ब्य सह सखीभ्यां निष्क्रान्ता)।

Śakuntalā—Anasūyā, my foot is pricked[1] (*deep*) by a new-grown blade of Kuśa-grass[1] and my bark-garment is entangled (*fast*) in a Kuravaka (*Amaranth*)—branch. Do wait[2] me till I disentangle it. (***This said, proceeds with her two friends, gazing at the king and delaying under some pretexts***).

V. L.—The speech of Śak. has been omitted by R & S.

राजेति। 'एव' इत्यवधारणे। ('एव औपम्ये परिभवे ईषदर्थेऽवधारणे' इति हैमः)। तत्र हेतुमाह दर्शनेनेत्यादि। 'पुरस्कृतः' पूजितः ('पुरस्कृतः पूजितेऽरात्यभियुक्तेऽग्रतः कृते'–इत्यमरः)। अतः अतिथिसत्कारः न कृतः एवं मा वादिष्ट। **शकुन्तलेति**। 'अभिनवा' अचिरोद्गता या 'कुशस्य सूचिः' शिखा अग्रभागः इति यावत् ('स्त्री सूचिः नृत्यभेदे च व्यधनी-शिखयोरपि' इति रत्नकोषः), तथा 'मे चरणम्' ('चरणोऽस्त्री बह्वृचादौ मूले गोत्रे पदेऽपि च। भ्रमणे भक्षणे चापि नपुंसक उदाहृत' इति मेदिनी)। 'परिक्षतं' सुतरां विद्धम्। 'कुरवकस्य' वृक्ष-विशेषस्य शाखायाम् उत्तरीय-भूतं 'वल्कलं' 'परिलग्नम्' असावधानतया सुतरां सक्तम्। अत. नाहं गन्तुं समर्था। अस्मात् 'यावत् एनत्' (२।८।३४) वल्कलं 'मोचयामि' शाखा-भ्रष्टं करोमि, 'तावत्' ततकालपर्यन्तम् 'मां प्रतिपालयतं' युवाम् अपेक्षेथाम्।

53n.—1. **पुरस्कृतः**—पुरस्-कृ+क्त कर्मणि। 'पुरोऽव्ययम्', (1. 4. 67). इति गतित्वम्। नमस्–पुरसो-र्गत्योः' (8. 3.40) इति सत्वम्।—Put in the van, (*Ra. II.* 80); therefore 'respected'. (*Com.*) **2.** **अनसूये &c.**—Mark that Śak. *requests Anasūyā and not Priyaṁvadā*, as she is in the habit of enjoying fun at the expense of the poor girl. (24n. Remark). **'परि'** is **emphatic** both in **'परि-**क्षतम्' and **'परि-**लग्नम्'—Read—(252n. 2); **कुश**—(165*n.* 5). **3.** **कुरवक**— '*a kind of Barleria with purple flowers and connected with sharp prickles*'–M. **कुरवक** is also correct. Cf. "किरातिके **कुरकुरवका**चिता चिताम्' इति वाणः। Also '**कुरवका रवका**.तरतां ययौ' इति रघुः (*IX.* 29.)—*Qtd. RM*; *MD.* 65 *RS*; . *VI.* 18; (193*n.* 5). **R has omitted this speech** of Śak. but we think it to be **genuine**, as it is referred to in the next Act. 'शाखासु वल्कलमसक्तमपि द्रुमाणाम्'—*II.* 12. *Also* (*n.* 4 before). **प्रतिपालयतम्** (Wait)—(187n. 4). **4.** **सव्याजं**—व्यजन्ति क्षिपन्ति अनेन इति वि -अज् घञ् करणे ('हलश्च–'3. 3. 121,)=व्याजः–Pretext–[घञ् is an आर्धधातुक प्रत्यय, still अज् is not changed to 'वि'by 'अजेर् व्य् अ-घञ्-अपोः'-(2. 4. 56)]. In *Vik. I.* in **similar circumstances** Urbaśī also tarries with **almost** the **same pretext** to see Pururavās. Read—'**उर्वशी**—अहो लताविटपे ऐकावली वैजयन्तिका मे लग्ना। (**सव्याजं परिवृत्य**। **राजानं**

पश्यन्ती) चित्रलेखे, मोचय तावदेनाम्' ।—for further corroboration read Śl. 2. Act. II. Infra. For similar incident read—'**कादम्बरी** तु तं दृष्ट्वा चिरयतीति महाश्वेतायाः' &c. *Kād.—P.* 733.

Text :—**राजा** (निश्वस्य)–'[1]**मन्दौत्सुक्योऽस्मि नगरगमनं प्रति । यावदनुयात्रिकान्**'[2] **समेत्य नातिदूरे तपोवनस्य निवेशयामि**'[3] । **न खलु शक्नोमि शकुन्तला-व्यापारात् आत्मानं निवर्तयितुम्** । **मम हि**—

आर्या **गच्छति पुरः शरीरं धावति पश्चादसंस्थितं**[4] **चेतः** ।
(12, 18 **चीनांशुकमिव केतोः प्रतिवातं**[5] **नीयमानस्य** ।।३१।।
12, 15) (निष्क्रान्ताः सर्वे) ।

King (*Sighing*)—I have been dull[1] in my eagerness[1] to return to the city. I will rejoin my followers[2] and encamp[3] them at no great distance from the penance-grove. In sooth, I cannot turn myself away from the affair (*regarding*) Śakuntalā. Onward (*slowly*) moves my body (*towards my retinues*), while backward runs (*fast*) the restless[4] mind (*towards Śakuntalā*) like the China silk-cloth of a banner borne against[5] the wind[5] (31). (*Exeunt Omnes.*)

प्रथमोऽङ्कः—The First Act.

V. L.—'नातिदूरे'—**R. S. M.** 'अतिदूरे' — **B.**—'नातिदूरेण'—**V.** 'शकुन्तलाव्यापारात्'—**R. V. M.**'शकुन्तला-दर्शन-व्यापारात्'—**B.** '**असंस्थितम्**' —**B. V. P. HS.**'असंस्तुतम्'——**R. M. S.**

राजेति । 'मन्दं' शिथिलम् 'औतसुक्यम्' उतसुकस्य भाव· उतकण्ठा इति यावत् ['गुणवचन-ब्राह्मणादिभ्यः कर्मणि च' (५।१।१२४) इति ष्यञ्] **यस्य** तादृशः । 'अनु' पश्चात् 'यात्रा' गमनम् अस्ति एषाम् इति 'अनुयात्रिकाः' अनुचरा इत्यर्थः । तान्, 'समेत्य' तैः सह मिलित्वा इति भावः, 'नातिदूरे' समीपे 'निवेशयामि" स्थापयामि ('दूरान्तिकार्थेभ्यः षष्ठी अन्यतरस्याम्' (२।३।३४), इति 'तपोवनस्य" इत्यत्र षष्ठी, पक्षे पञ्चमी) । 'खलु' इति निश्चये । **गच्छतीति** । 'प्रतिवातं' वातम् अभिलक्ष्यीकृत्य वात-सम्मुखम् इत्यर्थः ['लक्षणेनाभि-प्रती आभिमुख्ये' (२।१।१४) इति अव्ययीभावः] 'नीयमानस्य' न स्वयं गच्छतः मन्दौत्सुक्यत्वात् इत्यर्थः । 'केतोः इव' पताकाया इव 'मम हि शरीरं' देहः (अथच केतुपक्षे पताका-दण्डः) 'पुरः' अग्रे 'गच्छति' शनैः शनैरित्यर्थः 'चीनांशुकं' चीन-नाम-देश-जातं ('चीनो देशे-न-तन्तुषु । **व्रीहौ वस्त्रे**' इति हेमचन्द्रः) **क्षौमवस्त्रमिव** ('**अंशुकं चोत्तरीयञ्च दुकूलं क्षौममस्त्रियाम्**'

इति अमरमाला) 'असंस्थितं' चञ्चलं मम हि 'चेतः पश्चात्' शकुन्तलाभिमुखं (अथच केतुपक्षे विपरीत-दिश) 'धावति' वेगेन गच्छति (संबन्धेऽसंबन्ध-लक्षणा असंबन्धे संबन्ध-लक्षणा च द्व्यतिशयोक्तिः। वृत्त्यनुप्रास उपमा च। यदुक्तं चन्द्रालोके—"उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः" इति। इयमार्या) ॥३१॥

॥ इति गौतम-श्रीरमेन्द्रमोहन-वसु-विरचितायामभिज्ञान-शाकुन्तल-टीकायां कुमार-सन्तोषिण्यां प्रथमोऽङ्कः समाप्तः ॥

54n.—1. **नगरगमनं** &c.—नगाः (पर्वता इव प्रासादादयः) सन्ति अत्र इति नग+मत्वर्थे र ['नग-पांसु-पाण्डुभ्यश्च रः'—Vārt. 5. 2. 107.=नगरम्। Neuter by usage. "देवतायतनैश्चित्रैः प्रासादाऽऽपण-वेश्मभिः। **नगरं** दर्शयेत् विद्वान् राजमार्गैश्च शोभनैः—*Qtd. Raghunātha*. *T* quotes *HD*, who **objects** to the necessity of the Vārt.—'नग-शब्दोऽयम् अश्मादिषु पठ्यते इति "वुञ्छण्—(४।२।८०) आदि-सूत्रेण अस्य **सिद्धत्वात्** अस्मात् रोऽयं' **न वक्तव्यः**' i.e. we get मत्वर्थे 'र' after नग as it has been included in 'अश्मादि' class by the Sūtra "वुञ्-छण्-क-ठज्-इल-से-नि-र-&c"—(4. 2. 80). Hence by this Sūtra we have अश्मर, **नगर,** पामर, कन्दर and so on; thus the mention of **नग** in the Vārtika is **redundant.** **2.** **अनुयात्रिकान्—** अनुयात्रा (*pursuance*)+मत्वर्थे ठन्—अनुयात्रिकः—Factotum—तान्। **3.** **'नातिदूरे'—** (*Rām. II*. 99. 9; *IV*. 27. 11). From 'न अतिदूरे' we expected '**अनतिदूरे**' by 'तस्मात् नुड् अचि'–(6. 3. 74). But this 'न' is **different from** 'नञ्' though it possesses the **meaning** of नञ्, hence the Samāsa is **सुप्सुपा—**"नञर्थस्य न-शब्दस्य **सुप्सुपेति समासः**"—*MBh*; *MN on* (*Ki*. 1. 19). **"नैकधा"**—(*Rām. VI*. 79. 22; 35; 97. 15.) **इत्यादौ तु न-शब्देन सह सुप्सुपेति समासः**"—*SK*. 756. Optionally ०दूरम्० दूरेण, ०दूरात् by 'दूरान्तिकार्थेभ्यो द्वितीया च'—(2. 3. 35); also ०दूरे by 'सप्तम्यधिकरणे च'—(2. 3. 36). The king cannot help thinking of Śak., hence he is unwilling to encamp at a great distance, but wants to be **near** the hermitage. Thus 'नातिदूरे' is **better** than 'अतिदूरे'। Cf. also 'सेनापते, आश्रम-**सन्निकर्षे** स्थिताः स्मः' and Śl. II. 7. Infra. **निवेशयामि** नि+विश्+णिच् means 'to encamp'.–*Vide Ra. V*. 42; 49; *Rām. II*

98. 12–; 99. 1; 1 *IV*. 39. 44. (Now read 149n. 5.) 4. **धावति–सृ ('to move fast'**) is replaced by **'धौ'** by the rule 'पा-घ्रा-ध्मा-स्था-म्ना—&c.' —7. 3. 78. "**शीघ्र-गतौ** तु 'पाघ्राध्मे'—ति **धौरादेशः**"—(*SK*. 2382.) Also 'पत्तिर्धावति'। 'यमदूतोऽपि धावति'। **'धावति 'पश्चादसंस्थितं चेतः'**॥ 'अनतिवेगे सृ-धातो र्यथा 'तामनुसर सरसीरुहलोचन'। 'धनुषः प्रसरति बाणः' (स्वभावतः गच्छति।)। अन्यथा, 'गाण्डीवधन्वनो बाणा **अभिधावन्ति** शत्राघान्' —**Prabhā**. 5. **असंस्थितं**—R & M have **'असंस्तुतम्'**—**'not familiar'**, but in that case an **additional इव** is to be supplied after it and the sentence will mean, *my mind refuses to go with my body*, **as though** *it is not familiar with it*. But this would be going too far, and such an over-estimate mars the beauty of the poem. Hence असंस्थितम् (**Restless** *owing to wind, and due to anxiety about Śak.*) is **better**. Mark that this **very idea** has been taken by **Aśvaghosha** ('ततो निराशो विलपन् मुहुर्मुहु ययौ **शरीरेण** पुरं न **चेतसा**"—BC. VI.67) and also **Bhāravi** with **असंस्थितम्**–'स्वकेतुभिः **·असंस्थिता'-मादधिरे विभावसोर्विचित्र-**चीनांशुक**-चारुतां त्विषः'—*KI. XVI*. 58. 7. **चीनांशुक** &c.—(231n. 2). The poet mentions it in *Ku*..—'चीनांशुकैः कम्पित-केतु-मालम्'—*VII*. 3.In the *Śakti-saṅgama Tantra* and *Mahā*. the Chinas are mentioned among the *Dasyus* of the north and the east of India. Dr. Max Muller, evidently following the Jesuit M. Martini opines that the name 'China' was derived from the feudal state of **Ch'in (Tsin)** of which the most powerful (Emperor was *Shih Huang Ti* (221 B.C.)—**famous** for building the Great Wall of China and **notorious** for the wholesale destruction of the Confucian Classics. This theory has been objected to on the ground that to the Chinese, the **'Ch'ins'** were **usurpers** and their illegal rulership by force, was within a short period of 39 years replaced by the powerful **Hans**. It is however, on record that the state of Ch'in was a member of the Chinese confederation even in CHUN CH'IN period (722-481 B.C.), so if the Muller's derivation is accepted, it may clarify the use of चीन in the महाभारत, अर्थशास्त्र,

and other ancient SKT. Literatures. K. P. Jayswal, on the authority of Dr. Grierson (*Vide* 'Linguistic Survey of India'—Part IV, p. 5), opines that **CINA** is rather to be identified with SHINA—a Gilgit tribe. He points out that Skt. **चीन** is associated with दरद, **खश** and other north-western people, so it can hardly be identified with **China** which does not lie in that region. However, 'silken clothes' were at one time largely imported from China. *MM. VI.* 5 ; *AŚ.* 75 ; *JH. I. IV* ; *BK. X.* 60. **केतु** here means both the staff and the flag. For somewhat similar idea Cf. 'तां दूरमपि गच्छन्ती हृदयं मे अनुधावति। रश्मि हि रवि-विम्बस्य लम्बते पृथिवीमभि"—**Nigam-ānanda-Caritaṁ.** *Act. II*; 'तत कि करोमि गरीयसी गुरुराज्ञा प्रभवति देहमात्रकस्य हृदयेन तु हेमकूट-निवास-व्यसनिना लिखितं जन्मान्तर-सहस्रस्य दास्य-पत्रम्'—&c.—**Kād.** ***P.*** 807.

Time-analysis of Act I.—The play commences on the first week of the Summer season, (*Cf.* 'अचिर प्रवृत्तम्' * * ग्रीष्म-समयम्' —*Prologue*) and our king was perhaps out a-hunting by the end of spring. We say spring, because Duṣyanta's hunting excursion has a striking resemblance to that of Daśaratha, made in spring. (*Cf. Ra. IX.* 48, 49, 55, 59. Also Cf. 'दिवसाः परिणाम-रमणीयाः'—*Prologue.* 'सुखाः प्रदोषाः दिवसाश्च रम्याः। ** चारुतरं वसन्ते'— S. *VI.* 2. 'रम्य-प्रदोषा-समयः स्फुटचन्द्रहासः'।—*Ibid.* 35.) Besides, the mention of full-bloomed **नवमल्लिका** flower corroborates our conclusion, as it blooms in spring only. (*Cf.* 'बालातिमुक्तलतिकाम्'—RS. *VI.* 17. **नवमल्लिकाः**=माधवी=अतिमुक्तक=फलिनी ; 'पुष्पञ्च फुल्लं—**नवमल्लिकायाः**'—*Ibid.* 5. '**कुसुम-सम्भृतया नवमल्लिका**' &c.—*Ra IX.* 42. 'णवकुसुम-जोव्वणा वणजोसिणी—*Śak. I.* 'सहकारः फलिनी च' *etc.—Ra. VIII.* 61. *Śak. II.* 8.). Mark that '**नवमालिका**' is **a different flower (of Autumn)**. Its colour is **red** like that of **ककेलि** or **अशोक** flower. Cf. '**ककेलि-पुष्प-रुचिरा नवमालिकाश्च**'—*RS. III.* 18. *So* "**नवमल्लिका**" is preferable to

"नवमालिका" । Duşyanta in course of hunting, met the ascetics a little late in the morning, when they were going to collect faggots for the morning sacrifice. (*Cf.* 'समिदाहरणाय प्रस्थिता वयम्') । Some of them had perhaps already performed their morning ablution, as the paths to the reservoir were marked with water dripping from the fringes of the bark-garments. (*Cf.* 'तोयाधार-पथाश्च वल्कल-शिखा-निष्यन्द-रेखाङ्किताः') । Some again had commenced sacrifices, as the king was requested to see the rites personally. (Cf. 'तपोधनानां क्रियाः समवलोक्य' &c.) Hence the girls came to water the plants in the morning. (*Vide IV*. 9. *infra*.) The conversation of the trio continued till the rays of the sun caused them to sit under the shade of the Saptaparṇa tree. (*Cf.*'प्रच्छाय शीतलायां सप्तपर्ण-वेदिकायां *etc.*'). This was noon. The first act perhaps did not continue for more than three or four hours, since the bark-garments already found wet, were not fully dried up. (*Cf.* 'विटप-विषक्त-जलार्द्र-वल्कलेषु' &c.—*I*. 28.).

द्वितीयोऽङ्कः

Text—(ततः प्रविशति विषण्णो विदूषकः)

(Enter Vidūṣaka in a melancholy mood.)

(**विदूषकः** (निश्वस्य)—**भो दिट्ठं। एदस्स मअआ-सीलस्स रण्णो वअस्स-भावेण णिव्विण्णो म्हि** [भो दिष्टम्। एतस्य मृगया-शीलस्य राज्ञो वयस्य-भावेन[1] निर्विण्णोऽस्मि]। **अयं मओ, अयं वराहो, अयं सद्दूलोत्ति मज्झणे वि गिम्ह-विरल-पाअव-च्छाआसु वण-राईसु आहिण्डीअदि** (अयं मृगः, अयं वराहः, अयं शार्दुल इति मध्याह्ने अपि ग्रीष्म-विरल-पादप-च्छायासु वन-राजिषु आहिण्ड्यते[2])। **पत्त-संकर-कसाआइं कडुआइं गिरि-णई-जलाइं पीअन्ति** [पत्र-संकर-कषायाणि[3] [4]कटुकानि गिरि-नदी-जलानि पीयन्ते]। **अणिअद-वेलं सुल्ल-मंस-भूइट्ठो आहारो अण्हीअदि**] (अनियत-वेलं शूल्य-मांस-भूयिष्ठ आहारो भुज्यते)। **तुरगा-णुधावण-कण्डिद-सन्धिणो रत्तिम्मि वि मे णिकामं सइदव्वं णत्थि** [तुरगानुधावन—कण्डित-सन्धेः रात्रावपि मे निकामं शयितव्यं नास्ति]। **तदो महन्ते एव्व पच्चूसे दासीए-पुत्तेहिं सउणि-लुद्धएहिं वण-ग्गहण-कोलाहलेण पडिबोधिदो म्हि** (ततः महति एव प्रत्युषे दास्याः पुत्रैः शकुनि–लुब्धकैः वन-ग्रहण-कोलाहलेन प्रतिबोधितोऽस्मि)। **एत्तएण दाणिम्पि पीड़ा ण णिक्कमदि** (इयता इदानीमपि पीड़ा न निष्क्रामति)। **तदो गण्डस्स उवरि पिण्डओ संवुत्तो** (ततो गण्डस्य उपरि पिण्डकः[10] संवृत्तः)। **हिओ किल अम्हेसु ओहीणेसु तत्तहोदो मआणुसारेण अस्सम-पदं पविट्ठस्स तावस-कण्णआ सउन्दला णाम मम अधण्णदाए दंसिदा** [ह्यः किल अस्मासु अवहीनेषु तत्रभवतो मृगानुसारेण आश्रम-पदं प्रविष्टस्य तापस-कन्यका शकुन्तला नाम मम अधन्यतया[11] दर्शिता]। **संपदं णअर-गमणस्स मणं कहम्पि ण करेदि** [साम्प्रतं नगर-गमनाय मनः कथमपि न करोति)। **एव्वं चिन्तअन्तस्स मे पहादा अच्छिसु रअणी**) [एवं चिन्तयतः मे प्रभाता अक्ष्णोः रजनी] (**का गदी। जाव णं किदाचार-पड़िकम्मं पेक्खामि** [का गतिः। यावदेनं कृताचार-प्रतिकर्माणं[12] प्रेक्षे]। (परिक्रम्याऽवलोक्य च] **एसो बाणासण-हत्थाहिं जवणीहिं वण-पुप्फ-माला-धारिणीहिं पडिवुदो इदो एव्व आअच्छदि पिअ-वअस्सो** [एष बाणासन-हस्ताभिः यवनीभिः

वन-पुष्प-माला-धारिणीभिः परिवृत इत एव आगच्छति प्रिय-वयस्यः) ॥ होदु । अङ्ग-भङ्ग-विअलो विअ भविअ चिट्ठिस्सं जइ एव्वम्पि णाम विस्समं लहेअं (भवतु, अङ्ग-भङ्ग-विकल इव भूत्वा स्थास्यामि, यदि एवमपि नाम विश्रमं लभेय)। (इति दण्डकाष्ठमवलम्ब्य स्थितः) ।

Vidūṣaka (*Sighing*)—O (*my evil*) luck. I am 'worn out by' the companionship' of this sport-loving king. "Here's a deer". "There's a hog", "Yonder's a tiger", in this way we have to roam[2] even in the noon-tide through long forest-tracts, with summer-thinned tree-shades. The waters of the mountain rivulets, [3]brown owing to the admixture of leaves,[3] (*and hence*) bitter[4], are drunk. Meals, [5]mostly (*comprised*) of spit-roast meats[6], are swallowed at irregular hours. With[6] my joints all bruised[6] by pursuing (*the king*) on horse-back, there is not sufficient[7] sleep even at night. Then I am awakened, even at the earliest dawn, by the rascally[8] bird-catchers, with their (*wild*) halloo of taking a forest. With all these, even now my troubles do not come to an end. A (*fresh*) boil[10] has formed on the top of the abscess[9]. Indeed yesterday when we were lagging behind, His Majesty entering the region of the hermitage in pursuit of a deer, was shown by[11] my ill luck,[11] the hermit's little daughter named Śakuntalā. Now (*he*) does not think of returning to the city at all. Even as I was musing thus, night passed away (*and*) the dawn broke upon my eyes. What is to be done ? I will just see him when[12] he has finished his usual (*morning*) duties and decorations.[12] (*Turning and looking about*) Here is coming, my dear friend, in this very direction, surrounded by bow-handed Yavana girls, wearing wreathes of wild flowers. Very well, pretending to be palsy-crippled I will stand (*here*), if even thus I may get (*some*) respite.

(*This said, stands leaning on his wooden staff*).

V. L.—.'विष्टम्'-B.M. 'दृष्टम्'-R. V.'वृक्षम्'—S.'अटवीतोऽटवीम्)'—S. M. 'अटवीतोऽटवी' —B. R. V ; G omits it. 'कटुकानि'-R. V. M. B. 'कषुष्णानि'—S. R.'s Com. 'एवमेव चिन्तयतः मे प्रभाता अक्ष्णोः रजनी'—B.P. Ryder. 'अद्यापि तस्य तामेव चिन्तयन्तः अक्ष्णोः प्रभातमासीत्'—R. V. M. S. 'शकुनि'–B.R.V.M. 'श्वगणि'-A. 'श्वगण'-S. 'पिण्डकः'-.R.B.V. 'पिण्डिका' –M. 'पिटक'—S 'नगर-गमनाय मनः कथमपि'–R.B.M.V. "नगरगमनस्य

कथामपि'–S. 'कृताचारपरिकर्माणम्'–M.'कृताचारप्रतिकर्माणम्'–S. 'कृताचार-परिक्रमम्'—R V. 'कृतदारपरिग्रहम्'—B. 'कृताचारपरिग्रहम्'—HS.

तत इति। [विदूषक-लक्षणं तु सुधाकरे—"विकृताऽङ्ग-वचो-वेषैः हास्यकारी **विदूषकः**"। 'वयस्यक श्चाटुवटुः स एव च **विदूषकः**। अन्तःपुरचारी राज्ञां नर्मोऽमात्यःप्रकीर्तितः'॥ इति सागरोऽपि तल्लक्षणं जगाद]। [अस्य प्राकृतम् पाठ्यम्। तथा चोक्तं—'**विदूषक**-विटादीनां पाठ्यं तु **प्राकृतं** भवेत्' इति)। 'विषण्णः'-खिन्न इव प्रतीयमानः। विषण्णत्वे हेतुर्वक्ष्यमाणः। (सदिरप्रतेः'–८।३।६६ इति षत्वम्)। **विदूषक इति**। 'भो' इति विषादं सूचयति ('भोस्तु संबोधन-विषादयोः' इति मेदिनी) 'दिष्टं' दुर्भाग्यम्। एतेन स्व-भाग्यं विदूषकेण निन्द्यते। 'मृगया-शीलस्य' (३।३।१०) आखेट-समासक्तस्य। वयसा तुल्यः इति वयस्यः (यत्–४।४।९१ ; 'वयस्यः स्निग्धः सवयाः' इत्यमरः), तस्य भावः, तेन, सखित्वेन सोहार्देन इति यावत्। 'निर्विण्णः' अत्यर्थं क्लेशितः। 'ग्रीष्मेण' आतपेन 'विरला' पत्राणां पतनेन स्वल्पा 'पादपस्य छाया' अनातपः यासु, तादृशीषु 'वनानां राजिषु श्रेणीषु ['वीथ्यालि-रावलि-पंक्ति-श्रेणी-लेखास्तु राजयः' इत्यमरः]। 'आहिण्डयते' भ्रम्यते। (हिडि गत्य-नादरयोः इति गतार्थत्वात् भावे लट्)। 'पत्राणां' वृक्षेभ्यः गलितानां पर्णानां 'सङ्करेण' व्यतिकरेण मिश्रणेन इति यावत्। 'कषायाणि' आलोहितानि ('**कषायो** रसभेदे स्यादङ्गरागे विलेपने। निर्यासे च कषायोऽथ सुरभौ लोहितेऽन्यवत्' इति विश्वः)। अतएव 'कटुकानि' विस्वादानि 'गिरि-नदीनां' गिरि-प्रस्रवणानां 'जलानि पीयन्ते'। 'शूल्यं' शूले संस्कृतं ('शूलाकृतं भटित्रं च शूल्यम्' इत्यमरः। 'कावाव्' इति पारस्य-भाषा)। यत् 'मास' तेन 'भूयिष्ठः' बहुलः 'आहारः' ओदनः, 'अनियता' अनिर्धारिता 'वेला' समयः ('वेला काले च सीमायाम्' इति मेदिनी) यस्मिन् कर्मणि तत् यथा स्यात् तथा अर्थात् कदाचित् मध्याह्ने, कदाचित् वा सायाह्ने, कदाचिद्वा पूर्वाह्णे 'भुज्यते'। अनेन चिराभ्यस्त-भोजनाऽभावात् महादुःखं सूचितम्। 'तुरगेण' अश्वेन यत् अनुधावनं' राज्ञः पश्चाद्गमनं, तेन 'कण्डिताः' कुट्टिताः जातव्यथा इति यावत्, 'सन्धयः' प्रत्यङ्ग-संयोग-स्थलानि यस्य तादृशस्य 'मे' ('कृत्यानां कर्तरि–वा' २।३।७१ इति षष्ठी)। 'रात्रावपि' न तु दिवैव केवलं 'निकामं' पर्याप्तं ('कामं प्रकामं पर्याप्तं निकामेष्टं यथेप्सितम्' इत्यमरः) 'शयितव्यं' शयनं ('कृदभिहितो भावो द्रव्यवत् प्रकाशते' इति न्यायात्) 'नास्ति'। 'दास्याःपुत्रैः' तस्य उद्वेग-दायित्वात् गालि-प्रदानमेतत्। निन्दार्हैः इत्यर्थः ('पुत्रेऽन्यतरस्याम्'–(६।३।२३) इति कुत्सायां षष्ठ्या अलुग्भावः पाक्षिकः)। 'शकुनयः' तित्तिर-कुक्कुट-प्रभृति-पक्षिणः', येषाम् उच्चैः उड्डयने सामर्थ्यं नास्ति तेषां, न तु अस्मादृशः सिंह-व्याघ्र-प्रभृति-वृहज्जन्तूनां 'लुब्धकाः' घातकाः व्याधा, स्तैः।

(अतो 'वनग्रहणे पक्षिणां घातका ये जनास्तेषां क उपयोग इति निपुणं निरूप्यापि न निर्णीतम्, तत् कोलाहलश्च पक्षिणामुत्पतन-हेतुः, अतः पक्षिमृगयार्थं कोलाहलस्य नोपयोग इत्याशंका परास्ता') 'वनग्रहणस्य' वन-रोधनस्य 'कोलाहलः' रवः ('कल-कलः कोलाहलस्तुमुलोः व्याकुलो रव' इति हलायुधः)। तेन 'प्रतिबोधितो' जागरितः। अतो नृपस्य मैत्री विदूषकस्य पान-भोजन-शयन-विहरणादिषु कुत्रापि न सुखकरी। 'इदानीम्' इति वाक्य-भूषायाम् 'इयता अपि' एतत् परिमाण क्लशं दत्वा अपि पीड़ा 'न निष्क्रामति' नाऽपगच्छति। 'गण्डस्य' स्फोटकस्य 'उपरि पिण्डकः' नितान्तपीड़ाकरः विस्फोटकः 'संवृत्तः' जातः, एकस्मिन् व्यसने व्यसनान्तरम् उपस्थितम् इति हृदयम्। तदेव स्पष्टयति। 'ह्यः' पूर्वस्मिन् दिवसे 'अस्मासु अवहीनेषु' राज्ञः अतिवेगेन गमनात् तस्य पश्चात् स्थितेषु 'मृगानु-सारेण' मृगमनुसृत्य इत्यर्थः ('प्रकृत्यादिभ्यश्चोपसंख्यानम्' इति ३या) 'आश्रम-पदं' तपोवन-भूमिं 'प्रविष्टस्य तत्रभवतो' दुष्यन्तस्य (विवक्षया चतुर्थीस्थाने षष्ठी) 'मम अधन्यतया' दुर्भाग्येन कर्त्रा 'दर्शिता'। 'साम्प्रतम्' शकुन्तलां संवीक्ष्य 'कथमपि' महता प्रयत्नेनाऽपि 'नगरगमनस्य' नगरगमनाय ('चतुर्थ्या षष्ठी' इति प्राकृते चतुर्थीस्थाने षष्ठी) 'मनो न करोति' सर्वथैव अनिच्छुक इत्यर्थः। 'एवमेव' अनेन प्रकारेण 'चिन्तयतः' स्वकीय-दुरदृष्ट विभावयतः 'मे अक्ष्णोः मिषतोः एव नयनयोः ('यस्य च भावेन भावलक्षणम्' (२।३।३७), यद्वा 'षष्ठी चानादरे' (२।३।३८) इति सप्तमी)। 'का गतिः' क उपायः ("गतिः स्त्री मार्ग-दशयोर्ज्ञाने यात्राभ्युपाययो" रिति मेदिनी) स्व-दुरदृष्ट-परिहरणे असमर्था वयमित्यर्थः। 'कृतं' सम्पादितम् 'आचारः' प्रातःकृत्यादि 'प्रतिकर्म च' प्रसाधनञ्च ('प्रतिकर्म प्रसाधनम्' इति मल्लिनाथधृतश्चामरः) येन तथाविधम्। 'वनपुष्पाणा माला' स्रजः 'धारयन्ति' याः ताभिः, 'वाणाः' शरा अस्यन्ते क्षिप्यन्ते अनेन इति 'वाणासनं धनुः हस्ते यासां ताभिः ("प्रहरणार्थेभ्यः परे निष्ठा-सप्तम्यौ"—वाः (२।२।३७) इति हस्त-शब्दस्य परनिपातः) 'यवनीभिः शस्त्र-धारिणीभिः पारसीक-रमणीभिः 'परिवृतः' संवेष्टितः सन्। अत्र यवन्यो नाम सचारिका-पर्यायः (तल्लक्षणं यथा मातृगुप्ताचार्य रुक्तम्—'गृह-कक्षा-विचारिण्यस्तथोपवन-सचरा। यामेषु च नियुक्ताना याम-शुद्धि-विशारदाः। सचारिकास्तु ता ज्ञेया यवन्योऽपि-मनाः क्वचित्"—अपिच "किराती चामरधरा यवनी शस्त्रधारिणी" इति शब्दा-र्णवः)। 'भवतु' आगच्छतु स इत्याशयः। 'अङ्गाना भङ्गेण' रुग्विशेषेण कौटिल्य-करणेन ('भङ्गस्तरङ्गे भेदे च रुग्विशेषे पराजये। कौटिल्ये भयावा ऽच्छन्य! इति हैमः) ('विकलः' जड़ 'इव भूत्वा स्थास्यामि'। एव देहस्य वैकल्याभिनयेन 'विश्रमं' (७।३।३४) 'लभेय' प्राप्नुया (सभावनाया लिङ्)।

55n.—1. विदूषक: &c.—Vidūṣaka is the humorist and confidant of the hero (*generally of the king*). His chief duty is to excite laughter, by his crooked form, quaint dresses and repartees of wit and to help the hero in his love-intrigues. He is a confessed votary to the pleasures of the table (MK. IV. after Śl. 27) and has access to the seraglio. As he has full liberty of speech, his presence enlivens the dull monotony of amour of the last act. According to K he acts the विष्कम्भक or अधम-प्रवेशक (82*n*-11) by alluding to what happened in the interval of the Acts. **विषण्ण:**—Dejected-(Sk.2271-Com.) **2. विष्टम्**–The jester is bewailing his own ill-luck as he is to follow the king in-season and out-season. *R* has 'दृष्टम्'–Have you seen my miseries ? Cf. "देख्ले, देख्ले, वांदीवेंटीर् आक्केल्टा देख्ले"?—भ्रमर, but the former seems to be better. **भो:**—implies विषाद (Com.). **3. वयस्य** &c.—वयसा तुल्य: इति वयस्+यत्= वयस्य: ('नौ-वयो-धर्म—&c. 4.4.91.) तस्य भाव:—तेन, हेतौ ३या—(by the companionship.) **4. निर्विण्ण:**–निर्+विद्+क्त कर्तरि; 'निर्विण्णस्य उपसंख्यानम्'—8.4 30–इति णत्वम्, (द=न)–Disgusted–(because king's companionship resulted in lot of troubles) Cf. 'मदनिका—अतिनिर्विण्णमार्येण &c.—MR. Act. *II*. **5. मध्याह्ने**—'अह्न: मध्यम् इति "संख्या-वि-साय-पूर्वस्य अह्नस्य अहन् अन्यतरस्याम् ङौ" (६।३।११०) इति ज्ञापकात् एकदेशि-समास:'—*BhD*. That is, the rule of एकदेशिसमास (viz., 'पूर्वाऽपराधरोत्तरमेकदेशिना' &c.—2. 2. 1). **does not include मध्य**, so the form expected here is 'अह्नमध्यम्' by षष्ठीसमास। But in the Sūtra (6. 3. 110) mentioned above, Pāṇini **himself mentions 'सायाह्न:'** though 'साय' is not included in the Sūtra. Hence BD says— 'सर्वोऽप्येकदेश: अह्ना समस्यते'। सङ्ख्या-विसायेति ज्ञापकात्" (712). अहन्='अह्न' by 'अह्नोऽह्न एतेभ्य:' (5. 4. 88). Next by 'रात्राह्नाहा: पुंसि'(2. 4. 20) मध्याह्न: is masculine. **6. ग्रीष्म-विरल** &c. -ग्रीष्मेण विरला—ग्रीष्मविरला, सुप्सुपेति-समास:। 'पादपस्य छाया इति **पादप-च्छाया,** or **पादप-च्छायम्** ('विभाषा सेना सुरा-छाया शाला-निशानाम्'–2.4.25.)। ग्रीष्मविरला (or ग्रीष्मविरल) पादप-च्छाया (or पादपच्छायम्) यासु। Mark that elsewhere Kāli, speaks of the shade of trees being *thick*—'**प्रच्छाय** सुलभ-निद्रा दिवसा: परिणाम-

रमणीयाः'—*Supra*. 7. **अटवीतः अटवी**—(R. V.) after 'वनराजिषु' seems to **be redundant**, for, that they were wandering from forest to forest, can be inferred from वन-राजि which includes several अटवीs. **8. पत्र-संकर-कषायाणि** &c.—संकर (३।३।५७)—Intermixture 'संकरोऽग्नि-चटत्कारे क्षिप्त-धूल्याधिकेषु च । सम्मार्जन्यां विरूढानाम् एकाधिकरण-स्थितौ' इति शब्दाब्धिः । Water was कषाय *i.e.* **brown** (Cf. 'कषायस्तनी'—*Ku. IV*. 34) owing to the admixture of fallen leaves. **कषाय** may mean '*having acrid taste*.Cf. 'यो वक्त्रं परिशोषयति, जिह्वां स्तम्भयति, कण्ठं बध्नाति, हृदयं कर्षति पीड़यति स **कषायः**'—Ss, but then 'कटुकानि' becomes superfluous. With the reading **कदूष्णानि** (*luke warm*), **कषाय** may be explained as 'astringent'. 'कषायाणि कटुकानि'—*Ram. I*; 12. 97. Now read 'पत्र-संकराऽसुरभीकृताऽशिशिर-पंकिल-विवर्णास्वाद-जलैः' &c.—Kād. P. 811. **9. गिरिनदी**&c.—गिरिसम्भवा नदी गिरिनदी or **गिरिणदी** (शाकपार्थिवादिः)—A mountain rivulet–तासाम् । **'ण'** is **optional** by 'गिरिनद्यादीनां वा'—(Vārt. 8.4.10). **10. अनियत-वेलं** &c.–नि+यम+क्त कर्मणि=नियता, (6.4.37=म-लोपः)—Restrained, settled ; न नियता=अनियता–Unsettled, irregular. (*Now Com.*) **11. शूल्य** &c.—शूले संस्कृतम् इति शूल+यत्=शूल्यम्-('शूलोखाद् यत्' 4.2.17.)—Roasted on spits. It is prepared thus–'कालखण्डानि मांसानि ग्रथितानि शलाकया । घृतं सलवणं दत्त्वा निर्धूमे दहने पचेत् । तत् तु **शूल्यम् इति प्रोक्तं** पाक-कर्म-विचक्षणैः' । It was much relished in old times. Read 'शूल्यं पलं सुधातुल्यं रुच्यं वह्निकरं लघु । कफ-वातहरं वृष्यं किञ्चित् पित्तकरं तु तत्'–*BhP*. **भूयिष्ठः**—(3n. 2). **12. अण्होअदि**=भुज्यते । 'भुजो-भुञ्ज-जिम-जेम-कम्माऽण्ह-समाणा'–इति **अण्हादेशः** । Note that the **Brahmins freely partook of meat in old times.** "मांसानि च सुमेध्यानि भक्ष्यन्ता येन यदिच्छति"–Rām. II. 91. 52. **13. तुरगाऽनुधावन**&c.–'कण्डित' means dislocated. The jester was not an expert rider like the king, so it was quite natural that he would feel pain on his body by *the jerking*, as he tried to keep pace with the king—(5ln. 3.) **निकामं**—To full satisfaction. **14. प्रत्यूषे**–प्रत्यूषति रुजति कामुकान् प्रति+ऊष् (रुजायाम्)+कः ('इगुपधा'—3. 1. 135)=प्रत्यूषः (*Mas.*)–Dawn is so called (*as it troubles the lovers by putting an end to the their enjoyment*—BhD. Cf. Ra. XIX. 29.) प्रत्युषः (*Mas.*) is sanctioned by *Mathu-*

reśa.—Also प्रत्युषस् (*Neu.*), and प्रत्यूषस् are correct. **15. दास्याः-पुत्रैः**—षष्ठी **is optionally** dropped giving the form **दासीपुत्रैः** (Com.) **It is** merely an **epithet of contempt**—(Rascal). Cf. "Rascal counters"—**Julius Caesar.** IV. 3. But 'स्वरूपाख्याने तु **दासी-पुत्र** एव' *i.e.* the son of a female slave. This expression is very common in MK and Bhāsa dramas. 'दास्या दुहिता'–*Māla III* ; *Ram. II.* 99. 3. **शकुनि-लुब्धकैः**–Used contemptuously(Com.); S&A's **श्वगणि(ण)-लुब्धकः** —(By hunters with dogs) has a parallel in "श्वगणि-वागुरिकैः प्रथमा-स्थितं" &c.—*Ra.* IX. 53 ; but this does not **signify contempt.** (Vide note 15). **16.–वन-ग्रहण** &c.–वन-ग्रहण (वनगमन–HS) is a technical term of hunting. The hunters surround the forest, obstruct all the passages of egress and then they shout and fling stones or send the hunting curs. Vidūṣaka has to pass all the day on horseback and even before the last part of the night, he can't have a wink of sleep on account of pain in his joints. But even when he has but a short nap, he is roused by the rumpus of the rascally bird-catchers. Thus he gets no pleasure in eating (आहार), drinking (पान), sporting (विहार) and sleeping (शयन) । Surely he is to be pitied. **17. गण्डस्य उपरि** &c.—**गण्ड**=Hard boil—"**गण्ड**: स्यात् पुंसि खड्गिनि । ग्रहयोग-प्रभेदे च वीथ्यङ्गे **पिटकेपि** च" इति मेदिनी । **पिण्डक**= Pustule. (Cf. 'गोदेर् उपर् विष्फोट—*Bengali Proverb*) meaning, "one woe succeeding another," "misery added to misery." 'मर्मस्थान-व्रणस्योपरि व्रणान्तरम्'—*Dhundhirāja. Cf.* "राक्षसः—अयमपरो गण्डस्य उपरि स्फोटः"—*MR. V.* 'तावदेषोऽपरो गण्डस्योपरि पिण्डकः संवृत्तः'—*Vidha-Śālabhañjikā.* "This day I will rise or else **I'll add ill to ill"**—**Pericles.** *II.* 1. **18. अवहीनेषु**—अव+ हा (त्यागे परस्मैपदी, 2597)+ क्त कर्मणि =अवहीनाः–Lagged behind,तेषु, भावे सप्तमी । **19. अधन्यतया**– धनं लब्धा इति धन+यत् ("धनगणं लब्धा"–4. 4. 84. **धन्यः**—Fortunate तस्य भावः=धन्यता—Fortune, hence अधन्यता=दुर्भाग्यम्—Misfortune, अधन्यता शकुन्तलां दर्शयति' (*Active*)–'अधन्यतया शकुन्तला दर्शिता'(*Passive*). This line also supports the reading "भो दिष्टम्" । **कन्यका**–(22n. 1). **प्रभाता रजनी**—Cf. 'यदा च मे निश्वसतो गता निशा–MK. V. 37 ;

'इत्येतानि चान्यानि मनोरथ-शतानि **चिन्तयतोऽन्तः प्रयान्ति रजन्यः**'—*Kād P.* 251. 'तामेव च—चेतसा चिन्तयतो जाग्रत एवास्य सा जगाम रात्रिः' —*Ibid. P.* 767. **20. कृताचार-प्रतिकर्माणं**—आचार—Performances of religious duties; here, of course, the reference is to the morning duties—'उत्थाय पश्चिमे यामे कृतशौचः समाहितः। हुताग्नि र्ब्राह्मणांश्चार्च्य प्रविशेत् स शुभां सभाम्' ॥—*MS. VII.* 145. **प्रतिकर्म**—Decoration of the body. Cf. 'तस्या शरीरे प्रतिकर्म चक्रुः'–Ku. VII, 6. 'प्रतिकर्म' is very common in Rām. VI. 128, 15, 16. **21. बाणासन** &c.—बाण+अस्+ ल्युट् करणे]-'करणाऽधिकरणयोश्च'–3.3.117.]—बाणासनम्=A bow, or say बाणानाम् आसनम्। Next बहु (Com). **22. वन-पुष्प-माला** &c.–Evidently the garlands were made of (*wild*) flowers· वनजानि पुष्पाणि—वन-पुष्पाणि। **Beware of the term मध्यम-पदलोपी समासः**-(37n. 6) which is wrong. Mark that our poet does not say **'वन-माला'** which is a quite **different thing**. Cf. "आपाद-पद्मं या माला **वनमालेति** सा मता"—Kalinga "आजानु-लम्बिनी माला सर्वर्तुकुसुमोज्ज्वला। मध्ये स्थूल-कदम्बा-ढ्या **वनमालेति** तत् स्मृता"—*Śabdamālā*. **23. यवनीभिः**—There are two feminine forms of यवन viz. (*i*) **यवनी** (यवनस्य पत्नी)। (*ii*) **यवनानी** (यवनानां लिपिः। 'यवनाद् लिप्याम्'—*Vārt.* 4. 1 49.) In old times Yavana women were employed as attendants to the kings. (Act. VI. Infra). These must be **Persian girls**, as Kāli. (*in Ra. V.* 60 & 61.) has described **Persian woman as Yavanī** Cf. **'पारसीकांस्ततोजेतु'** * * * **यवनी मुखपद्मानां'** ॥ Almost every Orientalist, from the time of *Sir William Jones*, to that of *Dr. Muller*, says that **यवन** exclusively means *the Greek*. But it was the **custom of the Yavanas to get their heads wholly shaved.** Cf. 'यवनाना शिर. सर्व, काम्बोजानां तथैवच। पारदा मुक्त-केशाश्च, पह्लवाः श्मश्रु-धारिणः ॥ This, the national custom of the Greeks, could never sanction ; for when *Demosthenes* got his head shaved, he sought to conceal himself in a cell, in order that he might not appear in the public. In fact like the '*Bactrian*' of the Greeks and the Romans, 'Yavana' was a very **elastic** term with the Hindus who applied it to the *various foreigners*, who from

time to time invaded India *i.e.* the *Persian, Greeks, Bactrians, Scythians*, &c. Mr. Balfour has rightly observed (*Encyclopaedia of India*)—"Doubtlessly Yavana is a term **not exclusively applied** to the Greeks". (*Vide also Indo-Aryan'-Vol. II. P.* 166 *et. seq.*) But **Kāli. has nowhere used यवन to mean the Greeks** So the theory that Kāli, is indebted to **Pelecritus** story of the (Greek) for the **ring episode** (*Vide Journal of Behar and Orissa Vol. VII. pp.* 97.) may be summarily rejected.

Text:—(ततः प्रविशयि यथानिर्दिष्ट-परिवारो[१] राजा) । **राजा** (आत्मगतम्)—

आर्या (12, 18 12, 15)

कामं[२] प्रिया न सुलभा[३] मनस्तु तद्भाव-दर्शनाऽऽश्वासि[४] ।
अकृतार्थेऽपि[५] मनसिजे[६] रतिमुभय-प्रार्थना[७] कुरुते ॥१॥

(स्मितं कृत्वा) **एवमाऽऽत्माऽभिप्राय-सम्भावि-ते-ष्ट-जन-चित्त-वृत्तिः प्रार्थयिता विडम्ब्यते ।**

(*Enter the king attended[1] by retinues as described[1]*).

King (*Aside*)—Granted[2] that my beloved is not to be easily[3] obtained[3], yet my mind feels[4] comforted by beholding her indications of love[4]. Even when love[6] has[5] not yet achieved its object[5], reciprocity[7] of solicitations[7] gives delight. (1)

(*Smiling*) Thus does the suitor judging the state of feeling of his beloved one by his own desire, delude himself.

V. L.—'दर्शनाश्वासि'—B. M. D. S. HS. 'दर्शनायासि'—R. V. G.

तत इति । निर्दिष्टम् अनतिक्रम्य इति 'यथा-निर्दिष्टम्' (अव्ययीभावः) 'यथानिर्दिष्टं परिवारः' (६।३।१२२) सेवकवर्गः यस्य तादृशः । मृगयावेष-धारिणीभिः यवनीभिः परिवृतः इत्यर्थः ।

काममिति । 'प्रिया' शकुतन्ला 'न सुलभा' अनायास-लभ्या 'कामम्' एतत् तु मया अनुमन्तव्यम् ('अकामानुमतौ कामम् असूयोपगमेऽपि च' इति रुद्रः) । तर्हि सुदुर्लभे वस्तुनि यत्नेनालम् इत्याशङ्कां निराकर्तुमाह **मम इति ।** 'तु' इति आशङ्कोच्छेदे । मम 'मनः' 'तस्याः' शकुन्तलायाः 'भाव-दर्शनेन' गमन-वेलायाम् असकृत् मदभिमुखम-वलोकनादि-रूपम् अनुराग-लक्षणम् दृष्ट्वा **'आश्वासि' आश्वस्तं भवति ।** **तत्प्राप्ति-सम्भवना-जनितम् कञ्चिदानन्दमनु-**

भवति इति भावः। तद्धेतुम् आह। 'मनसिजे' कामे ('सप्तम्यां जने डः' (३।२।९६),-'तत्पुरुषे कृति बहुलम्'-(६।३।१५) इति सप्तम्या अलुक्) 'अकृतार्थे अपि' असिद्धे अपि अर्थात् शकुन्तला-प्राप्ति-साभावनायाम-सत्याम् अपि, 'उभयो.' परस्परस्य 'प्रार्थना' अन्योन्याऽभिलाषः, तस्या मद्विषयिणी, मम च तद्विषयिका इत्याशयः। 'रतिं कुरुते' प्रीतिम् उत्पादयति। अत्र **अर्थान्तरन्यासालंकारः। अप्रस्तुतप्रशंसा** च। तयोरेका-श्रया-नुप्रवेशरूपः **सङ्करः**। अपि च कामाऽच-रितार्थायां रत्युत्पादनम् इत्यापाततो विरुद्धतया भाषमाणत्वात् **विरोधालंकारः**। सुरतार्थतया विरोधः। अनुरागार्थतया परिहार--इति न्यायपञ्चाननपादाः। 'रतिः कामस्त्रियां **रागे सुरतेऽपि रतिः** स्मृता' इति धरणिदासः। **श्रुत्यनु-प्रासश्च। आर्या जातिः**) ॥१॥ **स्मितं कृत्वा**। ईषत् हसित्वा ('स मनाक् स्मितम्' इत्यमरः)। अलीकेऽपि सत्यबुद्धिः कामिनामिति भावः। तदेव विशदयति **एवमिति**। 'एवम्' अनेन प्रकारेण 'आत्मनः' स्वस्य 'अभिप्रायेण' अभिलाषाऽनु-सारेण 'सम्भाविता' अनुमिता 'इष्ट-जनस्य' दयित-जनस्य 'चित्त-वृत्तिः'; येन तथाविधः 'प्रार्थयिता' कामी 'विडम्ब्यते' (इति कर्मकर्तरि) उपहासास्पदं भवति इत्यर्थः। (विशेषे प्रस्तुते सामान्योक्तेः **अप्रस्तुतप्रशंसा**)।

56n.—1. **मनस्तु** &c.— तु =Notwithstanding. Śak. is not easily obtainable (Cf. 'धर्म-चरणेऽपि परवशोऽयं जनः'—*Supra*), I admit this against my wish (कामम्) and this knowledge should have produced uneasiness and despondence. Yet there is reason to hope. **कामम्**—Conveys an idea of some hesitation to admit that Śak. is not (**सुलभा**) easily obtainable. ("**काममतिस्वाच्छन्द्ये** अनीच्छाऽङ्गीकारे च" इति गणकारः)। Cf. "**असुलभा सकलेन्दुमुखी च सा**"—*VIK. II*..8. **2. तद्भाव** &c.—भाव=Emotion, love, तस्याः भावः, तस्य **दर्शनम्**—Observation from the gestures of Śak., or explain **'दर्शनं'** (दृश्—णिच्) as 'exhibition'. Next तद्भाव-दर्शन+आ+श्वस्+णिनि (साधुकारिणि) कर्तरि—Deriving encouragement by the observation of her feelings. R, G and V have 'तद्भावदर्शनायासि'। 'नायिकाया भावाः चेष्टाः, तासां दर्शने आयासि। सखेदं प्रयत्नपूर्वकं लालसम् इति *i. e.* **my mind is eager to know the disposition of her heart. But what the king says in the latter half of the Śloka as well as in the following expression** (*i. e.* **एवमात्माभिप्रायः-सम्भाविते-ष्ट &c.**)

does not harmonise well with this reading. Besides VK quotes *this very Śloka in SD* (Ch. VI.) as an instance of 'विलास' with the reading— ०दर्शनाश्वासि'। 3. **अकृतार्थे**— (न) कृत: अर्थ: येन यस्य वा—Not having gained (*its*) object—तस्मिन्। 4. **उभयप्रार्थना**— प्र+अर्थ+युच् भावे=प्रार्थना ('ण्यास-श्रन्थो-युच्'—3. 3. 107)। (उभयो: प्रार्थना='उभ-य'-प्रार्थना—Yearning of both for one another. In a compound 'उभ' is replaced by 'उभय'। "उभ-शब्दात् वृत्ति-विषये नित्यमयच् स्यात् स्वार्थे। तेन उभयत:, उभयत्र, उभय-पक्ष-विनीत-निद्रा इत्यादि सिद्धम्"—*T*. (उभ-शब्द: द्वित्व-विशिष्टस्य वाचक:। अतएव नित्यं द्विवचनान्त: * *) 'उभय-शब्दस्य द्विवचनं नास्ति इति कैयट:। अस्ति इति हरदत्त:'—(SK. 217; 229n. 2). 5. **स्मितं कृत्वा**—The king all the while thinks that Śak. loves him, hence interprets all her movements as having reference to himself. Lover as he is, he should naturally desire that Śak. should reciprocate his passion, i.e. Śak. must be fond of him as he was of her. But in sooth, there is no positive proof of her love, except that her movement is coquettish. The king is fully aware of the fallacious nature of his reasoning. ('कामी स्वतां पश्यति'-Śl.2) and also of his awkward position consequent on his overconfidence, **hence comes his smile**. For a similar idea Cf. "बाला मामियमिच्छतीन्दु-वदना सानन्दमुद्वीक्षते। नीलेन्दीवर-लोचना स्तन-परिरम्भं भृशं वाञ्छति। अरे मूढ ! का त्वामिमिच्छति का च पश्यति पशो। मांसा-स्थिभिर्निर्मिता नारी वेद न किञ्चिदत्र स पुन: पश्यत्यमूर्त: पुमान्॥" *PC. IV.* 10. "स्वयमेव विहस्याऽचिन्तयत् किमिति निरर्थकमयमात्मा मया शिशुनेवायासित: ** अहो मे मूर्खताया: प्रकार: * अयमात्मैव मे पर इव हासम् उपजनयति"—*Kād.* 'अकामां कामयानस्य शरीरमुपतप्यते। इच्छन्तीं कामयानस्य प्रीतिर्भवति शोभना'—*Rām.* "He had **imagined** that she **reciprocated** his sentiments"—**Three Act Tragedy, (Agatha Christe)**—*P.* 138. **स्मितं**—Is generally used with an 'उत्तम-नायक and it has a technical meaning–'ईषद्विकसितै र्दन्तै: कटाक्षै: सौष्ठवान्वितै:। अलक्षित-द्विज-(tooth) द्वारम् उत्तमानां स्मितं भवेत्॥—*BhD.* 6. **आत्माऽभिप्राय &c.**—अभि-प्र+इण्+घञ् (3. 3. 18)=अभिप्राय:—Desire ('अभिप्राय: छन्द: आशय:'—

AK.) । सम्+भू+णिच्+क्त कर्मणि=सम्भाविता=कल्पिता—Judged, imagined. **इष्टजनः**—Beloved (कर्मधा) । **चित्त-वृत्तिः**—Working of feeling. Next आत्माभिप्रायेण सम्भाविता (३या तत्)—आत्माभिप्राय-सम्भाविता— Judged by his own desire. आत्माभिप्राय-सम्भाविता इष्टजन-चित्तवृत्तिः येन (बहुव्रीहिः) तादृशः-(प्रार्थयिता)—Suitor). **एवम्**—In this way. **विडम्ब्यते**—Made ridiculous, is made a fool of.

Text :— **स्निग्धं[1] वीक्षित[2] मन्यतोऽपि नयने यत् प्रेरयन्त्या तया**
शार्दूलविक्रीडितं **यातं यच्च नितम्बयोर्गुरुतया मन्दं विलासादिव[3] ।**
(मसजसततग) **"मा गा" इत्युपरुद्धया यदपि सा सासूय[4]मुक्ता सखी**
सर्वं तत्किल मत्परायणमहो[5] कामी स्वतां[6] पश्यति ।।२।।

The tender[1] glance[2] that she stole at me, even when casting her eyes towards other (*objects*) ; the slow steps that (*she took*) through the heaviness of her buttocks, as[3] if from dalliance[3], also the (*way*) in which the friend (*Priyaṁvadā*) was replied in (*words of*) spite,[4] when stopped saying—'You must not go'—all these indeed had[5] reference[5] to me. Oh ! A lover sees his own self (*everywhere*). (2)

विदूषकः (यथास्थित एव)—**भो वअस्स, ण मे हत्थ-पाआ पसरन्ति । वाआमेत्तएण जआवीअसि । जअदु भवं** (भो वयस्य. न मे हस्त-पाद प्रसरति । वाङ्मात्रेण जाप्यसे[7] जयतु जयतु भवान्) ।

Vidūṣaka (*Standing as before*)—Ho friend ! my hands and feet cannot move. (*So you*) are greeted[7] with words (*of victory*)[1] alone—'May you be victorious'.

V. L. —'प्रेरयन्त्या'—B. M. 'प्रेषयन्त्या'—R. V. S 'यदपि मा'—R. V. M. S. 'यदपि तत्'—B. M. 'कामी'—R. V. M. S. 'काम·'—B. 'जाप्यसे' —B. V. M. 'जापयिष्यामि'—R. 'जयी क्रियसे'—S 'जयति जयति भवान्'—only B.

स्निग्धमिति । 'अन्यतोऽपि मद्व्यतिरिक्ताऽन्यस्मिन् विषये (सप्तम्यर्थे तसि) 'नयने प्रेरयन्त्या' व्यापारयन्त्या 'तया' शकुन्तलाया 'यत् स्निग्धं' प्रीतिपूर्णं 'वीक्षितं' व्याजाऽवलोकनम् । 'नितम्बयोः' कटि-पश्चाद्भागयोः, 'गुरुतया' दुर्भरत्वात् ('गुरुः पितरि दुर्भरे' —इत्यमरः) 'विलासादिव' वल्लभाऽवलोकन-भाव-

विशेषात् इव (तदुक्तमुज्ज्वलनीलमणौ—"गति-स्थानाऽऽसनादीनां मुख-नेत्रादि-कर्मणां। तात्कालिकन्तु वैशिष्टयं विलासः प्रियसङ्गजम्"।) 'मन्दं' धीरं 'यातं' चलितम् (नितम्बयोरिति द्विवचनेन मध्य-निम्नता-गौरवाऽऽधिक्यं यौवनो-ज्जृम्भणं च ध्वनितम्)। 'मा गाः' ('इणो गा लुङि') (२।४।४५) इति लुङि इण्-धातु-स्थाने गा-धातुः आदेशः। 'माङि लुङ्' (३।३।१७५) इति भविष्यति लुङ। 'न माङ्योगे' (६।४।७४) इति अडागम-निषेधः) इतः मा गच्छ इति' अनेन प्रकारेण 'उपरुद्धया' निषिद्धया शकुन्तलया 'सा सखी' प्रियंवदा 'सासूयं' सकोपं 'यदपि उक्ता', का त्वं विस्रष्टव्यस्य रोद्धव्यस्य वा इति कथिता, 'तत् सर्वं' अहम् एव परम् अयनम् आश्रयः यस्य तत् ('परायणमभिप्रेते तत्परे परमाश्रये' इति वैजयन्ती। "पूर्वपदात् संज्ञायामगः" (८।४।३) इति णत्वम्') 'मत्परायणं' मामेव लक्षीकृत्य कृतम् इति भावः॥ 'किल' इत्यरुचौ ('वार्तायाम् अरुचौ किल' इति त्रिकाण्डशेषः)। अर्थात् यत् मया मद्विषयकत्वं मन्यते तत् सर्वं मद्भ्रान्तत्वम्"—'अहो' आश्चर्ये, 'कामी स्वताम्' आत्मीयतां, सर्वत्र स्वाभिप्राय–रूपता 'पश्यति' ('स्वः स्यात् पुंसि आत्मनि ज्ञातौ, त्रिषु आत्मीयेऽस्त्रियां धने' इति मेदिनी)। (विलासादिव इत्युत्प्रेक्षा। पूर्ववत् **अर्थान्तरन्यासः। मध्य-कारक-दीपकाऽलंकारः, हेतु-स्वभावोक्ती** च। नयनेयेति यत्त्यायातमिति तयातयेति **छेकानुप्रासः।** नयनेयेति यतोयदिति यातंयेति तस्यैवैकवाचका-ऽनुप्रवेश-लक्षणः **सङ्करः।** स एव **वृत्त्यनुप्रासेनाऽपि** पूर्वार्धे। उत्तरार्धे तु **वृत्त्यनुप्रासः। शार्दूलविक्रीडितं** छन्दः) ॥२॥ **विदूषक इति।** 'यथास्थितः' यष्टिम-वलम्ब्य स्थितः। 'भो वयस्य' ("**विदूषकेण वक्तव्यो वयस्येति च भूपतिः**" इत्युक्तेः वयस्येति संबुद्धिः)। हस्तौ च पादौ च इति 'हस्त-पादम्' ['द्वन्द्वश्च प्राणि-तूर्य-सेनाङ्गानाम्' (२।४।२) इति एकवचनं नपुसकत्वञ्च) 'न प्रसरति' आशीर्वचनावसरे ब्राह्मणानां दक्षिण-हस्तोत्तोलनं प्रसिद्धं, किन्तु तुरगाऽनुधावन-कण्डित-सन्धित्वात् हस्तोत्तोलने नाहं शक्तः। अस्मात् 'वाङ्मात्रेण' वाक्येन एव (मयूरव्यसकादिः) 'जाप्यसे' ['जयतेः णयन्तात् कर्मणि लट्] 'जयतु जयतु' इति शब्दम् उच्चारयिष्यामि इत्यर्थः।

57n.—1. स्निग्धं वीक्षितम् &c.—स्निह्+क्त कर्तरि अकर्मकत्वात् (3. 4. 72). By 'वा द्रुह-मुह-ष्णुह-ष्णिहाम्)'—(8. 2. 33), ह्=घ optionally. Hence **स्निग्धः** and **स्नीढः** (8. 2. 31). The king is here describing the actions of Śak., which he construes as having direct reference to himself. **स्निग्धदृष्टिः** is thus defined—"विकाशि-स्निग्धमधुरा चतुरे

त्रिभ्रती भ्रुवौ। कटाक्षिणी साभिलाषा दृष्टि: स्निग्धाभिधीयते"। **2. नितम्बयो गुरुतया**—This is considered by the Sanskrit poets to be a great beauty of females. Cf. 'साक्रान्ता जघनस्थलेन गुरुणा गन्तु न शक्ता वयम्'—*AŚ.* 34 ; (86*n.* 4). **3. विलासादिव**—विलास—Dalliance, coquetry. 'यान-स्थानाऽऽसनादीनां मुख-नेत्रादि-कर्मणाम्। विशेषस्तु **विलासः** स्यात् इष्ट-सन्दर्शनादिना'॥—*SD. III.* 'गमनाऽऽसन-पाणि-पाद-चेष्टा सविशेषं नयन-भ्रुवां च कर्म। दयितोपगमे यदप्रयत्नात् क्रियते नूनमयं **विलासः** उक्तः'॥ —*Bharata.* *Also Com.* **4. मा गाः**—Refers to the conversation between Priyaṁvadā and Śakuntalā, when the latter wanted to leave the place abruptly to report to गौतमी against प्रियंवदा during the conversation between the king and her companions, after (Act *I.* 16. *Supra*). **5. सासूयमुक्ता** (uttered with disdain) &c.—असूञ् is कण्ड्वादि, hence यक् by 'कण्ड्वादिभ्यः यक्' (3. 1. 27). Next 'अ' by 'अ प्रत्ययात्' (3. 3. 102), giving the form 'असूया'—Reproach, Spite. **'गुणेषु दोषाऽऽविष्करणम् असूया'**—*KV under* (1. 4. 37). Cf. 'आर्ये, व्रजामोऽन्यत इत्यथैनां वधूरसूया कुटिलं ददर्श'—*Ra. VI.* 32. **6. किल**—Used ironically and is indicative of dissatisfaction (*Com.*) *i. e.* nothing is intended for me. **किल**—'संभावनायाम्'—HS. **मत्परायणम्**—All these things such as 'स्निग्ध वीक्षणम्', 'मन्दं गमनम्', 'सासूयमुक्तम्' were chiefly intended for me **giving vent to her attachment for me**—(Vide 56n. 2). **7. वयस्य** is the usual term of addressing the king by a jester (*Com.*) **8. जाप्यसे**—जि+णिच्+लट् से कर्मणि। 'जि'='जा' by 'क्रीङ्-जीनां णौ'—(6.1.48). Hence 'पुक्' by 'अर्ति-ह्री-व्ली-री-क्नुयी-क्ष्माय्य्-आतां पुग् णौ' (7. 3. 36). **जि** is here **intransitive** and means **'to prosper'** ; Cf. "जय उत्कर्ष-प्राप्तिः। अकर्मकोऽयम्'—*SK.* 2330. "जयोऽभिभवः, स्वीकार, उत्कर्षश्च। आद्ययोः सकर्मकः, नापरत्र। 'सा' जयति सरस्वती देवी' ति सुबन्धुः। पञ्चम्याः प्रथमपुरुषस्यैक-वचन-बहुवचने भाषायामस्य प्रयोगो नाभिधीयते इति वृद्धाः"—Manoramā ; Act VII. 34 (*Com.*) ; (254n. 2 ; 267 n. 5). **'वाङ्मात्रेण'**—(245*n.* 1—end). **9. जयतु**—B reads **'जयति जयति'** which also means the same thing and is also **idiomatic.** So Vāmana in KSV says—"जेस्तुबन्तू तिबन्ती वा"—

जेः परौ तुबन्तू यथाक्रमम् निबन्ती भवतः। 'जयति'='जयतु', 'जयन्ति'='जयन्तु'। यथा "जयति जयति महाराजः"—इति तट्टीका।

Text:–राजा—कुतोऽयं गात्रोपघातः[1] ?

King—Whence is this paralysis[1] (*on your*) limbs[1] ?

विदूषकः—कुदो किल सअं अच्छी आउलीकरिअ अस्सु-कारणं पुच्छेसि। (कुतः किल स्वयमक्षि आकुलीकृत्य[1] अश्रु-कारणं पृच्छसि)।

Vidūṣaka—Why, indeed having yourself 'pricked[2] (*my*) eye, do you enquire the cause of (*my*) tears ?

राजा—न खल्ववगच्छामि।

King—I do not, indeed, understand (*you*).

विदूषकः—भो वअस्स, जं वेदसो खुज्ज-लीलं विडम्बेदि[1] तं किं अत्तणो पहावेण णं णई-वेअस्स (भो वयस्य, यत् वेतसः कुब्ज-लीलां विडम्बयति तत् किमात्मनः प्रभावेण, ननु नदी-वेगस्य)।

Vidūṣaka—Ho friend ! is it through its own strength or by the force of the stream, that the cane (*Calamus Rotang*) imitates[3] the appearance of the *Kubja-plant* (*or the gait of a hunchback*) ?

V. L.—M reads **'भिन्नार्थमभिधीयताम्'** after 'न खल्ववगच्छामि'। **'ननु'**—R. V. M. S.**'अथवा'**—B. HS.

राजेति। 'गात्राणाम् उपघातः' रोगविशेषः (इति राजनिर्घण्टः) वैक्लव्यमिति यावत्। **विदूषक इति।** 'स्वयम्' आत्मना 'अक्षि चक्षुः' अर्थात् मदीयम् **'आकुलीकृत्य'** अङ्गुलि-निवेशनेन जलपूर्णं कृत्वा। 'अश्रुणः वाष्पोद्गमस्य **'कारणं कुतः'** कस्मात् अर्थात् भवन्नेत्रात् अश्रु कथं आयाति ? इति 'पृच्छसि किल' इत्यरुचौ ('वार्तायाम् अरुचौ किल' इति त्रिकाण्डशेषः)। **विदूषक इति।** 'वेतसः' जल-लताविशेषः **'कुब्जस्य' वृक्षभेदस्य न्युब्जस्य** वा (**'कुब्जः वृक्ष-भेदे** ना, **न्युब्जे** स्यात् वाच्यलिङ्गकः' इति मेदिनी—'पानिफल, सिंघाड़ा' इति भाषा), 'लीलां' क्रियां चेष्टाम् इति यावत् ('लीला विलास-क्रिययोः' इत्यमरः') 'विड़म्बयति' अनुकरोति, तद्वद् वक्रपृष्ठः भवति इति 'यत्' तत् किम् आत्मनः, वेतसस्य 'प्रभावेण' सामर्थ्येन। किमिति प्रश्ने। 'ननु' किंवा 'नदी-वेगस्य' प्रभावेण इत्यर्थः। ननु इति परमताऽऽक्षेपे ('नन्विति परमताऽऽक्षेपानुज्ञे-षणाऽऽपृष्ट-प्रतिवचनेषु' इति दण्डनाथः) एतेन त्वया एव इदं कृतम् इति भावः (दृष्टान्तालंकारः)।

58n.—1. गात्रोपघातः—Cf. 'किमिदमद्य ममोपघातः'—MK. *IX*. 29 **किल**—Indicates अरुचि—(57n. 8). I disapprove your query, as you yourself are the cause of my 'गात्रोपघातः' 2. **कुब्जलीलो—** कु ईषत् उब्जम् आर्जवमस्य। 'शकन्ध्वादिषु पररूपम्'—(Vārt. 6. 1. 94)—Humpback, or 'कुब्ज' is a kind of **aquatic plant**—('*Trapa Bispinosa*'=पानिफल) which is crooked in shape (*Com.*). Cf. 'यः संयति प्राप्त-पिनाकि-लीलः'—*Ra. VI.* 73 ; "वृत्तिमाश्रित्य वैतसीम्"—*Ra. IV.* 35. Śānti-113.9. **विडम्बयति**—Imitates. 3. **प्रभावेण**—(35n. 7). Optionally '**प्रभावेन**' by 'प्रातिपदिकान्त-नुम्-विभक्तिषु च'—(8. 4. 11). Cf."प्रभावेन प्रभावेण। श्रीभावेन श्रीभावेण। हरिभाविना हरिभाविणा। प्रायेन प्रायेण"—**Prabhā**. 4. **ननु**—Is indicative of disapproval (परमताक्षेप) of the first alternative. (*Com.*)

Text :—राजा—नदीवेगस्तत्र कारणम्।

King—The cause there-of is the river-current.

विदूषक—मम वि भवं (मामपि भवान्) ।

Vidūṣaka—So is Your Highness of mine.

राजा—कथमिव । King—How possibly ?

विदूषकः—एवं राअ-कज्जाणि उज्झिअ एआरिसे आउल-प्पदेसे वण-चर-वुत्तिणा तुए होदव्वं। जं सच्चं पच्चहं सावद-समुच्छारणेहिं संखोहिअ-संधि बंधाणं मम गत्ताणं अणीसो म्हि संवुत्तो। ता पसीद मे। एकाहम्पि दाव विस्समीअदु। (एवं राज-कार्याणि उज्झित्वा[1] एतादृशे आकुल-प्रदेशे[2] वन-चर-वृत्तिना त्वया भवितव्यम्। यत् सत्य[3] प्रत्यहं श्वापद-समुत्सारणैः संक्षोभित-सन्धि-बन्धानां[4] मम गात्राणामनीशोऽस्मि सवृत्तः। तत् प्रसीद[4] मे। एकाहमपि तावत् विश्रम्यताम्) ।

Vidūṣaka—Neglecting[1] your kingly duties, you are to live so much as a fowler, in such a dreary[2] region[2] that I am, forsooth,[3] no (*longer*) master of my own limbs, the[4] bandages of the joints of which have been sorely shaken[4] by daily pursuit after beasts of prey. So be pleased with me ; take rest just even for one day.

V. L.—'अमानुष-सचारे' before 'आकुलप्रदेशे'—M. 'प्रसादयिष्यामि विस्रष्टु माम् * विश्रमितुम्'—R. V. M. S. "प्रसीद मे * विश्रम्यताम्"—B.P.

राजेति। 'कथमिव' अहं ते गात्रोपघात-कारणम्? 'इव' (इति वाक्य-भूषायाम्।) **विदूषक इति**। 'राज-कार्याणि' राज्ञः कर्तव्यानि 'उज्झित्वा' विहाय। 'आकुल-प्रदेशे' श्वापद-संकुलस्थाने 'एवम्' ईदृशं 'वनचरवृत्तिना' किरातेन इव 'भवितव्यम्', (भावे तव्यः) 'यत् सत्यम्' असंशयं 'श्वापदानां' हिंस्रपशूनां ('श्वापदो ना हिंस्रपशौ' इति शब्दाब्धिः) 'समुत्सारणैः' अनुधावनैः कर्तृ-भूतैः 'संक्षोभिताः; श्लथीभूताः व्यथिता इत्यर्थः। 'सन्धि-बन्धाः' संयोग-स्थलानि येषां तथाभूतानां "मम गात्राणाम् अनीशः' अस्वामी अर्थात् सञ्चालनादौ अशक्तः 'अस्मि' अहं 'संवृत्तः' जातः। शरीराऽवयवानामाऽऽकुञ्चन-प्रसारणादौ अशक्तोऽस्मि जातव्यथत्वात् इति भाव। अतः मृगयायां मां नियोज्य मम गात्रोपघाते भवानेव कारणम् इति भावः। 'तत्' तेन हेतुना 'प्रसीद' प्रसन्नो भव। आखेटात् विरतो भव इति भावः।

59n.—1. आकुल-प्रदेशे—'आकुल' means 'श्वापदाऽऽकुल'—Occupied by wild beasts. It also means '*restless*'— (व्यस्त or व्याकुल)। Vidūṣaka seems to use it purposely in a **double** sense, hinting at *Śak.*, who has made **the mind of the king restless.** **2. यत् सत्यं**—together mean 'if truth be told', 'In sooth'. Cf. 'सूत्रधारः—आर्ये, '**यत् सत्यं** मयापि नोपलक्षितः'—*MR. I*; **सत्सत्यं,** स्वर्गायते इदं स्थानम्'—*MK. IV*; 'अमङ्गलाशंसया वो वचनस्य **यत् सत्यं** कम्पितमिव मे हृदयम्'—*VS. I*; '**यत् सत्यं** व्यथितं मनः'—*Rām. III.* 59. 3. **3. प्रत्यहं**—अहनि अहनि इति प्रत्यहम्। टच् (*in* अव्ययीभावः) by 'अनश्च'—(5.4.108).But टच् is **optional** by 'नपुसकाद्, अन्यतरस्याम्'—(5. 4. 109) So optionally. **प्रत्यहः**। By 'तृतीया-सप्तम्योर्बहुलम्'–(2. 4. 94).–'प्रत्यहे', 'प्रत्यहम्' in ७मी। **4. श्वापद**—&c.—शुनः पदानि—श्वापदानि—the feet of a dog. 'श्व'='श्वा' before 'पद' by 'शुनो दन्त-दंष्ट्रा-कर्ण-कुन्द-वराह-पुच्छ-पदेषु दीर्घो वाच्यः' –*Vārt. on* (1040). श्वापदानि इव पदानि येषां ते 'श्वापदाः'—Having dog-like feet (उष्ट्र-मुखवत् **उत्तरपद-लोपी** बहुव्रीहिः)। Hence any *clawed* animal (*such as tiger, lion, etc.*) as opposed to *hoofed* animal (*such as horse etc.*) 'व्याघ्रादयः वनचराः पशवः **श्वापदा** मताः'—*Keśava.* **5. गात्राणाम् अनीशः**—६ष्ठी by 'अधीग-र्थ-दयेशां कर्मणि'—(2. 3. 52). I have lost control over my limbs and have become helpless. **6. एकाहमपि**— एकम् अहः इति

एकाहः। The change of 'अहन्' into 'अह्न (by' 'अह्नोऽह्न एतेभ्यः'—5. 4. 81) is **barred** by 'उत्तमैकाभ्याञ्च'—(5. 4. 90). समासान्त टच् by 'राजाहः सखिभ्यः टच्'—(5. 4. 91). Masculine by 'रात्राह्नाहाः पुंसि' —(2. 4. 29).

Text :—राजा (स्वगतम्)—अयं चैवमाह। ममापि काश्यप-सुतामनुस्मृत्य मृगया-विक्लवं[1] चेतः। कुतः—

पुष्पिताग्रा (ननरय नजजरग) **न नमयितु[2]मधिज्यमस्मि शक्तो धनुरिदमाहित-सायकं[3] मृगेषु।**
सह[4]-वसतिमुपेत्य यैः प्रियायाः कृत इव मुग्ध-विलोकितोपदेशः[5]॥३॥

King (*Aside*)—So says this fellow. I, too, thinking of the daughter of Kāśyapa, have got a hunting-sick[1] mind. For,—

I am not able to bend[2] this bow[3], (*well*)-strung, with shaft set to it[3], against the deer, by which enjoying the companionship[4] of my beloved, instruction[5] in sweet (*or artless*) glances[5] was, as it were imparted (*to her*). (3)

V. L.—'अस्मि शक्तः'—R. V. M. S. 'उत्सहिष्ये'—B. 'मुग्ध-विलोकितोपदेशः'—R. V. M. S. 'लोचनकान्ति-संविभागः'—B. P. HS.

राजेति। 'ममापि चेतः' मनः 'मृगयायां विक्लवं' विह्वलं निरुत्साहम् इति यावत् जातम् इत्यर्थः। ('विक्लवो विह्वल' इत्यमरः) कुत इति हेतुमाह। **नेति।** 'ज्यां' मौर्वीम् अधिरूढं ('ज्या मौर्वी ज्या वसुधरा' इति शाश्वतः) इति 'अधिज्यं' सगुणम्, 'आहितः' संस्थापितः 'सायकः' बाणः यस्मिन् तत् 'इदं' मामकं 'धनुः' शरासनं, 'मृगेषु' हरिणेषु लक्ष्यीभूतेषु 'नमयितुं' मृगान् लक्षीकृत्य कर्णान्तम् आक्रष्टुं का कथा बाणमोक्षे इति भावः। 'न शक्तः' समर्थः 'अस्मि' (त्रयमपि विधेयम्। अतएव नार्थ-पौनरुक्त्यम्)। 'यैः' (यद्शब्दस्य उत्तरपद-स्थितत्वात् तच्छब्दस्य अनपेक्षा) हरिणैः 'प्रियायाः' शकुन्तलायाः 'सह-वसतिम्' एकत्राऽवस्थानं ("**वसतिः** स्यात् **अवस्थाने** निशायां सदनेऽपि च' इति हैमः) तन्निबन्धनं सौहार्दम् इत्यर्थः 'उपेत्य' लब्ध्वा, शकुन्तलया सह उषित्वा इत्यर्थः। 'मुग्धानि' सरलानि चित्ताकर्षकाणि इति यावत् 'विलोकितानि' वीक्षणानि' ('नपुंसके भावे क्तः'—३।३।११४) तेषाम् 'उपदेशः कृत इव' (**इत्युत्प्रेक्षा।** उत्तरार्धार्थस्य शक्त्यभावे हेतुत्वेनोपात्तत्वात् **काव्यलिङ्गम्। वस्त्यनुप्रासेन** सह **श्रुत्यनुप्रासस्य** संसृष्टिः। नकारादीनां

षोड़श-वर्णानां दन्त्यानां सत्त्वात् श्रुत्यनुप्रासः। पुष्पिताग्रा वृत्तम्। 'एवमात्माभिप्राय'—इत्यादिना एतदन्तेनानुस्मृतिः तृतीयाऽवस्था सूचिता—"अर्थानामनुभूतानां देशकालानुवर्तिनाम्। सातत्येन परामर्शः मानसः स्यादनुस्मृतिः, इति तल्लक्षणात्) ॥३॥

60n.—1. **अनुस्मृत्य**—has its nominative 'अहम्' understood, while 'चेतः' is the nominative of the finite verb 'भवति' understood., For similar use Cf. 'सुरतानि च तानि ते रहः, स्मर! **संस्मृत्य** न शान्तिरस्ति मे'—*Ku. IV.* 17 ; 'दीलिपानन्तरं राज्ये तं **निशम्य** प्रतिष्ठितम्। पुर्वं प्रधूमितो राज्ञा हृदयेऽग्निरिवोत्थितः'—*Ra. IV.* To **justify एककर्तृकत्व** (३३२०)—*Vide* (68*n.* 6). **2. नमयितुम्**—नम्+णिच्+तुमुन् भावे= 'नमयितुम्' or '**नामयितुम्**' by 'मितां ह्रस्वः'—6. 4. 92. 'घटादयो मितः'—(*GS.* 2353). But when not preceeded by उपसर्ग, उपधा of नम् is **optionally lengthened** by 'ज्वल-ह्वल-ह्मल-नमाम् अनुपसर्गात् वा। एषां मित्त्वं वा। ज्वलयति ज्वालयति। उपसृष्टे तु नित्यं मित्त्वम्। **प्रज्वलयति**। कथं तर्हि '**प्रज्वालयति**' '**उन्नामयति**' इति? ध्यन्त्यात् 'तत्करोति' (वा—३।१।२६) इति णौ,—*SK.* 2353. **3. सह-वसति**—'सह' एकत्र 'वसतिः', सहसुपेति समासः (२।१।४) ताम्। Cf. 'सहो-पजात-परिचयः'—Kād. **4. मुग्ध** &c.—मुह्+क्तः=**मुग्धः** or **मूढः**—(57n. 1). 'मुग्धः' means guileless, hence charming. The deer being the constant companion of my beloved, instructed her in casting artlessly sweet glances. For a **similar** idea, Cf. 'प्रवात-नीलोत्पल-निर्विशेषम् अधीर-विप्रेक्षितमायताक्ष्या। तया गृहीतं नु मृगाङ्गनाभ्यः ततोगृहीतं नु मृगाङ्गनाभिः'—*Ku,* 1. 46. Also "लङ्कास्त्रीणां पुनश्चक्रे विलापाचार्यकं शरैः"—*Ra XII.* 78. Now read the remark below.

Remark—B's "**लोचन-कान्ति-संविभागः**" **also gives a very good sense.** It means "*They have, as it were, distributed the beauty of their eyes to Śakuntalā*". It has a **parallel** in Kād. P. 537—"**मर्त्र-हरिणैरिव दत्त-लोचन-शोभा-संविभागम्**" ; so it will be impossible for the king to hurl his arrows to the deer, for this will **remind** him of the eyes of his beloved. **Exactly similar** idea is found in "**त्रासाति-मात्रचटुलैः स्मरतः सुनेत्रैः। प्रौढ़-प्रिया-नयन-बिभ्रम-चेष्टितानि।**"—

Ra. IX. 58. Thus it is very **difficult to say which is genuine,** as both the readings are supported by **parallel ideas** from Kāli's work.

Text :—**विदूषकः** (राज्ञो मुखं विलोक्य)—**असभवं किम्पि हिअए करिअ मन्तेदि । अरण्णे मए रुदिअं आसि** (अत्रभवान् किमपि हृदयं कृत्वा मन्त्रयते[2] । अरण्ये मया रुदितम्[1] आसीत्) ।

Vidūṣaka (*Looking at the king's face*)—Your Honour is deliberating[1] (*something*) with some (*ideas*) in your mind. Mine is (*only*) a cry in the wilderness.

राजा (सस्मितम्)—**किमन्यत् । अनतिक्रमणीयं[1] मे सुहृद्वाक्यमिति स्थितोऽस्मि ।**

King (*With smile*)—What else ? A friend's request ought[3] never to be transgressed[3], (*and*) hence do I stay.

विदूषकः (सादर)—**चिरंजीअ ।** (चिरंजीव) । (उत्थातुमिच्छति) ।

Vidūṣaka (*Contentedly*)—May you live long. (*Wishes to rise*).

राजा वयस्य, तिष्ठ । सावशेषं[4] मे वचः ।

King— Friend, wait (*a bit*). My speech is unfinished.[4]

विदूषकः—आणवेदु भवं (आज्ञापयतु भवान्) ।

Vidūṣaka—Let Your Majesty command.

राजा—विश्रान्तेन भवता ममापि एकस्मिन् अनायासे[5] कर्मणि सहायेन[6] भवितव्यम् ।

King—When you have rested, you will be my help-mate in a matter which is not fatiguing.

विदूषकः—किं मोदअ-खज्जिआए । तेण हि अअं सुगहीदो क्खणो (किं मोदक-खादिकायाम् । तेन हि अय सुगृहीतः क्षणः) ।

Vidūṣaka—(*Is it*) in crushing (*a few*) sweetmeats ? Then indeed this invitation has been well accepted.

राजा—यत्र वक्ष्यामि । कः कोऽत्र भोः ।

King—In what I will tell you. Ho ! who is there ?

(प्रविश्य) **दौवारिकः** (प्रणम्य)—**आणवेदु भट्टा** (आज्ञापयतु भर्त्ता) ।

(*Entering*) Warder (*Bowing*)—**Let My Liege** (*be pleased*) to **command**.

V. L.—'अरण्ये मया रुदितम् आसीत्'—R. V. M. 'अरण्ये खलु मया रुदितम्'—B. 'मोदक-खादिकायाम्'—B. V. M. HS. 'मोदकखण्डिकायाम्' —R. S.; M. HS, S & C read 'क्षण.'; 'जनः'—Others.

विदूषक इति। 'रुदितम्' इति भावे निष्ठा। रोदनम्, इत्यर्थः। त्वयि मद्विज्ञापनम् अरण्ये रोदनमिव व्यर्थं जातम् इति भावः। **राजेति।** अवशिष्यते इति 'अवशेषः'। (कर्मणि घञ्)। तेन सह वर्तमानं 'सावशेषम्' असंपूर्णम् इत्यर्थः। **राजेति।** 'विश्रान्तेन' विगत-श्रमेण। 'अविद्यमानः आयासः' क्लेश (इति हेमचन्द्रः) यस्मिन् तादृशे अक्लेशकरे 'कर्मणि' व्यापारे 'सहायेन' अनुचरेण ('अनुप्लवः **सहायश्चानुचरः** अभिसरः समः' इत्यमरः) 'भवितव्यम्'। **विदूषक इति।** ब्राह्मणस्य सुकरं कर्म न हि भोजनादृते इति मत्वा पृच्छति। 'मोदकानां' खाद्यविशेषाणाम् ('मोदकः खाद्यभेदेऽस्त्री हर्षके पुनरन्यवत्' इति मेदिनी। मोया' इति भाषा—इति शब्दकल्पद्रुमः') 'खादन' भक्षणम् इति 'मोदक-खादिका' ('धात्वर्थनिर्देशे ण्वुल् वक्तव्य.', वा—३।३।१०९ इति ण्वुल्) तस्यां, 'किं' मया सहायेन भवितव्यम्? 'तेन हि' इत्यवधारणे। 'अय क्षणः' मोदक-भक्षणोत्सवः 'सुगृहीतः' स्वीकृतः ['ग्रहोऽलिटि दीर्घः' (७।२।३७) इति दीर्घः। 'निर्व्यापारस्थितौ काल-विशेषो-त्सवयोः **क्षण**' इत्यमरः। तथा चोक्त **शौनकेन**— "गृहीत्वाऽमुक-संज्ञस्याऽमुक-गोत्रस्य चाऽमुके। श्राद्धे तु वैश्व-देवार्थम् करणीयः **क्षण** स्त्वया। इत्येवं श्राद्धकृत् ब्रूयात् तं प्राप्नोतु भवानिति। स वदेत् प्राप्तवान-स्मीतीतरस्तं प्रति द्विजः" ॥) **प्रविश्येति।** ('नीचेषु प्राकृतं भवेत्') इत्युक्तेः दौवारिकस्य प्राकृतं पाठयम्।

61n.—1. अरण्ये मया &c.—A very common expression in Sanskrit which means something done in vain. *Cf.* 'प्रोक्तं श्रद्धाविहीनस्य **अरण्य-रुदितोपमम्**'—*PT.* '**अरण्य-रुदितं कृतं** शवशरीरमुद्वर्तितम्' —*NŚ* qtd. *Kuvalayānanda Kārikā* (निदर्शना); "**कस्मादरण्यरुदितम्** करोमि"—Rat. II & III; 'तदलमधु**नारण्य-रुदितैः**'—AŚ. 76 '**शून्ये रोमि**"—Mahā. Ādi; "मया नाम शुष्क-घन-गर्जिते अन्तरीक्ष जलपानमिच्छता। चातकायितम्"—Mala II; **मया**—No ६ष्ठी by "न लोकाव्यय-निष्ठा-खलर्थ-तृणाम्"—(2. 3. 59). **सावशेषं**—"With something yet remaining". Cf. "सावशेषमिव भट्टिन्या-वचनम्'—Mala. *IV.* 'सावशेषापसारः— *MX—VII.* 13 'सावशेष इव विकारः'—Ibid. 2. **सुहृत्** &c.—Means a friend, even though vile-hearted or otherwise. Cf. '**सुहृद् हृदी**

मित्राऽमित्रयोः' (5. 4. 150). It has been a very **happy expression** here. Cf. 'अत्याग-सहनो बन्धुः, सदैवानुमतः सुहृत्' । **अनायासे**—Vidūṣaka thinks that there is no work which is free from exertion *save eating*, hence he at once accepts the **invitation** (**क्षण**) । **सहायेन**—Cf. 'ईदृशे **वरे** अभिलाषेण भवितव्यम्'—Rat. II. 3 **मोदक-खादिकायां**—मोदयते इति मुद्+णिच्+ण्वुल् कर्तरि by 'ण्वुल्तृचौ'—(3. 1. 133). =मोदकः । Next (मोदकानां खादनम् इत्यर्थे मोदक+खाद्+ण्वुल्=मोदक-खादिका—(Com.) 'धात्वर्थः क्रिया', निर्देशः कथनम् । आसनम् आसिका , शयनं शायिका"—**Prabhā** ; or by "विभाषाऽऽख्यान-परिप्रश्नयोः"—(3. 3. 110) ; also *MN*. on *Ki. XV*. 25. '**मोदक**' is thus prepared—"धूमसीन्तु द्रवीभूतान् प्रक्षिपेत् झर्झरोपरि । पतन्ति विन्दवस्तस्मात् तान् सुपक्वान् समुद्धरेत् । सिता-पाकेन संयोज्य **कुर्यात् हस्तेन मोदकान्**'—BhP. It must have been a favourite food in old times. 'इमेहिं उवहारेहि मोदएहिं अज्जमाणवअं कञ्चुइं च अच्चेघ"–*Vik*. ; *also Rat. IV* ; "नरा **मोदक-हस्ताश्च** रामस्य पुरतः ययुः"–*Rām. VI*.128.38. 4. **दौवारिक**—द्वारि नियुक्तः इति द्वार+ठक् (by 'तत्र नियुक्तः'–4.4.69.)—दौवारिक., 'व'—'औव्" by द्वारादीनाञ्च'–(7.3.4). A दौवारिक should speak Prākṛta (Com.) and address the king as '**भट्टा**' । Cf. 'भट्टे ति चाधमैः'–SD. VI. 5. **क्षणः**—means 'leisure'. Hence 'my leisure is at your disposal, i. e. I pledge my word to your work—AD. Or, **क्षण** technically means "an invitation to a Brāhmin"—(*specially to a Śrāddha ceremony. Vide* Com). Hence—Your invitation has been well accepted (*by* **me**). Cf. '**गृहीतक्षणोऽस्मि**'—Māla II, "अर्जुनः कुरुता **क्षणम्**"—Mahā. I. (स्वयंवरपर्व) ।

Text :—राजा—रैवतक, सेनापतिस्तावत् आहूयताम् ।

King—Raivataka, let the General of the army be summoned.

दौवारिकः—तह (तथा) । (निष्क्रम्य सेनापतिना सह पुनः प्रविश्य) **एसो अण्णा-वअणु-क्कण्ठो इदो दिण्ण-दिट्ठी एव्व भटा चिट्ठदि । उवसप्पदु अज्जो** (एष आज्ञा-वचनो-त्कण्ठः' इतः दत्त-दृष्टिरेव भर्ता तिष्ठति । उपसर्पतु आर्यः) ।

Warder—As Your Majesty commands. (*I obey*). (***Exit and re-entering with the General***). **Here stands His Majesty with his**

eyes fixed this very way, eager[1] to give out his words of command[1]. Your Honour may approach (*him*).

सेनापतिः (राजानमवलोक्य)—दृष्ट-दोषाऽपि स्वामिनि मृगया केवलं गुणायैव संवृत्ता। तथाहि देवः—

अनवरत-धनु-र्ज्याऽऽस्फालन-क्रूर-पूर्वं
मालिनी रवि-किरण-सहिष्णु क्लेश—लेशैरभिन्नम्।
(ननमयय) अपचितमपि गात्रं व्यायतत्वादलक्ष्यं
गिरि-चर इव नागः प्राण-सारं बिभर्ति ॥४॥

(उपेत्य) जयतु स्वामी। गृहीत-श्वापदमरण्यम्। किमन्यत्राऽवस्थीयते।

General (*Looking at the king*)—Although[2] found fault with[2], hunting in our Lord, has been productive of benefit alone. For, His Majesty, like a rock-roving tusker, possesses a body which is the very[6] essence of strength[6]; the fore-part[3] of which is hardened by the continual pulling of the bow-string[3] ; which is capable of enduring the rays of the sun ; (*and*) is unaffected by the slightest fatigue (*and*) which though rendered[4] thinner[4], is not perceived (*to be such*) through[5] bulkiness[5]. (4)

(*Approaching*) Victory to our Lord. The beasts of prey have been tracked in the forest. Why does, (*Sire*), then stay elsewhere ?

V. L.—'गुणाय एव'—B., 'गुण एव'—R.V.M.S. 'क्रूरपूर्वम्'–R.V.M.S. 'क्रूरकर्मा'—B. 'सहिष्णु'—R. V.M.S. 'सहिष्णुः'—B. 'क्लेश'—M. P. S. HS. 'स्वेद'—R. B. V. S. 'अभिन्नम्—R. V. M. S. 'अभिन्न'—B. 'किमन्यत्राऽवस्थीयते'—R. V. B 'किमिति स्थीयते'—M. 'किमद्याप्यवस्थीयते'—S. 'किमन्यदवसीयते'—R's Com.

राथेति। 'रैवतक' इति दौवारिकाऽभिधानम्। 'सेनापतिः' सैनिकाऽध्यक्षः **दौवारिक इति।** 'आज्ञायाः वचने' उच्चारणे, उद्गत उन्नमितः, 'कण्ठः' ग्रीवा यस्य तादृशः। **सेनापतिरिति।** सेनापतेरपि सरकृत पाठ्यम्। 'दृष्टाः दोषाः' श्वापदेभ्यो विपदः, अथवा क्रूरता-प्रभृतीनि दूषणानि यत्र तादृशी 'अपि 'मृगया' आखेटः' स्वामिनि' दुष्यन्ते 'केवल गुणाय' **गुणम् आधातुम्** 'एव संवृत्ता जाता। काम मृगया दोष-बहुला, तथापि राजनि दुष्यन्ते तु सा केवलं गुण-परिणामिनी भूता ॥ 'तथाहि' तमेवार्थ जानीहि। **अनवरतेति।** गिरिषु चरति इति 'गिरिचरः'

'गिरिचरः' ('चरेष्टः'—३।२।१५) पर्वतविहारी (अनेन स्वातन्त्र्यम् सूचितम्)। नगे भवः 'नागः' (४।३।५३) गजः ('नागः मतङ्गजे सर्पे पुन्नागे नागकेशरे' इति हैमः) 'इव देवः' दुष्यन्तः 'अनवरतं' सततं 'धनुषः' कार्मुकस्य 'ज्यायाः' गुणस्य ('ज्या मौर्वी ज्या वसुन्धरा' इति शाश्वतः)। 'आस्फालनेन' आकर्षणेन 'क्रूरः कठिनः ('क्रूरं भयंकरं ज्ञेयं क्रूरौ कठिन-निर्भयौ' इति धरणिः) 'पूर्वः' पूर्वभागः यस्य तादृशम्। 'रवेः किरणान्' रश्मीन् 'सहिष्णु' सोढुं समर्थम् (अनेन दुःख-सहिष्णुत्वम्)। 'क्लेशस्य' श्रम-क्लान्तेः 'लेशैः' अनुमात्रेणापि 'अभिन्नम्' अस्पृष्टम् (अनेन श्रम-जयित्वम्)। 'अपचितमपि' कृशमपि सत् 'व्यायतत्वात्' दीर्घत्वात् विशालत्वात् इति यावत् ('व्यायतं व्यापृते दीर्घे दृढे चातिशयेऽव्ययम्' इति मेदिनी) 'अलक्ष्यम्' कृशत्वेन न ज्ञायमानम् (अनेन महापुरुष-लक्षणं शाल-प्रांशुत्वादि)। 'प्राणस्य' शरीर-बलस्य (इति नीलकण्ठः)। 'सारं' स्थिरांशमिव ('सारो बले स्थिरांशे च' इति मेदिनी) 'गात्रं' वपुः 'बिभर्ति' धारयति। (**नाग-गात्रपक्षेऽपि विशेषणानि योज्यानि**)। 'अनवरतं धनुषा' **पियाल-द्रुमेण**' 'संस्पृष्टा' 'ज्या' भूमिः (शाकपार्थिवादित्वात् 'संपृष्टा' इत्यस्य लोपः। '**धनुः पियाले ना**'— इति सान्तेषु मेदिनी) तस्यां पियाल-द्रुम-भूमौ यत् 'आस्फालनं' घर्षणं तेन 'क्रूरः' कठिनः 'पूर्वः' पूर्वभागः यस्य। अन्यानि विशेषणानि स्पष्टानि। (**छेक-वृत्ति-श्रुत्यनुप्रासाः। परिकरालंकारः। श्लेष उपमा च**। "शिखरि-चर-करीव प्राण-सारम्" इति पठित्वा **प्रयोग-नियम-भङ्गः** परिहर्तव्यः। यतस्त इवादयः यत्पुरः श्रूयन्ते तस्यैवोपमानत्वं कल्पयन्ति। '**मानिनी**'त्यपर-नाम **मालिनी** वृत्तम्) (४)। **उपेत्येति**। 'गृहीताः' परिज्ञाताः 'श्वापदाः' लक्षणया श्वापदानाम् अवस्थानानि यत्र तादृशं जातम् 'अरण्यम्'।

62n.—1. सेनापतिः—'कुलीनः शीलसम्पन्नो धनुर्वेद-विशारदः। हस्ति-शिक्षाऽश्व-शिक्षासु कुशलः श्लक्ष्ण-भाषणः। निमित्ते शकुन-ज्ञाने वेत्ता चैव चिकित्सिते। कृतज्ञः कर्मणां शूरस्तथा क्लेशसह ऋजुः। व्युह-तत्व-विधान-ज्ञः फल्गु-सार-विशेषवित्। राज्ञा सेनापतिः कार्यः ब्राह्मण क्षत्रियोऽथवा"—*MP. Ch.* 189. '**पति**' at the end in a Samāsa is 'घि' by 'पति समास एव' (1. 4. 8) and is declined like 'मुनि'। But Cf. "**पतिना** "नीयमानायाः पुरः शुक्रो न दुष्यति"— *Qtd.* **Prābhā**. 'रघुनाथाय नाथाय सीतायाः पतये नमः"—*Rām.* "नष्टे मृते प्रव्रजिते क्लीवे च पतिते पतौ"। —*Parāśara.* '**पतिना** त्वया'—*Ram. II.* 101. 11; '**पतिना सह**'—*VI.* 48. 14; '**निहते पतौ**'—48. 24. Some opine that there is a **different**

पति-शब्दः। 'अत्राहुः। पतिः इत्याख्यातः पतिः 'तत् करोति तदाचष्टे'(2572) इति णिचि टि-लोपे, 'अचः इः' (५८८) इत्यौणादिक इ-प्रत्यये, 'णेरणिटि (६।४।५१') इति णि-लोपे निष्पण्णोऽयं **पति-शब्दः**। 'पतिः समास एव (१।४।८') इत्यत्र न गृह्यते लाक्षणिकत्वात्–*T*. 2. **दृष्ट-दोषा:**—For, sometimes death is the result. Cf. 'मृगया-विहारी **सिंहात् अवापद् विपदम्**'।–*Ra*. X*VIII*. 35. "दोषाः प्राणहराः &c."–Kāmandaka. So hunting has been included amongst several vices (**व्यसन**)। Cf. "**मृगयाक्षाः** स्त्रियः पानम् वाक्पारुष्या-र्थ-दूषणे। दण्डपारुष्यमित्येतत् हेयं **व्यसन-सप्तकम्**"–*H* ; (63*n*. 6.) Cf. '**दृष्टदोषमपि** तन्न सोऽत्यजत्'—*Ra*. X*I*X. 49. 3. **स्वामीति**—High official should use the expressions 'स्वामिन्', 'देव', &c. Cf. 'राजा **स्वामिति देवेति** भृत्यैः'—*SD*. 'स्वम्' ऐश्वर्यम् अस्ति अस्य इति स्व+मत्वर्थे आमिनच्('स्वामिन् ऐश्वर्ये'—5.2.126.) इति स्वामिन्। 4. **गुणायैव**—['क्रियार्थोपपदस्य'—(२।३।१४) इति कर्मणि ४र्थी (*Com*.)] is better than '**गुण एव**', as मृगया has already been termed '**दृष्ट-दोषा**'। Cf. "**गतो मदिरा-मद-दोषः गुणताम्**"—*Kād. P.* 850. **संवृत्तः**—(Productive of) benefit—'प्रयत्न-प्रेक्षणीयः **संवृत्तः**'—*Act. I.* 7. 5. **अनवरत-धनु-र्ज्या**—&c. Although 'ज्या' **has been separately mentioned**, yet there is no tautology. (Vide 236n. 4). 'धनु-र्ज्याध्वनौ धनुःश्रुतिरारूढे प्रतिपत्त्यै"—KSV. II. 2. 13 ; "——ज्या-शब्देन उक्तवार्थत्वेऽपि धनुःश्रुतिः प्रयुज्यते, आरूढेः प्रतिपत्त्यै आरोहणस्य प्रतिपत्त्यर्थम्। न हि धनुःश्रुतिम् अन्तरेण धनुषि आरूढा ज्या धनुर्ज्या इति शक्यं प्रतिपत्तुम्" —Tikā ; Ra. II. 59 ; XII. 103. This epithet may be applied to **both** the king and the tusker. In the case of the **King**—धनुः=a bow. ज्या=bow-string. **आस्फालन** =Pulling. Again in the case of the **latter,धनुः**=Piyāla tree (*Chiranjya sapida*), **ज्या**=Earth **आस्फालन**—Rubbing. (*Like an elephant*) the fore-part (*of whose body*) was roughened on account of its rubbing (*its body*) against the ground of Piyāla tree. 6. **सहिष्णु**—सोढुं, शीलमस्य इति—सह्+इष्णुच् by 'अलं कृञ्-निराकृञ्'——इति इष्णुच् —(3. 2. 136). 7. **क्लेश-लेशैः**—is better than **स्वेद-लेशैः**, for physical exercises must always be accompanied by **perspiration**, unless there is any defect in tbe *sudorific glands*.

Cf. "तस्य कर्कश-विहार-सम्भवं स्वेदमानन-विलग्न-जालकम्। आचचाम सतुषारशीकरो भिन्नपल्लवपुटो वनानिलः" ॥—*Ra. IX.* 68 ; 'स्वेद-भिन्नतिलकं परिश्रमात्'—*Ra.* X*IX*. 15 : "श्रमवशात् ** स्वेद—जल-कणिका-सन्ततिभिरलंक्रियमाणमूर्तिः"—*Kād. P.* 54. Cf.—"साधु मृगान्। अभ्यस्त-लक्ष्य-वेधो निघ्नन् न परिश्रमं व्रजति"—KM. 710. **8. अपचितम्**—अप+'चि' means to be '*wasted*', *reduced in bulk*', but अपचित meaning 'पूजित' is from 'चाय्' धातु। Vide 'अपचितश्च'—(7. 2. 30). Cf. 'तत्रापचित-बलाः प्राणिनः भवन्ति सूर्य-बलत्वात्'—Śs. **प्राण-सारम्**—Vide (In. 8). **व्यायतत्वात्**—"By reason of muscular development". **9. जयतु स्वामी**—Means 'स्वामिनं प्रणतोऽस्मि"—MB. 'जयत्वर्थेन नमस्कार आक्षिप्यते'—Ibid. (57n. 9).

Text :— **राजा—मन्दोत्साहः कृतोऽस्मि मृगयाऽपवादिना[1] माधव्येन।**

King—My zeal has been dulled by Mādhavya denouncing[2] hunting[1].

सेनापतिः (जनान्तिकम्)**—सखे, स्थिर-प्रतिबन्धो[2] भव। अहं तावत् स्वामिनश्चित्त-वृत्तिम् अनुवर्तिष्ये।** (प्रकाशम्) **प्रलपत्येष वैधेयः[3]। ननु प्रभुरेव निदर्शनम्[4]।**

मेद-छेद-कृशोदरं[5] लघु भवत्युत्थान-योग्यं[6] वपुः
शार्दूल- **सत्त्वानामपि[7] लक्ष्यते विकृतिमच्चित्तं भय-क्रोधयोः।**
विक्रीडितं **उत्कर्षः[8] स च धन्विनां यदिषवः सिध्यन्ति लक्ष्ये[9] चले**
(मसजसततग) **मिथ्यैव व्यसनं[10] वदन्ति मृगयामीदृग्विनोदः[11] कुतः ॥५॥**

General (*Aside*)—Friend, be steady[2] in (*your*) opposition[2]. I will but sail close to the humour of our lord. (*Aloud*). This blockhead[3] is raving. Surely Your Majesty himself is (*our*) example.[4] The body with[5] (*its*) belly growing attenuated from the reduction of fat[5], becomes light (*and*) [6]capable of (*high*) exertion[6]. The minds of animals[7], agitated by anger and dismay, are noticed too. The superiority[8] of the archers lies in the fact that their arrows succeed in (*hitting*) a moving[9] mark. Falsely indeed, do they condemn hunting as a vice.[10] Where else is (*to be found*) such pleasure[11] ? (5)

V. L.—'प्रतिबन्धो'—R. V. M. S. 'प्रतिज्ञो'—B. 'प्रलपति'—B. M. 'प्रलपतु'—R. V. S. 'वैधेयः'—B. M. V. S. R's Com. 'वैधवेयः'—R. 'माढव्येन'—S ; R. 'माठव्येन'—V. M. ; 'माधव्येन'—B. P. HS.

राजेति। 'मृगयाऽपवादिना' आखेट-निन्दकेन। ('अपवादस्तु निन्दाया-माज्ञा-विस्रम्भयोरपि' इति मेदिनी) 'माधव्यं' इति विदूषका-भिधानं, तेन। 'मन्दः' हीनः 'उत्साहः' मृगयां प्रति आग्रहः यस्य तादृशः ; नष्टोद्यम इत्यर्थः। **सेना-पतिरिति**। 'स्थिरः' दृढः 'प्रतिबन्धः' रोधनं मृगया-प्रतिबन्ध इत्यर्थः यस्य तथाविधः। 'चित्तवृत्तिम् अनुवर्तिष्ये' अर्थात् छन्दोऽनुवर्तनं कृत्वा अहं मृगयां स्तोष्यामि, त्वं पुनः दृढं प्रतिवधान। अनेन प्रभोः **प्रीणनं** मृगया**निवर्तनञ्च द्वयमपि** सिध्येत्। प्रायेण स्वामिनः सेवकवृन्दैः अनया रीत्या वञ्च्यन्ते इत्यपि सुचतुर-कविना परिदृष्टम्। 'वैधेयः' **मूर्ख-विदूषकः** ('अज्ञे मूढ-यथाजात-**मूर्ख-वैधेय-**वालिशाः' इत्यमरः) 'प्रलपति' उन्मत्तवत् अनर्थकं वक्ति ('प्रलापोऽनर्थकं वचः' इत्यमरः) तत्र आस्थां मा कार्षीः इति भावः। 'ननु' इति आक्षेपे। मृगया-गुणवत्त्वे 'प्रभुरेव' स्वयं 'निदर्शनं' दृष्टान्त (इति नानार्थटीकायां भरत)। **मेद इति**। 'वपुः' मृगया-शीलस्य जनस्य शरीरं 'मेदसां' वसाना ('मेदस्तु वपा वसा' इत्यमरः) 'छेदेन' क्षयेण हेतुना 'कृशम्' अस्थूलम् 'उदरं' यस्मिन् तादृशम्, अतएव 'लघु', अतएव 'उत्थानस्य' सर्वेषु कर्मसु उद्यमस्य ('उत्थानम् उद्यमे तन्त्रे पौरुषे पुस्तके रणे' इति मेदिनी) 'योग्यं' समर्थम् 'भवति'। 'सत्त्वानां' जन्तूनां "सत्वमस्त्रि तु जन्तुषु" इत्यमरः) 'भये क्रोधे' च 'विकृतिमत्' विकारयुक्तं' चित्तम् ('अपि' इति पूर्ववाक्य-समुच्चये) 'लक्ष्यते' दृश्यते। प्राणभयेन पलायमानाना जन्तूनाम् ईदृशम् चित्तं', क्रोधे च ईदृग् इति ज्ञायते। 'यद् चले' चञ्चले धावमाने इति यावत् 'लक्ष्ये' शरव्ये ('लक्षं लक्ष्यं शरव्यं च' इत्यमरः) 'इषवः' शराः 'सिध्यन्ति' सफला भवन्ति 'धन्विनां' धानुष्काणां ('धन्वी धनुष्मान् धानुष्को निषङ्ग्यस्त्री धनुर्धर' इत्यमरः) 'स च उत्कर्षः' नैपुण्यातिशयः। ('च' इति समुच्चये। तेन **क्रिया-समुच्चयालंकारः**)। वहु-गुणानां निमित्तभूताम् ईदृशी 'मृगयां मिथ्या' अकारणम् 'एव व्यसनं' पापं कामजं दोषमिति यावत् ('व्यसनन्त्वशुभे सक्तौ पान-स्त्री-मृगयादिषु' इति मेदिनी)। 'वदन्ति' विद्वांसः इति शेषः। 'ईदृक् विनोदः' कौतुकं 'कुतः' ("कु-ति-होः" ७।२।१०४-इति किम् शब्द-स्थाने कु—शब्दादेशः) न कुतोऽपि सम्भवति इति भावः। (मृगयायाः व्यसनत्वाऽभावे पूर्व-वाक्य-त्रयं हेतुत्वेनोपात्तम् इति **काव्यलिङ्गम्**। पुनः मृगया-रूप-**व्यसनं गुण-रूपेण**" कल्पितम् अतोऽत्र **लेश-नामालंकारश्च—'लेशस्तु** दोष-गुणयो **गुण-दोषत्व-कल्पनम्**" इति तल्लक्षणात्। **समुच्चयाऽर्थापत्ति-वृत्त्यनुप्रासाः**। **शार्दूलविक्रीडितं** वृत्तम्।

अनेन पद्येन पूर्वोक्तेन 'अनवरत' इत्यादिना च वीथ्यङ्गं 'मृदवं' नामोपक्षिप्तम्। तल्लक्षणं तु दर्पणे—"दोषा गुणा गुणा दोषा यत्र स्यु र्मृदवं हि तत्। पुनः 'जयतु स्वामी' इत्यादिना एतदन्तेन 'दाक्षिण्यं' नाम भूषणमुपक्षिप्तम्। तल्लक्षणन्तु तत्रैव—'दाक्षिण्यं चेष्टया वाचा पर-चित्ताऽनुवर्तनम्') ॥५॥

63n.—1. **स्थिर-प्रतिबन्धो** &c.—The Commander-in-chief, too, was tired of hunting, but considering his position he could say nothing openly to the king, hence he now takes the help of the jester who is much favoured by the king and is thus the fit person to oppose him. Both will abuse each other before the king as if really ill-disposed, while both wish that he should stop the chase and return to the capital. **अहं तावत्**—&c.—Cf. 'प्रभुचित्तमेव हि जनोऽनुवर्तते'——*ŚPB. XV.* 41. **2.** **वैधेयः**—वि+धा+यत् कर्मणि=विधेयम्, विधानम् इत्यर्थः। तस्य अयम् (अधिकारी) इति विधेय+अण् (4. 3. 120.)=वैधेयः.—One who is yet to learn the injunction of the scriptures, hence a 'booby'; *R* reads 'वैधवेयः' (विधवायाः—पुत्रः—a bastard), but remarks 'क्वचित् वैधेय इति पाठः। स श्रेयान्। मूर्ख इत्यर्थः'। **3.** **ननु** &c.—**निदर्शनम्**=Instance, illustration. Vide "नलिनी पूर्वनिदर्शनं मता"—*Ra. VIII.* 45; *ŚPB. II.* 50 and *MN* thereon. 'अंगुलीयकमेवात्र **निदर्शनम्**'—(204n. 1). **ननु**—Disapproves the grumbling of Vidūṣaka against मृगया **4.** **भवश्छेद** &c.—'मिद् स्नेहने +असून् by 'सर्वधातुभ्यः असुन्' (उः—638). According to *Bharata*, and *Chakrapāṇi Datta*, it is also **अकारान्त**। 'यन्मासं साग्निना पक्वं **तन्मेदः**' इति कथ्यते' ' It means fat and it does to the flesh what marrow does to the bones. Its proper seat is the belly. Cf. 'मेदो हि सर्वभूतानाम् उदरेष्वस्थिषु स्थितम्। अतएवोदरे वृद्धिः प्रायो मेदस्विनो भवेत्'—*Bhp*. The general means to say—Just as the performance of physical exercise reduces fat, so also their non-performance increases it. Cf. 'अव्यायाम-दिवा-स्वप्न-श्लेष्मला-हार-सेविनः। मधुरोऽन्नरसः प्रायः स्नेहान्मेदो विवर्धयेत्'—*Ibid.* कृश्+क्तः=**कृशः** by 'अनुपसर्गात् फुल्ल-क्षीब-कृशो-ल्लाघाः'—8. 2. 55. Cf. '**तपःकृशाः** शान्त्युद-कुम्भहस्ताः'—*BK. II.* 20. उत्+स्था+ल्युट् भावे=**उत्थानम्**

['उदः स्था-स्तम्भो पूर्वस्य'—8. 4. 61.]=उद्योग—Activity, 'उद्योगे च तथोत्थानम्—*Dharaṇi.* 5. **धन्विनां**—धवि गतौ+कनिन्=धन्व (*n*) or धन्वन् (*n*) ; धन्व+इनि (अत इनि-ठनो—5. 2. 115). Or धन्व अस्ति अस्य धन्वन्–इनि by 'व्रीह्यादिभ्यश्च'—(5.2.116).—*BhD.* 'वसुमित्रेण धन्विना'—*Māla. V.* 'धन्वन्' belongs to व्रीह्यादि class. **'धन्वीति व्रीह्यादिपाठात्'** —*KSV. V.* 2. 57. To hit a moving target is extremely difficult and archers (like **William Tell**) enjoy ineffable delight when they are successful. For similar idea, Cf. "आखेटकेऽपि कौतुकमस्त्येव **जयश्च चञ्चले लक्ष्ये**"—KM. 80. 'चल-लक्ष्य-वेध-कौशलम्'—*Ibid.* 951. 'जितश्रमत्वं व्यायाम आम-मेद-कफ-क्षयः। **चल-स्थिरेषु लक्ष्येषु** बाणसिद्धिरनुत्तमा'—*Kāmandaka.* 'परिचयं **चल-लक्ष्य-निपातने** भयरुषोश्च तदिङ्गित-बोधनम्। श्रमजयात् प्रगुणां च करोत्यसौ तनुमतोऽनुमतः सचिवैर्ययौ'—*Ra. IX.* 49. **(यत्) * * स (उत्कर्षः)—विधेय-प्राधान्यात् पुंलिङ्ग-निर्देशः।** Cf. 'शैत्यं हि **(यत्) (सा)** प्रकृति र्जलस्य'—*Ra. V.* 54. 6. **व्यसनं वदन्ति**—Refers to 18 kinds of व्यसन। Cf. 'मृगयाऽक्षो-दिवा-स्वप्नः परिवादः स्त्रियोमदः। तौर्यत्रिकं वृथाट्या च कामजो दशकोगणः ॥ पैशून्यं साहसं द्रोहः, ईर्ष्याऽसूयार्थ-दूषणम्। वाग्दण्डजं च पारुष्यं क्रोधजोऽपि गणोऽष्टकः' ॥—*MS. VII.* 47-48. For eulogy on मृगया, read "आस्तां व्यापाररसः प्रवर्तिता सत्कथापि मृगयायाः। अन्तरयति तन्मनसामा-हारादि—क्रियोचितं कालम् ॥"—KM. 958.

Text :—**विदूषकः (सरोषम्)—अवेहि रे उच्छाह-हेतुअ। अत्तभवं पकिदिं आवण्णो। तुमं दाव दासीए-पुत्तो अडवीदो अडवीं आहिण्डन्तो णर-णासिआ-लोलुवस्स जिण्ण-रिच्छस्स कस्स वि मुहे पडिस्ससि।**

(अपेहि रे उत्साह-हेतुक¹। अत्रभवान् प्रकृतिमापन्नः। त्वं तावत् दास्या-पुत्रः अटवीत. अटवीमाहिण्डमानः नर-नासिका-लोलुपस्य जीर्णऋक्षस्य² कस्यापि मुखे पतिष्यसि)।

Vidūṣaka (*Wrathfully*)—Get out you inciter. His Majesty has returned to (*His*) natural state. You rascal, wandering from forest to forest, will surely fall into the mouth of some worn-out[2] bear[2], greedy of human noses.

राजा—भद्र सेनापते, आश्रम-सन्निकर्षे[1] स्थिताः स्मः। अतस्ते वचो नाभिनन्दामि[2]। अद्य तावत्—

गाहन्तां महिषा निपान[5]-सलिलं शृङ्गैर्मुहुस्ताडितं
शार्दूल- **छाया-बद्ध-कदम्बकं मृग-कुलं रोमन्थ[6]मभ्यस्यतु।**
विक्रीडितं **विस्रब्धं क्रियतां वराह-ततिभि र्मुस्ता[7]-क्षतिः पल्वले।**
(मसजसततग) **विश्रामं लभतामिदञ्च शिथिल-ज्या-बन्धमस्मद्धनुः॥६॥**

King—Good General, we are in the proximity[3] of a hermitage. So I do not approve[4] of your remark. To-day then—

Let the bisons plunge into the waters[5] of the puddles[5], having splashed it repeatedly with their horns ; let the race of deer, forming groups under shades, practise rumination[6], let the [7]nibbling of sedges [7](*Cyperus rotundus*) be performed quietly by the herds of boar in the pool (*and*) let the bow of ours with the grip of the string loosened, enjoy repose. (6)

V. L.—R, S and V omit **अपेहि रे उत्साहहेतुकः**'। S omits 'नर' from 'नर-नासिका-लोलुपस्य'। 'विस्रब्धम्'—R. V. M. S. 'विस्रब्धैः'—B. 'ततिभिः'—V. M. S. NB. 'पतिभिः'—Bh. VM, MB.R.B.

विदूषक इति। 'रे' इति सम्बोधनविशेषः ('सम्बोधनेऽङ्ग, भो पाट्प्याट् हे, हैं, हंहोऽरेऽपि च' इति हेमचन्द्रः) 'उत्साहस्य' उद्यमस्य 'हेतुः' कारणं ('कुत्सिते'-५।३।७४ इति कः)। 'अपेहि' दूरं गच्छ। 'प्रकृतिं' स्वभावं ('प्रकृतिर्गुण-साम्ये स्यात् अमात्यादि-**स्वभावयोः**' इति मेदिनी)' 'आपन्नः' प्राप्तः। 'दास्याः पु :' प्रागुव्याख्यातः। 'आहिण्डमानः' भ्राम्यन् 'नराणां नासिकाया' नासिका-भक्षणे इत्यर्थः। 'लोलुपस्य 'जीर्णक्षस्य' वृद्ध-भल्लुकस्य 'मुखे पतिष्यसि' मरिष्यसि च इति भावः। **गाहन्तामिति।** 'महिषाः' लुलापाः ('कृताभिषेके भूपाले लुलापे महिषः स्मृत' इति रुद्रः) निपीयते अस्मिन् यद्वा नियतं पियन्ति अस्मिन् इति 'निपानं' तस्य, क्षुद्रजलाशयस्य ('आहावस्तु निपानं स्यात् उपकूपजलाशये' इत्यमरः) 'सलिलं शृङ्गैः मुहुः' पुनः पुनः 'ताड़ितम्' आलोड़ितम् यथा स्यात् तथा 'गाहन्ताम्' त्रासाभावात् सलिले यथेच्छं निमज्जन-सुखं लभन्ताम्। 'मृगकुलं' हरिणयूथं 'छायासु बद्धम्' उद्वेगराहित्यात् रचितं 'कदम्बकं' संहतिः ('स्त्रियान्तु संहतिवृन्दं निकुरम्बं कदम्बकम्' इत्यमरः) येन तत्; अर्थात् मण्डलीभूय

निषण्णं सत् 'रोमन्थं गिलित-चर्वणम् 'अभ्यस्यतु' पौनःपुन्येन करोतु इत्यर्थः। 'वराहाणां' सूकराणां 'ततिभिः' श्रेणिभिः 'विस्रब्धम्' निर्भयं यथा स्यात् तथा 'पल्वले' वेशन्ते, क्षुद्रजलाशये इति यावत् ('वेशन्तः पल्वलोऽस्त्री' इति वाचस्पतिः'। जात्यैकवचनं) 'मुस्तानां' तृण-भेदानां 'क्षतिः' मुलोत्पाटनम्' 'क्रियतां' विधीयताम्। 'इदम् अस्माकं धनुश्च 'शिथिलः' श्लथः 'ज्यायाः' गुणस्य 'बन्धः' यस्मिन् तथा-भूतं सत् 'विश्रामं लभताम्' अव्यापारं तिष्ठतु। पशु-वधात् विरमतु इति भावः। ('विस्रब्धं कुरुताम् वराह-समितं मुस्ताक्षतिं पल्वले' इति पठित्वा तृतीय-पादस्य-प्रक्रमभङ्गः समाधेयः। 'शृङ्गैः कासरवृन्दमम्बु सरसो भूम्नाहतं गाहताम्' इति पठित्वा लिङ्ग-वचन-प्रक्रम-भङ्गः समाधेयः। 'अभ्यस्यताम्' इति पठित्वा द्वितीय-पादस्थः आत्मनेपद-प्रक्रमभङ्गश्च परिहर्तव्यः' इति सिद्धान्तवागीशपादाः। श्रुतिवृत्त्यनुप्रासौ। स्वभावोक्तिः। पादत्रये क्रियासमुच्चयः। वस्तुस्वाभाव्यादाभासत्वं काव्यलिङ्गं व्यङ्ग्यम्। कार्य-कारणयोः समकालत्वेनोक्तेः अतिशयोक्तिश्च। शार्दूल-विक्रीडितम् वृत्तम्) ॥६॥

64n.—1. नर-नासिका-लोलुपस्य &c.—In the sense of **गर्हा, यङ्** is used after लुप् by 'लुप-सद-चर-जप-जभ-दह-दश—गृभ्यो भावगर्हायाम्' (3. 1. 24); hence 'गर्हितं लुम्पति' इति लुप्+यङ्+अच् (3. 1. 134) कर्तरि=लोलुपः। 'निन्दायां किं? **क्रिया-समभिव्याहारे मा भूत्**। नेह, **पुनः पुनः (अतिशयेन वा) लुम्पति'—Prabhā**. Bears are said to be fond of human nose.—'ऋक्षा (Cf. Guzrathi रींछ, Maraṭhi रीस) हि प्रायेणादौ नासिकामेव छिन्दन्तीति प्रसिद्धिः—*N*. M also quotes from DC, VII,—'भल्लुका मनुष्याणां नासिकां गृह्णन्ति'। Optionally **जीर्ण-ऋक्षस्य** by 'ऋत्यकः'(VI. 1. 128); 'समासेऽप्ययं प्रकृति-भावः"—SK. **2. निपान** &c.—Is here a pool, and not a 'उपकूप-जलाशयः' (R) *i.e.* reservoir near a well (*for watering cattle*). Kāli. elsewhere also mentions '**निपान**' in a forest. Cf. 'निपानवन्मृग-गवयोपचितं वनम्'—*Ra. IX.* 53. 'शृङ्गैः मुहुः ताड़ितं गाहन्ताम्'—Mark the **Prolepsis** here, for the buffaloes cannot splash the water before bathing. *Cf.* "वन्यैरिदानीं महिषैस्तदम्भः शृङ्गाहतं क्रोशति दीर्घिकाणाम्"—*Ra. XVI.* 13. '**कुलम्**' means a **physical group of some species**—'स्व-जातीय-गणे गोत्रे गृहेऽपि कथितं कुलम्'—*Viśva qtd. MN on Ku. VII.* 2, while '**कदम्बक**' means a **collection of individuals,** "स्त्रियां तु संहतिवृन्दम्

निकुरम्बं कदम्बकम्"—AK, hence no tautology. 3. **रोमन्थमभ्यस्यतु** (Let them indulge in chewing the cud)—involves **प्रक्रमभङ्ग**, (Com.)—'**अभ्यस्यतु**' should be replaced by '**अभ्यस्यताम्**' ('उपसर्गाद् अस्यतूह्योः वेति वाच्यम्'—*Vart*. 1. 3. 30) रोगस्य मन्थः **रोमन्थः** (पृषोदरादित्वात्—6. 3. 109 साधुः)—*BhD*. Rumination is a *sine qua non* in the case of certain beasts, as it is supposed to cure heir diseases. This implies complete freedom from fear. **4. वराह-ततिभिः**—(V.M) is better than वराह-पतिभिः–(R), because to preserve symmetry with the first two lines (Cf. महिषाः, मृग-कुलम्), it is quite natural, that the poet should speak of **swine in general**. Elsewhere in RS, Kāli, .uses the term '**वराह-यूथ**' in **expressing exactly similar ideas**. Cf. 'सभद्र-मुस्तं परिशुष्क-कर्दमं, * * * **वराह-यूथो** विशतीव भूतलम्'—I. 17. Also '* * पल्वल-पङ्क-मध्यात् मुस्ता-प्ररोह * *. 'द्रुत-**वराह-कुलस्यमार्गम्** (*Hunting Excursion of Daśaratha, Ra. X*. 59). **वराह यूथानि**—*II*. 17. Now see (163n. 2). For '**विसरथं**' See (24n. 9.) **5. विश्रामं**—वि+श्रम्+घञ्="**विश्रम**" and not "**विश्राम**", as वृद्धि is **barred** by '**नोदात्तोपदेशस्य मान्तस्यऽनाचमेः** (7. 8. 34). Hence BD remarks—**विश्राम इति स्वपाणिनीयम्**' (1385), and R following VM says '**विश्रान्तिम्** इति पठनीयम्' । *Vallavadeva* is of the same tenor. Cf. 'विश्राम-शब्दः कवीनां प्रमादजः' hence he reads 'विश्रान्ति-हेतोः' in *MD*. 26. T, however, **justifies—विश्राम** as follows :—वि+श्रम्+णिच्+अच्—Now वृद्धि is **not barred** by (7. 3. 34) ; but then 'मिता ह्रस्वः'—6. 4. 92, stands against it. But "**वा**" follows from the previous Sūtra ('वा चित्तविरागे')—6.4.91, attaching **optionality** to 'मितां ह्रस्वः' । Read—"श्रमः उदात्तोपदेशत्वात् घञि वृद्धेः दुर्लभत्वात् । यदि तु 'भूर्यान् **विश्रामय**' इत्यादिवत् **णिचि वृद्धिमाश्रित्य णिजन्तात्** 'एरच्' (३।३।५६) **क्रियते, तदा रूपं सिध्यति** । न च णिचि अपि वृद्धि-निषेधः शङ्क्यः । 'नोदात्तोपदेशस्य" (७।३।३४) इत्यत्र **कृति** इत्यनुवृत्त्या **णिचि निषेधाऽभावात्** । नचैवमपि 'मितां ह्रस्वः' (४।६।९२) स्यादिति शङ्क्यम् । 'वा' इत्य-नुवर्त्य **व्यवस्थित-विभाषाऽऽश्रयेण ह्रस्वा-भावसिद्धेः**"—T. 3185 Kāli, uses '**विश्रम**' also. Cf. 'अथवा **अविश्रमोऽयं** लोकतन्त्राधिकारः'—*Act. V* before Śl. 4 : 'यदि एवमपि नाम **विश्रमं** लभेय'—*II. Supra* ;'कल्पते **विश्रमाय**'—*Vik. III.I*

For 'विश्रामः', Cf. 'विश्रामश्च प्रसरति रवेरंशुजाले कराले'—*PR. V.* 25 ; 'विश्रामः हृदयस्य'—*UC.* 1. 39 ; 'मनुष्यलोक-प्रवेश-विश्राम-शालिनम्'—*AR.* 1. 10 ; "यज्जीवति तन्मरणं यन्मरणं सोऽस्य विश्रामः इत्यादिकाः प्रयोगाः साधवः एवति बोध्यम्"—T. MN commenting on 'विश्राम-हेतोः'—*MD.* 26, defends it by the Sūtra—'विश्रामो वा' of the चान्द्रव्याकरण, but in fact no such Sūtra occurs in the said grammar. Perhaps he was thinking of the जैनेन्द्र Sūtra 'विश्रामो वा'—5. 2. 41. Read also Śākaṭāyana IV. 1. 233. and H. IV. 3. 56. शिलि-ज्या &c.—Cf. 'संहृत-कार्मुक-ज्यम्'—Ra. XII. 103.

Remark—This Śl. has been qtd. KPR. as an illustration of प्रक्रम-भङ्ग-दोषः ।

Text :—सेनापतिः—यत्प्रभविष्णवे रोचते ।

General—As My Lord pleases.

राजा—तेन हि निवर्तय पूर्वगतान् वन-ग्राहिणः[1] । यथा न मे सैनिका स्ततोवनमुपरुन्धन्ति तथा निषेद्धव्याः । पश्य—

उपजाति [ज त ज ग ग] त त ज ग ग] शम-प्रधानेषु[1] तपोधनेषु गूढं हि दाहात्मक[3]मस्ति तेजः ।
स्पर्शाऽनुकूला[4] इव सूर्य-कान्ता स्तदन्य-तेजोऽभिभवा[5]द्वमन्ति ॥७॥

King—Then recall the forward-gone forest-surrounders[1]. My soldiers should be so cautioned that they do not disturb the penance-grove. Know—That in hermits, in whom quietism[1] predominates[1], there is a lurking[2] flame[2] having[3] the potency of burning[3]. Like solar-gems agreeable[4] to the touch[4], this (*flame*) (*they*) manifest when provoked[5] by other energies[5]. (7)

सेनापतिः—यदाज्ञापयति स्वामी ।

Generals—As My Lord commands.

V. L.—'इव'—R. V. M. S. 'अपि'—B. 'तदन्य'—R. V. M. S. 'तेह्यन्य'—B. 'वमन्ति'—R. V. M. S. 'दहन्ति'—B.

सेनापतिरिति । 'प्रभविष्णवे' (३।२।१३८) प्रभुत्वशीलाय ('रुच्यर्थानां प्रीयमाणः'-१।४।३३ इति ४र्थी) । राजेति । 'तेन हि' हेतुना 'पूर्वं गतान्' (२।१२४) 'वनग्राहिणः' अरण्य-वेष्टकान् 'निवर्तय' प्रत्यावर्तय । सेनां रक्षन्ति इति 'सैनिकाः'

(४।४।३३)-('सैनिकः सैन्यरक्षे च स्यात् सेना-समवेतके' इति मदिनी)। 'उपरुन्धन्ति' आश्रमपीड़ां जनयन्ति। शमेति। 'शमः' शान्तिः 'प्रधानं' मुख्यम् येषां तादृशेषु शान्तिपरेषु 'तपोधनेषु' तापसेषु 'दाहः' दहनम् भस्मीकरणमिति यावत् 'आत्मा' स्वभावः '('आत्मा कलेवरे यत्ने स्वभावे परमात्मनि' इति धरणिः) यस्य तथाविधं ['शेषात् विभाषा' (५।४।१५४) इति समासान्तः कप्] दहनसमर्थम् इत्यर्थः। 'तेजः' शक्तिः अग्निः इत्यर्थः ('अधिक्षेपाऽवनादेः प्रयुक्तस्य परेण यत्। प्राणात्ययेऽपि असहनं तत्तेजः समुदाहृतम्' इति भरतः)। 'गूढं' प्रच्छन्नम् 'अस्ति हि' इत्यवधारणे। 'स्पर्शस्य अनुकूलाः' योग्याः, स्पर्शे सत्यपि अदाहका इत्यर्थः। 'सूर्यकान्ताः' मणिभेदाः यथा 'अन्येषाम्' सूर्यादीनाम् 'तेजसः' 'अभिभवः' भवनं प्राप्तिः सम्बन्धः इति यावत्, तस्मात् घर्षणात् इत्यर्थः (हेतौ ५मी) 'तत्' गुप्ततेजः 'वमन्ति'। 'इव'। तद्वत्। 'स्पर्शः अनुकूलः' येषाम् आपदादिनाशकत्वात् 'ते सूर्यवत् कान्ता' मनोहराः तपस्विनः 'अन्येषां' नृपादीनां 'तेजसा अभिभवः' पराभवः तस्मात् 'तत्' गुप्ततेजः 'वमन्ति' प्रकटयन्ति। ('वमन्ती' त्यत्र गौण-वृत्त्या अश्लीलता-परिहारः। श्लेषोपमा। अनुमानं काव्यलिङ्गं च। अत्र दृष्टान्ता-लङ्कार इति न्यायपञ्चाननाः। धाने घने स्तिस्य तेजस्तेज इति छेक-श्रुत्यनुप्रासौ। उपजातिः वृत्तम्] ॥७॥

65n.—1. **प्रभविष्णवे**—प्रभवितुम् शीलमस्य इति प्र+भू+इष्णुच् कर्तरि ('भुवश्च'-3.2.138)=प्रभविष्णुः—One who is in the habit of lording it over others, (*hence in this case also your wish will prevail*). '**भुवश्च**' is a **Vedic Sutra**, hence *BD* remarks—"छन्दसीत्येव। · भविष्णुः। कथं तर्हि "जगत्प्रभोरप्रभविष्णु वैष्णवम्" इति। 'निरङ्कुशाः कवयः'—3118; But—"**चकारः अनुक्त-समुच्चयार्थः—प्रभविष्णुः**"—**Prabhā**. 'किङ्कराः प्रभविष्णुषु'—*KU. VI.* 62. 'शत्रुणा प्रभविष्णुना'—MK. X. 44. 2. **पूर्वंगतान्**—Optionally '**गत-पूर्वान्**' from the similarity of '**भूत-पूर्व**' used by Pāṇini himself in 'भूत-पूर्वे चरट्'—(5. 3. 53). Vide SK. 650. 3. **सैनिकाः**—सेनां समवैति (एकांशीभूय प्राप्नोति) यः सः सेना+ण्य('सेनायाः वा'-4. 4. 45)=सैन्यः, पक्षे 'सैनिकः', with ठक् by "रक्षति"-(4. 4. 33). 4. **अन्य-तेजः**&c.—(*i*) Military power (*as opposed to Brāhmanical power* (*ii*) Rubbing (Com.); 'ल्यब्लोपे' कर्मणि ५मी—Vārt. 2. 3. 28; अभिभवमासाद्य इत्यर्थः। (Also Com.). **सूर्य-कान्ताः**—The Sun-stones (VŚ. 37). Constant use of this gem is a clear proof of the

Hindus having conception of **double convex lens**. 5. **वमति**— Daṇḍī says that such words as **वमन, वान्त** (*vomitting*), **निष्ठ्यूत** (*spitting*) etc. when used in their **metaphorical** sense ('गौणवृत्या') **beautify** the composition, "Cf. निष्ठ्यूतोद्गीर्ण-वान्तादि **गौणवृत्ति-व्यपाश्रयम्। अतिसुन्दरमन्यत्र** ग्राम्य-कक्षां विगाहते। पद्मानि अर्कांशु-निष्ठ्यूताः पीत्वा पावकविप्रुषः। भूयो **वमन्तीव मुखैः** उद्गीर्णारुण-रेणुभिः ॥इति हृद्यमहृद्यन्तु, **निष्ठीवति** वधूरिति"-KA. I. 95-97. '**निष्ठ्यूतश्चरणो**-परागसुभगः लाक्षा-रसः'—*Śak. IV.* 5; For similar idea Cf. "न तेजस्तेजस्वी प्रसृतमपरेषां प्रसहते; स तस्य स्वभावः प्रकृतिनियतत्वादकृतकः। मयूखैरश्रान्तं तपति यदि देवो दिनकरः। किमाग्नेयो ग्रावा निकृत इव तेजांसि वमति" ॥—*UC. VI.* 14. "यदचेतनोपि पादैःस्पृष्टः प्रज्वलति सवितुरिनकान्तः। तत्तेजस्वी पुरुषः परकृत-निकृतिं कथं सहते"—*NŚ.* 29. "That carries anger as the **flint** bears fire. Who much enforced, shows a hasty spark, and straight is cold again"—**Julius Caesar** IV. 3. 'It is as coldly in him as **fire in a ffint**, which **will not show without knocking**—**Trolius and Cressida**.

Text :—**विदूषकः—गच्छ भो दासीए-पुत्त। धंसदु दे उच्छाह-वुत्तन्तो** (गच्छ भो दास्याःपुत्र। ध्वंसतां ते उत्साह-वृत्तान्तः)। (निष्क्रान्तः सेनापतिः)

Vidūṣaka—Avaunt Ye rascal. Down with your in-citation. (*Exit General*).

राजा (परिजनं विलोक्य) **अपनयन्तु**[1] **भवन्तो मृगया-वेषम्। रैवतक, त्वमपि स्वं नियोगमशून्यं**[2] **कुरु।**

King (*Looking at the attendant*)—Please doff[1] (*your*) hunting-attires. Raivataka, you too attend[2] your own duties[3].

परिजनः—जं देओ आणवेइ [यत् देवः आज्ञापयति]। (निष्क्रान्तः)।

Attendant—As Your Majesty commands. (*Exit*).

विदूषकः—किदं भअवा णिम्मच्छिअं। सम्पदं इमस्सिं पादव-च्छाया-विरइद-विदाण-सणाहे सिला-अले उवविसदु भवं जाव अहम्पि सुहासीणो होमि।
(कृतं भवता निर्मक्षिकम्। साम्प्रतम् अस्मिन् पादप-च्छाया-विरचित-वितान-सनाथे शिलातले उपविशतु भवान्, यावदहमपि सुखासीनो[1] भवामि)।

Vidūṣaka—Even the (*last*) fly has been driven off by you

May you now take your seat on the slab of stone, furnished with a canopy, made by the boughs of (*yonder*) tree, while I, too, shall be seated[3] at ease[3].

राजा—गच्छाग्रतः। King—Go forward.

विदूषकः—एदु भवं (एतु भवान्)। (उभौ परिक्रम्योपविष्टौ)।

Vidūṣaka—Come along, Your Highness.

(*This said, both turn round and sit*).

राजा—माधव्य, अनवाप्त-चक्षुःफलोऽसि येन त्वया दर्शनीयं न दृष्टम्।

King—Mādhavya, you have[4] not as yet derived (*any*) profit from your eyes[4], as what deserves to be seen has not been seen by you.

विदूषकः—णं भवं अग्गदो मे वट्टइ (ननु भवानग्रतो मे वर्तते)।

Vidūṣaka—Why, Your Honours is before me.

राजा—सर्वः कान्तमात्मीयं पश्यति। अहं तु ताम् आश्रम-ललाम[1]-भूतां शकुन्तलामधिकृत्य[2] ब्रवीमि।

King—Every one fancies (*his*) own as charming. But I am speaking apropos[2] of Śakuntalā, the ornament[1] of (*this*) hermitage[1].

विदूषकः—(स्वगतम्) **होदु। से अवसरं ण दाइस्सं** (भवतु। अस्मै अवसरं न दास्यामि)। (प्रकाशम्) **भो वअस्स, दे तावस-कण्णआ अब्भत्थणीया दीसदि** (भो वयस्य, ते तापस-कन्यका अभ्यर्थनीया[3] दृश्यते)।

Vidūṣaka (*Aside*)—I will not give him encouragement. (*Aloud*) Ho companion! it appears that an ascetic-girl is to be courted[3] by you (*at last*).

V. L.—"गच्छ भो' &c.—Omitted by R. V. S. 'ध्वसता'—R. V. B. 'ध्वंसित'—M. 'ध्वस्यताम्'—S.. 'पादप-च्छाया-विरचित-वितान-सनाथे शिलातले'—B.M.P. 'पादपच्छायाया विरचित-लतावितान-दर्शनीयायाम्आसने' —R.V. 'पादपच्छायायाम् अविरल-लता-वितानसनाथे आसने'—S 'दर्शनीयम्'— R. B. V. S. 'द्रष्टव्यानां परम्'—M. 'आत्मीयम्'—B. M. V. 'आत्मानम्' —R. S.

विदूषक इति। 'उत्साहस्य वृत्तान्तः' गृहीत-श्वापदमरण्यम् इति वार्ता ('वृत्तान्तस्तु प्रकरणे कार्त्स्न्ये वार्ता-प्रकारयोः' इति हैमः)) 'ध्वंसतां' नाशं गच्छतु (प्रायेणाऽयम् अकर्मकः)। **राजेति।** 'परिजनं' मृगया-वेष-धारि-यवनी-वृन्दम्'

'अपनयन्तु' त्यजन्तु। [अनेन **युवती-परिहारः**]। नियुज्यते अस्मिन् इति 'नियोगः (अधिकरण-वाच्ये घञ्-३।३।१२१) तम्, द्वाररक्षा-रूपाधिकार-स्थानम्। 'अशून्यं' कुरु' द्वार-समीपं गत्वा स्व-कर्तव्ये अवधानं देहि इति भावः। (अनेन **दौवारिक-परिहारः**)। **विदूषक इति**। 'निर्मक्षिकं' परिजना-पसारणेन जन-राहित्यं 'कृतम्' इति। 'पादपस्य छाया' लक्षणया छाया-कारकः वृक्ष-पल्लवः, तेन 'विरचितं' यत् 'वितानम्' उल्लोचः ('वितानं यज्ञ उल्लोचे विस्तारे पुंनपुंसकम्' इति मेदिनी). तेन 'सनाथे' युक्ते 'शिलातले' पाषाण-पृष्ठे। 'सुखेन आसीनः' उपविष्टः ('ईद् आसः (७।२।८३) इति आ-कारस्य ईकारः)। गात्रोपघातात् क्षणमपि अहम् उपवेशनं विना स्थातु न शक्नोमि। अपि च त्वदुपवेशनात् ऋते मदुपवेशनमयुक्तम्। अतः शीघ्रमुपविश इति हृदयम्। **राजेति**। 'न अवाप्तम्' लब्धं' चक्षुषोःफलं' येन तथाविधः 'असि' त्वम् (**सर्वनाम-प्रतिरूपकम् अव्ययम्**)। 'दर्शनीयं' दर्शनार्हं मनोहरं शकुन्तलारूपं वस्तु इत्यर्थः। 'न दृष्टम्' नावलोकितम्। यदि नेत्राभ्यां दर्शनीयं न दृष्टं तर्हि तयोः क उपयोगः। ('राजा—माधव्य, अनवाप्तचक्षुःफलोऽसि' इत्यारभ्य तृतीयाङ्क-समाप्ति-पर्यन्तं **प्रतिमुखसंधिः**। तल्लक्षणं तु दर्पणे 'फलप्रधानोपायस्य मुखसंधि-निवेशिनः, लक्ष्यालक्ष्य इवोद्भेदः यत्र **प्रतिमुखञ्च** तत्')। **विदूषक इति**। 'ननु' इत्याक्षेपे। अग्रतः' सम्मुखे वर्तते। भवन्तं मुक्त्वान्यः कः सुन्दरः विद्यते। अत स्तव दर्शनेन मया चक्षुःफलमवाप्तमिति विदूषकस्य वाक्याशयः। **राजेति**। 'सर्वः आत्मीयं' स्वजनं स्नेह-वशात् ('कान्तं') सुन्दरं पश्यति, नात्र वास्तवत्वं किञ्चित्। स्व-विषये स्नेहो हि गुणान् ऐकीकरोति इति हृदयम्। ("अत्र अविमृष्ट-विधेयांशता-दोषः")। लक्षणं तु उक्तं प्राक्॥ 'आश्रमस्य ललाम' भूषणम् ('प्रधान-ध्वज-शृङ्गेषु-पुण्ड्र-वालधिलक्ष्मसु। भूषा-वाजिप्रभावेषु **ललामं** स्यात्, **ललाम** च' इति रुद्रः) तेन 'भूतां' तुल्यां ('सहसुपा'-२-१-४ इति समासः। 'युक्ते क्ष्मादौ ऋते भूतं प्राण्यतीते समे त्रिषु' इत्यमरः)। **विदूषक इति**। 'अवसरम्' शकुन्तला-वर्णनावसरं (यद्वा अभिलाष-प्रसरम्) अनुकूल-वाक्येन न 'दास्यामि'। क्षत्रिय-कुलोत्पन्नस्य 'ते' तव 'तापस-कन्यका' ब्राह्मण-कन्या 'अभ्यर्थनीया' प्रार्थनीया। नितान्तगर्हितमेवैतत् इति भावः।

66n.—1. ध्वंसतां—'ध्वन्सु क्षये'—(Let all your incitations prove futile) is Bhvādi *Atmp.* and is *generally intransitive*, though its transitive use is not rare. Cf. 'येन ध्वस्तमनोभवेन वलिजित्कायः पुरास्त्रीकृतः'। **स्वं नियोगम्** (Ra. V. II) **अशून्यं** &c.—Frequently occurs in Dramas and is a **courteous way of saying**—"Please

go now". 'मौद्गल्य, एवमत्रभवतोरावेद्य नियोगमशून्यं कुरु'—Māla II ; 'त्वमपि स्वं नियोगम् अशून्यं कुरु'—*VI. Infra.* 'राक्षसः—त्वमपि स्वाधिकारम शून्यं कुरु'–*MR. II* ; *SV. VI.* (1st speech) ; 'Now **go to the door and** stay there till we call'—**Macbeth. III. I.** **2. निर्मक्षिकम्**—मक्षिकाणाम् अभावः (अभावार्थे अव्ययीभावः २।१।६)—Devoid of flies. (Cf. Fr. mouche—fly, mouchard—spy) i.e. absolutely lonely, as all the attendants have been sent way. Hence you can freely talk to me now without being overheard. Cf. 'निर्मक्षिकं साम्प्रतं मे प्रियवयस्यस्य'—*Vidha-śāla-vañjikā. III*; (199*n*. 1). 3. **पादप** &c.—Though it was early morning and the rays of the sun were not very keen still perhaps the jester was unwilling to have them, as *basking* in the *morning sun* is prohibited by the Śāstras. Cf. 'बालातपः प्रेतधूमः वर्ज्यं भिन्नं तथासनम्'—*MS. IV.* 69. where *K* quotes *Medhātithi*—'**प्रथमोदितादित्य-तापः बालातपः । स च मुहूर्तत्रयं यावत् इति मेधातिथिः**' ; PP. 1. 55. 66 ; 'सुखासीनोभवामि'—Vik. III. **4. शिलातले**—तल means both 'स्वरूप' and 'अध" :। 'अधः स्वरूपयोरस्त्री तलम्' इत्यमरः ; Hence शिलातले=शिलायाम् (शिलापृष्ठे इत्यर्थः) । Similarly, भूमि-तलम्, कर-तलम् but 'वृक्ष-तले'—Under the tree. **अनवाप्त-चक्षुःफलः**—God has given men eyes to see whatever is fit to be seen (दर्शनीयं) । In this hermitage Śak. is the most beautiful (ललाम) thing to be seen. As विदूषक has not yet seen Śak. he has been given eyes in vain. Cf. 'पराङ्गनानां, लोलापाङ्गैर्यदि न रमसे लोचनं वञ्चितोऽसि"–*PA. & MD. I.* 28. "सहज-विलास-निवासं तस्या वपुरनभिवीक्षमाणस्य । मन्ये नाकाधिपतेः सहस्रमपि चक्षुषां विफलम्" ॥ —KM. 121. 'द्रष्टव्यम् अपश्यन्ती वञ्चयसि लोचनयुगलम्"—*Kād. p.* 329. "अद्य परिसमाप्तम् ईक्षण-युगलस्य द्रष्टव्यदर्शनफलम्"—*Kād. p.* 481. **5. ननु भवान्** &c.—ननु is indicative of *disapproval.* I am beholding the king, the worthiest object to be seen, in front of me—how is then your remark—'अनवाप्त-चक्षुःफलोऽसि' ? Cf. 'यदृच्छया सकृदप्यवन्ध्ययोः । पथि स्थिता सुन्दरि यस्य नेत्रयोः'—*Vik. I.* 9 ; (208 *n*. 3). **सर्वः कान्तम्**&c.—Cf "A friendly eye could never see such faults"—**Julius Caesar.** **6. आश्रम-ललाम-भूतां**—'ललाम' is both 'अका-

रान्त' and 'नान्त'। Cf. 'कन्याललाम कमनीयम् अजस्य लिप्सोः'–*Ra. V.* 64 *qtd. Kṣīrasvāmī, and RM.* Hence ललामेन (or ललाम्ना वा) भूता—ललाम-भूता। The समास is 'सुप्सुपा', as 'भूत' is not included in 'पूर्व-सदृश-समोनार्थ-कलह-निपुण-मिश्र-श्लक्ष्णैः'-2. 1. 13. MN also explains 'प्रत्यर्थि-भूताम्' in *Ku.* 1. 59. as सुप्सुपा Samāsa. But there **is a serious difficulty**. For 'भूत', 'निभ', प्रतिम', &c. **have the meaning तुल्य only when they are final in a compound (उत्तरपद)**. Hence 'ललामेन भूता' cannot mean 'ललामेन तुल्या' as भूत is not here a final member in a compound. *BhD* commenting on ("निभ-संकाश-निकाश-प्रतीकाशोपमादयः—*AR*) remarks—('अमी निभादय **उत्तर-पदस्था एव सदृश-वचना** वाच्यलिङ्गाः स्युः। यथा 'पितृनिभः पुत्रः'; 'मातृनिभा कन्या'। 'आदिना भूत-रूप-कल्पादयः। यथा पितृभूतः, मातृभूतः—पितृरूपः, पितृकल्पः') । This being the case, say **'ललामेन इव'** (तुल्या) इति 'ललाम-भूता' इति **अस्वपद-विग्रहः नित्यसमासः**। Cf."**सामान्यमिव सामान्य-भूतम्**। भूत-शब्द उपमार्थे। यथा पितृभूतः इति"—KT. Also **चारित्रवर्धन** on Ra. V. 34. **अधिकृत्य**—'मुद्रामधिकृत्य'—*Māla. II* ; *Ra. XI.* 62. 7. **तापसकन्यका** &c.—(22n. 1) The jester reminds the king of the injunction of the Śāstras, prohibiting Kṣatriya's marriage wth a Brahmins' daughter. *MS. III.* 12, 13 ; (22*n*. 1). **अभ्यर्थनीयाः**=To be wooed.

Remark.—After the speech of Vidūṣaka, B P, HS have the following Śloka supported by Kāsmirian and some **oldest** Devanāgara Mss. Most likely this is a **genuine** Śloka –**धिङ् मूर्ख** ! **निवारित-निमेषाभिः नेत्रपंक्तिभिरुन्मुखः। नवामिन्दुकलां लोकः केन भावेन पश्यति' ॥** (Fie fool, with what feeling do people with faces turned upwards gaze at the new light of the moon with the rows of their eyes ceasing to wink ?)–(The figure is **अप्रस्तुत-प्रशंसा** and the metre is **श्लोक**)।

Text :—**राजा—सखे, न परिहार्ये**[1] **वस्तुनि पौरवाणां मनः प्रवर्तते।**

आर्या **सुर-युवति-सम्भवं किल मुनेरपत्यं तदुज्झिता**[2]**ऽधिगतम्।**
[12, 18
12, 15] **अर्कस्योपरि शिथिलं च्युतमिव**[3] **नव-मल्लिका-कुसुमम् ॥८॥**

King—Friend, never does the mind of Puru's descendants incline towards a forbidden[1] object. The sage's daughter, I hear, (*or really*) is born of a celestial nymph, but found[2] (*by him*) when abandoned[2],—like a Jasmin-flower severed (*from its stalk*) and fallen[3] on the Arka tree (*Asclepias or Calotropis gigantea*). (8)

विदूषकः (विहस्य)—**जह कस्स वि पिण्ड-खज्जूरेहिं उव्वेजिदस्स तिन्तिलीए, अहिलासो भवे, तह इत्थिआ-रअण-परिभोइणो भवदो इअं अब्भत्थणा।**

(यथा कस्यापि पिण्ड-खर्जूरैः उद्वेजितस्य तिन्तिल्याम्[४] अभिलाषो भवेत्, तथा स्त्री-रत्न-परिभोगिणो[५] भवतः इयमभ्यर्थना)[६]।

Vidūṣaka (*Laughing*)—Just as one, surfeited with dates, may long for tamarind[4], so [5]enjoying the (*very*) gems of women[5], Your Honour is paying this court[6].

V. L—'स्त्री'—R. V. S. 'अन्तःपुर-स्त्री'—B. M '०परिभोगिणः'—B. P. '०परिभाविणः'—R. V. M. S.

राजेति। 'पौरवाणाम्' पुरुवंशीय-राजानां 'मनः परिहार्ये' परिहर्तुं योग्ये अनुचिते इत्यर्थः, ['ऋ-हलोर्ण्यत्'—(३।१।१२४) इति कर्मणि ण्यत्] 'न प्रवर्तते' धावति। **सुरेति**। 'शिथिलं' वृन्तात् श्लथीभूतम् 'अर्कस्य' वृक्ष-भेदस्य ('अर्को द्रुभेदे स्फटिके ताम्रे सूर्ये विड़ौजसि' इति। 'आकन्द' इति भाषा)। 'उपरि च्युतं' पतितम्, 'नवमल्लिकायाः कुसुममिव' पुष्पमिव 'उज्झितम्' (**आदौ**) स्वमात्रा मेनकया परित्यक्तम्, (**पश्चात्**) 'अधिगतं' कण्वेन प्राप्तम् (इति स्नाता-नुलिप्तवत् समासः-२।१।४७) 'सुर-युवतिः' मेनका नाम अप्सराः, तस्याः 'सम्भवः' उत्पत्तिः' यस्य तादृशम्। 'किल' इति वार्तायाम्। 'तत्' मदभिलषितं वस्तु 'मुनेः कण्वस्य 'अपत्यम्' सन्ततिः, मेनकागर्भ-सम्भूता इयं शकुन्तला। जनन्या त्यक्ता सती मुनिना कण्वेन पालिता। अतो "मातृवत् वर्णसंकराः" इति स्मृति-वचनात् शकुन्तला न मे परिहार्या इति भावः। (**उपमालङ्कारः**। **श्रुति-वृत्त्यनुप्रासौ**। 'च्युतमभिनवमल्लिका-प्रसूनमिव' इति पठित्वा **प्रयोग-प्रक्रमभङ्गः** समाधेयः। **इयमार्या**। अत्र '**आख्यानं**' नाम नाट्यालङ्कारः। "**आख्यानं** पूर्ववृत्तोक्तिः" इति दर्पण-लक्षणात्) ॥८॥ **विदूषक इति**।। "पिण्डखर्जुरैः" सुमधुरैः खर्जूर-विशेषैः 'उद्वेजितस्य' भुक्त्वा भुक्त्वा समुत्पन्न-जिह्वाऽरुचेः जनस्य 'तिन्तिल्याम्' अम्लरस-युक्त-चिञ्चायाम् ('अम्लिका चाऽम्लिका चिञ्चा तिन्तिड़ीका च तिन्तिला' इति चन्द्रः) 'अभिलाषो भवेत्' (संभावनायां लिङ्) 'तथा' तद्वत् 'स्त्री-रत्नानि' अन्तः-

पुरस्थानि ललना-श्रेष्ठानि। ('रत्नं स्वजाति-श्रेष्ठेऽपि मणावपि नपुंसकम्' इति मेदिनी) 'परिभोक्तु'' शीलं यस्य तथाविधस्य 'भवतः इयं' तुच्छ-वनवासि-रमणी-सम्बन्धिनी 'अभ्यर्थना' याच्ञा।

67n.—1. न परिहार्यं (Tabooed, fit to be shunned) &c.—Cf. 'का त्वं शुभे कस्य परिग्रहो वा किंवा मदभ्यागमकारणं ते। आचक्ष्व मत्वा वशीनां रघूणां मनः पर-स्त्री-विमुख-प्रवृत्तिः' ॥—*Ra XVI.* 8. **2. युर-युवति** &c.—युवन्+(तद्धित) ति स्त्रियाम् ('यूनस् ति'—4. 1. 77.)—**युवतिः। 'अतद्धिते' किम्? 'ऋन्नेभ्योङीप्**—4. 1. 5); [व्=उ by "श्व-यूव-मघोनाम् अतद्धिते" (6. 4. 133); अ of वन् in युवन् is dropped by "अद् लोपोऽनः"—(6. 4. 134). "शुनी. (कुक्कुरी), **यूनी** (युवतिः), मघोनी (मघवती)"—**Prabhā**—P. 462]. "**यूनी। युवती**-शब्दस्तु शतृ-प्रत्ययान्त-युवच्छद-स्त्रीलिङ्गे 'उगितश्च' (4. 1. 6). इति ङीप् प्रत्ययान्तः—**Prabhā**. 'युवतिः' generally means a *young woman*, and sometimes woman in general. 'प्रमदाश्चेति विज्ञेया **युवतिश्च** तथा स्मृता'—*Bhāguri*. 3. **किल**—'अवधारणे' (*certainly*)–S. 'वार्तायाम्' (*I am told*)—K. 'किल इति प्रसिद्धौ' —R ; (41n. 2). **4. अपत्यं**—न पतन्ति पितरः येन जातेन इति नञ्+पत् बाहुलकात् यः। यद्वा 'अघ्न्यादयश्च' (उः—५६१) इति यक्—*BhD*. Also *Nirukta III*. 1. **5. उज्झिता** &c.—(First) abandoned by her parents and (afterwards) found by Kaṇva. (Com.). Hence the girl being **असवर्ण-क्षेत्र-सम्भवा** may be wedded by the king. (Com.). Thus the jester's attack is invalidated. But our jester is not one to be easily silenced, so he again laughs (विहस्य) and ridicules the queer taste of the king. **6. पिण्ड-खर्जूरैः**—A kind of date growing in the western parts of India, very sweet to taste. Cf. "पिण्ड-खर्जूरिका त्वन्या सा देशे पश्चिमे भवेत्। खर्जुरीत्रितयं शीतं मधुरं रस-पाकयोः। स्निग्धं रुचिकरं हृद्यं क्षत-क्षय-हरं गुरु"॥—*BhP*. **उद्वेजित**=उद्+विज्+णिच्+क्त कर्मणि—Palled, got tired. Cf. 'सीधु-पानोद्वेजितस्य'—*Māla. III*. 'रत्न' means श्रेष्ठ (*Com.*) The idea is—You have no *real love* for the girl, but you, being temporarily bored with the beauties of your seraglio, are longing for the woodland-girl, exactly as a man surfeited with too much of sweets wants some jam or jelly

for a change only. R's 'परिभाविणः' (*i.e. one scorning the jewels of woman*) is bad, as it is not in consonance with 'स्त्रीरत्नैः उद्वेजितस्य' । Cf. "Nay but the dotage of our general's Overflows the measure"—(**Philo** to **Demetrius**) in **Antony** *and* **Cleopetra**. I. I ; "क्षीर छानाय मजे ना मन नाल्ते शाके मजे । विद्यानिधि त्याज्य करि आकाट मूर्खे भजे । दीप्ति तुमि त्यजिले हीरे, कालो जीरे यत्न कर्ले अति । फेले मुक्तामणि चिन्तामणि रतिते हलो रति"—*Dāśarathi Rāya*. "The cloyed will. That satiate yet unsatisfied desire, that tub Both filled and running, ravening–**first the lamb, Longs after for the garbage.**" —**Cymbeline**. I. VI.

Text :—राजा—न तावदेनां पश्यसि येन एवमवादीः ।

King—You have not seen her (*and*) hence you talk in this fashion.

विदूषकः—तं क्खु रमणिज्जं जं भवदो वि विम्हअं उप्पादेदि ।

(तत् खलु रमणीयं यत् भवतोऽपि विस्मयम् उत्पादयति) ।

Vidūṣaka—That must be (*surpassingly*) attractive, which excites admiration even to Your Majesty.

राजा—वयस्य, किं बहुना—

चित्रे निवेश्य[1] परिकल्पित-सत्त्व-योगा[2]
वसन्ततिलका **रूपोच्चयेन[3] मनसा विधिना कृता नु ।**
(तभजजगग) **स्त्री-रत्न-सृष्टिरपरा प्रतिभाति सा मे**
धातुर्विभुत्व[4]मनुचिन्त्य वपुश्च तस्याः ॥९॥

King—Friend, why say much ?—

(*When I*) consider the omnipotence[4] of the creator and her (*graceful*) form (*lineament*), she appears to me to be another (*extraordinary*) creation of a gem of woman, [2]combined with life[2] by the creator after having delineated[1] (*her*) in a picture, or perhaps mentally fashioned (*by Him*) with (*all*) the [3]heaped up beauties[3]. ([3]*Assemblage of lovely form*[3]—*M.*) (9)

V. L.—'चित्रे'—V. M. S. 'चित्ते'—B. 'सत्त्वयोगा'—R.V.S. 'सत्त्वयोगात्'—M.. 'सर्वयोगात्'—B. 'मनसा विधिना कृता नु'—R. V. M. S, 'घटिता मनसा कृता नु'—Bh. R's. Com 'विधिना विहिता कृशाङ्गी'—B.

राजेति। 'एनां' शकुन्तलां 'तावत् न **पश्यसि**' **अपश्यः** इत्यर्थः (अतीतार्थे लट्। **छान्दस-प्रयोगोऽयम्**) 'येन' हेतुना 'एवम्' **अवादीः**' **वदसि** (वर्तमानार्थे लुङ्। **वैदिकोऽयं प्रयोगः** ३।४।६)। **राजेति**। अनेन प्रत्यङ्ग-वर्णना कर्तुं न शक्यम् इत्युक्तम्। **चित्र इति**। 'धातुः' ब्रह्मणः 'विभुत्वं' निर्माण-नैपुण्यं, 'तस्याः' शकुन्तलायाः 'वपुश्च' सुमनोहरं शरीरञ्च 'अनुचिन्त्य' विभाव्य (**स्थितस्य**) इति शेषः। 'मे सा' शकुन्तला विधीयते अनेन इति 'विधिः' ब्रह्मा ('उपसर्गे घोः किः' (३।३।९२), 'विधि र्ब्रह्मा-विधानयोः' इति हेमचन्द्रः) तेन। 'चित्रे निवेश्य' आदौ आलेख्यं समर्प्य अङ्कयित्वा, पश्चात् 'परिकल्पितः' निवेशितः 'सत्त्वस्य' प्राणानां ('सत्त्वं द्रव्ये गुणे चित्ते व्यवसाय-स्वभावयोः। पिशाचादौ आत्मभावे बले **प्राणेषु** जन्तुषु' इति हेमचन्द्रः) 'योगः' सम्बन्धः यस्याः सा कृत-प्राणयोगा इत्यर्थः। (मन्ये आदावियं चित्रार्पिता, पश्चात्तु जीवन-संयोगं प्रापिता, अन्यथा ईदृश-रूप-लावण्यस्याऽसंभाव्यत्वं स्यात्)। 'मनसा नु' किंवा चित्तेन **करणेन** ('नु स्यात् प्रश्ने **विकल्पा**ऽर्थेऽप्यनीताऽनुनयार्थयोः' इति विश्वः) 'रूपाणां' सौन्दर्याणाम् अर्थात् चन्द्र-प्रभृत्युप-मान-वस्तुजातानां 'उच्चयेन' एकत्र समावेशेन, **उपादान-कारणेन** च, 'कृता' निर्मिता 'अपरा' अन्या 'स्त्री-रत्नस्य' रमणीश्रेष्ठस्य ('जातौ जातौ यदुत्कृष्टं तद्रत्नम् इति कथ्यते' इति यादवः) 'सृष्टिः' कृतिः 'प्रतिभाति' मम धारणा इत्यर्थः। मानसी कृतिः इति किम्? अन्यथा कर-तुलिकादि-स्पर्शेन अस्या माधुर्य-हानिः स्यात्। (अनेन **सौकुमार्यं** ध्वनितम्। तथाचोक्तं—'यत् स्पर्शासहताङ्गेषु कोमलस्यापि वस्तुनः। तत् **सौकुमार्यम्**'॥ प्रथम-चरण-द्वये **संदेहालङ्कारश्च**। 'अपरा सृष्टिः' इत्यत्र ब्रह्मणा **तिलोत्तमा-नाम** आद्यं स्त्रीरत्नं सृष्टम् इति भारत-वार्तानुसन्धेया। **काव्यलिङ्गम्**। **श्रुति-वृत्त्य-नुप्रासौ**। 'अपरा' सृष्टिः' इति **भेदरूपाऽतिशयोक्तिः**। "अयं राजा अपरः पाकशासनः" इति दर्पणोदाहरणवत्। **वसन्ततिलका** वृत्तम्) ॥९॥

68n.—1. न एनां पश्यसि * * अवादीः—The construction will appear **queer** from the standpoint of Classical Sanskrit, as the previous action (दर्शन) is in the **present** tense, while the action following (वचन) is in the **past** tense, but it is quite **regular** from the standpoint of **Vedic grammar**. लट् may be used for लङ् by 'सर्वे विधयः छन्दसि वैकल्पिकाः' or by the Kārikā—'सुप्-तिङ्-उपग्रह-लिङ्ग-नराणां कालहलच्-स्वर-कर्तृयङाञ्च। **व्यत्ययमिच्छन्ति** शास्त्रकृदेषां सोऽपि च सिध्यति **बाहुलकेन**', and by "छन्दसि लुङ्-लङ्-लिटः"—(3.4.6) **लङ् & लिट् may**

be used for any tense—'**धात्वर्थानां सम्बन्धे सर्वकालेषु एते वा स्युः**"—BD. (3423). Thus पश्यसि=अपश्यः, अवादीः=वदसि। Read— "अद्य ममार।" म्रियते इत्यर्थः"—**Prabhā**. (Also 182n.8 on जगाम)। Cf. "दुष्करं कृतवान् रामो हीनो यदनया प्रभुः। धारयति आत्मनो देहं न शोकेन अवसीदति—*Rām V*. 15. 53. '**धारयति दधार इत्यर्थः**—*Rāma* (Commentator); 'अन्योन्यं कुपिता जघ्नुः * *। न ते ददृशिरे रामं दहन्तमपि वाहिनीम्। * * ते तु रामसहस्राणि रणे पश्यन्ति राक्षसाः। पुनः पश्यन्ति'&c.—*Ibid VI*. 93, 24. 26; 'यदा बहिर्गच्छति पार्थिवात्मजः तदा अभवत् द्वारमपावृतं स्वयम्"—*BC. VIII*. 46; (119*n. I*). We shall often meet with **Kāli's fancy for archaic uses of words, idioms and metres**. These things are **essential** in fixing the date of Kāli. **विस्मयम्** &c.—"**विभ्रम**" for "**विस्मय**" is **wrong**—(3n–1). Cf. 'ईदृशं कन्यारत्नं मनुष्यलोके न दृश्यते। तत् तर्कयामि प्रजापतेरपि एनां निर्माय विस्मयः समुत्पन्नः"—Rat. II. 2. **परिकल्पितः** &c.—सत्त्व-योगः=Infusion of life; परिकल्पितः सत्त्वयोगः यस्याः=परिकल्पित-सत्त्वयोगा–One who is inspired with life (*by the creator*). Cf. 'परिकल्पित-सान्निध्या' —Ra. IV. 6. 3. **रूपोच्चयेन**—With a collection of all that is beautiful. It is the **material cause** (समवायिकारण)। Cf. '**सर्वोपमाद्रव्य-समुच्चयेन** यथाप्रदेशं विनिवेशितेन। सा निर्मिता विश्वसृजा प्रयत्नादेकस्थ-सौन्दर्य-दिदृक्षयेव'—*Ku. I*. 49. 'त्रिलोक-सौन्दर्यमिवोदितं वपुः'—*Ku. V*. 41. "आस्फालयतो नूनं धनुरतनोः कौसुमं रजः पतितम्। संगृह्य सा मृगाक्षी विश्वसृजा निर्मिता तेन॥—KM. 108. Cf. also the description of 'Urbaśi' in *Vik. I*. 8; *MM* 1. 21.; V.9. "A miniature of loveliness, **all grace summed up** and closed in little"—**Tennyson**. 4. **मनसा कृता नु**—suggests an alternative (Com.). **मनसा**—करणे ३या। This is the **instrumental cause** (निमित्त-कारण)। The idea is—The creator was so very particular about such a flaw-less beauty that he did not even touch her with hands or brush, but he created her mentally, so that her beauty might not be tarnished by touch. For a similar idea, Cf. 'मन्ये च मातङ्ग-जाति-स्पर्श-दोष-भयात् अस्पृशता इयमुत्-पादिता प्रजा-पतिना अन्यथा कथमियम् अक्लिष्टता लावण्यस्य। नहि कर-तल-

स्पर्श-क्लेशितानाम् अवयवानाम् ईदृशी भवति कान्तिः'—*Kād. p.* 42. Also 'प्रजापति-दृढ़-निपीड़ित-मध्यभाग' &c.–*p.* 690 ; 'एनामुत्पादयतो विधेः **करतल-परामर्श-क्लेशेन**' &c.—*p.* 702. 5. **स्त्रीरत्न-सृष्टिरपरा**—रमन्ते अस्मिन् इति रम+न ['रमेस्त च', उः—301]=रत्नम्, स्त्रीणाम् रत्नं (श्रेष्ठम्)=स्त्रीरत्नम् this may refer to the creation of तिलोत्तमा (आद्या स्त्रीरत्न-सृष्टिः) **by** the (**creator himself**) for the destruction of the demons 'सुन्द' and 'उपसुन्द'। Read "सुन्दोपसुन्द-नाशः **फलमात्मभुवं तिलोत्तमासृष्टेः ।** जनमृतये तां सृजता किं दृष्टं सुरहितं तेन" ॥—KM. 963. "श्रीभगवानुवाच । तिलोत्तमा-नाम पुरा (**ब्रह्मणा**) योषिदुत्तमा । **तिलं तिलं समुद्धृत्य रत्नानां निर्मिता** शुभा" ॥१॥—*Māhā.* (अनु-शासन-पर्वे उमा-महेश्वर-नामाध्यायः)। In the *Ādi* (2. 11. 15. *q.v.*), however, she is said to be created by विश्वकर्मा by the **order of Brahmā**. The poet means to say that this Śak. is **another** (अपरा **अन्या अपूर्वा**—K.) matchless creation of the most perfect beauties of the creator. According to C and Ś, **अपरा refers to Lakṣmī, the goddess of beauty.** In MK वसन्तसेना is termed **Lakṣmī** by Viṭa—'**अपरा श्रीरेषा**'—V. 12 ; Also Cf. "**अपरमिव** पुरुष-द्वेषि-प्रजापति-निर्माणम्"—*Kād. p.* 673 ; '**अयमपरः** मुनिमायामयो मकरकेतुरुत्पादित.'—*Ibid. p.* 542. 'रजनि-कर-कला-कलाप-लावण्येन निर्मिता * भगवती **द्वितीयेव गौरी**' &c. *Ibid*—*p.* 528. Or, **अपरा** means अविद्यमाना परा यस्याः—That which has no match, **nonpareil**. Or again, न परः (उत्तरः) यस्याः सा=अपरा—**which has nothing after it i.e., the last**. The idea is—विधाता has shown his **last skill** in this matter ; Or, in other words Śakuntalā is the **culmination of the Creator's skill**. "परः श्रेष्ठारि दूरान्योत्तरे क्लीवं तु केवले" इति मेदिनी। Cf. "निर्माण-दक्षस्य समीहितेषु **सीमेव पद्मासन-कौशलस्य**'—BK. I. 6. (Also **Milton** quoted below). **6.** धातुः **विभुत्वम्** &c.—Brahmā is not only a धाता (*creator, protector*, डुधाञ् धारण-पोषणयोः), but He is also विभुः (*all-powerful, omnipotent*). This is why it has been possible for Him only to create such a nonpareil beauty (Cf. "कथं नु * * निर्मातुं प्रभवेत् मनोहर-मिदं रूपं पुराणो मुनिः"—*Vik. I.* 8.). Despite His omnipotence, even the creator had to paint an out-line of her

faultless figure first, and later on He infused life-breath into it. But the king does not seem to be satisfied with the idea that she was first painted in a canvass, so he **rectifies** himself by saying that the creator created her **mentally**. (*For reasons vide n.* 4). For the same idea differently expressed, Cf. '**या तत्र** स्यात् युवति-विषये सृष्टि**राद्येव धातुः**—*MD. II.* 21 & PA. *Dr. Wilson* quotes the following from *Milton* describing *Eve*—"*Oh, Fairest of creation* ? **last and best of all God's works"—Paradise Lost,** *IX.* 1, 896 ; also Cf. "Thou cunning'st pattern of excelling nature"—**Othello**. *V.* 2 ; "So perfect that the gods who formed you wondered, At their own skill and cried, A lucky hit has mended our design"—**Dryden**, (*All For Love. I.*) "**सौन्दर्यं तत्ता-**दृशमशेषयोषिद्–विलक्षणं सृजतः । यन्निष्पन्नं धातुस्तन्मन्ये काक-तालीयम्" ॥ –KM. 120. In the last half, '**अनुचिन्त्य**' has its Nominative (अहम्) understood, while the Nominative of 'प्रतिभाति'—is a **different** word 'सा' । This goes against the rule 'समान-कर्तृकयोः पूर्वकाले'—(3. 4. 21) ; i.e. the Nominatives of the infinite verb with (क्त्वा) or (ल्यप्), and the finite verb **must be the same**. For such **anomaly**, read VS. III. 6 ; PA & *MD.* 12 ; MR. II. 21 ; *Vik. II.* 10 ; (60*n.* 1). The difficulty of एककर्तृकत्व is removed by considering such verbs as '**स्थित**', '**उद्यत**', '**व्यवसित**', '**वर्तमान**' &c. to be **understood** after the infinite verb. Read—"इह पुत्रं दृष्ट्वा सुखं भवति' ; "शत्रुं दृष्ट्वा दुःखं भवति' : 'पापं कृत्वा अनुतापः स्यात्' ; 'रथे तु वामनं दृष्ट्वा पुनर्जन्म न विद्यते' इत्यादौ '**स्थितस्य**' इति पदम् अध्याहार्यम् (उह्यम्)"—**Prabhā** ; **T.**—3329. Also 'अवजानासि मां' यस्मादतस्ते न भविष्यति । मत्-प्रसूतिमनाराध्य प्रजेति त्वां शशाप सा' ॥ इत्यत्र आराधन-कर्तृकर्तृका क्रिया नास्तीति **स्थितस्य** ते इत्यध्याहृत्य व्याख्येयम् । एवम् "**स्नात्वा** कनखले तीर्थे पुनर्जन्म न **विद्यते**", "प्रातःकाले शिवं **दृष्ट्वा** निशि पापं **व्यपोहति**" इत्यादावप्यूह्यम्'—**प्रभा** on "**वैयाकरण-भूषण-सारः**—*p.* 442.

7. According to *R's* construction there is—'**समाप्त-पुनरात्तता दोषः**' in this Śloka, as the sentence seems to be **complete** in the third line, and the fourth line seems to be a **separate** sentence.

Hence he remarks 'तृतीय-चतुर्थ-चरणयोः व्यत्यय-पाठेन समाप्त-पुनरात्तता-दोषःपरिहर्तव्यः' i. e. the 3rd and 4th lines should change places.

Text :—विदूषकः—जइ एव्वं पच्चादेसो दाणिं रूववदीणं (यदि एवं प्रत्यादेश इदानीं रूपवतीनाम्) ।

Vidūṣaka—If that's so, (*all the*) beauties are put to shame.

राजा—इदञ्च मे मनसि वर्तते ।

अनाघ्रातं पुष्पं किसलय[1] मलूनं[2] कररुहै[3]
शिखरिणी **अनाविद्धं[4] रत्नं मधु नवमनास्वादित-रसम् ।**
(यमनसभलग) **अखण्डं पुण्यानां फलमिव च तद्रूपमनघं[5]**
न जाने भोक्तारं कमिह समुपस्थास्यति विधिः ॥१०॥

King—This again occurs to my mind—

Her spotless[5] beauty is (*like*) a flower (*as yet*) un-smelt, a tender sprout[1] not (*yet*) torn[2] by finger-nails[3], a gem not (*yet*) perforated,[4] fresh mead whose flavour is not (*yet*) tasted, (*o.*) like the very fruit of pious deeds not (*yet*) divided. I know not whom the creator will resort to as the enjoyer in this case. (10)

V. L.—'अनाविद्धम्'—R. V. M. 'अनामुक्तम्'—S. B.

विदूषक इति । 'प्रत्यादेशः' निराकृतिः । ('प्रत्याख्यानं निरसनं प्रत्यादेशः निराकृतिः' इत्यमरः) । **अनाघ्रातमिति ।** 'अनघम्' अपापं दोष-लेश-शून्यम् इति यावत् ('अनघो निर्मलाऽपाप-मनोज्ञेषु अभिधेयवत्' इति मेदिनी), तस्याः शकुन्तलायाः 'रूपं सौन्दर्यं' (तल्लक्षणं यथा—'अङ्गान्यभूषितान्येव केनचिद् भूषणादिना । येन भूषितवद् भान्ति तद्रूपमिति कथ्यते' इति उज्ज्वलनीलमणिः) 'अनाघ्रातं' अगृहीत-गन्धं सद्यः प्रस्फुटितं वृन्त-स्थितम् इत्यर्थः । 'पुष्पमिव' । 'कररुहैः' नखैः ('पुनर्भवः कररुहो नखोऽस्त्री नखरोऽस्त्रियाम्' इत्यमरः) 'अलूनम्' अच्छिन्नं 'किसलयं' नवपल्लवम् इव । 'अनाविद्धम्' वेध-रहितं देह-संसर्गेणाऽदूषितम् इति भावः । 'रत्नमिव' । 'न आस्वादितः' उपभुक्तः 'रसः' माधुर्यं 'नवं मधु' क्षौद्रं पुष्परसम् इति यावत्, "न तु मद्यं, पुराण-मद्यस्य एव उत्कृष्टत्वात्' । ('मधुः चैत्रे च दैत्ये च, मद्ये पुष्परसे मधु' इति हट्टचन्द्रः) यस्य तत् । 'पुण्यानां' पवित्राऽऽचरणानाम् 'अखण्डम्' अविभक्तम् 'फलमिव' फलस्य खण्डत्वे-तस्य कथञ्चिद् वैकल्यं स्यात् । 'विधिः' ब्रह्मा 'इह' शकुन्तलायाः सौन्दर्यविषये 'कं' जनं 'भोक्तारं' संभोगादिकारिणं 'समुपस्थास्यति' आनुकूल्येन उपगमिष्यति ।

न जाने' [' अनुपसर्गात् ज्ञः' (१।३।७६) इति कर्त्रभिप्राये क्रियाफले आत्मनेपदम्] (मालो-पमालङ्कारः। अनाघ्रतमित्यादि-विशेषणानां साभिप्राय-प्रयोगात् परिकरालङ्कारश्च। श्रुति-वृत्त्यनुप्रासौ। अत्र गुण-कीर्तनं नाम नाट्य-लक्षणञ्च। तल्लक्षणं यथा दर्पणे—"गुणानां कीर्तनं यत्तु तदेव गुण-कीर्तनम्"। शिखरिणी वृत्तम्) ॥१०॥

69n.—1. **प्रत्यादेशः**—Eclipsing, supplanting, putting to shade (*Com.*). Cf. 'प्रत्यादेशः रूप-गर्विताया: श्रियः'—*Vik. I* ; 'प्रत्यादिष्ट-विशेष-मण्डन'—*VI.* 6. *infra* ; *Ra. I.* 61. **2.** **अलूनं**&c.—लू+क्त कर्मणि=लुनम्। ('ल्वादिभ्यः'—8. 2. 44). इति 'त' इत्यस्य 'न'। (*A twig*) not culled and made into ear-rings, hence **अभुक्तं (unenjoyed)**. Cf. ('**सदयाऽलून-पल्लवाः**'—*Ku. II.* 41 ; "As chaste as is the **bud ere it be blown**"—**Much Ado About Nothing**—*IV. I.* करे रोहति इति कर+रुह्+क कर्तरि ('इगुपधा-ज्ञा-प्री-किरः कः'—3. 1. 135]=**कररुहः**—Nail. **3.** **आविद्धं** = आ + व्यध् + क्त कर्मणि—Perforated, bored ; व्यध् = विध् (सम्प्रसारण) by 'ग्रहि-ज्या-वयि-व्यधि-वष्टि-विचति-वृश्चति-पृच्छति-भृज्जतीनां ङिति च'—(6. 1. 16) ; न आविद्धम्—अनाविद्धम्—Not bored for using as an ornament (Ra. 1. 4.), hence **अभुक्त**। This reading is certainly better than 'अनामुक्त', as it is an **excellent epithet** for a *virgin*. **4.** **अखण्डं** &c.—Not cut in twain, hence not yet partaken of. Men enjoy the fruits of their respective पुण्यs in heaven as long as their stock of merit is not exhausted. (Cf. "क्षीणीभूते-सुचरित-फले स्वर्गिणां गां गतानाम्"—*MD* & PA.);"क्षीणे पुण्ये मर्त्यलोकं विशन्ति" —Gītā. *IX.* 21 ; "क्षीण-पुण्या इव गगनतारका"—*MK. IV.*) but whoever gets Śak., (whose beauty is the result of all the merits done in previous birth) will enjoy uninterrupted happiness. Cf. "Age cannot wither nor custom stale Her infinite variety"—**Antonio and Cleopetra.** **5.** **अनघं रूपम्**—Cf. "Oh fresh stainless youth"—**Twelfth Night.** *II.* 5. **समुपस्थास्यति**—The ordainer will approach or resort to (with a view to inviting him to enjoy such a beauty). Cf. "धन्या सा या लक्ष्मीरिव * करतलमस्य वसुन्धरा-सपत्नी ग्रहीष्यति"—Kād. *p.* 332. "किं खलु कृतमवदातं कर्म वसुन्धरया ययासि

भर्ता समासादितः"—*p*. 375. उप+स्था does not mean 'देव-पूजा' &c.—(1. 3.25.), hence no Atmp. or, Atmp. is **optional** by the Vārt, 'वा लिप्सायाम् इति वक्तव्यम्'–(1.3.25). **6.** For a similar idea. Cf. 'क्वाकार्यं शश-लक्ष्मणः क्व च कुलं भूयोऽपि दृश्येत सा। दोषाणां प्रशमाय न श्रुतमहो कोपेऽपि कान्तं मुखम्॥ किं वक्ष्यन्त्यपकल्मषाः कृतधियः स्वप्नेऽपि सा दुर्लभा। चेतः स्वास्थ्यमुपेहि कः खलु युवा धन्योऽधरं धास्यति"—*Qtd. MB*. Also Cf. the First four lines with the following **Latin** poems—"Ut flos in septis secretus nascitur hortis, Ignotus pecori, nullo contusus aratro, Quem mulcent auroe, firmat sol, educat imber : Multi illum pueri, multae optavere puelle : Idem quum tenui carptu defloruit ungui, Nulli illum pueri, nullae optavere puellae : Sic virgo, dum intacta manet—" **Catullus, Carmen Nuptiale,** 39.—(i.e. Just as a flower springs up secretly in a fenced garden, unknown to the cattle, **bruised** by no plough, which the wind caresses, the sun strengthens, the shower draws forth ; many boys, many girls desire it ; when the same flower fades, **nipped by a sharp nail**, no boys, no girls desire it : **So also a maiden** as long as she remains **virgin** (i.e. **untouched**). Cf. 'अपरक्षित-कोमलस्य यावत्' &c. Act. III. 22.

Remark :—This Śloka occurs in शृङ्गारशतक with a little variation in the 3rd and 4th lines. * अखण्डं पुण्यानां फलमिव भवद्रूपमनघम्। न जाने भोक्तारम् कमिह समुपस्थास्यते इति। Most probably this (*also* 'भवन्ति नम्रा' &c.—*Śak. V*. 12 ; 'प्रारभ्यते खलु' &c.—*MR. II*. 17, 18.) *are interpolations* by the copyists on *Bhartṛhari*. This śloka has also been quoted by *Dhanañjaya* as instance of 'शोभा' ('रूप-यौवन-लालित्य -भोगाद्यै रङ्गभूषणम् शोभा प्रोक्ता') ।

Text :—**विदूषकः—तेण हि लहु परित्ताअदु णं भवं। मा कस्सवि तवस्सिणो इङ्गुदी-तेल्ल-चिक्कण-सीसस्स हत्थे णिपडिस्सदि** (तेन हि लघु[1] परित्रायतामेनां भवान्। मा कस्यापि तपस्विनः इङ्गुदी-तैल-चिक्कण-शीर्षस्य[1] हस्ते निपतिष्यति)।

Viduṣaka—Then, indeed, let Your Honour rescue her at[1]

once[1], so that she may not fall into the hand of some hermit with[2] his head unctuous (*greasy*) with Iṅgudi-oil.[3]

राजा—परवती खलु तत्रभवती। न च सन्निहितोऽत्र गुरुजनः।

King—But Her Ladyship has a master ; moreover her father is not present here.

विदूषकः—अथ भवन्तम् अन्तरेण[1] कीदिसो से दिट्ठि-राओ।

(अथ भवन्तम् अन्तरेण[1] कीदृशः अस्याः दृष्टिरागः)।

Vidūṣaka—Regarding[1] Your Majesty, what sort of sight-passion has she got ?

राजा—निसर्ग[1]देवाप्रगल्भ[2]स्तपस्वि-कन्या-जनः। तथापि तु—

द्रुतविलम्बित (नभभर) **अभिमुखे मयि संहृतमीक्षितं हसितमन्य-निमित्त-कृतोदयम्।**
विनय-वारित-वृत्तिरतः[3]स्तया न विवृतो[4] मदनो न च संवृतः[5] ॥११॥

King—An ascetic's daughter is indeed shy[2] and reserved[2] by nature. Yet—

(*When*) I faced (*her*), her glance (*towards me*) was withdrawn, (*and*) she smiled as if it was occasioned by some other cause (*unconnected with me*). Hence her love, with its progress[3] checked by modesty,[3] was neither unveiled[4] nor smothered[5]. (11)

V. L.—'तैलचिक्कण'—B. M. 'तैल-मिश्र-चिक्कण'—R. S. V. S reads 'आरण्यकस्य' after ० 'शीर्षस्य'। 'अथ'—B. M. 'अत्र'—R. V. 'भवन्तम् अन्तरेण'—R. V. M. S. 'तवोपरि'—B. 'ईक्षितम्'—B. M. V. 'ईक्षणम्'—R. 'कृतोदयम्'—R. V. M. S. 'कथोदयम्'—B.

विदूषक इति। 'एनां' शकुन्तलां 'लघु' शीघ्र ('अथ शीघ्र त्वरित लघु क्षिप्रम रं द्रुतम्' इत्यमरः) 'इङ्गुदी-तैलेन चिक्कणं' मसृण (**'चिक्कणं** मसृण **स्निग्धम्'** इत्यम रः) 'शीर्ष'' मस्तक यस्य तथाविधस्य 'कस्यापि तपस्विन' दीनस्य तापसस्य इत्यपि व्यज्यते 'हस्ते' सा 'पतिष्यति' इति 'मा' (वारणार्थकमव्ययम् एतत्। 'मास्म माऽलं च वारणे' इत्यमर)। मा भूत् इत्यर्थः। **राजेति**। 'परवती' पराधीना ('पर-तन्त्रः **पराधीनः परवान्** नाथवानपि' इत्यमरः)। 'न सन्निहितः' अत्राश्रमे उपस्थितः 'गुरुः' एव 'जनः' पिता इत्यर्थः ('गुरुः पिता गुरुः विप्रः' इति गदसिंहः) अस्मात् कथमेनां तूर्णं परिणेष्यामि इति भावः। **विदूषकइति**। अथ' इति विकल्पे (**'अथाथो** संशये स्याताम् अधिकारे च मङ्गले। **विकल्पा**ऽनन्तर-प्रश्न-कार्त्स्न्यारम्भ-सम-

च्चये' इति मेदिनी') 'भवन्तम् अन्तरेण' प्रति 'दृष्टिरागः कीदृशः' सा त्वयि अनुरक्ता न वेति। यतोऽनुरागाऽभावे तत्प्राप्ति-कामना मोघैव। **राजेति**। 'निसर्गादेव' स्वभावादेव ('निसर्गः सृष्टौ स्वभावे च' इति हैमः)। 'अप्रगल्भः' अनिशङ्कः लज्जा-शील इति यावत् ('निःशङ्कता प्रयोगेषु बुधैरुक्ता **प्रगल्भता**' इति उज्ज्वलनीलमणिः) 'तथापि तु' अप्रगल्भत्वेऽपि इति श्लोकेन अन्वेति। **अभिमुख इति**। 'मयि' दुष्यन्ते 'अभिमुखे' शकुन्तलायां दत्त-दृष्टिपाते सति 'ईक्षितं' लोचनं (कृदभिहितो भावः द्रव्यवत् प्रकाशते' इति न्यायात्) 'तया' शकुन्तलया 'संहृतम्' अन्यत्र प्रेरितम् (अनेन शृङ्गारलज्जा ध्वन्यते)। 'अन्यत्' मद्भिन्नं 'निमित्तं' कारणं, तेन 'कृतः जनितः 'उदयः' आविर्भावः यस्य तद्वत्। तथा 'हसितं' हास्यं कृतम्। (अनेन अनुरागः ध्वनितः)। 'अनः तया' शकुन्तलया 'विनयेन' स्वशिक्षया लज्जया इत्यर्थः। ("**विनयः शिक्षा** प्रणत्योः विनया तु बलौषधौ" इति हेमचन्द्रः) 'वारिता' रुद्धा 'वृत्तिः' प्रसरः यस्य स 'मदनः' कामः 'न विवृतः' प्रकटितः 'न च संवृतः' गुप्तः (इति **विरोधाभासः। यथासंख्यमलङ्कारश्च। वृत्त्यनुप्रासः। द्रुतविलम्बितं** वृत्तम् ॥११॥

70n.—1. मा कस्यापि तपस्विनः &c.—The jester **re-echoes** the thought which once did actually strike the king. Cf. * * **राहो निवत्स्यति समं हरिणाङ्गनाभिः**'—(44n. 5). For a similar idea, cf. *MM. II.* 6. **2. परवती**—'परः' स्वामी अस्यास्ति। मतुप् (५।२।५४) —*BhD* Having a master, hence **dependent** (f). Cf. 'भवानपीदं **परवानवैति** महान् हि यत्नस्तव देवदारौ'—*Ra. II.* 56 ; *XIV.* 59 ; (83n. 4). **3. अथ**—Implies विकल्प (250n. 6). The idea is—Granted that she is 'परवती' and her father is 'असन्निहित', still some plans may be chalked out, in case she loves you (अथ—प्रश्ने—Ś.). **4. भवन्तम् अन्तरेण**—सप्तम्यर्थे २या। "सप्तम्या द्वितीया" इति सूत्रेण। उदाहरणं च—"विज्जुज्जोअं मरइ रत्ति"। विद्युद्योतं स्मरति रात्रौ इत्यर्थः। तेन 'अत्रभवति' पूज्ये 'अन्तरेण **विशेषेण** कीदृशः तस्या दृष्टिरागः'। 'अन्तरं'***विशेषेऽवसरेऽवधौ**' इति हैमः–R. He further opines that २या, cannot be used with '**अन्तरेण**' when the meaning is '*towards*,'—"*इति द्वितीया इति तु यत् स **भ्रम** एव ; तस्य 'अन्तराऽन्तरेण युक्ते'—(2. 3. 4). इत्यत्र सूत्रे निपातस्यैव ग्रहणात्"—R. 'प्रतिप-दोक्तत्वात् **निपातयोरेव** ग्रहणं, न तु टावन्त-तृतीयान्तयोः'—*T.* **But Panini's rules were not strictly adopted when Kāli. had flourished,** hence he uses **२या with 'अन्तरेण' though it means** '*Towards*'

here and elsewhere. (*Vik. III* & *Māla. I*). Cf. 'मामन्तरेण चिन्तयति वैशंपायनः'—*Kād* ; (153*n.* 4). **दृष्टिरागः**—Amorous feeling indicated by the eyes. *MM. VI.* 15. **निसर्गात्**—By nature—*Ra. III.* 35 ; *Ki. I.* 6. **5. अप्रगल्भः**—'प्रगल्भः प्रतिभान्विते'—*AK.* —प्र+गल्भ्+पचाद्यच् (3. 1. 134. कर्तरि) =प्रगल्भः—Bold, forward (*Com.* Ra. II. 41 ; *VI.* 20). अप्रगल्भः—Unobtrusive. Cf. 'स्त्रीभूषणं चेष्टितम् **अप्रगल्भम्**' —*BK. II.* 15 ; '**प्रगल्भता** चातुर्यम्'—*MN. on Ku. VI.* 32. 'गणिका भूत्वापि कुल-स्त्रीवत् एकान्त-रक्तत्वात् **अप्रगल्भा**'—*MK* **हसितं**— "विकासित-कपोलान्तम् उत्फुल्लाऽमल-लोचनम् । किञ्चिल्लक्षित-दन्ताग्रं **हसितं** तद्विदो विदुः"—*MG.* This is a sign of उत्तम-नायिका । Cf. "उत्तमस्य समुद्दिष्टं स्मित हसितमेव च" । **7. न विवृतः** (Not fully disclosed) &c.—This inference is from 'वाच न मिश्रयति'—*Śak. I.* 28. **न च संवृतः**—Not fully concealed.

Text :—**विदूषकः**—**ण क्खु दिट्ठ-मेत्तस्स तुह अङ्कं समारोहदि**

(न खलु दृष्टमात्रस्य[१] तवाङ्कम् समारोहति) ।

Vidūṣaka—Surely she couldn't have got up on your lap at the (*first*) sight[1].

राजा—**मिथः**[१] **प्रस्थाने पुनः शालीनतयापि**[२] **काममाविष्कृतो भावस्तत्र-भवत्या । तथाहि**—

दर्भाऽङ्कुरेण चरणः क्षत इत्यकाण्डे[४]

वसन्ततिलका **तन्वी स्थिता कतिचिदेव पदानि गत्वा ।**

(तभजजगग) **आसीद्विवृत्त-वदना च विमोचयन्ती**

शाखासु वल्कलमसक्तमपि[५] **द्रुमाणाम् ॥१२॥**

King—But at our mutual[1] parting, (*her*) feeling (*towards me*) was clearly betrayed by Her Ladyship, despite[2] (*her*) bashfulness.[3] For—Proceeding only a few steps, the slender one paused without[4] any (*real*) occasion[4], alleging that (*her*) foot was pricked by a Kuśa-blade (*Poa cynosuroides*) ; and with backward-turning face, she stood disentangling her bark-robe though[5] not (*really*) caught in the boughs of trees . (12)

विदूषक इति। 'खलु' इति जिज्ञासायां ('खलु स्याद् वाक्य-भूषायां जिज्ञासायाञ्च सान्त्वने' इति मेदिनी')। दृष्ट एव 'दृष्टमात्रं, ['मयूरव्यंसकादयश्च' (२।१।७२) इति अ-स्वपद-विग्रहः नित्यसमासः] तस्य । **राजेति**। 'मिथः' अन्योऽन्यं ('मिथः अन्योऽन्यं रहस्यपि' इत्यमरः) । 'पुनः' इति भेदे। 'शालीनतया' अधृष्टतया लज्जया इत्यर्थः 'अपि' इति गर्हायाम्। 'कामम्' अत्यर्थ 'भावः' अनुरागः आविष्कृतः' प्रकटीकृतः। **दर्भेति**। 'तन्वी' क्षीणाङ्गी सा शकुन्तला ['वोतोगुण-वचनात्' (४।१।४४) इति ङीष्-प्रत्ययः वैकल्पिकः] 'कतिचिदेव पदानि गत्वा' । (दूरात्तु राजा मुष्ठु न दृश्यता गच्छति। अनेन उत्कण्ठाऽतिशयः ध्वनितः) 'अकाण्डे' अनवसरे अकस्मात् इत्यर्थ.('काण्डं स्तम्बे तरुस्कन्धे बाणेऽवसर-नीरयोः' इति मेदिनी) 'दर्भाऽङ्कुरेण' कुशसूच्या, (न तु दर्भेण। तरय सत्वे व्याजः न स्यात्। अङ्कुरस्य अदृश्यमानतया व्याज-सम्भवात्) । 'चरणः क्षतः' विदीर्णः 'इति' उक्त्वा 'स्थिता' मम दर्शनार्थ गमनात् विरता। 'द्रुमाणां' कुरवकवृक्षाणां 'शाखासु असक्तमपि' वस्तुतः अलग्नमपि 'वल्कलं विमोचयन्ती' विटपात् मुक्तं कुर्वती सती, 'विवृतं' परावृतं मद्दर्शनार्थं 'वदन' मुख यस्याः तादृशी 'च आसीत्'। अनेन सुस्पष्टमाविष्कृतो भाव इति हृदयम् (**विरोधाभासो हेतुश्च। श्रुति-वृत्त्यनुप्रासौ**। 'रेणरण' इति 'दानिदनेति' **छेकाऽनुप्रासो**ऽपि। **वसन्ततिलका** वृत्तम्। अथाऽनुरागेङ्गितमित्यधिकृत्य उक्तं रतिविलासे–'**विलम्बस्तु** पथि व्याजात् परावृत्यापि दर्शनम्' इति) ॥१२॥

71n.—1. खलु—Implies जिज्ञासा (R). Are you doubtful about her love, because she did not without much ado come and sit on your lap at once ? **2. पुनः**—Indicates भेद—(Vide 9n. 1.) *i. e.* If the indications mentioned in Śl. 11 are deemed unsatisfactory, the following will certainly appear to be corroborative. **भावः**—Inclination of the mind. *UC. VI.* 14 ; *Ra. VIII.* 52. **3. शालीनतया**—शालां (लक्षणया **शाला-प्रवेशम्**) अर्हति इति शालीनम् लज्जा-शीलम् इत्यर्थः। शाला+खञ् = शालीन (bashful) by 'शालीनकौपीने अधृष्टाकार्ययोः'—5.2 20; (ख = ईन, 7. 1.2.) "इमौ ख-प्रत्ययान्तत्वेन निपात्येते। **रूढि-शब्दावेतौ** कथचिन व्युत्पाद्याविति नात्राऽवयवार्थे अभिनिवेशः कार्यः" ।—T. 1821. According to *MBh,* however, शालाप्रवेश + खञ् = शालीन, "**प्रवेश**" **being elided by निपातन**। "**प्रवेश**-शब्दस्य **अवतरण**-शब्दस्य चोत्तरपदस्य लोपे शालीन-कौपीन-शब्दौ निपात्यते"—

Ibid.—One who is fit to enter the inner apartment. ('अप्रागल्भ्याद् **अन्यत्र गन्तुमशक्तः** शालामेव प्रवेष्टुमर्हतीत्यर्थः'—*JS.*- "शालीनो जड़ः स हि सभायां स्थातुमयोग्यः गृहं प्रविशति"—**Prabhā**) Hence modest. Next भावे तल् [5.1.119] Cf. '**निसर्ग-शालीनः** स्त्रीजनः"—*Māla. IV* ; *Ra. VI* 81 ; *XVIII.* 17 ; *ŚPB.* X*VI.* 83. **4. अकाण्डे**—Without any occasion for so doing. *MM. I.* 18. काण्ड=अवसर। **तन्वी**—Cf. 'तन्वी-श्यामा'—*MD.* 83. & PA. **5. कति**=का सख्या येषां ते इति किम्+डति ('किमः सख्या-परिमाणे डति च'—5. 2. 41). शस् विभक्ति is dropped by 'षड्भ्यो लुक्'–(7. 1. 22) ; 'डति च'–(1.1.25) ;('एकवचन-द्विवचनयोः डतिः न प्रयुज्यते'—**Prabhā**), hence always *plural.* 'कतिचित् नीत्वा मासान्'—*MD.* & PA. **विमोचयन्ती**—Vide (53*n*. 3 & 4).

Text :—विदूषकः—तेण हि गहीद-पाहेओ होहि। किदं तुए उववणं तवोवणं त्ति पेक्खामि (तेन हि गृहीत-पाथेयो भव। कृतं त्वयोपवनं तपोवनमिति पश्यामि)।

Vidūṣaka—Then be provided with viaticum. I perceive that the penance-grove has been transformed by you into a pleasure-garden.

राजा—सखे, तपस्विभिः कैश्चित् परिज्ञातोऽस्मि। चिन्तय तावत् केनाऽपदेशेन[1] पुनराश्रम-पदं गच्छामः।

King—Friend, I have been recognized by some hermits So devise on what pretext[1] I may (*once*) again go to the region of the hermitage.

विदूषकः—को अवरो अवदेसो तुम्हाणं राआणं (कः अपरः अपदेशः युष्माकं राज्ञाम्)? **णीवार-च्छट्ठ-भाअं अम्हाणं उवहरन्तु त्ति** (नीवार-षष्ठभागम् अस्माकम् उपहरन्तु इति)।

Vidūṣaka–What other expedient[1] (*is needed*) for you kings ? (*Go and say*)—(Let the (*hermits*) bring our sixth part of the wild rice.'

राजा—मूर्ख, अन्यमेव भागधेयमेते तपस्विनो निर्वपन्ति, यो रत्न-राशीनपि विहायाभिनन्द्यते। पश्य—

श्लोक
यदुत्तिष्ठति वर्णेभ्यो नृपाणां क्षयि[1] तद्धनम्।
तपःषड्-भागमक्षय्यं[2] ददत्यारण्यका[3] हि नः ॥१३॥

King—Fool! these hermits pay quite a different kind of tribute,[2] which is valued more than even heaps of jewels. See—The wealth of the kings, that proceeds from the (*four*) castes is perishable,[3] (*whereas*) [5]the denizens of the forest [5]pay us the sixth part of (*their*) penance which is really imperishable. (13)

V. L.—'पुनराश्रमपदं गच्छामः'—B. M. 'सकृदपि आश्रमे वसामः'—R. V. S. 'अन्यभागधेयम् एते तपस्विनो निर्वपन्ति'—B.M. 'अन्यद्भागधेयमेतेषां रक्षणे निपतति'—R. S. V.'तद्धनम्'—B. 'तत फलम्'—R. V. M. S.

विदूषक इति। 'गृहीत' पथि साधु इति 'पाथेयं' पथि सम्बलं येन तादृशः 'भव'। पुनराश्रमं गच्छ इत्यर्थः। ["कृत त्वया उपवनम्"—इत्यत्र **अविमृष्ट-विधेयांश**-रूपः दोषः। लक्षणं तूक्तं प्राक्" प्रस्तावनायाम्]। **राजेति**। 'अपदेशेन' व्याजेन ('**अपदेशः** पुमान् लक्ष्ये निमित्त-**व्याजयोरपि**' इति विश्वः) 'सकृत्' एकवारं ('सकृत् **सहैकवारयोः**' इत्यजयः। 'एकस्य सकृत्' (५।४।१९) इति सुच्, एक-शब्द-स्थाने सकृत् आदेशश्च)। (अत्र **तापनं** नाम प्रतिमुखसन्धेरङ्गम्। 'उपायादर्शनं यत्तु **तापनं** नाम तद्-भवेत्' इति दर्पण-लक्षणात्)। **विदूषक इति**। 'अस्माकं' राजग्राह्यं 'नीवारस्य षष्ठ-भागम् उपहरन्तु' मह्यं देहि 'इति' छल कृत्वा प्रविशतु इति भावः। **राजेति**। 'अन्यं' 'भागधेयं' भागं करम् इति यावत् ["भाग-रूप-नामभ्यो धेयः", (वा—५।४।२५); 'भागधेयः करो बलिः' इत्यमरः] 'निर्वपन्ति' प्रददति, यो रत्नाणां राशीन्' समूहान् 'अपि विहाय' परित्यज्य 'अभिनन्द्यते' सादरं गृह्यते। तेन त्वयोक्तः व्याजः न युक्तः। वक्ष्यमाण-श्लोके तदेव प्रतिपादयति। **यदिति**। 'नृपाणां' मादृशानां 'वर्णेभ्यो' ब्राह्मणादिभ्यः ('वर्णः स्वर्णे व्रते स्तुतौ। रूपे द्विजादौ शुक्लादौ कुथायामक्षरे गुणे। भेदे गीति-क्रमे चित्रे यशस्ताल-विशेषयोः। अङ्गरागे च वर्ण तु कुङ्कुमे'—इति हैमः)। 'यत् धनं' भागधेय-रूपं वित्तम् 'उत्तिष्ठति' लभ्यते "तत् क्षयि' चौरादिना नश्वरम् फल्गुफलमित्यर्थः। 'आरण्यका' वनेवासि-तपस्विनः 'नः' अस्मभ्यम् 'अक्षय्यं हि' चौरादिना अनश्वरम् 'तपसः षट्' षष्ठः 'भागः' तपःषड्भागः (**वृत्ति-विषये संख्या-शब्दस्य पूरणा-र्थत्वम् ज्ञेयम्**') तम्, अप्रत्यक्ष-भावेन 'ददति'। तपसः प्राधान्य-प्रतिपादनात् **व्यतिरेकालङ्कारः**। 'चिन्तय' इत्यादिना एतदन्तेन **विलासो** नामाङ्गमुपक्षिप्तम्। तल्लक्षणं तु—"समीहा रतिभोगार्था **विलास** इति कथ्यते"। अपिच मूर्ख इत्यनेन प्रत्यक्ष-निष्ठुरोक्तेः **वज्रं** नाम प्रतिमुखसन्धेरङ्गम्।" "प्रत्यक्ष-निष्ठुरं वज्रम्" इति दर्पण-लक्षणात्। **श्लोकोवृत्तम्**) ॥१३॥

72n.—1. गृहीत-पाथेयः—पथि साधुः इति पथिन्+ढञ् ('पथ्य् अतिथि-वसति-स्वपते ढञ्—4. 4. 104)=पाथेयः—Viaticum. The jester means to say—Like an intenerant you must have some provision for your journey (*of love*) i.e. in order to progress in your love affairs, you must not damp your ardour but you should again visit the penance-grove. Note that Vidū. is characteristically **thinking of etables.** (*Vide* 222*n*. 7.—*end.*) Cf. "Traverse, go provide thy money"—**Othello.** 1. 3. **चिन्तय तावत्** &c.—Cf. "**चिन्तय तावदुपायं** यथा मे* मालविका प्रत्यक्षदर्शना भवतीति"—*Māla. I* ; Act III—Text. after Śl. II. 2. **नीवार-षष्ठ-भागम्**—(19n. 1). The jester refers to the king's practice of taking **one-sixth** of the produce such as rice, fruits &c. Read—"**पञ्चाशत्भागः** आदेयः राज्ञा पशु-हिरण्ययोः । धान्यानामष्टमो भागः, **षष्ठो द्वादश** एव वा ।। आददीताथ **षड्भागं** द्रु-मांस-मधु-सर्पिषाम् । गन्धौषधि-रसानाञ्च पुष्प-मूल-फलस्य च ।। पत्र-शाक-तृणानां च चर्मणां वैदलस्य च । मृन्मयानाञ्च भाण्डानां सर्वस्याश्ममयस्य च"—*MS. VII.* 130—33 ; *Ra. V.* 8 ; X*VII.* 65. By 'षष्ठाऽष्टमाभ्या ञ च'—(5. 3. 50) 'ञ' and 'अन्' come after 'षष्ठ' in the **sense of 'भाग'** giving the forms **'षाष्ठ'** and **'षष्ठ'**, hence 'षष्ठ' is here **भागवाचक**, and *not* (**पूरणवाचक**), so षष्ठी समास is not **barred** by 'न पूरण-गुण-सुहितार्थ-सद्'—&c. (2. 2. 11). **अस्माकम्**—Optionally २या by 'गुणकर्मणि वेप्यते'—Vārt. 623. Cf. 'नेता अश्वस्य **स्रुघ्नस्य स्रुघ्नम्** वा' । 3. **अन्यमेव भागधेयम्**—The King reminds the jester that he, though he may be dying of want, cannot have any tax from a **श्रोत्रिय**—'म्रियमाणोऽपि आददीत न राजा । श्रोत्रियात् करम्"—*MS. VI.* 133. But they pay tax in another way i.e. the **sixth part of the merit arising from** 'तपस्या' । **'भागधेय'** meaning **'tax'** is *masculine*, but meaning **'luck'** is *neuter*. Cf. 'भागधेयं मतं भाग्ये, भाग-प्रत्यययोः पुमान्—*Medinī.* 4. **निर्वपन्ति**= निर्+वप्+अन्ति । क्तः उप्तः । 5. **उत्तिष्ठति**—Arises, accrues, and **not 'to get up'**, still no Atmp. by 'उदोऽनूर्ध्व-कर्मणि'(1. 3. 24), which is barred by— **'ईहायाम् इति वक्तव्यम्'**—(Vārt. 2691). i. e. 'उत्+स्था' must mean ईहा (**चेष्टा**) । Read 'नेह । ग्रामात् शतम् उत्तिष्ठति'—*SK.* **'इच्छा-पूर्विका चेष्टा (ईहा)** । सा च ग्रामाच्छतम् इत्यत्र नास्ति'—T.

—A hundred is yielded by the village i. e. the income (धनम्) is hundred. 6. **क्षयि** =**क्षि**+नि शीलार्थे ('जि-दृ-चि-विश्री-ण्-वमाऽव्यथा-ऽभ्यम-परिभू-प्रसूभ्यश्च'—3. 2.157.)—Perishable. 7. **तपःषड्-भागमक्षय्यं**—A protecting king is entitled to have one-sixth of everything gained by anybody whosoever. Cf."नपो रक्षन् स विघ्नेभ्यस्तस्करेभ्यश्च सम्पदः * वर्णैरपि **षडंश-भाक्**"—*Ra. XVIII.* 65. 'सर्वतो **धर्मषड्-भागो** राज्ञो भवति रक्षतः। **अधर्मादपि षड्भागो** भवत्यस्य ह्यरक्षतः॥ यदधीते यद्यजते यद्दाति यदर्चति। तस्य **षड्भाग-भाग्** राजा सम्यग् भवति रक्षणात्'–*MS. VIII.* 304-5 ; *Mahā-Śānti.* 68. 27. Now षट् being '**संख्यावाचक**', can only enter into कर्मधारय समास by 'दिक्-संख्ये सञ्ज्ञायाम्'–(2. 1. 50) when it is a **संज्ञाशब्द (appellative)**, which is not the case here. According to *BhD*, in cases like "एकाहः", 'द्वीन्द्रिये', 'त्रिभाग.' &c 'एक', 'द्वि', 'त्रि', &c. mean by **लक्षणा**—'प्रथम', 'द्वितीय' 'तृतीय', &c. respectively, hence they no longer being संख्या-वाचक, the rule in question has no application. 'त्रि' (**तृतीया**) यौवनाख्या दशा सदा येषाम् इति त्रिदशाः। **त्रि—शब्दस्य तृतीयार्थता त्रि-भागवत्** ('त्रि-भाग-शेषासु निशासु च क्षणम्'—*Ku. V.* 5.)—*BhD.* 8. **अक्षय्यम्**—क्षेतुम् शक्यम् इति क्षि+यत् कर्मणि निपातने=क्षय्यम्–Imperishable–('क्षय्य-जय्यौ शक्यार्थे'–6.1.81); (226 n. 1). Otherwise the forms are '**जेयम्**'—(fit to be conquered), '**क्षेयम्**'=(fit to be destroyed)—('अर्हे कृत्य-तृचश्च'–3. 3. 169.). **आरण्यकाः**—(52n. 2.) Besides "sages", आरण्यक may mean '**व्याध**' also, so '**विशेषे अविशेषाख्य-दोषः**'।

Text :—(नेपथ्ये) सिद्धार्थौ[1] **स्वः।**

(*In the green room*) Oh joy! we have succeeded[1] in our object[1].

राजा—(कर्णं दत्वा) **अये, धीर-प्रशान्त-स्वरैस्तपस्विभिर्भवितव्यम्।**

King—(*Listening*) Hark! with this deep and tranquil voices hermits must be there.

(प्रविश्य) **दौवारिकः—जेदु जेदु भट्टा। एदे दुवे इसि-कुमारआ पड़िहार-भूमिं उवट्ठिदा।**

[जयतु जयतु भर्त्ता। एतौ द्वौ ऋषि-कुमारकौ प्रतिहारभूमिम्[2] उपस्थितौ]।

(*Entering*) Warder—Victory to our Lord. Here are arrived two hermit-boys at the gate-way.[2]

राजा—तेन हि अविलम्बितं प्रवेशय तौ।

King—Then introduce them immediately.

दौवारिकः—एसो पवेसेमि (एष प्रवेशयामि)। (निष्क्रम्य ऋषि-कुमारकाभ्यां सह प्रविश्य) **इदो इदो भवन्ता** (इतइतो भवन्तौ)।

Warder—Here I am introducing (*them*). (*Exit and re-entering with two hermits*). This way, Holy Sirs, this way.

नेपथ्य इति। 'हन्त' इति हर्षे। ('हन्त हर्षेऽनुकम्पायां वाक्यारम्भ-विषादयोः' इत्यमरः)। 'सिद्धार्थौ' सफलप्रयोजनौ आवां 'स्वः' भवावः। **राजेति**। 'अये' इति सम्भ्रमे। ('अये क्रोधे विषादे च **सम्भ्रमे** स्मरणेऽपि च' इति मेदिनी)। 'धीराः' आमन्द्राः गम्भीरा इति यावत्। 'प्रशान्ताः' स्थिराश्च ये 'स्वराः' तैः उपलक्षितैः। ('इत्थम्भूत-लक्षणे'–२।३।२१ इति तृतीया) 'तपस्विभिः' (गौरवे बहुवचनम्) 'भवितव्यम्। **दौवारिक इति**। 'प्रतिहारस्य' द्वारस्य भूमिः स्थानं ('**भूमिः** स्यात् **स्थानमात्रके**' इति विश्वः) ताः द्वारदेशमित्यर्थः।' ('प्रतिहारो द्वारि द्वाःस्थे द्वाःस्थिताया तु योषिति' इति मेदिनी)। उप-पूर्वक-स्था-धातुरत्र सकर्मकः। 'इतइत' अनेन पथा इति तृतीयान्तात्तसि'।

73n.—1. हन्त—Implies satisfaction, as the hermits find the king inside (*and not away on an hunting excursion*). Cf. 'हन्त जीतो मलयकेतुः'—*MR*. **2. धीर-प्रशान्त** &c.—Because the sound is धीर (deep) and at the same time प्रशान्त (tranquil), so it prognosticates the advent of some hermits. Note that our poet *skilfully* introduces the ascetics as soon as the king utters **'आरण्यकाः' &c.** **प्रतिहार** &c.—*Ku. III*. 58.

Text :—(उभौ राजानं विलोकयतः) **प्रथमः—अहो दीप्तिमतोऽपि विश्वसनीयता[1] अस्य वपुषः। अथवोपपन्नमेतदस्मिन् ऋषिकल्पे राजनि।**

कुतः—अध्याक्रान्ता वसति[2]रमुनाप्याश्रमे सर्वभोग्ये
मन्दाक्रान्ता **रक्षा-योगाद[3]यमपि तपः प्रत्यहं सञ्चिनोति[4]।**
(मभनततगग) **अस्यापि द्यां स्पृशति वशिनश्चारण-द्वन्द्व-गीतः[5]**
पुण्यः[6] शब्दो[7] मुनिरिति मुहुः केवलं राज-पूर्वः ॥१४॥

(***Both look at the king***) First—Oh! radiant as it is, trust-inspiring[1] is his form. Or, this is just what should be in a king,

very little inferior to a Riṣi. For—Lodging[2] has been taken up by him, too, in an Áśrama, enjoyable by all (*people*). He, too, accumulates[4] penance every day by[3] his protection (*of his subjects*)[3], and of him, the controller of (*all*) passions, too, the hallowed[6] title of 'Muni' only preceded by the word 'Royal', and chanted[5] by a pair of ministrels,[5] constantly touches the heaven. (14)

V. L.—.'एतदस्मिन्'—B. N. 'एतत्'—R. V. 'ऋषिभ्यो नातिभिन्ने'—R. V. S. 'ऋषिकल्पे'—B. M. P. Dr. HS.

अहो इति। 'अहो' विस्मये ('अहो ही च विस्मये' इत्यमरः)। 'दीप्तिमतोऽपि' तेजोयुक्तस्याऽपि 'अस्य ' राज्ञः 'वपुषः विश्वसनीयता' अ-भीति-प्रदत्वम्। दिवाकरोपमः दीप्तिमान् जनो दुर्दर्शोभवति, स्निग्ध-दर्शनस्तु प्रायेण प्रस्तरवत् तेजोरहितः परिदृश्यते इति विरुद्ध-धर्मयोः समावेशोऽस्मिन् राजनि सुतरां विस्मयकरः, अथवा नैष विस्मयकरः। 'ऋषि-कल्पे' (५।३।६७) मुनि-सदृशे 'राजनि' दुष्यन्ते' 'एतत् उपपन्नम्' युक्तम्। **अध्येति।** 'अमुना दुष्यन्तेन 'अपि' ऋषिणा इव' ब्राह्मणादिभिः 'सर्वैः' वर्णैः 'भोग्ये उपजीव्ये आश्रयणीये 'आश्रमे' गृहस्थाश्रमे 'वसतिः' वासः गृहम् इति यावत् ('**वसतिः** स्यात् स्त्रियां **वासे** यामिन्याञ्च **निकेतने**" **इति मेदिनी**) 'अध्याक्रान्ता' अवलम्बिता। (मुनिपक्षेः 'सर्वैः' वटुभिः 'भोग्ये' अध्ययनार्थम् आश्रयणीये 'आश्रमे' मठे ('**आश्रमः** ब्रह्मचर्यादौ वानप्रस्थे वने **मठे**' **इति मेदिनी**), 'रक्षा-योगात्' प्रजा-परिपालनात् 'अयमपि' ऋषिरिव 'प्रत्यहं तपः' षष्ठांश-रूपं सुकृतं 'सञ्चिनोति' अर्जयति (तथाचोक्तं मनुना— 'सर्वतः धर्मषड्भागो राज्ञो भवति रक्षतः')। (मुनिपक्षे, 'रक्षायोगात्' जगद्रक्षार्थं शरीर-रक्षणार्थम् वा। 'योगोऽष्टाङ्गस्तन्निमित्तम् 'तपः' चान्द्रायणादि 'संचिनोति' करोति)। '**वशिनः**' जितेन्द्रियस्य 'अस्यापि 'ऋषिरिव 'केवलं राजन्' इति शब्दः 'पूर्वः' यस्मात् तथाविधः राजर्षिः इत्यर्थः। 'पुण्यः' पवित्रः 'मुनिरिति शब्दः' आख्या, राज-मुनिः राजर्षिः इत्याद्युपाधिः इत्यर्थः। 'चारणयोः' स्तुति-पाठकयोः 'द्वन्द्वेन' स्त्री-पुरुष-युगलेन ('द्वद्वं रहस्यं कलहे तथा मिथुन-युग्मयोः' इति मेदिनी) 'गीतः' सन् 'मुहुः प्रतिक्षणं 'द्यां' स्वर्गं 'स्पृशति' अधिरोहति, अतः सर्वथा अयं राजा मुनिकल्पः। मुनिस्तु ऋषिरुच्यते, अयन्तु राजर्षिः इति भेदः। (ऋषि-धर्म-प्रदर्शनात् अत्र **तुल्ययोगिताऽलङ्कारः**। तल्लक्षणं यथा—"विवक्षितं गुणोत्कर्षं यत् समीकृत्य कस्यचित्। कीर्तनं स्तुति-निन्दार्थं सा स्मृता **तुल्ययोगिता**"॥ **व्यतिरेकः श्लेषश्च**। अत्र 'अध्याक्रान्ता—इत्यादीन् बहून् प्रसिद्धान् सामान्य-धर्मान् अनुक्त्वा 'केवलं राजपूर्वं'

इत्यनेन विशेषोक्तेः विशेषणं नाम नाट्य-लक्षणमुक्तम् । तल्लक्षणं यथा दर्पणे—"अर्थान् सिद्धान् बहूनुक्त्वा विशेषोक्ति विशेषणम्" इति । मन्दाक्रान्ता वृत्तम्) ॥१४॥

74n.—1. **अहो**—Implies astonishment on the part of the hermit boys, as they found practically no difference between the king and the sage. But his appearance though imposing, is trust-inspiring (Vide 35n. 6). **उपपन्नम् &c.**—Cf. 'उपपन्नमिदं विशेषणं वायोः' —Vik. 'नैतत् त्वयि उपपद्यते'—Gītā II. 3 ; Note the use of ७मी in **राजनि** with it. 2. **ऋषिकल्पे**—Almost equal to a ऋषि। Cf. '**कुमार-कल्पं** सुषुवे कुमारम्'–*Ra. V.* 36 ; *BC. II.* 18 ; *BK*. I. Duṣyanta is a राजर्षि,, so one degree below a 'Riṣi'. (Vide Rām. I. 57. 5 ; 63.2 ; 19 ; 65. 18, so कल्पप्—5. 3. 67.). 3. **आश्रमे**—Refers to (*i*) तपोवन (ऋषिपक्षे)। (*ii*) गृहस्थाश्रम (राजपक्षे)। **वसति**—Residence. Cf. "कमलवसति"—Śak. V. I ; "वसतिं चक्रे"- PA. & *MD.I*.8 ; 35. **सर्वभोग्ये**—(*i*) Which is the resort of all students. (*ii*) which is the resort of three other आश्रमs *i. e.* in which one can do good to all people of the other three Āśramas—"यथा वायुं समाश्रित्य वर्तन्ते सर्वजन्तवः। **तथागृहस्थमाश्रित्य वर्तन्ते सर्व आश्रमाः**" —*MS. III.* 71 ; "यथा नदीनदाः सर्वे सागरे यान्ति संस्थितम्। तथैवाश्रमिणः सर्वे गृहस्थे यान्ति संस्थितिम्"–*Ibid. VI.* 90. "कालो ह्ययं संक्रमितुं द्वितीयं **सर्वोपकार-क्षममाश्रमं ते**"—*Ra. V.* 10. This is the **first point** of resemblance with a sage. **5.** **रक्षा-योगाद्**—योग=प्रयोग—(*application*) in the case of the king ; "योगः अपूर्वार्थसंप्राप्तौ सङ्गति-ध्यान-युक्तिषु। वपुः स्थैर्ये **प्रयोगे** च विष्कम्भादिषु भेषजे" इति मेदिनी। *i. e.* by his engagement in protection ; or explain योग (**when final in a compound**) as 'on account of.' *i. e.* on account of his protection (*of his subjects*). Cf. 'स **प्रीति-योगात्**—*Ku. VII.* 55. '**सान्निध्य-योगात्**'—*Ra. VII.* 3 ; The king is the owner of a sixth part of तपः (*merit*)—(72*n*. 7). In the case of मुनि, रक्षा=जगद्रक्षा, शरीररक्षा—Preservation of his body or safety of the world. This is the **second point** of similarity. **6.** **वशिनः**—

The sages are surely the controller of passions (*Gītā. II.* 56), so was the king ; besides he was also to control the vicious propensities of the wicked. (Ra. VI. 39 ; Act. V. 8 infra.) This is the **third point** of similarity ; **2. चारण-द्वन्द्व**—Celestial choristers—(a kind of गन्धर्व whose duty was to amuse the denizens of heaven by panegyrics.) 'गन्धर्वाणां ततो लोकः परतः शतयोजनात् । देवानां गायनास्ते **चारणाः स्तुति-पाठकाः**''—*Pp.* ''किंकिणी वाद्यवेदी च वृतो विकट-नर्तकैः । मर्मज्ञः सर्वरागेषु चतुर-श्चारणो मतः''—*SR.* **द्वन्द्व**—**द्वौ द्वौ** इति द्वन्द्वम् ; 'द्वि' is doubled and the form is obtained by निपातन ; ''द्वन्द्वं रहस्य-मर्यादावचन-व्युत्क्रमण-यज्ञपात्र-प्रयोगाऽभिव्यक्तिषु' —(8. 1. 15) इति साधुः'—*BhD.* ''द्वि-शब्दस्य द्विर्वचन पूर्वपदस्य अम्भावो अत्वम् उत्तरपदस्य नपुंसकत्वं च **निपात्यते**''—*BD.* It is also **masculine,** Cf. 'चार्थे द्वन्द्वः''—(2. 2. 29). **3. केवलं राज-पूर्वः**—Duṣyanta was a **ऋषि** in toto, only it was preceded by the term राजन् (i.e. a राजर्षि)। This is the **only point** of difference. In *Ra. II.* 58, Dilīpa is addressed as **'राज्याश्रम-मुनि'** । Cf. ''प्रपच्छ कुशलं राज्ये राज्याश्रम-मुनिं मुनिः ।''॥

Text :— **द्वितीयः—गौतम, अयं स बलभित्सखो दुष्यन्तः ?**

Second Hermit—Gautama, is this Duṣyanta, the friend of the slayer of Bala ?

प्रथमः—अथ किम् । First Hermit—Yes.

द्वितीयः—तेन हि—

नैतच्चित्रं¹ यदयमुदधि-श्याम-सीमां² धरित्रीम्³
मन्दाक्रान्ता] **एकः⁴ कृत्स्नां नगर-परिघ-प्रांशु-बाहुर्⁵भुनक्ति ।**
(मभनगगयय, **'आशंसन्ते समितिषु⁷ सुराः सक्त-वैरा हि दैत्यैर्**
मभनततगग) **अस्याधिज्ये धनुषि विजयं पौरुहूते च वज्रे⁸ ॥१५॥**

Second Hermit—Well, then it is no wonder[1], that this one, with[5] arms long as the (*iron*) bar of the city-gate,[5] alone[4] rules the whole earth[3] with[2] the ocean for it is murky bourn.[2] For when hostilities[8] are commenced[8] with the demons, the gods expect[6] victory in battles[7] from his braced bow as much as from the thunderbolt of Indra.[8] (15)

V. L.—'समितिषु सुराः'—B. V. M. 'सुरयुवतयः'—R. S. ०'समितयः'—Dr. 'बद्धवैराः'—R. V. Dr. 'सक्तवैराः'——B. M. HS. P.

द्वितीय इति। 'वलं' तदाख्यम् असुरं भिन्नवान् इति वलभित् ['सत्-सु द्विष-द्रुह'—इत्यादिना क्विप् (३।२।६१)] तस्य सखा (समासान्तः टच्-५।४।९१)। अत्र काक्वा प्रश्नः व्यज्यते ('वलारातिः शचिपतिः' इत्यमरः)। **द्वितीय इति**। 'तेन हि' दुष्यन्तत्वेनैव हेतुना। **नैतदिति**। 'नगरस्य' **लक्षणया नगर-द्वारस्य** (अनेन अत्यन्त-दैर्घ्यं ध्वनितम्)। 'परिघः' अर्गल. ('परिघः योगभेदेऽस्त्रविशेषेऽर्गल-घातयोः' इति मेदिनी) स इव 'प्रांशू' दीर्घौ ('दीर्घं प्रांशु विशालञ्च' इति धनञ्जयः) 'बाहू' यस्य सः, अतिदीर्घबाहुरित्यर्थः 'अयम्' दुष्यन्तः 'एकः': केवलः एकाकी अन्य-साहाय्यमन्तरेण इत्यर्थः। ('**एकोऽ**न्यार्थे प्रधाने च प्रथमे **केवले** तथा। साधारणे समानेऽपि सङ्ख्यायां च प्रयुज्यते' इति॥) 'उदधिः' समुद्र इव 'श्यामा' कृष्णवर्णा 'सीमा' प्रान्तभागः यस्याः तादृशीं 'कृत्स्नां' सकलां धरित्रीं' पृथिवीं 'भुनक्ति' पालयति ['भुजोऽनवने' (१।३।६६) इति परस्मैपदम्] इति 'यद् एतद् न चित्रं' विस्मयावहम् ('उदधि-श्याम-सीमाम्' इत्युक्ते एकदेशेऽपि तत्सम्भवात् 'कृत्स्नाम्' इत्युक्तम्, **अतो नाधिक-पदता-दोषः**')। कुत इति हेतुमाह। 'हि' यस्मात् 'दैत्यैः', असुरैः सह '**सक्तं' प्रसक्तं प्रवृत्तम्** इति यावत् 'वैरं' शत्रुता येषां तादृशाः 'सुराः' देवाः 'समितिषु' सम्परायेषु युद्धेषु इति यावत् ('समितिः संपराये स्यात् सभायां संगमेऽपि च' इति मेदिनी) 'अस्य' दुष्यन्तस्य 'अधिज्ये. सज्जे आरोपित-गुणे इति यावत् 'धनुषि. चापे [धनुष आदौ निवेशनादाशंसाया धनुषि एव प्राधान्यं बोद्धव्यम्). 'पुरुहूतस्य इन्द्रस्य इदम् इति 'पौरुहूतम्. ऐन्द्रं तस्मिन् 'वज्रे' विजयं. समरे अरीणां पराभवम् 'आशसन्ते' इच्छन्ति। (अत्र पूर्वार्धे 'नगर-परिघ-प्रांशु-बाहुः' इत्यनेन भुज-सहायेन सर्वे शत्रवो हता इति कारणे वक्तव्ये. समस्तोर्वी-जय-लक्षणं कार्यमेवोक्तम् इति **पर्यायोक्ता**लङ्कारः। **वृत्त्यनुप्रासः**। हि-शब्देन हेतुत्वेन उपादानात् **काव्यलिङ्गम्**। नगरेत्यादिविशेषणे **लुप्तोपमा च**। "वज्र-धनुषोः द्रव्ययोः समुच्चितत्वात् **समुच्चया**लङ्कार' इति यत् राघवभट्टपादै रुक्तम्, तन्न। वस्तुतः अप्राकरणिकस्यापि वज्रस्य धनुःसौसादृश्याय सुराणां विजयाशंसन-विषयत्व-रूपैक-धर्मस्योत्पादनात् **दीपकालंकारः**। **नगरपदेन नगर-द्वारे लक्षणा-करणात्** तत्र च रूढिप्रयोजनाभावात् **नेयार्थत्व-दोषः**। स च "एकः कृत्स्नामवति नगर-द्वार-कीलप्रकोष्ठ" इति पठित्वा समाधेयः]। पुनः 'श्याम'-शब्दः समस्तोर्वी-पालनं प्रति न किञ्चित् उपकुरुतः अतः **अपुष्टार्थत्व-दोषः**। "उदधि-प्रान्त सीमाम्" इति पाठेन तस्य समाधानम् इति सिद्धान्तवागीशपादाः। 'अध्याक्रान्ता इत्यादिना एतदन्तेन राज्ञः प्रशंसनात् '**पुष्पं**' नाम प्रतिमुखसन्धेरङ्गम्

उपक्षिप्तम्।' तथाचोक्तं दर्पणे—"पुष्पं विशेषवचनं मतम्" इति। **मन्दाक्रान्ता** वृत्तम् ॥१५॥

75n.—1. बलभित्—The slayer of the demon Bala *i. e.* Indra. (Cf. "बलभिदिव ध्रुवं वभाषे"—BC. X. 41. 'बलारे'—MK. X. 46). The word बल occurs in the RV. (II. 11. 20). Read "*If we now compare the Indian narrative with the records of cuniform inscriptions, there can scarcely remain a doubt that the* **Bala** *of the Ṛgveda was the* **Belus or Bel** *of the inscriptions—that the lofty capital of Bala, in the Ṛgveda, was the lofty citadel of Bel in the inscriptions*"—*Aryan Witness, P.*61. **चित्रम्**—Cf. 'चित्रं वधिरो नाम व्याकरणमध्येष्यते'—SK.; Ra. V. 33 ; (95n. 4.) **2. उदधि-श्याम**—उदक+धा+कि अधिकरणे ('कर्मण्यधिकरणे च'–3. 3. 93)=उदधिः। **उदक**='**उद**' when 'धि' follows, by 'पेषं-वास-वाहन-धिषु च'—(6. 3. 58). श्यामासीमाः=श्यामसीमा–Blue boundary.The base is either '**सीमन्**' or '**सीमा**' with डाप् ('डाबुभाभ्याम् अन्यतरस्याम्'—4.1.13) "श्याम-शब्द समस्त-धरित्री-पालनं प्रति न किञ्चिदुपकुरुत, इति 'विलोक्य वितते व्योम्नि विधु मुञ्च रूपं प्रिये' इति दर्पणोदाहरणवत् **अपुष्टार्थत्वदोषः**" (Com.)—HS. धरति इति धृ+इत्र कर्तरि+(उ–622.) ङीष् ('षिद्गौरादिभ्यश्च'–४।१।४१)=धरित्री **Earth**—Lit. the supporter of all ; this (*supporter of all*) is again *supported* (भुनक्ति) by the king, hence the **Propriety** of the word. 3. **एकः** (singly) **कृत्स्नां** &c.—Cf. "स बेला-वप्र-बलयां परिखीकृत-सागराम्। अनन्य-शासनामुर्वीं शशासैकपुरीमिव"—Ra. I. 30 ; 'स कृत्स्नां पृथिवीं भुङ्क्ते'—MS. VII. 148 **4. नगर-परिघ** &c.—(54n.—1.) परि+हन्+अप् करणे=**परिघः**—(*iron*) bar of the (*city-gate*) ; 'हन्'='**घ**' by 'परौ घः'—(3.3.84) ; optionally–'**पलिघः**' by 'परेश्च घाऽङ्कयोः'— (8. 2. 22). Cf. 'भुवमेकवीरः पुरा-र्गल-दीर्घभुजो बुभोज'—*Ra. XVIII.* 4 ; *XII.* 73. 'गुरु-परिघ-कपाट-संवृत्ता'—*BC.*1.82 ; 'परिघा-यत-बाहवः'–*Rām. III. V.* 16; MM. VIII. 10 ; *Ra. III.* 34. 'परिघ-गुरुभिः दोर्भिः"–Māla.*IV.* A warrior's strength is measured by his capacity in wielding a bow for which long arm and muscular strength are of primary importance.**भुनक्ति**(Protects)—Cf. Ra. IV. 4 ; VIII.

7. 5. **आशंसन्ते**–Hope for. 'आ+शस्' implying wish ('आङ् शसि इच्छायाम्') is आत्मनेपदी। Cf. 'स्वकार्य-सिद्धिं पुनराशशंसे'–*Ra.* III. 57. 'संग्रामं चाशशंसिरे'–*BK.* XIV. 70. 'मनोरथाय नाशंसे'–*Śak. VII.* 13.'तदा नाशंसे विजयाय सञ्जय'—*Mahā.* 'इत्याशशंसे करणैरबाह्यैः'—*Ra. qtd R.* To mean '*to tell* it is *Prmp.* Vide *Ku. III.* 14. **6. समितिषु**— समयन्ति अस्याम् इति सम्+इ+क्तिन् अधिकरणे (3. 3. 94)=समितिः— That in which the soldiers proceed in a line, *i.e.* a battle. (समुद्रोत्थिता) सुरा एषाम् इति सुरा+अर्श आदित्वात् अच्=सुराः। The gods are so called owing to their **addiction to liquor**. *Raghunātha* quotes from the *Rām.* "सुरा-परिग्रहात् देवाः सुराख्या इति विश्रुताः"। 'सुराः' is better than 'सुर-युवतयः' as it is quite unnatural on the part of the ascetics to think of the *celestial females.* Besides enmity exists between the demons and the gods (*and not the* सुरयुवतिस)। **सक्त-वैराः**—'**When hostilities are commenced**'—thus the epithet is very significant as it is indicative of the **imminent cause** of 'आशंसा'। Cf. 'उपस्थित-संपरायः' (*next*). 7. **अस्याधिज्ये धनुषि&c**—'अस्य धनुषि' is **purposely put before 'पौरुहूते वज्रे'** for the extolment of the glory of the king and also to show that the gods had greater confidence in his bow than in the thunderbolt of Indra.—(R). Cf. "निदघे विजयाशंसा च्चापे, सीतां च लक्ष्मणे"–*Ra. XII.* 44"**उपस्थित-संपरायो** महेन्द्रोऽपि मध्यमलोकात् सबहुमानमानाय्य तमेव विजयसेनामुखे नियुङ्क्ते"– *Vik. I* ; *Śak. VI.* 3 ; *VII.* 26. **पौरुहूते**—'पुरु' प्रचुरम् 'हूतम्' आह्वानम् यज्ञेषु अस्य, यद्वा 'पुरूणि' बहूनि 'हूतानि' नामानि अस्य इति **पुरुहूतः**—One who is often invoked (*in sacrifices*), or one who has various names. Next अण्। अधिकरणे सप्तमी or अनादरे सप्तमी। Cf. 'दिवोऽपि **वज्रायुध-भूषणाया** हृणीयते वीरवती न भूमिः'—*BK. II.*. 38 ; *Rām. V.* 13.63. The figure is **दीपक** (Ś) and not समुच्चय (R), according to whom the desire of the Gods for king's victory utimately brings victory to वलभित्। (Vide Com.)

Text :—उभौ (उपगम्य)—**विजयस्व राजन्।**

Both (*Approaching*)—**Be** victorious, O King.

राजा (आसनात् उत्थाय)—**अभिवादये भवन्तौ।**

King (*Rising from his seat*)—I salute you both.

उभौ—स्वस्ति भवते। (फलानि उपहरतः)

Both—Hail to Your Highness. (*They present fruits*).

राजा (सप्रणामं परिगृह्य)—**आज्ञामिच्छामि।**

King (*Accepting them with a bow*)—I wish for a command.

उभौ—विदितो भवानाश्रमसदा[1]मिहस्थः। तेन भवन्तं प्रार्थयन्ते—

Both—Your Highness is known to the denizens[1] of the hermitage[1] as being here ; (*they*) therefore request Your Honour—

राजा—किमाज्ञापयन्ति ? King—What do (*they*) command ?

उभौ—तत्रभवतः कण्वस्य महर्षेरसान्निध्यात्[2] रक्षांसि न इष्टि-विघ्नमुत्पादयन्ति। तत् कतिपय-रात्रं सारथि-द्वितीयेन[3] भवता सनाथीक्रियता[4]माश्रम इति।

Both–Because[2] of the absence[2] of His Holiness, the great sage Kaṇva, the fiends are creating disturbance to our sacrifices. So for a few nights, let the hermitage be[1] made to have a lord[4] by Your Honour with your[3] charioteer as your second[3].

राजा—अनुगृहीतोऽस्मि। King—I am (*much*) favoured.

V. L.—'आज्ञामिच्छामि'—B. M. V. 'आज्ञापयितुमिच्छामि'—R. S,

उभाविति। 'स्वस्ति' मङ्गल 'भवते' ('नमः स्वस्ति'—२।३।१६ इति ४र्थी) 'उपहरतः' प्रयच्छतः। रिक्त-हस्तेन राजदर्शनम् निषिद्धम् इति स्मरणात्। **उभाविति** 'इहस्थः' अत्राश्रमे स्थित.। आश्रमे सीदन्ति 'आश्रम-सदः' (३।२।६१) तपोवन-निवासिनः, तेषाम् 'विदितः' परिज्ञातः ('क्तस्य च वर्तमाने' इति कर्तरि षष्ठी)। **उभाविति।** 'तत्रभवतः' पूजनीयस्य, गौरवितस्य ('गौरवित स्त्वार्यमिश्रा श्लाघ्या स्तत्रभवन्मुखा' इति त्रिकाण्डशेषः) सन्निधिः एव 'सान्निध्यम्' समीपस्थितिः। ('क्वचित् स्वार्थिकाः प्रकृतितः **लिङ्गवचनानि अतिवर्तन्ते**' इति वामनः। अतः क्लीवत्वम्) 'न सान्निध्यात्' कण्वस्य असमीप-स्थितत्वात्। 'इष्टेः' (६।१।१५) यज्ञस्य 'विघ्न' व्याघातम्। 'सारथिः द्वितीयः' यस्य तेन सारथिमात्र-सहायेन। 'कतिपय-रात्र' ('कालाध्वनोरत्यन्तसंयोगे'–२।३।५ इति २या)। **असनाथः** सनाथः क्रियताम् इति 'सनाथीक्रियताम्'। **अत्राश्रमे एव अवस्थाय** राक्षसा दूरीक्रियन्ताम्। अत्र **'उपन्यासः'** नाम प्रतिमुख-सन्धेरङ्गम् उपक्षिप्तम्। तथाचोक्तं दर्पणे—"**उपन्यासः** प्रसादनम्" इति)।

76n.—1. फलानि &c.—Because a king should not be approached with empty hands—"**रिक्त-पाणिस्तु** न पश्येत्तु राजानं देवतां गुरुम्। नैमित्तिकञ्च वैद्यञ्च फलेन फलमादिशेत्"—*qtd. N. Cf.* "यायावराः पुष्प-फलेन चान्ये"—*BK. II.* 20. "हैयङ्गवीनमादाय घोषवृद्धान् उपस्थितान्"—*Ra. I.* 45 ; *XVI.* 32.' 'अरिक्त-पाणिना तत्रभवती द्रष्टव्या, तत् वीजपुरकेण प्रेक्षितुमिच्छामीति"—*Māla. III.* **2. प्रार्थयन्ते**—"प्रार्थयन्ते आश्रमसद इति विभक्ति-विपरिणामेन संबध्यते"—*R. i.e.* the Nominative 'आश्रमसदः' is obtained from आश्रम-सदाम्' by 'विभक्ति-विपरिणाम'। **विदितः**—*Ra. X.* 39. **3. आज्ञापयन्ति**—(79n. 1). The sages use the word '**प्रार्थयन्ते**' (*request*). but the king atonce corrects it by substituting '**आज्ञापयन्ति**' (*what do they command*) here and in Vik. **II.** This sort of interruption bespeaks great **humility** on the part of the king. **4. कण्वस्य महर्षेः** &c.—Shows that the fiends were afraid of the great spiritual power of the sage. Hence his absence (असान्निध्यात्) is highly advantageous to both the demons and the king. The sages though capable, do not like to use their hard-earned तपः against the goblins—"बहुविधं तपश्चैव दुश्चरं चापि राघव। तस्माच्छापं **न मुञ्चामः समर्था अपि रक्षणे**'॥—*Rām. I.* सम्+नि+धा+कि भावे ('उपसर्गे घोः किः'—3 3.92.=सन्निधिः। स्वार्थे ष्यञ्। सानिध्यम्। रक्ष्यते हविः एभ्यः इति असुन् अपादाने (उ.—938=रक्षांसि ('भीमादयोऽपादाने'—3. 4. 74.)। इज्यते अनया इति यज्+क्तिन् करणे (3. 2. 63.)=**इष्टिः**—Sacrifice ; य=इ, by 'वचि-स्वपि-यजादीनां किति'-(6. 1. 15). 'इष्टि' derived as 'इष्+क्तिन्' means **desire.** Cf. "**इष्टिर्मताऽभिलाषेऽपि** "संग्रहश्लोक-यागयो—*Medinī.* वि+हन्+क करणे ('घञर्थे क-विधानम्'—*Värt.* 3. 3. 58.) = **विघ्नः**—(51n. 10). **5. कतिपय-रात्रं**—समासान्त अच् comes after रात्रि by the Special Sūtra 'अच्' got by योगविभाग of 'अच्' प्रत्यन्व—पूर्वात् सामलोम्नः'—(5. 4. 75) 'अच्' इति योग-विभागात् पृथक् सूत्रं कृत्वा 'दीर्घरात्र.', 'वर्षारात्र'—**Prabhā** ; *SK.* 943. But *BM* differs—"वस्तुतस्तु **योगविभागस्य भाष्ये अदर्शनात्** पृषोदरादित्वाद् एव उचितम्।" The word is singular and is expressive of an aggregate. Now as 'कतिपय' is not a **numeral** 'कतिपय-शब्दो न संख्या'—VM) so 'अहः सर्वैकदेश-संख्यात-पुण्याच्च रात्रेः'

—(5. 4. 87), or 'संख्यापूर्वं रात्रं क्लीवम्'—*Vārt*)–(814),does not apply. **Masculine** by 'रात्राऽह्नाऽहाः पुंसि'—(2. 4. 29). Again **कतिपय** should have been **final** in the **समास** by 'पोटा-युवति—(744), but **'समास-विषेरनित्यत्वात् "कतिपयरात्रं सनाथीक्रियताम् आश्रम्"** इति। कतिपय-दिनस्यापि हंसा दशार्णाः (PA. & MD. 23) इति च'—**Prabhā**. .*P*. 61 ; *VŚ*. 23 6. **सारथि-द्वितीयेन**—Cf. 'प्रयत-**परिग्रह-द्वितीयः**'—*Ra. I*. 95. सरति अश्वान् इति सृ (अन्तर्भावितण्यर्थः)+घथिन् (उ—531) ; (8*n*. 2). तेन द्वितीयः—or स द्वितीयः यस्य तेन । This shows that **he alone is more than sufficient** for the situation. Cf. "सेना परिच्छद स्तस्य द्वयमेवार्थ-साधनम् । शास्त्रेष्वकुण्ठिता-बुद्धि. **मौर्वी धनुषि चातता** ॥"—*Ra. I*. 19. 'एकः सारथिना सह'—*Rām II*. 31. 33 ; *Ra. IX*. 10. **सनाथी** &c.—(38n. 1).

Text : —विदूषकः (अपवार्य)—**एस दाणीं भवदो अणुऊलो गल्हत्थो** (एष इदानीं भवतोऽनुकूलो गलहस्तः) ।

Vidūṣaka–Now you are collared (*this way*) to your advantage (*i.e.* now you have a request though difficult, still favourable to you.)

राजा (स्मितं कृत्वा)—**रैवतक, मद्वचनात् उच्यतां सारथिः सबाणासनं रथमुपस्थापयेति ।**

King (*Smiling*) –Raivataka, let the charioteer be addressed in my name thus, "Bring (*me*) the chariot with the bow."

दौवारिकः—जं देवो आणवेदि (यद्देव आज्ञापयति) । (निष्क्रान्त.)

Warder—As Your Majesty commands. (*Exit*).

उभौ (सहर्षम्)— **अनुकारिणि पूर्वेषां युक्तरूपमिदं त्वयि ।**

श्लोक **आपन्नाऽभय-सत्रेषु[1] दीक्षिताः[2] खलु पौरवाः ॥१६॥**

Both (*Joyfully*)–*This is highly becoming you, an emulator of your ancestors. The descendants of Puru, are initiated*[1] *in the* sacrifice[2] (*vouchsafing*) exemption-from-fear to the distressed[1].(16)

राजा (सप्रणामम्)—**गच्छतां पुरो भवन्तौ । अहमपि अनुपदम् आगत एव ।**

King (*With a bow*)—Be pleased to go ahead. I will just follow straightway.

V. L.—'एष इदानीं भवतोऽनुकूलः गलहस्तः'—**B. P. Ryder. Dr. HS.** **'एषा इदानीं ते अनुकूला अभ्यर्थना'—R. V. M. S.**

विदूषक इति। 'अपवार्य'—ऋषिकुमारकौ श्रवणात् वारयित्वा आह। 'गले' प्रसभात् हस्तदानेन यत् प्रेरणं स 'गलहस्तः'। तथा च 'एष' अर्थात् इदानीं तव तपोवन-गमनार्थं ऋषिभि र्या प्रार्थना कृता सा यद्यपि राक्षसादिभिः सह विग्रह-युक्तत्वात् 'गलहस्तवत्' अमनोरमा, तथापि शकुन्तला-दर्शनादि-पक्षे "अनुकूलः" कार्यसाधकः सुखावहः संवृत्त इत्याशयः। **राजेति।** 'स्मितं कृत्वा' पूर्वोक्त-विदूषक-वाक्य-श्रवणात्। 'मद्वचनात्' मद्वचनमवलम्ब्य (इति 'ल्यब्लोपे' ५९३ पञ्चमी)। **अनुकारिणीति।** 'पूर्वेषां' प्राचीनानां पुरुवंशीयानाम् 'अनुकारिणि' सदृशे इत्यर्थः। ('तस्य चानुकरोतीति शब्दाः सादृश्य-सूचका' इति दण्डी)। 'त्वयि' दुष्यन्ते 'इदं' भय-त्राणाऽङ्गीकरणम् 'युक्तरूपम्' सुतरां योग्यं ('प्रशंसायां रूपप्—५।३।६६ इति रूपप्) यतः 'पौरवाः' तव पूर्वपुरुषाः 'आपन्नानां' विपद्-युक्तानां ('आपन्नःसविपत्तौ च प्राप्तेऽपि वाच्यलिङ्गक' इति विश्व-मेदिन्यौ') 'अभयं' लक्षणया अभय-दानम् इत्यर्थ.। तदेव 'सत्राणि' यागाः ('बहुभ्यः दीयते यत्र तृप्यन्ति प्राणिनः बहुः। कर्तारो बहवो यत्र तत् सत्रमित्यभिधीयते' इति नीलकण्ठ-धृत-वचनम्) तेषु, विपद्युक्तेभ्यः अभय-दान-रूपेषु यज्ञेषु इत्यर्थः। 'दीक्षिताः' कृतदीक्षाः (इति रूपकम्)। भीतेभ्यः अभयदानं त्वदीयं कुलव्रतं, त्वया तु तत् सर्वथा अनुकृतमिति सरलार्थः। ('खलु' यस्मादित्यनेन पूर्वार्धं प्रति हेतुत्वात् **काव्यलिङ्गमिति। अर्थान्तरन्यासश्च। श्लोको** वृत्तम्) ॥१६॥ **राजेति।** 'अनुपदम्' पदस्य पश्चात् इत्यव्ययीभावः, (२।१।६) भवत्पाद-विन्यासं लक्षीकृत्य, अनन्तरमेव इत्यर्थः ('पादन्यासे पादमुद्रा सुप्तिङन्ते पदं भवेत्' इति क्षीरस्वामी)। 'आगतः' ('आदिकर्मणि निष्ठा वक्तव्या' (वाः—३०५२) इति भविष्यदर्थ-द्योतकः क्त-प्रत्ययः)।

77n.—**1.** **अपवार्य**=जनान्तिक—(35n. 5 ; 170n. 2). **युक्तरूपम्**—(15n. 2). **अनुकूलो** &c.—कूलम् अनुगतः इति अनुकूलः—'Towards the bank', hence '*favourable, agreeable as wind, fate, &—Apte.* **गलहस्तः**—"Seizing by the throat, throttling, collaring'—*Ibid.* Thus गलहस्तः is not something relishable, but one may pocket this sort of insult in a profitable (अनुकूल) circumstance. Here the king is requested to fight against the terrible Rākṣasas—a task which is not very relishable, but our hero will like it, as it gives him an opportunity to re-enter the hermitage and possibly to have his much-coveted interview with his beloved. Thus the task is well termed 'अनुकूलः (profitable) गलहस्तः।. "You rather seem to

like being collared this way"—*Ryder*. This is the **best** reading, for this humourous way of putting things is quite befitting a joker. Cf. 'अनुकूल-परिणामं'—(253n. 1). **2. स्मितं कृत्वा**—The previous jolly remark produces smile in the king. (*Com*). **मद्वचनात्**—'तदुच्यताम्—**मद्वचनात्** * * सिद्धार्द्धकः'—*MR*; 'उच्यतामस्मद्वचनात् कालपाशिकः'—*Ibid.* **3. इदम्**—This helping to the distressed. **4. आपन्न**&c.–द् (of पद्) & त (क्त)=न,–(8.2.42)—Distressed. **सत्र**, means a **big sacrifice** (*Com.*) **दीक्षिताः**—Initiated i. e. devoted themselves wholly to the protection of the distressed. **'सत्रा'** (अव्यय) means 'with' ('सह') । **पुरः**—After पूर्वं comes 'असि' in place of ७मी in **स्वार्थे** Read "–सप्तम्य।द्यन्तेभ्यो दिशि रूढ़ेभ्यो दिग्-देश-काल-वृत्तिभ्यः **स्वार्थे** 'अस्ताति' -प्रत्ययःस्यात्***अस्तात्यर्थे असि-प्रत्ययः"–*BD*. By"पूर्वाऽधराऽवराणाम् असि पुर् अध् अवश्चैषाम्' (5.3.39), 'पूर्व' becomes'पुरः' । 'स्यात् पुरः पुरतोऽग्रत'—*AK*. **5. आगतः**—Mark the **Peculiar use of क्त** which has a **future sense** (Com.) and Cf. 'अन्ये च बहवः शूराः मदर्थे **त्यक्त**-जीविताः" *Gītā. I.* 9. "नटी"–* * * मम पुनर्मन्दभागाया एका एव दुहिता। सापि त्वया कस्मिन्नपि देशान्तरे (**दत्ता**)। कथमेवं दूर-देश-स्थितेन भर्त्रा सह अस्याः पाणिग्रहणं (**भविष्यति**) इति अनया चिन्तया आत्मापि मे न प्रतिभाति, तत् किं पुनर्नर्तितव्यम्—*Rat.* Śak. III (end). **अनुपदम्**—*Ki. XII.* 54; *Ra. XI.* 31.

Text :—**उभौ—विजयस्व।** (निष्क्रान्तौ)।

Both—Be victorious (*Exeunt*).

राजा—माधव्य, अप्यस्ति शकुन्तला-दर्शने कुतूहलम्।

King—Mādhavya, have (*you any*) curiosity to see Śakuntalā ?

विदूषकः—पढमं सपरिवाहं आसि। दाणिं रक्खस-वुत्तन्तेण विन्दुवि णावसेसिदो (प्रथमं सपरिवाहम्' आसीत्। इदानीं राक्षस-वृत्तान्तेन विन्दुः अपि नावशेषितः)।

Vidūṣaka—At first it was brimful. Now by the news of the fiends not even a drop is left.

राजा—मा भैषीः। ननु मत्समीपे वर्तिष्यसे।

King—Don't fear, you shall keep close to me.

विदूषकः—एस रक्खसादो रक्खिदोम्हि (एष राक्षसाद्रक्षितोस्मि)।)

Vidūṣaka—Here I am saved from the fiends.

(प्रविश्य) **दौवारिकः—सज्जो रधो भट्टिणो विजय-प्पआणं अवेक्खदि। एस उण णअरादो देवीणं आणत्तिहरओ करभओ आअदो** (सज्जो रथो भर्तु- र्विजय-प्रयाणमपेक्षते। एव पुनर्नगरात् देवीनाम् आज्ञप्तिहरः[२] करभकः आगतः)।

Warder (*Entering*)—The car (*is*) ready (*and*) awaits Your Majesty's victorious[1] expedition[1]. Here again from Her revered Highness, an order-bearer[2] Karabhaka, has just arrived from the town.

राजा (सादरम्)—**किम् अम्बाभिः प्रेषितः ?**

King (*Eagerly*)—What! sent by my (*revered*) mother ?

दौवारिकः—अह इं—[अथकिम्]। Warder—Yes.

राजा—ननु प्रवेश्यताम्। King—Well, usher him.

दौवारिकः—तह [तथा]। (निष्क्रम्य करभकेण सह प्रविश्य) **एस भट्टा उवसप्प** [एष भर्ता। उपसर्प]।

Warder—All right. (*Going out and re-entering with Karavaka*) Here is My Lord. Approach.

V. L.—'अम्बाभि.'—B. R. V. M. "अज्जुभि." —S. 'राक्षसाद्रक्षि- तोऽस्मि'—R. V. S. 'तव चक्ररक्षी भूतोऽस्मि'—B. M.

विदूषक इति। 'परिवाहेण' जलोच्छ्वासेन 'सह' 'सपरिवाहम्' आदौ शकुन्तला- दर्शने मम कुतूहलन् पय पुरः इव उच्छ्वलित अभूत्। ('परिवाहो जलोच्छ्वासे महीभृद्योग्य-वस्तुनि' इति मेदिनी)। **राजेति।** 'मा भैषीः' भय मा कार्षीः ('माङि- लुङ्'-(३।३।१७५) इति भविष्यत्काले लुङ्। 'न मा योगे'-(६।४।७४) इति अडागमनिषेध.)। **दौवारिक इति।** 'सज्ज.' तपोवन-गमनार्थं सज्जीकृतः। 'विजयाय' राक्षसाना जयाय। 'प्रयाणम्' युद्धयात्राम्। 'पुन.' इति भेदे। 'देवीना' राज्ञ मातु (गौरवे बहुवचनम्) 'आज्ञप्तिम्' सन्देशम् 'हरति' धारयति इति 'आज्ञप्ति-हरः' (३।२।९) दूत इत्यर्थः। 'करभक' इति भृत्यनाम। **राजेति।** 'ननु' इति सभ्रमे ('ननु प्रश्ने परकृतौ अधिकारे च संभ्रमे" इति मेदिनी)। 'प्रवेश्यताम्' इति मृदु- भर्त्सनाद्योतक। किमर्थं विलम्बयसि इत्याशय।

78n.—1. सपरिवाहम्—परितः वहनम् इति परि+वह्+घञ्, भावे,

[3. 3. 18]=परिवाहः, [also परीवाहः—6. 3. 122.] 'जलोच्छ्वासाः परीवाहाः'—*AK*—Overflowing (*of a tank &c*).—*Apte*. The jester means to say that his eagerness for having a sight of Śak. was full to overflowing but now there is not a jot of it left. Cf. 'आनन्द-**परिवाहिना** चक्षुषा'–*Śak. IV* ;"अहो राग-**परिवाहिणी** गीतिः"—*Śak. V*; "पूरोत्पीडे: तड़ागस्य परिवाहः प्रतिक्रिया"–*UC. III.*28 ; *Ra. VIII.* 73 ; *ŚPB. XVI.* 51. **2. वर्तिष्यसे**—Optionally 'वर्त्स्यसि' by 'वृद्भ्यः स्य-सनोः'—(1. 3. 92).—"(लुङ्-प्रत्यये) स्य-प्रत्यये, सन्-प्रत्यये च परे, वृतु-वृधु-स्यन्द-धातुभ्यः पर आत्मनेपद-प्रत्ययो **वा** स्यात्"—**Prabhā**. इट् is barred by 'वृद्भ्यः चतुर्भ्यः'—(7. 2. 59). **3. एष राक्षसात्** &c.—The jester says so fancying that he is already attacked by the fiends. **4. सज्जः**— —सज्ज्+कर्तरि अच् (3. 7. 134).=सज्जः—Equipped, hence ready. "अथ सज्जः स्यात् संनद्धे संभृते त्रिषु"—*Medinī*. **5. आज्ञप्तिहरः**—आ+ज्ञप् (ज्ञापने)+क्तिन् भावे-(3. 3. 94).=आज्ञप्तिः—Order ; आज्ञप्ति+हृ+अच् कर्तरि ['हरते अनुद्यमने अच्'–3. 2. 9.]=आज्ञप्तिहरः–Courier ; "**उद्यमनार्थे तु, भारं हरति यः, सः 'भारहारः'** । 'कर्मण्यण्' (३।२।१)"–**Prabhā**. **करभकः**–It is either a proper name or a camel-man. **6. देवीनाम्**—'देवी कृताऽभिषेकायाम्, इतरासु च भट्टिनी'–*AK*. Also 'देवीति महिषी वाच्या राज्ञा परिजनेन तु" । Here it refers to the Queen mother. The plural indicates respect. **7. अम्बाभिः**=मातृभिः । "नाट्योक्तौ 'अम्बा 'माता' इत्यमरः । "नाट्योक्तौ' इत्यधिकारस्य प्रायिकत्वात् अम्बादीनां केषांचित् **अन्यत्रापि प्रयोगः**'; –*BhD*. In Vocative Case the form is '**अम्ब**' by' 'अम्बार्थनद्योः ह्रस्वः'—(7. 3. 107), but **opinion differs** as to the Vocative form of '**जगदम्बा**' । According to some it is **always** '**जगदम्ब**' । Cf. "**जगदम्ब!** विचित्रमत्र किम् "—इति शङ्कराचार्य-कृताऽपराध-क्षमापन-स्तोत्रम् । "जयजय '**जगदम्ब** शिवे" इति कामाक्ष्यार्या-शतकम् ॥ According to others—'**जगदम्बे**', specially if it refers to a woman's name, because '**जगदम्बा**' is not a *synonym* of *Mother*. 'अम्बार्थकस्य यथा हे अम्ब, हे अल्ल, हे अक्क' ।—**Prabhā** "अम्बार्थानामिति अम्बा-पर्यायाणामित्यर्थः"—BM. Also T on 293.

Text :—करभक-जेदु जेदु भट्टा । देवी आणवेदि । आआमिणि चउत्थ-दिअहे पुत्त-पिण्ड-पालणो णाम उववासो भविस्सदि । तहि दीहाउणा अवस्सं अम्हे

सम्भावइदव्व त्ति [जयतु जयतु भर्ता। देवी आज्ञापयति। आगामिनि चतुर्थ-दिवसे पुत्र-पिण्ड-पालनो नाम उपवासो भविष्यति। तत्र दीर्घायुषा अवश्यं वयं सम्भावयितव्या[1] इति]।

Karabhaka—Victory to (*My*) Liege. The queen mother bids me say :—On the coming fourth day comes off the fast named *Putra-piṇḍa-pālana*. On that day I should (*like*) to be honoured[1] by (*my*) long-lived (*son*) without fail.

राजा—इतस्तपस्वि-कार्यम्। इतो गुरु-जनाज्ञा। द्वयमपि अनतिक्रमणीयम्। किमत्र प्रतिविधेयम्।

King—Here (*is*) the duty to the hermits to be executed (*and*) there (*is*) the command of my superior. Both are inviolable. What is to be done ?

विदूषकः—तिसङ्कू विअ अन्तरा चिट्ठ (त्रिशङ्कुरिवान्तरा तिष्ठ)।

Vidūṣaka—Stay half-way between, like Triśaṅku.

V. L.—"पुत्रपिण्डपालनः नाम'—B. M. 'प्रवृत्तपारणो मे'—R. 'निवृत्तपारणो मे'—S. 'प्रयुक्तपारणो मे'—V. 'अन्तरा'—B. M. P. 'अन्तराले' —R. V. S.

करभक इति। पुत्रस्य पिण्डः पाल्यते अनेन इति 'पुत्र-पिण्ड-पालनः' ('करणाऽधिकरणयोश्च'-(३।३।११७; ३२९३) इति करणे ल्युट्। 'युवोरनाकौ' (७।१।१)। 'उपवासः' अहोरात्र-भोजनाभावः (तथाचोक्तम्। "उपावृत्तस्य पापेभ्यो यस्तुवासो गुणैः सह। उपवासः स विज्ञेयः सर्वभोग-विवर्जितः")। राज्ञः अनपत्यतया पिण्ड-लोप-भयम्। अतएव एवंविधस्य उपवासस्य आवश्यकत्वम्। 'अवश्यम्' निश्चितम् ('नूनम् अवश्यम् निश्चये द्वयम्' इत्यमरः) 'सम्भावयितव्याः' आगत्य सम्मानयितव्याः। **राजेति**। 'द्वयमपि' तपस्विनाम् विघ्न-निवारणं, मातुराज्ञा च, 'अनतिक्रमणीयम्' अलङ्घनीयम्। 'प्रतिविधेयम्' प्रतिकर्त्तव्यम्। **विदूषक इति**। 'त्रिशङ्कुः' ईक्ष्वाकु-वंशोद्भव-पृथु-राज-पुत्र 'इव' द्यावा-पृथिव्योः 'अन्तरा' मध्ये अन्तरीक्षे इति यावत्। "अन्तरा तिष्ठ", **खलु गत्वा**, तपोवनं राजधानीं वा' परन्तु तयोर्मध्यस्थिते कस्मिंश्चित् स्थाने एव वस्तव्यम्।

79n.—1. आज्ञापयति—आ+ज्ञा+णिच्+लट् ति=आज्ञापयति। 'पुक्' **by (7. 3. 36 ; —57n. 8). Mark that when a person in a higher station says something to a person in a lower station '*आज्ञापय*' is**

used, but when the case is reversed, '**विज्ञापय**' is used. (76n. 3). "विदूषकः—किं तत्रभवती **आज्ञापयति**?"—*Vik. II* "गणदासः—भद्रे, **विज्ञाप्यतां** देवी परमनिपुणा—&c".—*Māla*. 1. 2. **पुत्रपिण्ड** &c.—The queen mother is fasting so that her son may beget a son, as otherwise the king will not be freed from his debt to his forefathers. Read—"ऋणं देवस्य यागेन, ऋषीणां पाठकर्मणा। **सन्तत्या** पितृ-**लोकानां** शोधयित्वा परिव्रजेत्" ॥ "ऋणानि त्रीण्यपाकृत्य ततो मोक्षे मनो दधे" ॥ "नूनं मत्तःपरं वंश्याः **पिण्ड-विच्छेद**-दर्शिनः" &c.—*Ra. I.* 66; *VIII.* 26; *MS. III.* 216; *IX.* 132, 136, 140; *Y. I.* 159. According to *C* and *K*, this ceremony is also known as *Putrarāja* in which various presents including sweetmeats are given to a son. B's is the **best reading**, as Duṣyanta's childlessness exercises great influence on the *moral elevation* (*vide introduction*) of the king's character in the *Sixth Act*. Cf. 'कष्टं खलु **अनपत्यता**' &c.—VI. 26 & 25; (218n. Remark). It will be interesting to note that "**यजुर्वेदिना** पिण्ड-शब्दो **नपुंसकलिङ्गेन** प्रयुज्यते। तथा—'अवनिक्तं पिण्डं दद्यादसावेतत्' इति श्राद्ध-विवेक-घृतपिण्ड-पितृयज्ञीय **कात्यायन-वचने** पिण्ड-विशेषणे '**एतत्**' इति नपुंसक-निर्देशात्,—'भार्येतैतच्च वै पिण्डं यज्ञदत्तस्य पुरकम्'—इति **ऋष्यशृङ्ग-वचनेऽपि** तथा दर्शनाच्च। **छन्दोगानां** पिण्ड-शब्द **पुंलिङ्गेन** प्रयुज्यते, 'दर्भेषु मधु-मधु मध्वित्यक्षत्रमी-मदन्तः इति जपित्वा त्रीरात्रीन् **पिण्डान्** दद्यात् इति गोभिल-सूत्रे '**पिण्डान्**' इति पुंलिङ्ग-निर्देशात्"—*Śrādha-tattvam*. 3. **त्रिशङ्कु**—was the king of Ayodhyā, son of पृथु and **father of** हरिश्चन्द्र। He was so named on account of his committing **three sinful acts**. "पितुश्चापरितोषेण, गुरोर्दोग्ध्री-वधेन च। अप्रोक्षितोपयोगाच्च त्रिविधस्ते **व्यतिक्रमः** ॥ एवं **त्रीण्यस्य शङ्कूनि** तानि दृष्ट्वा महातपाः। त्रिशङ्कुरिति होवाच त्रिशङ्कुरिति स स्मृतः"—*Vap. Ch.* 87; *HV. Ch. XII.* 18-19. He wanted to go to heaven in his mortal coil, by the performance of a sacrifice. ('**गच्छेयं स्व-शरीरेण देवतानां** परां गतिम्"—*Rām*. 57. 12..) Vasiṣṭha refusing to officiate, he approached his sons, who cursed him to be a *Candāla*. Viśvāmitra, however, celebrated the sacrifice for him, but the gods did not take part in it. So he by his own power caused the king to go up. ["**पश्य मे तपसो वीर्यं**

स्वार्जितस्य नरेश्वर। एष त्वां स्वशरीरेण नयामि स्वर्गमोजसा"—*Ibid*. 60. 13.. "दिवं जगाम काकुत्स्थः मुनीनां पश्यतां तदा"—60.16]. But Indra with the other gods said '*Fall, Triśaṅku, fall* down'. ['सह सर्वैः सुरगणैरिदं वचनम् अब्रवीत्। त्रिशङ्को! गच्छ भूयस्त्वं नासि स्वर्गकृतालयः—60. 17]. Triśaṅku falling down, his downfall was arrested by Viśvāmitra saying—'*Stay Triśaṇku, stay there*'. ["रोषमाहारयत् तीव्रं 'तिष्ठ' 'तिष्ठे'ति चाब्रवीत्" ॥—60, 20]. Thence forward that unhappy king remained suspended in the region of the stars.

Text :—राजा—सत्यमाकुलीभूतोऽस्मि—

श्लोक **कृत्ययो[1]र्भिन्न-देशत्वात्[2] द्वैधीभवति मे मनः।**
पुरः प्रतिहतं शैले स्रोतः स्रोतोवहो[3] यथा ॥१७॥

(विचिन्त्य) **सखे, त्वम् अम्बाभिः पुत्र इति प्रतिगृहीतः। अतो भवान् इतः प्रतिनिवृत्य, तपस्वि-कार्य-व्यग्र-मानसं[4] मामावेद्य[1] तत्रभवतीनां पुत्र-कृत्यम्[2] अनुष्ठातुमर्हति।**

King—In sooth, I am embarrassed. [2]Owing to the difference of the places[2] of the two duties[1] my mind is divided in twain, like the current of a burn,[3] struck against a fore-(*lying*) hillock. (17) (*Musing*) Friend, you have been regarded as a son by my mother. So returning from here (*and*) announcing that my[4] mind is engrossed with the business of the sages[4], it behoves you to discharge the offices[2] of a son for Her Highness.

विदूषकः—ण क्खु मं रक्खो-भीरुअं गणेसि।

[न खलु मां रक्षो-भीरुकं गणयसि]।

Vidūṣaka—You mustn't, indeed, think me as afraid[1] of the demons[2].

राजा (सस्मितम्)**—भो महाब्राह्मण! कथमेतत् भवति सम्भाव्यते!**

King (*Smiling*)—Oh! great Brahmin! how is this possible in thee ?

विदूषकः—जह राआणुएण गन्तव्वं तह गच्छामि।

[यथा राजाऽनुजेन गन्तव्यं तथा गच्छामि]।

Vidūṣaka–But I will go as becomes a king's younger brother.

राजा—ननु तपोवनोपरोधः परिहरणीय इति सर्वाननुयात्रिकान्[1] त्वयैव सह प्रस्थापयामि[2] ।

King–Indeed I shall send[2] back all my retinues[1] even with you as (*all*) disturbance to the penance-grove has to be avoided.

विदूषकः (सगर्वम्)—तेण हि जुवराओ म्हि दाणिं संवुत्तो

[तेन हि युवराजोऽस्मि इदानीं संवृत्तः] ।

Vidūṣaka (*Strutting*)—Then, indeed, I have become the heir-apparent.

V. L.—'शैले'—R.V.S. Ryder, Bodelian MSS. 'शैलैः'—B. M. 'गच्छामि'—R.V.S. 'गमिष्यामि'—M.B 'स्रोतोवहो'—R.M. ; ०वहां—B.K.S.C. 'अम्बाभिः'—HS ; 'अम्बया'—Others.

कृत्ययोरिति । 'कृत्ययोः' कार्ययोः तपस्वि-कार्यस्य मातृ-कार्यस्य च इति भावः । ("**कृत्यो** विद्विषि **कार्ये** च, **कृत्या** क्रिया दिवौकसः" इति रभसः—(३।१।११०) । 'भिन्नः' पृथक् 'देशः' स्थल ययोः, तयोर्भावः 'भिन्नदेशत्वम्' तस्मात् युगपत् पृथक् प्रदेशे कर्त्तव्यत्वात्, 'मे मनः' द्वैधीभूतं मानसं 'पुरः' अग्रे 'शैले' पर्वते प्रतिहतम्' अवरोधं प्राप्तं 'स्रोतः' वहति या सा 'स्रोतोवट्' (३।२।७६) नदी, तस्याः 'स्रोतोवहः' नद्याः 'स्रोतः यथा' प्रवाहः इव, अद्वैधं द्वैधं भवति इति 'द्वैधीभवति' कर्तव्य-निर्धारणे असमर्थो भवति इति भावः । (**वृत्त्यनुप्रास-च्छेकानुप्रासयोःसंसृष्टिः ।** 'स्रोतः स्रोतः' इति **लाटानुप्रासश्च** । श्रौती **उपमा** च । **श्लोको** वृत्तम्) ॥१७॥ **विचिन्त्येति** । 'पुत्र इति' पुत्ररूपेण 'प्रतिगृहीतः' स्वीकृत. सतत-मत्-सहचरत्वात् इति भावः । 'तपस्विनां' तापसानाम् इष्टि-रक्षण-रूपे 'कार्ये व्यग्रम्' आकुलं ("व्यग्रो व्यासक्त आकुले" इत्यमरः) 'मानसं' यस्य तादृशं 'माम् आवेद्य' अम्बायै ज्ञापयित्वा । **विदूषक इति** । 'रक्षोभ्यः भीरूः' भयशील [इति सहसुपेति समासः] । ततः स्वार्थे कुत्सितार्थे वा कः । **विदूषक इति** । 'गच्छामि' गमिष्यामि (वर्तमान-सामीप्ये'—[३।३।१३१] । इति **भविष्यदर्थे** लट्) । महाडम्बरेणेति भावः ।

80n.—1. कृत्ययोः—कृ+क्यप् ['विभाषा कृवृषोः'—3. 1. 120]= कृत्यम्, or कृत्+क्यप् ['ऋदुपधात् चाऽक्लृपिचृतेः'–3.1.110]=कृत्यः—Duty—*BhD*. 2. **द्वैधीभवति**–द्विप्रकारम् इति द्वि+धमुञ् by [द्वि-त्र्योश्च धमुञ्'–5.3. 45]=द्वैधम् । Then **स्वार्थे डः** by [धमुञ्–अन्तात् स्वार्थे ड-दर्शनम्—*Vārt*. 1991.]. Next **मत्वर्थे अच्**, द्वैधम्—Having two divisions. Cf. "अभिचैद्यं प्रतिष्ठासुरासीत् **कार्य-द्वयाकुलः**"—ŚPB. II. I ; "**दोलाय-**

मानेन चेतसा"—Kād. P. 729 ; "न जाने सन्देह-दोलामवलम्ब्य संवित्"—NC VIII. 48. 3. शैले—शिलानां समूहः (4. 2. 37), यद्वा शिलाः सन्ति अत्र इति शिला+अण्=शैलः, तस्मिन्। 'शैलैः' will divide the river-current into **several** parts. So it is **rejected**. Cf. "**Two** inconsistent duties sever my mind with cruel shock, As when the current of a river is split upon **a rock**"—*Ryder*. For similar idea. Cf. "नद्या इव प्रवाहो विषम-शिलासङ्कट-स्खलित-वेगः। विघ्नित-समागम-सुखः मनसिशयस्त्वनुगुणीभवति"—*Vik. III.* 8. 'द्विधा पश्य समुद्रफेनान्"—*Ra. XIII.* 11. The simile is a **bit defective** as, the causes of "**द्वैधीभवन**' of 'मनस्' and 'स्रोतस्' are different [*i.e.* भिन्न-देशत्व। शैल-प्रतिहतत्व। *Now see KA. II.*51.56.]—**स्रोतोवहः**=स्रोतस्+वह्+क्विप् कर्तरि ['क्विप् च'—3. 2. 76.].=स्रोतोवह्—(स्रोतोवट् in Nom.-Singular)—Streamlet (तस्याः)। 4. **रक्षोभीरुकं**—Not a case of पञ्चमी-तत्पुरुष by 'पञ्चमी भयेन' (2 1. 37). Read—"भय इति **स्वरूप-ग्रहणम्। न अर्थस्य।** प्रमाणाऽभावात्। तेन '**वृकात् त्रासः**' **इत्यादौ समासः** न। कथं तर्हि '**भोगोपरतः**' '**ग्राम-निर्गतः**' इत्यादिप्रयोगाः। * '**सुप्सुपा**' इत्यनेन वा तदुपपत्तिरिति"—T. '**महाब्राह्मण**'—(Vide 162n. 1). It may be **ironical** here, but the jester is expected to swell with the title without understanding the irony. **भवति**—In Your Worship (sarcastic). **युवराज**—Crown prince ; the reigning prince is '**अधिराज**'—*Ra. III.* 36. 5. **अस्मि**=I. (Vide 7n. 2). **तपोवनोपरोधः**—The attendants were a bar to the progress of his love affair, so the king very dextrously dispensed with them, under the pretext of disturbance to the hermitage.

Text:—**राजा** (आत्मगतम्)—**चपलो**ऽयं **बटुः। कदाचिदस्मत्प्रार्थना-मन्तःपुरेभ्यः**[2] **कथयेत्। भवतु। एनमेवं वक्ष्ये**—(विदूषकं हस्ते गृहीत्वा, प्रकाशम्) **वयस्य, ऋषि-गौरवादाश्रमं गच्छामि। न खलु सत्यमेव तापस-कन्यकायां ममाभिलाषः। पश्य—**

सुन्दरी (ससजग, सभरलग) **क्व वयं, क्व परोक्ष-मन्मथो मृगशावैः सममेधितो जनः।**
परिहास-विजल्पितं[1] **सखे! परमार्थेन न गृह्यतां वचः॥१८॥**

(वैतालीयं वा)

King (*Aside*)—This (*Brahmin*) chap is a chatter-box[1] (*babbler*).

He might perchance let out my suit to the inmates[a] of the seraglio.[a] Well, to him, thus I'll speak ; (*Holding Vidūṣaka by the hand—Aloud*) Friend, I am going to the hermitage (*solely*) out of respect for the ascetics. In sooth, I have got no predilection for the hermit's daughter. Observe—

Where are we and where, is a creature brought up with fawns, and a stranger to (*the influence*) of love. Take not in earnest, my friend, the (*light*) word [3]uttered in jest.[3] (18)

विदूषकः—अह इं [अथ किम्]। (निष्क्रान्ताः सर्वे)।

Vidūṣaka—Just so. (*Exeunt Omnes*).

द्वितीयोऽङ्कः

(*End of the Second Act*)

राजेति। 'अयं वटुः' माणवकः ['वालकः **मानवः** वालः किशोरः **वटु** रित्यपि" इति शब्दरत्नावली) 'चपलः' चञ्चलः वाचाटः अल्प-वयस्कत्वात् इति भावः। 'कदाचित्' इति **सम्भावना-द्योतकः**, 'अस्माकं प्रार्थना' शकुन्तला-विषये ममाभिलाषं 'अन्तःपुरेभ्यः' लक्षणया अन्तःपुर-स्थित-महिषीभ्यः 'कथयेत्' (संभावनायां लिङ्)। 'वक्ष्ये' (इति कर्त्रभिप्राये आत्मनेपदम्)। 'ऋषि-गौरवात् तपस्विषु भक्तिवशात्, तेषां कर्म सम्पादयितुम् इत्यर्थः। **क्वेति।** 'वयं' मादृशाः विषयाऽऽसक्त-मानसाः नागराः 'क्व' कुत्र वर्तन्ते। 'मृगशावैः' हरिणपोतैः 'समं' सह 'एधितः' वृद्धिं प्राप्तः, अतएव 'परोक्ष' इन्द्रियाणाम् अगोचरः 'मन्मथः' कामचिन्ता ("**मन्मथो काम-चिन्तायां** कपित्थे कुसुमायुधे" इति मेदिनी) यस्य तादृशः काम-कलाऽनभिज्ञः 'जनः' शकुन्तला-रूपः 'क्व' कुत्र वर्तते (द्वौ क्व-शब्दौ महदन्तरम् सूचयतः)। अतः प्रणयस्यावकाशः नास्ति इति हृदयम्। हे 'सखे परिहासेन' नर्म-च्छलेन कौतुकेन इति यावत्। ("द्रव-केलि-परिहासाः क्रीड़ा खेला च नर्म च" इत्यमरः) 'विजल्पितम्' कथितम् 'वचः' शकुन्तलायाम् अनुरागकथन-रूपं 'परमार्थेन' सत्यरूपेण ('धान्येन धनवान्' इतिवत् अभेदे करणे तृतीया) 'न गृह्यताम्' अवगम्यताम्। [**पुनरुक्तवदाभासः**। **वृत्त्यनुप्रासः**। **काव्यलिङ्गम्** पदार्थ-वाक्यार्थ-रूपेण। आद्ये अर्धे **विषमालङ्कारभेदः**, **सहोक्तिश्च**। वृत्तमेतत्

सुन्दरी (वियोगिनी वा)। राघवभटस्तु एतत् 'वैतालीयम् वृत्तम्' इत्याह। "राजा स्वगतम्" इत्यादिना एतदन्तेन 'संवृत्तिः' नाम संध्यन्तराङ्गमुपक्षिप्तम्। तल्लक्षणं यथा--"संवृत्तिः स्वयमुक्तस्य स्वयं प्रच्छादनं भवेत्"। विपर्यय-नाम नाट्यलक्षणञ्च—"विचारस्य अन्यथा-भावः सन्देहात्तु विपर्यय" इति दर्पण-लक्षणात्) ॥१५॥

॥ इति गौतम-श्रीरमेन्द्रमोहनवसु-विरचितायामभिज्ञान-शकुन्तल-टीकायां कुमारसन्तोषिण्यां द्वितीयोऽङ्कः समाप्तैः ॥

81n.—1. वटुः—Lit. a boy, youth. Cf. English '*chap* or *fellow*.' Cf."किमप्ययं वटुः पुनर्विवक्षुः स्फुरितोत्तराधरः"–*Ku. V.* 83. Here a Brahmin boy.Cf. "वटवृक्षः (वटो+ऋक्षः) मया दृष्टः वारि-वारण-मस्तके। तावत्तत्र न गच्छामि यावत् सोऽपि न गच्छति"—**विदग्ध-मुख-मण्डनम्**। 'एषोऽपि स दृष्टः-वटुकः'—*MK. V. I.* 2. **कदाचित्** (Perhaps)—'कदाचित् शब्दः सम्भावनां द्योतयति"—*N.* Cf. "**कदाचित्** अनभिमत-स्मर-विकार-दर्शन-कुपितोऽयं शापाभिज्ञां करोति माम् अदूरकोपा हि मुनिजनस्य" &c.—*Kād. 1st Part.* "**कदाचिदसौ** वैलक्ष्यादस्मानालोक्यापसर्पत्येव तच्चतुर्ष्वपि पार्श्वेष्ववहिता" &c.—*Ibid. 2nd Part.* **अस्मत्-प्रार्थना**—The whole affair of my pursuit after a wild girl. 3. **अन्तःपुरेभ्यः**—(To the inmates of seraglio)—(4n. 3.). **हस्ते (गृहीत्वा)**—Instead of२या or ३या, '**Locative**' is used by **विवक्षा**। Read "व्याददाने चतुर्थी स्यात्, दर्शने कथनेऽपि च। आदायकरणे योगे **सप्तमी** कैश्चिदिष्यते"——*Hari qtd. Sumativijaya under Ra. II.* 28 ; "**हस्ते गृहीत्वा** मारीचं रावणः वाक्यमब्रवीत्"—*Rām. III.* 42,13 ; '**आलाने गृह्यते** हस्ती'–*MK* ; '**गीतमीहस्ते** विसर्जयिष्यामि'–*Śak. III* ; (153*n.* 4). **०कन्यकायाम् अभिलाषः**—Note the use of सप्तमी with अभि+लष्, स्निह् etc.—(94n. 4). **4. वक्ष्ये**—*Atmp.* because if Vidūṣaka is put off scent, the benefit goes to the king. **5. वयं**—Refers to the kings in general who are always accustomed to deal with city-bred beauties, and are thoroughly acquainted with all the arts of fascination. **क्व—क्व**—(14*n.* 8) ; *PP.* 4. 55. 25,–27. "क्वायं हरिण इव वनवासनिरतः स्वभाव-मुग्धोजनः क्व च विविधविलास-रस-राशिर्गन्धर्व-राजपुत्री"—*Kād.* P. 596. **6. परोक्ष**—अक्षि=इन्द्रिय–(In. 9). "अक्ष्णोः परम्

इति विग्रहे समासान्त-विधान-सामर्थ्यात् अव्ययीभाव."–*SK*. Next (समासान्त) 'अच्' by *GS*—'प्रति-पर-समनुभ्योऽक्ष्णः। *BD* remarks 'परोक्षे लिट्' (2171) इति **'निपातनात् ओकारादेशः'** । Hence **'परोक्षम्'** and not **'पराक्षम्'** । Next मत्वर्थे अच् gives 'परोक्षः' । मन्+क्विप् भावे—['संपदादिभ्यः क्विप्'–(*Vart*. 3. 3. 94) ; 'न' dropped by 'गम्यादीनाम् इति वक्तव्यम्'—(*Vārt.* 6.4.40); 'तुक्' by 'ह्रस्वस्य पिति कृति तुक्)'–6.1.71]= **मत्**–'Consciousness' मथ्' (विलोड़ने)]+पचादि अच् कर्तरि (3. 1. 134)=मथः। 'मत.' (चेतनस्य 'मथः'= **मन्मथः**– Killer of consciousness—*BhD*. Read "यस्मात् प्रमथ्य चेतस्त्व जातोऽस्माकं तथाविधम्। तस्मात् **मन्मथ**-नामा त्वं लोके ख्यातो भविष्यसि"—*Kālikā Purāṇa*, II. 4 ; विद्धशालभञ्जिका—1. 15. परोक्ष-मन्मथ: is used in a *double* sense viz., (*i*) *One unacquainted with love-matters.* (*ii*) *who is inwardly in love.* **7. परमार्थेन** —The king requests the jester not to take seriously what was said before (*i.e. the fact that he was enamoured of a hermit girl*). For she being a woman brought up in the forest and having no culture and art (n. 5) has no power to cater for the peculiar taste of a king,. a townbred individual who is intimately acquainted with the beautiful accomplished ladies of the society. Thus any attachment between them is not within the nature of things and hence absolutely absurd. This, apparently innocent falsehood **will terribly tell on the fate of** Śakuntalā (Act. VI. 201n. 9). Mark that the **duplicity** of the king does not stigmatise his character.—(Vide 37n. 1). The king being a **'दक्षिण नायक'** does not like to offend any of his consorts for whom at present he has practically no real love. For this **दाक्षिण्य**—*Vide*. (195*n*. 4.) 'अन्य-संक्रान्त-हृदयोऽपि प्रथम-संभावनाम् अपेक्षते"—*Sānumati's speech*. Act. VI. *infra.*

Remark—Our poet very skilfully introduces the summons of the queen mother, with a view to removing Vidūṣaka (along with all the retinues) from the scene of Duṣyanta's courtship with Śak., which plays an important part in the development of the plot. From the last verse, the addle-pated jester is made to believe that the alleged love between the

king and Śak. is sham. Thus the last shadow of Śak.'s affair is blotted out of his memory. Jester's ignorance of the Gāndharva marriage is a *sine qua non*, as the slightest knowledge in him would give rise to an impossible situation in the 5th Act by baffling the imprecation of Durbāsā. For he being a veritable babbler, would have told others about it, and himself being an eye-witness would have surely remembered her face.

Time-analysis of Act II—The Second Act commences early in the morning of **the next** day after the events described in Act. I. (ह्यः किल अस्मासु अवहीनेषु–&c., 'एवमेव चिन्तयतः मे प्रभाता अक्ष्नोः रजनी''—*Vidūṣaka's speech*). The season is the same ('ग्रीष्म-विरल-पादप-च्छायासु') । The conversation of Vidūṣaka & the king ended late at noon. (''अस्मिन् पादप-च्छाया-विरचित-वितान-मनाथे'—'&c. Page—172) ।

तृतीयोऽङ्कः

(ततः प्रविशति यजमान-शिष्यः[१])

Text :—शिष्यः (कुशानादाय)—अहो महानुभावः पार्थिवो दुष्यन्तः। येन प्रविष्ट-मात्र एव आश्रमं तत्रभवति निरुपप्लवानि[२] नः कर्माणि संवृत्तानि।

पथ्यावक्त्र
का कथा बाण-सन्धाने ज्या-शब्देनैव दूरतः।
हुङ्कारेणेव धनुषः स हि विघ्नान् व्यपोहति[३] ॥१॥

यावदिमान् वेदि-संस्तरणार्थम्[४] दर्भान् ऋत्विग्भ्यः उपहरामि। (परिक्रम्याऽवलोक्य च। आकाशे)—प्रियंवदे, कस्येदमुशीरानुलेपनम्[५] मृणालवन्ति च नलिनी-पत्राणि नीयन्ते। (श्रुतिमभिनीय) किं ब्रवीषि? आतप-लंघनात्[६] बलवदस्वस्था शकुन्तला। तस्याः शरीर-निर्वापणाय इति। तर्हि प्रियंवदे, यत्नादुपचर्यताम्[७]। सा हि तत्रभवतः कुलपतेरुच्छ्वसितम्[८]। अहमपि तावद् वैतानिकं[९] शान्त्युदकम् अस्यै गौतमीहस्ते विसर्जयिष्यामि[१०]। (निष्क्रान्तः)।

विष्कम्भकः। (*Prelude*)

(*Enter a disciple*[1] *of the sacrificial priest*[1])

Disciple (*Gathering Kuśa-grass*)—Oh, of great puissance is king Duṣyanta! For, immediately on His Highness' entrance into the hermitage, our rites have become free[3] from let.[3]

What to speak of aiming the dart? For, by the mere twang of his bow-string from afar, he removes[3] all impediments as if with an (*angry*) roaring of the bow. (1)

I will just deliver these turfs to the sacrificer for[4] strewing on the altar[4] (*Turning round, looking about—In the air*) Priyaṃvadā! for whom are these *vetiver* (*cuscus*) salve[5] and (*these*) fibrous lotus-leaves being carried? (*Gesticulating listening*) What! do you say "(*These are*) for

cooling the body of Śakuntalā, who is extremely indisposed owing to a sun-stroke[6] ?" Then let her be carefully attended[7] to. She is indeed the (*very*) life-breath[8] of the revered patriarch. Meanwhile I, too, will send[10] (*for her*) evil-averting sacrificial water through the hands of Gautamī. (*Exit*).

V. L.—Dr. alone reads 'कुशानादाय' separately after शिष्यः। 'महानुभावः पार्थिवो'—R. V. 'महाप्रभावो राजा'—B. M. S. 'प्रविष्टमात्रे'—R. V. 'येन प्रविष्टमात्रे'—B. M. Ś. 'निरुपप्लवानि'—B. M. S. K. 'निरुपद्रवाणि'—R. V. 'संवृत्तानि'—B. M. S. 'प्रवृत्तानि भवन्ति—R. V. 'उपहरामि'—B. M. S. 'उपनयामि'—R. V. 'श्रुतिमभिनीय'—B. V. M. S. 'आकर्ण्य'—R. 'यत्नादुपचर्यताम्,—B. M. S. 'त्वरितं गम्यताम्'—R. V. 'कुलपतेः'—S. 'कण्वस्य'—R. V. 'तत्रभवतः कुलपते.'—B. P.

तत इति। 'यजमानस्य' कस्यचित् यष्टुः, ('यष्टा च यजमानश्च' इत्यमरः)। 'शिष्यः' छात्रः (क्यप्—३।१।१०९; 'शास् इद् अङ्हलोः'—६।४।३४; ३४८६)। 'कुशान्' दर्भान्। ("कुशः पुनः, अस्त्री **दर्भे**, रामसुते ना"— इति केशवः)। **शिष्य इति।** 'अहो' इति विस्मये। 'महान् अनुभावः' प्रभावः ('अनुभावः प्रभावे स्यात् निश्चये भावसूचके' इति विश्वः) यस्य तादृश। 'तत्रभवति' पूज्ये। 'प्रविष्टः एव' इति प्रविष्टमात्रम् (मयूरव्यंसकादित्वात् **नित्यसमासः**) तस्मिन्। अनेन युद्ध-विरतिः। 'निर्गता उपप्लवा.' उत्पाताः विघ्ना इति यावत् ["**उपप्लवः** सैंहिकेये **विप्लवोत्-पातयोरपि**' इति मेदिनी) येभ्यः तानि। (यद्वा उपप्लवेभ्यः निर्गतानि ("निरादयः क्रान्त्याद्यर्थे पञ्चम्या" इति **प्रादि-समासः**)। अत्र राक्षस-निराकरणे कारणे वक्तव्ये कार्य-रूप-कर्म-निरुपप्लवतोक्ते **पर्यायोक्तालङ्कारः**]। **का कथेति।** 'बाणानां' शराणाम् 'सन्धाने' योजने 'का कथा' तत्कथापि नास्ति। शरसन्धानं नापेक्षते इति भावः। 'स हि' राजा 'धनुष' हुङ्कारेण' (३।३।१०९) हुम् इति ध्वनिना 'इव 'दूरतः' दूरात् 'ज्यायाः' धनुर्गुणस्य 'शब्द.' ध्वनि. तेन टङ्कारेण '**एव**' (अन्य-योग-व्यवच्छेदार्थक एव-शब्दः) 'विघ्नान्' यज्ञ-विघ्न-स्वरूपान् राक्षसान् 'व्यपोहति' दूरीकरोति। न पुनः बाण-प्रयोगापेक्षा इति भावः। (का कथा इत्यत्र **अर्थापत्तिः**। 'हुङ्कारेण इव' इत्यत्र **समासोक्ति-गर्भोत्प्रेक्षा**, धनुषश्चेतनत्वारोपात् **पथ्यावक्त्रं** वृत्तम्] ॥१॥ **यावदिति।** 'यावत्' इति वाक्यालङ्कारे। विद्यते पुण्यम् अस्याम् इति 'वेदिः' परिष्कृता भूमिः तस्याः 'संस्तरणार्थम्' आच्छादनार्थम् 'ऋत्विग्भ्यः' याजकेभ्यः (आग्नीध्राद्याः धनैर्वार्या ऋत्विजो याजकाश्च ते' इत्यमरः 'उपहरामि' संगृह्य तेभ्यो ददामि। **आकाश इति।** (तल्लक्षणं यथा दश-रूपके–

"किं ब्रवीष्येवमित्यादि विना पात्रं ब्रवीति यत्। श्रुत्वेवाऽनुक्तमप्येकस्तत् स्यादाकाश-भाषितम्"॥) 'उशीरस्य' वीरणाऽऽख्य-तृण-मूलस्य ("स्याद् **वीरणं** वीरतरम्, मूलेऽस्य **उशीरमस्त्रियाम्**" इत्यमरः॥ 'खस्' इति भाषा, इति शब्द-कल्पद्रुम.॥) अनुलेपनम्' 'करणेल्युट्-३।३।११७) 'मृणालवन्ति' बिस-युक्तानि (**'मृणालं** नलदे वर्णितं, पुनपुंसकयोर्बिसे' इति मेदिनी)। "नलिनी-पत्राणि" पद्म-पर्णानि। 'श्रुतिमभिनीय' **प्रत्युत्तरम् अश्रुतमपि श्रुतमिति प्रदर्श्य**। 'आतपेन' सूर्यकिरणेन 'लङ्घनात् अभिभवात् सौरोत्ताप-वशात् इति भावः। 'बलवत्' अतीव 'अस्वस्था' पीडिता 'शरीरस्य निर्वापणाय' तापोपशमनार्थम् 'यत्नात् यत्नम् अवलम्ब्य 'उपचर्यताम्' सेव्यताम्। 'सा हि' शकुन्तला 'कुलपतेः' कण्वस्य 'उच्छ्वसितम्' जीवनमेव (अजहल्लिङ्गत्वात् उद्देश्य-विधेययोः लिङ्गाऽनैक्यम्)। वितानस्य इदं 'वैतानिकं' यज्ञीय (**'वितानं यज्ञ** उल्लोचे विस्तारे पुनपुंसकम्' इति मेदिनी) 'शान्त्युदकम्' अरिष्ट-नाशकं मन्त्रपूतम् अवभृथोदकम्। 'गौतमीहस्ते' विवक्षा-वशात् आधारत्वम्। ["गौतमी नाम कण्वस्य भगिनी इति कथ्यते" इति काटयवेम-श्रीनिवास-पादा.] 'विसर्जयिष्यामि' प्रेरयिष्यामि [सृजतेर्णिच् स्वार्थे]। **विष्कम्भक इति**। तल्लक्षणं तु दर्पणे—"वृत्त-वर्तिष्यमाणानां कथांशानां निदर्शक.। सङ्क्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः॥ मध्येन मध्यमाभ्यां वा पात्राभ्यां सम्प्रयोजितः। **शुद्धः** स्यात्, स तु **सङ्कीर्णो** नीच-मध्यम-कल्पित.)। स चायं यजमान-शिष्येण **मध्यम-पात्रेण** प्रयोजितत्वात् **शुद्धः**।

82n—1. यजमान &c.—(Ra. XVIII. 12)—A regular performer of sacrifice. यजते इति यज्+शानन् ["पूङ्यजोः शानन्"—3. 2 128.] or [शानच् by 3. 2. 124.]=यजमानः। शास्+क्यप् कर्मणि ['एति-स्तु शास्-वृ'—3. 1. 109.]=शिष्यः। ['आ'='इ' by 'शास्-इद्-अङ्-हलोः',–6. 4. 34), and 'स'='ष' by 'शासि-वसि-घसीनाञ्च'—8. 3. 19.] Cf. 'तत प्रविशति भरत-शिष्यः'—Vik. III. For 'शिष्यः's duty—vide MS. II. 176. **कुशानादाय**—The pupil soliloquizes while gathering Kuśa. This makes the remarks more natural than when he enters Kuśa in hand and delivers speech and walks away in the formal theatrical manner. **2. निरुपप्लवानि—उपप्लव**=Obstruction, calamity. PA&*MD*.17; *Ra. II*.48; *Ku. V*.61; *IV*. 49; **प्रविष्टमात्रे**—Cf. 'वाङ्मात्रेण'—Act. II; "दृष्टमात्रस्य"—Ibid. "**विद्धमात्र**"—*Ra*.V.57. **3. हुङ्कारेण—हुम्+कारः=हुङ्कारः** ['वर्णात् कारः'—*Vārt*. 3. 3. 108.]. Read

"आकारः, ककारः, **हुङ्कारः—'कार-प्रत्ययस्य धातोः अविहितत्वेऽपि अधिकार-बलात् **कृत्संज्ञा**। तेन कृत्-प्रत्ययान्तत्वात् प्रातिपदिकत्वम्, प्रयोजनाभावात् क-कारस्य न इत्संज्ञा" ।—**Prabhā.** 'हुङ्कार'is any sound of defiance. Cf. "अनुहुङ्कुरुते घनध्वनिं न हि गोमायुरुतानि केशरी"—*ŚPB. XVI.* 25. "हुङ्कारगर्भैः द्विषताम् शिरोभिः'—*Ra. VII.* 58 ; *Ku. V.* 54. Here, however, the 'bow' is compared to 'Rudra' and the 'ज्याशब्दः' to 'हुङ्कार' of Rudra. *Kāli.* elsewhere in *Ku II.* 26, refers to Rudra's making 'हुङ्कार'। Cf.—"आवर्जित-जटामौलि-विलम्बिशशिकोटयः। रुद्राणामपि मूर्धानः क्षत-हुङ्कार-शंसिनः" ॥ 'प्रतिशब्दोहि हरेः हिनस्ति नागान्'—Vik I. 'हुङ्कारेण तं वारयति'—PC. II. **4. व्यपोहति**—(dispels)–UC.II. 19. वि +अप+ ऊह् + लट्+ति, optionally **Atmp**. by "उपसर्गास्यत्यूह्योः वेति वाच्यम्'—(*Vārt.* 2701). But here the king removes obstacles, the **benefit of which is enjoyed by the sages.** so **Prmp**. 'दुःखानि अपोहति'—*UC. II.* 19. **5. ऋत्विग्भ्यः**—ऋतौ ऋतौ यजति इति ऋतु+यज्+क्विन् ["ऋत्विक् दधृक् स्रग्"—&c. 3. 2. 59] =ऋत्विक् (निपातने) —One sacrificing at prescribed times. "अग्न्याधेयम् पाकयज्ञान् अग्नि-ष्टोमादिकान् मखान्। यः करोति वृतो यस्य स **तस्यर्त्विग्** इहोच्यते" ॥ —*MS. II*, 143. **6. का कथा**—&c.—The question of putting arrow to the bow does not arise at all, mere twang of his bow from afar is sufficient for the expulsion of the demons. **आकाशे**—This stage direction is used when there is **only one actor present in the stage** who gesticulates to see some one outside, to whom he puts some questions and simulates to hear something in reply which he repeats for the sake of the audience by asking the question—"किं ब्रवीषि"—&c. (Com). This is used for the avoidance of unnecessary introduction of a new character. **श्रुतिमभिनीय**— 'तच्च पार्श्वाऽऽनतेन शिरसा स्तब्धेन नेत्रेण। तल्लक्षणं तु—'पार्श्वस्याभिमुखं यत्तु तत्पार्श्वाऽऽनतमुच्यते'। "प्रयोज्य-माकर्णनादौ पार्श्वस्थस्यावलोकने। यत्तु स्यान्निश्चलपुटं स्तब्धनेत्रं प्रचक्षते" ॥ —R. **7. उशीर** &c.--उशीर (*Andropogon muricatum, Cuscus*)—is **a kind of fragrant grass root (खस्) renowned for its cooling properties and is used in India in trellis for cooling the air ;**

MK. X. 23 ; *Kalpa. P.* 124 ; 'फलोनी-लोध्र * * सेव्यम् उशीरम्"—*CS.* Read NC. IV. 121–116 for treatment with उशीर। For the soothing properties of मृणाल, Cf.—* * * 'शीताम्बुशीतलतरैश्च शयानमेवम् हारैः मृणाल-वलयैः अवला स्पृशेयुः'—Ss, also Rat.II. **आतप-लङ्घनात्**–From an attack of the sun, or **moving in the sun**—(HS). 'लङ्घनन्तु उपवासे स्यात् **क्रमणे** प्लवनेऽपि च—*Medinī.* Vide (243n. 1). ०**निर्वापणाय** —for refrigerating ; 'अङ्गानि ० निर्वापय'—*Ra. III. II* ; *Ra. XII.* 63 ; *XIX.* 56 ; *Śak. III.* 13 ; (15*n.* 1). **8. भगवतःकण्वस्य**—(R)—is **rejected** for a disciple **should not utter** the name of his preceptor. Cf.—'आत्मनाम **गुरोर्नाम** नामाति-कृपणस्य च। श्रेयष्कामो न गृह्णीयात् ज्येष्ठपुत्र-कलत्रयोः' इति कर्मलोचनम्। (16*n.* 2). **9. उच्छ्वसितत्**—उत+श्वस्+क्त भावे—'breath, the very life'—*Apte.* 'The very breath of his nostrils'—*M.* Cf. "The breath of our nostrils, the anointed of the Lord, was taken"—**Lam.** IV. '**उच्छ्वसितं** मा कुमारस्य'—HC. I. 17. "आसन्नपाणिग्रहणेति **पित्रोरुमाविशेषो-च्छ्वसितं बभूव**"—*Ku. VII.* 4 ; "*I say, my daughter is my flesh and blood*"—**Merchant of Venice.** III. 1. **वैतानिकं**—ŚPB. IV. 10 ; VS. III. 16. **10. शान्त्युदकम्**—is the evil-averting holy water of the sacrifice like the '*eau benite*' of the *Roman Catholics.* This sentence has been very cleverly put in the mouth of the disciple to serve an important purpose, for which vide '**इदो इदो अज्जा गोदमी**' &c. at the close of this *Act*-**गोतमीहस्ते**—For सप्तमी vide—(81n. 3). **विसर्जयिष्यामि**—वि+सृज् ordinarily means '*to send*', '*to despatch*'. Cf. 'भोजेन दूतो **रघवे विसृष्टः**'—*Ra. V.* 39. Hence **स्वार्थे णिच्**। Cf."विसर्जयामास तदा विभीषणम्"—**Ram.** VI. 10. 29 ; 36, 22. **11. विष्कम्भकः**—Prelude. "*Explication*"—*Dr. Hall.* It is a *dialogue* or *a monologue* carried on between characters other than the chief ones, which **connects the preceding Act with the subsequent** one by informing the **audience** of what **has occurred in the interim,** either by direct **statement** or by **indirect suggestions.** Unlike **प्रवेशक (Vide Act VI), it may occur even at the beginning of the First**

Act. It is **'शुद्ध'** when carried on by one or more **minor (मध्यम)** characters in Skt. in high tone, and **'संकीर्ण'** when carried on by characters **minor** as well as **low (नीच)** in Prākṛta in low tone. Here it is शुद्ध । It informs us that the king, true to his promise, went to the penance-grove and drove away the fiends ; and his lady love *Ś*ak. also like his ownself was suffering from love-sickness. The word is from **'स्कम्भ्'** (*to bind together*). i.e. compressing an account in a short space. "**विष्कम्भते** प्रजारिष्ट, **विष्कम्नाति** परोदयम् । **विष्कभ्नोति** परोद्योगं, तपः शौर्यबलेन यः'—KR. 81 ; (189n. 8).

Text :—(ततः प्रविशति कामयाना'ऽवस्थो राजा) **राजा** (निःश्वस्य)—

आर्या [12, 18, 12, 15] **जाने तपसो वीर्यं. सा बाला परवतीति मे विदितम् ।**
अलमस्मि ततो हृदयं तथापि नेदं निवर्तयितुम् ॥२॥

(*Enter the king in the air of one*[1] *in love*[1]). King (*Sighing*)—I know the potency of penance and I do know that that girl has a master. And yet I cannot turn away (*my*) heart from her, (2)

V. L —'कामयान'—R's Com ; V. 'समदन'—B. M. 'कामयमान'—R. S. ; Last line as—'न च निम्नादिव सलिलं निवर्तते मे ततो हृदयम्' —B. HS. P.

तत इति । 'कामयानस्य' सञ्जात-मन्मथस्य 'अवस्था' इव अवस्था यस्य तादृशः । **जाने इति** । 'तपसः वीर्यं' शक्तिं ''जाने' (१।६।७६) क्रुद्धाः सन्त. तपःप्रभावेण ऋषयः दोषिणं मां दग्धु समर्थाः, तन्मे विदितम् अस्ति । अतः शकुन्तला बलात् ग्रहणीया न भवति इति भाव । 'स बाला' शकुन्तला ('प्रक्रान्त-प्रसिद्धाऽनुभूतार्थेषु यच्छब्दः तच्छब्दं नापेक्षते') 'परवती' पराधीना 'इति मे विदितम् ('क्तस्य च वर्तमाने' इति कर्तरि षष्ठी, (२।३।६७ ; ३।२।१८८), यद्वा **'मे'** इति **'मया' इत्यर्थे अव्ययम्** । एतत् **प्राक् व्याख्यातम्**) । अतः पितरि अननुमोदिते नोद्वाह्या । एवं चेत् अस्याम् अनुरागिण अलम् इति वितर्कयन् आह 'तथापि' अभिलाष-सिद्धिः दुरापा इति जानन्नपि 'इदं' 'हृदयम्' कर्तृ । 'ततः' शकुन्तलायाः ("वारणार्थानामीप्सितः" (१।४।२७ इति पञ्चमी)'निवर्तयितुम्' (२।३।६६) परावर्तयितुम् 'अलम्' समर्थः ('अलं भूषण-पर्याप्ति-शक्ति-वारण-वाचकम्' इति वैजयन्ती) 'न अस्मि'। (अत्र **अप्रस्तुतप्रशंसा** । **वेदन-क्रियायाः हृदय-निवर्तन-क्रियायाश्च विरोधः** ।

तदाभासस्तु रति-स्वाभाव्यात्। **श्रुतिवृत्त्यनुप्रासौ**। **आर्या** जातिः। पूर्वार्धे **प्रक्रम-भङ्ग-दोषः**) ॥२॥

83n.—1. कामयान—(Cf. '**कामयानमिव** स्त्रियः.'—Rām. II. 100.23. '**कामयानं कामयमान** कामुकम्'—Rāma.)—Libidinous. (Also 56n. 5. end). Kāli., (who is **certainly anterior to अश्वघोष**) out of his fondness for **Vedic Grammar** has used it elsewhere—'राजयक्ष्मपरिहानिरराययौ, **कामयान**-समवस्थाया तुलाम्'—*Ra. XIX.* 50. This is a **Vedic form**, for 'कम्' takes 'णिङ्' स्वार्थे by 'कमेर्णिङ्'–3. 1. 30 and 'शानच्' comes next and the form expected in भाषा is '**कामयमान**' Cf. ['नमालिकां **कामयमान** शुक'—*Kād. p.* 718; 'इतिहासनिबन्धेषु **कामयमानानाम्** &c.—*before* 89*n, infra*] by "आनेमुक्"—7. 2. 82—'आकारान्त-शब्दात् परवर्तिनःआन-प्रत्ययात् पूर्वं मकारागमो भवति।"—**Prabhā**. But '**मुमागम**' is barred by "सर्वे विधयः छन्दसि वैकल्पिकाः'—BD. *MN* following *VM* remarks :—'कामयते विषयान् इच्छति **कामयानः**। कमे णिङन्तात् **शानच्**। अनित्यम् आगम-शासन मिति **मुमागम-भावाऽभावः**। एतदेवाभिप्रेत्य उक्तं वामनेनापि—'**कामयानः शब्दः सिद्धः अनादिश्च**'—*KSV. V.* 2. 83. **2. जाने—**'अनुपसर्गात् ज्ञः'—" (1. 3. 76). इति आत्मने-पदम्। 'परार्थे' गां जानाति—**Prabhā**. "अनुपसर्गात् किम्? 'अनुजानीहि नः उटजगमनाय'—(Act I. supra). 'कथ तर्हि 'इथ्यं नृपः पूर्वमवालुलोचे **ततोऽनुजज्ञे** गमनं सुतस्य—(BK. 1. 23)? अत्र कर्मणि लिट्, नृपेण इति विपरिणामः"—BD. **बाला०**—A girl aged 16. Read "आषोडशाद् भवेत् **बाला**, त्रिशता **तरुणि मता** पञ्च-पञ्चाशता **प्रौढा**, भवेत् **वृद्धा** ततः परम्॥—Ratimañjarī. **3. निवर्तयितुम्—**नि+वृत्+णिच्+तुमुन् by 'पर्याप्तिवचनेष्व् अलमर्थेषु"—(3. 4. 66). **4. परवती—**(70n, 2); "एतस्मि-न्नतिक्रमे परवतीयम्"—*Māla. III*: *Rām. III* 18. 9.

Text :—(मदन-बाधां निरूप्य) **भगवान् कुसुमायुध! त्वया चन्द्रमसा च विश्वसनीयाभ्यामतिसन्धीयते**[1] **कामि-सार्थः**[2]। **कुतः—**

तव कुसुम-शरत्वं शीत-रश्मित्वमिन्दोर्
मालिनी **द्वयमिदमयथार्थं**[3] **दृश्यते मद्विधेषु।**
(ननमयय) **विसृजति**[4] **हिम-गर्भैरग्निमिन्दुर्मयूखैस्**[5]
त्वमपि कुसुम-बाणान् वज्र-सारी-करोषि[6] ॥३॥

(*Gesticulating pangs of love*) Almighty god of flowery shafts ! the whole guild[2] of lovers are being overreached[1] by thee and the moon, who are (*apparently*) deserving of confidence. For—Your flowery shafts and the cold rays of the moon, both appear untrue[3] for (*men*) in my plight. The moon with forst-wombed beams[5] discharge[4] fire, and you also make your flowery shafts, hard[6] as adamant[6]. (3)

मदनेति। 'मदनेन' कामदेवेन कृतां 'बाधां' पीड़ां 'निरूप्य' अर्थात् लोलितेन शिरसा, दोलेन हस्तकेन, शून्यया दृष्ट्या अभिनीय। 'कुसुमायुध' कन्दर्प ! (तथा-चोक्तं दर्पणकारेण—"मौर्वीरोलम्बामाला धनुरथ विशिखाः कौसुमाः पुष्पकेतोः), 'त्वया चन्द्रमसा' चन्द्रेण च 'विश्वसनीयाभ्यां' विश्वास-स्थानाभ्याम्' आयुधानां कुसुम-घटितत्वात्, रश्मीनां शीतलत्वाच्च॥ 'कामिनां सार्थः' समूहः ("सार्थः वणिक्समूहे स्यात् अपि संघात-मात्रके" इति मेदिनी') 'अतिसन्धीयते' प्रतार्यते 'वञ्चनञ्चाति-सन्धानं व्यलीकञ्च प्रतारणम्' इति हेमचन्द्रः)। **तवेति**।—'तव' प्रकरणात् कामदेवस्य 'कुसुमानि' एव 'शराः' यस्य तस्य भावस्तत्। 'इन्दोः'-चन्द्रस्य 'शीता' हिमाः शान्तिप्रदा इति यावत् ('वेतसे बहुवारे ना गुणे शीतम् हिमे त्रिषु' इति रभसः') 'रश्मयः' किरणाः यस्य तस्य भावस्तत्। शराणां सौकु-मार्यं, रश्मीनां शीतलत्वम् 'इदं' द्वयम्' उभयं मद्विधेषु विरहिषु इत्यर्थः (अत्र मयि विशेषे प्रस्तुते सामान्यस्य उक्तेः **अप्रस्तुतप्रशंसा**) न यथार्थम् 'अयथार्थं विपरीतार्थं मिथ्याभूतम् इति भावः, (**विरुद्धार्थः** अत्र नञ्। तथा चोक्तम्—"तत्सादृश्यम् अभावश्च तदन्यत्वम् तदल्पता। अप्राशस्त्यं **विरोधश्च** नञर्थाः षट् प्रकीर्तिताः") ॥ 'दृश्यते' अनुमीयते इत्यर्थः। तद्धेतुमाह। 'इन्दुः हिमं' तुहिनं 'गर्भे' येषां तैः 'हिमगर्भैः' शीतलैः 'मयूखैः' किरणैः 'अग्निं विसृजति' वर्षति (गुण-द्रव्ययोः विरोधः)। 'त्वमपि कुसुम-बाणान् 'वज्रस्य सारः' स्थिरांशः इव 'सारः येषां ते 'वज्रसाराः' अवज्रसारान् वज्रसारान् इव करोषि दृढ़ीकरोषि इत्यर्थः। (अत्र अयथार्थं प्रति परार्धवाक्यार्थद्वयस्य हेतुत्वात् **वाक्यार्थ-हेतुकं काव्यलिङ्गम् रूपकोपमा**। विप्रलम्भस्वाभाव्यात् आभासत्वम् इति **विरोधाभासालङ्कारः**। कुसुमेषु यद्बाणत्वमारोपितम् तद्विरह-दुःखदत्वेन प्रकृतोपयोगीति **परिणामश्च**। सिद्धान्तवागीशमते **विषमालङ्कारश्च**। **छेक-वृत्त्यनुप्रासौ**। अत्र **गुणातिपात**-नाम नाट्य-लक्षणमुपक्षिप्तम्—"**गुणातिपातः** कार्यं यद्विपरीतं गुणान् प्रति" इति दर्पण-लक्षणात्। **मालिनीवृत्तम्**) ॥३॥

84n.—1. अतिसन्धीयते—अति+सम्+धा means 'to deceive' (*Com.*). Cf. 'परातिसन्धानमधीयते' &c.—(177*n*. 4). **कामि-सार्थः**—(HS) is preferable to 'कामि-जन-सार्थः' which is *tautologous*. Cf. "कवि-सार्थः" —KA. I. 100. **विश्वसनीयाभ्यां**—'क्व च ते **विश्वसनीयमायुधम्**"—Māla. III. 2. **2. कुसुम-शरत्वं**—According to poetic convention, the arrows of Cupid consist of **five flowers** (Com.). Read "पञ्च-पुष्पा-युधः योगी पुष्प-कोदण्डमण्डितः ॥ **हर्षणं रोचनाख्यं च मोहनं शोषणं** तथा । **मारणञ्चेति** संज्ञाभिर्मुनिमोहकराण्यपि" ॥—*Kālikā Purāṇā. II* ; "**अरविन्द मशोकञ्च चूतञ्च नवमल्लिका । नीलोत्पलञ्च** पञ्चैते पञ्चबाणस्य सायकाः" । Also *GG. X.* 14 ; *PC. I.* 3 ; *NC. I.* 49 ; *Ku. III.* 10. **3. शीत-रश्मित्वं**—श्यै+क्तः—[3. 4. 72]=शीतः । 'य'='इ' by 'द्रव्यमूर्ति-स्पर्शयोः श्यः"—[6. 1. 24.] । 'इ'='ई' by ['हलः'—6. 4. 2]. Thus '**शीतः** स्पर्शः' but '**शीनं** (घनीभूतं) घृतम्' । "अन्यत्र **श्यानः** (संकुचितः) वृश्चिकः"—[8. 2. 47.] । **4. अ-यथार्थम्**—Not accurately correct. Here 'नञ्' is विरुद्धार्थवाचक । **5. हिम-गर्भैः** &c.—(Cf. 'शुकगर्भ'—I. 13). It is **queer** that the king refers to the unbearableness of the moon-light **at noon-tide. This is due to his being 'कामार्त'** । Cf. "**कामार्ता** हि प्रकृतिकृपणाश्चेतनाचेतनेषु"—PA & *MD. I.* 5. In Mahā-Nātaka, **'विरही** रामः' **actually mistakes the Moon for the Sun.** Cf. '**चण्डांशुरुज्जृम्भते** चण्डांशो निशि: &c.—IV. 22; also "शीत-रश्मिरसि चन्द्र कथं मान्तापयस्यनल-गर्भ-मयूखैः"—IV. 23."चन्द्रश्चण्डकरायते मृदुगतिर्वातोऽपि वज्रायते, मालासूचि-कुलायते, मलयज-लेपः स्फुलिङ्गायते"—IV. 31. For similar idea, Cf. "लोकानन्दकरोऽपि चन्द्रवदने **वैरायते चन्द्रमाः**" &c.—*Puṣpa-bāṇa-vilāsa*, 8. "सपदि सुधानिधिरपि तनुते तनुदाहम्"—*GG. IV.* 7 ; *V.* . 3 ; *IX* 10 ; "नन्दन-वन-वाताः शिखिन इव"—Vik. II. "कुसुमशयनं न प्रत्यग्रं न चन्द्रमरीचयोः" &c.—*Vik. III.* 9. "तथाहि मृणा-लिन्याः शिशिर-किसलयमपि **हुताशनायते**, ज्योत्स्ना अपि **आतपायते**"—*Kād. P.* 802 ; '**क्व** रुजा हृदयप्रमाथिनी क्व च ते **विश्वसनीयमायुधम्** । मृदुतीक्ष्ण-तरं यदुच्यते तदिदं मन्मथ ! दृश्यते त्वयि ॥—Māla. III. 2 ; 'न सन्ताप-छेदो हिम-सरसि चन्द्रमसि वा"—MM. I. 31 ; *Ku. V.* 55. **6. R notices 'प्रक्रम-भङ्गदोष'** here, for in the first half, the moon is mentioned *after* 'Cupid', while the order is *reversed* in the second

half. "उत्तरार्धे क्रम-प्रक्रम-भङ्गः। विरहिणो राज्ञः वचनम् इति परिहर्तव्यः' R also suggests an amendment.—"त्वमिह कुसुमबाणान् वज्रसारान विधत्से। विसृजति सच वह्नि शीतगर्भैर्मयूखैः। इति वा पाठः।" There is no कथितपद-दोष as repetition of the words has avoided the fault of 'प्रतीति व्यवधान' ("इन्दु-शब्दानुपादानात् कथितपद-दोषाभावश्च भवति")। Cf. —"उदेति सविता ताम्रः, ताम्र एवास्तमेति च"--*SD. VII*, where ताम्र though mentioned **twice** is not a fault. Cf. **the idea of the Śloka with that of Mala. III.** 2.—Quoted above.

Remark—B has the following Ślokas one before and two after Śloka 2 thus :—

अ॰ अद्यापि नूनं हर-कोप-वह्नि स्त्वयि ज्वलत्यौर्व[१]इवाम्बुराशौ।
त्वमन्यथा मन्मथ[२] मद्विधानां भस्मावशेषः[३]कथमित्थमुष्णः॥ (उपजाति)

Verily, even, now, the fire of Śiva's ire is burning in you, like the submarine[1] fire in the masses of water (in ocean). How else, O cupid,[2] could you who were reduced[3] to ashes,[3] be so hot to men of my stamp ?

अ॰ अनिशमपि मकर-केतुर्मनसो रुज[१]मावह[२]न्नभिमतो[३] मे।
यदि मदिरायत-नयनां[४] तामधिकृत्य[५] प्रहरतीति॥ (मालिनी)

The Makara (a kind of aquatic animal)—bannered God, though constantly causing[2] mental throe[1] to my mind might be acceptable[3] to me, in as much as he smites me apropos of that damsel[4] with fascinating wide eyes.

अ॰ वृथैव संकल्प-शतैर[१]जस्रमनङ्ग! नीतोऽसि मया विवृद्धिम्[२]।
आकृष्य चापं श्रवणो-पकण्ठे मय्येव(युक्तं)युक्तस्तव बाणमोक्षः॥ (उपजाति)

In vain, O Cupid, (body-less one) you have[2] been fostered[2] by me with[1] hundreds of desires.[1] It behoves you to hurl (your) arrows at me, by drawing your bow up to the ear.

N.B. All these Slokas have rightly been suspected to be **spurious**.

Text :—(सखेद परिक्रम्य)। क्व नु खलु संस्थिते[१] कर्मणि सदस्यैरनुज्ञातः[२] खिन्न[१]मात्मानं विनोदयामि।। (निश्वस्य)। न च प्रिया-दर्शनादृते शरणमन्यत्।

यावदेनामन्विष्यामि। (सूर्यमवलोक्य)। इमामुग्रातप-वेलां प्रायेण[४] लता-वलयवत्सु मालिनी-तीरेषु स-सखी-जना शकुन्तला गमयति। तत्रैव तावद् गच्छामि (परिक्रम्याऽवलोक्य च)। अनया बाल-पादप-वीथ्या[५] सुतनुरचिरं गतेति तर्कयामि। कुतः—

[आर्या
12, 18
12, 15]

सम्मीलन्ति न तावद्बन्धन-कोषा[६]स्तयाऽवचितपुष्पाः।
क्षीर-स्निग्धा[७]श्चामी दृश्यन्ते किसलय-च्छेदाः[८] ॥४॥

(*Pacing aejectedly*) The sacrifice being[1] over, dismissed[2] by the (*assembled*) priests, where shall I possibly soothe my distressed[3] self ? (*Sighing*) What else but a sight of (*my*) darling is my recourse ? I will seek her. (*Glancing at the sun*). This extremely sultry hour Śakuntalā usually[4] passes with her friends in the creeper-bowered banks of Mālinī. I will just go there. (*Turning round and looking*) Methinks the fair-figured (*maiden*) has passed by this corridor[5] of young trees[5] not long ago. For— The sheaths[6] of (*blossom*)-stems whence flowers have been culled by her, are not yet closed, and yonder fragments[8] of (*tender*) leaflets are seen (*still*) unctuous[7] with milky saps. (4)

V. L.—'खिन्नमात्मानम्'—B. 'श्रम-क्लान्तम्'—R. M. V. S. 'न च प्रिया-दर्शनात्'—B.. 'किं नु खलु प्रिया-दर्शनात्'—R. V. M. S.'अनया &c. and the following Śl. occurs in B.M. Ryder, but omitted by R. V. S.

क्वेति। 'संस्थिते' अवसिते निष्ठाम् गते इति यावत् ("संस्थाप्यवस्थ-प्रणिधि-समाप्ताकार-मृत्युषु" इति वैजयन्ती') 'सदस्यैः' ['तत्र साधुः' (४।४।९८) इति यत्] विधिज्ञैः तापसैः ('सदस्याः विधि-दर्शिनः' इत्यमरः) 'अनुज्ञातः' यागस्य निष्ठां गतत्वात् विश्रमाय समादिष्टः 'खिन्नं' खेदप्राप्तम्। 'विनोदयामि' विनोदेन कौतुकेन क्लेशम् अपहरामि इति भावः। 'ऋते' विना। ('पृथक् विनाऽन्तरेण-र्ते हिरुङ् नाना च वर्जने' इत्यमरः) 'अन्यत् शरणम्' आश्रयः। "(ततः प्रविशति–" इत्यादिना एतदन्तेन 'उद्वेगः' नाम पञ्चमावस्था सूचिता। तल्लक्षणं तु 'मनसः कम्प उद्वेगः' इति)। 'प्रायेण' बाहुल्येन न तु सर्वदा ('प्रायश्चा-नशने मृत्यौ प्रायो बाहुल्य-तुल्ययोः' इति विश्वः) 'लतानां वलयानि' वेष्टनानि निकुञ्जानि

इति भावः। तानि सन्ति येषां तादृशेषु लता-कुञ्ज-सनाथेषु, अनेन शैत्यातिशयो व्यज्यते। 'तीरेषु' तीर-स्थितेषु। (एकत्र-वस्थानात् बहुवचन-निर्देशः। "**भाद्र-कृष्ण-चतुदश्यां** यावत् आक्रमते जलम्। तावद्गर्भं विजानीयात्, तदन्यत **तीरमुच्यते**" इति प्रायश्चित्ततत्त्वे)। 'सखीजनेन' अनसूया-प्रियंवदाभ्याम् न 'सह' 'उग्रः' दुःसहः 'आतपः' सूर्यकिरणः यत्र तथाविधां 'वेला' समयं 'गमयति' यापयति। 'सुतनुः' सुन्दरदेहा शकुन्तला 'अनया बाल-पादपानां वीथ्या' पङ्क्त्या ("**वीथी पङ्क्तौ च** गृहाङ्गे च रूपकान्तर-**वर्त्मनोः**' इति मेदिनी)। यद्वा 'बालपादप-सनाथा वीथी' वर्त्म (शाक-पार्थिवादिः) तथा। (अत्र '**विचारो**' नाम नाटयलक्षणमुपक्षिप्तम्। '**विचारो** युक्त-वाक्यैः यदप्रत्यक्षार्थ-साधनम्" इति तल्लक्षणात्]। **सम्मीलन्तीति**। 'तया' शकुन्तलाया 'अवचितानि' छिन्नानि 'पुष्पाणि' कुसुमानि येभ्यः तादृशः 'बन्धन-कोषाः' प्रसव-बन्धन-कोषाः वृन्तकोषा इति यावत् ('**वृन्तं प्रसव-बन्धनम्**' इत्यमरः) इदानीमपि 'तावत्' इति साकल्ये ('यावत् तावच्च, साकल्येऽवधौ मानेऽवधारणे' इत्यमरः) 'न सम्मीलन्ति' सङ्कोच प्राप्नुवन्ति। बहुपूर्व सञ्चये तु सम्मीलन्ति एव इत्याशयः।, 'अमी' पुरतः स्थिताः पल्लवाना 'छेदाः' शकलाः (इति मेघदूत-टीकायां मल्लिनाथः। अर्थात् भूमि-पतितानि खण्डानि ('**छेदः खण्डोऽस्त्रियाम्**' इति त्रिकाण्डशेषः) 'क्षीरेण' द्रवेण (इति शब्दरत्नावली) अर्थात् प्रसव-भङ्ग-प्रवृत्त-निर्यासेन, 'स्निग्धाः' उत्ताः, बहुपूर्व छेदेन तु क्षीर-शोषणात् पल्लव-च्छेदस्य रुक्षता एव स्यादित्याशयः। [**तुल्ययोगिता-समुच्चययोः** एकाश्रयानुप्रवेशरूपः **सङ्करः**। **आर्या** जातिः) ॥४॥

85n.—1. संस्थिते &c.—Generally 'संस्थित' means '**dead**'. "परासु-प्राप्त-पञ्चत्व-परेत-प्रेत-**संस्थिताः**। मृतप्रमृतौ त्रिष्वेते"—*AK*. Cf. "तमो नुनुदे सा तु तथैव **संस्थिता**'—*Ra. VIII.* 40.'प्रमदामनु **संस्थितः**'—*Ibid.* 72. But here Kāli. uses it in the sense of '**finished, completed**'. Cf. 'सद्यः **संतिष्ठते** यज्ञः तथाशौचम् इति स्थितिः'—*MS. V.* 98; '**संतिष्ठते** समाप्तिम् एति'—KB. **विनोदयामि**—Cf."अथेमं दिवसशेषम् उचित-व्यापार-विमुखेन चेतसा क्व यापयामि"—*Māla*. III. (200n.3).**प्रिया-दर्शनात् ऋते**—'अवेहि मां प्रीतम् ऋते तुरङ्गमात्'—Ra. III. 63. 'युद्धात् ऋते' —BC. II. 40. **प्रायेण**—Generally. (PA&*MD*. 35); here it may mean 'in all probability.' **2. ससखी-जना—**जन—here has a collective sense. Cf. 'ज्ञाति-जन' (137n. 1). **बाल-पादप-वीथ्या—**वीथी (or वीथि) means 'road' (*Ki. VII.* 17) or 'row' (*Com.*) Hence, either

(*i*) by the road decorated with young trees, or (*ii*) by the row of young trees *i.e.*, the road having row &c. [by Transference of Epithet]. **सुतनुः**—(255n. 1). **तर्कयामि**—Cf. 'तथा तर्कयामि आर्ययारूढ़या भवितव्यम्'—*MK. VI. Read the whole speech of* **चेट**। **3. सम्मीलन्ति**—To close. Cf. 'उपान्तसंमीलित-लोचन'—*Ra. III.* 26 ; *XIII.* 10. Also **'मिलन्ति** प्रत्यहं यस्य वाजिवारणसम्पदः। **मीलन्ति** रिपु-नारीणां मुखपद्म-वनानि च'—*KR.* 145. **4. किसलय-छेदाः—छेदः**—A cut or fragment. Cf. 'विस-किसलय-**च्छेद**-पाथेयवन्त'--PA&*MD.II.* **'कण्ठ-च्छेद**-परम्परा'—*Ra. XII.* 10 ; *Ku. I.* 4 ; *MM. I.* 22. Here either (*i*) fragments of tender twigs, or (*ii*) Mutilated tender twigs (भावानयने द्रव्यानयनम्'—*MN on Ku. V.* 35).

Text :—(संस्पर्शं रूपयित्वा[1]) । **अहो प्रवात-सुभगो[2]ऽयम् उद्देशः।**

आर्या [12. 18 12, 15]
शक्यमरविन्द-सुरभिः कण-वाही मालिनी-तरङ्गाणाम् ।
अङ्गैरनङ्ग-तप्तैरविरलमालिङ्गितुं पवनः ॥५॥

(परिक्रम्यावलोक्य च)—**हन्त! अस्मिन् वेतस-परिक्षिप्ते लता-मण्डपे सन्निहितया शकुन्तलया भवितव्यम्। तथाहि—**

आर्या [12. 18 12, 15]
अभ्युन्नता[6] पुरस्तादवगाढ़ा[7] जघन-गौरवात्[8] पश्चात् ।
द्वारेऽस्य पाण्डु-सिकते[9] पद-पङ्क्तिर्दृश्यतेऽभिनवा ॥६॥

(*Gesticulating the touch of the breeze*) Ah ! breezy-sweet[1]' is this spot. The lotus-fragrant[2] breeze, wafting[3] the ripple-sprays[3] of Mālinī can be embraced closely by limbs inflamed[4] by the limbless (*cupid*). (5). (*Turning round and observing*)

In this cane[5]– enclosed creeper-arbour, Śakuntalā must be close by. For—In the white sand[9] at the door, is seen a fresh row of foot-steps, raised[6] in front and depressed[7] behind, on account of the heaviness of the hips.[8] (6)

V. L.—'शक्यम्'—V. R. M. S. 'शक्यः'—B. P. Dr. 'अविरलम्'—V. R. M. S. 'निर्दयम्'—B. 'शकुन्तलया'—B. S. 'तया'—R. V. M.

अहो इति। 'अहो' इति प्रशंसायां हर्षे वा। प्रकृष्टः वातः इति 'प्रवातः'

तेन 'सुभगः' सुन्दरः सुखसेव्य इति यावत्। 'उद्देशः' भूभागः। **शक्यमिति**॥ अस्मिन् भू-भागे 'अनङ्गेन' मदनेन करणैः 'तप्तानि' पीड़ितानि तादृशैः, 'अङ्गैः' (२।३। १८) 'अरविन्दैः' पद्मैः ('गवादिषु विन्देः सञ्ज्ञायाम्', (वाः—३।१।१७८) इति शः। 'शे मुचादीनाम्' (७।१।५९) इति नकारागमः)। 'सुरभिः' सुगन्धिः '(अनेन घ्राणतर्पकत्वम् सूच्यते) अपि च 'मालिन्याः तरङ्गाणाम् ऊर्मीणां 'कणान्' क्षुद्रजल-विन्दून् ("लव-लेश-कणाणव" इत्यमरः) वहति धारयति इति 'कण-वाही' शीकरैः संपृक्त इति भावः। 'पवनः' वातः 'अविरलं' दृढं यथा तथा 'आलिङ्गितुं 'स्प्रष्टुं 'शक्यं' शक्यते इत्यर्थः (ननु 'शकि सहोश्च' (३।१।९९) इति कर्मणि यकि कृते 'शक्यम्' इति रूपम्। तेन सह 'पवनस्य' **भिन्न-लिङ्गस्य सामानाधिकरण्यम्** कुत इति चेत्। न। **महाभाष्य-वचनात्** सिद्धम्। "**शक्यं** चानेन श्व-मांसादिभिः अपि **क्षुत् प्रतिहन्तुम्**", अपिच '**शक्यं**" चानेन **शालीमांसादीनि** अपि व्रतयितुम्" इति)। (प्रियादर्शनेन आत्म-विनोदन-कार्यम् आरभमाणस्य पवनोऽपि तत्कार्यत्वे सहायेन उपात्त इति **समाहितालङ्कारः**। "कार्यारम्भे सहायाप्तिः" इति तल्लक्षणात्। मालि-मालीति **छेकानुप्रासः**। **श्रुत्यनुप्रासस्य** तु अनेन सहैक-वाचकानु-प्रवेशलक्षणः **सङ्करः**। **वृत्त्यनुप्रासश्च**। पवनः आलिङ्गनेन सुखमुत्पादयति इति **समासोक्ति-रपि**। आलिङ्गन-शक्यत्वस्याऽसंबन्धे संबन्ध-कथनात् **अतिशयोक्तिश्च**। **आर्या-**जातिः)॥५॥ **अभ्युन्नतेति**। 'पाण्डवः' पाण्डुवर्णाः ('पाण्डुस्तु पीत-भागार्धः केतकी-धुलि-संनिभ' इति शब्दार्णवः) 'सिकता' वालुका ('सिकता स्त्री सिकतीले वालुकायां तु भूमनि' इति मेदिनी। अयं शब्दः प्रायेण बहुत्वे, "**एकापि सिकता** तैलदाने असमर्था" इति **भाष्य-प्रयोगात् एकत्वेऽपि** क्वचित्) यस्मिन् तादृशे, 'अस्य' वेतस-परिवेष्टित-मण्डपस्य 'द्वारे' (तत्प्रवेश-सूचनार्थं द्वार-ग्रहणम्) 'पुरस्तात् **पादस्य अग्रभागे** 'अभ्युन्नता' अगभीरा। 'जघनस्य" स्त्री-कट्याः पुरोभागस्य **नितम्बस्य** इत्यर्थः ('जघनं स्यात् स्त्रियाः श्रोणि-पुरोभागे कटावपि' इति मेदिनी) '**गौरवात्**' वैपुल्यात् 'पश्चात्' पादस्य पश्चिम-भागे अर्थात् गुल्फप्रदेशे 'अवगाढ़ा' किञ्चित् निम्ना [इति **स्वभावोक्तिः**] 'अभिनवा' सद्यःकृताः सुव्यक्ता वा 'पद-पङ्क्तिः' पाद-चिह्नावली ('पदं शब्दे च वाक्ये च पादतच्चिह्नयोरपि' इति विश्वः) 'दृश्यते' (इति **प्रत्यक्षालङ्कारः**। तथा चोक्तम् सरस्वतीकण्ठाभरणे "**प्रत्यक्षम्** अक्षजं ज्ञानम्"। उदाहृतम् च "वीक्ष्यते स्म शनकैर्नव-वध्वा" इति॥ अनेन यथा लता-मण्डपं प्रविष्टा इति कारणे **वक्तव्ये** यत् तत्कार्यरूप-पद-पङ्क्ति-वर्णनम् तत् **पर्यायोक्तम्**। **हेतुश्च**। 'लतामण्डपे शकुन्तला-सद्भावात् **अनुमानालङ्कारः**। **उप-मानालङ्कारश्च**। **श्रुत्यनुप्रासः**। 'न च [प्रियादर्शनात्' इत्यादिना एतदन्तेन **परिसर्पो** नामाङ्गमुपक्षिप्तम्। "इष्टनष्टानुसरणं **परिसर्पश्च**' कथ्यते" इति दर्पण-

लक्षणात्। **ज्ञप्तिर्नाम** नाटच-लक्षणञ्च—'ज्ञप्तिः केनचिदंशेन किञ्चित् यत्रानुमीयते' इति। **आर्याजातिः**] ॥६॥

86n.—1. प्रवात &c.—Cf. *Adrian*—"*The air breathes upon us here most sweetly*—"**Tempest**. *II. I.* **शक्यम्**—(also **योग्यम्, युक्तम्** &c. on the authority of the *MBh* (See Com.), **differ in gender, or number, or in both** from the nouns they qualify. *VM in KSV* (*V*. 2. 23) als(remarks "**शक्यम्** इति रूपम् वि (=**विरुद्ध**)—**लिङ्ग-वचनस्यापि** कर्माभिधायां सामान्योपक्रमात्' ॥ "न चैकान्तिक स्सामान्योपक्रमः। तेन 'शक्यः अस्य मन्यूर्भवता विनेतुम्,' '**शक्या** भङ्क्तु झटिति विसिनीकंद -वच्चन्द्र-पादाः" इत्यादयोपि भवति"। Cf. 'द्रष्टु **शक्य**मयोध्यायां नाविद्वान् न च नास्तिकः'—Rām. I. 6. 8. 'कथ मया विना सीता **शक्यम्**लक्ष्मण जीवितुम्'—III. 75, 28 ; 'त्वं कथं **शक्य** मुपेक्षितुम्'—III. 28 ; 'दिवाकरः अलं कर्तुम् **शक्यम्**'—Ibid ; '**युक्तं** नामात्रभवतः प्रियवयस्योऽशोकोऽयं वामपादेन ताड़यितुम्"—*Māla. III* ; *PP. I.* 37. 19 ; (94*n.* 4) ; *Rām. III.* 4. 7 ; 57. 19 ; *V.* 3. 24. 'न हि देहभृता **शक्यं** त्यक्तु कर्माण्यशषतः'—*Gītā. XVIII.*11 ; 'अस्य योजनां प्रेक्षमाणाभ्यां **शक्यम्** उत्कण्ठा विनोदयितुम्'—*Vik. III* ; '**शक्यम्** औषधिपतेर्नवोदयाः * * * छेतुम् अग्र-नख-सम्पुटैः कराः'—*Ku. III.* 62 ; *III.* 71 ; '**शक्यम्**' अञ्जलिभिः पातु वाताः केतकगन्धिनः'—*Rām. IV.* 28. 8 ; 'विभूतयः **शक्यम्** अवाप्तुम् उर्जिताः'—*Hito* ; 'एवं हि प्रणयवती सा **शक्यम्** उपेक्षितु कुपिता—*MM.* III. 3· 'नन् **युक्तम्** अस्या अभिलाषः अभिनन्दितुम्—(94n. 4) ; '**शक्यः**' —(B) **is equally correct**—Cf. '**शक्यः** वारयितुम्—जलेन हुतभुक्'—*VŚ. II.* '**शक्यः** अस्य मन्युः भवता विनेतुम्"—*Ra.* 2. 49. "**वनपरिमलगन्धः केन शक्यः** वरीतुम्"—*ŚPB. XI.* 34 ; *MK. III.* 3. "**दैवी च सिद्धिरपि** लंघयितु न **शक्या**'—*Ibid.* 'अशक्या (एकावली) मोचयितुम्'—*Vik. I* ; "जनो योजयितु न शक्यः"—BC. 1. 18. (46*n* 3) ; *Rām. III.* 31. 27 ; 49, 39 ; 57. 19. According to **माधव**, however, though 'शक्' is **intransitive**, it **is generally used transitively** in connection with a verb in the infinitive mood. So, according to him, it may be used both transitively or intransitively in connection with a verb in the **infinitive mood**.

The latent significance of this śloka has been fully expressed in "उन्मीलन् मुकुल * * मालिङ्गन् पवन मम स्पृशाङ्गमङ्गम्"—MM. I. 38. **2. वेतस-परिक्षिप्ते**—परि+क्षिप् means "to encircle" (*with ditches generally*), hence *AK* has 'परिक्षिप्त तु निवृतम्'। 'द्वे परिखादिना वेष्टितस्य'—BhD. Cf. 'गङ्गास्रोत: परिक्षिप्तम्' - *Ku VI*. 38 : 'महार्णवपरिक्षेपं'—Ra. XII. 66 ; 'शिप्रया **परिक्षिप्ता**' —*Kād* 3. **अभ्युन्नता** (raised) &c.—R notices 'वर्ण्य-क्रमभङ्ग' here, as the king will **first see the hind-part of the footprints** of Śak. who had entered the bower leaving the foot-prints outside. So 'जघन-गौरवात् पश्चात् अव-गाढ़ा'—(depressed owing to the weight of the hips) should have been mentioned **first**. Now read "अत्र राजा लता-मण्डप-द्वारि न गतोऽस्ति। **पृष्ठ-भागे एवास्ति।** ततएव पङ्क्तौ दृष्टि: पतिता। पदपङ्क्तिश्च **प्रवेश-सूचिका।** अतएव **पूर्वं पुरोभागस्य, पश्चात् पश्चाद्भागस्य** वर्णनम् इति **वर्ण्य-क्रम**-भङ्ग: नाशङ्कनीय:"—*R*. **4. अवगाढ़ा** (depressed) **जघन-गौरवात्**—Largeness of the hips is a good sign. Cf. 'मणिश्च शुभदो नितम्बश्च गुरु: शुभ.'—*GP* 'श्रोणि-भारात् अलसगमना' &c.—PA&*MD. II*.19 ; "गुरु-जघन-भरेण मन्दयाताया." —KM.580. 'पश्चान्नता **गुरु**-नितम्बतया ततोऽस्या: दृश्यते चारुपद-पङ्क्ति-रलक्तकाङ्का'- *Vik. IV*. 6 ; Ku. I. 35. Hence a lovely lady is called 'नितम्बिनी' (*Cf. Latin Callipyge—the famous statue of Venus*).—(57*n*. 2).

Text :—यावत् विटपान्तरेणावलोकयामि। (परिक्रम्य तथा कृत्वा सहर्षम्)। **अये! लब्धं नेत्र-निर्वाणम्[1]। एषा मे मनोरथ-प्रियतमा[2] सकुसुमाऽऽस्तरण-शिला-पट्ट मधिशयाना सखीभ्यामुपास्यते[3]। भवतु। श्रोष्यामि आसां विस्रम्भ-कथितानि[4]॥** (इति विलोकयन् स्थित:)।

I will just peep through the interstices of the boughs. (*Turning round and doing the same with transport*) Lo ! the bliss[1] of my eyes[1] is obtained. Here is the beloved[2] of my heart,[2] reclining on a flower-strewn slab of stone (*and*) attended[3] by two companions. Good, I will listen to their unreserved[4] talk.

(*This said, stands looking at her*).

(तत: प्रविशति यथोक्त-व्यापारा-सह सखीभ्यां शकुन्तला)॥

सख्यौ (उपवीज्य सस्नेहम्) **हला सउन्दले, अवि सुहाअदि दे णलिणी पत्त-वादो** [हला शकुन्तले, अपि **सुखायते** ते नलिनी-पत्र-वातः] ।

(*Enter with her two friends, Śakuntalā described as before*).

Friends (*Fanning her affectionately*)--Dear Śakuntalā ! is the wind of the lotus-leaf soothing[b] to you ?

शकुन्तला—(सखेदम्) । **किं वीअअन्ति मं सहीओ** [किं वीजयतो मां सख्यौ) (सख्यौ विषादं नाटयित्वा परस्परमवलोकयतः) ।

Śakuntalā (*Wearily*)—What ! do you fan me, my friends ?

(*The friends, gesticulating alarm, look at each other.*)

राजा—बलवदस्वस्थ-शरीरा शकुन्तला **दृश्यते** । (सवितर्कम्)। तत् **किमय-मातप-दोषः स्यात्, उत यथा मे मनसि वर्तते** ।

King—Seriously ill in body Śakuntalā appears to be. (*With a guess*). Is it then the fault of the sunshine, or (*is it*) as (*it*) occurs to my mind ?

V. L.—'उपास्यते'—B. P. Hs. 'अन्वास्यते'—R. V. M. S. 'सुखायते' —B. M. P. HS. 'सुखयति'—R. V. 'सुखाय ते'—S.

अये इति । 'अये इति हर्षे' । 'नेत्रयोः निर्वाणं' निर्वृतिः सुखम् इति यावत् ('**निर्वाणं निर्वृतौ** मोक्षे विनाशे गजमज्जने' इति मेदिनी) । 'एषा' शकुन्तला 'कुसुमानाम् आस्तरणेन' उत्तरच्छदेन सह वर्तमानं 'शिलापट्टं' (१।४।४६) प्रस्तर-पीठं ('**पट्टः पेषणपाषाणे** व्रणादीनाञ्च बन्धने । **चतुष्पथे च राजादि**-शासनान्तर-**पीठयोः**' इति मेदिनी) 'अधिशयाना' विश्रमाय शयिता 'सखीभ्याम् उपास्यते' परिचर्यते (**उपासनम्** आसने । **शुश्रूषायां** शराभ्यासेऽपि' इति हैमः) । 'आसां विस्रम्भ-कथितानि' विश्वास-पूर्णालापान् ('**विस्रम्भः** केलिकलहे **विश्वासे** प्रणये वधे' इति विश्वः) । **सख्याविति** । 'ते' तव **सम्बन्धे सुखमिव आचरति** इति '**सुखायते**' किम् ? ('कर्तुः क्यङ् सलोपश्च'–(३।१।११ ; २६६५) इति क्यङ्) ङित्त्वात् आत्मनेपदम्) । (तथा चोक्तं हलायुधेन—"शब्दादयोऽयं विषयाः **सुखयन्ति** नरापदम् । **सुखायते** श्रिया नित्यं विद्यया यश्च **सुख्यति**" इति।] 'अपि' इति प्रश्ने । **शकुन्तलेति** । हे 'सख्यौ' 'विजयतः' पद्मपत्र-वातेन माम् उपास्यते '**किम्**' इति प्रश्नः । (अनेन तापाऽऽधिक्यम् । तेन अन्य-विषयाऽसंवेद्यत्वम् ध्वनितम् । अनेन '**विधूतम्**' नामाङ्गम् उपक्षिप्तम् । तथाचोक्तम् धनञ्जयेन '**विधूतम् स्यादरतिः**' इति ।) 'सख्यौ विषादं' खेदं 'नाटयित्वा' अभिनीय (धूतेन शिरसा विषण्णया दृष्ट्या च इति ज्ञेयम्) । **राजेति** । किम् इति वितर्के ।

'आतपस्य दोषः' सूर्य-ताप-जनितः व्याधिः 'उत' अथवा 'यथा मे मनसि वर्तते' अर्थात् काम-जनितः व्याधिः यथाहं कामि-स्वभावानुरूपं सम्भावयामि।

87n.—1. **नेत्र-निर्वाणम्**—निर्वाति इति निर्+वा (गति-बन्धनयोः)+क्त कर्तरि (3. 4. 72.)=निर्वाणम्, ['निर्वाणोऽवाते—8. 2. 50], when the sense is that of **absence of air**, the form is '**निर्वात**' । Cf. '**निर्वातस्तु** गतानिले'—AK. '**निर्वाण**' generally means '**blown out**'. Cf. '**निर्वाण**-दीपे किमु तैल-दानम्' ॥ '**निर्वाण**-वैरदहनाः प्रशमादरीणाम्'—*VŚ.* 1. 7. 'शनैः **निर्वाण**माप्नोति निरिन्धन इवानलः'—*Mahā* ; *Ra. XII.* 1. Next '*absolute extinction*' or '*annihilation of individual* or *worldly existence*', which is deemed by the *Buddhist* to be the *Magnum Bonum* or the highest felicity. **Prof. Gloldstucker** (Germany) opines that as this meaning was not in vogue at the time of Pāṇini, he must be **anterior to Buddha.** However निर्वाण **almost in this very sense** occurs in the Gītā. Cf. 'स्थित्वास्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति'—*II.* 72. Of course it is controversial whether the Gītā was originally a portion of the *Mahā.* which is certainly anterior to Buddha. For the above sense in Classical Literature, Cf. 'प्रसक्ते निर्वाणे हृदयपरितापं वहसि किम् ?—*Māla. III.*1 ; *ŚPB. IV.*23 ; *VS. III.* 12 ; *Ki. XI.* 69. Cf. 'नेत्र-निर्वाणम्' with Bhavabhūti's 'लक्ष्मीः इयम् अमृतवर्तिनयनयोः' &c.–*UC. I.*39. 2. **सकुसुमास्तरणं**—It has the power of counteracting the effect of heat. 'कुसुमास्तरणादीनां दाह-शान्तिकरत्वम् आह सुश्रुतः—"दाह-शान्तिकरमृद्धिमतां नराणाम्"—N. **मनोरथ-प्रियतमा**—Darling of his imagination as she is not yet gained. **उपास्यते**—उप+आस् means 'to attend', 'serve'. Cf. '**उद्यान-पाल-सामान्यमृतव स्तमुपासते**'—*KU. II* 36 ; 38 ; 3. **ततः प्रविशति** &c.—'प्रविशति' अर्थात् दर्शकानाम् दृष्टिपथं प्रविशति'। **Śak. being indisposed** cannot enter the **stage walking. So the trio is disclosed by the raising of a curtain concealing them from the view of the** audience. **सुखायते—(Acts like something agreeable) here formed by (3.1.11),–(Com.)–and not** by "सुखादिभ्य· कर्तृवेदनायाम्" (3. 1. 18) **as has been wrongly stated in many editions, or say "सुखाय ते" (भवन्ति) ? 4. किं वीजयतः** &c.–Śak.'s

fever due to love-sickness is so very great that she does not even feel that she is being fanned. Cf. 'नायिका—सखि, मा वीजय । उष्णः खलु एष कदली-दल-मारुतः'—*NN. II.* 'सखि, अपनय इमानि नलिनी-पत्राणि मृणाल-वलयानि च, अलमेतेन, कस्मादकारणे आयासयसि'—*Rat.* **परस्परं**—(48n. 9). 5. **विषादं** &c.—'या दृष्टिः पतितापाङ्गा विस्तारित-पुट-द्वया । निमेषिण्य-स्त-तारा च विषण्णा सा **विषादिनी**'—Qtd. R. **बलवत्**—Vide (89n. 1). Don't **confuse** **अव्यय** (बलवत्) with **adjective** (बलवत्, बलवान्, बलवती) । (89n. 3)

Text :—(साभिलाषं निर्वर्ण्य) **अथवा कृतं सन्देहेन ।**

स्तन-न्यस्तोशीरं प्रशिथिल'-मृणालैक-वलयं
शिखरिणी **प्रियाया साबाधं' किमपि कमनीयं वपुरिदम् ।**
(यमनसभलग) **सम'स्तापः' कामं मनसिज-निदाघ-प्रसरयो'**
र्न तु ग्रीष्मस्यैवं सुभगमपराद्धं' युवतिषु ॥७॥

(*Surveying passionately*) Or, away with misgiving—

Ineffably fascinating is the indisposed[2] frame of (*my*) beloved, with (*the unguent of*) Vetiver applied to the bosom, and with the single lotus-stalk-bracelet quite loosened.[1] Granted that the suffering[1] (*caused*[5] *by*) the (*excess*) of love and the advance of summer-tide[5] is alike[3] with young maidens, nevertheless the injury[6] (*caused by*) the sultry weather is not so fascinating. (7)

V. L.—"साभिलाष निर्वर्ण्य'—B. R. M. S. 'विचिन्त्य'—V. 'प्रशिथिल' —M. B. S. 'शिथिलित'—R. V. 'किमपि कमनीय'—V. R.—'तदपि कमनीयं'—M.B S.

साभिलाषमिति । 'निर्वर्ण्य' दृष्ट्वा ('**निर्वर्णनं** तु निध्यानं **दर्शनालोके**-क्षणम्' इत्यमरः) । 'अथवा' इति पक्षान्तरे । 'सन्देहेन' अयमातपदोषः काम-सन्तापो वा इति संशयेन 'कृतम्' अलम् । ('कृतम् इति निषेध-निवारणयो.' इति वर्धमानः) वक्ष्यमाण-श्लोके तदेव विशदयति । **स्तनेति ।** 'प्रियायाः' शकुन्तलायाः 'आ' समन्तात् 'बाधया' पीड़या 'सह' वर्तमानं, कातरम् इत्यर्थः (**'पीड़ा बाधा** व्यथा' इत्यमरः । आङा पीड़ायाः सर्वाङ्ग-गतत्वं व्यज्यते) । अस्मादेव हेतोः 'स्तनयोः' 'न्यस्तम्' आरोपितम्' तापोपशमार्थं दत्तम् ('आहितं निहितं न्यस्तम् आरोपितमिति स्मृतम्' इति हलायुधः) 'उशीरं' वीरण-मूलाऽनुलेपनं यस्मिन्

तादृशम्। 'प्रशिथिलं' तापाधिक्यात् विशोषणेन अतीव श्लथं 'मृणालस्य एकं' केवलं 'वलयं' यस्मिन् तथोक्तम् (एकमित्यनेन वलयान्तराऽसद्भाव ध्वन्यते) 'इद' पुरतः परिदृश्यमानं 'वपुः' देहः 'किमपि' लोकोत्तर-चमत्कारि 'कमनीयं' कान्ति-मयम्। 'युवतिषु' तरुणीषु विषये 'मनसिजः' कामः 'निदाघः' ग्रीष्मः (**'निदाघः ग्रीष्मकाले** स्यात् **उष्ण**-स्वेदाऽम्बुनोरपि' इति मेदिनी) तयोः 'प्रसरौ' आधिक्ये तयोः ('द्वन्द्वान्ते श्रूयमाण-शब्दः प्रत्येकमभिसम्बध्यते' इति न्यायात् प्रसरस्य उभयेन सह अन्वयः' इति विद्याम्बुधिपादाः) 'तापः' सन्तापः 'समः' तुल्यः कामम्' इति स्वीकर्तव्यम् ('अकामानुमतौ कामम् असूयोपगमेपि च' इति रुद्रः)। 'ग्रीष्मस्य अपराद्धम्' सन्ताप-जनना-पराधः ('कृदभिहितो भावो द्रव्यवत् प्रकाशते' इति न्यायात्) 'तु' इति भेदे। 'एव सुभगं' सुन्दरम्। 'न तु' न एव; 'तु' इति अवधारणे। ("**तु** पादपूरणे भेदे समुच्चयेऽ**वधारणे**। पक्षान्तरे वियोगे च प्रशंसायां विनिग्रहे" इति मेदिनी)। (**व्यतिरेकालङ्कारः**। **समुच्चयालङ्कारश्च** बहुतर-कारणो-पन्यासात्। स्तस्तो इति किम कर्मेति **छेक-वृत्ति-श्रुत्यनुप्रासाः**। 'युवतिषु' इति सामान्यनिर्देशात् **अप्रस्तुतप्रशंसा**। सुस्थतादि-रूप-कारणाऽभावेऽपि रमणीयता-रूप-कार्योत्पत्तेः **विभावना**-लङ्कारः। अथच साबाधत्व-रूप-कारणे सत्यपि कु-रूपत्व-रूप-कार्यानुत्पत्तेः **विशेषोक्तिः**। अनयोः **सन्देह-संकरः**। **अनुमानं** नाम सन्ध्यङ्गमिदम्--"अङ्गैरूहोनुमानम्" इति तल्लक्षणात्। **शिखरिणी** वृत्तम्) ॥७॥

88n.—1. कृतम्=अलम्–(No need of). Cf. '**कृतमाविष्कृत-पौरुषैर्भुजैः**—*ŚPB. II.* 17. **प्र-शिथिल—'प्र'** is **intensive.** Bracelets are generally slack and owing to excessive emaciation and langour of her person, Śak.'s lotus-stalk-bracelet has become **extremely lax.** **2. साबाधं—'बाध्'** is Atmp. Cf.'**क्षणं विश्राम्यताम् जाल्म ! स्कन्धे यदि ते' बाधति। न बाधतेतथा स्कन्धः यथा "बाधतिः" बाधते'**—(*attributed to Kāli.*) **3. किमपि**—These two अव्ययs together mean **indescribable**—*AD* ; "कोप्येष"—*UC. V.* 39 ; "कोऽपि हेतुः"—*MM. I.* 27. The reading 'तदपि' (*despite her distress*) is not **in consonance with** the last line, which states that loveliness is aggravated by amatory throe. **4. मनसिज** &c.—**प्रसर** (Action, excess) is to be construed both with 'मनसिज' and 'निदाघ' (*Com.*) **5. समस्तापः**—Like heat, 'काम' also is the case of giddiness, loss of appetite, &c. "**तथाच**

गरुड़-पुराणम्। "कामाद् भ्रमोऽरुचि र्दाहो ह्री-निद्रा-धी-धृति-क्षय:"—*N.* 6. **अपराद्धं**—भावे क्तः। It has been *cleverly* used in lieu of ताप. as the girl is quite innocent—(257n. 5). 7. **According to R** the last line is **faulty**, as the word **'ग्रीष्म'** has been substituted for 'निदाघ' of the third line, the presence of which word would not have constituted **'कथितपदतादोष'**, [as for example **'उदेति सविता** ताम्रः, ताम्रः एव अस्तमेति च'—*SD.*] "तेन निदाघस्यैतादृग् युवतिषु न तापस्तु सुभगः" इति पठनीयम्। अस्मिन् पाठ षष्ठी-दोषोऽपि परिहृतः"—*R.* **युवतिषु** —(Vide 67n. 2).

Text :—प्रियंवदा (जनान्तिकम्)**—अणसूये ! तस्स राएसिणो पढम-दंसणादो आरहिअ पज्जुस्सुआ विअ सउन्दला। किं णु क्खु से तण्णिमित्तो अअं आतङ्को भवे** (अनसूये ! तस्य राजर्षेः प्रथम-दर्शनात् आरभ्य पर्युत्सुका इव शकुन्तला। किं नु खलु अस्या स्तन्निमित्तः अयमातङ्को'भवेत्)।

Priyaṃvadā—(*Aside*) Anasūyā, Śakuntalā appears to have been (*somewhat*) troubled since her first interview with the king. May it be that this affliction[1] of hers is on his account ?

अनसूया—सहि, मम वि एरिसी आसङ्का हिअअस्स। होदु। पुच्छिस्सं दाव णं (सखि, ममापि ईदृशी आशङ्का[1] हृदयस्य। भवतु। प्रक्ष्यामि तावदेनाम्)। (प्रकाशम्) **सहि, पुच्छिदव्वासि किम्पि। बलवं क्खु दे सन्दावो** (सखि, प्रष्टव्यासि किमपि। बलवान् खलु ते सन्तापः)।

Anasūyā—Friend, my mind, too, (*has*) a similar suspicion.[1] Very well, I will ask her (*at once*). (*Aloud*) Friend, you are to be asked something. Your indisposition (*is*) really (*very*) serious.

शकुन्तला—(पूर्वार्धेन शयनादुत्थाय)**—हला, किं वत्तुकामासि** (हला, किं वक्तुकामाऽसि)।

Śakuntalā (*With the fore-part of her body, rising from the couch*)—Dear, what d'you wish to speak ?

अनसूया—हला सउन्दले, अणब्भन्तरा क्खु अम्हे मदण-गदस्स वुत्तन्तस्स। किन्तु जादिसी इतिहास-णिबन्धेसु कामअमाणाणं समवत्था सुणीअदि तादिसीं दे पेक्खामि। कहेहि किण्णिमित्तं दे सन्दावो (हला शकुन्तले, अनभ्यन्तराः[2] खलु वयं मदन-गतस्य वृत्तान्तस्य। किन्तु यादृशी इतिहास-निबन्धेषु कामयमानाना[3] समवस्था श्रूयते तादृशीं ते प्रेक्षे। कथय किं निमित्त ते सन्तापः)। **विआरं**

क्खु परमत्थदो अजाणिअ अणारम्भो पड़िआरस्स (विकारं क्खु परमार्थत:अज्ञात्वा अनारम्भ: प्रतिकारस्य) ।

Anasūyā—Dear Śakuntalā, we are indeed strangers[2] to the affairs of love. But yours, I suspect is the same (*pitiable*) condition, as is heard of love-sick[3] (*persons*) in historical stories. Tell us from what proceeds your fever ? Without tracing the disease[4] to its real nature, there is surely no applying a remedy.

V. L.—'पर्युत्सुका'—B. R. M V. 'पर्युत्सुकमना आपन्ना'—S. 'शयनादुत्थाय'—B. R. M. "पुष्प-शय्यामुदस्य"—V· 'अनभ्यन्तरा: खलु * मदनगतस्य'—R. V. M. S. 'अलब्धन्तरा: * ते मनोगतस्य'—B. 'समवस्था'—S. 'अवस्था'—B. R. V. M.

प्रियंवदेति । 'पर्युत्सुका' उत्कण्ठित-हृदया । 'किनु खलु' इति समस्तपदेन वितर्क-गर्भ-प्रश्न: आक्षिप्यते । प्राक् व्याख्यातम् । अस्या: शकुन्तलाया: 'अयम् आतङ्क.' रोग: ("आतङ्क. रोग-सन्ताप-शङ्कासु मुरज-ध्वनौ" इति मेदिनी) 'स:' दुष्यन्त एव 'निमित्त' कारणं यस्य यस्मिन् वा' तादृश । **अनसूयेति** । "प्रष्टव्यासि" (दुहादित्वात् अप्रधान कर्मणि तव्य-प्रत्यय:) । 'बलवान्' प्रबल: । महती ते शरीरवाधा । अस्मादेव मत्प्रश्नाऽवश्यकत्वमित्याशय: । **शकुन्तलेति** । 'पूर्वार्धेन' शरीरस्य इति शेष: । शयनाद् उत्थान तु पीड़ा-गोपनार्थम् देह-लावण्यप्रकाशनार्थञ्चापि । 'वक्तुम् काम:' इच्छा यस्या: तादृशी ("लुम्पेदवश्यम: कृत्ये तुकाम-मनसोरपि" इति **तुम: मकारलोप:**) । **अनसूयेति** । 'मदन-गतस्य' कामविषयकस्य 'वृत्तान्तस्य' वार्ताया: 'न अभ्यन्तरा' अविषयीभूता अनभिज्ञा: 'खलु' इति निश्चये । 'इतिहासे ये 'निबन्धा:' आख्यानादय: तेषु, 'कामयमानानां' जात-मदनानाम् । 'समवस्था' स्थिति: 'ते' तवावस्थाम् इत्यर्थ: 'तादृशी' तथाभूतां 'प्रेक्षे' । सर्वथा मदनादेव ते ईदृशी समवस्था जाता इति नो धारणा । 'विकारं' रोगं ("विकारो विकृतौ रोगेऽपि" इति विश्व:) 'परमार्थत:' स्वरूपत: 'अज्ञात्वा प्रतिकारस्य' प्रतिविधानम्य अर्थात् चिकित्साया: 'खलु' निश्चितम् 'अनारम्भ:' आरम्भ: न सम्भवति । रोग तत्त्वत: ज्ञात्वा एव औषधं व्यवह्रियते, उक्तञ्च, 'व्याधेस्तत्त्वपरिज्ञानम्' इति ;

89n.—1. पर्युत्सुका—Intensely agitated by love. Cf. "पर्युत्सुकां कथयति प्रियदर्शनां नामाति न पश्यसि" &c.—Vik. II. 16 ; "कालाऽक्षमत्वम् औत्सुक्यम् मनस्ताप-ज्वरादिकृत्"—*MN. on Ra. V.* 67 ; (154n. 3).

2. **आतङ्कः**—आतङ्को बाधा। "यक्ष्माऽऽतङ्क-गदा-बाधा-शब्दाः पर्याय-वाचिनः"। आ + तकि (कृच्छ्रजीवने—to live in distress) + घञ् भावे or करणे (3. 3. 18 ; 121). The affix expected was 'अ' by ('गुरोश्च हलः' 3.3.100), hence घञ् **is irregular** (बाहुलकात्)। 'आतङ्कस्फुरित-कठोर-गर्भ-गुर्वी'—*UC*. 3. **बलवान् खलु** &c.—**This totally refutes** the **silly theory that the use of 'बलवत्'** (n) as an *adjective* (बलवान्-m, बलवती-f) is *un-Kālidāsian*. Cf. "भवितव्यताऽत्र **बलवती**"—*Vik. IX* ; '**बलवत्तरं** अपवादैः -*Ku. II.* 27. '**बलवान् पुनर्मम** मनसोऽभितापः'—Vik. III. '**बलवान्** खलु मे अभिनिवेशः'—*Infra*. 'सम्मोहः मे तदा **बलवान्**'—Śak VII. 24 Also Ram. II. 93. 5 ; '**बलवन्ति** रक्षांसि—V. 38. 53 ; '**बलवत्**' अन्धकारः'—MK. I : "मनः * * **बलवत्**"—Gītā. VI. 34; 'बलवत्' मन –BC. IV. 97. "मानसं **बलवत्** दुःखम्"–SN. XI. 36. 'बलवान्' 'इन्द्रियग्रामः'—MS II. 125 ; 'गम्यो नृपो बलवता सह को विरोधः" MK.VI 2 'बलवद्-गि-निवह-दक्षम्तः'–PC (प्रस्तावना)। "पूर्वापेक्षया उत्तर-मुत्तरं शास्त्रं **बलवत्त**रमित्यर्थं। **बलवच्छब्दात्**" "द्विवचन—" इति ईयसुन्। "**विन्मतोर्लुक्** इति मतुपो लुक्। **बलवत्त्वमिति** फलितम्—BM ; Gītā. VII. 11. ; Read [4*n*. 6 ; **बलवती**—201*n*. 8]. 4. **पूर्वार्धेन** &c.—Cf. '**शयनतलात्** ईषदुच्छ्वसित-मूर्तिः'—*Kād. P.* 363. **वक्तुकामा**—(43n. 2). **अनभ्यन्तरा** &c.—अभिगता अन्तरम्=अभ्यन्तराः—Within the **pale** of ; 'न **अभ्यन्तराः**'—Not familiar with, ignorant, '**अहो प्रयोगाभ्यन्तरः प्राश्निकः**'—Māla **II.** '**वयम्**' refers to the hermit-girls in general. **5. इतिहास-निबन्धेषु**—इत्येवं 'ह' किल (***Thus it was in past times***)= **इतिह**—Narration of past events (*i.e.*, Stories and traditions). Cf. 'पारम्पर्योपदेशे स्यादैतिह्यम् इतिहाऽव्ययम्"–*AK*. 'इतिह' आस्ते अस्मिन् इति इतिह+ आस्+ घञ् ('हलश्च' 3. 3. 121]= इतिहासः—A book having the narration of past events. Don't say इतिह+**अस्** (अस्ति) +घञ् for '**अस्**' with घञ् wil **be changed into** 'भू' (2. 4. 52). Now Cf. '**धर्मार्थ-काम-मोक्षाणाम् उपदेश-समन्वितम्। पूर्ववृत्तम् कथा-युक्तम् इतिहासं प्रचक्षते**"–*qtd. Nīlakaṇṭha.* **6. समवस्था**—(S) is the **best** reading. For this word is a **Kālidā-sian peculiarity,** and generally used by Kāli. in the sense of '**अवस्था**' (*a pitiable*) condition. Cf. '**वल्लकी समवस्थाम्**'.–*Ra. VIII.*

41. 'कामयान-समवस्थया'—*XIX*. 50. 'द्वे समवस्थे क्षणादूढे'—*Māla. IV*. 7 ; 'राजा—निराकरण-विक्लवाया. * समवस्थाम्'—*Śak. VI* ; (137n. 3). **7. परमार्थतः**=परमार्थेन, 'तसि' has the sense of 'करण'। Cf. "प्रयोगानुसारेण **सर्वाभ्यः** प्रकृतिभ्यः परः सर्वासां विभक्तीना स्थाने तसिल् प्रत्ययोभवति वा"——**Prabhā**. Cf. "मन्त्रोहीनः **स्वरतो वर्णतो** वा मिथ्याप्रयुक्तः न तमर्थमाह" &c.—**शिक्षा** of Pāṇini. **अनारम्भः**——Ra. I. 15 ; VIII. 20 "व्याधिमिच्छामि ते ज्ञातुम् प्रतिकुर्या हि तत्र वै"—*Māhā*.

Text :—राजा—अनसूयामपि अनुगतो मदीयस्तर्कः। न हि स्वाभिप्रायेण' मे दर्शनम्।

King—Even Anasūyā bears me out in my suspicion. My view was not then (*guided*)[1] by my own intention.[1]

शकुन्तला (आत्मगतम्)—**बलवं क्खु मे अहिणिवेसो। दाणिं वि सहसा एदाणं ण सक्कणोमि णिवेदिदुं** [बलवान् क्खु मे अभिनिवेश.। इदानीमपि सहसा एतयोर्न शक्नोमि निवेदयितुम्)।

Śakuntalā (*Aside*)—Mighty, indeed, is my anxiety (*to conceal ; or to reveal*). Even (*asked by them*). I cannot all of a sudden disclose (*it*) to them now.

प्रियंवदा—सहि, सुट्ठु एसा भणादि। किं अत्तणो आतङ्कं उवेक्खसि। अणुदिअहं क्खु परिहीअसि अङ्गेहिं। केवलं लावण्णमई छाया तुमं ण मुञ्चदि (सखि, सुष्ठु एषा भणति। किमात्मन आतङ्कमुपेक्षसे। अनुदिवसं खलु परिहीयसे अङ्गैः। केवलं लावण्यमयी छाया त्वा न मुञ्चति)।

Priyaṁvadā—Friend, right well does she say. Why d'you neglect your affliction ? Day by day, indeed, you are getting thinner in limbs, only the glimmering of loveliness leaves you not.

V. L.—"अनसूयामपि अनुगतो'—B R. V. S. 'अनसूययापि अवगतो'—M. 'न हि स्वाभिप्रायेण' &c.—Omitted by M & S. 'सखि सुष्ठु'—V. 'सखि शकुन्तले, सुष्ठु'—R. M. S. 'सुष्ठ'—B. P. HS.

राजेति। 'मदीयः तर्कः' अस्याः विकारः कामज एव इति संशयः 'अनसूयाम् अपि अनुगतः' अनसूया-हृदये समुपस्थित इति भावः। अस्मादेव हेतोः 'मे दर्शनम्' अनुमानं 'स्वस्यं' निजस्य 'अभिप्रायेण' अर्थात् 'कामी स्वतां पश्यति' इति न्यायेन 'न हि' इत्यवधारणे। **शकुन्तलेति।** 'बलवान् अतिप्रबलः 'मे अभिनिवेशः 'अकथने आग्रहातिशयः। लज्जया व्याधि-कारणं गोपयितुमिच्छामि। 'इदानीमपि' सखीभ्यां

पृष्टा पीड़ाहेतुः अवश्यवक्तव्यः, तथापि इति अपेरर्थः। यद्वा 'बलवान्' सखीभ्यां कथने 'मे अभिनिवेशः' 'इदानीमपि' अधुना सखीभ्यां पृष्टाहम् अतः अयमेव समुचितावसरः प्रकाशयितुं, तथापि लज्जया वक्तुमसमर्थास्मि इति भावः। प्रियंवदेति। 'आतङ्कं' रोगं ("आतङ्को रोग-संताप-शङ्कासु मुरज-ध्वनौ" इति मेदिनी) 'किम् उपेक्षसे' प्रतिविधातुम् न यतसे। 'अनुदिवसं खलु' प्रतिदिनमेव (वीप्सार्थेऽव्ययीभावः) 'अङ्गैः परि-हीयसे' क्रमशः क्षीयमाणाङ्गी भवसि। पूर्वं स्वभावतः एव कृशा, अधुना ततोऽपीति भावः (जहातेः कर्मणि प्रयोगः, कर्म-कर्तरि वा) 'केवलं लावण्यमयी' लावण्यपूर्णा ('तत् प्रकृत-वचने मयट्'—(५।४।२१) इति प्राचुर्यार्थे मयट्) 'छाया' कान्तिः ('छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमनातपः' इत्यमरः) 'त्वां न मुञ्चति' स्वभाव-सुन्दरत्वात् इति भावः।

90n.—1. बलवान्—(89n. 3). **मे अभिनिवेशः**—Either to conceal or to reveal. (Com.),—'शंसितुं तु हृदयेन तत्वरे'—*Ku. VIII.* 10.—**एतयोः**—(4n. 3). **2. लावण्यमयी**—मयट् implies 'abundance'.—(112*n.* 7). 'मुक्ताफलेषु छायायास्तरलत्वमिवान्तरा। प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते'॥—'उज्ज्वलनीलमणि',—also MN on Ku. I. 25. **3. छाया**—छो+कर्तरि ण ['श्याऽऽद्-बाधाऽऽस्रु-संस्रु-अतीण्-अव-सा-ऽवहृ-लिह्-श्लिष-श्वसश्च'—3. 1. 141]. 'छो' is considered आकारान्त ('आद् एच् उपदेशेऽशिति'—6. 1. 45). Next there is the augment 'य'-(आतो युक् चिण्कृतोः'—7. 3. 33). or say. 'मा-च्छा-शसिभ्यो यः' (उ—559). Cf. "तत्स्मृति-मात्रमेव हृदयं लावण्य-शेषं वपुः"—Mahā-Nātakam. VI. 15. **न मुञ्चति**—Cf. * 'महामणिरिव क्षीणोऽपि नालक्ष्यते'—Act. VI. 6. infra.

Text :—राजा—अवितथ[1]**माह प्रियंवदा। तथाहि—**

क्षाम-क्षाम[2]**-कपोलमाननमुरः काठिन्य-मुक्त-स्तनं**
शार्दूलविक्रीडित **मध्यः क्लान्ततरः**[3]**, प्रकाम-विनतावंसौ, छविः**[4] **पाण्डुरा**[5]**।**
(मसजसततग) **शोच्या च प्रियदर्शना च मदन-क्लिष्टेयमालक्ष्यते**
पत्राणामिव शोषणेन[6] **मरुता**[7] **स्पृष्टा लता माधवी ॥८॥**

King—Not[1] untruly[1] spoke Priyamvadā. For—Indeed, her face has its cheeks excessively[2] (R) emaciated[2] ; her bosom has its breasts relieved of hardness ; her waist (*has become*) thinner[3], the shoulders drooping, (*and*) pallid[5] (*is her*) complexion.[4] Tortured

by love, she appears regrettable, yet sweet to view, like the creeper Mādhavī struck by the leafage-drying[6] wind[7]. (8)

V. L.—'क्लिष्टा'—R. V. S. M. 'ग्लाना'—B.

राजेति। 'अवितथम्' सत्यम्। यस्तु 'प्रियं' वदति, प्रायेण स न सत्यं वदति। इयं प्रियवदापि सत्यवचना इति विरोधः। (नाम्ना **विरोधाभासः**)। प्रियवदोक्तेः सत्यत्वं प्रतिपादयितुम् आह "**तथाहीति**"। तमेवार्थं जानीहि। ("**तथेत्यगण**-परिपठितो धातु र्गतौ" इति कातन्त्र-परिशिष्ट-टीकायां गोपीनाथ-पादाः)। **क्षामेति।** अस्याः 'आननं' वदनं 'क्षामक्षामौ' कृशतरौ 'कपोलौ' गण्डौ यस्मिन् तथाविधं जातम्। 'उरः' वक्षःस्थलं 'काठिन्येन' दाढ्र्येन 'मुक्तौ स्तनौ' यत्र तथाविधं जातम्। तापाऽऽधिक्येन स्तन-युगलं श्लथीभूतम् इत्यर्थः। 'मध्यः' कटिदेशः स्वभावादेव क्लान्तः अधूना 'क्लान्ततरः' सातिशयं क्षीणः संवृत्तः। 'अंसौ' स्कन्धौ 'प्रकामम्' अत्यर्थ 'विनतौ' प्रणतौ विश्लथौ इति यावत् ("विनतः प्रणते भुग्ने शिक्षिते चाभिधेयवत्" इति मेदिनी)। 'छविः' देह-कान्तिः ("शोभा कान्तिः द्युतिश्छविः" इत्यमरः) 'पाण्डुरा' विरह-कार्श्यात् पाण्डुवर्णा जाता। ("पाण्डर. रक्त-पीतस्तु, पाण्डुरः शुक्ल-पीतकः" इति **शाब्दिक-नरसिंहः**)। अतः 'मदनेन क्लिष्टा' पीड़िता 'इयं' शकुन्तला 'पत्राणां' शोष्यते अनेन इति 'शोषणः' तेन शोषकेण ('करणाऽधिकरणयोश्च'—(३।३।११७)—इति करणे ल्युट्) 'मरुता' पश्चिमवायुना 'स्पृष्टा' अभिभूता 'माधवी' अतिमुक्तकः ("वैशाखे माधवः कृष्णे **माधवी चातिमुक्तके**" इति रन्तिदेवः) 'लता इव शोच्या' शोचनीया 'प्रियदर्शना च' मनोरमा च (इति **विरोधालङ्कारः**। 'शोच्या अनुकम्पार्हा इति **विरोधाभासः**)। 'आलक्ष्यते' दृश्यते। पुराण-पत्राणां शोषणेन शोच्या माधवीलता यथा वासन्तिकाऽनिलेन स्पृष्टा सती नव-किसलयोद्गम-हेतुना प्रियदर्शना भवति, तद्वत् अस्वस्थतया शोचनीयापि शकुन्तला मदन-क्लिष्टत्वात् शोभा-विशेषं धारयति इति भावः। (प्रियंवदा-वचन-समर्थन-कार्यं प्रति बहु-कारणो-पन्यासात् **समुच्चयोऽलङ्कारः**। 'मदनेन क्लिष्टा' इति शोच्यत्वे हेतुत्वेनो-पादानात् **काव्यलिङ्गम्**। **उपमानुप्रासौ**। वृत्तम् तु **शार्दूलविक्रीड़ितम्**। "वक्त्रं क्षामकपोलयुग्भृशमुरः" इति, 'क्लान्ततरोंऽस-युग्ममधिकं नभ्रं छविः' इति पठित्वा उद्देश्य-प्रतिनिर्देश-**प्रक्रमभङ्गः** समाधेयः। तेन प्रकाम-वि-शब्दयोः अर्थ-पौनरुक्त्यं, अथच एक-वचनान्त-प्रयोगमध्ये "अंसौ" इति द्विवचन-प्रयोगरूप-**भग्नप्रक्रमता** दोषश्च परिहृतम्। "संस्पृष्टा दल-शोषणेन मरुता सा माधवीव प्रिया" इति पाठे **इव-प्रयोग-प्रक्रमभङ्गः** लताशब्दस्याऽवकरत्वं च परिहृतं भवति ॥८॥

91n.—1. तथाहि—(12n. 3.). **क्षाम-क्षाम** &c.—क्षै (भ्वादि)+क्तः कर्तरि=क्षाम—('क्षायो मः"—8. 2. 53). Next duplication by 'प्रकारे गुणवचनस्य'—(8. 1. 12) ; 'सादृश्ये द्योत्ये गुणवचनस्य द्वे स्त स्तच्च कर्मधारयवत् *** पटुपटुः। पटु-सदृशः। ईषत्पटुरिति यावत्"—*SK.* 2147. "शुक्ल-शुक्लं रूपमिति। शुक्ल-सदृशमित्यर्थः। ईषच्छुक्लमिति यावत्"—*BM.* According to *R*, the duplication is meant to **intensify** the sense. By "कर्मधारय-वत् उत्तरेषु"—(8. 1. 11.) it is treated as a कर्मधारय। Cf. "निकामं क्षामाङ्गी सरस-कदली-गर्भ-सुभगा"—*MM. II.* 2. "वपुः-क्षाम-क्षामं वहति रमणीयञ्च भवति"—*Ibid. III.* 9 ; *Śak. VII.* 12. **2. प्रकाम-विनतौ**—'प्रकाम'&'वि' of वि-नत have the *same* meaning, to avoid **tautology** vide (Com.). **पाण्डुरा**—पाण्डुत्वम् अस्ति अस्य इति पाण्डु+मत्वर्थे रः ("नग-पांशु-पाण्डुभ्यः रः"—*Vārt.* 5. 2. 107)=whitish-yellow, pallid-complexion. "सित-पीत-समायुक्तः पाण्डुवर्णः प्रकीर्तितः" इति सुभूतिः। **शोच्या**—(fit object for sympathy, lamentable)—'**च**' should have been changed into'**क**' by ('च-जोःकु, घिण्-ण्यतोः 7.3.52). 'अजि-व्रज्योश्च'—(7.3.60). इति च-कारस्यानुक्त-समुच्चयार्थत्वात् नात्र कुत्वम्॥ Or, 'न क्वादे—(7. 3. 59). इत्यस्य 'नेति योगविभागात् पृथक् सूत्रं कृत्वा रोमाञ्चः, शोच्यः'—**Prabhā**. **प्रियदर्शना**—Cf. the idea with "नव-किशलय-तल्पे वक्रिताङ्गं शयाना निभृत-कृश-शरीरा दुर्निरीक्ष्याऽतिपाण्डुः। नव-विकसित-सन्ध्या-रञ्जिताङ्गी द्वितीया-शिशिर-कर-कलेव **प्रेक्षणीया** बभूव"—**ताराशशाङ्कम्**, १२२॥ KM. 1025. **3. शोषणेन**—(Scorching). **मरुता**—मृयन्ते अनेन विना इति मृ+उति ('मृगोरुति', उ—94)=मरुत्, also **मरुतः** (अकारान्त)। Cf. "**मरुतः** स्पर्शनः प्राणः समीरो मारुतो **मरुत्**" इति **विश्वप्रकाशकोषः**, व्याडिश्च। Mark the *propriety* of the word here. **4. लता माधवी**—A large and beautiful creeper (**Goertnera racemosa**) bearing white fragrant flowers Cf. "मालाविकाप्येषु अनुभूत-मुक्तेव मालती-माला म्लायमाना लक्ष्यते"—*Māla. III.*

Text :—शकुन्तला (निःश्वस्य)—**सहि ! कस्स वा अण्णस्स कहइस्सं। किन्तु आआसइत्तिआ दाणिं वो भविस्सं** (सखि, कस्य वा अन्यस्य कथयिष्यामि। किन्तु आयासयित्री[1] इदानीं युवयोः भविष्यामि।)।

Śakuntalā (*Sighing*)—Friend, to whom else shall I speak it out ? But then I shall be the cause[1] of trouble[1] to you.

उभे—अदो एव्व क्खु णिब्बन्धो। सिणिद्ध-जण-संविभत्तं हि दुक्खं सज्झ-वेदणं होदि (अतएव खलु निर्बन्धः[२]। स्निग्ध-जन-संविभक्तं[३] हि दुःखं सह्यवेदनं[४] भवति)।

Both—And for this reason, indeed, is our importunity[2]. The pangs of sorrow become endurable[4] when[3] shared with loving friends[3].

राजा—पृष्टा जनेन सम-दुःख-सुखेन[१] बाला
वसन्ततिलका नेयं न वक्ष्यति मनोगतमाधि-हेतुम्।
(तभजजगग) दृष्टो विवृत्य बहुशोऽप्यनया सतृष्णम्
अत्रान्तरे श्रवण-कातरतां[२] गतोऽस्मि ॥९॥

King—Questioned by persons, who[1] equally share her pain and pleasure[1], it cannot be that the girl will not speak out the cause of (*her*) mental throe. Though (*full*) many a time, gazed at (*me*) athrist, by her by turning back, I have, at this moment, become nervous[2] of hearing[2] (*her* reply). (9)

V. L--'किन्तु आयासयित्री'—B. M. 'आयासयित्री'—R. V. S. 'अतएव'—B. 'अतएव खलु'—R. V. M ; S omits 'स्निग्धजन' from 'स्निग्ध-जन-संविभक्तम्'। 'अत्रान्तरे'—R. V. M. S. 'अत्रोत्तरे'—B. HS.

शकुन्तलेति। 'किन्तु इदानीं पीड़ा-कारणम् उक्त्वा इत्यर्थः। 'युवयोः' ['कर्तृ-कर्मणोः कृति' (२-३-६५) इति कर्मणि ६ष्ठी] 'आयासयित्री' क्लेश-जनयित्री। मनोरथस्य दुर्लभत्वात् इति भावः। उभे इति। 'निर्बन्धः' परिज्ञाने आग्रहातिशयः आवयोरिति। (यदेवाऽकथने कारणत्वेन निबद्धं तदेव कथने हेतुत्वेनोपात्तम् इति व्याघातालङ्कारः। "सौकर्येण कार्य विरुद्धा क्रिया च" इति तल्लक्षणात्)। "न दुःखं पञ्चभिस्सह" इति न्यायात्, 'दुःखं स्निग्धजने प्रेमास्पदे जने 'संविभक्तं' सम्यक् विभज्य अर्पितं सत् 'सह्या' भार-लाघवात् सोढु शक्या 'वेदना' यातना यस्य तादृश भवति बहुभिरुह्यमानः भार इव इत्याशयः (अर्थान्तरन्यासः)। इत्यन्तः प्रतिमुखसन्धिरिति केचित्॥ पृष्टेति। 'इयं बाला' अल्पवयाः शकुन्तला '(अनेन कैतवाऽनभिज्ञत्वं ध्वन्यते) 'दुःखं च सुखञ्च' दुःखसुख (पक्षे दुःखसुखे। 'विप्रतिषिद्धञ्चानऽधिकरणवाचि' (२।४।१३) इति वार्त्तिकः समाहारः) 'समं' तुल्य 'दुख-सुखं' यस्य तेन। शकुन्तलायां सुखितायां यः सुखी भवति, दुःखितायां यो दुःखितो भवति इत्यर्थः। तेन 'जनेन' प्रिय-सखि-जनन 'पृष्टा' जिज्ञासिता सती 'मनोगतं'

हृदय-स्थितम् 'आधे:' मानस-व्यथायाः (इति पौनरुक्त्यम्। तथाचोक्तममरेण 'पुंस्याधिः मानसी व्यथा' इति)। 'हेतुं न वक्ष्यति' इति 'न' अपितु प्रकाशयिष्यति एव। 'अनया' शकुन्तलया 'बहुशः' बहुवारान् ["बह्वल्पार्थात् शस् कारका दन्यतरस्याम्" (५।४।४२) इति शस्-प्रत्ययः] 'विवृत्य' ग्रीवा-भङ्गेण परावृत्य 'सतृष्णं दृष्टोऽपि' प्रथमाङ्काऽवसाने तपोवनं प्रति गच्छन्त्याः अस्याः अनेकवारम् अनुरागचिह्नं प्रत्यक्षीकुर्वन्नपि अर्थात् अहमेवाधि-हेतु-रिति निश्चिन्वानोऽपि 'अत्रान्तरे' इदानी 'श्रवणे' तदुत्तराकर्णने 'कातरतां' भीतिं 'गतोऽस्मि' किम् अनुकूल-मननुकूल वा वक्ष्यति इति अधीरतां प्राप्तोऽस्मि इति भावः। ("अधीरे कातर" इत्यमरः) ('सम-दुःख-सुखेन' इत्यत्र हेतुत्वेनोपात्तम् इति **काव्यलिङ्गम्**। अत्र **कारणाभावेऽपि कातरता-रूप-कार्योत्पत्तेः विभावना**, अथच साभिलाष-बहुतर-दर्शन-**रूप-कारणे सत्यपि** शकुन्तलायाः **अवस्था-निर्णय-रूप-कार्याऽनुत्पत्तेः विशेषोक्तिः**। अनयोः **सन्देह-संकरः**। नवा नवेति, मत मतेति, गत गतेति **छेक-वृत्ति-श्रुत्यनुप्रासाः। वसन्ततिलकावृत्तम्**) ॥९॥

92n.—1. **किन्तु आयासयित्री** &c.—Cf. "The **malignancy of my fate might perhaps distemper yours**; therefore, I shall crave of your leave that I may bear my evils alone."—**Twelfth Night.** *II.* 1. - आ+यसु (क्षये)+णिच्+तृच् कर्तरि—(3. 1. 133)= आयासयितृ। Next ङीप् ('ऋन्नेभ्यः ङीप्'—4. 1. 57.) 2. "अतएव-निर्बन्धः'—Occurs in Māla. I. **स्निग्ध-जन** &c.—KU. VII 28. For similar idea. Cf. "कस्य तावत् इमं वृत्तान्तं निवेद्य सह्य-वेदनमिव दुःखं करिष्यामि"—*Priyadarśikā. III.* 'आवेदय ममात्मीयं पुत्रदुःखं सुदुःसहम्। मयि संक्रान्तमेतत्ते येन सह्यं भविष्यति"—*NN. V.* 9. "Double grief affects the concealing hearts"—**Spencer.** "Give sorrow words : the grief that does not speak, whispers the over-fraught heart and bids it break". —**Macbeth.** *IV.* 3. "Sorrow concealed like an oven stopp'd Doth burn the heart to cinders"—**Titus Andronicus.** *II.* 4. "To weep with them that weep doth ease some deal ; But sorrow flouted at is double death"—*Ibid.* III. 1. "तुल्याद्विभागादिव तन्मनोभिः दुःखातिभारोऽपि लघुः स मेने"—*Ki. III.* 33 ; "**जानाले आपनजने मनेर वेदना, व्यथित-हृदय पावे अनेक सान्त्वना**"—'*Navina Tapasvini IV. I* ; *V.* 9. **वेदना—**

Means '*knowledge*'. According to मेदिनी, it may mean 'pain also. Cf. 'अवेदनाज्ञं कुलिश-क्षतानाम्'—*Ku. I.* 20 ; 'प्रबलामात्मकृतेन वेदनाम्'—*Ra. VIII.* 40 'संकल्पसङ्गमविनोदितवेदनानि'—MM. VI. 13—'वेदना' विरह्-व्यथा–इति तट्टीका (HS). "कस्य माता, कस्य पिता, कस्य भ्राता सहोदरः। कायाप्राणैर्न सम्बन्धः, का कस्य परिवेदना ॥" **3. सम-दुःख-सुखेन—** **Usual** form is '**सुख-दुःखम्**'। Cf. "अद्वैतं **सुख-दुःखयो**रनुगुणं'—*UC.*1.39 ; *Rām. VI.* 124. 9. For the sake of **metre,** 'दुःख' has been placed first. Kāli. **usually** writes '**दुःख-सुख**' । Cf. 'सम-**दुःख-सुखः** सखीजनः"—*Ra. VIII.* 65. 'सम-**दुःख-सुख** पीयते लोचनाभ्याम्'—*Vik*. 1. 'दुःख-सुखयोश्च विक्रियाम्'—SN. III. 19. **4. बाला**—A girl of 16 years—*Rāja-ballava* ; (83n. 2). **5. मनोगतमाधि-हेतुम्**—Mark the *tautology*. 'आधि' means '**mental** agony' (*Com.*). **नेयं न वक्ष्यति**—For the force of **two negatives** vide (25n. 4). **6. अत्रान्तरे** &c.—This agonising suspense of the king is quite natural, for uptil now except 'स्निग्ध-वीक्षित' (II. 2. Supra), he has had no **distinct avowal** from her lips and now his fate will be decided by the disclosure of Śaka.'s cause of agony. Cf. "उपस्थित-प्रिया-समागमस्यापि किमिदमत्यर्थमुत्ताम्यति मे मनः"—*Rat. III.*

Text :—शकुन्तला—सहि ! जदो पहुदि मम दंसण-पहं आअदो सो तवोवण-रक्खिदा राएसी—[सखि, यतः प्रभृति मम दर्शन-पथमागतः स तपोवन-रक्षिता[1] राजर्षिः—]। (अर्धोक्ते लज्जां नाटयति)।

Śakuntalā—Friend, ever since that royal sage, the guardian[1] of the penance-grove, came within the range of my sight—

(*Gesticulates bashfulness when half-uttered*).

उभे—कहेदु कहेदु पिअसही (कथयतु कथयतु प्रियसखी)।

Both—Speak, dear friend, speak.

शकुन्तला—तदो पहुदि तग्गदेण अहिलासेण एतदवत्थ म्हि संवुत्ता (ततः प्रभृति तद्गतेन[2] अभिलाषेण एतदवस्थास्मि संवृत्ता)।

Śakuntalā—Since then I have been brought to this plight, with my desire having gone[2] to him[2].

राजा (सहर्षम्)—श्रुतं यत् श्रोतव्यम्।

आर्या ✓ स्मर[1] एव ताप-हेतु निर्वापयिता[2] स एव मे जातः।
[12, 18
12.15] दिवस इवाभ्र-श्याम[3]स्तपात्यये[4] जीव-लोकस्य ॥१०॥

King (*Joyfully*)—I have heard what is worth hearing. Love[1] who was, indeed, the cause of (*my*) agony, has (*now*) himself become my cooler[2]; just as a day, dark[3] with clouds[3], (*becomes both tormentor and comforter*) of the living creation towards[4] the close of summer.[4] (10)

V. L.—"कथयतु &c"—Omitted by R. & V. 'अभ्र-श्यामः'—P. K. B. M. HS. 'अर्धश्यामः'—R. V. S; Only B has यत्।

शकुन्तलेति। 'यतः प्रभृति' यस्मात् कालात् आरभ्य ('कार्त्तिक्याः प्रभृति' इति **भाष्य-प्रयोगात्** ५मी'—इति दीक्षितः—५९५)। 'दर्शनस्य' दृष्टेः 'पथः' ('वाटः पथश्च मार्गश्च' इति त्रिकाण्डशेषः) तम्। **राजेति**। 'श्रोतव्यम्' अनुरागस्य व्याधि-हेतुत्वं "श्रुतम्"। **स्मर इति**। 'तपस्य' ग्रीष्मस्य ("ग्रीष्म उष्मकः। निदाघ उष्णोपगम उष्ण उष्णागमस्तपः" इत्यमरः) 'अत्ययः' अन्तः अवसानम् इति यावत् ("अत्ययोऽतिक्रमे कृच्छ्रे ऽप्युत्पाते नाश-दण्डयोः" इति मेदिनी) तस्मिन् वर्षारम्भे इत्यर्थः। 'जीवलोकस्य" प्राणि-जातस्य 'अभ्रैः' जलदैः 'श्यामः' कृष्णः ("त्रिषु श्यामौ हरित्कृष्णौ श्यामा स्यात् शारिवा निशा" इत्यमरः) 'दिवस इव' जलदावृत-दिनमिव इत्यर्थः। 'स्मरः' काम 'एव मे' मम दुष्यन्तस्य 'तापस्य' मानस-सन्तापस्य 'हेतुः' कारणम् (पक्षे उष्णताया हेतुः)। 'स' तादृशः तापकर्ता स्मरः, दिवसश्च 'निर्वापयिता' सन्तापम् उष्णताञ्च निराकृत्य प्रीतिप्रदः 'जातः' संवृत्तः (जनेरकर्मकत्वात् कर्तरि वर्तमाने क्तः)। जलद-जालावृतः दिवसः यथा वृष्टेः प्राक् नरान् भृशं सन्तापयति, तदनन्तरं स एव दिवसः तैरेव जलदैः वृष्टिं कारयित्वा तेषां संतापं पुनः निवर्तयति। तद्वत् अस्याः शकुन्तलायाः उक्तेः प्राक् कामोऽपि मां भृशं सन्तापयति स्म अधुना तदुक्त्यनन्तरं स एव मे प्रीतिप्रदः जातः (य स्ताप-हेतुः स एव निर्वापयिता इति **विरोधाभासः**। अनेन **व्याघातालङ्कारो** व्यङ्ग्यश्च। लक्षणं तूक्तं प्राक्। सिद्धान्तावागीशमते विरूप-कार्योत्पत्ति-कथन-हेतोः **विषमालङ्कारः**। **उपमा, वृत्त्यनुप्रासश्च**। **आर्या** जातिः) ॥१०॥

93n.—1. दर्शन-पथ &c.—Cf. 'यस्य नेत्रयोः पथि स्थिता त्वम्'—*Vik. I.* **ताप-हेतुः**—Applicable to both 'अभ्रश्याम-दिवसः'and 'स्मरः'। A cloudy

day produces great heat but it is most oppressive just on the eve of the shower. Similarly Cupid was extremely painful to the king when Śak. was just going to make a clean breast of the whole affair. Cf. "तीव्रःस्मर-संतापो न तथादौ बाधते यथासन्ने तपति प्रावृषि नितराम-भ्यर्ण-जलागमो दिवसः"—*Rat.* (*III.*10). *qtd. K.* **2. निर्वापयिता** (७।३।३६) —After a great shower the cloudy day becomes extremely delightful. Similarly by the declaration of Śak., Cupid gave comfort to the king. "पुर नवीचक्रुरपां विसर्गात् मेघा निदाघ-ग्लपितामिवोर्वीम् "--*Ra. XVI.* 38. **3. अभ्र-श्यामः**—अभ्र—Cloud. In mathematics it means '*zero*'. अपो बिभर्ति इति अप्+भृ+क (मूलविभूजादित्वात्—3. 2. 5.)= अभ्रम् । 'अभ्र' is the हेतु of श्यामत्व । **R's अर्ध-श्याम is not a good reading.** According to his view, the day which in the morning is **cloudless**, produces heat on account of the bright rays of the sun, and when it is **clouded** in the evening, it becomes delightful. It is evident that his meaning is forced, and unlike 'स्मर' which is **cause** of **both** 'ताप' and 'निर्वाण," **'अर्ध-श्यामत्व'** is the **cause** of 'निर्वाण" only, and **'अर्धाऽश्यामत्व'** is the cause of **'ताप'** । Again in this reading the cause of श्यामत्व *is to be inferred* which is not desirable. Kāli, elsewhere also, speaks of 'अभ्र-श्याम-दिवसः' । Cf. "**मेघ-श्यामा** दिशो दृष्ट्वा मानसोत्सुक-चेतसाम्"—*Vik.IV.*14 ; "**अयमेकपदे** तया वियोगः प्रियया चोपनतः सुदुःसहो मे । नव-वारिधरो-दयाद-होभिः भवितव्यञ्च निरातपर्द्धिः रम्यैः"--Ibid. *IV.* 3; "मनो जह्रुः निदाघान्ते **श्यामाभ्रा** दिवसा इव"—*Ra. X.* 83. **जीवलोकस्य**—*Ra. V.* 35 ; *UC. IV.* 17. For something causing **opposite** results, Cf. 'लावण्य-जितमारो राजकुमार अगदङ्कारो मन्मथज्वरापहरणे"—Dk. (पूर्वपीठिका)। KM. 1033-4.

Text :–शकुन्तला—तं जइ वो अणुमदं तह वट्टह जह तस्स राएसिणो अणुकम्पणिज्जा होमि । अण्णहा अवस्सं सिञ्चह मे उदअं । (तत् यदि युवयोः अनुमतं,[1] तथा वर्तेथां यथा तस्य राजर्षे अनुकम्पनीया[2] भवामि । अन्यथा अवश्यं सिञ्चतं मे **उदकम्**) ।

Śakuntalā—If (*that's*) approved[1] by you, do so that I may

be commiserated[2] by that royal sage. Otherwise, you must needs pour me water.

राजा—संशय-च्छेदि वचनम्। King—Doubt-severing (*is her*) word.

प्रियंवदा (जनान्तिकम्)—**अणसूए, दूर-गअ-मम्महा अक्खमा इअं काल-हरणस्स। जस्सिं बद्ध-भावा एसा, सो ललाम-भूदो पौरवाणं। ता जुत्तं से अहिलासो अहिणन्दिदुं** (अनसूये, दूर-गत-मन्मथा[1] अक्षमा इयं काल-हरणस्य। यस्मिन् बद्ध-भावा[2] एषा, स ललाम-भूतः[3] पौरवाणाम्। तत् युक्तमस्या अभिलाषः अभिनन्दितुम्)।

Priyaṁvadā (*Aside*)—Anasūyā! far advanced[1] in love[1], she cannot brook loss of time. He, on whom her affection[2] is fixed[2], is the *top trinket*[3] of the Pauravas. Therefore, her wish deserves to be commended.

V. L.—'अन्यथावश्यं'—R. V. M. 'अन्यथा स्मरतं माम्'—B. 'अत्र सिञ्चतमिदानीम्—A. Ś omits 'तिल'। 'तिलोदकम्'—R. 'उदकम्'—S.

शकुन्तलेति। 'युवयोः अनुमतं' दुष्यन्तं प्रति ममेदमभिलाष-करणं सम्मतमित्यर्थः। ('क्तस्य च वर्तमाने'[२।३।६७] इति कर्तरि षष्ठी) 'तस्य राजर्षेः' दुष्यन्तस्य ['कृत्यानां कर्तरि वा' (२।३।७१) इति षष्ठी पाक्षिकी] 'जनुकम्पनीया' दया-पात्रम्। (अनेन **शम**-नामकाङ्गमुपक्षिप्तम्। तल्लक्षणं तु—'तस्योपगमनं, यत्तु **शमनं** तदुदाहृतम् इति)। 'अन्यथा' यदि स राजर्षिः मयि अप्रसन्ना भवेत् तदा 'अवश्यं मे उदकं' प्रेताय दशम–दिवसे देयं जलाञ्जलिं 'सिञ्चतम्'। तेन ममाऽस्वीकारे मरिष्यामि इति भावः। (अत्र **विकल्पालङ्कारः**। 'विरोधे तूल्यबलयो **विकल्पाऽलङ्कृतिर्मता**'' इति तल्लक्षणात्)। **प्रियंवदेति।** 'दूरं गतः' प्रसृतः 'मन्मथः' दुष्यन्तेन सह सङ्गमाभिलाषः यस्याः तादृशी। 'बद्धभावा' दत्ताभिप्राया अनुरक्ता इति यावत् ("भावः सत्ता-स्वभावाऽभिप्राय-चेष्टात्म-जन्मसु" इत्यमरः) '**ललाम' भूषणम् 'इव'** इति ललाम-भूतः इति (**अस्वपद-विग्रह-नित्यसमासः। विस्तरस्तु द्वितीयाङ्के द्रष्टव्यः**) भूषण-स्वरूप इत्यर्थः। ("ललामोऽस्त्री ललामापि प्रभावे पुरुषे ध्वजे। श्रेष्ठे भूषा-पुण्ड्र-शृङ्ग-पुच्छ-चिह्ना श्वलिङ्गिषु" इति यादवः) 'तत्' तस्माद्धेतोः 'अस्याः अभिलाषः' अनुरागः 'अभिनन्दितु **युक्तम्**' (**सामान्योपक्रमात् नपुंसकम्**। "शक्यम् अरविन्दसुरभिः"—इत्यादीनां व्याख्यानावसरे विस्तरेणउक्तम्)।

94n.—1. तथा वर्तेथां &c.—'तद् उपायश्चिन्त्यतां यथा सफल-प्रार्थनो भवेयम्'—*Vik. II.* **अन्यथा**—Either if the royal sage takes no

compassion on me, or if no steps are taken by you. **2. उदकम्**— In the *Rām.*, **water (उदक) as an offering to the dead** is often met with. (Cf. 'क्रियताम् **उदकं** पितुः'—*II.* 102. 7 ; 103, 17 ; '**जलं**-क्रियार्थं तातस्य'—103, 20 ; 27 ; *III.* 68. 35 ; *IV.* 9. 20. 'आजग्मुः **उदकं** कर्तुं नदीं शुभजलां शिवाम्'—IV. 25. 51), but **nowhere** '**तिलोदकम्** of (R). **Kāli. also follows suit.** Cf. 'दीयतां **सलिलस्या-ञ्जलिरेक** एव नौ'—*Ku. I* . 37 ; 'परलोकोपगतं **जलाञ्जलिम्**'—*Ra. VIII.* 68 *and MN* ; *I.* 67, *Śak. VI.* 25 ; "एको निवाप-**सलिलं** पिवसीत्युक्तम्"—MM. IX. 40 ; '**तावद्रक्त-जलाञ्जलिः**'—Māhā-Nāta-kam. II. 9. *Also* MS. III. 214; "दित्सन् पितृभ्यः **अम्भः**"—SN. X. 10; 'स मे **जलाञ्जलिः**'—BC. VIII.80, 'सम्पादित-पितृ **जलक्रियः**'—*Kād. p.* 59; MK. X 17. May be '**तिलोदकः**' is a **later development** (*MS. III.* 223). For similar idea—Cf. **चिता सज्जा कर सइ, किवा जलाशयी हई,** कत सइ विच्छेद-यन्त्रणा। वन-दग्धा मृगी-प्राय, मनदग्धा दग्ध-काय, बलि कारे करि कि मन्त्रणा"—**Dāsarathi Rāya.** B's 'अन्यथा स्मरतं माम्—(* * If not, remember that I was"—**Ry ler**) also gives a very good sense. **3. संशय-च्छेदि-वचनम्**—The king was free from all doubts about Śak.'s love towards him when she declared her love for him to her dearest friends (ततः प्रभृति **तद्गतेन**&c.—*see before*). Hence he uttered 'श्रुत यत् श्रोतव्यम्'। All on a sudden a doubt arose in his mind—whether the two friends would **approve of her choice.** But when she made her friends understand that her death would be inevitable without the king (अन्यथा सिञ्चतं &c), the latter was sure about her friends' approval of her choice, and he joyfully uttered. "This declara-tion removes all doubts about the action of the friends" **बद्ध-भावा**—भाव=Love. (*Ra. VI.* 36 ; *Ku. III.* 35), 'यस्मिन् बद्ध-भावासि'—Vik. III ; **ललाम-भूतः**—(60*n.* 6.) **4. अभिलाषः युक्तम्**&c— For **difference** in gender, read (85n.1 ; 46n. 3.). अभिलाषः=अनुरागः —'Longing' or 'love'. Vide 'अभिलाष मुदीरितेन्द्रियः—*Ku. IV.* 41. *and MN.* '**अभिलष्यति** साधूनामुदयं सर्वतोदयः। साधुलोकोऽपि निःसीमं **तस्याभिलषते** श्रियम्'—KR. 225.

Text :—अनसूया—तह जह भणसि (तथा यथा भणसि)।

Anasūyā—What you say is quite true.

प्रियंवदा (प्रकाशम्)—सहि, दिट्ठिआ अणूरूवो दे अहिणिवेसो। साअरं उज्झिअ कहिं वा महाणई ओदरइ। को दाणिं सहआरं अन्तरेण अदिमुत्त-लदं पल्लविदं सहेदि (सखि, दिष्ट्या[1] अनुरूपस्ते अभिनिवेशः[2]। सागर मुज्झित्वा कुत्र वा महानदी अवतरति। क इदानीं सहकारमन्तरेण[3] अतिमुक्त-लतां पल्लवितां सहते)।

Priyaṁvadā (*Aloud*)—Friend, luckily[1] your attention[2] is worthy (*of you*), Leaving the sea, whereto shall a great river descend ? What now, save[3] a mango[3] tree, deserves the Jasmin[4] creeper in (*full*) foliage ?

राजा—किमत्र चित्रं यदि विशाखे शशाङ्क-लेखा[4]मनुवर्तेते।

King—What wonder here if the twin stars Visākhā follow the hare-specked moon's[4] streak[4] ?

अनसूया—को उण उवाओ भवे जेण अविलम्बिअं णिहुअं अ सहीए मणोरहं सम्पादेम्ह (कः पुनरुपायो भवेत् येन अविलम्बित निभृतञ्च सख्या मनोरथं सम्पादयावः)

Anasūyā—But what should be the way by which speedily yet secretly (*we*) may accomplish (*our*) friend's desire ?

प्रियंवदा—णिहुअं त्ति चिन्तणिज्जं भवे, सिग्घं त्ति सुअरं (निभृतमिति चिन्तनीयं, शीघ्रमिति सुकरम्)।

Priyaṁvadā—"Secretly" should need deliberation, "speedily" is easily done.

अनसूया—कहं विअ (कथमिव) ? Anasūyā—How possibly ?

प्रियंवदा—णं सो राएसी इमस्सिं सिणिद्ध-दिट्ठीए सूइदाहिलासो इमाइं दिअहाइं पजाअर-किसो लक्खीअदि (ननु स राजर्षिरस्यां स्निग्ध-दृष्ट्या सूचिता-भिलाष इमान् दिवसान् प्रजागर-कृशो[1] लक्ष्यते)।

Priyaṁvadā—Why ! that royal sage (*too*) with a kind sight betraying his wish for her, appears these days, to be[1] reduced through sleeplessness[1].

V. L.—'अनुरूपस्ते'—R. V. S. 'अनुरूपोऽस्याः'—M. 'ते अनुरूपे'—B. 'वर्जयित्वा'—V. M. 'उज्झित्वा'—R. S. B.

प्रियंवदेति। 'दिष्टया' भाग्येन (तृतीयान्त-प्रतिरूपकमव्ययमेतत्। 'दिष्टया समुपयोषं च इत्यानन्दे' इत्यमरः)। 'अभिनिवेशः' अनुरागः इत्यर्थः। क्षुद्र-तटिन्यादीनां नद्यन्तरादिषु पतन-सम्भावनास्ति इत्यत आह "महानदी"। गङ्गा-गोदावरी प्रभृतीनान्तु समुद्र एव एकमात्रं लक्ष्यम्। 'अनुरूपः' योग्यः। 'सहकारम्' अतिसौरभ रसालं ('सहकारः अतिसौरभ' इत्यमरः) "अन्तरेण" विना 'पल्लवाः' जाता. अस्याः इति पल्लविता। ('तदस्य सजातं तारकादिभ्यः इतच्'–(५।२।३३) इति इतच्। अनेन उपभोग-योग्यता सूचिता) तादृशीम् 'अतिमुक्तलतां माधवीलताम् ('अतिमुक्तः पुण्ड्रकः स्यात् वासन्ती माधवीलता' इत्यमरः) 'सहते' स्वीयत्वेन परिगृह्णाति इत्यर्थः। (अत्र **मालादृष्टान्तालङ्कारः**)। **राजेति**। 'विशाखे' तन्नाम्न्यौ तारके ("विशाखयोश्च" (१।२।६२; ३३८८) इति वैदिक-सूत्रेण **भाषायां द्वित्वम्**. "**द्विवचनार्थे एकवचनं वा स्यात् वेदे**" इति **प्रभा**॥ तथा च माधवीये "शूर्पद्विदेवसंज्ञा विशाखयोः"। अमरस्तु विशाखेति प्रयुञ्जानो **द्विवचन-नियमं नेच्छति**" इति तत्त्वबोधिनी) 'शशाङ्क-लेखा' चन्द्र-कलाम् 'अनुवर्तेते' अनुगच्छतः। सर्वथा युक्तमेव अनसूया-प्रियंवदयोः शकुन्तलाया अनुवर्तनम् इति भाव (अत्राऽ**प्रस्तुत-प्रशंसा**)। **अनसूयेति**। 'निभृतम्' अन्यैरज्ञातम् 'मनोरथ' मनोरथ-विषयभूतं दुष्यन्त-सङ्गमं 'सम्पादयाव' विधास्याव. ['वर्तमान-सामीप्ये वर्तमानवद्वा' (३।३।१३१) इति लट्]। **प्रियंवदेति**। 'ननु' इति आक्षेपे (इति हेमचन्द्रः)। 'इमान् दिवसान्' शकुन्तला-दर्शनात् आरभ्य अद्य यावत् ['कालाऽध्वनोरत्यन्तसंयोगे' (२।३।५) इति २या] 'स्निग्धा' स्नेहपूर्णा 'दृष्टिः' अवलोकन तया, 'अस्या' शकुन्तलायां 'सूचितः' ज्ञापितः 'अभिलाषः' अनुरागः येन यस्य वा तादृश.। 'प्रजागरात्' **प्रकर्षेण** जागरणात् (इति हलायुधः) शकुन्तला-गत-चिन्तया निद्राऽभावात् **चतुर्थात् कामावस्था-विशेषात्** 'कृशः' (८।२।५५) क्षीण-शरीरः। अर्थात् **पञ्चमीं दशां प्राप्त इति 'लक्ष्यते'**। अतः तस्यापि आसक्तिमत्त्वात् शीघ्रमिति सुकरम् इति **भावः**।

95n.—1. दिष्टया—An अव्यय [*strictly the instrumental singular of* 'दिष्टि'—*Apte*. [Cf. Beng. 'अगत्या'from अगति] used as an exclamation of joy or congratulation. 'दिष्टिः आनन्दे माने च'—H ; Cf. '**दिष्टयाम्ब ते कुक्षिगतः परः पुमान्**'—*Bhāgabata* ; 'दिष्टया प्रतिहतं दुर्जातं' —*MM. IV* ; *VS. II.* 12 ; (125*n.* 3.) **2. सागरमुज्झित्वा** &c.—Cf. '**शशिनमुपगतेयं कौमुदी मेघमुक्तं। जलनिधिमनुरूपं** जह्नु-कन्यावतीर्णा'—*Ra. VI.* 85. '**न कमलाकरमुज्झित्वा राजहंसी अन्यस्मिन्नभिरमते**'—*Rat. II.*

3. "कुदो वा महोर्वाहि वज्जिअ पारिजादस्स उग्गमोत्ति"—MM. II **अतिमुक्त-लतां**—Jasmin (माधवी) is so called owing to its pearl like whiteness. अतिक्रान्तः मुक्तां शौक्ल्यात्, 'अत्यादय'–(वाः २।२।२।१८) इति तत्पुरुषः। 'गोस्त्रियो—(१।३।४८) इति ह्रस्वः—*BhD.* Cf. the idea with "परिगृहाण गते सहकारतां त्वम-तिमुक्त-लता-चरितं मयि"—Māla. IV.12. "लतां प्रफुल्लामतिमुक्तकस्य चूतस्य पार्श्वे परिरभ्य जाता"-SN. VII.8. 4. **विशाखे**—is the 16th lunar asterism. It generally refers to two stars. It is **dual** in भाषा, but **optionally singular** in the Vedas (Com.). Cf. 'पत्न्यो र्मध्यगतस्तत्र सुग्रीवः प्लवगेश्वरः। विशाखयोर्मध्यगतः संपूर्ण इव चन्द्रमाः'—*Rām.* Reference is here to **two friends.** The idea is—Like the two stars 'विशाखा' and 'राधा' following the moon, the two friends Anasūyā and Prayaṁvadā will act according to the desire of their friend. **लेखा** means a thin line. (*Ku. I.* 47 ; *VII.* 16 & 87 ; *Ki. XVI.* 2 ; "शशाङ्क-लेखा शरदभ्रमध्ये"—SN. VI. 37 'शशाङ्क-रेखा'—*Ku. VII.* 8 ; PA & *MD.* 44). It is purposely used here to bring out the idea of Śak.'s **emaciated condition.** The word 'शशाङ्क' with 'लेखा' at the end becomes *feminine*, and admirably refers to Śak. Cf. '**चित्रलेखा-द्वितीयां** प्रियसखीमुर्वशीं गृहीत्वा **विशाखा-सहित** इव भगवान् सोम उपस्थितः स राजर्षिः'— *Vik. I.* **किमत्र चित्रं** &c.—Cf. '**किमत्रं चित्रं** धर्मज्ञ लोकनाथशिखामणे' &c.—*Rām. VI.* 18. 36. **अनुवर्तते**—'प्रभुचित्तमेव जनः अनुवर्तते'—*ŚPB. XIV.* 41. **निभृतं**—(11n. 4). 5. **प्रजागार-कृशः**—प्र+जागृ+घञ् भावे=प्रजागरः—Sleep-lessness. No वृद्धि (आर्) by 'जाग्रोऽवि-चिण्-णल्-ङित्सु'—(7. 3. 85. *Vide* **Prabhā.** *P.* 505). **कृशः**=(63*n.* 4). *Cf.* 'भर्तुः कृशेषु अङ्गेषु'—*Māla. III.* 'शुष्यति साऽलभमाना भवत्कृते—KM. 831.

Text :—**राजा**—(आत्मानमालोक्य) **सत्य-मित्यम्भूत एवास्मि। तथाहि—**

इदमशिशिरै[1]**रन्तस्तापात्**[2] **विवर्ण-मणीकृतं**[3]

हरिणी **निशि निशि भुज-न्यस्तापाङ्ग-प्रवर्तिभि**[4]**रश्रुभिः।**

(नसमरसलग) **अनभिलुलित-ज्याघाताङ्क**[5] **मुहुर्मणि-बन्धनात्**

कनक-वलयं स्रस्तं-स्रस्तं मया प्रतिसार्यते[6] **॥११॥**

King (*Eying himself*)—So I have been forsooth. For—

This golden bangle (*which*[3] *has*) its jewels (*now*) tarnished[3] by (*my*)

tears, hot[1] on[2] account of internal throe,[2] and trickling[4] down night after night from the corner of (*my*) eye[3] placed on my (*left*) arm, is repeatedly pushed[6] back by me as it slides down from the wrist without[5] touching the callosities caused by the bow-string[5]. (11)

V. L.—'प्रर्वातभिः'—M. B. 'प्रसारिभिः''—R. V. 'प्रसर्पिभिः''—S. 'अनतिलुलित'—M. B. 'अनभिलुलित'—R. V. S.

इदमिति। 'निशि निशि' प्रतिरात्रं ['नित्यवीप्सयोः' (८।१।४) इति वीप्साया द्विरुक्तिः। अनेन अद्य यावत् निद्राभावः सूचित]। 'भुजे' वाम-करतले (नृपस्य **दक्षिण-सावित्वात् ज्याघाताङ्कः वाम-कर-प्रकोष्ठे** एव स्यात् अतः वाम-करतल-ग्रहणम्) 'न्यस्तः'' निहितः स्थापितः इति यावत् (''आहितम् निहितम् न्यस्तम् आरोपितमिति स्मृतम्'' इति हलायुधः) यः 'अपाङ्गः' (वाम)-नेत्रान्तः (''अपाङ्गस्त्वङ्गहीने स्यात् नेत्रान्ते तिलकेऽपि च'' इति मेदिनी) तस्मात् **'प्रवर्तन्ते' बहुलं निःसरन्ति** यानि तादृशैः ('बहुलमाभीक्ष्ण्ये' –३।२।८१-इति णिनिः)। 'अन्तस्तापात्' अन्तर्गत-मदन-सन्तापेन हेतुना 'अशिशिरैः' उष्णैः (अनेन तापाधिक्यं व्यज्यते) 'अश्रुभिः' नयन-जलैः 'विगतः वर्णः' कान्तिः येषा ते 'विवर्णाः' तादृशाः 'मणयः' यत्र तत् 'विवर्ण-मणि', अ-विवर्ण-मणि विवर्ण-मणि कृतम् इति विवर्ण-मणीकृतम्' ('अभूत-तद्भावे च्विः'-(५।४।५०) ; 'च्वौ च'-(७।४।२६) इति दीर्घः) 'मणिबन्ध' प्रकोष्ठ-पाण्योः सन्धि-स्थानम् (इत्यमरटीकायां भरतः। 'मणिबन्धः पाणिमूलम्'-इत्यभिधानरत्नमाला) तस्मात् 'स्रस्तं स्रस्तं' वारंवारम् अधः विगलितम् 'इदम्' वाम-कर-धृत 'कनकवलय' स्वर्ण-कटकं ('वयम् इत्येक-वचनेन विरहित्वात् सर्वालङ्कार-परित्याग' द्योत्यते।) 'मया न अभिलुलितः' **स्पर्शेन विमर्दितः** तत् यथा तथा 'ज्यायाः' धनुर्गुणस्य यः 'आघातः' घर्षणं तस्य 'अङ्कः' चिह्नम् ('उत्सङ्ग-चिह्नयोरङ्क' इत्यमरः) यस्मिन् कर्मणि यथा स्यात् तथा 'मुहुः' वारं-वार (**'पौनः—पुन्ये** भृशार्थे च सद्यो वा स्यान्मुहुः पदम्' इति वैजयन्ती) **'प्रतिसार्यते' (सरतेः ण्यन्तात् कर्मणि लट्)** उद्धृत्य स्वस्थाने स्थाप्यते। (अत्र क्षीणाङ्गत्वात् प्रस्तुतेन कार्येण कनक-वलय-स्रंसनेन तत्कारणीभूत कार्श्यं प्रत्याय्यत इति **पर्यायोक्तमलङ्कारः। स्वभावोक्तिश्च। हरिणी**वृत्तम्) ॥११॥

96n.—1. अशिशिरैः &c.—According to poetic convenion, **tears of joy are cold** and those of **grief are hot**, hence the—propriety of the epithet 'अशिशिरैः'। Cf. **'आनन्द-शीतामिव** वाष्पवृष्टिम्'

—*Ra. XVI* 44. **'आनन्दजः** शोकज-मश्रु बाष्पस्तयोरशीतं शिशिरो बिभेद'— Ibid. *XIV*. 3. **'उष्णैः** विरह—महतीमश्रुभिः यापयन्तीम्'—PA & *MD. II*. 28 ; *Ra. XII*. 4 ; 62 ; *XIX*. 36. Mark also that our poet uses the word **'बाष्प'** with reference to the tears of joy which are by themselves not so copious and flowing, as those arising from grief which are called 'अश्रु' । 2. **भुज-न्यस्त** &c.—This and the following lines have been **often mis-understood**, *M*, whom we have followed firs. offers the **correct** explanation. The king we have considered as passing several nights **in a sitting posture with his left arm** (*palm*) **raised to support his cheek.** 'भुज' is explained as the *palm of the left hand.* This is a very common posture of all love-lorn persons men or women. Cf. "**वाम-कपोल**-शयनी-कृत-करतलया"—Kād. P. 583. "**वाम-हस्तोपहित**-वदना"—Śak. Act. IV. 'निःश्वासानामशिशिरतया—**हस्तन्यस्तं** मुखम्'—PA & MD. II. 23. "केवलं कमलायमान-हस्त-पर्यस्त-गण्ड-मण्डला दिवसानि गमयति"—MM. Act. II. The king being a **right-hand archer**, the friction of the bowstring **will produce callosities on the left-hand.** Hence 'अपाङ्ग' also means the outer corner of the **left** eye which was placed **on his left palm.** 3. **अनभिलुलित** &c.—अभि+लुल्+क्त+कर्मणि अभिलुलितः–Pressed, touched. 'लुल विमर्दने'–*KK.*'सौत्रधातुरयम्'—*Durgādāsa.* The callosities are produced by the friction of the bow-string on the **fore-arm a little below** कफोनि **(elbow) and above the wrist-joint, but not on the wrist.** Now bangles are **always** worn in the fore-*fore-arm* (प्रकोष्ठ) *which is nearest to the wrist joint.* Mark also that प्रकोष्ठ is a wide term meaning the entire hand from the elbow to the wrist-joint (मणिबन्ध) । Cf. 'प्रकोष्ठमन्तरं विद्यात् अरत्नि-मणिबन्धयोः'—*Kātya.*'वाम-प्रकोष्ठार्पितं बिभ्रत् काञ्चनमेकमेव वलयम्—*Śak. VI*.6. 'कनक-वलय-भ्रंश-रिक्त-प्रकोष्ठः'—PA & *MD*. 2.But because bangles are worn on that part of प्रकोष्ठ which is nearest to मणिबन्ध, प्रकोष्ठ often in Kālidāsa is met with in the sense of 'मणिबन्ध' । Cf. 'ततः प्रकोष्ठे हरिचन्दनाङ्किते &c.—*Ra. III*. 59. where *MN* says प्रकोष्ठे 'मणिबन्धे' । Again Kāli, has clearly pointed out

in Māla that bangles are worn near the wrist-joint (मणिबन्ध) Cf. 'वामं सन्धि-स्तिमित-वलयम्'—*Act. II.* 6. where *K* remarks **"सन्धि-स्तिमित-वलयं सन्धौ "मणिबन्धे** स्तिमितं निश्चलं वलयं कङ्कनं यस्य सः" ॥ Also **'वामं'** सन्धि-स्तिमितवलयम्' &c.—*DP*. "मणिबन्धन-विन्यस्त—मणिमाल:"—KM. 741. Now the part of the hand **towards the elbow is** *fatter* **than the part nearer the wrist-joint, Hence in natural condition the bangle will always touch the callosities caused by the bowstring.** The king owing to uneasiness caused by the pangs of love used to pass the whole night in a *sitting posture*. Thus owing to constant wakefulness, the king's body was emaciated and the callosities were not **sufficiently prominent through emaciation** and disuse of the bow. Hence in a sitting posture with his cheek upon his palm, the bangle would slip down from its natural place towards the elbow **without touching the scar** produced on the upper part of the fore-arm. R and his followers take the king to pass the night in a **lying posture, the left arm being used as a pillow**. In this explanation as the bangle slips from मणिबन्ध to the **tips of the fingers, अनभिलुलित** &c. **becomes redundant**. Through sheer **absent-mindedness**, the king **forgets** that the bangle, even though put in its proper position, will not remain there. Elsewhere **(Read 84n. 5)** he, for a similar reason, refers to the **unbearableness of the moon-beam** at mid-day. *Now read the lovelorn condition of* पुण्डरीक *in Kād. p.* 581-585.

Text :—**प्रियंवदा** (विचिन्त्य) **हला, मअण-लेहो से करीअदु। इमं देव-सेसा-वदेसेण सुमणो-गोविदं करिअ से हत्थअं पावइस्सं** (हला, मदन-लेख.[1] अस्मै क्रियताम्। इमं देव-शेषाऽपदेशेन[2] सुमनो-गोपित[3] कृत्वा अस्य हस्तं प्रापयिष्यामि)।

Priyaṁvadā (*Musing*)—Well, let a *billet-doux*[1] be composed for him. Having[3] concealed it under flowers,[3] (*I*) will contrive

to make it reach his hands, under[2] the pretext of a wreath that has been offered to the deity.

अनसूया—रोअइ मे सुउमारो पओओ। किं वा सउन्दला भणादि (रोचते[1] मे सुकुमारः प्रयोगः[2]। किंवा शकुन्तला भणति)।

Anasūyā—I like[1] (*this*) fine device.[2] But what does Śakuntalā say ?

शकुन्तला—को णिओओ तुम्हाणं विकप्पीअदि [को नियोगो वां विकल्प्यते[2]]।

Śakuntalā—What advice of yours is (*ever*) altered[2] by me ?

प्रियंवदा—तेण हि अत्तणो उवण्णास-पुव्वं चिन्तेहि दाव किम्पि ललिअ-पद-बन्धणं (तेन हि आत्मन उपन्यास-पूर्वं[3] चिन्तय तावत् किमपि ललित-पद-बन्धनम्[4])।

Priyaṁvadā—Then just think out some pretty[1] string of words[4] alluding[3] to thyself.

शकुन्तला—हला चिन्तेमि अहं। अवहीरणा-भीरुअं पुणो वेवइ मे हिअअं (हला चिन्तयाम्यहम्। अवधीरणा-भीरुकं[5] पुनर्वेपते मे हृदयम्)।

Śakuntalā—Dear, I shall think out. But my heart trembles, [5]afraid of a refusal.[5]

V. L.—'देव-शेषा'—V. S. 'देवता-शेषा'--M. C. 'देवता-सेवा'--B. 'देवता-प्रसादस्य'—R. 'देवता-व्यपदेशेन'—K. 'अवधारण'--Only R. M.

प्रियंवदेति। 'मदनस्य लेखः' लेख्यं लिपिः इति यावत् ("**लेखो** लेख्ये सुरे लेखा **लिपि**राजिकयोर्मता' इति मेदिनी) आत्मनः कामाऽऽविर्भाव-ज्ञापिका पत्रिका इत्यर्थः। 'देवस्य' देवता-विशेषस्य 'शेषां' निर्माल्यं ('प्रसाद-दत्ता माला' इति कुमारसम्भवे मल्लिनाथः (३।२२)। 'प्रसादान्निजनिर्माल्यदाने **शेषेति** कीर्तिता' इति विश्वः) तस्याः 'अपदेशेन' छलेन। देव-निर्माल्यमिदं, भवता ग्रहीतु युक्तम् इति छलेन इति भावः। 'सुमनोभिः' पुष्पैः ('स्त्रियः सुमनसः पुष्पं प्रसून समम्" इत्यमरः) 'गोपितं' प्रच्छन्नं कृत्वा। **शकुन्तलेति।** 'नियोगः' आज्ञा 'विकल्प्यते' अन्यथाक्रियते। काक्वा कथमपि न इत्यर्थः। (अत्र **मनोरथो** नाम नाट्य-लक्षणम्। "**मनोरथस्त्व**भिप्रायस्योक्तिः भङ्ग्यन्तरेण यत्" इति दर्पणलक्षणात्)। **प्रियंवदेति।** 'तेन हि' यद्ययम् उपायः तुभ्यं रोचते तर्हि 'आत्मनः' स्वस्य 'उपन्यासः' उल्लेखः 'पूर्वः' आदौ यस्मिन् तत् स्वनामाद्युल्लिख्य इति भावः। अन्यथा लज्जया स्वाऽनिवेदने हि लिखितमपि मुधा स्यात्। 'ललितानां' सुन्दराणाम् (इति मेदिनी) 'पदाना बन्धन' रचनां 'चिन्तय' विभावय। **शकुन्तलेति।** 'अवधीरणा' अवज्ञा

प्रत्याख्यान मिति यावत् ['अवधीर' इति अवज्ञायाम् अदन्तश्चुरादिः—इति कवि-कल्पद्रुम.। 'ण्यासश्रन्थो युच्' (३।३।१०४) इति युच्] तत. 'भीरुकम्' भीतम् (इति सुप्सुपेति समासः। 'त्रस्नौ भीरु-भीरुक-भीलुकाः' इत्यमरः)।

97n.—1. मदन-लेखः—A love-letter describing the condition of a love-lorn person. This is one of the four ways mentioned by *Bharata* by which a maiden encourages the advances of her lover. Cf. '**लेख्य-प्रस्थापनैः**, स्निग्धैः वीक्षितैः, मृदु-भाषितैः। दूती-सम्प्रेषणैः नार्या भावाभिव्यक्तिरिष्यते'=*Qtd N. i. e.* (*i*) sending a love-letter ; (*ii*) amorous glance ; (*iii*) soft speech ; (*iv*) sending a female messenger. 2. **देव-शेषा** &c.—**शेषा**—A garland or the remains of other offerings presented to an idol and distributed among the worshippers as a holy relic (Com). Cf. 'माल्याक्षतादि-दाने स्त्री '**शेषा**' इति वैजयन्ती-केशवौ ॥ '**शेषा** निर्माल्य-दाने स्यात्'—हैम. *qtd. BhD.* Cf. 'निधाय **शेष**भूताम्'—MK. X. 46 ; 'तयेति**शेषा**मिव भर्तुराज्ञामादाय मूर्ध्ना मदन. प्रतस्थे'—*Ku. III.* 22. **अपदेश**—Pretext. 3. **सुमनो** &c.—(Concealed among flowers). 'सुमनस्' is generally **feminine** and **plural**. But sometimes like 'अप्सरस्', 'सिकता' &c., it is **singular**. 'सुमनाः पुष्प-माल्ययोः स्त्रियाम्, ना धीरदेवयोः'—Medini. 'वेश्या श्मशान-सुमना इव वर्जनीया' —*MK qtd.* RM ; Again धनञ्जयकवि uses it in the **neuter gender.** 'पुष्पं सुमनः कुसुमम्'—नाममाला। 'सुमनस्' is also seen in a '**टावन्त**' form—"**सुमनायाश्च** पत्रेण पटोलाऽरिष्टयोस्तथा"—Ss. **4. आत्मन उपन्यास-पूर्वं—**उपन्यासः=Lit. placing near (उप), hence, 'reference', 'introduction' (9n. 7.). 5. **अवधीरणा**—According to *Bopadeva* 'अवधीर' (अवज्ञायाम्) is 'चुरादि'। '**आवधीरयत्** साधुम् असाधुः'—*Durgādāsa.* (206n. 5). Next युच् (3. 3. 107). "भर्तुरवधीरणापरा"—*Ku. VIII.* 49. "ने परिचयवती अवधीरणा प्रिये"—*Māla. IV.* बिभेति इति भी+शीलार्थे क्रुकन् ('क्रुकन्नपि'—*Vārt.* 3. 2. 174)= **भीरुक**—(80n. 4).

Text :—राजा (सहर्षम्)—**अयं स ते तिष्ठति सङ्गमोत्सुको**[1]
वंशस्थविलं **विशङ्कसे भीरु ! यतोऽवधीरणाम्**[2]।
(जतजर) **लभेत वा प्रार्थयिता न वा श्रियं**
श्रिया दुरापः[3] **कथमीप्सितो**[4] **भवेत** ॥१२॥

King (*Joyfully*)—That very one, from whom, O timid one, you are apprehending a repulse[2], is standing here, eager[1] for a union[1] with you. The seeker may or may not win fortune (*but*) how can the (*person*) sought[4] by fortune, be difficult[3] (*for her*) to obtain[3] ? (12)

सख्यौ—अयि अत्त-गुणा-वमाणिणि। को दाणिं सरीर-णिव्वावइत्तिअं सारदिअं जोसिणिं पडन्तेण वारेदि (अयि आत्म-गुणाऽवमानिनि[5] ! क इदानीं शरीर-निर्वापयित्री[6] शारदीं[6] ज्योत्स्नां पटान्तेन वारयति) ।

Friends—O depreciator[5] of thy (*own*) excellences[5] ! Who would screen off the body-soothing[6] autumnal moon-shine with the skirt of (his) garment ?

शकुन्तला (सस्मितम्)—**णिओइदा दाणिं म्हि** [नियोजिता इदानीमस्मि] ।
(इति उपविष्टा चिन्तयति) ।

Śakuntalā (*Smiling*)—Now I set about (*it*).
(*This said sts up and muses.*)

अयमिति। हे 'भीरु' ('ऊङ् उतः'–४।१।६६–इति ऊङ्, सम्बोधने ह्रस्वः) अवज्ञा-भयशीले ! 'यतो' यस्मात् दुष्यन्तात् 'अवधीरणां' प्रत्याख्यानं 'विशङ्कसे' सन्दिह्यसि 'सः अयं' दुष्यन्तः 'सङ्गमे सङ्गमेन वा उत्सुकः (२।३।४४) उत्कण्ठितः सन् 'तिष्ठति' । (पूर्वापर-चरणयोः व्यत्यय-पाठेन उद्देश्य-प्रतिनिर्देश्य-**प्रक्रमभङ्गः** समाधेयः) । 'प्रार्थयिता' याचकः 'श्रियं' लक्ष्मीं 'लभेत न वा लभेत (संभावनायां लिङ्) किन्तु 'श्रिया' लक्ष्म्या (२।३।६९) 'ईप्सितः' (७।५।५५) आत्मना एव लब्धुमभिमतः जनः 'दुरापः' (खल्-३।३।१२६) दुर्लभः 'कथ भवेत्' न कथमपि इति भावः । अतः मयैव त्वं दुरापा, न तु त्वयाहं दुर्लभः इति नृपाभिप्रायः। (**अयमर्थान्तरन्यासः। अर्थापत्तिश्च**। व्यत्यय-पठितस्य पूर्ववाक्यस्य पूर्ववाक्यं समर्थकम्। तादृगुत्तरस्य उत्तरम् समर्थकम् इति राघवचरणाः। सादृश्य-निबन्धनाऽप्रस्तुतप्रशंसालङ्कारश्च। **श्रुति-वृत्ति-च्छेकानुप्रासा**। अत्र 'श्रियं 'श्रियेति' श्रीशब्दस्य वार-द्वयोपादानात् **कथितपदता-दोषः** "रतिलीलाश्रम' भिन्ते सलीलमनिलो वहन्" इति दर्पणोदाहरणवत्। स च "**कथं न लभ्यते नरः तयार्थितः**" इति पठित्वा परिहर्तव्यः। अनेन **पर्याय-प्रक्रम-भङ्गोऽपि** परिहृतः स्यात्। **वंशस्थविलं** वृत्तम्) ॥१२॥ **सख्याविति**। प्रियजन-गुण-पक्षपातेन 'आत्मनः' स्वस्य 'गुणान्' रूपादीन् 'अवमानयति' अवजानाति या तत्सबुद्धी। त्वद्गुणैरेव स क्रीतः अतः अवज्ञा-शङ्कापि नास्ति इत्यर्थः। 'शरीरस्य निर्वापयित्री'

सौम्यकारिणीं 'शारदी' शरदृतु-सम्बन्धिनी ('सन्धि-वेलाद्यृतु-नक्षत्रेभ्यः अण्' (४।३।१६); ङीप्—४।१।१५) 'ज्योत्स्ना' चन्द्रातपं ('ज्योत्स्ना' चन्द्रातपेऽपि स्यात् ज्योत्स्नायुक्तनिशि स्मता'। ज्योतिः अस्ति अस्याम् इति 'ज्योत्स्ना—तमिस्रा'—(५।२।११४) इति निपातितः] 'क इदानीम्' इति वाक्यालङ्कारे। 'पटान्तेन' वस्त्राञ्चलेन 'वारयति'। न कोऽपि पुरुषः इदृग्रूप-शालिनीं त्वाम् अवधीरयितु समर्थ इति हृदयम् (अत्र अप्रस्तुतप्रशंसालङ्कारः)।

98n.—1. सङ्गमोत्सुकः—३या is also available with 'उत्सुकः' by 'प्रसितोत्सुकाभ्यां तृतीया च'—(2. 3. 44). Hence say सङ्गमेन (सङ्गमे वा) उत्सुकः, but the समास is to be termed **सहसुपा,** and not **३या** or **७मी तत्पुरुष** by 'योगविभाग', for such योगविभाग is not sanctioned by महाभाष्य। भी+क्रु=**भीरु** (3. 2. 174). Next भीरु+ऊङ् ('ऊङ् उतः' 4. 1. 66)= **भीरू। संबोधने ह्रस्वः**—*Read* (255*n*. 1). Cf. 'यस्य कृते त्वमागता सोऽयं ते पुरतस्तिष्ठति"—*Rat. II.* **लभेत न वा** &c.—श्री is notoriously unsteady (*MR. II.* 12 ; *IV.* 13), so the **प्रार्थी** is naturally dubious about securing her love. Cf. 'क्षितौ मनुष्या धनुरादिभिः **श्रमैः** स्त्रियः कदाचिद्धि **लभेत न वा**। असंशयं यस्त्विह धर्मचर्यया भवेयुरेता दिवि पुण्यकर्मणः"॥—SN. X. 62. **श्रिया**—(10*n*. 3). 2. **ईप्सितो** आप्+सन्+क्तः। ['अ' of a Desiderative becomes 'इ' by 'सन्यतः' (7. 4. 79) ; But in the case of 'आप्' it is 'ई' by "आप्-ज्ञप्यृधाम् ईत्" 7. 4. 55.] The seeker of fortune (लक्ष्मी) may or may not **get** fortune, but it can't be conceived that fortune has failed to find out a seeker. 3. **इदानीं**—An appellative (वाक्यालङ्कारे)—"**इदानी** वाक्यभूषायां सम्प्रत्यर्थे च दृश्यते"। **नियोजिता**—Directed by you, so not answerable for the consequence. 4. **For a similar idea**. Cf. 'दिवं यदि प्रार्थयसे वृथा श्रमः पितुः प्रदेशास्तव देवभूमयः। अथोपयन्तारमलं समाधिना न **रत्नमन्विष्यति मृग्यते हि तत्**'—*Ku.* V 45. 'न दृश्यते प्रार्थयितव्य एव ते। **भविष्यति प्रार्थित-दुर्लभः कथम्**'॥—*Ku.* V. 46.

Text :—राजा—स्थाने¹ खलु विस्मृत-निमेषेण² चक्षुषा प्रियामवलोकयामि।

आर्या [12, 18 12, 15] **यतः— उन्नमितैक-भ्रू-लतमाननमस्याः पदानि रचयन्त्याः।**

कण्टकितेन³ प्रथयति मय्यनुरागं कपोलेन⁴ ॥१२॥

King—Fitly[1] indeed with[2] eyes that have forgot winking[2] do I gaze on my darling. For,—While composing the lines, her face with one creeper-like eye-brow raised up, vents her affection for me by means of her horripilated[3] cheeks.[4] (13)

शकुन्तला—हला, चिन्तिदं मए गीद-वत्थु। असण्णिहिदाणि उण लेहण-साहणाणि [हला चिन्तितं मया गीत-वस्तु[5]। असन्निहितानि[6] पुनर्लेखन-साधनानि[7]]

Śakuntalā—Friend, the theme[5] of a song[5] is thought out by me. Not[6] near at hand[6], however, are writing[7] materials[7].

V. L.—'कण्टकितेन प्रथयति'—R. V. M. S. 'पुलकाञ्चितेन कथयति'—D. B. 'चिन्तितं गीतवस्तु'—R. V. S. 'चिन्तिता मया गीतिका'—M. B. 'असन्निहितानि'—B. S. P. 'न सन्निहितानि'—R. V. M.

राजेति। 'विस्मृत-निमेषेन' निर्निमेषेण 'चक्षुषा प्रियां' शकुन्तलां यत् 'अवलोकयामि' तत् 'स्थाने' युक्तम् ('**स्थाने** तु कारणार्थे स्यात् **युक्त-सदृशयो**रपि' इति मेदिनी)। वक्ष्यमाण-श्लोके तदेव प्रतिपादयति॥ **उन्नसितेति।** 'पदानि' गीतिकास्थ-शब्दान् ('पद **शब्दे** च वाक्ये च व्यवसायप्रदेशयोः' इति मेदिनी) 'रचयन्त्या' विचारपूर्वकम् उपनिबध्नन्त्याः 'अस्याः' शकुन्तलायाः 'उन्नमिता' उत्तोलिता 'एका भ्रूलता' यस्मिन् तादृशम् 'आननं' कर्तृ, 'कण्टकितेन' रोमाञ्चितेन। ('**रोमाञ्चे** च द्रुमाङ्गे च **कण्टको** मकरेऽपि च' इति विश्वः) 'कपोलेन' गण्डेन करणेन 'मयि' दुष्यन्ते' प्रीतिविशेष 'प्रथयति' प्रकटयति। रोमाञ्चित-कपोलान्यथाऽनुपपत्त्या अनुराग-प्रथनात् **अर्थापत्त्यलङ्कारः**। केचिद**नुमानालङ्कार**माहुः। भ्रू-लतम् **इत्युपमा** च, उन्नमितस्य साधकत्वात्। **अनुप्रासश्च**। दर्पण-कार-मते अत्र **क्रम**-नाम गर्भसन्धेरङ्गमुपक्षिप्तम्। तल्लक्षण यथा—"भाव-तत्त्वोप-लब्धिस्तु **क्रमः** स्यात्'। **इदं च तेनैव उदाहृतम्। आर्या** जातिः)॥१३॥ **शकुन्तलेति।** 'न सन्निहितानि' समीपस्थानि इति 'असन्निहितानि' (**क्वचित् प्रसज्यप्रतिषेधेऽपि समासः, स्वयं सूत्रकृता तथैव कृतत्वात्**)। 'लेखन-साधनानि' मषी-पत्र कलमानि इत्यर्थः।

99n.—1. स्थाने—Rightly ; (16*n.* 1.) *Śakuntalā* has already betrayed her love to the king and that fact has been doubly corroborated now by her thrilling cheeks, hence the king remarks that his gaze on Śak. has been quite meet. But elsewhere (164*n.* 2) when he could not recognize her, he remarked—'**भवतु,** अनिर्वर्णनीयम् पर-कलत्रम्'। Cf, 'A lover's eyes will gaze the eagle

blind'—**Love's Labour Lost** ; 'Methought all his senses were lock'd in his eyes'—**Ibid.** *II*. 1. **2. विस्मृत** &c —Cf 'पपौ' निमेषा-लस-पक्ष्म-पङ्क्ति, रुपोषिताभ्यामिव लोचनाभ्याम्'—Ra II. 19. **कण्टकितेन**—'**कण्टकः**' [Horripilation i.e., standing up of the hair like thorns due to excessive delight (*Com.*)]+जातार्थे इतच्=कण्टकितः—[(2. 5. 36); 'तारकादि' *is* आकृतिगण] । Cf. 'प्रीति-**कण्टकितत्वचः**' -*Ku VI*. 15. '**कण्टकित**-प्रकोष्ठ'—*Ra. VII.* 22. and *MN* thereon ; *Rat.* I. 1. 3. **कपोलेन**—*R* justifies the singular thus—'कपोलेन । यंत्र एका भ्रूलता उन्नमिता तद्दिगस्थ-कपोलस्य एव रोमाञ्चितत्वम् इत्येकवचनम्' । **अनुरागं**—"राग एव स्व-संवेद्य-दशाप्राप्त्या प्रकाशितः । यावदाश्रयवृत्तिश्चेत् अनुराग इतीरितः."—*Sudhākara* **मणि**—(242*n*. 5) **प्रथयति**—Manifests, Cf. *Ki. V.* 3 ; *Rat. IV* 13. **4 असन्निहितानि**—सम्+नि+धा+क्त कर्मणि—सन्निहितानि—Near at hand, न सन्निहितानि—असन्निहितानि—Not close by, 'धा'—'हि' ('दधातेः हि'—7. 4. 42.). Here **negation is prominent**, hence नञ् is प्रसह्य-प्रतिषेध । So says *KV*. —"अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता । '**प्रसह्य-प्रतिषेधोऽसौ**' क्रियया सह यत्र नञ्" । So समास is **prohibited.** But this is not strictly observed, as **Pāṇini himself has made समास** with प्रसह्यप्रतिषेध-नञ् । Cf 'आदेच उपदेशे '**अशिति**—(6. 1. 45) '**प्रसह्यप्रतिषेधः** इत्यादि, नतु शिति इति'—T. 2370. **5. लेखन-साधनानि**—(211n. 1). Many European scholars headed by *Dr. Bhuler* opine that Sanskrit scripts originated from the letters of the *Moabite stones* and *Assyrian weights* which were introduced in India at about 800 B. C. But Pāṇini (*at least* 800 *B. C.—Dr. Gold Stucker*) gives the formation of two words '**लिपिकर**', **लिबिकर** (3. 2. 21) in his grammar, and in his **धातुपाठ** writes 'लिख—अक्षर-विन्यासे,' 'अङ्क चिह्नकरणे' &c. Even written books [**ग्रन्थ**] were known in his time (1.3. 75 ; *IV*. 3. 87 ; *IV*. 3. 116.) Śākaṭāyana also gives the derivation of **लिपि** (U. 4. 120). *Dr. Auphret* and *Late Umeśa Candra Vidyāratna*, the redoubtable Vedic Scholar have **independently of each other** pointed out that the **अक्षर** in the RV (1. *Maṇḍala, Hymn CLXIV, Verses* 24 & 27) cannot

but mean, '*measuring speech*', '*syllable*' or '*letter*'. Again ṚV (X. 62. 7) makes mention of the number *EIGHT* thus "सहस्रम् मे ददतो अष्टकर्ण्य' i.e. "Give me a 1,000 cows on whose ears number *eight was written.*" Dr. Gold Stucker had already referred to the Indian practice of making marks on the ears of the cows to denote their relation to the others as mentioned by *PĀṆINI.* Vide 'कर्णे लक्षणस्याऽविष्टाऽष्ट-पञ्च..स्वस्तिकस्य' VI .3. 115 ; 'कर्णावर्ण-लक्षणात्' VI. 2. 112 ..चिह्न वाचक-शब्दात् परपद कर्णशब्दः आद्युदात्त भवति"—**Prabhā**. At another place in ṚV (X. 34) there is mention of a gambler lamenting his lot saying that "having *staked on one* (stamped on the dice) he had lost his wife" There is also mention of *written amount* ("अजैषम् त्वा संलिखित-मजैषमुत-संरुद्धम्") in Atharva Veda [VII. 50, (52), 5]. **वसिष्ठ-धर्मसूत्र** which originally belonged to ṚV school offers clear evidence of the use of writing in the Vedic period. It (XVI. 10 14-15) mentions **written amounts as legal evidence** and the 1st of these Sūtras is a quotation from an older work or from traditional lore. Besides, the Vedic works contain some *technical* terms, such as काण्ड (chapter), पटल, ग्रन्थ (book) etc. which have been quoted as evidence of writing. AV (VI. 141.) and मैत्रायणी संहिता (IV.2. 9) make mention of making मिथुन—marks on the ears. Later on this practice, was denounced (AV. XII. 4. 6) Besides rule like 'स्वरितेनाधिकारः'—(1. 3. 11) becomes meaningless without written words. With the discovery of writing in *Mohenjodaro*, Harappa, Hosangabad, Hyderabad-potteries, (belonging to the *Megalithic* (1500 B.C. and Neolithic (6000 B. C.—3000 B. C.) preserved in the *Madras Museum.*), these views are summarily dismissed. (Now read 211n. 1).

Text :—**प्रियंवदा—इमस्सिं सुओदर-सिणिद्धे णलिणी-पत्ते णहेहिं णिक्खित्त-वण्णं करेहि** (अस्मिन् शुकोदर-स्निग्धे' नलिनी-पत्रे नखैः निक्षिप्त—वर्णं' कुरु) ।

Priyaṁvadā—On this lotus-leaf charming[1] as a parrot's breast[1], have the letters[2] engraved[2] with (*your*) nails.

शकुन्तला (यथोक्तं रूपयित्वा)—**हला, सुणह दाणिं सङ्गदत्थं ण वेत्ति** (हला, शृणुतमिदानीं सङ्गतार्थं[1] न वेति) ।

Śakuntalā (*Gesticulating as described*)—Now, my friends, listen, if it is consistent[1] with sense[1] or not.

उभे—अवहिद म्ह [अवहिते स्वः] । Both—We are all heed.

शकुन्तला (वाचयति)—

उद्गाथा **तुज्झ ण आणे हिअअं मम उण मअणो दिवा वि रत्तिम्पि ।**
णिग्घिण तवइ बलीअं तुइ वुत्त-मणोरहाइं अङ्गाइं ॥१४॥

[तव न जाने हृदय मम पुनर्मदनो दिवापि रात्रावपि ।
निर्घृण[1] ! तपति बलीयस्त्वयि वृत्त-मनोरथाया[2] अङ्गानि] ।

Śakuntalā (*Reads out*)—O ruthless[1] one ! I know not your heart, but day and night Cupid exceedingly heats my limbs with my[2] yearning centered[2] on you. (14)

V. L.—'स्निग्धे'—P. 'सुकुमारे'—R. B. V. M. S. 'निक्षिप्तवर्णं कुरु'—R. V. M. S. 'आलिख्यताम्'—B. 'रात्रावपि'—R. V. 'रात्रिमपि'—B. M. 'मदनः'—B.HS. 'कामः'—R. V. M. 'मनोरथायाः'—B. C. V. M. '०मनोरथानि'—R. 'अभिमुखमनोरथ हृदयं'—S.

प्रियंवदेति । 'शुकस्य उदरम् इव स्निग्धं' मनोरमं ('वा द्रुह-मुह-ष्णुह-ष्णिहाम्'–(८।२।३३), पक्षे **स्नीढम्**) तादृशे 'अस्मिन् नलिनीपत्रे' पद्मपर्णे 'नखैः' कररुहैः ['अविद्यमानं 'खं' त्वगाख्यम् इन्द्रियम् यत्र तत् नखम् । 'नभ्राण्-नपाद्-नवेदा–(३।३।७५) इति नञ्—शब्दस्य न नकार-लोपः] । 'निक्षिप्ताः' 'न्यस्ताः वर्णाः' अक्षराणि यस्य तादृशम् अर्थात् नख-विलिखिताक्षरम् । **तवेति** । 'निरस्ता घृणाः' दया यस्य स तत्सम्बोधने हे 'निर्घृण' निर्दय [**'घृणा जुगुप्सा-कृपयोः'** इति विश्वः । 'षिद् भिदादिभ्यः अङ्'–(३।३।१०४)इति 'घृणोतेः अङ्'] 'तव **हृदयं**' सानुरागं न वेति 'न जाने' 'त्वयि' विषये 'वृत्तः' सञ्जातः 'मनोरथः' अभिलाषः यस्याः तादृश्या 'मम' पुनः 'मदनः' कामः 'दिवा अपि' दिवसे च (**'दिवा-शब्दोऽधिकरण-वचन' इति वामनः**) 'रात्रौ अपि' यामिन्यां च (अत्र **'दिवा 'रात्रौ** च **अधिकरण-द्योतकमव्ययम्** । तथाचोक्त मव्यय-प्रकरणे—**'दिवा दिवसे । रात्रौ निशि'**—इति बालमनोरमा-तत्त्वबोधिनी-कारौ–४४७) सर्वाणि 'अङ्गानि' 'बलीयः' साति-

शयं (क्रियाविशेषणमेतत्) 'तपति' पीड़यति। अस्मादेव क्षत्रियेण त्वया राज्ञा मर्मतत्ताप-शान्तिरवश्यमेव करणीया इत्याशयः। (**अनुमानालङ्कारः**। **प्रत्यनीकालङ्कारश्च**। "प्रतिपक्ष-प्रतिकारा-शक्तौ तदीय-तिरस्कारः **प्रत्यनीकम्**" इति तल्लक्षणात्। अत्र **वज्राङ्गमुपक्षिप्तम्**—'प्रत्यक्ष-निष्ठुरम् **वज्रम्**' इति दर्पण-लक्षणात्। लेख-नामकं संध्यङ्गञ्चोपक्षिप्तम्—'विवक्षितार्थकलिता पत्रिका **लेख** उच्यते' इति। **उद्गाथा** वृत्तम्) ॥१४॥

100n.—1. शुकोदर-स्निग्धे—Charming as parrot's breast. M explains **'शुकोदर'** as leaf of Tāliśa Tree. Cf. 'शुकोदर-श्याममिदं'—*Vik. IV*.17. **न जाने** &c.—This simple stanza is quite befitting Śak. who is brought up in a penance-grove. **2. दिवा** &c.—Day and night I am agonised by Cupid, but I don't know whether you are also so tormented. In case you are in my condition, please come to me at once. **दिवा**, (अव्यय-when uncompounded) **always** signifies **Locative**. Cf. 'दिवा दिवसे'—T. & BM. 'दिवा अह्नीति'—A ; 'अह्नि दिवसे, इतिना अधिकरणार्था-प्रधानतां दर्शयति'—BhD. "**दिवा (अह्नि)** प्राणिनः चेष्टावतः करोति यः सः दिवाकरः."—**Prabhā** on 3. 2. 71 ; **'दिवा' 'दिवसे'** करः रश्मिः **अस्य** इत्यमरटीकायां रघुनाथः।' For the sake of conformity **'रात्रौ'** may also be taken as **अधिकरण-प्रतिरूपकम् अव्ययम्** (Com). **3. निर्घृण—**घृणा=दया, hence the propriety of the word. The duty of a Kṣatriya, (*also of a king*) is to protect one from danger. 'क्षतात् किल त्रायते इत्युदग्रः क्षत्रस्य शब्दः भुवनेषु रूढः'—*Ra. II.* 53, but Cupid is doing injury to me, still you, a क्षत्रिय,, are not coming to protect me. 'आपन्नस्य विषय-निवासिनो जनस्य आर्तिहरेण राज्ञा भवितव्यम् इति एष वो धर्मः'—*Act. III. Infra.* For a similar idea read *NC. IX.* 143. Also 'घृणा ते नास्ति **निर्घृण**'—*Rām. I.* 81. 19. **'निर्घृण,** किमिदम् अकृत्यमनुष्ठितम्'—*Kād. p.* 618 ; PN. IV. 5. **4** For a similar idea Cf. 'स्वामिन्, संभाविता यथाहं त्वयाऽज्ञाता। तथानुरक्तस्य यदि नाम तवोपरि॥ ननु मम ललित-पारिजातशयनीये भवन्ति सुखा नन्दन-वनवाता अप्यत्युष्णकाः शरीरके'—*Vik. II.* 12 ; 13. **तपति—**"**तपत्यादित्यवत्** धाम्ना **तप्यते** यः परन्तपः। **तपते** रिपुराष्ट्रं यः **तापयति** अहितं सताम्"—*KR*. 29.

Remark—In **उद्गाथा** (or **(गीति)** metre, in the first half, as well as in the second, there should be in each, thirty मात्राs and altogether there are sixty मात्राs in the complete stanza. (*Appendix*).

Text :—**राजा** (सहसोपसृत्य)—

आर्या [12, 18 12, 15] **तपति तनुगात्रि ! मदनस्त्वामनिशं[1] मां पुनर्दहत्येव ।**
ग्लपयति[2] यथा शशाङ्कं न तथा हि कुमुद्वतीं दिवसः ॥१५॥

King (*Suddenly coming forward*)—O slender-limbed one ! Cupid does but warm you ; but, in sooth, he consumes me incessantly.[1] The day, indeed does not so cause the water-lily to fade[2] as it does the hare-specked (*moon*). (15)

सख्यौ (विलोक्य सहर्षमुत्थाय)—**साअदं अविलम्बिणो मणोरहस्स** (स्वागतमविलम्बिनो मनोरथस्य) । (शकुन्तला अभ्युत्थातुमिच्छति) ।

Friends (*Looking at him and rising joyfully*)—Welcome to our scarce-lingering desires ! (*Śakuntalā desires to rise.*)

V. L.—'विलोक्य सहर्षमुत्थाय'—B. M. S ; 'सहर्षम्'—R. V.

तपतीति । हे 'तनुगात्रि' क्षीणाङ्गि शकुन्तले (पक्षे 'तनुगात्रे'–५११) 'मदनः, कामः 'अनिशं निरन्तरं 'त्वां तपति' केवलं तापप्रदो भवति (इत्येतत् कृशाङ्गत्वं प्रति हेतुः । अतः **काव्यलिङ्गम्**) 'मां' कठिन-शरीरं पुरुषं पुनः (पुनश्शब्दो विशेष-द्योतकः) । विशेषमाह—'दहत्येव' भस्मीकरोत्येव ('पुनरितिपदेन स्वस्य तापा-तिशयो द्योत्यते, अतः त्वदपेक्षया अहमेव अधिकं क्लिष्ट इत्याशयः) 'हि' तथाहि 'दिवसः यथा' यादृक् 'शशाङ्कं' चन्द्रं 'ग्लपयति' ग्लानिम् आपादयति, मलिनीकरोति 'कुमुद्वतीं' कुमुदिनीं 'नहि तथा' तादृक् ग्लपयति इति शेषः । (शकुन्तला-कुमुद्वत्योः दिवस-मदनयोः शशाङ्क-दुष्यन्तयोश्च बिम्ब-प्रतिबिम्ब-भावाक्षेपात् **दृष्टान्ता-लङ्कारः** । **'तपति', 'दहती'—त्यनेक-क्रिययोः** 'मदन' इत्येक-कर्तृकारकत्वात् **दीपकम्** । शशाङ्क-कुमुद्वत्योः नायक-नायिका-व्यवहार-समारोपात् **समासोक्तिः** । 'ग्लपयति' इत्येकया क्रियया शशाङ्क-कुमुद्वत्योः कर्मत्वेन अभिसम्बन्धात् **तुल्ययोगिता** च । **अनुप्रासश्च** । तनुगात्रीति **पुनरुक्तवदाभासः** । मदयति आह्लादयति इति मदनः हर्षदः । स कथं तपति दहतीति **विरोधाभासश्च** । **आर्या** जातिः) ॥१५॥

सख्याविति । 'अविलम्बिनः' नाम-ग्रहण-मात्रे एव उपस्थितस्य 'मनोरथस्य'मनोरथ-विषयी-भूतस्य अभिमतजनस्य भवतः । 'स्वागतं' शोभनमागतमस्तु इति शेषः ।

101n.—1. तनुत्राणि—Optionally **'तनुगात्रे'** ['अङ्ग-गात्र-कण्ठेभ्यो वक्तव्यम्—*Vārt*. 511.]. **2. ग्लपयति**—Cause to fade ; ग्लै (हर्षक्षये)+णिच्+लट्+ति [ग्लै=ग्ला,—'आदेच उपदेशे, अशिति'—(6. 1. 45). । **'पुक्'** by 'अर्ति-ह्री-व्ली-री-क्नुयी-क्षाय्यातां पुक् णौ'—(7. 3. 36)], hence 'ग्लापयति'। Optionally 'ग्लपयति' (*when not preceded by any* उपसर्ग) by 'मितां ह्रस्वः',—(6. 4. 92). Ku. III. 49. **3. कुमुद्वतीं**—कुमुद+मत्वर्थे ड्मतुप् स्त्रियाम् ['कुमुद-नड-वेतसेभ्यो ड्मतुप्' (4. 2. 87.)]=कुमुद्वती । ('म' ='व' by ['झयः'–8. 2. 9.]. Next 'अ' of 'कुमुद' is elided by 'टेः' (6. 4. 143) as the प्रत्यय is **डित्**। **4. मनोरथस्य**—The friends consider the king as the desire of Śak. incarnate. शेषे षष्ठी ; Of the 16 उपचारs, **स्वागतम्** is one—'आसनं' **स्वागतं** पाद्यमर्घ्यमाचमनीयकम् । मधुपर्का-चमस्नान-वसनाभरणानि च । गन्धपुष्पे धूप-दीपौ नैवेद्य वन्दनं तथा । प्रयोजयेदर्चनायमुपचारांस्तु **षोडश** ॥" Cf. "महाराजोपचारः"–Vik.IV. (129*n*. 2). **5. Contrast** the foregoing *simple* and *natural* speech of Śak. (*Śl*. 14) with that (*Śl*. 15) of the king *having a tint of artificiality*. *Also Vik. II*. 16.

Text :—राजा—अलमलमायासेन—

आर्या [12, 18 12, 15]

सन्दष्ट-कुसुम-शयनान्या[1]शु-विमर्दित-मृणाल-वलयानि[2] ।
गुरु-परितापानि[3] न ते गात्राण्युपचारम[4] र्हन्ति[5] ॥१६॥

King—Away with your effort.—

Your limbs, with[3] (*their*) excruciating pain[3], which[1] have just stuck to the couch of flowers[1] and have[2] crushed the bracelet of lotus-stalks,[2] are not meet[5] for formalities[4] (16)

अनसूया—इदो सिला-तले-क्क-देशं अलंकरेदु वअस्सो (इतः शिला-तलैक-देशम[6]लङ्करोतु वयस्यः) । (राजा उपविशति । शकुन्तला सलज्जा तिष्ठति) ।

Anasūyā—Deign, my friend, to adorn a part[6] of the stone-slab (*by sitting down*). (*The king sits down. Śakuntalā feels bashful*).

V. L.—'विमर्दितमृणालवलयानि'—B. 'विवर्णित॰'—C. 'क्लान्तबिस-भङ्ग-सुरभीणि'—R. V. M. S ; M. HS. & Dr read 'अनुगृह्णातु' for 'अलङ्करोतु'। 'सलज्जा'—R. V. M. S. 'सलज्जम्'—B ;

राजेति। 'अलम् अलम्' इति द्विरुक्तिः आदरातिशयं ध्वनयति । **सन्दष्टेति** 'गुरुः' महान् 'परितः' सर्वतः 'तापः' सतापः येषु तादृशानि, अतएव 'आशु' शीघ्रं

मन्दष्टं' सम्यक् लग्नं 'कुसुम-शयनं' पुष्पशय्या (अधिकरणे ल्युट्) येषु तादृशानि, विमर्दित' मर्घषित निष्पेषितम् इति यावत् 'मृणाल-वलय' यै तादृशानि' ते गात्राणि उपचारम्' माननीयाऽऽगन्तुक-जनस्य सम्मान-प्रदर्शनार्थं, शिष्टानुष्ठेयम् अभ्युत्थानादिकमित्यर्थः ('उपचारस्तु सेवायां व्यवहारो-पचर्ययोः' इति हैमः) 'न' अर्हन्ति', यतः गात्राणामुत्थापने कुसुम-शय्याऽपि अङ्ग-लग्ना उत्तिष्ठतीति भाव। (**काव्यलिङ्ग-परिकराऽनुप्रासाः। आर्या** जाति)। ॥१६॥

102n.—अलमलम्— *Cf.* 'आसनमासन, सचिवाय'—*Rat. IV.* **आयासेन**— करणे ३या। Don't say **अलं-योगेन ३या**, for there is no *such Sūtra* in Pāṇini's grammar. Read (29n. 3. & 250n. 2). **सन्दष्ट** &c.—Ordinarily 'सम+दंश्' means *to bite*, *sting*, and it is **transitive** Cf. 'सन्दष्टाधर-पल्लवा'–*AŚ.* 32 But Kāli. often uses it **intransitively** to mean '*clung*', '*stuck*' or '*adhered closely.*' For this intransitive use vide (121n. 3). Cf. 'भूयिष्ठसदष्टशिखं कपोले'—*Ra. XVI.* 48. 'संदष्ट-वस्त्रेषु अबलानितम्बेषु'—*XVI.* 65, 'सन्दष्ट-सर्पत्वचा' -*Śak. VII.* 11. **2. उपचारम्**—Formalities of reception such as speaking words of welcome, customary obeisance', &c.—(101n. 4). Cf. 'अस्खलितोपचारम्'—*Ra. V.* 20. 'ततश्चोपचारानन्तरम् एकासनोपविष्टेन'—*Māla. I.* 'उपचाराञ्जलि'—*Ra. III.* 11. 'रामभद्र, इत्येव मां प्रत्युपचार'—*UC. I.* For somewhat similar idea, Cf. "Brutus—Portia, what mean you ? **Wherefore rise you ? it is not for your health** thus to commit. Your weak **condition** to the raw cold morning"—**Julius Caesar,** *II.* 1. **3. 'वयस्य:'** —Mark the **new address** of Anasūyā She seems to *be sure* of king's **marrying** Śak. On a similar instance चित्रलेखा addressed the **king पुरूरवाः as 'वयस्य'**। Cf. "वयस्य, निरुत्तरैषा। साम्प्रतं मम विज्ञाप्यं श्रूयताम्"- *Vik III*

Text :—**प्रियंवदा—दुवेणम्पि वो अण्णोण्णाणुराओ पच्चक्खो। सही-सिणेहो उण मं पुणरुत्तवादिणीं करेदि** (द्वयोरपि युवयो अन्योऽन्यानुराग[1] प्रत्यक्ष। सखी-स्नेहः पुन मां पुनरुक्त-वादिनी[2] करोति)।

Priyaṁvadā—Your mutual[1] love[1] is perceptible to both of you Still affection for (*my*) friend eggs me to speak something

राजा—भद्रे, नैतत् परिहार्यम्[1]। विवक्षितं[2] हि अनुक्तमनुतापं जनयति।

King—Good lady, this should not be suppressed.[3] For what[4] is intended to be spoken[4], if not spoken, causes remorse.

प्रियंवदा—आवण्णस्स विसअ-णिवासिणो जणस्स अत्ति-हरेण रण्णा होदव्वंत्ति एसो वो धम्मो (आपन्नस्य[5] विषय-निवासिनो जनस्यार्त्ति-हरेण[6] राज्ञा भवितव्यमित्येष युष्माकं धर्मः)।

Priyaṁvadā—Your (*special*) royal office consists in[6] the removal of the misery[6] of the distressed people living in your dominion.

राजा—नास्मात् परम्। King—None higher than this.

प्रियंवदा—तेण हि इअं णो पिअसही तुमं उद्दिसिअ इमं अवत्थन्तरं भअवदा मअणेण आरोविदा। ता अरुहसि अब्भुववत्तीए जीविदं से अवलम्बिदुं (तेन हि इयमावयोः प्रियसखी त्वामुद्दिश्य इदमवस्थान्तरं भगवता मदनेन आरोपिता। तदर्हसि अभ्युपपत्त्या[7] जीवितमस्या अवलम्बितुम्[8])।

Priyaṁvadā—And so, this our dear friend, on your account. has been reduced to this (*changed*) plight by the almighty Cupid. Therefore you ought to sustain[8] her life by (*showing*) favour[7].

राजा—भद्रे, साधारणोऽयं[9] प्रणयः[10]। सर्वथा अनुगृहीतोऽस्मि।

King—Good lady, common[9] to us both is this suit.[10]. I feel favoured (*by you*) in every way.

प्रियंवदेति। 'युवयोः अन्यस्मिन् अन्यस्मिन् यः 'अनुरागः' प्रेम सः 'द्वयोरपि प्रत्यक्षः' युवाम् उभावपि परस्परानुरागं जानीथ इत्याशयः। 'पुनरुक्त-वादिनीम्' निरर्थक-भाषिणीम्। उदितस्यार्थस्य पुनर्वचनं यथा मुधैव तथा प्रत्यक्षीभूतस्यार्थस्य वाक्येन प्रकाशः नूनं निरर्थकः। तथापि शकुन्तलायाः प्रेम्णा मयेदमुच्यते इत्याशयः। **प्रियंवदेति।** 'विषये' जनपदे स्वराष्ट्रे इति यावत् ('**विषयः** गोचरे देशे तथा **जनपदे**ऽपि च' इति मेदिनी) 'निवसति' यः तस्य 'विषय-निवासिनः' निज-देश-स्थितस्य जनस्य 'आपन्नस्य' विपद्युक्तस्य ('**आपन्नः सविपत्तौ** स्यात् प्राप्तेऽपि च वाच्यलिङ्गक' इति विश्व-मेदिन्यौ) 'जनस्य आर्ति-हरेण' पीड़ा-विनाशकेन [**आर्तिं पीड़ां** हरति, ('हरतेः अनुद्यमने अच्'–३।२।९ इति अच्। **अण् प्रत्ययस्य बाधा**)।—'आर्तिः पीड़ा धनुष्कोष्टयोः' इत्यमरः]। **राजेति।** 'अस्मात्' आपन्नस्य आर्ति-हरणात् 'परं' प्रशस्यतरम् अन्यत् कृत्यं नास्ति। **प्रियंवदेति।** 'तेन हि' यतः आपद्भ्यः प्रजापालनम् एव राज्ञः धर्मः, 'भगवता' महा-शक्ति-शालिना 'मदनेन'। 'त्वाम् उद्दिश्य' त्वदर्थम् 'अवस्थान्तरम्' ह्री-त्याग-लक्षणं

विकार-विशेषम् 'आरोपिता' प्रापिता। 'तत्' तस्मात् हेतोः 'अभ्युपपत्त्याः' अनुग्रहेण ('अभ्युपपत्तिरनुग्रहः' इत्यमरः)। 'जीवितम्' जीवनम् (भावे क्तः) 'अविलम्बितु' रक्षितुम्। अन्यथा अचिरेणैव अन्त्य-दशा-सम्भव इत्याशयः। तथाचोक्तम् वात्स्यायनेन 'ह्रीत्या-गोन्माद-मूर्च्छान्ता इत्यनङ्ग-दशा दश" इति। **राजेति।** 'साधारणः' उभयोरपि समानः ('साधारणः समानश्च' इत्यमरः) 'प्रणयः' याच्ञा ('प्रणयः स्यात् परिचये याच्ञायां सौहृदेऽपि च" इत्यमरः) तव सखी ममानुग्रहं प्रार्थयते तथा मयापि स्वजीवनं रक्षितु तस्या अनुग्रहः प्रार्थ्यते इत्याशयः।

103n.—1. अन्योऽन्य &c—अन्यस्मिन् अन्यस्मिन् अनुरागः इति व्यतिहारात् द्वित्वम्—*Rām. VI.* 44. 2; 51. 6; (48*n* 9). **प्रत्यक्षः**—(1n. 5) **2. पुनरुक्त-वादिनौ**—पुनरुक्त means '*Excess*' (अधिक), hence *superfluous*. Cf. 'शशंस वाचा पुनरुक्त एव'—*Ra. II.* 78 & *V.* 34. '**पुनरुक्त-सान्द्राः**' —*ŚPB. XI.* 64. 'अभिव्यक्तायां चन्द्रिकायां किं दीपिका **पौनरुक्त्येन**'—*Vik. III*; 'मुक्तावली-विरचनम् **पुनरुक्तमस्याः**'——*Ibid. V.* 15. The idea is—You know full well that Śak. loves you, and Śak. also knows that you love her. Hence anything said by a third person will be in excess; i.e. superfluous. Compare this with the speech of Gautamī—'**एकैकस्य च चरिते भणतु, किमेक एकस्मिन्**'—*Śak. V.* 16. **विवक्षितम्** &c.—(92*n*. 2.). **आपन्नस्य** (Distressed) &c.—'आपन्नाऽऽर्ति-प्रशमन-फलाः संपदो ह्युत्तमानाम्'—PA & MD. 54. 'लोकं विधात्रा विहितस्य गोप्तु'–Ki. III. 41. **3. नास्मात्**–५मी in connection with परम् (=अधिकम्) Vide (238*n*. 2). Cf. 'मत्तः परतरं नास्ति'—*Gitā. VII.* 7; 13; *III.* 43. **4. भगवता**—Is significant. It suggests the omnipotence of Cupid and hence the necessity of protection for poor Śak. भग+मत्वर्थे मतुप्=भगवान्। तेन। 'म'=व' by 'मादुपधायाश्च मतोर्व अ-यवादिभ्यः' (8. 2. 9.). 'ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रिय.। ज्ञान-वैराग्ययोश्चैव षण्णां भग इतीङ्गना—*VP.* (119*n*. 2.). **5. अवस्थान्तरम्**—अवस्थीयते—अव+स्था+ अङ् भावे=अवस्था। 'अङ्' by 'आतश्चोपसर्गे—(3. 3. 106); as 'स्था' is **आकारान्त** and also preceded by an **उपसर्ग।** But 'स्था' is to take 'क्तिन्' in भाववाच्य by the **special rule** "स्था-गा-पा-पचो भावे"— (3. 3. 95). Still 'अङ्' is justified, as *Pāṇini himself* uses as such in 'पूर्व-परा-वर-दक्षिणोत्तरा-परा-धराणि व्यवस्थायाम् असंज्ञायाम्"– (1. 1. 34).

Read "कथम्" 'आस्था' इति ॥ 'व्यवस्थायाम्' इति ज्ञापकात्'—(BD. 218). 'अवपूर्वात् तिष्ठतेः अङ् । 'व्यवस्थायाम्' इति ज्ञापकात्'–BhD. आ+रुह्+णिच्+क्त कर्मणि=आरोहिता–(Reduced to) or 'आरोपिता' by 'रुहः पोऽन्यतरस्याम्' —(7. 3. 43). **6. साधारण:**—Common, applicable to both of us. आधारणेन सह वर्तमानः इति साधारणः । सह=स by 'वोपसर्जनस्य' (6. 3. 82). Next स्वार्थे अञ् by 'आग्नीध्रसारणादञ्'–(Vārt. 5. 4. 25)–BhD. T, however, proceeds as follows—'समानं' धारणम् अस्याः साधारणी । अनेकं प्रति अविशिष्टसंबन्धो भूम्यादिः । पृषोदरादित्वात् समानस्य स-भावः । विभाषा-प्रकरणात् अञभावे टाप् साधारणा भूमि' ॥–T. 2093. *Cf.* 'साधारणो-भूषणभूष्यभावः'—*Ku. I.* 42. 'साधारणोऽयमुभयोः प्रणयः'—*Vik. II.* 16; 'सा साधु-साधारण-पार्थिवर्धेः'—*Ra. XVI.* 5.

Text—**शकुन्तला** (प्रियंवदामवलोक्य)—**हला, किं अन्तेउर-विरहपज्जुस्सुअस्स राएसिणो उवरोहेण** (हला, किमन्तःपुरः-विरह-पर्युत्सुकस्य[1] राजर्षे-रुपरोधेन) ।

Śakuntalā (*Looking at Priyaṃvadā*)—Friend, why do you press[2] the royal sage who[1] is pining away in separation from the ladies of the seraglio[1].

राजा—इदमनन्य-परायण[1]मन्यथा[2] हृदय-सन्निहिते[3] ! हृदयं मम ।

द्रुतविलम्बित (नभभर) **यदि समर्थयसे मदिरेक्षणे[4] ! मदन-बाण-हतोऽस्मि हतः पुनः ॥१७॥**

King—O you[4] with bewitching eyes[4] and [3]ever-residing in my heart,[3] if you judge this heart of mine which[1] is devoted to none else[1], as otherwise[2], then being (*already*) slain by Love's shaft, I am slain once again. (17)

अनसूया—वअस्स, बहु-वल्लहा राआणो सुणीअन्ति । जह णो पिअसही बन्धु-अण-सोअणिज्जा ण होइ तह णिव्वाहेहि (वयस्य, बहु-वल्लभा[5] राजानः श्रूयन्ते । यथा आवयोः प्रियसखी बन्धु-जन-शोचनीया[6] न भवति तथा निर्वाहय[7]) ।

Anasūyā—Friend, many-wived[5] are the kings, we hear Please so arrange[7] that our dear friend is not to be bewailed[6] by her relatives.[6]

V. L.—'प्रियंवदाम्'—R. V. M. S. 'अनसूयाम्'—B. 'किम् अन्तःपुर'—R. V. M. 'अलं तेऽन्तःपुर.'–S ; M reads 'सुन्दरि' before Śl. 16. 'हतोस्मि' R. V. M. S. "हतोऽपि'—B. 'निर्वाहय'—V. M. 'निर्वर्तय'—R. 'निर्वह'—S.

शकुन्तलेति। 'अन्तःपुराणां' (५।४।७४) लक्षणया तत्रस्थ-राजदाराणां 'विर-हेण पर्युत्सुकः' उत्कण्ठितः तस्य 'राजर्षेः उपरोधेन' अवरोधेन, राजर्षिम् अनुरुध्य इत्यर्थः। 'किं' प्रयोजनं साध्यते ('सति विशेष्ये वाधे विशेषणमुपसंक्रामति' इति न्यायात् उपरोधः वारणीय इति हृदयम्)। राजा तु तदसहमानो वक्ष्यमाण-श्लोकमुवाच। **इदमिति।** 'मदिरा' मत्त-खञ्जनः (इति शब्दरत्नावली) तस्या ईक्षणे इव 'ईक्षणे' नयने यस्याः तत्सम्बुद्धौ, हे चञ्चल-नयने (अनेन परम-सुन्दरतया त्वयि एव नितराम् आसक्तिः इति द्योत्यते) 'हृदये' ममान्तःकरणे 'सम्यक् निहिता' स्थिता तत्सम्बुद्धौ, हे मम मानस-विहारिणि! यो यस्य सन्नि-हितः स तस्य तत्त्वं जानाति। त्वं मम हृदयस्य सन्निहिता। अतः तादृशी सत्यपि यदि इदम् न 'अन्या' नारी 'परायणम्' आसङ्गोऽनुरागः यस्य तथाविधं-("सर्वनाम्नः वृत्तिमात्रे पुवद्भावः"—(७२८),—"साकल्यासङ्ग-वचने पारायण-परायणे" इत्यमरः) केवलं त्वयि शकुन्तलायाम्, आसक्तम् इति भावः। "मम हृदयम् अन्यथा" अन्यप्रकारेण अन्तःपुर-विरहोत्कण्ठितत्वेन यदि 'समर्थयसे' कल्प-यसि, तदा "मदन-वाणेन हतः" विद्ध स्सन् ('अस्मि' अहं) 'पुनः हतः' मारितः विरुद्ध-मनःप्रवृत्तिर्जातः इत्यर्थः ("मनोहतः प्रतिहतः प्रतिबद्धो हतश्च सः" इत्यमरः) अतः पिष्ट-पेषण मनुचितम् इति भावः। (अत्र अनन्य-परायणत्वं प्रति हृदयसन्निहिते इति पदस्यार्थः हेतुरिति पदार्थहेतुकं **काव्यलिङ्गम्**। हृदय हृदयेति, हतो हत इति **लाटानुप्रासः।** **द्रुतविलम्बितं** वृत्तम्। अनेन '**साम**' इति सन्ध्यन्तराङ्गमुप-क्षिप्तम्। तल्लक्षणं तु—"तत्र **साम** प्रिय वाक्य सानुवृत्तिप्रकाशकम्" इति) ॥१७॥ **अनसूयति।** 'बहवः वल्लभाः' पत्न्यः येषां तादृशाः ("प्रेयसी दयिता कान्ता प्राणेशा वल्लभा प्रिया। हृदयेशा प्राणसमा प्रेष्ठा प्रणयिनी च सा" इति हेमचन्द्रः) यद्वा 'बहूनां' स्त्रीणां 'बल्लभाः' प्रियाः इति वा विग्रहः। तेन सर्वासु पत्नीषु तुल्या प्रीतिः न स्यात् अत उच्यते 'यथा' येन प्रकारेण 'आवयोः प्रियसखी' शकुन्तला 'वन्धु-जनानां' अस्मदादीनां 'शोचनीया' अस्या एव दारुण-दुःखश्रवणे शोकविषया 'न भवति तथा' तेन प्रकारेण 'निर्वाहय' कुरु।

104n.—1. उपरोधेन—उपरोध—*Disturbance, trouble.* Cf. "तपोवन-निवासिनाम् **उपरोधः** मा भूत्'—*Śak. I.* "अनुग्रहः खल्वेष **नोपरोधः**"—*Vik. III*; hence here it means '*to trouble by undue request*'. Why do you make an undue request and put him into trouble? **2. अनन्य &c.**—परा अयते अस्मिन् इति **परा+अय+ल्युट् अधिकरणे**=**परायणम्**; "**आश्रये**

तत्पराभीष्टे परायण-पदं विदुः" इति शाश्वतः—Last resort. (न=ण) by 'कृत्य् अचः'—(8.4.29), or **पर + अयन = परायण** । 'णत्वम्' by 'पूर्वपदात् संज्ञायामगः' (8. 3. 3). 3. **हृदय-सन्निहिते**—You are well or firmly (सत्) placed (निहित) in my mind and hence in a better position to know correctly what is going in my heart. 4. **समर्थयसे**—Think, regard. Cf. 'समर्थये यत् प्रथमं प्रियां प्रति'—*Vik. IV.* 39. 'अनुपयुक्तमिवात्मानं **समर्थये**'—*Śak. VII.* 5. **मदिरेक्षणे**—मदिरा = मत्तखञ्जन = (Com.), ईक्ष्+ ल्युट् करणे = ईक्षणे—Two eyes ; 'मदिरायाः' मत्त-खञ्जनस्य ईक्षणे = मदिरेक्षणे (६या तत्) ; मदिरेक्षणे इव ईक्षणे यस्याः = मदिरेक्षणे (बहुव्रीहि) by the Vārt. 'सप्तम्युपमान-पूर्वपदस्य **उत्तरपदलोपश्च** वक्तव्यः'—(2. 2. 24), on which *Patañjali* remarks 'सप्तमीपूर्वस्य उपमानपूर्वस्य च बहुव्रीहिर्वक्तव्यः, **उत्तरपदस्य** च लोपः वक्तव्यः' । Hence the उत्तरपद (3n.–3) 'ईक्षणे of the first समास *i.e.* (मदिरेक्षणे) is dropped. (Or, say), माद्यति आभ्याम् इति मदि (हर्षे) + किरच् [उ–51] = मदिरे, (मदिरे = मादयितृणी—*bewitching*) ईक्षणे यस्याः सा । Or, मदिरा is wine, (Madeira-wine—"मदिरा कश्यमद्ये"—A) which is extremely sparkling. In dramas, however, मदिरा has a **technical meaning**—"आघूर्णमानमध्या या क्षामा चाञ्चित-तारका । दृष्टिर्विकसितापाङ्गा **मदिरा** तरुणे मदे"—*Bharata qtd. R.* "सौष्ठवेनाऽपरित्यक्ता स्मेरापाङ्ग-मनोहरा । वेपमानाऽन्तरा दृष्टिर्मदिरा परिकीर्तिता" ॥ सङ्गीत-कलिका ॥—*qtd. Hemādri on Ra. VIII.* 68 ; Also 'ईषत्-कम्पित-पक्ष्माग्रा विवृत्तपटु-लोचना । दृष्टि विकसिताऽपाङ्गा **मदिराक्षिकणे** मदे ॥ *Cf. Vik. IV.* 22 ; 'मदिरलोचना'—*Rām. V.* 18. 18 ; 'त्वं मदिरेक्षणे'—*V.* 24. 35 ; *V.* 17. 41. 6. **हतोऽस्मि हतः**—I was already killed by cupid's shaft and this your unkind remark kills me again a second time. Cf. 'हतमपि निहन्ति एव मदनः'—*VŚ.* 63. 7. "दग्ध्वा पुनरपि दग्धो नूनमनङ्गो हरेण, त्वां तन्वीम् । दृष्ट्वापि येन तिष्ठसि निराकुलः स्वस्थ-वृत्तेन"—KM. 1041. **बहु-वल्लभा राजानः** &c.—An instance of अप्रस्तुतप्रशंसा । Anasūyā **indirectly** says that Duşyanta has many wives. Cf. 'प्रायेण धनिनां दारा बहवः'—*KS. II.* 4. 56. **बन्धुजन**—'जन' here has collective sense. 8. **तथा निर्वाहय**—(Perform, accomplish) —Cf. the request of **चित्रलेखा** on behalf of 'उर्वशी—'तद्यथेयं मे प्रियसखी स्वर्गस्य नोत्कण्ठते तथा वयस्येन कर्तव्यम्'—*Vik. III.* **निर्वर्तय** (R)—

also means the same thing. Cf. 'विवाहदीक्षां निर्वर्तय'—Ra. III. 33 ; Ku. *VII*. 11; KA. 297.

Text :—**राजा—भद्रे ! किं बहुना,—**

श्लोक **परिग्रह-बहुत्वेऽपि[1] द्वे प्रतिष्ठे[2] कुलस्य मे ।**
समुद्र-रसना[3] चोर्वी सखी च युवयोरियम् ॥१८॥

King—Good lady, why (*say*) much ? Despite[1] the multitudes of wives[1], two (*only are*) the main prop[2] (*or glory*) of my line—the earth[3] girded with oceans[3], and this friend of yours. (18)

उभे—णिव्वुदम्ह (निर्वृते स्वः) । (शकुन्तला हर्षं सूचयति) ।

Both—We are satisfied. (*Śakuntalā shows joy*).

प्रियंवदा (सदृष्टिक्षेपम्)—**अणसूए ! जह एसो इदो दिण्णदिट्ठी उस्सुओ मिअ-पोदओ णूणं मादरं अण्णेसदि । एहि, संजोएम णं** [अनसूये ! यथा एष इतो दत्तदृष्टिः उत्सुको मृगपोतको[4] नूनं मातरम् अन्विष्यति । एहि, संयोजयाव एनम्) । (उभे प्रस्थिते) ।

Priyaṁvadā—(*Casting about a glance*) Anasūyā ! there the little[4] fawn[4] anxiously casting (its) eyes hitherward, is certainly seeking its dam. Come, let us make it meet (*her*). (*Both start*).

V. L.—'०रसना'—Dr. P.B. M.HS. '०वसना'—R.V.S. '०रशना'—Ś.

परिग्रहेति । 'परिग्रहाणां' कलत्राणां ('**परिग्रहः कलत्रे च** मूलस्वीकारयोरपि'-**इत्यजयः**) । '**बहुत्वेऽपि**' आधिक्येऽपि, बहुषु पत्नीषु सतीषु अपि इत्यर्थः । '**द्वे मे कुलस्य**' वंशस्य 'प्रतिष्ठे' स्थितिहेतू गौरवहेतू वा ('**प्रतिष्ठा गौरवे स्थितौ**' इति **हैमः**) । **के च** ते द्वे इत्यत आह—'समुद्रः' उदधिः 'रसना' काञ्ची मेखला इति यावत् यस्याः तादृशी 'उर्वी 'च' पृथिवी च ('सर्वंसहा वसुमती वसुधोर्वी वसुन्धरा' **इत्यमरः**) 'युवयोः इयं सखी' शकुन्तला । 'च' इति (समुच्चये । अत्र उर्वीति लिङ्गसाम्येन, उर्व्यां च स्त्री-व्यवहार-समारोपात् **समासोक्तिः । दीपकानुप्रासौ ।** अत्र '**दाक्षिण्यं**' नाम नाटच-लक्षणञ्च उक्तम् । "**दाक्षिण्यं चेष्टया** वाचा परचित्ता-नुवर्तनम्" इति दर्पणलक्षणात् । **श्लोकवृत्तम्**) ॥१९॥ **उभे इति ।** 'निर्वृते' आनन्दिते स्वः' भवावः ['सख्यौ—(सहर्षं) स्वागतम्' इत्यादिना एतदन्तेन **प्रगमनं** नामाङ्गमुपक्षिप्तम् । तल्लक्षणं यथा दर्पणे—'**प्रगमनं** वाक्यंस्यादुत्तरोत्तरम्') । **प्रियंवदेति ।** 'सदृष्टि-क्षेपम्' इत्यनेन धूर्तायाः प्रियंवदायाः

निर्गमन-व्याजाऽन्वेषणं सूच्यते। 'यथा' इति अनुमान-द्योतकः **येन हेतुना इत्यर्थः** (**'यथा-शब्दस्तु** निर्दिष्टस्तुल्ययोगाऽनु**मानयोः**' इति विश्वः)। 'उत्सुकः' उत्कण्ठितः 'मृगपोतकः' हरिणशिशुः (**'पोतः शिशौ** वहित्रे च गृहस्थाने च वाससि' इति मेदिनी। अनुकम्पायां कः) 'संयोजयावः' मात्रा सह मिलितम् कुर्व (निर्गमन-व्याज-वचनमिदम्। अनेन **पर्यायोक्त**-नामकः अलङ्कार उक्तः। तल्लक्षणं यथा काव्यादर्शे— 'अर्थमिष्ट-मनाख्याय साक्षात् तस्यैव सिद्धये। यत् प्रकारान्तराख्यानं **पर्यायोक्तं** तदिष्यते') ॥ 'प्रस्थिते' प्रस्थातुमारब्धे ('आदिकर्मणि क्तः कर्तरि च'–३।४।७१)।

105n.—1. परिग्रह &c.—'परि' साकल्येन 'गृह्यते' स्वीक्रियते इति परि+ग्रह् + अप् कर्मणि ('ग्रह-वृ-दृ-निश्चि-गमश्च'–3.3.58] or 'अच् ('विभाषा ग्रहः' –3. 1. 143 ; 'पक्षे अच्''—*SK.*]=परिग्रहः=wife. Mark that the king owing to his exuberance of joy, considers Śak. as **already wedded** to him ; प्रति+स्था+अङ् अधिकरणे=**प्रतिष्ठा**—(षत्वम् *by* 6. 3. 65 ; 103*n*. 5)—Support, mainstay, glory. 'कुलस्य **प्रतिष्ठा** इत्यनेन शकुन्तलामेव पट्टमहिषी कृत्वा तज्जनित-पुत्रस्यैव साम्राज्यमपीति भावः'—Ś. Cf. '**कलत्रवन्तम् आत्मानम् अवरोधे महत्यपि।** तया मेने मनस्विन्या लक्ष्म्या च वसुधाधिपः' ॥—*Ra. I.* 32. **2. समुद्र-रसना**—रसना=काञ्ची,—(Ra. XVI. 65; XIX. 27)—a kind of ornament used by women round their waists. As the sea encircles the earth, hence secondarily the sea is called the 'रसना' (girdle) of the earth. [**'रशना** काञ्ची। जिह्वावाची तु दन्त्य–सकारवान्' —उ–242—BD.]. But 'काञ्ची-वाची**—तालव्य-शकारवान्**। जिह्वावाची तु **दन्त्य-सकारवान्** (BD) इत्येषा व्यवस्था **भूरि-प्रयोगाऽभिप्रायेण** उक्ता। वस्तुतस्तु तालव्य-शकारवान् रशना-शब्दोऽपि 'काञ्च्यां' जिह्वायां च, तथा दन्त्य-सकारवान् रसना-शब्दोऽपि **अर्थद्वये बोध्यः**'—T. Kings are often described as husbands of the sea-girt earth. Hence according to *H* 'सागर-**मेखला**' is a synonym of '**पृथिवी**'। Cf. 'रत्नाऽनुविद्धा**ऽर्णव-मेखलायाः** दिशः सपत्नी भव दक्षिणस्याः'—*Ra. VI.* 63. '**कृत**-सीता-परित्यागः **स रत्नाकर-मेखलाम्**'—Ra. *XV*. 1. '**वसुधयमवेक्ष्यतां त्वया** वसुमत्या हि नृपः कलत्रिणः'—Ra. *VIII*. 83. 'संप्रत्येव हि **साम्बुराशि-रसना** जाया जयोद्भूतये'—*Subhāṣitābali*. 'रत्नाकर-बेला-**मेखलायित-धरणी**' &c.—*DK*. 'ततः स रत्नाकर-**मेखला**मिलाम्' &c.—*Ibid*. 'पयो**निधि-मेखलायाम्'—**

PC. ('प्रस्तावना)। **'समुद्र-रसना** साक्षात् प्रादुरासीत् वसुन्धरा'—*Ra. XV*. 83 ; *R* reads **'वसना,'** This idea, though, not so **common** as the previous one, is not at all **rare**. *H* has **'सागराम्बरा'** as a synonym for 'पृथिवी' which *Kāli*. has used in *Ra*. Cf. 'निधानगर्भामिव **सागरा-म्बराम्**'—III. 19 ; **'सागराम्बरा'**—Rām. II. 97. 7. **"समुद्र-वस्त्रामपि** गाम्" —BC. XI. 12. 3. **सवृष्टिक्षेपम्**—Priyaṁvadā was seeking some opportunity to go away with Anasūyā (*Cf*. संयोजयाव:) thus providing the lovers with a free scope for conversation. Hence they went away with the pretext of uniting the dearling with its dam. Thus the **winking** of the eyes is full of meanings. This is **'पर्यायोक्त'** अलङ्कार—*Periphrasis*. Cf. 'दशत्यसौ परभृत: सहकारस्य मञ्जरीम्। तमहं वारयिष्यामि युवाभ्यां स्वैरमास्यताम्। सङ्गमय्य सखीं युना सङ्केते तद्गतोत्सवम्। **निर्वर्तयितुम्** इच्छन्त्या कयाप्यपसृतं तत:'—*KA*. 296-97. 'वकुलावलिके, एष बालाशोक-वृक्षस्य पल्लवानि अभिलङ्घयितुमागच्छति हरिण:। एहि निवारायव एनम्"—*Māla. IV*. 'निर्यात: शनकैरलीक-वचनो-पन्यासमालीजन:"—*AŚ*. (106*n*. 1) ; कुवलयानन्दकारिका—P. 63. 'यामो वय, न राजति विजनस्थित-मिथुन-सन्निधा-वपर:'—KM. 1051 ; 'न प्रेम नव्यं सहतेऽन्तरायम्'—Biddha-Śāla-Bhañjikā, X. 6 ; Also BrP. Gaṇapatikhāṇḍa. X. 60.

Text :—शकुन्तला—हला असरणम्हि। अण्णदरा वो आअच्छदु (हला अशरणा[1]ऽस्मि। अन्यतरा[2] युवयोरागछच्तु)। Śakuntalā—Friends, I am (*alone*) unprotected[1]. Do either[2] of you[2] come.

उभे (सस्मितम्)—**पुहवीए जो सरणं सो तुह समीवे वट्टइ** (पृथिव्या य: शरणं स तव समीपे वर्तते)। (निष्क्रान्ते)। Both (*Smiling*)—He who is the wolrd's help, is at your side. (*Exeunt ambo*).

शकुन्तला—कहं गदाओ एव्व (कथं गते एव)।

Śakuntalā—How now ! (*They are*) gone indeed !

राजा—सुन्दरि ! अलमावेगेन[2] नन्वयमाराधयिता[3] जनस्ते सखीभूमौ[4] वर्तते। तदुच्यताम्—

किं शीकरैः[4] क्लम-विनोदिभि[4]रार्द्र-वातं
वसन्ततिलका सञ्चालयामि[7] नलिनी-दल-तालवृन्तम्[8]।
(तभजजगग) अङ्के निधाय[9] करभोरु[10]! यथासुखं ते
संवाहयामि[11] चरणावुत पद्म-ताम्रौ ॥१०॥

King—O fair one! don't be distressed[2]. This person, the adorer[3] of thee, is indeed here (*to take*)[4] the place of your friends[4]. Then tell (*me*)—Shall I move[7] the fan[8] of lotus-leaf[8] whose breeze is cool with langour-removing[6] water-sprays[5], or O, ye with[10] tapering thighs[10]! shall I shampoo[11] your lotus-coppered feet soothingly placing them on (*my*) lap ? (19)

V. L.—'तव समीपे'–R.V.M.S. 'ते सखीभूमौ'–B.HS. 'शीकरैः'—B.HS. 'शीतलैः'—R. V. M. S. 'विनोदिभिः'—R. V. M. S. 'विमर्दिभिः'—B. Dr. 'वातं'—B. 'वातान्'—R.V.M.S./'सञ्चालयामि'—B.HS. 'सञ्चारयामि' —R. V. M. S. 'वृन्तम्'—B. HS ; 'वृन्तैः—R. V. M. S.

शकुन्तलेति। 'अशरणा' असहाया एकास्मीत्यर्थः। ('शरणं गृहरक्षित्रो र्वध-रक्षणयोरपि' इति मेदिनी)। 'युवयोः' इति निर्धारे षष्ठी। **राजेति**। 'आवेगेन' उद्वेगेन चिन्तया 'अलम्' ('गम्यमानापि क्रिया कारक-विभक्तौ प्रयोजिका' इति करणे वेया)। 'ननु' इत्यनुनये। 'अयं' मत्स्वरूपः 'आराधयिता' सेवकः 'सखीभूमौ' सखीस्थाने ('भूमिः क्षितौ स्थानमात्रे' इति हैमः)। अतः सखी-जनाऽसान्निध्येन संभ्रमो मा भूत् इत्यर्थ। **किमिति**। 'क्लमं' शरीर-सन्ताप 'विनोदयन्ति' विशेषेण नाशयन्ति ये तैः 'क्लम-विनोदिभिः' खेदापहारकैः 'शीकरैः' अम्बु-कणैः ('शीकरः अम्बु-कणाः स्मृता' इत्यमरः) 'आर्द्राः सजलाः 'वाताः' यस्य तादृशं, 'नलिन्याः' (नलिनं पद्मं विद्यते यस्याः सा नलिनी), तस्याः 'दलं' पद्मपत्रम् ('पत्रं पलाशं छदनं दलं पर्णं, छदः पुमान्' इत्यमरः) 'एव तालवृन्तम्' व्यजनं ('व्यजनं' तालवृन्तकम्' इत्यमरः। नलिनी-पदेन सौगन्ध्यं सूचितम्)। तत् 'सञ्चालयामि' आन्दोलयामि 'किम्' इति प्रश्ने। 'उत' इति विकल्पे ('उत प्रश्ने वितर्के च उताप्यर्थ-विकल्पयोः" इति विश्वः) हे 'करभोरु' करभ इव वृत्तानु-पूर्व इत्यर्थः ('मणिबन्धात् आकनिष्ठं करस्य करभो बहिः' इत्यमरः) तद्वत् 'ऊरू' सक्थिनी यस्याः तत्सम्बुद्धौ—(४।१।६९) ; 'ते' तव 'पद्ममिव ताम्रौ' आलोहितौ 'चरणौ अङ्के' मम उत्सङ्गे क्रोडे इति यावत् 'निधाय' संस्थाप्य', सुखम् अनतिक्रम्य इति 'यथासुखं' येन प्रकारेण तव सुखं स्यात् तथा इत्यर्थः। 'संवाहयामि' संमर्दनेन खेदम् अपनयामि। इत्येवमुच्यताम् इति पूर्वेणान्वयः ("संवाहनं वाहने स्यात् भारादे

रङ्गमर्दने" इति विश्वः) ॥ (नलिनी-दलस्य तालवृन्तत्वाऽऽरोप आरोप्यमाणस्य प्रकृतोपयोगित्वे परिणाम इति परिणामालङ्कारः। पूर्वोत्तरार्धयोः विकल्पालङ्कारः। तल्लक्षणं तु—'तुल्य-बल-विरोधे विकल्पः' इति। काव्यलिङ्ग-परिकर-लुप्तोपमा-वृत्त्यनुप्रासाश्च। वसन्ततिलका वृत्तम्। अनेन 'उपन्यासो' नामाङ्गमुपक्षिप्तम्। तल्लक्षणं यथा दर्पणे—'उपन्यासः प्रसादनम्'। अनेन माला नाम भूषणमुपक्षिप्तम्। तल्लक्षणं यथा–'माला स्याद् यदभीष्टार्थं नैकार्थ-प्रतिपादनम्' इति) ॥१९॥

106n —1. अशरणाऽस्मि &c.—Cf. 'नायिका—हञ्जे चतुरिके ! कथं माम् एकाकिनी मुज्झित्वा गच्छसि। चेटी (नायकमुद्दिश्य सस्मितम्) एवमेका--किनी चिरं भव'—*NN. III.* **2. अन्यतरा**—RM derives this word with **'इतर'**, on which *BhD* remarks "द्वयो निर्धारणे डतरच् (५।३।९२) इति मुकुटस्तु अपाणिनीयः ॥ The reason is that among 35 members of सर्वनाम (1. 1. 27 ; 213 ;) 'डतर' and 'डतम' प्रत्ययs occur. If **'अन्यतर'** **were derivable with 'डतर'**, then *Pāṇini* would not have mentioned **'अन्यतर' separately** in that list. Consequently 'अन्यतर' cannot be derived with डतर-प्रत्यय। Hence BD following KT considers it to be an **'अव्युत्पन्न'** word. 'केवलयोः संज्ञायाः प्रयोजनाभावात्। अन्यतराऽन्यतम-शब्दो **अव्युत्पन्नौ** स्वभावात् द्वि-बहुविषये निर्धारणे वर्तेते'—217 ; Also T on 2047 and *BM on* 217 ; *BhD*, however, proposes to derive it with स्वार्थे 'तरप्' by निपातन, as *Pāṇini* himself has used such 'तरप्' in **'अल्पाच् तरम्'** —(6. 2. 34). "अन्ये एव, 'अल्पाच् तरम्' इतिवत् **स्वार्थे तरप्**'। **पृथिव्याः शरणम्**—The supporter of the (whole) world. *Cf.* 'सन्तप्तानां त्वमसि शरणम्'–PA & MD. 7; Act. VI.27. infra. **सखीभूमौ—Vide (229n, 1.) 3 शीकरैः**—With water sprays. *Ku*. 1. 15 ; *II*. 52 ; *Ra V*. 42 ; *IX*. 68 ; **सीकरः** दन्त्यादिरयम्' इति धनपालादयः— ***BhD*. 4. करभोरु**—(4. 1. 69), करभ is the outer-ridge of the hand from the wrist to the root of the little finger (**metacarpus**). करभ इव ऊरू यस्याः सा करभोरू—*A lady whose thighs resemble the back of the forearm* (*i.e. taperingly round*). According to C, whose thighs are tapering like the **trunk of an elephant'** (करभ=*a young elephant*). Cf. ('द्विरद-नासोरूः'—*BK. IV.* 17 ; *Ku.* **I.** 35-36 ; **'ऊङ्' comes by** 'ऊरूत्तर-पदाद् औपम्ये'—(4. 1. 69).

Next it is **shortened** in the Vocative case. *Vide Ra. VI.* 83 ; *XIII.* 18 ; *ŚPB. X.* 69 ; *AŚ.* 69. **5 तालवृन्तम्**—*Any fan* (*Com.*). "**तालवृन्ता**निलाधिकम्"—KU.II.35. 'मणिमयैरिव **तालवृन्तैः**'—*MK. V.* 13 ; '**तालवृन्तानि** चापरा:'—*Rām. V.* 18. 11 ; 'प्रचलित-**तालवृन्त**' &c.—*Kād. p.* 388. 'कमलिनी-दल-जलार्द्र-**तालवृन्ताः**'—*MM. III.* **6. संवाहयामि**—सम+वह्+णिच् means 'to shampoo". 'स्यान्मर्दनं संवाहनम्'—*AK* 'अशिथिल-परिरम्भैर्दत्तसंवाहनानि'—*UC. I.* 24. 7. **पद्म-ताम्रौ**—(191n. 1). 'उपमानानि सामान्यवचनैः"—(2. 1. 55)-इति समासः। **Red foot is a good sign.** *Read*—'पाणि-पादतलौ रक्तौ नेत्रान्तर-नखानि च। तालुकोऽधर-जिह्वे च **सप्त रक्तं प्रशस्यते**।—*Sāmudraka.*

Text :—शकुन्तला—ण माणणीएसु अत्ताणं अवराहइस्सं (न माननीयेषु आत्मानम् अपराधयिष्यामि)[1]। (इति उत्थाय गन्तुमिच्छति)।

Śakuntalā—No. I will not make myself an offender[1] towards those who deserve respect. (*This said, gets up and wants to go*).

Text :—राजा—(अवष्टभ्य) **सुन्दरि, अपरिनिर्वाणो**[2] **दिवसः। इयञ्च ते समवस्था।**

आर्या **उत्सृज्य**[3] **कुसुम-शयनं नलिनी-दल-कल्पित-स्तनाऽऽवरणम्**[4]।
[12, 18 **कथमातपे गमिष्यसि परिबाधा-पेलवैरङ्गैः**[5] ॥२०)॥
12, 15] ॥ (बलादेनां निवर्तयति) ॥

King—(*Holding*) O Fair one ! not yet (*fully*) quenched[2] (*is*) the day, and such is your (*physical*) condition. Leaving[3] this flowery couch in [4]which lotus-leaves serve as coverings for (*your*) bosom[4], how will (*you*) go out in the sun with[5] limbs (*too*) exhausted by suffering[5] ? (20)

(*This said, forces her to turn back*).

शकुन्तला—पौरव, रक्ख विणयं। मअण-सन्तत्ता वि ण हु अत्तणो पहवामि (पौरव, रक्ष विनयम्। मदन-सन्तप्तापि नहि आत्मनः प्रभवामि[1])।

Śakuntalā—O Scion of Puru ! Keep to decorum. Though tormented by love, I am not mistress[1] of myself.

V. L.—'अपरिनिर्वाणः'—B. M. S. Ś. 'निर्वाणः,—R. V. '**समवस्था**'-B. HS.'शरीरावस्था'—R. V. S.M. 'स्तनावरणम्'—R.V.S. 'स्तनावरणा'—B. M. 'विनयम्'—B. M. S. Dr. P.HS. 'अविनयम्'—R.

शकुन्तलेति। 'न अपराधयिष्यामि' भवत्-कर-कमलाभ्यां मच्चरण-स्पर्शनं न अपराधिनं करिष्यामि। इच्छन्ती अपि अपराधात् भीताहम् इति भावः। **राजेति।** 'अवष्टभ्य' शकुन्तलां धृत्वेत्यर्थः ('अवष्टब्धोऽविदूरे स्यादाक्रान्ते चावलम्बिते' इति मेदिनी। "अवाच्चाऽऽलम्बनाऽविदूर्ययोः"—(८।३।६८) इति **षत्वम्**)। हे 'सुन्दरि' ('रूप-यौवन-सम्पन्ना सुन्दरी परिकीर्तिता' इति रघुनाथ-धृतकोषः। अनेन एवंविधायाम् अवस्थायामपि सौन्दर्यस्य परित्यागः नास्ति इति दर्शितम्) 'दिवसः अपरिनिर्वाण' इदानीमपि अनवसित। अतएव प्रखरातप इत्याशयः। ['निर्वाणोऽवाते' (८।२।५०) इति निष्ठा-णत्वम्]। **उत्सृज्येति।** 'नलिनीदलैः' पद्मपत्रैः 'कल्पितं' कृतं 'स्तनयोः आवरणम्' ताप-शान्त्यर्थं माच्छादनं यस्मिन् (अनेन तापातिशयो व्यज्यते।) तादृशं। 'कुसुम-शयनं' पुष्पमयी शय्याम् 'उत्सृज्य' विहाय 'परिबाधया' पीड़या 'पेलवानि' कृशानि दुर्बलीभूतानि इत्यर्थः ('पेलवः कोमले तनौ' इति शाश्वतः) तादृशैः 'अङ्गैः' उपलक्षिता ('इत्थम्भूतलक्षणे' (२।३।२१); 'हेतौ' (२।३।२३) इति वा ३या) त्वं 'कथं' केन प्रकारेण 'आतपे' रौद्रे 'गमिष्यसि'। स्वस्थोऽपि जनः आवरणादिना शरीरम् अनाच्छाद्य आतपे गन्तुम् न शक्तः। त्वं तु प्रकृत्या तन्वङ्गी, सम्प्रति नितरां पीडिता। अतस्ते आतपे गमनं सुतरामयुक्तम् इत्याशयः। (अत्र पदार्थहेतुकं **काव्यलिङ्गम्**। तदुत्थापिता **चार्थापत्तिः। श्रुति-वृत्त्यनुप्रायसयोः** पूर्वार्धे एकवाचकानु-प्रवेश-लक्षणः **सङ्करः**। उत्तरार्धे तु **श्रुति-वृत्त्यनुप्रासयोः संसृष्टिः**। दन्त्यानाम् ओष्ठ्यानां च बहूनां सद्भावात्। अत्र पेलवैरित्यत्र 'पर्याय' पठित्वा **व्रीडाऽश्लीलता**–दोषः समाधेयः। अत्र **हेतुर्नाम** नाट्यलक्षणम् "**हेतुर्वाक्य** समासोक्तमिष्टकृद्धेतुदर्शनात्" इति दर्पण-लक्षणात्। अनेन **चोपन्यासो** नामाङ्गमुपक्षिप्तम्। 'उपपत्तिकृतो योऽर्थः **उपन्यासस्तु** स स्मृतः' इति भरत-लक्षणात्। **इयमार्या**) ॥२०॥ **शकुन्तलेति।** 'विनयं' शिक्षां. शिक्षा-निबन्धनं शिष्टाचारमित्यर्थः ('**विनयः शिक्षा**-प्रणत्योःविनया तु बलौषधौ इति हेमचन्द्रः) 'रक्ष' पालय। यतः 'मदनेन सन्तप्ता' पीड़िता' 'अपि नहि आत्मनः प्रभवामि' प्रभु. इव आचरामि ['सर्वप्रातिपदिकेभ्यः क्विप् वा वक्तव्यः' (वाः—२६६५) इति क्विप्]। मम शरीरं सर्वथा गुरुजन-पराधीनम्, मन्मन एव तु केवलं त्वयि आहितम्, अतः स्वेच्छया किमपि कर्तुं नाहं शक्ता इति भाव.। 'आत्मन' इत्यत्र शेषे षष्ठी।

107n.—1. आत्मानम् अपराधयिष्यामि—अप्+राध्+णिच्+लृट् स्यामि =अपराधयिष्यामि—Offend against either aprpos of Śak.'s elders—[S and M; Cf. 'अलं गुरुजन-भयेन'—(*infra*)], or of the King himself.

"**अपराद्धास्मि** चिरकारिका **महाराजस्य**"—*Vik* III. 'अप+राध्' being intransitive, आत्मा (*the Nominative in the non-casual form*) becomes कर्म (*object*) by "गतिबुद्धि"—(1.4. 52). 2. **सुन्दरि**—Because even in such a stage there is no decrease in her loveliness. ['षिद् गौरादिभ्यश्च' (4. 1. 41). इति ङीष्। But '**सुन्दरा प्रतिमा, पाण्डुरा भूमिः**–' —according to '**सुपद्म**' by 'पाण्डुर-सुन्दराभ्यां मनुष्यजातौ'—(88n. 6)., **निर्वाणः**—(86n. 1) ; **स्तनाऽऽवरणम्** (Brassiere)—Cf. '**स्वहस्तौ** नयति स्तनावरणताम्'–Māla. *IV*.14. 3. **परिबाधा**–परि+बाध्+अ भावे ('गुरोश्च हल्'—3.3.105)=Suffering. '**बाध्**' is always *Atmp.* Vide (88n.2). *R* has परितः. समन्तात्‌बाधा पीड़ा यस्याः सा–One who is suffering from all directions. **पेलवैः**—(23n. 3). **रक्ष विनयम्**—Have regard for decorum. R's "**रक्ष अविनयम्**"–means (विनय-विगर्हिताचरणं नियमय i.e. Take care of not being indecorous)–"Keep back immodesty"–Roby Datta]. It has a **parallel** in Kād. Cf. 'दुर्विनीते, **रक्ष अविनयम्**'—p. 723. "रक्षामि मन्मथ-विपन्नगुणोऽपि मानम्'—MK. **4. न आत्मनः प्रभवामि**—I cannot act as a master of my ownself. प्रभुः इव आचरामि इति प्रभु+क्विप्+लट् मि (*Vārt.* 2665. *Com.*)=**प्रभवामि**, or simply say प्र+भू+लट् मि। 'प्र+भू' means '*to be master of*' ; generally used with **genitive** & sometimes with **dative** or **locative**. Cf. 'यदि **प्रभविष्यामि** आत्मनः'—*Śak. I.* '**प्रभवति** निजस्य कन्यका-जनस्य महाराजः'—*MM. IV.* 'तत् **प्रभवति** अनुशासने देवी'—*VS. II* '**प्रभवति** आर्यः शिष्यजनस्य'—*Māla. I.* Now read—"Run not before my honour &c."—**Winter's Tale**—*IV.* 3. 33-35 ; "It is too rash, too unadvised, too sudden" &c.—**Romeo and Juliet.** —Act. *II.* 2.

Text :—राजा—**भीरु ! अलं गुरुजन-भयेन। दृष्ट्वा ते विदित-धर्मा तत्रभवान्नात्र दोषं ग्रहीष्यति कुलपतिः। अपि च—**

श्लोक
गान्धर्वेण विवाहेन बह्व्यो राजर्षि-कन्यकाः।
श्रूयन्ते परिणीतास्ताः पितृभिश्चाभिनन्दिताः' ॥२१॥

King—O timid one! away with (*your*) fear for (*your*) superior. On knowing it, the revered patriarch, who is aware of the (*holy*) law, will not find fault with it. Moreover—Full

many a daughter of the royal-seers, is reported as wedded by the Gāndharva form of marriage and (*even*) gratulated[1] ('wel-comed'—Roby Datta) by (*their*) fathers. (21)

शकुन्तला—मुञ्च दाव णं। भूओ वि सहीजणं अणुमाणइस्सं
(मुञ्च तावत् माम्। भूयोऽपि सखी-जनमनुमानयिष्यामि")।

Śakuntalā—Do release me. I shall again attend[2] to my friends (*i.e., ask their opinion*).

राजा—भवतु। मोक्ष्यामि। King—Well, I shall release.

V. L.—'राजर्षिकन्यकाः'—R. V. M. S. 'अथ मुनि-कन्यकाः'—B. 'अभिनन्दिताः'—R. V. M. S. 'अनुमोदिताः'—B. HS.

राजेति। हे 'भीरु' भयशीले ['ऊङ् उतः'—(४।१।६६) इति ऊङ्। ततः 'अम्बार्थ-नद्योर्ह्रस्वः'—(७।३।१०८)इति सम्बुद्धौ ह्रस्वः] 'गुरुजनात्' पितुः ('गुरुः पिता गुर्वविप्रः' इति गदसिंहः)'**भयेन**'। 'विदितधर्मा'(५।४।१२४) श्रुति-स्मृत्या-चारज्ञ **इति** भावः, 'न अत्र' अस्मिन् गान्धर्व-विवाहे। गान्धर्व-विवाहस्तु शास्त्र-सम्मतः, पिता ते शास्त्रज्ञः, 'अतः नूनं स इमं विवाहमनुमंस्यते इति भावः। **गान्धर्वेणेति।** 'बह्व्यः' ['वोतोगुणवचनात्' (४।१।४४) इति ङीष्] प्रचुरा, नैका द्वे वा 'राजर्षीणां कन्यकाः' कुमार्यः गान्धर्वेण अन्योन्य-रुचि-सम्पन्नेन शास्त्र-सम्मतेन 'विवाहेन' ('आसुरो द्रविणादानात्, **गान्धर्वः समयात् मिथः**' इति याज्ञवल्क्य-संहिता १।६१) 'परिणीताः' ऊढाः, तदन्तरं 'ताः' राजर्षिकन्यकाः 'पितृभिः' विदित-वृत्तान्तैः गुरुजनैः 'अभिनन्दिताः' न दूषिता, अपि तु अभ्यनुमोदिताः 'च श्रूयन्ते' पुराणादिषु। पश्य पुरा नीलध्वज-राज-कन्या स्वाहा-देवी वह्निना गान्धर्वेण विधिना ऊढा पश्चात् तत्पित्रापि ज्ञातवृत्तान्तेन अभिनन्दिता च। अतो नाय कामा-चारः, क्षत्रियाणां धर्म एव। (**श्लोको** वृत्तम्॥ अत्र '**विवाहेन**' इति प्रक्रम्य '**परिणीता**' **इत्यभिधानात्** प्रकृतिविषयो **भग्न-प्रक्रमता-दोषः**। स च "विवाहिताः **श्रूयन्ते ता" इति** पठित्वा समाधेयः। अत्र '**उपदिष्टम्**' नाम भूषण मुपक्षिप्तम्। **तल्लक्षणं यथा** दर्पणे—"**उपदिष्टं** मनोहारि वाक्यं शास्त्रानुसारतः") ॥२१॥

108n—1. भीरु—(98*n.* 1); *Ra. XIII.* 4. **विदित-धर्मा—**विदितः **धर्मः येन** सः विदितधर्मा। 'अनिच् (समासान्त) by 'धर्मादनिच् केवलात्'—(5. 4. 12). 'अनिच्' comes when 'धर्म' is the **last** member in a बहुव्रीहि and is the **only word** without any other word joined **with** it, or when the 1st member is a single word. "केवलात्

पूर्वपदात् परः यो धर्मशब्दः तदन्तात् बहुव्रीहेः अनिच् स्यात्"—"केवलात् किम् ? **परमः स्वः धर्मः यस्य इति त्रिपद-बहुव्रीहौ मा भूत्**"—*SK*. (863) i.e. in this त्रिपद-बहुव्रीहि, 'परमः and 'स्वः' these **two** words precede 'धर्म', hence 'अनिच्' cannot be applied. Such uses like **'सन्दिग्ध--साध्य-धर्मा' 'परम-स्व-धर्मा'** &c. are justified as follows—"सन्दिग्धश्चासौ साध्यश्चेति कर्मधारयः। 'सन्दिग्ध-साध्यः' धर्मः यस्य इति कर्मधारय-गर्भः बहुव्रीहिः। एवञ्च सन्दिग्ध-साध्य-शब्दस्य केवल-पूर्व-पदत्वात् तत्रानिच् **निर्बाध** इति भाव."—*BM*. Others explain **quite differently** :—"केवलात् किम् ? पदान्तरेण समस्तात् धर्मशब्दात् मा भूत्। 'मुनेः धर्मः' मुनिधर्मः, 'कृतः मुनिधर्मः येन स कृतमुनिधर्मः। परम-हितः धर्मः यस्य सः परम-हित-धर्मः। यदा तु **त्रिपद-बहुव्रीहिः तदा नायं नियमः**। तेन, **परमः स्वः धर्मः यस्य स परम-स्व-धर्मा**'—**Prabhā**. Also T on 863. **2. बोधं ग्रहीष्यति**—Because he is versed in the Śāstras and knows that this sort of marriage is sanctioned by the scriptures. ग्रह् + लृट् स्यति=ग्रहीष्यति ; 'ग्रहोऽलिटि दीर्घः'—(7. 2. 37). **3. गान्धर्वेण**—गान्धर्व is one of the eight forms of marriages—'**ब्राह्मो दैवस्तथैवार्षः** प्राजापत्य स्तथाऽसुरः। गान्धर्व-राक्षसौ चान्यौ पैशाचश्चाष्टमोऽधमः—*VP. III. Ch.* 10. In this form of marriage, the sanction of the superiors is not necessary, the **mutual consent** of the lovers being sufficient. **'त्वं' मे पतिः 'त्वं भार्या**'मे इत्येवं कन्या-वरयोः परस्परं नियम-बन्धनम् पित्रादि-कर्तृक-दान-निरपेक्षयोः विवाहः स गान्धर्वः—*Vīramitrodaya Tīkā on Y.* 1. 61 ; *RV. X.* 34. 5 ; *Institutions in Ancient India—Ludwick Sternback* ; 'कति वा कथयामि या स्वयं वृतवत्यः पतीन्' —*Kad. p.* 854. "**इच्छयाऽन्योन्य-संयोगात् कन्यायाश्च वरस्य च। स तु गान्धर्वः** विज्ञेयो मैथुन्यः कामसंभवः'—*MS. III.* 32. **Only Kṣatriyas** are entitled to have this sort of marriage. "गान्धर्वो राक्षसश्चैव **धर्मौ क्षत्रस्य तौ स्मृतौ**"—*MS. Vide HV. II.* 94 for गान्धर्व marriage of **'प्रभावती' & 'प्रद्युम्न'**, and *II* 119, for that of **'ऊषा' & 'अनिरुद्ध'। 4 अनुमानयिष्यामि**—I shall take counsel with my friends. अनु + मन् (*Caus.*)="To ask the consent of". Cf. 'अनुमान्यतां महाराजः'—*Vik.* II.

Text :—शकुन्तला—कदा (कदा) ? Śakuntalā—When ?

राजा—

अपरक्षित-कोमलस्य[१] **यावत्,**
कालभारिणी **कुसुमस्येव नवस्य षट्पदेन**[२]।
[१,३, ससजगग **अधरस्य पिपासता**[३] **मया ते**
२, ४, सभरज] **सदयं सुन्दरि ! गृह्यते रसोऽस्य** ॥२२॥

(**मुखमस्याः** समुन्नमयितुमिच्छति। शकुन्तला परिहरति नाट्येन) ॥

King—(*Then only*) when the flavour of your lip, all[1] unhurt (***by touch***), and tender[1], O fair (*damsel*) ! is gently sipped by (***my***) thirsty[3] self as is done of the juice of new blossom by the *hexa-ped*[2] (***drone***). (21).

(*Attempts to lift her face up. Śak. gesticulates avoidance.*)

(नेपथ्ये)—**चक्कवाक-बहुए**[४] ! **आमन्तेहि**[५] **सहअरं। उवट्ठिआ रअणी**

(चक्रवाक-बधुके ! आमन्त्रयस्व[५] सहचरम्। उपस्थिता रजनी)।

(*In the post-scenium*)

O Sheldrake-bride[4] ! bid[5] farewell[5] to (*thy*) mate, arrived is the night

V. L.—'यावत्'—R. V. M. 'तावत्'—S V's Com.

अपरिक्षतेति। हे 'सुन्दरि, यावत्' ('यावत् तावच्च साकल्येऽवधौ मानेऽवधारणे' इत्यमरः)। यदवधि गृह्यते तदनन्तरं मोक्ष्यामि इति भावः। 'षट्पदेन' भ्रमरेण 'नवस्य' सद्यः प्रस्फुटितस्य 'कुसुमस्य इव' भ्रमरो यथा कुसुमस्य मधु यावत् न पिबति तावत् न मुञ्चति तद्वत् इत्यर्थः। 'पिपासता' चिरं पातुम् इच्छता 'मया न परिक्षतः' दष्टः इति 'अपरिक्षतः' अनास्वादित-पूर्वः 'कोमलः' मृदुः च। तादृशस्य अस्य ते अधरस्य रसः' स्वादः ('रसो गन्धरसे स्वादे' इति विश्व) 'सदयं' सानुकम्पम् (अनेन बाला-लालन-कौशलं ध्वनितम्) 'गृह्यते' पीयते उपभुज्यते इति यावत्। (**श्लेष-वाच्योपमा।** स्यस्ये इति सुदसुन्देति **छेक-वृत्त्यनुप्रासाः।** अत्र **स्पृहा** नाम नाट्यालङ्कारः। 'आकाङ्क्षा-रमणीयत्वाद्वस्तुनो या स्पृहा तु सा'—इति दर्पण-लक्षणात्। **मालभारिणी** इत्यपरनाम **कालभारिणी**-वृत्तम्)। **नेपथ्य इति।** हे अनुकम्पिते 'चक्रवाकस्य बधुके' कोकप्रिये. ['अनुकम्पायाम्' (५।३।७६) इति कः। 'कोकश्चक्र श्चक्रवाको रथाङ्गाऽऽह्वयनामकः' इत्यमरः] 'सहचरम्' पुमांसम् 'आमन्त्रयस्व' (हे शकुन्तले. **दुष्यन्तम् आपृच्छस्व** इति प्रकृतो व्यङ्ग्योऽर्थः. 'रजनी उपस्थिता' **गौतमी अस्यामेव दिशि आगच्छति** इत्यर्थोऽपि व्यङ्ग्यः)। '**इयम् अप्रस्तुतप्रशंसा।**'—इति यत् राघवपादैः उक्तं **तच्चिन्त्यम्।** यतः अप्रस्तुतेन

अर्थेन प्रस्तुतार्थावगमे एव अप्रस्तुतप्रशंसायाः अवसरः। अत्र **सन्ध्यायां** चक्रवाक-मिथुन-विघटितं **प्रस्तुतं, सन्ध्या च समागता। नापि समासोक्तिः।** यतः प्रस्तुत-वर्णनेनाऽप्रस्तुतावगमे तस्याः प्रसक्तिः, नात्र **शकुन्तला-दुष्यन्त-विघटनम् अप्रस्तुतम्।** तस्मात् अत्र **अर्थशक्तिमूलः वस्तुध्वनिः।** अत्र द्व्यर्थ-वचन-विन्यासात् उभयपक्षेऽपि सुसम्बद्धत्वात् दुष्यन्तस्याऽपसारणात्मक-प्रधानार्थान्तरसूचनात् **चतुर्थ-पताका**स्थानकमुक्तम्। तथाचोक्तं विश्वनाथेन "यत्रार्थे चिन्तितेऽन्यस्मिन् तल्लिङ्गोऽन्यः प्रयुज्यते। आगन्तुकेन भावेन **पताका-स्थानकन्तु** तत्॥ द्व्यर्थो वचनविन्यासः सुश्लिष्टः काव्ययोजितः। प्रधानार्था-र्थान्तराक्षेपी पताकास्थानकं परम्"॥ दशरूपकमते अत्र **द्वितीय-पताकास्थान-मुक्तम्।** काटयवेम-मते इय **चूलिका।** 'नेपथ्यान्तर्हितैः पात्रैः **चूलिकार्थस्य** सूचनात्' इति तल्लक्षणात्)।

109n.—1. अपरिक्षत &c.—Vide (69n. 9). **नाट्येन परिहरति**—Śak. avoids the kiss of the king. This is necessary as the rules of dramaturgy **do not allow kissing** on the stage. Read "दन्तच्छेद्यं नखच्छेद्यम् अन्यत् व्रीड़ाकरञ्च यत्। **शयनाऽधर-पानादि** नगराद्यव-रोधनम्॥ स्नानानुलेपने **चैभि र्वर्जितो** नातिविस्तरः"—*SD. VI.* **2. चक्रवाक-वधुके** &c.—This hint made by the friends, is meant for Śak. 'क' implies अनुकम्पा। (Cf. 'हरिणकं'—I. 10). You are certainly to be pitied as time for your separation has arrived. **वधू** +क=वधुका, 'ऊ'of वधू is **shortened** by ['केऽणः'—7. 4. 13]; (22n. 2). "क-प्रत्यये परे तत्पूर्ववर्त्ती आकारः ईकारः ऊकारश्च ह्रस्वो भवति। **ज्ञा-ज्ञका,** कुमारी-कुमारिका, **वधू-वधुका'**—**Prabhā**. **चक्रवाक** is a kind of goose (*Anas casarca*). "The Bengalis consider its flesh to be a good medicine for fever"—M. According to poetic convention they are doomed to pass the night separated on account of an imprecation pronounced upon them by *Rāma* whom they had taunted while he was bewailing for Sitā. The following synonyms are proofs of their *constancy* and *connubial affection*. 'भूरिप्रेमा। द्वन्द्वचारी। रात्रिविश्लेषगामी'—*Kalpa* ; Vik. IV. 20 ; *Ra. VIII.* 56; PA & *MD.* 82. **3. आमन्त्रयस्व**—आ+मन्त्र means to 'bid farewell to'. Cf. 'लताभगिनी वनज्योत्स्नाम् **आमन्त्रयिष्ये'**—*Śak. IV.*

'ते हिमालयमामन्त्र्य'—*Ku. VI.* 94. Sometimes it means simply '*to say*'. Vide *BK. IX.* 98. (111n. 4). **4.** According to *SD* "An equivocal arrangement of words (or a double entendre) well connected and fit for poetry—such as has an eye to third sense viz., the End, is the last (4th पताकास्थानकम्)। "चक्रवाकवधुके—etc. is an example of this. Any 'पताकास्थान' may be used anywhere without restriction.

Text :—शकुन्तला (कर्णदत्वा, ससम्भ्रमम्)—**पौरव, असंसअं मम शरीर-वुत्तन्तो-वलम्भस्स अज्जा गोदमी इदो एव्व आअच्छदि। दाव विडवा-न्तरिदो होहि** (पौरव, असंशयं मम शरीर-वृत्तान्तोपलम्भाय[1] आर्या गौतमी इत एव आगच्छति। तावत् विटपा[2]न्तरितो भव)। Śakuntalā (*Leaning her ear*; *distractedly*) —O Scion of Puru! undoubtedly venerable Gautamī is coming even to this direction, to[1] have a report of my health[1]. Meanwhile get (*yourself*) concealed[2] behind the branches.[2]

राजा—तथा (आत्मानमावृत्य तिष्ठति)।

King—All right. (*Stands hiding himself*).

(ततः प्रविशति पात्रहस्ता गौतमी सख्यौ च)।

(*Enter Gautamī with a bowl in hand and the friends*).

सख्यौ—इदो इदो अज्जा गोदमी [इत इत आर्या गौतमी]। ✝

Friends—This way, venerable Gautamī, this way.

✝ **गौतमी** (शकुन्तलामुपेत्य)—**जादे, अवि लहु-सन्दावाइं[3] दे अङ्गाइं** [जाते, अपि लघु-सन्तापानि ते अङ्गानि]। (इति स्पृशति)।

Gautamī (*Going up to Śakuntalā*)—My child, do your limbs have their sufferings[3] abated[3] ? (*This said, touches her body*).

शकुन्तलेति। 'ससंभ्रमं' सभयम्। 'शरीर-वृत्तान्तस्य उपलम्भाय' सम्यक् परिज्ञानाय (इति तादर्थ्ये चतुर्थी। 'उपलम्भस्त्वनुभव' इत्यमरः) (अनेन **विरोध**-नामाङ्गमुपक्षिप्तम्। तल्लक्षणं यथा दर्पणे—'**विरोधः** व्यसन-प्राप्तिः' अत्र स्वाभिष्टात् च्युति रेव व्यसनम्)। **गौतमीति।** 'जाते' हे पुत्रि! "लघुः' अल्पः मन्दीभूत इति यावत् 'सन्तापो' येषां तानि। 'अपि' इति पृच्छायाम्।

110n.—1. शरीर-वृत्तान्त&c.—उप्+लभ्+घञ् भावे=उपलम्भः—Ascertaining. [For 'तुम्'—(37n.5), for '४र्थी'—(51n.1)]. **2. अन्तरित**—अन्तरम्' अन्तर्धानम् करोति इति अन्तर+णिच्+क्त कर्मणि=अन्तरितः or

अन्तरम् सञ्जातमस्य इति अन्तर+इतच् (जातार्थे)—Concealed. 3. **पात्र-हस्ता**—Refers to disciple's speech (*supra*)—"अहमपि तावत् वैतानिकं शान्त्युदकम् अस्यै गौतमीहस्ते विसर्जयिष्यामि"—(82n. 10). "गड्वादेः परा सप्तमी" (वाः—१४२१) इति हस्त-शब्दस्य परनिपातः । 4. **जाते**—Vocative case. In dramas 'जात' (*darling*) is often used as an affectionate term of address for a child. Cf. 'अयि जाता कथयितव्यं कथय'—*UC. IV.*

Text :—शकुन्तला—अज्जे, अत्थि मे विसेसो[1] [आर्ये, अस्ति मे विशेषः] ।

Śakuntalā—Revered mother, there is a change[1] for the better[1] in me.

गौतमी—इमिणा दब्भोदएण, णिराबाधं एव दे सरीरं भविस्सदि ।
[अनेन दर्भोदकेन निराबाधमेव ते शरीरं भविष्यति] ।
(शिरसि शकुन्तलामभ्युक्ष्य)

वच्छे, परिणदो दिअहो । ता एहि, उडजं एव्व गच्छम्ह (वत्से, परिणतो[3] दिवसः । तदेहि, उटजमेव[4] गच्छामः] । (प्रस्थिताः) ।

Gautamī—With this turf-water your body will be quite free from all ailments[2]. (*Sprinkling Śakuntalā on the head*) My child, far-spent[3] is the day. So come ; we'll go to the cottage[4].

(*They set out*)

शकुन्तला (आत्मगतम्)—**हिअअ ! पढमं एव्व सुहोवणदे मणोरहे कादर-भावं ण मुञ्चसि । साणुसअ-विहडिअस्स कहं दे सम्पदं सन्दावो** [हृदय ! प्रथममेव सुखोपनते मनोरथे कातर-भाव न मुञ्चसि । सानुशय-विघटितस्य[4] कथ ते साम्प्रतं[5] सन्तापः] । (पदान्तरे स्थित्वा, प्रकाशम्) **लदावलअ ! सन्दाव-हारअ ! आमन्तेमि तुमं भूओ वि परिभोअस्स** [लतावलय[6] । सन्ताप-हारक ! आमन्त्रये त्वा भूयोऽपि परिभोगाय] । (इति दुःखेन निष्क्रान्ता शकुन्तला सहेतराभिः) ।

Śakuntalā—(*To herself*) Oh my heart ! even at first, at the ready presence of (*thy*) desired object, (*thou*) didst not give up (*thy*) shyness. Regretfully[4] separated[4], why is now[5] this thy fever ? (*After a few steps, stopping—Aloud*) O bower[6] of creepers[6] ! the soother of (*my*) suffering ! (*I*) bid you farewell, yet (*hoping*) again to enjoy (*thee*).

(*Exit Śakuntalā sorrowfully along with others*).

शकुन्तलेति। 'विशेषः' पूर्व-सन्तापात् किञ्चिद्वैषम्यं, स्वल्प उपशम इत्यर्थः। **गौतमीति**। 'दर्भेण क्षिप्तं' तादृशम् 'उदकं' दर्भोदकम् (**उत्तर-पद-लोपी** कर्मधारयः) तेन। 'निर्गता आबाधा' पीड़ा यस्मात् पीड़ारहितम् 'अभ्युक्ष्य' शान्ति-जल-सेचनं कृत्वा। तत्प्रकारस्तु—"उत्तानेनैव हस्तेन **प्रोक्षणं** समुदाहृतं। न्यञ्चावभ्युक्षणं प्रोक्तं तिरश्चा**वोक्षणं** स्मृतम्" इति॥ 'परि-णतः' अवसान-नैकट्यं प्राप्तः (आदि-कर्मणि क्तः)। **शकुन्तलेति**।। 'मनोरथे' मनोरथस्य विषयीभूते दुष्यन्ते 'सुखेन' दूती-संप्रेषणाद्यनुष्ठानाऽभावात् अनायासेन 'उपनते' स्वयमुपस्थिते सति 'कातरभावं' भीरुत्वं 'नैव मुञ्चसि' (एवकारो भिन्न-क्रमः]। 'अनुशयेन' पश्चात्तापेन 'सह विघटितस्य' वियोजितस्य 'ते सन्तापः' अधुना 'कथं साम्प्रतम्' उचितं ['साम्प्रतमुचितेऽधुना' इति यादवः] यद्वा 'साम्प्रतम्' इदानी 'कथम्' किमर्थ ते सन्तापः। हे 'लतावलय' निकुञ्ज ! पक्षे तदन्तराल-स्थित-दुष्यन्त ! हे 'सन्तापहारक' ! एकत्र **छाया-प्रदानात्** अन्यत्र **सम्भोगाऽऽशा-जननात्** इत्यर्थः। 'संभोगाय' [तादर्थ्ये चतुर्थी] 'आमन्त्रये' आह्व-यामि। [अनेन **मनोरथ**--नाम भुषणमुपक्षिप्तम्। तल्लक्षणं यथा—"**मनोरथस्तु** व्याजेन विवक्षित-निवेदनम्" इति। अकस्मादेव दुष्यन्तस्य गुणवदर्थ-सम्पत्तेः परमप्रीति-करणाच्च अत्र **प्रथम-पताकास्थानकमुक्तम्**। तल्लक्षणं यथा दर्पणे—सहसैवार्थसम्पत्तिः गुणवत्युपचारतः। पताकास्थानकमिदं प्रथमं परिकीर्तितम्")।

111n.—1. अस्ति विशेषः—'विशेष' is a *change for the better* as opposed to '**विकार**' *a change for the worse. Cf.* 'अस्ति मे इदानीं **विशेषः**' *Māla. IV* ; 'अस्तितातस्य **विशेषो** न वेति'—HC. V. **परिणतः**—'About to end', 'drawing to its close'. **उटज**–'उटः'=Leaf ; 'उटः तृण-पर्णादिः" इति देशीकोषः। उटात् जायते, 'पञ्चम्यामजातौ' इति डः—(3. 2. 98.) **2. सुखोपनते** —Cf. 'यद् उपनतं दुःखं सुखं तत्'—*Vik. III* ; *Śak. Act V, after. ŚI* 19. **3. सानुशय**&c.—अनु+शी+अच् भावे-(3. 3. 56). or,'घ' करणे ('पुंसि संज्ञायां घः प्रायेण'—3.3.1181)]=अनुशयः (पश्चात्तापः)=Regret—(*MN on ŚPB. III*.14). वि+घट्(*to join*)+णिच्+क्त कर्मणि=**विघटितम्**—Discharged, hence separated. सानुशय(*repentant*) may also be taken as an **in-dependent** word addressed to the bower(लतावलय), and 'विघटितस्य' will then be an attribute of "ते"। **साम्प्रतं**—Either 'now' or '**proper**'. (*Com.*) **4. लतावलय** &c.–This is meant for both Gautamī, & the king who is concealed among the 'लतावलय' which is 'सन्तापहारक', because

it allays the heat of the sun (आतप-सन्ताप), while the king is so called because he removes the pangs of love(मदन-सन्ताप) । (*Vide Com.*). For a similar scene. Cf. "मातरमनुगच्छन्ती कुमारी,—'राजहंस-कुल-तिलक ! केलिवने मदन्तिकोपागतं भवन्तमकाण्ड एव विसृज्य मया जनन्यनु-गमनं क्रियते, तदनेन भवन्मनोरागोऽन्यथा मा भूत' इति मरालमिव कुमारमुद्दिश्य वदन्ती पुनः पुनःपरावृत्त-दीननयना निजमन्दिरमगात्"—*DK.* **परिभोगाय**—*Ra. XIX.* 21; 28; 30; **[for ४र्थी—51n. 1.]** **आमन्त्रये**—'Invite' or 'bid fare-well to'—(Vide गणदर्पण—page 128) ; 'तमामन्त्र्य जगाम'—Mahā. 'आमन्त्रयेत तान् प्रह्वान्'—BK. XIX. 7 ; IX. 98.

Text :–राजा (पूर्वस्थानमुपेत्य । सनिःश्वासम्)—

अहो विघ्नवत्यः[1] प्रार्थितार्थ-सिद्धयः[2] । मया हि—

मालभारिणी **मुहुरङ्गुलि-संवृताधरोष्ठं,[3],**
[१, ३, ससजगग **प्रतिषेधाक्षर - विक्लवाऽभिरामम्[4] ।**
२, ४, सभरजग] **मुखमंस-विवर्ति[5]पक्ष्मलाक्ष्याः[6]**
कथमप्युन्नमितं न चुम्बितं तु ॥२३॥

क्व न खलु सम्प्रति गच्छामि । अथवा, इहैव प्रिया-परिभुक्त-मुक्ते[7] लता-वलये मुहूर्तं स्थास्यामि । (सर्वतोऽवलोक्य)

तस्याः पुष्पमयी शरीर-लुलिता[8] शय्या शिलायामियं
शार्दूलविक्रीडित **क्लान्तो[9] मन्मथ-लेख एष नलिनी-पत्रे नखै रर्पितः ।**
(मसजसततग) **हस्ताद्भ्रष्टमिदं बिसाऽऽभरण[10]मित्यासज्जमानेक्षणो[11]**
निर्गन्तुं सहसा न वेतस-गृहाद्वीशो[12]ऽस्मि शून्यादपि ॥२४॥

King (*Coming up to the former place and sighing*)—Ah ! how full[1] of obstacles[1] is the accomplishment[2] of the desired objects[2].

For—By me, the face[6] of that lovely eye-lashed-eyed (*maiden*)[6], the lower-lip[3] wherein was covered with (*her*) fingers[3], and which[4] was a little flurried when (*uttering*) the syllables of denial (*and hence looked extremely*) beautiful[4], and which[5] (face) was turned repeatedly towards the shoulder[5]—was indeed raised somehow, but not kissed (23).

Where indeed will (*I*) go now ? Or, I'll tarry here for a while, in this creeper-arbour, (*once*)[7] occupied but (*now*) deserted[7] by my beloved . (*Looking all around*).

Here on this stone-slab, is her flowery couch, crushed[8] down by her body[8]. This is the faded[9] *billet-doux*, committed to the lotus-leaf with nails. This is an ornament[10] of the lotus-stalk,[10] slipped down from (*her*) hand. With[11] my eyes thus rivetted (*on* these),[11] I cannot[12] tear myself away from (*this*) house of canes all at once though (*it is quite*) empty (24).

V. L.—'चुम्बितं तु'—D. C. B. M. R. S., 'चुम्बितं तत्—V. 'परिभुक्तमुक्ते'—R. V. M. S. 'परिमुक्ते'—B. 'आसज्जमान'—B. HS. 'आसज्यमान'—R. V. M. S. 'ईशोऽस्मि'—B. HS ; 'शक्नोमि'—R. V. S. 'शक्तोऽस्मि'—M.

राजेति। 'अहो' इति विषादे। 'प्रार्थितस्य' आकाङ्क्षितस्य 'अर्थस्य' वस्तुनः 'सिद्धयः' प्राप्तयः 'विघ्नवत्यः' विघ्न-बहुलाः। तदेव वक्ष्यमाणोदाहरणेन स्पष्टयति। **मुहुरिति।** 'पक्ष्माणि' नेत्र-लोमानि ('पक्ष्म सूत्रादि-सूक्ष्मांशे किञ्जल्के नेत्र-लोमनि' इति विश्वः) सन्ति अनयोः इति 'पक्ष्मले' प्रशस्त-लोम-युक्ते ["सिध्मादिभ्यश्च"—(५।२।८७)—इति लच्] 'अक्षिणी' यस्याः 'पक्ष्मलाक्ष्मी' [षच्—(५।४।११३) ; ङीष्—(४।१।४१)] तस्याः शकुन्तलायाः इति 'अधरोष्ठम्' ('ओत्वोष्ठयोः समासे', वा—२७—इति पाक्षिकं पर-रूपत्वम्। 'द्वन्द्वश्च प्राणि-तूर्य-सेनाङ्गानाम्'—(२।४।२) इति एकवद्भावः नपुंसकत्वं च) यस्मिन् तादृशम्। 'प्रतिषेधस्य' चुम्बन-निषेधस्य 'अक्षरैः मा माऽलम् इत्याकारैः वर्णैः ("अक्षरं ब्रह्म-वर्णयोः" इति विश्वः) "विक्लवं' व्याकुलम् अतएव 'अभिरामं' रमणीयम् ('अभिरामं रमणीयं सौम्यञ्च सुन्दरम्' इति धनञ्जयः), यद्वा 'प्रतिषेधाऽक्षरस्य' यत् विक्लवम् अस्पष्टो-च्चारणं तेन 'अभिरामम् ("विक्लव-शब्दः धर्मपरः" इति राघवपादाः) 'मुहुः' पुनः पुनः 'अंसे' स्कन्धोपरि ('अंसः स्कन्धे विभागे स्यात्' इति हैमः) **चुम्बन-परिजिहीर्षया** 'विवर्तते' परावर्तते इति 'अंस-विवर्ति मुखं कथमपि' महता कृच्छ्रेण 'उन्नमितम् ऊर्ध्वीकृत 'न तु चुम्बितं' तच्च चुम्बनं गौतम्या-गमनेन प्रतिरुद्धम्। ['तु' इति पश्चात्तापे। तेन तावन्मात्र-चुम्बन-लाभेनापि कृतकृत्यता स्यादिति ध्वन्यते। **अर्थान्तरन्यासः। स्वभावोक्तिश्च। श्रुति-वृत्त्यनुप्रासौ।** कथमपीत्यस्यार्थं प्रति विशेषण-त्रयार्थस्य हेतुत्वोपादानात् **काव्यलिङ्गम्।** 'अधरोष्ठम्' इति **पुनरुक्तवदाभासोऽलङ्कारः। कालभारिणी** इत्यपरनाम **मालभारिणी** वृत्तम्। **औपच्छन्दसिकम्** इत्यस्य नामान्तरम्। अत्र **पश्चात्तापो** नाम नाट्याऽलङ्कार उपक्षिप्तः। तल्लक्षणं यथा दर्पणे—"मोहावधीरितार्थस्य **पश्चात्तापः** स एव तु") ॥२३॥ **क्वेति।** आदौ 'परिभुक्तं' पश्चात् 'मुक्तम्' इति 'परिभुक्त-मुक्तं' तस्मिन् ('पूर्वकालैक—'(२।१।२९) इति **स्नातानुलिप्तवत** समासः) ।

'मुहूर्तम्' इति अत्यन्तसंयोगे २या। **तस्या इति। तस्या इति सर्वत्र संबध्यते]।** 'तस्याः' शकुन्तलायाः 'शरीरेण' अनङ्ग-सन्तप्त-देहेन 'लुलिता' विमर्दिता ('लुल विमर्दने' इति वोपदेवः। 'सौत्र-धातुरयम्' इति दुर्गादासः) इदस्ततः क्षिप्ता इत्यर्थः। 'शिलाया' प्रस्तरोपरि 'इयं' दृश्यमाना 'पुष्पमयी' नतु पल्लवमयी' तेषां ततोऽपि मृदुत्वात्। 'शय्या' ('संज्ञायां समज—' (३।३।९९) इति क्यप्। 'अयङ् यि—' (७।४।२२) इति शी-धातोः ईकारस्थाने अय्-शब्दादेशः)। तस्याः 'नखैः' (६।३।७५) कररूहैः' 'अर्पितः' न्यस्ताक्षरः 'नलिनी-पत्रे', पद्मपर्णे एषः क्लान्तः' शुष्कप्रायः 'अतएव गौतम्या न परिलक्षितः) 'मन्मथ-लेखः' प्रेमलिपिः। तस्या हस्तात् भ्रष्टं' विगलितमिदं 'विसाऽऽभरणं' मृणाल-वलयम् 'इति' इत्थम् 'आ' समन्तात् 'सज्जमाने' लग्ने 'ईक्षणे' नयने यस्य तथोक्तः अहं 'शून्यादपिः शकुन्तलया विरहिता-दपि 'वेतस-गृहात्' वञ्जुल-वेष्टितात् निकुञ्जात् 'सहसा' 'निर्गन्तु' बहि र्यातुं 'न ईशोऽस्मि' न शक्तोऽस्मि। [**हेत्वनुप्रासौ**। अत्र निर्गमण-कारणे शून्यत्वे सति य स्तदभावः सा **विशेषोक्तिः**। अथच तद्सद्भावस्य कारणस्याऽभावेऽपि गमनाऽभावः तत्कार्यमुक्तम् इति **विभावना**। अशून्यात् का कथा शून्यादपि इत्यर्थस्याऽऽपतनात्-**अर्थापत्तिश्च**। **शार्दूलविक्रीडितं** वृत्तम्। अस्य तुर्य-चरणेन **पुष्पं** नामाङ्ग-मुपक्षिप्तम्। तल्लक्षणं यथा दर्पणे—'**पुष्पं**' विशेष-वचनम् मतम्') ॥२४॥

112n.—1. विघ्नवत्यः—(76n. 4. end). विघ्न+मतुप्+भूमार्थे [1894]; 'म'='व' (8.3.9.). Hence 'विघ्नवती in the feminine gender. –(Full of obstacles). Cf. 'श्रेयांसि बहुविघ्नानि'। The idea contained in 'अहो विघ्नवत्यः—&c.' is supported by the next Śloka. **2. मुहुः**—*R* connects it with'अङ्गुलि-संवृताऽधरोष्ठम्' *i.e.* again and again covering the lips with her fingers. But our idea is this that when Śak.'s face was raised (III. 21 *et seq*) for kissing, she covered her face with fingers, and with a view to avoiding the persistent kiss of the king (**नाट्येन परिहरति**), she turned her face sometimes to the right and sometimes to the left, so we think (**मुहुः**) should go with '**अंसविवर्ति**'। ['बहुलम् आभीक्ष्ण्ये—(3. 2. 81) इति णिनिः]। '**मुहुः' इति सर्वत्र संबध्यते**'—HS. **3. अधरोष्ठं**—Optionally 'अधरौष्ठं'—(Com.) 'समास इति किम्? तिष्ठ देवदत्तौष्ठं पश्य'—KV.—(26*n*. 6). Or, to avoid *tautology*, explain 'अधरः' (**अनूर्ध्वः**) ओष्ठः=अधरोष्ठः=Lower lip. 'अधरस्तु पुमान् ओष्ठे, हीनेऽनूर्ध्वे च वाच्यवत्—*Medinī*. For somewhat similar idea, Cf. 'यन्मूढेन

मया तदा कथमपि प्राप्तो गृहीत्वा चिरं'&c.—Rat. III. 1. **4. प्रतिषेधाक्षर** &c.—'प्रतिषेधाक्षर' means words of prohibition, *i.e.* "न ममाधरम् चुम्बनीयम्" [उन्नमनीयम्]—My lips must not be kissed"—Ś & C. ('अलम, अलम् मा इति प्रभृतिभिः'—By such expressions as "enough, enough", "don't"—K] "मामा मानद, माऽति मामालमिति &c."—AŚ. 36; Also 'हम्मीर महाकाव्यम्'–7/111. 'अक्षर' may be explained as a sylla--ble or a letter. **विक्लव**—(*i*)Powerless or (*ii*) Confusion (वैक्लव्यं)–*R*. For different sense, Cf. 'प्रस्थान-विक्लव'–(*V.I=Faltering*); 'निराकरण-विक्लवायाः'—(*VI. 9—Distressed*) ; 'मृगया-विक्लव'—(*II.3=Averse to*). **अंस-विवर्ति**=तिर्यक्कृतम् —(C) *i.e.* turned on one side. It may also mean 'Revolving on the shoulders"—*M*. Cf. 'चुम्बने विपरिवर्तिताधरम् हस्तरोधि रसन–विघट्टने &c. Ra. XIX. 27. **5. पक्ष्मलाक्ष्याः**—Of one who has eyes with beautiful eyelashes'.—*S*. The epithet is significant. 'अनेन चुम्बनार्थमुन्नमने योग्यता ध्वनिता'–*R*. **कथमपि**—With great diffi--culty; (PA&MD.2). **6. तु**—Signifies remorse–(पश्चात्ताप)–R. The idea is—I would have considered myself fortunate even if I had but a kiss and nothing else. (Com.). Cf. the idea with 'हस्तं कम्पयते रुणद्धि रशना-व्यापार लोलाङ्गुलिः' &c.—*Māla. IV*. 15. **7. पुष्पमयी**—Full of flowers. Cf. *Rām. VI*. 22. 19. ('मयट् is used here in the sense of "**abundance**" (प्राचुर्य) by 'तत्प्रकृत-वचने मयट्'—(5.4. 21), (and not in the sense of (विकार)—"अपूपमयमिति। प्रचुरोऽपूप इत्यर्थः। यवागूमयीति। प्रचुरा यवागूरित्यर्थः"—BM). **लुलिता** —Pressed down (*Com.*) Cf. 'चूर्णबभ्रुः लुलित-स्रगाकुलम्"—*Ra. XIX*. 25. **8. आसज्जमानेक्षण**—आ+षस्ज् (गतौ)+शानच्=आसज्जमाना =Rivetted. Cf. 'वाचा संसज्जमानाया–*Rām. II*. 90. 14 ; '**सज्ज**', though *Prmp.*, is **frequently used in Atmp.** by **ancient writers.** Read "**षस्ज्** (सज्ज) गतौ ।. सज्जति। **अयम् आत्मनेपदी अपि।** सज्जते"—*SK*. 2291. 'हेतुमति च (३।१।२६) इत्यत्र "यदाभिप्रायेषु **सज्जते**" इति **भाष्य-प्रयोगात्** अयमात्मनेपदी अपि। अतो अस्यात्मनेपदं दूषयन्तो वर्धमान-क्षीरस्वाम्यादय एव दुष्टाः'—*Vidyānidhi* "कोन् खल्वेष निवसने मे **सज्जते**"—*Śak. IV* ; "वचोऽपि परुषाक्षरं न च पदेषु **संसज्जते**"—*Śak. V. qtd. DD in* 'धातुदीपिका'। Vide 195n.—Remark. ('**सज्जते** इति

भाष्यकार-वचनावात्मनेपदम् इति धातुप्रदीपः—*Manoramā*. 'इति मत्वा न सज्जते'—*Gitā. III.* 28, 29. 'कथं न सज्जते सुखेषु राजा'—*Rām. IV.* 33. 57.

Text :— (आकाशे) भो राजन् !

B.T. सायन्तने[1] सवन-कर्मणि[2] संप्रवृत्ते[3]

वसन्ततिलका वेदिं हुताशनवतीं परितः प्रकीर्णाः[4] ।

(तभजजगग) छाया[5]श्चरन्ति बहुधा भयमादधानाः[6]

सन्ध्या-पयोद-कपिशाः[7] पिशिताऽशनानाम्[8] ॥२५॥

(*In the air*)—O king, the vespertine[1] sacrificial-rite[2] being fairly begun[3], the shadowy[5] (*figure*) of the cannibals[8], brown[7] as evening clouds,[7] scattered[4] all around the altar with its (*sacred*) fire (*kindled*),—are stalking about inspiring consternation in various ways. (25)

राजा (आकर्ण्य सावष्टम्भम्)—भो भोस्तपस्विनः ! मा भैष्ट[1] । मा भैष्ट । अयमहमागत एव । (निष्क्रान्तः) ।

King (*Listening, proudly*)—Ho ! Ho ! Ye hermits ! fear[1] not. Fear not. Here I am coming.

(*This said, goes out*).

तृतीयोऽङ्कः
(*Third Act*)

V. L.—'प्रकीर्णा' :—B.M. R's Com. 'विस्तीर्णाः'—Ś. 'प्रयस्ता'—R. V. S. 'सन्ध्यापयोद'—R. V. M. S.. 'सन्ध्याकूट'—B. 'भो भो' &c.—Only B. HS. 'अयमहम्'—B. Dr. R. S. 'अयमयम्'—M. 'आगतः'—B. HS. Others—"आगच्छामि" ।

सायन्तन इति । सायं भवम् इति 'सायन्तनं'—(४।३।२३) तस्मिन् सन्ध्याकालीने ("यावज्जीवमग्निहोत्रं जुहोति, यदग्नये च प्रजापतये च सायं प्रातर्जुहोति" इति श्रुतेः सायन्तन इति) 'सवन-कर्मणि' ("सवनं त्वध्वरे स्नाने सोमनिर्दलनेऽपि च' इति मेदिनी) 'सं' सम्यक् 'प्रवृत्ते' प्रचलिते, न तु केवलं कर्मारम्भे (भावे ७मी) 'हुताशनवतीम्' अग्नि-सनाथां 'वेदी' परितः' वेद्याः समन्ततः सर्वासु दिक्षु इति यावत् ('समन्ततस्तु परितः सर्वतो विश्वगित्यपि" इत्यमरः) 'प्रकीर्णा' इतस्ततः

विक्षिप्ताः 'संध्या-पयोदः' सायंकालीन-मेघ इव 'कपिशाः' श्यावाः कृष्ण-पीतवर्णाः ('श्यावः स्यात् कपिश' इत्यमरः) 'पिशितं मांसं (**पिशितं मांसं**, पिशिता मांसिका' इतिहैमः) 'अशनं' येषां तादृशानां 'छायाः' **लक्षणया छायामय्यःआकृतयः**,प्रतिविम्बस्य सर्वथा कृष्णवर्णत्वात्। 'बहुधा' बहु-प्रकारेण 'भयम् आदधानाः' भीतिम् उत्पादयन्तः 'चरन्ति' इतस्ततः भ्रमन्ति (परिप्रेति पिशापिशीति **छेक-वृत्ति-श्रुत्यनुप्रासाः।** **उपमा** च। 'हुताशनवतीम्'इत्यनेन **छाया-दर्शन-सम्भव** उक्तः। अतो **नापुष्टार्थत्व-दोषः**। **वसन्ततिलका** वृत्तम्। अत्रापि **भयानको रसः**) ॥ (२५) ॥ **राजेति।** अवष्टम्भेन सह इति 'सावष्टम्भम्' और्जित्वेन सह। सगर्वमित्यर्थः। ('ष्टभि स्तम्भे'। 'स्तम्भु रोधने' (सौत्रः) वा। 'अवाच्चाऽऽलम्बनाऽविदूर्ययोः'— (८।३।६८; २२७३) इति **षत्वम्**)। 'अयमहम् आगतः एव' तूर्णमहमागमिष्यामि इत्यत्र "आदिकर्मणि निष्ठा वक्तव्या", (वाः—३०५२) इति **भविष्य-दर्थद्योतकः** क्त-प्रत्ययः)।

॥ इति गौतम-श्री–रमेन्द्रमोहनवसु-विरचितायामभिज्ञान-शकुन्तल-टीकायां कुमार-सन्तोषिण्यां तृतीयोऽङ्कः समाप्तः ॥

113n.—1. आकाशे—(136n. 1 & 82n. 6). **सायंतने** सायं भवम् इति सायम् +'ट्यु' or 'ट्युल्', also 'तुट्' by 'सायं चिरं प्राह्णे-प्रगे-ऽव्ययेभ्यः ट्यु-ट्युलौ, तुट् च'–4.3.23; (टित्=1. 3. 7; लित्—1. 3. 3; यु=अनु'—7. 1.1). So also "चिरन्तन", "सनातन", 'सदातन', 'पुरातन' 'अद्यतन', 'दोषातन' &c. The feminine form is 'सायन्तनी' by 'टिड्ढाण्'—(4.1.15). **2. संप्रवृत्ते**—Progressing well. (25n. 1). Generally the demons come to the place of sacrifice when the rites have progressed well and the smokes can be seen from afar. Cf. 'दक्षिण्यदिप्तं कृतमार्त्विजीनैः तत् यातुधानैः चिचिते प्रसर्पत्'—*BK. II.* 29. **हुताशनवतीं**—अश्नाति इति अशनः, नन्द्यादित्वात् ल्युः—(3. 1. 134). Next 'हुतस्य अशनः' हुताशनः (६ष्ठी तत्) =Fire, that eats what is poured as an oblation, or हुतम् (=हविः–भावे क्तः) अशनम् यस्य सः। Next मतुप्। **हुतम् अश्नाति यः** सः, will give '**हुताशः** with' 'अण्' by 'कर्मण्यण्'—(3. 2. 1); **बहुधा**—By howling or by pelting (bones) &c.—HS. R connects it with चरन्ति—Repeatedly moving (अनेकवारं गतागतं कुर्वन्ति)। **4. सन्ध्या** &c.=**कपिशाः**—"*Ape-coloured*"—*M*. "Brown or yellowish black."

"कपि वर्णविशेष:। सोऽस्यातिं। लोमादित्वात् (5. 2. 100.) श:"। **'कपि: मर्कट:। तद्वर्णत्वादिति वा*** कृष्ण-पीतस्य द्वे"**—*BhD.* **छाया:**—Shadowy figures.

Time-analysis of Act. III.—In the last act we have seen the king starting for the hermitage of Kaṇva to fight against the Rākṣasas, but his mere presence accompanied by the twang of his bow string-was sufficient to dispel them. Still at least *one day* he must have lived there. After this we find both Śakuntalā ['स्तनन्यस्तोशीरं प्रशिथिलमृणालैकवलयम्' &c., also 'क्षाम-क्षाम-कपोलमाननमुर:' &c.] and our king ['इदमशिशिरैरन्तस्तापात्'—&c. 'also' 'ननु स राजर्षि: प्रजागरकृश: लक्ष्यते'] much emaciated and reduced in health [*Cf. his present health with* 'गिरिचर इव नाग: प्राणसारं बिभर्ति—*II.* 4.] At least *two weeks* may be supposed to have passed before the pangs of love could have produced such a *remarkable* change in their persons. The **summer season is continued** even in this act ('न तु ग्रीष्मस्यैवम् सुभगमपराद्धं युवतिषु' ; 'किमयमातपदोष:' ; 'दिवस इवाभ्रश्याम: तपात्यये') । The act begins in the noon-tide (*Cf.* 'इमाम् उग्रातपवेला' &c.— and the amorous affair of the king and Śak. continues till afternoon. ('राजा—सुन्दरि ! अपरिनिर्वाणो दिवस:'), and ends in the evening (*Cf.* वत्से, परिणतो दिवस: ; उपस्थिता रजनी' ; 'सायन्तने सवनकर्मणि' &c.).

चतुर्थोऽङ्कः

(ततः प्रविशतः कुसुमाऽवचयमभिनयन्त्यौ सख्यौ)

अनसूया—हला पिअंवदे, जइ वि गन्धव्वेण विवाह-विहिणा णिव्वुत्त-कल्लाणा सउन्दला अणुरूव-भत्तु-गामिणी संवुत्तेति णिव्वुदं मे हिअअं, तहवि एत्तिअं चिन्तणिज्जं (हला प्रियंवदे, यद्यपि गान्धर्वेण विवाह—विधिना निर्वृत्त-कल्याणा[1] शकुन्तला अनुरूप-भर्तृ-गामिनी[2] संवृत्तेति[3] मे हृदयम्, तथापि एतावच्चिन्तनीयम्) ।

(*Enter the two friends [of Śakuntalā] gesticulating the culling of blossoms.*)

Anasūyā—Dear Prayaṁvadā, though my heart is comforted, because Śakuntalā, with[1] her happiness achieved by the Gāndharva mode of marriage, has become united[3] with[2] a husband (*in every respect*) worthy (of her)[2], nevertheless this much is to be thought of.

प्रियंवदा—कहं विअ (कथमिव)। Priyaṁvadā—What's that ?

अनसूया—अज्जो सो राएसी इट्टिं परिसमाविअ इसीहिं विसज्जिओ अत्तणो णअरं पविसिअ अन्तेउर-समागदो इदोगदं वुत्तन्तं सुमरदि वा ण वेत्ति (अद्य स राजर्षि रिष्टि[4]परिसमाप्य ऋषिभिर्विसृष्टः[5] आत्मनो नगरं प्रविश्य अन्तःपुर-समागतः [6]इतोगतं वृत्तान्तं [6]स्मरति वा न वेति) ।

Anasūyā—Being discharged[5] by the sages to-day after the completion of sacrifice[4] whether that royal sage, having entered his capital and met with the ladies of seraglio, would remember or not, the[6] incidents that had transpired here[6].

V. L—'नाटयन्त्यौ'—R. V. S. 'अभिनयन्त्यौ'—B. M.HS. 'विधिना' —R. V.—'विवाहविधिना—B. M. D ; B has '०भागिणी' for '०गामिनी' ।

[अथ चतुर्थाङ्कादि-पञ्चम-मध्ये "यथोक्तं करोति" इत्यन्तेन गर्भसन्धिरुक्तः । तल्लक्षणं यथादिभरते—'उद्भेदस्तस्य बीजस्य प्राप्तिरप्राप्तिरेव च । पुनश्चान्वेषणं यत्र स गर्भः परिकीर्तितः' ।। पुर्वसंध्युपक्षिप्ताप्तिः । दुर्वाससः शापात् अप्राप्तिः । पुनस्तस्य प्रसादेन अभिज्ञान-दर्शनेन पुनः प्राप्तिरिति—राघवचरणाः] ।। [दर्पण-

-कारमते तु एतदारभ्य **षष्ठाङ्क-समाप्ति-पर्यन्तो विमर्ष-सन्धिः।** "यत्र मुख्य-फलोपाय उद्भिन्नः गर्भतोऽधिकः। शापाद्यैः सान्तरायश्च स **विमर्ष** इति स्मृतः"—इति तल्लक्षणात्। **तेनैव चैतदुदाहृतम्**]। **तत इति।** 'कुसुमानां' पुष्पाणाम् 'अवचयं' सग्रहम् (अव-पूर्वात् चिनोतेः भावे **'एरच्'**—(३।३।५६)—इति अच्)। 'हस्तादाने चेरस्तेये'—(३।३।४०)—इति घञि कृते **'अवचाय'** इति भाव्यम्। परन्तु कविना अयं प्रयोगः विवक्षा-हेतुना उपेक्षितः। **कविनानेन बहवः अपाणिनीयाः वैदिकाश्च प्रयोगा प्रयुक्ताः, तस्य सुप्राचीनत्वात्।** **अनसूयेति।** 'निर्वृत्तं' सम्पन्नं 'कल्याण' विवाह-मङ्गलं यस्याः तथोक्ता सती, शकुन्तला 'अनुरूपं' योग्यं 'भर्तारं' साधु गच्छति [इति गमेः साधुकारिणि–(२।३।७८)—णिनिः। 'क्षुभ्नादित्वात्–(८।४।३९)–न णत्वम्। विस्तरस्तु अग्रे द्रष्टव्य.]। या तादृशी 'सवृत्ता') जाना 'इति' हेतुना 'निर्वृतं' सुखितं चिन्तारहितम् इत्यर्थः 'मे हृदयं तथापि एतावत्' अग्रिम वक्ष्यमाण 'चिन्तनीयं' विवेचनीयम्। **अनसूयेति।** 'इष्टि' याग [यजतेः क्तिन्। सम्प्रसारणञ्च—(६।१।१५)] 'अन्तःपुरैः" लक्षणया अन्तःपुर-स्थिताभि. पत्नीभिः 'समागतः' मिलितः सन्, 'इतोगतम्' अत्रस्थ-शकुन्तला-परिणय-व्यापार 'स्मरति'—(३।३।१३१)–स्मरिष्यति 'न वा इति' एतत् एव चिन्तनीयमित्यनुषङ्गः। (अनेन वक्षयमाणेन दुर्वाससः शापेन राज्ञः नायिका-विस्मरण-कारण सूचितम्)।

114n.—1. कुसुमाऽवचयं—अव+चि+अच् भावे=अवचय —Culling. But the formation of this word is a **grammatical irregularity** according to Pāṇini. For, by 'हस्ताऽऽदाने चेः अस्तेये'—(3. 3. 40), 'घञ्' comes after 'चि', causing **'वृद्धि'** of the radical vowel, when something is taken **by the hand**, excepting the cases of **stealth** (अस्तेये)। 'चयनीय-पदार्थस्य **हस्त-चयनार्थे,** चि-धातोः परः, कर्तृ-भिन्न-वाच्ये घञ्-प्रत्ययः स्यात्, न चेत् तत् चयनं चौर्यं भवति'—**Prabhā.** Hence the regular form is **'अवचाय'** and not **'अवचय'**। Cf. 'अविरत-कुसुमा-**ऽवचाय**-खेदात्—*ŚPB VII.* 71 ; 'अन्यत्र यूयं कुसुमाऽवचायं कुरुध्वमत्राऽस्मि करोमि सख्यः'—*MB. VM* opines that the forms **'अवचय'** and **'अवतर'** are used by the **fools.** Cf. 'अवताराऽवचाय-शब्दयो. **दीर्घ-व्यत्यासो बालानाम्**'—*KSV.* 2. 40 ; *HD* in his *PM* first of all, justifies the uses of **'अच्'** thus—"हस्तादाने इति किम् ? **वृक्ष-शिखरे पुष्प-प्रचयं करोति'** i e. when the flowers are **out of reach** and are culled not directly with **hands** but by means of a **hook.** Later

grammarians follow *HD* (*SK.* 3212). 'हस्त-चयने किम् ? वृक्षाग्र-स्थितानां फलानां यष्ट्या प्रचयं करोति'—**Prabhā**. *R,* however, remarks thus—'As the flowers were out of reach, (आदेयस्य प्रत्यासत्त्यभावाद् घञाभावः) they were culled by '*climbing the tree*' but this is not at all befitting young girls like Anasūyā and Priyaṁvadā. Kāli. has **already used** 'अवचय' in *Māla.* Cf. 'वयस्य, एषा कुसुमावचय-व्यग्र-हस्ता सख्यास्ते इरावत्याः परिचारिका चन्द्रिका सन्निकृष्ट मागच्छति)'—*Act IV,* and there '**हस्त**' **has been explicitly used** which fact also totally demolishes the previous arguments. In fact it is an **archaic** form frequently used by old writers. Cf. 'तया सह पुष्पावचयं ग्रथनं' &c.—*KS. II.* 3. 5 ; 'यावदहमपि कुसुमावचयं करोमि '—*SV. IV.* ; also 'कुसुमावचयं नाटयति'–*Rat. I* ; 'पुष्पावचयव्यग्रा' —*UC. III.* 2. **अभिनयन्त्यौ**—Is preferable to "नाटयन्त्यौ" (R), as a little after we have 'अनसूया—ननु प्रियसख्याः शकुन्तलायाः सौभाग्य-देवता अर्चनीया। प्रियंवदा—युज्यते। (तदेव **कर्माभिनयतः**)' । 3. **गान्धर्वेण**— (108n. 3.) 4. **निर्वृत्त-कल्याणा** &c.—निर्+वृत् (वर्तने)+क्त कर्तरि= निर्वृत्तम्—performed. 'सिद्धे निर्वृत्त-निष्पन्नौ"—*AK* ; *Rām. I.* 18. 1. **निर्वृतम्**—(निर्+वृ+क्त कर्तरि) means '**satisfied**'. Cf. 'निर्वृते स्वः'–*III. Supra* ; *Ra. XII.* 65 ; *XI* 38 ; *MK. VIII.* 7. 'कल्यं' नीरुजत्वम् (*absence of disease*) आणयति इति अण् (3.2.1.) or'कल्ये' प्रभातकाले अण्यते (अण् शब्दे इति घञ्—*BhD*)=**कल्याणम्**—People generally inquire about one's health or good luck when they meet in the morning. **भर्तृ-गामिनी**—Cf. 'सदृश-भर्तृगामिनी भविष्यति'—*Māla. V.* '**न**' **is not changed into** '**ण**' by '**क्षुम्नादिषु च**' (8. 4. 12). For reasons *Vide* (127*n.* 6). 5. **इष्टि**'—यज्+क्तिन् कर्मणि=इष्टिः–Sacrifice. (य=इ, by 'वचि-स्वपि-यजादीनां किति'—6. 1. 15—किति किम् ? यज्+तुम्=यष्टुम्) 6 **अथ ऋषिभिर्विसृष्टः** &c.—Anasūyā rightly thinks that the king may forget Śak. when he will be amidst the inmates of his royal seraglio. This is but a **repetition of her apprehension** which she had already expressed in the last act. Cf. 'वयस्य, बहु-वल्लभा राजानः श्रूयन्ते। यथा आवयोः प्रियसखी बन्धु-जन-शोचनीया न भवति तथा निर्वाहय'— *p.* 272. **इतोगतं वृत्तान्तम्**—Incidents that transpired here,

स्मरति=स्मरिष्यति by 'वर्तमान-सामीप्ये वर्तमानवद्वा'—(3.3.131); वृत्तान्तं—No षष्ठी with 'स्मरति' by' अधिगर्थ-दयेशां कर्मणि'—(2. 3. 52) as the idea of शेषत्व is absent. Vide (27n. 3).

Remark—According to *R*, **'गर्भसन्धि'** begins from the *beginning* of the **fourth act** and extends to the **middle of the fifth act.** (Śl. 19 ; *Com*). But an authority like *VK* exemplifies it as a case of **विमर्षसन्धि**—(Peripateia)—'यत्र मुख्य-फलोपाय उद्भिन्नः गर्भतोऽधिकः । शापाद्यैः सान्तरायश्च स विमर्ष इति स्मृतः । यथा **शाकुन्तले** चतुर्थाङ्कादौ 'अनसूया—पिअंवदे ! जइवि गन्धव्वेण * * * चिन्तणिज्जम्' **इत्यतः आरभ्य सप्तमाङ्कोपक्षिप्तात्** शकुन्तला-प्रत्यभिज्ञानात् प्रागर्थसञ्चयः शकुन्तला-विस्मरण-रूप-विघ्नालिङ्गित.'—*SD. VI* ; (because the means of gaining the end are hindered by the imprecation of Durbāsā). According to this view प्रतिमुख-सन्धि sems to end with 'स्निग्ध-जन-संविभक्तं हि दुःखं सह्य-वेदनं भवति'—*p.* 245 ; and गर्भसन्धि' beginning with *Act. III.* 8, extends up to the close of the same act.

Text :—**प्रियंवदा—एत्थ दाव वीसद्धा होहि** (अत्र तावत् विस्रब्धा¹ भव) । (**ण हि तादिसा आकिदि-विसेसा गुण-विरोहिणो होन्ति ।**) **किन्दु तादो दाणि इमं वुत्तन्तं सुणिअ ण आणे किं पडिवज्जिस्सदि त्ति ।**
(न हि तादृशा आकृति-विशेषा गुण-विरोधिनो³ भवन्ति । किन्तु तात इदानीमिमं वृत्तान्तं श्रुत्वा न जाने किं प्रतिपत्स्यते⁴ इति) ।

Priyaṁvadā—On that score be at ease[1]. Never are such noted[2] forms opposed to merit[3] (*they show*). But (*I*) cannot say what father (*Kaṇva*) will do[4] now, on hearing this affair.

अनसूया—जह अहं देक्खामि, तह तस्स अणुमदं भवे
(यथा अहं पश्यामि तथा तस्य अनुमतं भवेत्) ।
Anasūyā—So far as I see, it will be approved of by him.
प्रियंवदा - कह विअ (कथमिव) । Priyaṁvadā—Why so ?
अनसूया—गुणवदे कण्णआ पडिवादणिज्जेत्ति अअं दाव पढमो सङ्कप्पो । तं जइ देव्वं एव्व संपादेदि, णं अप्पआसेण किदत्थो गुरुअणो ।
(गुणवते कन्यका प्रतिपादनीया¹ इत्ययं तावत् प्रथमः सङ्कल्पः² । तं यदि दैवमेव सम्पादयति, ननु अप्रयासेन³ कृतार्थो⁴ गुरुजनः) ।

Anasūyā—It is the prime object[2] (*of parents*) to bestow a daughter to an accomplished (*bridegroom worthy of her*). If fate itself brings about the same, why ! the parents have[4] (*their*) objects realized[4] without[3] (*any*) trouble.[3]

प्रियंवदा—एव्वं णेदं । (पुष्पभाजनं विलोक्य)—**सहि ! अवइदाइं बलि-कम्म-पज्जत्ताइं कुसमाइं ।**

(एवमेतत् । सखि! अवचितानि[5] बलि-कर्म पर्याप्तानि[6] कुसुमानि) ।

Priyaṁvadā—So it is. (*Looking at the flower-basket*)

Friend ! flowers sufficient[6] for the rite of worship[6] have been culled.[5]

अनसूया—णं पिअसहीए सउन्दलाए सोहग्ग-देवआ अच्चणीआ

(ननु प्रियसख्याः शकुन्तलायाः सौभाग्य-देवता[7] अर्चनीया) ।

Anasūyā—But the (*guardian*) deity[7] of Śakuntalā's fortune[7] (*is*) also to be propitiated.

प्रियंवदा—जुज्जदि (युज्यते) । (तदेव कर्माभिनयतः) ।

Priyṁvadā—Just so. (*Both gesticulate the same act.*)

(नेपथ्ये)—**अयमहं भोः** (*In the post scenium*)—It is I, ho there !

अनसूया (कर्णं दत्त्वा)—**सहि ! अदिधीणं विअ णिवेदिदं ।**

(सखि) ! अतिथीनामिव निवेदितम्[8]) ।

Anasūyā (*Leaning her ear*)—Friend ! the voice[8] is like that of a (*revered*) *guest*.

V. L.–'किन्तु'–Only Mackenzie Mss, supported by K. 'अप्रयासेन' —R. V. S. 'अल्पायासेन'—M. Omitted by B. 'अभिनयत.'—B. 'आरभेते' R. V. M. S.—'अतिथीनाम्'—R. V. S. 'अतिथिना'—B. M. P. Dr.

प्रियंवदेति । 'विस्रब्धा' विश्वास-युक्ता अर्थात् त्यक्त-शङ्का । 'तादृशा' दुष्यन्त-सदृशा 'आकृतीनां विशेषाः' उत्कृष्टा आकृतयः इत्यर्थः । 'गुणविरो-धिनः' गुण-विसम्बादिनः गुणहीना 'न भवन्ति' अर्थात् कृत-कार्य-स्मरणादिक धर्मं न त्यजन्ति इत्यर्थः । (तथाचोक्तं वृहत्-संहितायां वराहेण-"प्रायो विरूपासु भवन्ति दोषा, **यत्राकृति स्तत्र गुणा वसन्ति**" ॥ अग्निपुराणेऽप्युक्तं-"**यत्राकार स्ततो गुणा**" इति । अपि चोक्तं 'रूपमेवास्यैतन्महिमान व्याचष्टे' इति; अतस्तस्मिन् दुष्यन्ते वञ्चना-विस्मरणादिकं न सम्भाव्यते इत्याशयः । 'किन्तु इदानी तातः'- अनुज्ञां विनैव सम्पादिते विवाहे 'इमं वृत्तान्तं' शकुन्तलायाः आत्मदान-वार्ता 'श्रुत्वा किं प्रतिपत्स्यते' किं मंस्यते । तातस्य अयं विवाहः अनुमतः भवेत् न वेति मे सशया-

-कुलं मन इत्यर्थः। **अनसूयेति**। 'यथा' इति योग्यताया ('**यथेति योग्यता**-वीप्सा-पदार्थानुवृत्ति-सादृश्येषु' इति दण्डनाथः) 'पश्यामि' (दृशिरत्र ज्ञानार्थः—योग्यतया अहं जानामि) 'तथा तस्य अनुमतम्' अनुमोदितं 'भवेत्'। 'कन्यका गुणवते' कुल-शीलादि-सम्पन्नाय पात्राय ("विशेषण-मात्र-प्रयोगो विशेष्य-प्रतिपत्तौ" इति वामनोक्ते.) 'प्रतिपादनीया' देया ('विश्राणनं **वितरणं** स्पर्शनं प्रति-**पादनम्**" इत्यमरः)। 'इति प्रथम.' प्रधानः मुख्य इत्यर्थः ('**प्रथमस्तु भवेदादौ प्रधानेऽपि** च वाच्यवत्' इति मेदिनी) 'सङ्कल्प.' अभिलाषः, कन्यकाया गुरुजनस्य इति भावः। (तथा चोक्त "**कन्या** वरयते **रूपं, माता वित्तं, पिता श्रौतं। बान्धवाः कुलमिच्छन्ति,** मिष्टान्नमितरे जनाः")। 'तं' सङ्कल्पं 'यदि दैवमेव' कन्यकायाः सौभाग्य-दैवतम् एव 'सम्पादयति' सफलं करोति 'ननु' इति अवधारणे 'अप्रयासेन' चेष्टां विना एव 'कृतार्थ.' सफलकामः गुरुः' एव जन.' पिता इत्यर्थः ('**गुरुः पिता** गुरुर्विप्र' इति गदसिंहः); अस्मादेव पितुः रोष-सन्देहः न कार्य.। **प्रियंवदेति**। 'वलि-रूप' पूजोपहार-रूपं 'कर्म'। ('वलि. दैत्योपहारयोः' इति हैमः)। तदर्थं 'पर्याप्तानि' प्रभूतानि। 'अर्वचितानि' उद्गृहीतानि। अतः अधिकेन किम्? **अनसूयेति**। 'ननु' इति आक्षेपे प्रश्ने वा। 'सुभगायाः भाव.' इति सौभाग्यम् ('हृद्-भग-सिन्ध्वन्ते पूर्वपदस्य च'—(७।३।१९; ११३३) इति **उभय-पद-वृद्धिः**) 'सोभाग्यस्य' 'देवताः' या अर्चिताः स्त्रीणां प्रेमास्पदत्वं निष्पादयन्ति तादृश्यः देवता इत्यर्थः (इति **विद्यासागरचरणाः**)। "षष्ठीका-गौरी-प्रभृतयः"—(इति शङ्करपादाः)। 'अर्चनीया' यतः तदर्चनेन शकुन्तलायाः पति-गृहे सौभाग्यं स्यात्। **अयमिति**। 'अयं' भवत्-प्रत्यक्षभूतम् 'अहम्' आगतोऽस्मि इत्यर्थः। **अनसूयेति**। 'निवेदितं' निवेदनम् ('नपुंसके भावे क्तः'—३।३।११४) 'अतिथीनाम्' इति शेष-विवक्षया षष्ठी। पक्षे तृतीया।

115n.—1. आकृति-विशेषाः &c.—आकृतिः is 'external feature.' "इङ्गितः हृद्गतो भावः, '**आकारो बहिराकृतिः**'। 'विशेष' means '*the best*'-(33n 2). आकृतीनां विशेषाः (षष्ठीतत्)–The best features i. e. persons having best features. ('भावानयने द्रव्यानयनम्'—*MN on Ku. V.35*; ***Ra. VI.5***)

2. **न गुण-विरोधिनः** &c.—Excellent features and inner qualities are always concomitant. The one can be inferred to exist from the presence of the other. Hence though I may not be acquainted with the inner qualities of Duṣyanta, yet this much can be said from seeing his excellent features, that he will not prove false to

Śak. This is a **cosmopolitan** conception. Cf. 'यदुच्यते पार्वति ! पापवृत्तये, **न रूपमित्यव्यभिचारि** तद्वचः। तथाहि ते शीलमुदारदर्शने ! तपस्विनामप्युदेशतां गतम्'—*Ku. V.* 36. 'न **सुरूपा पाप-समाचारा** भवन्ति'—*qtd. MN.* 'घोणोन्नतं मुखमपाङ्ग-विशाल-नेत्रं, नैतद्धि भाजनम् अकारण-दूषणानाम्। नागेषु गोषु तुरगेषु तथा नरेषु, नहि **आकृतिः** सुसदृशं **विजहाति** वृत्तम्'—*MK. IX.* 16. ''बालिके ! कल्याणिनी तवा**विसंवादिनी** अचपला बालभावे अप्या**कृति**रियम्''—*Kād. p.* 568. '**सेयमाकृतिः** न **व्यभिचरति** शीलम्'—*DC.* VI. '**आकार-सदृश-प्रज्ञः**'-*Ra.I.*15. 'गणदासः—आकृति-विशेष-प्रत्ययात् एनाम् अनूनवस्तुकां संभावयामि' –*Māla*. 1. '**आकार-सदृशं चेष्टितमस्य** कथयति'–*VII.infra.*'आकृतिरेव चानुमानयति अमानुषताम्'—*Kād. p.* 513 ; 'यथाकृतिः काचन ते तथापि पीयूषभूजां स नाभिः"—*NC. VIII.* 28 ; *II.* 51. 'There is **no ill** that can dwell **in such a temple**—If the ill spirit have so fair an house, good **thing** will strive to dwell with it'—**Tempest**. *I.* 2 ; 'Therefore whenever that thou doest behold, A comely corpse with beautie, **faire endewed**, Know this for certaine, that the same doth hold, **A beauteous soule.** * * For **all that fair is**. is by **nature** good'—**Spenser**, 'The Moor is of a free and open nature. That thinks men honest that **but** seems to be so'—**Othello**. *I.* 3. 'Certain, men **should be** what they seem'—**Ibid**. III. 3. 'Handsome is what **handsome** looks'—**Goldsmith**. But also **contrast**—'All that **glitters** is not gold, Often have you heard that told ; Many man his life hath sold. But my outside to behold : Gilded tombs do worms infold'—**Merchant of Venice**. *II.* 7 ; "All thing, which that shineth as the gold Ne is no gold, as I have heard it told"—**Chaucer**. (The Chanones Yemannes Tale, Line, 243). "Gold as is not that doth golden seem"—**Spenser, Faerie Queene** (II. Canto VIII. 14). "All as they say, that glitters is not gold"—**Dryden (Hind and Panther)**. ="Tout ce qui brille n'st pas d'or" —**French** Proverb ; "Ne fsio to zoloto chto blestit"—Do **Russian.** **"All is not golde** that out-ward **shewith bright"— Lydgate,**—(On the Mutability of Human Affairs), 'Miṇṇubadu Ellām Poṇṇalla—**Tamil Proverb**='Hikari Mono Kanarazushi

Mokin To Wa Kagira Nai'—Do—**Japanese** ; "Yo To O Kakage Te Kunniku O Uru"—(White gloves often conceals dirty hands)—Ibid ; "There's no art To find the mind's construction in the face. He was a gentlman on whom I built An absolute trust'—**Macbeth.** 1.4. '**मनोहराकृतयोऽपि लोक-विनाश-हेतवः**–*Kād. p.* 421 ; But again 'स्वप्नेऽपि अविसंवादिन्यो भवन्ति आकृतयः किमुत साक्षात्'—*Ibid—p.* 638. **प्रतिपत्स्यते**—What he will think of the matter' ; 'what he will do', 'whether he will ratify it'—*M. Cf.* 'तातो वाम्बा किं नु खलु भणिष्यतीति आविग्नेव संवृत्ता'—*SV. VI.* ; *also VI.* 4. *Now* read (170*n.* 2). 3. **गुणवते कन्यका**—(22n. 2) &c.—Anasūyā now brings forth reasons in support of her inference. Gene--rally when a person is learned (meritorious), and at the same time possesses money, he is considered to be a suitable (अनुरूप) bride-groom, and to such a person a daughter should be given in marriage. In this particular case Duṣyanta has both, so there is no reason why the marriage should not be approved of by the superiors.–'अशोच्या हि पितुः कन्या **सद्भर्तृ**–**प्रतिपादिता**'–*KU.VI.*79. **4. सङ्कल्पः**=Resolve—Cf. सङ्कल्पितं &c.—IV. 13. infra **अप्रयासेन** —Implies 'entire **absence** of exertion.' Cf. 'नञ्भावे **निषेधे** च स्वरूपार्थेऽप्यतिक्रमे। ईषदर्थे च सादृश्ये तद्विरुद्ध-तदन्ययोः'–*Medinī.* **5. गुरुजनः** —Refers to Father Kāśyapa. Cf. "गुरोः पुनरस्याः अनुरूपः वरप्रदाने सङ्कल्पः"—*p.* 112. **6. ननु**—Disapproves (परमताक्षेप) the statement that sufficient flowers have been culled, or take it as a mere query. 7. **अभिनयतः**—'आरभेते' of (R.M.) is **rejected** as this without 'पुनः' before it, **contradicts** the previous statement—'अपचितानि वलिकर्मपर्याप्तानि' &c. **अयमहं भोः**—The construction of this Elliptical sentence is thus—'अयम् अहम् आगतः, भोः कोऽत्र वर्तते' ? After salutation a Brāhmaṇa should address his superior saying "असौ नामाहमस्मीति स्वं नाम परिकीर्तयेत्"–*MS. II.* 122 ; 'स्व-नाम प्रोच्य अहमभिवादये"—*Gautama.* Also 'भो शब्दं कीर्तयेदन्ते स्वस्य नाम्नोऽभिवादने। नाम्नां स्वरूपभावो हि भो-भाव ऋषिभिः स्मृतः"—*MS. II.*

124 ; **'असौ अहम् भोः** इत्यात्मनो नामादिशेत'—*Sāṅkhāyana*. **8. 'अतिथीनां निवेदितम्** **'छात्रस्य**-हसितम्', **'मयूरस्य** नृत्यम्', इति सम्बन्ध-विवक्षया **षष्ठी, कारक-विवक्षया** तु **छात्रेण** हसितम्'—**Prabhā**.

Text—प्रियंवदा—णं उडजे सण्णिहिदा सउन्दला (ननु उटजे सन्निहिता शकुन्तला)। (आत्मगतम्) **आं, अज्ज उण हिअएण असण्णिहिदा** (आम्, अद्य पुनः हृदयेन असन्निहिता)। Priyaṁvadā—Well, near the cottage is Śakuntalā. (*Aside*) Ah! to-day, however, not with her heart near.

अनसूया—होदु, अलं एत्तिएहिं कुसुमेहिं (भवतु, अलम् एतावद्भिः कुसुमैः)। । (प्रस्थिते)।

Anasūyā—Well, enough (*are*) these blossoms. (*They set out*).

(नेपथ्ये)—**आ अतिथि-परिभाविनि**[1] !

विचिन्तयन्ती यमनन्य-मानसा[2]
वंशस्थ **तपोनिधिं वेत्सि न मामुपस्थितम्।**
(जतजर) **स्मरिष्यति त्वां न स बोधितोऽपि**[3] **सन्**
कथां प्रमत्तः[4] **प्रथमं कृतामिव ॥१॥**

(*In the tiring room*)—Ah! (*ye*) affronter[1] of guests! The very person of whom thou thinkest, with[2] a mind heedless of anything else[2], and reckest not me, who (*am*) the repository of penance (*and*) have arrived near,—should not, though[3] reminded, recognise thee, just as a bedlamite[4] (*or a sot*) denies, or (*does not recall*) the words, uttered previously (*by himself*). (1)

V. L.—'आम्'—B. Dr. HS. 'तपोधनम्'—R. V. M. 'तपोनिधिम्'—B. S. P. HS.

प्रियंवदेति। 'ननु' इत्यवधारणे (**'ननु** प्रश्नेऽप्यनुनयेऽनुज्ञानेऽ **प्यवधारणे'** इति विश्वः)। 'सन्निहिता' समीपवर्तिनी 'शकुन्तला', सा एव यथाकर्तव्यं विधास्यति, नावयोः कस्याश्चित् गमनावश्यकता इत्यर्थः। 'आम्' इति स्मरणार्थकमव्ययम्। ('आम् ज्ञान-विनिश्चये' इति वोपालितः)। अद्यः 'पुनः' दुष्यन्तस्य स्वनगरः-प्रस्थितत्वात् तद्विरहितेन 'हृदयेन असन्निहिता' समीपे अविद्यमाना। 'हृदयेन' इत्यत्र **अभेदे करणे तृतीया।** तस्या हृदयम् असन्निहितम् अर्थात् भर्तृ-गत-हृदया सा किमपि न जानातीत्यर्थ.। **अनसूयेति।** 'कुसुमैः अलम्' (**'गम्यमानापि क्रिया** कारक-विभक्तौ प्रयोजिका' इति **करणे ३या,** ५६८)। **नेपथ्य इति।** 'आः' इति कोपे 'अतिथिं परिभवति' न आद्रियते या सा 'अतिथि-परिभाविनी'

तत्सम्बुद्धौ–८।४।३४) ('अनादरः परिभवः' इत्यमरः)। **विचिन्तयन्तीति।** 'अनन्य-मानसा' दुष्यन्त-भिन्ने अन्यस्मिन् विषये न मानसं यस्याः तादृशी त्वं 'यं' जनं दुष्यन्तम् इत्यर्थः। 'विचिन्तयन्ती'—(७।१।८१) विशेषेण भावयन्ती सती, 'तपोनिधिं' तपसा-माधार-भूतम् ('नितरां धीयते। धाञः किः–(३।३।८२), "निधिर्ना शेवधिः" इत्यमरः। अनेन आत्मनोऽतिमहत्त्वम्, अनादरे दोषाधिक्यं च व्यज्यते) 'मां' दुर्वाससम् 'उपस्थित' स्वेच्छया अत्राश्रमे आगतमपि 'न वेत्सि' नानुभवसि न सत्करोषि इतिभावः, 'स' तव चिन्ताऽऽस्पद-भूतः दुष्यन्तः 'प्रमत्तः' प्रकर्षेण उन्मत्तः 'प्रथमम्' उन्मादावस्थायाः, पूर्वं 'कृताम्' उच्चरिताम् 'कथामिव बोधितोऽपि' वचनैः स्मारितोऽपि 'सन् त्वां न स्मरिष्यति' कृत-सम्पर्कतया नानुभविष्यति। (स त्वां न स्मरिष्यत्येव, परं बोधितोऽपि त्वां न स्मरिष्यति इति अपेरर्थः। **राज-पक्षेऽपि विशेषणानि योज्यानि**) 'प्रमत्तः' अनवधानः जनः ('प्रमादोऽनवधानता' इत्यमरः)। तेन असमर्थदोषः परिहृतः। पूर्वं 'कृताम्' अङ्गीकृताम् इत्यर्थः (**काव्यलिङ्गोपमा-श्लेषाः।** तयतीयेति मनमानेति नससन्निति प्रपेति **छेक-वृत्त्यनुप्रासौ। वंशस्थविलं** वृत्तम्) ॥१॥

116n.—1 अद्य पुनः &c.—Priyaṁvadā utters this speech aside to herself. This is necessary. For, hearing the call of the guest, Anasūyā says to Priyaṁvadā—'Friend, a guest has come, let's go.' Next Priyaṁvadā replies—'Śak. is in the cottage. There is no need of hurry.' But simultaneously with this speech she *remembers* (आम्) that the king has left the hermitage that very day (अद्य), and consequently she must be sad and pensive or absent-minded and may not do the needful. Still at one breath Priyaṁvadā does not like to contradict her previous remark. Hence the speech is aside.—(*R* ; *M* ; *Cappeller*). **2. भवतु**&c.–भवतु (अव्यय)–tones down the remark of Priyaṁvadā, i. e. 'ननु उटजे सन्निहिता शकुन्तला'। The latter speech being uttered *aside*, is not heard by Anasūyā who opines—"The call has come surely from an **honoured guest (अतिथीनां** निवेदितम्–*Mark* the **plural** *number*) so we should no longer tarry for more flowers entirely depending upon Śak. We must immediately repair to the cottage." This is the force of 'भवतु (24n. 8.) 3. **आः**—Implies

anger. Cf. 'आ: क एष मयि स्थिते चन्द्रगुप्त मभिभवितु मिच्छति' ?—*MR. I* ; 'आ जीवति मयि कथमासामात्मनिरपेक्षं चेष्टितम्'—*PC. II*. **4.** **०परिभाविनि**—णत्व-विधान is barred by 'न भा-भू-कमि-गमि-प्यायी वेपाम्'—(8. 4. 34) ; "उपसर्गस्थ-रकारात् परवर्तिभ्यः भा-प्रभृति **सप्त-धातुभ्यः** परवर्ति-कृत्प्रत्ययस्थ-स्वरवर्णात् परवर्ति-नकारस्य **णत्वं** न भवति। भा–प्रभानम् भू–प्रभवनम्"–**Prabhā.** **अनन्य-मानसा** &c.–अविद्यमानम् 'अन्यत्' (अवलम्बनम्) यस्य तत् 'अनन्यम्'। '**उत्तरपद**' (Vide 3n.5) is optionally dropped by the *Vārt*. 'नञो ऽस्त्यर्थानां वाच्यो वा **चोत्तरपद-लोपः**'–830. '**ङीप्** [by 'टिड्-ढ्-अण्-अञ्—4. 1. 15] is barred by "अन् उप-सर्जनात्' (1. 4. 14). "टिड् ढाण् अञ् इति ङीप्। कुरुचरी मद्रचरी। **अनुपसर्जनात** इति किम्। बहु-**कुरुचरा, बहु-मद्रचरा**॥ जातेरिति (4. 1. 63.) ङीष्। कुक्कुटी, शूकरी। **अनुपसर्जनात्** इति किम्। बहु-कुक्कुटा, बहु-शूकरा मथुरा। कथं पुनः उपसर्जनात् प्रत्यय-प्रसङ्गः। **तदन्त-विधिना**। ज्ञापितं च एतत्। **अस्ति अत्र प्रकरणे तदन्त-विधिरिति**"—*KV*. "उपसर्जन-शब्दात् (गौणात् विशेष-रूपेण प्रयुक्त-शब्दात्) परे स्त्रीलिंगे * * **टाप्-प्रत्यय** एव भवति। बहु-कुक्कुटा अटवी।"—**Prabhā.** *Vide* (*SK.*) *S. C. Vasu's Ed. p.* 291. *et seq*. The idea is—I don't say that you can't think of your husband, but what I say is that on no account you should be negligent of your sacred duties, in this particular case, the reception of a hungry guest at noon-tide. Read ' ऋषियज्ञं देवयज्ञं भूतयक्षं च सर्वदा।** **यथाशक्ति न हापयेत्**'–*MS. IV*. 21 ;'**नृ-यज्ञः अतिथि-पूजनम्**'—*II*. 70 ; *St. Luke VIII*. 44-47. *Read NC. VII*. 21 ; 22. **5. तपोनिधि**—"Austerity-treasury, an eminently pious man"—M. '**वसिष्ठ**' is also termed 'तपोनिधिः'. Cf. 'स ददर्श "**तपोनिधि**'—*Ra. I*. 56 ; 'निमित्तज्ञ **स्तपोनिधिः**'—1. 86 ; '**तपोनिधि मीम्**"—*Ra V*. 55 ; "**चरणौ तपोनिधेः**"—XI. 89. 'अथर्वनिधेः'—I. 59. The epithet explains why he deserves ready attention ; refusal of an ordinary guest is a sin and in the case of Durbāsāh, the penance incarnate, it should be considered an unpardonable one (*Com.*). '**तपोधन**', however, is very frequent in Rām. **6.** **उपस्थितम्** –Is also **significant** for the previous reasons. A sage of my stamp does not often frequent your place ; however, out of my own accord. I have graced your lodge, still you **heeded me** not. Thus the

gravity of the insult. **7. स्मरिष्यति त्वां**—(114*n*. 6.). **बोधितोऽपि**—Read the incidents 'beginning with 'ननु एकस्मिन् दिवसे'' &c."—(*Act V*). but as ill luck would have it, these could not revive King's memory. **8. प्रमत्तः**=प्र+मद्+क्त=कर्तरि—(3.4.72). [द=न (8. 2. 42) —**barred** by 'न ध्या-ख्या-पृ-मूर्च्छि-मदाम्'—(8. 2. 57)—'पूर्वसूत्राणाम् अपवादः। मदधन-मत्तः'—**Prabhā**]—A lunatic or a drunkard ; in the case of the king—"**careless**".—(187*n*. 2). **9. कृतामिव** —'**Uttered** ; in the case of king, it means 'अङ्गीकृताम्'—'**Promised.** The king will not remember what he had promised before, i. e. he would send men to escort Śak. to his seragilo. [Read Śl.–"एकैकमत्र दिवसे"—VI. 12. infra]. Cf. the idea :—'Will I with wine and wassail so convince. That **memory**, the warder of the brain, shall be a **fume,** and the receipt of reason, A **limbee** only"-- **Macbeth.** *I. VII.*

Remark—Durbāsā's curse in PP is found as follows— 'यं तं चिन्तयसे बाले मनसाऽनन्यवृत्तिना। विस्मरिष्यति स त्वां वै अतिथौ मौनशालिनीम्' ॥ Note that 'marriage ceremony', 'anathematisation', &c. are **prohibited on the stage**, but this prohibition holds good in all places save 'विष्कम्भक' ; for otherwise the definition of 'विमर्ष-सन्धि' becomes **meaningless.** (114n. Remark). According to GPŚ, the motif of the curse of दुर्वासा: has been suggested to Kāli. (?) by the curse of चन्द्रभार्गव in the *Avimāraka* नाटक of *Bhāsa.*

Text :—**प्रियंवदा—हद्धी हद्धी। अप्पिअं एव्व संवुत्तम्। कस्सि पि पूआरुहे अवरद्धा सुण्ण-हिअआ सउन्दला** (हा धिक्, हा धिक् अप्रियमेव संवृत्तम्। कस्मिन्नपि पूजार्हे अपराद्धा[1] शून्य-हृदया शकुन्तला) । Priyaṁvadā—Alas ! alas ! just the unwelcome (*thing*) has occurred. Some respect-worthy (*person*) has been offended[1] by the absent-minded Śakuntalā.

अनसूया (पुरोऽवलोक्य)—**ण क्खु जस्सि कस्सि पि। एसो दुव्वासो सुलह-कोबो महेसी तह सबिअ अबिरल-पाद-तुवराए गईए पड़िणिवुत्तो** [न खलु यस्मिन् कस्मिन्नपि। एष दुर्वासाः सुलभ-कोपो[2] महर्षिः तथा शप्त्वा अविरल-पाद-

त्वरया गत्या प्रतिनिवृत्तः) । Anasūyā (*Looking ahead*)—Not indeed an ordinary[2] person[2]. It is the easily[3] irascible[3] sage Durbāsāh, so cursing with a quick but short-stepped gait, (*he*) is turned back.

V. L —"अविरल-पाद-त्वरया'—B.P. 'वेग-चटुलोत्फुल्ल-दुर्वारया'—K.M. 'वेगबलोत्फुल्लया दुर्बारया'—R. 'चटुलोत्फुल्ल-दुर्वारया—S.

प्रियंवदेति। 'हा' इति विषादे। तस्यातिशये द्विरुक्तिः ('हा विषादे च शोके च कुत्सा-दुःखार्थयोरपि' इति मेदिनी)। 'धिक्' इति निन्दायाम् ('धिक् निर्भर्त्सन-निन्दयोः' इत्यमरः)। 'अप्रियम्' अनिष्टम्। 'संवृत्तं' संजातम्। 'पूजार्हे' अर्चन-योग्य-जने 'शून्यं' पति-विरहेण बाह्य-व्यापारात् निवृत्तम् 'हृदयं' यस्याः तादृशी। 'अपराद्धा' सम्मानाऽकरणात् अपराद्धवती इत्यर्थः ('गत्यर्थाकर्मक —'(३।१।७२)—इत्यादिना कर्तरि क्त)। **अनसूयेति**। 'न यस्मिन् कस्मिन्नपि' न साधारणे सुलभे-प्रमादे जने इत्यर्थः। 'शकुन्तला अपराद्धा' इति पूर्वेण अन्वयः। 'दुर्वासाः' अत्रि-मुनि-पुत्रः शङ्करांश-जातः (इति श्रीमद्भागवतम्) 'शप्त्वा' अस्यै शापं प्रदाय 'अविरलाः' घनाः 'पादा' पाद-न्यासाः यस्या तादृशी 'त्वरा' यस्यां तथाभूतया 'गत्या' वेगेन 'प्रतिनिवृत्तः' आश्रम-प्राङ्गनात् इति शेषः।

117n.—1. शून्य-हृदया—In the wordings of *Locke*, her heart was, as it were, a *Tabula Rasa*. This epithet explains why she became a sinner (अपराद्धा)—a thing which is otherwise inconceivable. Cf. "यतः प्रभृति * * प्रतिनिवृत्तो महाराज ततः प्रभृति **शून्यहृदय** इव लक्ष्यते"——Vik. II. 'आर्यायाः **शून्य-हृदयत्वेन** जानामि'—MK. II; 'तया तु तत्रागत्य किं कृतं किमभिहितं किमाचेष्टितमिति **शून्य-हृदया** सर्वं नालक्षयम्'—*Kad. p.* 603; "Every object and every obligation which was unconcerned with Cleopatra **passed from his range of vision**"—**-Sydnee Lee 2. पूजार्हे अपराद्धा**—Offended some one whom she was bound to treat with respect. Cf. 'ईप्सित तदवज्ञानात् विद्धि सार्गलमात्मनः। प्रतिबध्नाति हि श्रेयः पूज्य-पूजा-व्यतिक्रमः'—*Ra. I.* 79; (88*n*. 6; 257*n*. 5). 3. **यस्मिन् कस्मिन्**—'यद् शब्द' accompanied by 'किम् शब्द' points to a **negligible something.** She has offended not a negligible person. Cf. 'सूतो वा सूत-पुत्रो वा यो **वा को वा** भवाम्यहम्'—VS. III. 33. **'यस्मै कस्मैचिद्दास्यामि**, न तु अधरस्मै'; **'यानि कानि च मित्राणि'**—*AD*. 4. **दुर्व्वासाः**—So called on account of

his bad **dresses.** 'दुः' दुष्टं वासः अस्य। Or, explain as 'दुः' दुसाध्यः वासः यस्य i. e. who may be made **to stay** with great difficulty. He is the son of *Atri* and *Anasūyā.* His anger like that of *Jāmadagni* has already become proverbial. Cf. "अक्षान्ति-सार-सर्वस्वं दुर्वासिसमवेहि माम्"—VP ; also *Mahā. Vana.* 260-265. **5.** **महर्षिः**—Explain महर्षिः इव महर्षिः इत्युपचारात्, for 'दुर्वासाः' was not actually raised to the status of 'महर्षिः'। Read—'भृगुर्मरीचि रत्रिश्च अङ्गिराः पुलहः क्रतुः। मनुर्दक्षो वसिष्ठश्च पुलस्त्य श्चेति ते दश। ब्रह्मणो मानसा ह्येते उत्पन्नाः स्वयमीश्वराः। परत्वेनर्षयस्तमात् भूतास्त-स्मान्महर्षयः'—*MP.* 120. **6.** **शप्त्वा**—Dilipa also was similarly cursed **for disregarding** 'सुरभि'। Cf. 'प्रदक्षिण-क्रियार्हायां तस्यां त्वं साधु नाचरः॥ अवजानासि मां यस्मात् अतस्ते न भविष्यति। मत्प्रसूति-मनाराध्य प्रजेति त्वां शशाप सा'—*Ra. I.* 76-77.

Remark—Here and in the following lines, in the *allotment of speeches*, we have followed the readings of Bengali Recension.

Text:—प्रियंवदा—को अण्णो हुत-वहादो पहवदि दहिदुं। ता गच्छ। पादेसु पणमिअ णिवत्तेहि णं, जाव अहं अग्घोदअं उवकप्पेमि।

(कोऽन्यः हुतवहात् प्रभवति[1] दग्धुम्। तद्गच्छ। पादयोः प्रणम्य निवर्तय[2] एनम् यावदहम् अर्घोदकम् उपकल्पयामि[3])।

Priyaṁvadā—Who else but fire is able[1] to consume ? Hence run (*at one*) and throw yourself at (*his*) feet (*and persuade*)[2] him to come back,[2] whilst I get[3] ready[3] water and (*other* articles) of worship.

अनसूया—तह (तथा)। (निष्क्रान्ता)। Anasūyā—So I will. (*Exit*).

प्रियंवदा (पदान्तरे स्खलितं निरूप्य) (**अम्मो, आवेअ-क्खलिदाए गईए पब्भट्टं मे अग्ग-हत्थादो पुप्फ-भाअणं** (अम्मो, आवेग-स्खलितया[4] गत्या प्रभ्रष्टं[5] मे अग्र-हस्तात्[6] पुष्प-भाजनम्)। (इति पुष्पोच्चयं रूपयति)।

Priyaṁvadā—(*After a few steps, representing a slip*)—Alas! the basket of flowers has dropped[5] down from the fingers[6] of my hand,[6] owing to my feet slipping[4] through agitation.[4]

(*This said, represents the culling of flowers.*)

(प्रविश्य) **अनसूया —सहि, पकिदि-वक्को सो कस्स अणुणअं पड़िगेह्णदि। किम्पि उण साणुक्कोसो किदो।**

(सखि, प्रकृति-वक्रः[७] स कस्य अनुनयं प्रति-गृह्णाति। किमपि पुनः सानुक्रोशः[८] कृतः) ।

(*Entering*) Anasūyā—Friend, naturally crooked as he (*is*), whose supplication does he accept ? Yet, he has been a little mollified.

प्रियंवदा (सस्मितम्)**—तस्सि बहु एदंपि। ता कहेहि कथं तए पसादिदो** (तस्मिन् बहु एतदपि। तत् कथय कथ त्वया प्रसादित.[९]) ।

Priyaṁvadā—In this case, even that (*is*) much. Now tell (*me*) how he was propitiated by you.

V. L—"आवेगस्खलितया गत्या'—B. R. M. V. 'आवेगस्खलितायाः' —S. 'अग्रहस्तात्'—B. R. V. S. 'हस्तात्'—M.

प्रियंवदेति। 'वहति' इति वहः (पचादित्वात् अच्)। हुतस्य वहः 'हुतवहः' अग्निः, तस्मात्–(२।३।२९) 'अन्यः' इतरः 'कः दग्धु' ज्वलितुम् 'प्रभवति' समर्थो भविष्यति, न कोऽपि इत्यर्थः। **(अप्रस्तुत-प्रशंसालङ्कारः)**। 'पादयोः प्रणम्य' ('वा ल्यपि' –(६।४।३८) इति अनुनासिक-लोपः पाक्षिकः। पक्षे **प्रणत्य)**। 'निवर्तय' कुटीरमानय। 'यावत्' इत्यवधौ ('यावत्तावच्च साकल्येऽवधौ मानेऽवधारणे' इत्यमरः)। **प्रियंवदेति।** 'अम्मो' इति विस्मये। 'आवेगः' दुर्वाससो-नामश्रवणात् यः सम्भ्रमः उत्कण्ठा इति यावत्, तेन 'स्खलितया गत्या' (अनेन **दुर्वाससोऽनिवृत्तिः** सूचिता)। 'मे अग्र-हस्तात् अङ्गुलीत इत्यर्थ। पुष्पस्य उच्चयं' उद्-ग्रहणम् पुनरुत्तोलनम् इत्यर्थः। **अनसूयेति।** 'अनुनयं' प्रसादनं 'प्रतिगृह्णाति' स्वीकरोति (**'प्रतिग्रहः स्वीकरणे** सैन्यपृष्ठे पतद्ग्रहे' इति मेदिनी), 'किमपि पुनः' महता प्रयत्नेन तु 'सानुक्रोशः' सकृपः 'कृत.' ('कृपा दयाऽनुकम्पा स्यात् अनुक्रोशोऽपि' इत्यमरः)।

118.—1. अम्मो—(also **अम्महे**)—A particle of surprise at something happening unexpectedly, uttered generally by *women* (P. 80, line 12). **2. पदयोः—**(अत्र) द्वितीयार्थे (विवक्षया) सप्तमी—*R.* Cf. 'त्वमपि एवं **नले वद'**—*Nalopākhyāna.* But "**अवच्छेदे** सप्तमी is better. Cf. 'गृहीत **इव केशेषु** मृत्युना धर्ममाचरेत्'—*Cāṇakya Śatakam* ; *Śak. VII.* 24. **अनुनयं**—*Ra. II.* 54 ; *V.* 54. **3. अग्र-हस्तात्**—A

peculiar kind of कर्मधारय compound where an **अवयव** (**अग्र**) and the **अवयवी** (**हस्त**) are **not identical.** [Cf. नीलोत्पलम्, where 'नीलत्व' is **identical** with 'उत्पलत्व' i. e. they have the same substratum (सामानाधिकरण्य) or in other words, *blueness* pervades the entire *lily*]. Still अग्र & हस्त are **metaphorically** considered to be one and the same by 'लक्षणा' । Hence it often means a **Finger or Fingers taken collectively.** Read 'अग्रश्चासौ हस्तश्चेति समानाधिकरण-समासः । '**हस्ताग्राऽग्रहस्तयादयो गुण-गुणिनोः भेदाभेदाभ्याम्**' इति वामनः' –*KSV*–(V.2-20)–*Qtd. MN. on Ku.V.* 63 ; *Ra.I.* 14; *VII.*7; *Ki.V.* 29. 'चञ्चलाऽ **ग्रहस्तेन**'–*MK. IV.* '**अग्र-पाद**-स्थिता'—(191*n*.8). "**अग्राननाः**" —Karṇāvaraṁ. Our poet skilfully makes Prayaṁvadā stumble, and does not allow her to go away for preparing 'अर्घोदक' (33n. 3), but he engages her in collecting flowers. This is **necessary** as the rules of dramaturgy do not allow the stage to be kept devoid of all the actors. Hence she must stay there, until Anasūyā comes and removes the anxiety of the audience as to the imprecation of Durbāsāh. According to *R* this stumbling prognosticates **future calamity** i. e. Durbāsā's refusal of coming back.

Remark—Anasūyā as we have seen, is always considerate, cautious, and helpful to Śak. When everybody was stunned by the sudden presence of the king (*Act I*), she was first to recover self-possession to make arrangement for king's reception. She has foresight and so keeps the *Keśara*—garland (*infra*), and herself negotiates with the king about the future happiness of Śak. The sage Kaṇva has also **greater confidence** in अनसूया than in प्रियंवदा । [Cf. "अनसूये ! अलं रुदित्वा" etc.—"अनसूये ! गतवती वां सहचारिणी"—etc.] So in a **vital affair** like the curse of Durbāsāh. it is quite natural that our poet should send Anasūyā (*the namesake* of the sage's mother) to pacify the choleric Durbāsāh. Therefore the **allotment of speech in B** is preferable (33n. 2, 3.)

4. **पुष्पोच्चयं**—Here the flowers are collected **with hands** still 'घञ्' is not available (Vide 114n. 1) owing to the *Vārt.* 'उच्चयस्य प्रतिषेधो वक्तव्यः'—*KV.* 3. 3. 40. But this *Vārt*, is **spurious as it is not found in the MBH.** Hence 'उच्चय' like **'अवचय'** is also a **poetic licence** and is to be justified by *Vedic grammar.* "हस्तादाने चेरस्तेये, इति घञ् विषयत्वात् कर्त्रीनामयं **प्रामादिकः प्रयोग** इति वल्लभदेवः"—*MN on Ku. III.* 61. (Read 114n. 1).

Text :—अनसूया—जदा णिवत्तिदुं ण इच्छदि तदा पादेसु पड़िअ विण्णविदो मए—भअवं, पढमं त्ति पेक्खिअ अविण्णाद-तव-प्पहावस्स दुहिदु-जणस्स भअवदा एक्को अवराहो मरिसिदव्वो त्ति ।

(यदा निवर्तितुं नेच्छति तदा पादेषु पतित्वा विज्ञापितो मया—भगवन्, प्रथममिति प्रेक्ष्य अविज्ञात-तपः-प्रभावस्य[1] दुहितृ-जनस्य भगवता एकोऽपराधो मर्षितव्य[2] इति) ।

Anasūyā—When he refused to come back, (*he*) was thus implored by me by falling on his feet—'O omniscient one! considering that it is the first offence of one who is like (*your*) daughter, (*and is*) ignorant[1] of the power of penance[1], (*this*) single fault has to be condoned[2] by Your Holiness.

प्रियंवदा—तदो तदो (ततस्ततः) । Priyaṁvadā—What, what next ?

अनसूया—तदो मे वअणं अण्णहा भविदुं णारिहदि । किन्तु अहिण्णाणा-भरण-दंसणेण सावो णिवत्तिस्सदि त्ति मन्तअन्तो सअं अन्तरिहिदो ।

(ततो मे वचनमन्यथा भवितुं नार्हति किन्तु अभिज्ञानाऽऽभरण-दर्शनेन शापो[3] निवर्तिष्यते—इति मन्त्रयमाणः स्वयमन्तर्हितः[3]) ।

Anasūyā—'My word must not become otherwise, but at the sight of some ornament of recognition, the execration[3] shall turn back."—while he was so saying, he vanished.

प्रियंवदा—सक्कं दाणिं समस्ससिदुं । अत्थि तेण राएसिणा सम्पत्थिदेण स-णामहेअ-ङ्किअं अंगुलीअअं सुमरणीअं त्ति सअं पिणद्धं । तस्सिं साहीणोवाआ सउन्दला भविस्सदि ।

(शक्यमिदानीं समाश्वसितुम्[4] । अस्ति तेन राजर्षिणा सम्प्रस्थितेन[5] स्व-नामधेयाङ्कितम् अङ्गुलीयकं स्मरणीयम् इति स्वयं पिनद्धम् । तस्मिन् स्वाधीनोपाया[6] शकुन्तला भविष्यति) ।

Priyaṁvadā—Now we can be reassured[4]. There is the ring with his name engraved on it, which as a *forget-me-not* was fastened on (*her finger*) by the royal sage himself at his departure[5]. In it, Śakuntalā will have the remedy[6] at her own control[6].

V. L.—'स्वयं'—R. M. V. 'एवं'—B. S ; B adds 'शकुन्तलाहस्ते' after 'स्मरणीयमिति', while K, R, and others omit it. Ś has 'तस्माद्' for तस्मिन्।

अनसूयेति। 'अविज्ञातः' शिशुत्वात् अविदितः तव 'तपसः प्रभावः' बलं यस्य तादृशस्य 'दुहितृ-जनस्य' कन्या-स्थानीयस्य ('यथा मा कण्वदुहिता तथा च तद्वत् तव दुहिता। अथच 'दुहिता' बालिका, अतएव अविज्ञात-तपः-प्रभावा' इति राघव-पादाः) 'एकः अपराधः' न तु बहुः, अपिच 'प्रथमम्' आद्यं ('सामान्ये नपुंसकम्', वा—८२२), अन्यथा 'इनि' 'इति निपातेन' प्रथमा स्यात्) 'प्रेक्ष्य' विचार्य 'मर्षि--तव्यः' सोढव्यः (अत्र **परिहारो** नाम नाट्यालङ्कारः। "**परिहार** इति प्रोक्तः कृतानुचित-मार्जनम्" इति दर्पण-लक्षणात्)। **अनसूयेति।** 'अन्यथा' मिथ्या। अभिज्ञायते अनेन इति 'अभिज्ञानं' स्मारकम् यत् किञ्चित् 'आभरणम्' अलङ्कारः तस्य 'दर्शनेन' अवलोकनेन 'शापो' विस्मृति-रूपः अभिसम्पातः 'निवर्तिष्यते' निवृत्तो भविष्यति ('वृद्भ्यः स्य-सनोः'—(१।३।६२) इति आत्मनेपदं पाक्षिकम्)। 'अन्त-र्हितः'—(१।४।६५) अदर्शनं गतः। योगबलात् इति भावः। अतः प्रार्थनान्तरस्य अवकाशः नासीत्। **प्रियंवदेति।** इदानी सम्प्रति अनेन वाक्येन। 'समाश्वसितुम्' आश्वास माप्तुं शक्यमस्माभिः इति शेषः। (भावे यत्)। आश्वस्तत्वे हेतुमाह। 'सम्प्रस्थितेन' गन्तु आरभमाणेन (आदिकर्मणि क्तः—३।४।७१) 'स्मरणीयं' स्मारकम् (करणे अनीयर्–३।३।११३) 'इति' हेतोः ('इति प्रकरणे **हतौ** प्रकाशादि-समाप्तिषु' इति विश्वः)' 'स्वयं पिनद्धम्' अङ्गुलौ परिधापितं (अपि-पूर्वात् नह्यतेः क्तः। अपेः अकारस्य **पाक्षिकः** लोपः)। 'तस्मिन्' नृप-नामयुते अङ्गुरीयके, '**स्वस्य अधि**' इति 'स्वाधीनः' —(५।४।७) अनन्यापेक्षः, निजायत्त इति यावत् 'उपायः' शाप-प्रशमोपायः यस्याः तथाभूता।

119n —1. निर्वर्तितुं नेच्छति—Here 'न इच्छति'='**न ऐच्छत्**' This sort of **irregular(Vedic)** use of "लङ्" has been noted before. **(Read 68n.-1)**. **2. भगवन्**—भग='Knowledge'. The epithet means 'all-knowing', 'omniscient' and hence the propriety of the word. The idea is :—That the offence is but a solitary one and quite uninten-

tional, is already known to ycu by your **supernatural power.** It is superfluous to remind you of that. 'उत्पत्तिञ्च विनाशञ्च भूतानामगतिं गतिम्। वेत्ति विद्या मविद्याञ्च स वाच्यो **भगवानिति**—*VP. VI.* 5; (*Vide* 103*n*. 4.) 3. **भगवता**--This is also significant, for it explains his power of vanishing (स्वयमन्तर्हितः)। 'भग' means eight kinds of ऐश्वर्य(*supernatural power*)—(120n. 6). 4. **मर्षितव्यः**–अर्हार्थे तव्य। (Also '**मर्षयितव्यः**')—You should forgive her, as **forgiveness** is the charac--teristic of Brāhmaṇas. '**क्षमा** दया च विज्ञानं सत्यञ्चैव दमः शमः। अध्यात्मनित्यताज्ञानमेतत् **ब्राह्मण-लक्षणम्**'—*KP*. 14. **एकोऽपराधः**—This is the *solitary* as well as the *first* offence. (**प्रथमं**)—hence unintentional and not **deliberate**. Cf. 'तत् क्षाम्यतामेकः **अपराधः**. प्रियवयस्यस्य'—*Rat. III.*; 'प्रोवाच कोशलपतिः **प्रथमापराद्धः**'—*Ra. IX.* 79. 5. **ततस्ततः**—A collcquial phrase equal to '*what next*', signifying impatience. Cf. 'वसन्तसेना—'ततस्ततः'—MK. II.; (186n. 1). **अन्तर्हितः**—Bcdily disappeared making further talk impossible. This is possible in the case of a योगी। Cf. '**अन्तर्धानं स्मृतिः** कान्तिः दृष्टिः श्रोतज्ञता तथा। निजशरीरमुत्सृज्य परकाय-प्रवेशनम्। अर्थानां छन्दतः सृष्टि **र्योगसिद्धे र्हि लक्षणम्**'—*Y. III.* 202-203. 6. **स्मरणीयम्**—That which reminds, (*Com.*) hence a '**forget-me-not**', '**souvenir.**' **अस्ति**—at the beginning of a sentence has the force of "it happens that." 7. **स्वाधी नोपाया**–उप अयते गच्छति अनेन। 'हलश्च'–(3.3.121).इति घञ् (उप+अय्+घञ्)=उपायः—*BhD*; 'that by which one approaches near' i. e. succeeds, hence remedy. 'स्वस्मिन् **अधि**' इति स्वाधीनः। ७मीतत् by 'सप्तमी शौण्डैः'—(717), '**अधि**-शब्दः शौण्डादि रित्युक्तम्'—T. Next '**ख**' (=ईन—7. 1. 2.) is **always used** after a 'समास, where 'अधि' is उत्तरपद by 'अषड़क्षऽऽशितंग्व-लंकर्मा-लंपुरुषा-ऽध्युत्तर-पदात् खः'—(5. 4. 7). 'शौण्डादित्वात् अधि-शब्देन समासः। **ततः स्वार्थे खः**'—*BM*. *BhD* proposes **two other** derivations :—(*i*) '**इनं**' (**प्रभुम्**) **अधिगत** इति अधीनः। 'अत्यादयः क्रान्त्याद्यर्थे द्वितीयया']—*Vārt.*—(2. 2. 28) इति समासः—Dependent. Next स्वस्मिन् अधीनः। (*ii*) **अधि** (**उपरि**) **इनः** (**प्रभुः**) अस्य इति अधीनः (**बहुव्रीहिः**)—One who has a master over, hence dependent. Note that **महाभाष्य** has used '**अधीन**' as an **indepen-**

dent word. "**तदेतत् प्रयोक्तरि अधीनं भवति**", also 'अस्मासु अधीनं किमु निस्पृहाणाम्'—Ki. III. 9 ; According to Kaiyata, **independent 'अधीन'** is 'अप्रयुक्तम्'—"आवृत्तिजा-वृत्तिज-सदृशा **अधीनादयः**'। Next as before.

Text :—**अनसूया—सहि, एहि। देव-कज्जं दाव से णिव्वत्तेम्ह ।**

(सखि, एहि। देवकार्यं तावत् अस्या निर्वर्तयाव.[1]) । (इति परिक्रामतः) ।

Anasūyā—Come friend, let's then perform[1] divine service (*for her*). (*This said, they turn round*).

प्रियंवदा (अवलोक्य)—अणसूए, पेक्ख दाव। वाम-हत्थोवहिद-वअणा आलिहिदा विअ पिअसही। भत्तु-गदाए चिन्ताए अत्ताणंपि ण एसा विभावेदि। किं उण आअन्तुअं ।

(अनुसूये, प्रेक्षस्व तावत्। वाम-हस्तो-पहित-वदना[1] आलिखिता[2] इव प्रियसखी। भर्तृ-गतया चिन्तया आत्मानमपि न एषा विभावयति। किं पुनरागन्तुकम्[3]) ।

Priyaṁvadā (*Espying*)—Anasūyā, just look (*this way*). With[1] her face resting on (*her*) left hand[1], there sits our dear friend as if painted[2] (*in a picture*). Owing to (*her*) thought, centered in her husband, she can pay no attention even to her own self, much less to a guest[3].

अनसूया—प्रियंवदे, दुवेणं एव्व णो हिअए एसो वुत्तन्तो चिट्ठदु। रक्खिदव्वा क्खु पकिदि-पेलवा पिअसही (प्रियंवदे, द्वयोरेव आवयो हृदये एव वृत्तान्तस्तिष्ठतु। रक्षितव्या खलु प्रकृति-पेलवा[4] प्रियसखी) ।

Anasūyā—Priyaṁvadā, let this occurrence slumber within our hearts alone. (*Our*) dear friend, tender[4] by nature,[4] must be saved.

प्रियंवदा—को णाम उण्होदएण णोमलिअं सिञ्चेदि ।

(को नाम उष्णोदकेन[1] नव-मल्लिकां सिञ्चति। (उभे निष्क्रान्ते) ।

Priyaṁvadā—Who possibly would sprinkle the Navamallikā with scalding[1] water ?

(*Exeunt ambo*).

इति विष्कम्भकः (*End of the Prelude*).

V. L.—'इदानीम्'—M. V. 'नाम'—*R. V.* 'तावत्'—B. Dr & S read '**प्रवेशकः**' for '**विष्कम्भकः** supported by several Devanāgara MSS.

अनसूयेति। 'निर्वर्तयावः' निष्पादयावः। **प्रियंवदेति।** 'भर्तृगतया'' दुष्यन्त-विषयिकया। 'उपहित' न्यस्तम्। 'आलिखिता' निष्पन्दत्वात् चित्रार्पिता 'इव'। 'आत्मान' स्वकीय-देह-व्यापारम् 'अपि न विभावयति' जानाति ("**विभावः** स्यात् **परिचितौ** कामस्योद्दीपनेऽपि च' इति विश्वः), 'आगन्तुकम्' अतिथिम् ('स्यु रावेणिक आगन्तु **रतिथि** र्ना गृहागते' इत्यमरः), कथं विभावयेदित्याशयः। **प्रियंवदेति।** 'नाम' इति सभावनायाम्। 'कः सिञ्चति' न कोऽपि इत्यर्थः (अप्रस्तुतेन शकुन्तला-सम्बन्धेऽपि एतदभिशाप-वृत्तान्त-प्रकाशन सुतरां दारुणमिति प्रस्तुतार्थस्य गम्यत्वादत्र **अप्रस्तुत-प्रशंसालङ्कारः।** 'द्वयोः' इत्यादिना एतदन्तेन शकुन्तलां प्रति शापाऽकथन-व्याजेन '**अमृताहरणं** नाम अङ्गमुपक्षिप्तम्। तल्लक्षणं यथा दर्पणे—'व्याजाश्रय वाक्यम **अमृताहरणं** मतम्'। विष्कम्भक-लक्षणमुक्तं प्राक्। अयम् शुद्ध-विष्कम्भकः, केवलं प्राकृतेन कृतत्वात्)।

120n.—1. वाम-हस्तो &c.—Pensive women are by nature wont to sit with their faces resting on the **left hand**. 'अत्र वाम-हस्त-ग्रहणं स्त्री-स्वभावात्'—*R*; (211*n.* 6.) **2. आलिखिता**—आ+लिख् means '*to paint*' '*to draw in a picture*.' Cf. '**आलिखिता** इव सर्वतो रङ्ग.' —*p.*21. 'त्वमा**लिख्य** प्रणयकुपिताम्'—*PA* & *MD*.105; 'कथञ्चित्' **आलिखन्**' –*Ra. XIX*.19. (Now read 211n.1). **3. द्वयोरेव** &c.—This is necessary for the future development of the plot. Young as the two friends were, they could not fully realize the true significance of the imprecation of the sage and consequently owing to their *childish nature* they depended more on the *efficacy* of the ring forgetting the possibility of its being lost, and hence they did not deem it at all necessary to inform the sage Kanva of the curse. Śak. was, of course, unaware of it, as the information would but aggravate her mental agony. **नाम** implies सम्भावना। Cf. 'तत् को नाम गुणो भवेत् स गुणिना यो दुर्जनै र्नाङ्कितः' —**NŚ. 72.**

Text :—(ततः प्रविशति सुप्तोत्थितः शिष्यः) **शिष्यः—वेलोपलक्षणार्थम्**[१] **आदिष्टोऽस्मि तत्रभवता प्रवासादुपावृत्तेन**[२] **काश्यपेन। प्रकाशं**[३] **निर्गतस्तावदवलोकयामि कियदवशिष्टं रजन्या इति।** (परिक्रम्याऽवलोक्य च) **हन्त प्रभातम्।**

तथाहि—

वसन्ततिलका (तभजजगग)

यात्येकतोऽस्त-शिखरं पतिरोषधीनाम्[४]
आविष्कृतो[५]**ऽरुण-पुरःसर**[६] **एकतोऽर्कः।**
तेजो-द्वयस्य युगपद्व्यसनो-दयाभ्यां[७]
लोको नियम्यत[८] **इवैष दशाऽन्तरेषु**[९] ॥२॥

(*Enter a pupil just risen from sleep.*)

Pupil—I have been commissioned to observe[1] the hour[2] by His Reverence Kāśyapa who is (*but lately*) returned[2] from (*his*) sojourn[1]. Gone out[3] (*in the open air*) I shall see how much is left of the night. (*Turning round and looking*)

Oh! it has dawned (*already*). For—

In one quarter, the lord of the flora[4] is approaching the summit of the setting hill, while in another, the sun is manifested[5] with[3] Aruṇa as his precursor[7]. Thus by the synchronal decadence and rise[7] of the two luminaries people are instructed[8], as it were, in the vicissitudes[9] of (*their*) career.[9] (2)

V. L.—'आविष्कृतः'—R. B. V. HS. 'आविष्कृतारुणः'—P. M. S. 'इवैषः' —B. HS. 'इवात्म'—R. M. V. S.

तत इति। आदौ 'सुप्तः'–(६।१।१५) पश्चात् 'उत्थितः' जागरितः (इति **स्नातानुलिप्तवत्** समासः—२।१।४९)। **शिष्य इति।** 'वेलायाः' होमवेलायाः ('वेला कालविशेषे स्यात्, वेला सिन्धु-समुद्गतौ' इति गदसिंहः)। (**"अनुदिते जुहोति"** इति श्रुतेः), सूर्योदय—कालस्य 'उपलक्षणार्थं' निरूपणार्थं 'प्रवासात्' प्रवासं कृत्वा इत्यर्थः। 'उपावृत्तेन' प्रत्यागतेन। 'प्रकाशं' कुटीरात् बहिर्देशं 'निर्गतः' सन्। 'अवलोकयामि' निरूपयामि। 'हन्त' इति निश्चये (इति वर्धमानः)। 'प्रभातम्' (इति 'नपुंसके भावे क्तः'—(३।३।११४)। **यातीति।** 'ओषधीनां' तृणभेदानां ('ओषध्यः फलपाकान्ताः बहु-पुष्प-फलोपगा' इति मानवे १।४६) 'पतिः' चन्द्रः 'एकतः' एकस्यां दिशि, पश्चिमे गगने इत्यर्थः (सप्तम्यर्थे तसिः। "तसि-प्रकरणे आद्यादिभ्य उपसंख्यानम्") 'अस्तस्य' पश्चिमाद्रेः अस्ताचलस्य इति यावत् ('अस्तः क्षिप्ते पश्चिमाद्रौ' इति हैमः) 'शिखरं

याति' आश्रयति। 'अरुणः' गरुडाऽग्रजः सूर्य-सारथिः ('**अरुणो**ऽव्यक्तरागेऽर्के सन्ध्या-रागे**ऽर्क-सारथौ**' इति मेदिनी) पुरः अग्रे सरति गच्छति यः सः 'पुरःसरः' (अग्रगामी इत्यर्थः) यस्य, तथाभूतः 'अर्कः' सूर्यः 'एकतः' एकस्यां दिशि, पूर्वस्मिन् गगने इत्यर्थः। 'आविष्कृतः' आत्मप्रकाशं कर्तुम् आरभत, उदयोन्मुखः जातः इत्यर्थः ('**प्राकाश्ये प्रादुः आविः** स्यात्' इत्यमरः। '**करोतेः**' विवक्षावशात् **अकर्मकत्वम्**। ततः **कर्तरि क्तः**॥ यद्वा, '**आदि कर्मणि क्तः कर्तरि च**'—(३।३।७१) **इति कर्तरि क्तः**)। 'तेजो-द्वयस्य' चन्द्र-सूर्ययोः 'युगपत्' एकदा समकालम् इति यावत् ('**युगपत् इत्येककाले**' इति तत्त्वबोधिनी। एक-समयो-भय-दर्शनेनैव नियमः कर्तुं शक्यते। न तु क्रमिक-दर्शनेन इति 'युगपत्' इत्युक्तिः) यत् 'व्यसनं' तिरोभाव-रूप-भ्रंशः चन्द्रस्य, ('व्यसनं **विपदि** भ्रंशे' इत्यमरः)। यश्च 'उदयः' समुन्नतिः आविर्भाव इति यावत् (**उदयः** सम्पदुत्-पत्त्योः पूर्वशैले **समुन्नतौ**' इत्यजयः) सूर्यस्य इत्यर्थः। ताभ्याम् हेतुभ्याम्, 'एष लोकः' संसारः, अन्याः दशाः 'दशान्तराणि' ('मयूरव्यंसकादयश्च'—(३।१।७२) इति नित्यसमासः) अवस्थान्तराणि इत्यर्थः ('दशा वर्त्याम् अवस्थायाम् वस्त्रान्ते भूम्नि पुंस्त्रियोः' इति रभसः) तेषु, भिन्नासु अवस्थासु 'नियम्यते' शिक्ष्यते' 'इव'। तथोक्तम् "आत्मानं शोक-हर्षाभ्यां शत्रुभ्यां नावसादयेत्" इति। अपिच भारते "सुखञ्च दुःखं यदि वापि जन्तुर्दैवाधीनं विन्दते नात्म-शक्त्या। तस्मादेवं **बलवन्मन्य**-माने **न संज्वरेन्नापि हृष्येत्** कदाचित्"। अपि च "सुखञ्च दुःखञ्च भयाऽभयञ्च लाभाऽलाभौ मरणं जीवितञ्च। पर्य्यायशः सर्वमिदं स्पृशन्ति तस्मात् धीरो न हृष्येन्न शोचेत्" इति। अर्थात् व्यसनं सम्पच्च चक्रवत् परिवर्तते। तेन युगपदेव कश्चिद्विपद्यते कश्चिद्वा सम्पद्यते॥ अतः विपदि न शोचितव्यम्, नवा सम्पदि च गर्वितव्यम् इत्युपदेश इति हृदयम्। (**क्रियोत्प्रेक्षालङ्कारः**। पूर्वार्धे यः कश्चित् अतिसमृद्ध-वद्यक-सम्पन्नःसोऽपि नाशं याति, अन्यः यम् कंचनासमर्थम् सर्वदा स्वाश्रितम् उदयं प्रापयन्नेव स्वयमुदयं लभते इति सत्-पुरुषद्वय-व्यवहार-समारोपात् **समासोक्तिः**। उत्तरार्धे तु **निदर्शना** व्यङ्ग्या। अपिच प्रभात-वर्णने प्रकृते उभयोरपि प्राकरणिक-त्वाद् अरुण-पुरःसरत्वस्य समानतया **तुल्ययोगितापि**। पुनः चन्द्रस्य व्यसनं, सूर्यस्य आविर्भाव इति क्रमिकत्वाऽवगमात् **यथासंख्यालङ्कारोऽपि**। **हेतुश्च**। कतोकतो इति द्वयद्वयेति **छेकवृत्त्यनुप्रासौ**। पूर्वार्धे 'याति", "आविष्कृत" इति **तिङ्-क्त**-प्रत्यय-भेदात् **भग्न-क्रमतादोषः**। स च "आविर्भवति अपरतोऽरुण-सम्मुखोऽर्कः" इति पठित्वा समाधेयः। अत्र **दृष्टान्त**-नाम नाट्य-लक्षणमुक्तम्। "**दृष्टान्त**' यस्तु पक्षार्थ-साधनाय निदर्शनम्" इति दर्पण-लक्षणात्। '**दशान्तरेषु**' **इत्यनेन शकुन्तलाया भावि-दशान्तरमपि** द्योत्यते। **वसन्त-तिलकावृत्तम्**) ॥२॥

121n.—1. किमवशिष्टं &c.—Cf. "ज्ञायतां तावदधुना किमवशिष्टमह्न इति'—*Rat. III.* **2. पतिरोषधीनाम्**=Cf. "उदितः राजा ओषधीनाम्" —Vik. III. 'ओषः' प्लोषः दीप्तिर्वा धीयते अत्र इति ओषः+धा+कि अधिकरणे (*by* 'कर्मण्यधिकरणे चः—3. 3. 93)=**ओषधिः** Or '**ओषधी**', by 'कृदिकारात् अक्तिनः'—(4. 1. 45), इति ङीषि **ओषधी**—*BhD.* The moon is called the Lord (पति) of flora (ओषधी),as the herbs are supposed to thrive under its influence, [*Cf.* 'ओषधीशो निशापतिः'—*AK*]. The Purāṇic theory is this—In the dark fort-night, the moon wanes digit by digit which is said to be drunk by the Gods and Pitṛs The last digit *nourishes the plants* and this disposal takes place on the day of अमावस्या] । Cf. ** अपः प्रविष्टः सोमश्च शेषया कलयैकया । तृण-गुल्म-लता-वृक्षान् निष्पादयति चोषधीः"—*Devī-purāṇa* (चन्द्र-क्षय-वृद्धि-नामाध्यायः') । *ṚV. X.* 85. 2 ; *VaP. II.* 28 ; *VP. II.* 12 ; *Ra. XIV.* 80. 'पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः'—*Gītā. XV.* 13. "Even the moon, though he is the Lord of medical plants, has to die"—'अति-दुःसह-मरणादि-विपत्ति-सहस्र-विनाशका औषधयः । तासां पतिः अपि अस्तशिखरं याति । इममर्थम् **द्योतयितुम् एतत् पद-व्यपदेशः**' —R. **3. आविष्कृत** &c.—Cf. '**अनाविष्कृत**दानरार्जिः'—*Ra. II.* 7. Here is a **rhetorical difficulty.** For 'कृ' being '**सकर्मक**', 'क्त' is in the **passive voice**, but the previous sentence is in the **active voice**, thus **प्रक्रम-भङ्ग-दोष** arises. Against this we can say (*i*) here 'कृ' is used *intransitively* by the dictum—'धातो रर्थान्तरे वृत्तेः धात्वर्थेनोपसंग्रहात् । प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया'—*Qtd. MN on Ki.* 1. 1 ; *SK.* 2701. Hence 'क्त' comes in the **active voice** (3. 4. 72) ; or say, '**आदिकर्मणि क्तः, कर्तरि च**'—(3. 4. 71) इति कर्तरि क्तः ।। "The **usual sign** of such 'क्त' (*i. e.* **प्र**) is not **absolutely necessary**." Read :—'स कटं प्र-**कृतः**, कर्तुम् आरब्धवान् इत्यर्थः । अत्र **प्र-शब्दः आदि-कर्म-द्योतकः** । कदाचित् **प्र-शब्दाऽभावेऽपि आदि-कर्म-प्रयोगः दृश्यते** । यथा 'धातवः **पठिताः**' । धातुपाठ-सूत्र-लोकागम-स्थिता इत्यर्थः । विप्र ओदनं भुक्तः'—**Prabhā** *under* (3. 4. 71). But even then प्रक्रम-भङ्ग-दोषः is not **totally avoided,** (*Com.*). The followers of M take the whole as a **compound-word** (आविष्कृता-रूण-पुरःसरः)

which is explained thus—आविष्कृत: अरुण: आविष्कृतारुण:। स: पुर:सर: यस्य तथाभूत: अर्क: एकत: आस्ते। But this reading is **rejected**, as in this explanation **'व्यसन' and 'उदय' are not synchronal** (युगपत्) . For a similar idea, Cf. "अरुण इव पुर:सर: रविर्पवन इवातिजवो जलागमम्। शुभमशुभमथापि वा नृणां कथयति पूर्वनिदर्शनोदय:'—*HC. IV.* **4. अरुण**—Is the eldest son of **'विनता'** and brother of '*Garuḍa*'. 'विनता' untimely hatched the egg and so अरुण was born with **defective** limbs (*i. e. without thighs*). Hence he is called **अनूरु** ("सूर्य-सूतोऽरुणोऽनूरु: काश्यपि र्गरुड़ाग्रज:"–AK) ; "जनयामास पुत्रौ द्वावरुणं गरुड़न्तथा॥ विकलाङ्गोऽरुणस्तत्र भास्करस्य पुर:सर:' —*Mahā.* Ādi 16, 24 ; Ra. V. 71. 'गतं तिरश्चीनम् अनूरु-सारथे:' —*ŚPB. I.* 2. **अर्क**—Is an *apt expression* here, as it is to be worshipped just now. (Ms. II. 15.). अर्च्यते इति अर्च् + घञ् = अर्क: – the sun. **5 तेजो-द्वयस्य युगपत्** &c.—युवन्ति अस्मिन् काले इति यु + गपतक् प्रत्यय:, or युगं (द्वयं) पयते (गच्छति) इति डत्—(*BhD*) = युगपत् Simultaneous. The time must be **somewhere near the full-moon day,** when both the sun & the moon are simultaneously visible.Cf. 'तावुभावपि परस्पर-स्थितौ वर्धमान-परिहीन-तेजसौ। **पश्यति** स्म जनता दिनात्यये पार्वणौ **शशि-दिवाकराविव**'—*Ra. XI.* 82. The व्यसन of the luminaries prognosticates coming vicissitudes (i. e. **reverse** of fortune) in the **fate** of Śakuntalā. **6. नियम्यते** &c.—The people are warned neither to be elated with joy in prosperity, nor to be mortified at the advent of adversity, as rise and decadence are but the order of nature and nothing of them remains for a long time. This is a **cosmopolitan conception.** Cf. "सुखस्याऽनन्तरं दु:खं, दु:खस्याऽनन्तरं सुखं। पर्यायेनोपनमन्ते नरं नेमिमरा इव"—Mahā. 'कालक्रमेण जगत: परिवर्तमाना **चक्राकार-पङ्क्तिरिव** गच्छति भाग्य-पङ्क्ति:'—SV. I. 4 ; 'गगन तले प्रतिवसन्तौ चन्द्रमूर्यौ अपि विपत्तिं लभेते। किं पुनर्जना * * मानवा वा। लोके कोऽप्युत्थित: **पतति, कोऽपि पतितोऽपि उत्तिष्ठते** * * एतानि हृदये कृत्वा संधारय आत्मानम्"—*MK. X*—(चाण्डाल's *speech*). 'एष क्रीड़ति **कूप-यन्त्र-घटिका-न्याय-प्रसक्तोविधि:**'—*Ibid. X.* 59. "Come what come may Time and the hour runs through the roughest

day"—**Macbeth.** *I.* 3. 'कस्याप्यन्तं सुखमुपनतं दुःखमेकान्ततो वा। नीचै र्गच्छति उपरि च **दशा चक्रनेमि-क्रमेण**'—PA & MD. II. 48. 'उदय-महिम-रश्मि-र्याति शीतांशुरस्तं। हतविधि-लसितानां ह्री विचित्रो विपाकः'॥—*ŚPB. XI.* 64. 'नूनं सम्पत् तड़िल्लतेव **सहसैवोदेति नश्यति च**' —DC. 'द्वन्द्वानि सर्वस्य यतःप्रसक्तानि अलाभ-लाभ-प्रभृतीनि लोके। अतोऽपि **नैकान्तसुखोऽस्ति कश्चिन्नैकान्तदुःखः** पुरुषः पृथिव्याम्—*BC. XI.* 43. "आमि वाछिया लव ना तोमार, दान, या दाओ ताइ भाल। विषादेर पाशे हरष रेखेछ, आधारेर पाशे आलो॥" —*Ravīndra-nātha.* "*Ch'ang*^{2} *Chin*^{4} *Pi*^{4} *Yang*^{1})—**Chienese** Proverb=(Prosperity at its climax is always followed by adversity) or"*Ch'ao*^{2} *Ch'ang*^{2}*Ch'ao*^{2} *Tui*^{4}"—(High-tide-is always followed by low tide.—Ibid, For various other fine quotations vide *Calcutta Oriental Journal Vol. I. No.* 6.

Text :—"अन्तर्हिते शशिनि सैव कुमुद्वती मे
दृष्टिं न नन्दयति¹ संस्मरणीय-शोभा²।
वसन्ततिलका **इष्ट-प्रवास-जनिता-न्यबला-जनस्य**
(तभजजगग) **दुःखानि नूनमति-मात्र-सु-दुःसहानि"** ॥३॥

Moreover—The hare-specked (*moon*) disappearing, that self-same lily whose (*nocturnal*) beauty² has (*now*) become an object of memory², does no (*longer*) gladden¹ my eye. Verily, the sorrows of the weaker sex, produced by the sojourn of the cherished one, are endurable³ with the greatest difficulty.³ (3)

V. L.—B has 'oजनेन' for 'जनस्य'।

अन्तर्हित इति। 'शशिनि' चन्द्रे 'अन्तर्हिते' व्यवहिते देशान्तरं गन्तुमुद्यते ('आदिकर्मणि क्तः'—(३।४।७१); तथाचोक्तम् प्रभायां—"कदाचित् **प्र-शब्दाऽभावेऽपि** आदि-कर्म-प्रयोगः दृश्यते" इति)। 'सा एव' विकसित-कुसुमा न या काचन, अपि तु पृथिवी-हर्षकारिणी 'कुमुद्वती' कुमुदिनी ('कुमुद-नड़-वेतसेभ्यो ड्मतुप्'—४।२।८७) 'संस्मरणीया' अतीता अर्थात् स्मरणस्य विषयीभूता, न तु प्रत्यक्षा 'शोभा' कान्तिः यस्याः तथाभूता सती, 'मे' तापसस्य 'दृष्टिः' नयनं '(करणे क्तिन्) 'न नन्दयति' स्व-शोभा-द्वारा हर्षयति। 'नूनं' निश्चितम् 'अवला-जनस्य' (इति सुदुः--सहत्वेन उक्तम्। अन्यथा स्त्री-जनस्य इत्येव ब्रूयात्। **जन-शब्देन** जातिमात्र-

ग्रहणम्) 'इष्टस्य' वल्लभस्य 'प्रवासेन' विदेश-गमनेन विरहेण 'जनितानि' उत्-पादितानि 'दुःखानि अतिमात्रम्' अत्यर्थं 'सुदुःसहानि' ('अतिमात्र-सु-शब्दौ दुःसह-त्वस्य अपि अशक्यानुष्ठानं बोधयत' इति राघवपादाः)। (अत्र पुर्वार्धे नायके दर्शनपथात् व्यतीते नायिका दृष्टिं न नन्दयति, 'शशिनि' दुष्यन्ते 'अन्तर्हिते' असन्निहिते सव 'कुमुद्वती' सैव 'शकुन्तला' इति अर्थशक्त्या पताकया वा व्यज्यते इति **अर्थशक्ति-मूलः वस्तुध्वनिः**। स च वाच्यस्य अर्थान्तरन्यासस्य सिद्धौ अङ्गमिति '**वाच्य-सिद्ध्यङ्गं**' नाम गुणीभूत-व्यङ्ग्यम्, **न समासोक्तिः, नापि अप्रस्तुतप्रशंसा**। इष्टेति जनि जनेति मतिमात्रति **छेक-वृत्ति-श्रुत्यनुप्रासाः। काव्यलिङ्गञ्च। वसन्त--तिलका** वृत्तम्) ॥३॥

122n.—1. शशिनि—The moon is so called on account of its spot, having the shape of a hare. According to *R*, it also refers to 'दुष्यन्त' (*as he was born in the lunar dynasty*)' and 'कुमुद्वती' to 'lily' and 'शकुन्तला,' while 'अन्तर्हिते' means 'having disappeared' and having proceeded to the king's palace'. So here we have **third पताकास्थान**। 'कौ' पृथिव्यां 'मुद्वती' हर्षयुक्ता 'सा एव' पूर्वदृष्टा शकुन्तला। 'शशिनि' दुष्यन्ते * * चन्द्रवंशोद्भवत्वात् 'अन्तर्हिते' राजधान्यां प्रस्थिते इत्यादि पूर्वार्धं सर्व योज्यम्। तेन अस्याः राजगृहं प्रति प्रस्थापन-सूचकं तृतीयं पताकास्थानम् उपक्षिप्तम्। तल्लक्षणमुक्तं मातृगुप्ताचार्यः—अर्थोपक्षेपणं यत्र न गूढं सविनं भवेत्। श्लिष्टा प्रत्युत्तरोपेतं तृतीयं तन्मतं तथा"—R. The pupil was totally **unaware** of the love-affair of Śakuntalā and the king. Being simply struck by the change of beauty in lily he *uncons--ciously* recites the śloka which, of course, insinuates the pangs of Śak. caused by the separation of Duṣyanta to the audience. Thus this is a fine instance of **Dramatic Irony**. *Vide* (174*n*. 6.) **संस्मरणीय** &c.—Only to be remembered, hence past. Cf. 'मामद्य संस्मरयतीव लोकः'—*Rat. I.* 12. **अतिमात्र-सु-दुःसहानि**—Involves **tautology**. Kāli. elsewhere has used either **अतिमात्रम्** (*Cf.* "**स्रस्तां-सावतिमात्र**लोहिततलौ"—*Śak. I.* 27. '**अतिमात्र**कर्शिताम्'—*Ku. V.* 48 ; "**अतिमात्र**भासुरत्वं'—*Māla. I.* 13.), or '**सुदुःसहं**' (*Cf.* 'मुक्तवर्त्मा **सुदुःसहः**' —*Ra. IV.* 15 ; Vik. IV. 10.), but not the **two together**. "The **repetition** may by understood in **intensifying the idea of**

excess," Cf. 'युधिष्ठिरः **श्रेष्ठतमः** कुरूणाम्'—Mahā ; '**श्रद्धाधनं श्रेष्ठतमं** धनेभ्यः"--SN. V. 24 ; "**श्रेष्ठतमः** सखा"—Ādi. 98,23; '**श्रेष्ठतरान्** नः निहन्ति भीष्मः"—Ibid; "देवो वः प्रापयतु **श्रेष्ठतमाय** कर्मणे" ;--qtd. BM. Also read "यदा च **प्रकर्षवतां पुनः प्रकर्षः** विवक्ष्यते तदातिशायिकान्तात् अपरः प्रत्ययः भवत्येव" इति **काशिका**। Also **प्रभा**–P. 332. Cf. "**Most unkindest** cut of all"—**Julius Caesar** ; '**Most best, most dearest**'—**King Lear.** Cf. '**अति-दुःसह**-प्रताप-सन्ताप-खिद्यमानेन'—*Kād. p.* 319 ; *Rām. II.* 7.9. But all these are to be justified by **Vedic Grammar**. 'अत्र आतिशायनिक-प्रत्ययान्ताद् आतिशायनिक-प्रत्ययोऽ नभिधानात् न भवति। '**श्रेष्ठतमाय कर्मणे**' इति तु **छान्दसम्** इति **भाष्ये स्पष्टम्**'—BM.

Remark—After this in the **French edition** and in **(B)** the following two Ślokas (*supported by* Ś) are given. The second is **undoubtedly authentic**, as it has been quoted by *MB* in his *KPr.* However we shall give the text, and the English translation only.

अपिच—[२]कर्कन्धूनामुपरि[३]तुहिनं[४]रञ्जय[५]त्यग्र-सन्ध्या[१] (स्वभावोक्तिः,
मन्दाक्रान्ता [८]दार्भं [१०]मुञ्चत्युटज-पटलं[९]वीत-निद्रो[७]मयूरः[६]। समाप्त-
(मभनततगग) [१४]वेदि-प्रान्तात् [१३]खुर-विलिखितादुत्थित[१५]श्चैष[१२]सद्यः[१७] पुनरात्तता
[१८]पश्चादुच्चैर्भवति हरिणः[१२] स्वाङ्गमायच्छमानः[१६] ॥ दोषः)

Moreover—The early dawn[1] impurples[5] the dews[4] upon[3] the jujubes[2] ; the peacock[6] whose sleep[7] is over, quits[10] the cottage-roof[9], thatched[8] with darvas[8], and this stag,[12] just risen[15] up from the border of the altar-ground[14], scratched[13] by his hoofs[13], is becoming high behind[18] by stretching[16] his limbs.

अपिच—[६]पाद-न्यासं [३]क्षिति-धर-गुरोर्मूर्ध्नि[५]कृत्वा[७]सुमेरोः[४]। (श्लेषभित्तिका
मन्दाक्रान्ता [११]क्रान्तं येन[२]क्षयित-तमसा[९]मध्यमं[१०]धाम[१०]विष्णोः[८]। समासोक्तिः,
(मभनगयय) [१२]सोऽयं चन्द्रः[१६]पतति[१५]गगनाद[१४]ल्प-शेषैर्मयूखैः[१४] अर्थान्तर-
[१८]अत्यारूढिर्भवति[१७]महताम[१७]प्यपभ्रंश-निष्ठा[१९] ॥ -न्यासश्च)

Moreover—That[12] very moon,[12] by[2] whom darkness being dispelled[1], the central[9] region[10] of Viṣṇu[8] was reached[11], after planting[7] his steps[6] on the summit[5] of the Sumeru,[4] the lord of the mountains[3], is dropping[16] down from the sky[15] with[14] a few rays (*still*) lingering[14] therein. Excessive[18] rise[18], even[17] of the great,[17] does but terminate[19] in a deep fall[19].

Text :—(प्रविश्याऽपटी-क्षेपेण)। **अनसूया—जइ वि णाम विसअ-परम्मुहस्स जणस्स एवं ण विदिअं तह वि तेण रण्णा सउन्दलाए अणज्जं आअरिदं** (यद्यपि नाम विषय-पराङ्मुखस्य[1] जनस्य एतन्न विदितं तथापि तेन राज्ञा शकुन्तलायाम् अनार्य[2] माचरितम्))। (*Entering with a toss of the curtain*) Anasūyā—Though in fact to an unworldly[1] person[2], this (*is*) not known, still (*it can be said that*) indignity[2] has been committed by that king towards Śakuntalā.

शिष्यः—यावदुपस्थितां होम-वेलां गुरवे निवेदयामि (निष्क्रान्तः)। ✦

Pupil—I will just announce to the preceptor the arrival of the hour of oblation. (*Exit.*)

V. L.—"अपटी'—R. V. B. A. 'पटा'—M. K S. 'अपटा' -Dr. 'यद्यपि'—R. V. 'एवम्'—B. M. K. 'एवं च'—S. 'पराङ्मुखस्य'—B. V. 'पराङ्मुखस्यापि'—R. पराङ्मुखस्याप्यस्य जनस्य नैतन्न विदितम्'—M. K. '०आचरितम् इति'- -B. M. Others omit 'इति'।

प्रविश्येति। '**पट्याः**' जवनिकायाः '**क्षेपः**' अपसारणम् इति 'पटी-क्षेपः' न पटीक्षेपः 'अ-पटी-क्षेपः' तेन। शकुन्तलाया. दु.खेन अनसूयाया आर्तत्वात् जवनिकाम् अनपसार्य एव ('पटीक्षेपः न कर्तव्यः आर्त-राज-प्रवेशने' इत्युक्तेः)। राघवपादास्तु '**अपटी**' जवनिका इत्याहू.। ('**अपटी** काण्डपटिका प्रतिसीरा जवनिका तिरस्करिणी' इति अभिधानरत्नमाला) तस्याः 'क्षेपेण' उत्तालनेन इत्यर्थः ('नासूचितस्य पात्रस्य प्रवेशो निर्गमोऽपि च' इत्युक्तेः। अनेन विष्कम्भकान्तरस्याऽनपेक्षा)। **अनसूयेति**। 'विषयात् पराङ्मुखस्य' इन्द्रियसुख-विमुखस्य 'जनस्य' अस्मादृशस्य अविज्ञात-लोकाचारस्य ('क्तस्य च वर्तमाने'–२।३।६७ इति षष्ठी) 'एतत्' सांसारिकाणां कीदृशम् आचरणम् आर्यं, कीदृश वा अनार्यम् इति। 'यदि' इति पक्षान्तरे ('पक्षान्तरे चेत् यदि च' इत्यमरः)। 'अपि' इति गर्हायाम् 'न विदितं' ('मति-बुद्धि-पूजार्थेभ्यश्च'–३।२।८८–इति वर्तमाने क्त.) 'नाम' इति सम्भावनायां, 'तथापि'। (अपिरत्र समुच्चये) 'तेन राज्ञा' दुष्यन्तेन 'शकुन्तलायां अनार्यम्' आर्य-विगर्हितम् 'आचरितम्' इति निश्चितम् एव। तदाचरितं तु परस्ताद् व्यक्तीभविष्यति।

123n.—1. अपटीक्षेपेण—Either by a **sudden toss** of the curtain (अपटी), which hides the make-up room from the stage, or (अ-पटी) **without raising** the scene ("*The curtain should not open on an*

agitated person or a king."—Com.). This sort of stage direction denotes *precipitate entrance* on the stage which arises from fear, agitation &c. 'Exit' or 'entrance' must not be made, until some suggestion of it, is conveyed to the audience. But entrance by 'अपटीक्षेप' is allowed when any such previous suggestion cannot be given. **2. ०पराङ्मुखस्य**—परा+अञ्च्+क्विन् ('ऋत्विग्-दधृक्-स्रग्-दिग्-उष्णिग्-अञ्चु-युजि-क्रुचाञ्च'-3. 2. 59)=पराक्-'Turned away from.' पराक् मुखं यस्य स 'पराङ्मुखः'—Lit 'with the face turned away from' Cf.—'मातुर्न केवलं स्वस्याः श्रियोऽप्यासीत् पराङ्मुखः'—*Ra. XII.* 13. For different use, vide *Ra. X.* 43 ; *XIX.* 38. *M. Che'zy* **wrongly attributes this epithet as referring to** 'कण्ण'। **शकुन्तलायाम्**—Note the Locative of Motive. **3. अनार्यम्** &c.—Anasūyā is conscious of her ignorance regarding the affairs of the worldly people. She cannot judge whether the king's action towards Śak. has been good or otherwise, still this much can be said that his action has **not been worthy of an** 'आर्य' ? ? Note that she does not say 'शाठ्यम्' or use some such expression. An 'आर्य' is one who does his duty, **'who is as good as his word' (Vide 3n. 1).** Hence Anasūyā calls him 'अनार्य', as the king has not kept his word by sending a messenger to ecsort Śak. to his palace at the appointed time. Vide (*VI.* 12. *Infra*). **गुरवे**—(46n. 2).

Remark.—The speech of Anasūyā will not be heard by the pupil on the stage.

Text :—**अनसूया—पडिबुद्धावि किं करिस्सं। ण मे उइदेसु वि णिअ-करणिज्जेसु हत्थ-पाआ पसरन्ति। कामो दाणीं सकामो होदु। जेण असच्चसन्धे जणे सुद्ध-हिअआ पिअसही पदं कारिदा** [प्रतिबुद्धापि[1] किं करिष्यामि। न मे उचितेषु[2] अपि निज-करणीयेषु हस्तपादं प्रसरति। काम इदानीं सकामो[3] भवतु। येन असत्यसन्धे[4] जने शुद्ध-हृदया प्रियसखी पदं कारिता)। (स्मृत्वा) **अहवा दुव्वाससो सावो एसो विआरेदि। अण्णहा कहं सो राएसि तारिसाइं मन्तिअ एत्तिअस्स कालस्स लहमेत्तंपि ण विसज्जादि।** [अथवा दुर्वाससः शाप एष विकारयति[5]। अन्यथा कथं स राजर्षिः तादृशानि मन्त्रयित्वा[6] एतावतः कालस्य लेख-मात्रमपि[7] न

विमर्जयति)। (विचिन्त्य) ता इदो अहिण्णाणं अंगुलीअअं से विसज्जेम। दुक्खसीले तवस्सिजणे को अब्भत्थीअदु। णं सहीगामी दोसो त्ति ववसिदा वि ण पारेमि पवास-पडिणिउत्तस्स ताद-कस्सवस्स दुस्सन्त-परिणीदं आवण्ण-सत्तं सउन्दलं णिवेदिदुं। इत्थंगए अम्हेहिं किं करणिज्जं [ननु इतः अभिज्ञानमङ्गुलीय-यकम्[9] तस्मै विसृजावः[9]। दुःखशीले[10] तपस्वि-जने कः अभ्यर्थ्यताम्। ननु सखीगामी दोष इति व्यवसितापि न पारयामि प्रवास-प्रतिनिवृत्तस्य तात-काश्यपस्य दुष्यन्त-परिणीताम् आपन्नसत्त्वां[11] शकुन्तलां निवेदयितुम्। इत्थं गते अस्माभिः किं करणीयम्]।

Anasūyā—Although broad awake[1], what shall I do ? Not even for (*my*) usual[2] (*morning*) duties, do my hands and feet move (*freely*). Let Cupid be content[3] by whom, to an unsooth-fast[4] person, (*our*) pure-minded dear friend's steps were led. (*Recollecting*) Or, is it the imprecation of Durbāsāh that is working[5] change[5]. Otherwise, how does that royal sage having assured[6] us in that way, not send even[7] a letter for such a (long) time ? (*Musing*) We should, therefore, send him the keepsake-ring[8] from here. But who amongst these hermits, inured[10] to hardship[10], is to be requested (*to go as a messenger*) ? Because the blame is attributable to (*our*) friend, I am indeed unable, though I have made up mind, to report Śakuntalā, as married to Dusyanta and *enciente*[11], to father Kāśyapa who has returned from his sojourn. Under such circumstances what is to be done now ?

V. L.—'निज०'—R. V. M. 'प्रभात०'—B. S has simply 'करणीयम्'; 'शुद्ध'—B. M. V. 'शून्य'—R. S. '०शापः'—B. V. M. '०कोपः'—R. S. C has 'निर्दुःखशीतले' supported by the oldest B Mss.

अनसूयेति। 'प्रतिबुद्धा' सुप्तेरुत्थिता (कर्तरि क्तः)। 'उचितेषु' अभ्यस्तेषु (**'अभ्यस्तेऽपि उचितं** न्याय्यम्' इति यादवः) 'निजकरणीयेषु' प्रात्यहिकेषु पुष्प-चयनादि-व्यापारेषु। 'हस्त-पादं' (प्राण्यङ्गत्वात् द्वन्द्वे एकवद्भावः—२।४।२) 'न प्रसरति' प्रवर्तते। 'कामः' मन्मथः 'सकामः' सफल-मनोरथः 'भवतु'। वल्लभा-रमणयो वियोगो हि कामदेवस्याभिमतः, स च सिद्ध इति भावः। 'येन' कामेन 'शुद्धं' कपट-कौटिल्यादिभि रस्पृष्टं 'हृदयं' यस्याः तादृशी सरलहृदया 'सखी' (**'ण्यन्ते कर्तुश्च कर्मणः'** इत्युक्तेः सखी इत्यत्र प्रथमा) 'असत्य-सन्धे' असत्य-प्रतिज्ञे ['सन्धा प्रतिज्ञा मर्यादा' इत्यमरः। 'आतश्चोपसर्गे—(३।३।१०६) इति अङ्] 'पदं' स्थानं ("**पदं** व्यवसित-त्राण-स्थान लक्ष्माऽङ्घ्रि वस्तुषु' इत्यमरः) 'कारिता'

प्रापिता। 'स्मृत्वा' दुर्वाससः शाप-वृत्तान्तं विभाव्य। अथवा नायं तस्य दोष इत्यर्थः। किं तर्हि इत्याह—'दुर्वाससः कोपः' विकारम्' अन्यथाभावं कारयति इति 'विकारयति'। दुष्यन्तेन शकुन्तलायाः विस्मृतिं घटयति ('तत् करोति तदाचष्टे', गः—(३।१।२५) इति णिच्। तथाचोक्त "**सतत्त्वतोऽन्यथा प्रथा विकार इत्युदाहृतः। अतत्त्वतोऽन्यथा प्रथा विवर्त इत्युदीरितः**"]। उक्तं द्रढयति। 'अन्यथा' दुर्वास-श्शाप-विकाराभावे स 'राजर्षिः' दुष्यन्तः 'तादृशानि मन्त्रयित्वा' **विनश्यमध्ये त्वाम्, हस्तिनापुरं नेष्यामि** इति कथयित्वा 'एतावतः' सुदीर्घस्य 'कालस्य ' (विवक्षया षष्ठी) 'लेखमात्रमपि' एकामपि लिपिकाम्, **का कथा नेतृजन-प्रेषणानाम्।** 'न विसर्जयति' स्वनगरात् अत्राश्रमे प्रेरयति। ('रामो राज्यमकारयत्' इतिवत् **स्वार्थे णिच्**) तन्मन्ये मुनेः शाप एव एतादृक् विस्मरण-हेतुः। 'तत्' तस्मात् हेतोः शाप-निवारणाय इत्यर्थः। 'तपस्विजने' तापस-समूहानां मध्ये इत्यर्थः ('यतश्च निर्धारणम्'—२।३।३१ इति सप्तमी) 'दुःखं' कठोरम् उपवासादिकम् 'शीलयति' नियतम् आचरति अभ्यस्यति इति यावत् यः तादृशे, ("**शीलि-कामि-भक्ष्याचरिभ्यो णः, पूर्वपद-प्रकृति-स्वरत्वञ्च वक्तव्यम्**" इति **काशिका–३।२।१**) '**कः**' **वा** जनः '**अभ्यर्थ्यताम्**' **राजसमीपे गमनाय अस्माभिः** प्रार्थ्यताम् ('न कोऽपि तत्र गच्छेत्' इति काकुः)। अतः पितुःसमीपेऽवस्था-निवदनमत्र कर्तव्यम्, तस्यापि नायमवसरः इत्याह—'सखीगामी' शकुन्तलागतः 'दोष' कथम--ज्ञात-शीले जने शकुन्तला आत्मानमर्पितवती दोषस्तस्या एव, 'इति' हेतोः 'तातकाश्य--पस्य" ("पूज्ये **पितरि** पुत्रे च **तात-शब्दः** स्मृतो बुधैः" इति केशवः। सम्बन्ध-विवक्षया षष्ठी)। निवेदयितुं 'व्यवसिता' सचेष्टा अपि ['व्यव-पूर्वात् स्यतेः अकर्म--कात् कर्तरि क्तः–(३।४।७२), स्त्रियां रूपम्) 'आपन्न-सत्त्वाम्' गर्भिणीम् इत्यर्थः ('**आपन्नसत्वा** स्याद् गुर्विण्य् अन्तर्वत्नी च **गर्भिणी**' इति रघु-टीकाया मल्लिनाथाः ३।९) 'निवेदयितुं न पारयामि' शक्नोमि, तत्क्रोधस्यैव सम्भवादित्याशयः।

124n.—1. उचितेषु—(Com). Cf. Ra. I. 50; III. 54; **ŚPB.** XXII. 55; उचित=Due, proper (K); **प्रसरति**=(Move)—Cf. 'न ममेदृशे प्रस्तावे हस्तः प्रसरति'–*Rat. IV.* **काम इदानीं** &c.–Cupid is notorious for his taking delight in misleading the innocent girls in their love-affairs, also in frustrating the desires of the lovers. Cf. "अलब्ध-फलनीरसं मम विधाय तस्मिन् जने, समागम-मनोरथं भवतु पञ्चवाणः कृती'—*Vik. II.* 11. 'चन्द्र! चण्डाल! कृतार्थोऽसि'—*Kād. p.* 619. "तत् सुष्ठु खल्वेवमुच्यते कामो वाम इति'—*MK. V.* "अहो कामस्य वामत्व' &c.—

Rām. IV. 1. 68. **2. सखी पदं कारिता**—Cf. 'धर्मेणापि पदं शर्वे **कारिते** पार्वतीं प्रति'—*Ku. VI.* 14 ; 'इरावती—हञ्जे पश्य, **कारितेव** वकुलावलिकया एतस्मिन् **पदं** मालविका'—*Māla. III.* 'भवतु पञ्चबाण-सुखी **पदं कारिता**' *Vik. II.* 'भवतु कृत-कृत्यश्च मदनः'—MM. IV. 3 ; "सकामोऽस्तु मदनः"—Ibid. VI. 15. (पदम्+कृ) in the **causal** means "to cause to have dealings or transactions with," "to cause to apply oneself to," 'to cause to take up a station,' whence may easily flow the interpretation 'made to trust'—*M.* **3. लेख-मात्रमपि**—Leaving aside the question of sending men to escort Śak. to his capital, the king is not despatching a letter even (**Vide VI. 12. infra**). **4. एतावतः कालस्य**—Implies that a **long time** intervenes between the actions of the Prelude and the Main scene. 'आपन्नसत्त्वाम्' also corroborates this. According to *PP*, Śak. is now in the **seventh month of her pregnancy**. Cf. 'अतः तां **सप्तमे मासि** गर्भे स्फूर्तिमुपेयुषि' &c. **विकारयति**—Causes a change in the feeling (**Com. & 108n. 9.**) **5. विसृजावः**—Mark the dual number here. This is because Anasūyā thinks that Priyaṁvadā though absent, will not disagree to her proposal as it is only beneficial to Śak. **6. दुःखशीले** &c.—'*Hard to please, bad-tempered, irritable*'—*AD* ; *Ra. III.* 6. The ascetics have always to perform daily duties and undergo various hardships. So practically they have no time (*UC. I*). Even if they have, I would not like to impose an additional trouble upon them with a request to take the souvenir ring to the king's place. Besides I doubt whether ill-tempered as they are, they will at all be suitable messengers in love affairs. ['शृङ्गार-रसा-नभिज्ञे परिमिता-हारादि-क्लिष्टे—Ś.] Note that Anasūyā is **quite right** in her conjectures as will be **corroborated** by the **conduct** of शार्ङ्गरव in *Act. V.* **तपस्वि-जने**—Has निर्धारणे ७मी। For similar construction, Cf. '**पौरे जानपदे** राजन्! न पश्यामि कञ्चित् यो न शोचति ते सुतम्'—*Rām.7.* **आपन्नसत्त्वां**-(Pregnant)-(218n. 6). Cf. 'समम् आपन्नसत्त्वास्ता रेजुः'—*Ra. X.* 59; *MN on Ra. III.* 9. **8. सखीगामी दोषः**—Refers to Śak.'s negligence regarding the proper reception of the great sage दुर्वासाः,

resulting in an imprecation, causing forgetfulness on the part of the king apropos of Śakuntalā. Anasūyā is afraid of making a clean breast of the whole affair to Kaṇva, lest he would become angry with Śak. for her negligence. **पारयामि**—Is either the **casual** of 'पृ' meaning 'to conduct across', 'bring over', 'accomplish' * * and thence 'to be able', or is a **nominal** form (नामधातु) from 'पार'—'the opposite bank (*of a river*), 'the other side', 'the end'—*M*.

Text :—(प्रविश्य) प्रियंवदा (सहर्षम्) —सहि, तुवर तुवर सउन्दलाए पत्थाण-कोदुअं णिव्वत्तिदुं ।

[सखि, तरस्व, तरस्व, शकुन्तलायाः प्रस्थान-कौतुकं[1] निर्वर्तयितुम्[2]] ।

(*Entering*) Priyaṁvadā (*With joy*)—Make haste, friend, make haste, to perform[2] the festive[1] solemnities[1] at Śakuntalā's departure.[1]

अनसूया (सविस्मयम्)—**सहि, कहं एदं** [सखि, कथमेतत्] ।

Anasūyā (*With astonishment*)--How's that, friend ?

प्रियंवदा—सुणाहि । दाणिं सुह-सइद-पुच्छिआ सउन्दला-सआसं गदम्हि [शृणु । इदानीं सुख-शयित-प्रच्छिका[3] शकुन्तला-सकाशं गतास्मि) ।

Priyaṁvadā—Listen ! I went just now to Śakuntalā, to inquire[3] if she had a comfortable sleep[3].

अनसूया—तदो तदो—[ततस्ततः ।] Anasūyā—Then, what next ?

प्रियंवदा—दाव एणं लज्जा-वणद-मुहिं परिस्सजिअ सअं ताद-कस्सवेण एव्वं अहिणन्दिदं—दिट्ठिआ धूमाउलिद-दिट्ठिणो वि जअमाणस्स पाअए एव्व आहुदी णिपडिदा । वच्छे ! सुसिस्स-परिदिण्णा विअ विज्जा असोअणिज्जासि संवुत्ता । अज्ज एव्व इसि-पडिरक्खिदं तुमं भत्तुणो सआसं विसज्जेमि त्ति (तावत् एनां लज्जाऽवनत-मुखीं[4] परिष्वज्य[5] स्वयं तात-काश्यपेन एवमभिनन्दितम्—दिष्ट्या[6] धूमाकुलित-दृष्टे[7]रपि यजमानस्य पावके एव आहुतिः निपतिता ।) वत्से ! सुशिष्य-परिदत्ता[8] इव विद्या अशोचनीयासि[9] संवृत्ता । अद्यैव ऋषि-परिक्षितां[10] त्वां भर्तुः सकाशं विसर्जयामि—इति) ।

Priyaṁvadā—Just then, Father Kāśyapa himself, having embraced[5] her, who had her face[1] down-dropt with shame[4], greeted her thus :—Luckily[6] the offering of the sacrificer has fallen directly into the fire, though[7] (*his*) eyes (*vision*) were troubled

by reeks[7]. My child ! like knowledge imparted[8] to a deserving student[8], you have become unregrettable[9]. Even this very day, (*I*) will send you to (*your*) husband's place escorted[10] by anchorites.[10]

V. L.—'०प्रच्छिका'—*V. S.* '०पृच्छिका'—R. 'सुखसुप्तिका-प्रच्छन-निमित्तम्'—B. 'सुखशयितुं प्रष्टुम्'—M ; R & S omit 'स्वयं' before 'तात काश्यपेन'। 'धूमाकुलित'—R. V. 'धूमोपरुद्ध'—S. 'धूमावरुद्ध'—B. M. 'प्रतिरक्षिताम्'—M. 'रक्षिताम्'—R. S. 'परिगृहीताम्'—S. B. 'परिरक्षिताम्'—HS.

प्रियंवदेति। 'कौतुकम्' पारम्पर्या-गत-मङ्गलं [कौतुक नर्मणीच्छायाम् उत्सवे कुतुके मुदि। **पारम्पर्यागत-ख्यात-मङ्गलोद्वाह**-सूत्रयोः' इति हैमः) 'निर्वर्त-यितु' संपादयितु 'तरस्व'। हर्षे आवेगे वा द्विरुक्तिः। **प्रियंवदेति**। 'सुखेन शयित' यद्वा 'सुखं' सुखकरं 'शयितं' (भावे क्तः) इति 'सुख-शयित', तत् पृच्छति इति ण्वुला (३।३।१० ; ३१७४) 'सुख-शयित-**प्रच्छिका**', प्रातर्गत्वा रात्रौ तव सुखशयनं जातं, न वेति इति या पृच्छति सा 'सुख-शयित-प्रच्छिका' इत्युच्यते। ('सुखशयितपृच्छिका' इत्य**पपाठः**) । **प्रियंवदेति**। 'तावत्' इत्यवधौ, अत्रान्तरे इत्यर्थः। 'परिष्वज्य' वात्सल्यात् आलिङ्ग्य 'एव' वक्ष्यमाण-प्रकारम् 'अभिनन्दितम्' आनन्देन प्रशंसितम्।. 'दिष्टया' इत्यानन्दे (('**दिष्टया** समुपजोषं च **इत्यानन्दे** इत्यमरः)। 'धूमेन आकुलिता' कलुषीकृता 'दृष्टिः' नयनं यस्य तादृशस्य अपि 'यजमानस्य' (३।२।१२८) होतुः 'आहूतिः' देवार्थं प्रक्षिप्तम् आज्यादिकं 'पावके' (३।१।१३३) '**यज्ञाग्नौ 'एव', न तु भूम्यां** निपतिता'। ममायासं विनापि त्वं महाप्रताप-शालिनि सत्पात्रे पतितासि इत्याशयः। (अत्र पावक-पातोचिताया आहूते नान्यत्र पातात् योग्य-कर्मणा प्रशंसितत्वेन **समा-लङ्कारः**। तथाचोक्तं दर्पणे-"**समं** स्यादानुरूपेण श्लाघा-योग्यस्य वस्तुनः' इति। **अप्रस्तुतप्रशंसा च**)। अतएव 'अशोचनीया असि' न खेदकारणं भवसि। अनसूय-काय शिष्याय प्रतिपादितं वेदादिज्ञानं सुखसाध्य भवति। त्वमपि तद्वत् सतपात्र-प्रतिपादिता मम सुखकारणं भवसि। 'विसर्जयामि' प्रेरयिष्यामि इत्यर्थः। ('वर्त-मान-सामीप्ये वर्तमानवद्वा' (३।३।१३९) इति लट्। स्वार्थे णिच्)।

125n.—1. **तुवर तुवर**—Extremely common in Bhāsa-Dramas **कौतुकं**—*Customary auspicious festive solemnities.* "**अथ कोतुकं कौतूहले** मङ्गले च'—Bhoja. 'मङ्गलार्थं सुधा-गैरिक-लेपादि यत् क्रियते तत् कौतूकम्

उच्यते'—*Cāritrabardhana.* 'वैवाहिकैः **कौतुक**-संविधानैः'—*Ku. VII.* 2; 25 ; *Ra. IX.* 53. 'अद्यैव **कौतुक**-मङ्गलं कर्तव्यम्'—SV. Somc imes it means a 'हस्तसूत्र'—*Ku. V.* 66 ; *Ra. VIII.* 1. 2. **सुख-शयित-प्रच्छिका**—सुख-शयित+प्रच्छ्+ण्वुल् कर्तरि स्त्रियाम्। 'ण्वुल्' by "**तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्**" (3. 3. 10 ; 3175). Cf. "कृष्णं द्रष्टुं गच्छति, कृष्णं दर्शको गच्छति"—**Prabhā**. R's '**पृच्छिका**' is **bad**, as 'ग्रहिज्या'—&c. (6. 1. 16–i. e. change of '**प्रच्छ**' into '**पृच्छ**' does not apply here. G's "**सुखशयितस्य** पृच्छा यस्याः सा सुख-शयित-पृच्छिका। संज्ञायां कन्, कात् पूर्वस्येकारः" is '**चिन्त्य**', as व्यधिकरण-बहुव्रीहि in such cases is **not sanctioned** by *Patañjali*—'**समानाधिकरणानां बहुव्रीहिः *** व्यधिकरणानां मा** भूत्'—*MBh.* Now Cf. 'भृग्वादीन् अनुगृह्णन्तम् **सौखशायनिकान्** ऋषीन्' —*Ra. X.* 14 ; '**सौख-रात्रिकः**'—JH. IV. 49 ; '**सौस्नातिकः**' —Ra. VI. 61. 3. **दिष्ट्या**—(95n. 1). 'दिष्ट्या सोऽयं महाबाहु रञ्जना-नन्द-वर्धनः' —UC. 1. 32. **4 सुशिष्य-परिदत्ता** &c.—Knowledge should always be imparted to a **deserving student**. Cf. "विद्या ह वै ब्राह्मणमाजगाम तवाहमस्मि, त्वं मां पालय **अनर्हते मानिने नैव मादा** गोपाय मां श्रेयसी ते अहमस्मि"—*Chāndogya Brāhmaṇa.* 'विद्या ब्राह्मणमेत्याह शेवधिस्तेऽस्मि रक्ष माम्। **असूयकाय** मां **मादा** स्तथा स्यात् वीर्यवत्तमा'—*MS. II.* 114;113. 'प्रशान्त-चित्ताय जितेन्द्रियाय प्रक्षीण-दोषाय यथोक्त-कारिणे। गुणान्वितायानुगताय सर्वदा प्रदेयमेतत् सकलं मुमुक्षवे'—*Vedānta-sāra*, 27. 'अवन्ध्य-यत्नाश्च बभूवुरत्र ते, क्रिया हि वस्तूपहिता प्रसीदति'—*Ra. IV.* 29, "देवी —यदा पुन**र्मन्दमेधाः** शिष्या उपदेशं मलिनयति तदाचार्यस्य दोषो नु" ॥ "राजा —* * * विनेतुः अद्रव्यपरिग्रहोऽपि बुद्धिलाघवं प्रकाशयति"—*Māla. I.*. 'नाद्रव्ये निहिता काचित् क्रिया फलवती भवेत्। न व्यापार-शतेनापि शुकवत् पाठ्यते बकः'—*Hit.* ; *UC. II.* 4. *Nirukuta of Yāska. II.* 3-4, 14. *KP. I.* 10 & 11 ; 26, 16 ; *AR. II.* 10 ; *PP. II.* 27, 10—11. "**Neko Ni Koban**"—(Don't cast pearls before the swine)—**Japanese** Proverb. **अशोचनीया**—Cf.'अशोच्या हि पितुः कन्या **सद्भर्तृ प्रतिपादिता**'—*Ku. VI.* 79.

Text :—अनसूया—अह केण सूइदो तादकस्सवस्स वुत्तन्तो (अथ केन सूचित' स्तात-काश्यपस्य वृत्तान्त.)।

Anasūyā—But by whom was the matter reported[1] to father Kāśyapa ?

पिअंवदा—अग्गि-सरणं पविट्ठस्स सरीरं विणा छन्दोमईए वाणिआए । (अग्नि-शरणं[1] प्रविष्टस्य शरीरं विना छन्दोमय्या[2] वाण्या) ।

Priyaṁvadā—By an incorporeal metrical speech,[2] when he was entering the sanctuary[1] of fire[1].

अणसूआ (सविस्मयम्) कहेहि (कथय) ।

Anasūyā (*With wonder*)—(*Do*) tell (*it*).

पिअंवदा (संस्कृतमाश्रित्य)—

श्लोक दुष्यन्तेनाऽऽहितं[3] तेजो दधानां भूतये[4] भुवः ।
अवेहि[5] तनयां ब्रह्मन्नग्नि-गर्भां[6] शमीमिव ॥४॥

Priyaṁvadā—(*Employing Sanskrit*)—Know[5], O Brāhmana ! that like a Śamī tree, holding[6] fire within[6], (*thy*) daughter holds for the good[4] of the world, the energy deposited[3] by Duṣyanta. (4)

अणसूआ (प्रियंवदामाश्लिष्य)—सहि, पिअं मे, पिअं मे । किन्तु अज्ज एव्व सउन्दला णीअदित्ति उक्कण्ठा-साहारणं परितोसं अणुहोमि (सखि, प्रियं मे, प्रियं मे । किन्तु अद्य एव शकुन्तला नीयत इति उत्कण्ठा-साधारणम्[1] परितोष-मनुभवामि) । Anasūyā (*Clasping Priyaṃvadā*)—Friend, (*that's really*) a sweet news to me. But even today Śakuntalā is being taken away, so I feel joy mingling[7] with melancholy[7].

पिअंवदा—सहि, वअं दाव उक्कण्ठं विणोदइस्सामो । सा तवस्सिणी णिव्वुदा होदु ।

(सखि, आवां तावदुत्कण्ठां विनोदयिष्यावः । सा तपस्विनी निर्वृता भवतु) ।

Priyaṁvadā—Friend, we will (*some-how*) console our uneaeasiness. Let that poor creature be sated.

V. L.—B has 'पुनः' for 'अथ' । 'सूचितः'—R. V. M. 'आख्यातोऽयम्' —S. B. 'छन्दोमय्या'—R. V. B. M. 'छन्दोवत्या'—S. 'वाण्या'—R. V. S. 'वाचा'—M. B. '०साधारण परितोषमनुभवामि'—R. V. B. M· '०साधारणः मे परितोषः'—S.

प्रियंवदेति । 'शरीरं विना' अशरीरिण्या 'छन्दोमय्या' श्लोक-रूपया 'वाण्या' गीर्वाण्या संस्कृत-वाचा । 'अग्नि-शरणं' त्रेताग्नि-गृह ('शरणं गृह-रक्षित्रोः वध-

रक्षणयोरपि' इति मेदिनी) 'प्रविष्टस्य ' कण्वस्येति सम्बन्धः। **प्रियंवदेति।** 'संस्कृतम् आश्रित्य' अवलम्ब्य देवभाषया इत्यर्थः। (तथाचोक्तं मातृगुप्तचरणैः —'योज्यं विदूषकोन्मत्त-बाल-तापस-योषिताम्। नीचानां षण्डकानाञ्च नीच-ग्रहविकारिणाम्। विद्वद्भिः प्राकृतं कार्यं, **कारणात् संस्कृतं क्वचित्**'। अत्र तु अशरीरिण्याः वाचोऽनुवाद **एव कारणम्। यथास्थितस्यैव अनुवादः**। स च संस्कृत-मन्तरेण न सम्भवति इति संस्कृताऽऽश्रयणम्)। **दुष्यन्तेनेति**। 'ब्रह्मन्'! हे विप्र! (**'ब्रह्मा विप्रः** प्रजापतिः' इत्यमरः) महाराजेन 'दुष्यन्तेन आहितम्' निहितं निषिक्तम् इति यावत् (**'आहितं निहितं** न्यस्तमारोपितमिति स्मृतम्' इति हलायुधः) 'तेजः' शुक्रं वीर्यं (**'तेजः** प्रभावे दीप्तौ च बले **शुक्रेऽपि'** इत्यमरः) 'भुवः' पृथिव्याः 'भूतये' मङ्गलाय ('भूतिः भस्मनि सम्पत्ति-हस्ति-शृङ्गारयोः स्त्रियाम्' इति मेदिनी। अनेन अस्य भावि-चक्रवर्तित्वं ध्वनितम्) 'दधानां' धारयन्ती 'तनयां' शकुन्तलाम् 'अग्निः गर्भे' यस्याः ('गड्वादेः परा सप्तमी वाच्या' (वाः—८९८) इति **सप्तम्य-न्तस्य-परनिपातः**)। तादृशी पावनीं 'शमीमिव अवेहि' जानीहि। **उपमानुप्रासौ।** अनेन **मार्गलक्षणम**ङ्गमुपक्षिप्तम्। तल्लक्षणं यथा दर्पणे—'तत्त्वार्थकथनं **मार्गः।** **श्लोको** वृत्तम्) ॥४॥ **अनसूयेति।** 'उत्कण्ठया' दुःखेन ('रागे त्वलब्ध-विषये वेदना महती तु या। सशोषणी तु गात्राणां **तामुत्कण्ठां** विदुर्बुधाः। अपिच, 'सर्वेन्द्रियः सुखास्वादो यत्रास्तीत्यभिधीयते। तत् प्राप्तीच्छां ससङ्कल्पा तामुत्कण्ठां विदुर्बुधाः"—इति **रसिकजनमनोल्लासिनी**। 'साधारणं' समानं' ('साधारणं तु सामान्यम्' इत्यमरः) 'परितोषम्' आह्लादम् 'अनुभवामि'। शकुन्तलाया विरहे उत्कण्ठा, स्वामि-सम्मेलने सन्तोष इति युगवद्वयम्। (**प्रियंवदेति।** 'सा तपस्विनी' अनुकम्पार्हा ('तपस्वी तापसे, चानुकम्प्ये त्रिषु' इति मेदिनी) 'निर्वृता' पतिसंयोगेन सुखिता 'भवतु'।

126n.—1. **अग्नि-शरणं**—The sanctuary of three fires. (MS. IV. 58; 134n. 5.) "Fire is an important object of veneration with the Hindus, almost as much so as with the ancient Persians. Perhaps the chief worship recommended in the Vedas is that of Fire and the Sun"—*M.* Cf. '**त्रेताग्नि**-धूमानिन्द्य-कीर्तेः"—*Ra. XIII.* 37; *MS. II.* 43, 231; *III.* 81, 84, 85, 171, 212; *IV.* 38; 41. *Indian Wisdom—p.* 197-198. **2.** **संस्कृतमाश्रित्य**—The usual rule is '**स्त्रीषु** मा प्राकृत वदेत्,' but '**संस्कृतं संप्रयोक्तव्यं** लिङ्गिनीषूत्तमासु च'—*SD.* '**उत्तमासु** उत्कृष्ट-जातीयासु नारीषु संस्कृतं कविना यथेच्छं **सम्प्रयोक्तव्यम्**'

—HS. 'कार्यत श्चोत्तमादीना कार्यो भाषा-विपर्ययः'—*SD. Ch. VI* ; 'योषित्-सखी-बाल-वेश्या-कितवाऽप्सरसान्तथा। वैदग्ध्यार्थं प्रदातव्य संस्कृतञ्चान्तरान्तरा' —*Ibid*—(*also Com.*). Thus '**वसन्तसेना**' in (*MK. IV.*) speaks in Sanskrit, so does '**मंत्री**' in (*PC. IV.*). Again **सूत्रधार** in *MK* speaks a few sentences in प्राकृत like an inferior character. In the quarrel between **वीरक** and **चन्दनक** (*in MK. VI*), there is **भाषा-व्यत्यय** in the speech of चन्दनक। In MM '**मालती**' (Act. IV), '**बुद्धरक्षिता**' and **लवङ्गलतिका** (Act VII) speak in Sanskrit. **3. तेजो दधानां**—आत्मनेपद is here **irregular** as the क्रियाफल **benefits** the earth and not the agent. *Cf. Ra. VI.* 75 ; PA&*MD.* **5. अवेहि**=अव+इ (लोट् हि) =अव+एहि। पररुप एकादेश [by 'ओमाङोश्च'—6. 1. 95] **bars the वृद्धि** by 'एत्येधत्यूठ्सु'—(6. 1. 89) ; 'पुरस्तादपवादा अन्तरान् विधीन् बाधन्ते, नोत्तरान् इति न्यायेन (T) इयं वृद्धि: 'एङि पररुपम्' (6. 1. 94). इत्यस्य बाधिका, न तु 'ओमाङोश्च' इत्यस्य'—*BD*; (138*n.* 1.) **4. अग्नि-गर्भां शमीमिव**—The Śamī tree is a kind of thorny **acacia** (*Acacia Suma*) and is supposed to contain fire. Agni, at the request of the gods, took in himself the lustre of Śiva (*Ku. IX.* 10-40), but later on being unable to brook the sulphuric action of तेजस्, he first of all entered into water to allay the terrible heat. He, however, was reported to the gods by a **frog** who was much troubled by the intense heat generated by the presence of Agni. 'रसातलतले देवा वसत्यग्निरिति प्रभो। सन्तापादिह संप्राप्तः पावकप्रभवादहम्" ।२४।) । The fire, then fled inside the Aśvattha tree, and cursed the **frog to be bereft of the sense of taste.** His new abode also was reported to by an **elephant,** who was also similarly cursed to have his **tongue turned back**. ('प्रतीपा भवतां जिह्वा भवित्रीति भृगुद्वह:' ।३६।) । Next Agni entered into the Śamī tree, but this time also his presence was made known to the gods by a **parrot,** as a consequence of which **it lost its power of speech** by the malison of Agni. ('शशाप शुकमग्निस्तु वाग्विहीनो भविष्यसि * * * ततः प्रभृति चाप्यग्निः शमी-गर्भेषु दृश्यते') । The gods discovered him in the Śamī tree, which they thenceforth

rendered sacred and made his permanent abode.—*Mahā.* अनु- -शासनपर्व—*Ch.* 85. *P.* 1957. (*B. Ed.*). For a different story *Vide* शल्यपर्व—*Ch.* 48, सारस्वतोपाख्यान – *Śl.* 12-18 ; also *Ādi. Ch. VI.* (पौलमपर्वणि अग्निशापे षष्ठः अध्यायः') । M has a quite **different** myth q.v. Also *Śak. II.* 7 ; *Ra. III.* 9. ["By this it was indicated that Śak. would have a son equal to Agni in glory"–Ś.] **5. उत्कण्ठा** &c.—उत्कण्ठा=Solicitude (*Com.*). Generally **साधारणम्** means 'common to two or more'. (103n. 6). Here it means 'mixed with', **'co-extensive with'**. For this sense, Cf. 'वीजस्य सहि संसुप्तः **श्वास-साधारणाऽनिलैः**'—*Ku. II.* 42. **परितोषम्**—*Śak. I.* 2 ; *Ra. IX.* 92. **6. तपस्विनी**—Poor creature. "तपस्विनी दीन-तापसी" इति वैजयन्ती । Ordinarily the word **तपस्वी** means a hermit, who is necessarily a very poor man, depending upon others in all respects. Hence secondarily it has the sense of "one who is in need of help", or 'deserving pity'=(वराक).

Text :—**अनसूया—तेण हि एदस्सिं चूद-साहा-वलम्बिदे णारिएर-समुग्गए एतण्णिमित्तं एव्व कालान्तर-क्खमा णिक्खित्ता मए केसर-मालिआ। ता इमं हत्थ-सण्णिहिदं करेहि। जाव अहंपि से गोरोअणा तित्थ-मित्तिअ दुव्वा-किसलआइं त्ति मङ्गल-समालम्भणाइं विरएमि** (तेन हि एतस्मिश्चूत-शाखा-वलम्बिते[1] नारिकेर-समुद्गके[2] एतन्निमित्तमेव कालान्तर-क्षमा[3] निक्षिप्ता[4] मया केशर-मालिका। तदिमां हस्त-सन्निहितां कुरु। यावत् अहमपि तस्यै गोरोचना[5], तीर्थमृत्तिका, दूर्वा-किसलयानि इति मङ्गल-समालम्भनानि[6] विचरचयामि)।

Anasūyā—And so, for this very purpose a festoon of Vakula [3]suited to endure the lapse of time[3], was placed[4] by me, in this mango-bough-suspended[1] cocoa-casket[2]. So get it near (*my*) hand, whilst, I too get ready for her auspicious[6] decorations[6] such as yellow[5] orpiment[5], sacred earth and sprouts of Dūrvā grass.

प्रियंवदा—तह करीअदु (तथा क्रियताम्)। (अनसूया निष्क्रान्ता। प्रियंवदा नाटयेन सुमनसो गृह्णाति)। Priyaṁvadā—So be it done.

(*Exit Anasūyā, Priyaṃvadā gesticulates taking of the flowers*).

(नेपथ्ये) **गौतमि, आदिश्यन्तां शार्ङ्गरवमिश्राः शकुन्तला-नयनाय।**

(*In the tiring room*)—Gautami, bid Śārṅgarava and others (*get ready*) for escorting Śakuntalā.

प्रियंवदा (कर्णं दत्वा)—**अणसुए, तुवर, तुवर। एदे क्खु हत्थिणाउर-गामिणो इसीओ सद्दावीअन्ति।**

(अनसूये, त्वरस्व, त्वरस्व। एते खलु हस्तिनापुर-गामिन ऋषयः शब्दाय्यन्ते)।

Priyaṁvadā (*Leaning her ear*)—Quick, Anasūyā, quick; here indeed the Hastināpura-going sages are being called.

(समालम्भन-हस्ता प्रविश्य) **अनसूया**—**सहि, एहि। गच्छम्ह** (सखि, एहि गच्छावः)। (परिक्रामतः)। Anasūyā (*Entering with decorations in hand*)—Come, friend, let's go. (*This said, both turn round*).

V. L.—'तदिमां'—R. V. B. M. 'त्वां त्वम्'—S. '०मालिका'—R. V. M. '०गुण्डा'—S. B. 'हस्तसन्निहितां'—R. V. M. S. 'पद्मपत्रसङ्गतां'—B. 'मृगरोचनां तीर्थमृत्तिकाम् इति ०समालम्भनानि'—R. V. M. 'गोरोचनां * ०समालम्भनम्'—B. 'गोरोचना तीर्थमृत्तिका* इति समालम्भनानि'—S. 'शार्ङ्गरवमिश्राः'—R. V. M. 'शार्ङ्गरव-शारद्वत-मिश्राः'—B. S. C. 'शब्दाय्यन्ते'—V. M. 'शब्दायन्ते'—S. B. 'आकार्यन्ते'—R.

अनसूयेति। ''चूतस्य' आम्रस्य 'शाखायां' बिटपे 'अवलम्बिते' अवस्थापिते 'नारिकेरः' नारिकेलः (इति शब्दरत्नावली) तस्य 'समुद्गके' सम्पुटके ('समुद्गकः संपुटक' इत्यमरः। 'खोल' इति भाषा) 'एतस्मिन् निमित्तमेव' प्रस्थान-कौतुकम् सम्पादयितुमेव 'मया कालान्तर-क्षमा' कालापगमेऽपि अम्लाना, चिरकाल-स्थायिनी इत्यर्थः ['ईक्षि-क्षमिभ्यां च', (वाः—२९१३) इति णः प्रत्ययः] केशर-मालिका' बकुल-माला 'निक्षिप्ता' न्यस्ता रक्षिता इत्यर्थः। 'तत्' तस्माद् हेतोः 'इमां' मालिकां 'हस्तस्य सन्निहितां कुरु' हस्तेन गृहाण, येन प्रस्थान-विलम्बः न स्यात् इत्याशयः। 'यावत्' इत्यवधौ। 'गोरोचना' स्वनाम-ख्यात-पीत-द्रव्यविशेषः। 'तीर्थ-मृत्तिका' पुण्य-क्षेत्रानीता मृत्तिका 'दूर्वाणां किसलयानि' अङ्कुरा 'इति' (निपातेन अभिहितत्वात् प्रथमा)—'मङ्गलार्थानि' मङ्गलजनकानि 'समालम्भनानि' अलङ्करणानि ('समालम्भनम् आलेपे तिलकेऽलङ्कृतावपि' इति राघवधृतः यादव-प्रकाशः)। विरचयामि' एकत्र करोमि इत्यर्थः। **नेपथ्य इति।** 'शार्ङ्गरव-मिश्राः' शार्ङ्गरव-प्रधानाः ('प्रधाने मिलिते मिश्र'' इति धरणिः)। 'शकुन्तलायाः नयनं' पतिगृह-प्रापणम्। तस्मै इति तादर्थ्ये ४र्थी। **प्रियंवदेति।** ('हस्तिनापुर-गामिनः' इत्यत्र 'कुमति च'—(८।४।१३)—इति सूत्रस्य नावसरः। 'गामिन्' इति शब्दस्तु क्षुभ्नादिषु पठितव्यः, सूत्रकृता 'प्रष्ठोऽग्र-गामिनि' इति सूत्रे तथैव ज्ञापितत्वात्।

क्षुभ्नादि राकृतिगणः । तथा चोक्तं वामनेन—'अविहित-लक्षणः णत्व-प्रतिषेधः क्षुभ्नादिषु द्रष्टव्यः' इति') 'ऋषयः शब्दाय्यन्ते' आहूयन्ते' गौतम्या इति शेषः। **प्रविश्येति**। 'समालम्भनं हस्ते' यस्याः सा ('गड्वादेः परा सप्तमी वाच्या' (८९८)-इति सप्तम्यन्तस्य परनिपातः। **गड्वादि राकृतिगणः**। काशिका-कार-मते तु एतादृशाः सप्तम्यन्तस्य पर-निपाताः "वाऽऽहिताग्न्यादिषु"—२।२।३७) इति सूत्रेणैव सिद्धाः। आहिताग्न्यादे राकृतिगणत्वात्)।

127.—1. नारिकेर—समुद्गके &c.—नारिकेर=Cocoanut=नारिकेल Cf. 'बालस्य नारिकेलस्य जलं प्रायो विरेचनम्'—*Rājavallabha*.'नारिकेल-समाकाराः दृश्यन्ते हि सुहृज्जनाः'—*Hit*. **समुद्गकः**—A casket. "समुद्गः संपुटो ज्ञेयः"—*Halāyudha*. "खर्जुर-पुट-**समुद्गके**"—HC. III. 18. समुद्-गच्छति इति सम+उद्+गम्+ड by ('अन्येष्वपि दृश्यते'—वाः—३।२।४८)। 'स्वार्थे कन्'—*BhD*. In fact there is no general rule for **स्वार्थे कन्**। But this is **inferred** from—'न सामि वचने' (5.4.5). Read—"केन पुनः स्वार्थिकः कन् विहितः। **एतवेदेव ज्ञापकं भवति स्वार्थे कनिति**"—KV.; T. 2077. In **prosody**, however, '**समुद्ग**' means an **artificial stanza** the two halves of which exactly correspond in **sound**, though they differ in **meaning**. Cf. "स्यन्दना नो चतुरगाः सुरभा वाविपत्तयः। स्यन्दना नो च तुरगा सुरेभावा विपत्तयः"—*Ki. XV*. 16; *BK. X*. 19. **कालान्तर-क्षमा**—Cf. "तथा प्रहरसि —यथा जनोऽयं न कालान्तर-क्षमो भवति"—*Māla. Act. I* **केशर-मालिका** —An auspicious Vakula-garland as described in *Ra*.—'तया स्रजा, मङ्गल-पुष्पमय्या'—*VI*. 84. **2. गोरोचना**—Kāli. **always writes 'गोरोचना'**, and **never** '**मृग-रोचना**' (R). Vide Vik. IV. 33; V. 18; Ku. VII. 15; 7. It is prepared from the bile or urine of a cow or is found in her head, and is used as a medicine, a yellow dye or a perfume, 'स्वनाम-ख्यात-पीतवर्ण-द्रव्यम्। तत् तु गो-मस्तक-शुष्क-पित्तम्'—*Kalpa*—"विशोष-येत् वस्तिगतं सशुक्रं मूत्रं सपित्तं पवनं कफं वा। तदाश्मर्युपजायते च क्रमेण पित्ते-ष्विव **रोचना गोः**"—*Mādhava Kara*. **So reject मृगरोचना**। 3. **समालम्भनानि** सम्+आ+लभ्+ल्युट् करणे। ('नुम्' by 'लभेश्च'—7. 1. 64.—'लभेश्च अदादौ प्रत्यये शब्लिट् वर्जिते नुमागमो भवति"—*KV*.—*Decorations*—(*Com*.) **4. विरचयामि**—(*Prepare*). The following list of auspicious articles

is presented at the time of departure—"दुग्धञ्च रोचनामाज्यममृतं पायसं तथा। शालग्रामं पक्व-फलं स्वस्तिके शर्करां मधु ॥ मार्जारञ्च वृषेन्द्रञ्च मेघपर्वतमूषकम्। मेघाच्छन्नस्य च रवेरुदयं चन्द्रमण्डलम्। कस्तुरी कज्जलं तोयं हरिद्रां तीर्थमृत्तिकां। सिद्धान्नं सर्षपं दूर्वां विप्रबालञ्च बालिकाम्' &c.—BrP. **5. शार्ङ्गरवमिश्राः**—(7n.1.) or, say ३या-तत्समास,—Śārṅgarava as head (=प्रधान:-Com.) **6. हस्तिनापुर-गामिनः**—-हस्तिनापुरं गामिनः इति २या तत्पुरुष: by the *Vārt.*'गम्यादीनामुपसंख्यानम्'—(2.1.24.'गम्यादयश्च प्रयोगतः ज्ञेया:'—T). The city of 'हस्तिनापुरम्'–[*according to HV.& Purāṇas*]; ['हस्तिनापुरम्','हस्तिनीपुरम्'—*H.* 'हास्तिनपुरम्'—*Mahā*] was founded by *Hastī,* the 7th king from Duṣyanta (दुष्यन्त > भरत > वितथ > मन्यु बृहदिषु > सुहोत्र > हस्ती—*HV. Pitṛ-kalpa. Ch.* 20 ; (*VaP. Ch.* 99 ; 165 & *VP. IV. Ch.* 18). *Mahā. I.* 94. makes 'हस्ती' *the great-grandson-son of Bharata* (दुष्यन्त-भरत-भूमन्यु-सुहोत्र-हस्ती)। Thus the mention of 'हस्तिनापुरम्' **before** the **birth** of the future generations of Duṣyanta, gives rise to **anachronism**. Our poet perhaps has used this name as it was quite **well known** to the people of his time. This compound word **involves knotty points of** णत्वविधि। The उत्तरपद "**गामिन्**' contains a letter of **कवर्ग,** followed by 'र' in the पूर्वपद" therefore 'न' of the last member must be changed into *cerebral* (ण) by '**कुमति च**'–(8. 4. 13 ; 1056). For example–'**वस्त्र-योगिणौ,** चन्द्र-**गोमिणौ.** स्त्री-**भोगिणौ,** शुष्क-**गोमयेण,** सर्वा**ङ्गाणि,** नगर-**कारेण,** वृक-**मुखेण**'—**Prabhā**. But when **Pāṇini himself uses dental** 'न' **in** '**प्रष्ठोऽग्र-गामिनि**'—S. 3. 2, the inference is this that 'गामिन्'at the final of a compound is an **exception** to the rule "**कुमति च**"। In that case 'गामिन्' **may be considered** as belonging to 'क्षुभ्नादि' class, although it is not actually mentioned in that list For **क्षुभ्नादि** is **आकृतिगण** (*Com*). Later Grammarians, Commentators, Lexicographers and Classical writers all **approve** of this view. 'कथं **प्र-पक्वानि** फलानि' * * * **अग्र-गामिनी** ? क्षुभ्नादित्वात्,—Prabhā. P. 561. "* * * "आत्मनेपदं स्यात् **कर्तृ**—गामिनि क्रियाफले" —*SK.* 2564. * * *"ञितश्च धातोरात्मनेपदम् स्यात् **कर्तृ**-गामिनि क्रियाफले"—*SK.* 2158. "**कर्तृ—गामिन्येव** फले आत्मनेपदं प्राप्तम्"—*BM.* 2688. T on 2738. 'सर्वम्य

प्रियभूताश्च ते नरा: स्वर्ग-गामिन:'—*Karmalocana.* "विद्या-विचार-तत्त्वज्ञा: राज्ञ: सम्मार्ग-गामिन:"—*Devī-purāṇa.* "मधुकरिके, विद्या-पार-गामिनाम्" &c.—*Māla. V*, where *K* observes "विद्यापार-पार-गामिनाम्"अधीत-वेद-वेदाङ्गानाम्'। 'वेदानां लेखकाश्चैव ते वै निरय-गामिन:'—PP.Ch. 4 Ibid II. 96. **(16 times); 'स्वर्ग-गामिन:'(31 times)**; "स्रस्त-शरीर-गामिनौ" —BC. VIII. 7.; *Puruṣottama Deva*, author of त्रिकाण्डशेष, makes 'सागरगामिनी' a synonym for 'नदी', which again has been used by our poet. Cf. "महीधरं मार्गवशादुपेतं स्रोतोवहा सागर-गामिनीव"—*Ra. VI.* 52. Qtd. Kalpa, where, *MN* has "सागर-गामिनी सागरगन्त्री"। While deriving this very word, the *redoubtable Pāṇinian Scholar Tārānātha* in his famous 'वाचस्पत्य' and 'शब्द-स्तोम-महानिधि,' observes सागर-गामिनी=सागर+गम्+णिनि ; (अत्र न णत्वम्)। 'सेनाग्र-गामिन:'—*Rām. V.* 48.7 ; 'निरय-गामिन:—17, 36 ; 'शीघ्र -गामिन:"—' 1. 11. 24. *Rājanirghaṇṭa* gives 'सागर-गामिनी' a synonym for 'सूक्ष्मैला'। *Goyicandra* in his संक्षिप्तसार-व्याकरण **justifies the dental** 'न' by placing 'गामिन्' (*in the* उत्तरपद) in the युवादि list. [*Cf.* युवादेर्न'—*Vārt.* 1055]. Only VM, cites 'वृष-गामिणौ' (8. 4. 13) as an example of 'कुमति च'। Like many statements of *VM* which have been considered to be **faulty** by T & BD (*Vide T. on* 5. 1. 66), this is also 'चिन्त्य:'। Most 'likely this is **a scribal interpolation**, for in 'शिष्टप्रयोग's **never 'ण' is met with गामिन्** । Besides अश्वघोष—a staunch follower of पाणिनि, and **Grammarians** of all other schools are **against** 'ण'. Curiously enough *Prof. G* retains the reading 'शकुन्तला अनुकम्प-भर्तृ-गामिनी" (*Act. IV. P.* 98) with **dental** "न", though in this connection he is bold enough to remark. "The reading 'हस्तिनापुर-गामिन:' found in almost all the printed texts is **incorrect**. 7. शब्दाय्यन्ते—शब्दं करोति इति 'शब्दायते' with 'क्यङ्' by'शब्द-वैर-कलहाऽभ्र-कण्व-मेघेभ्य: करणे" (3. 1. 17 ; 2613). 'Next शब्दाय (नामधातु)+णिच्+लट् अन्ते कर्मणि—शब्दाय्यन्ते—Made to respond.

Text :—प्रियंवदा (विलोक्य)—एसा सुव्वोदए एव्व सिहा-मज्जिदा

पडिच्छिअ-णीवार-हत्थाहिं सोत्थि-वाअणिआहिं तावसीहिं अहिणन्दीअमाणा चिट्ठइ सउन्दला। उपसप्पम्ह णं।

(एषा सूर्योदये एव शिखा-मज्जिता[1] प्रतीष्ट-नीवार-हस्ताभिः[2] स्वस्ति-वाचनिकाभिः[3] तापसीभिः अभिनन्द्यमाना तिष्ठति शकुन्तला। उपसर्पाव एनाम्)। (इति उपसर्पतः)।

Priyaṁvadā (*Looking*)—There stands Śakuntalā at the earliest sun-rise, bathed[1] to the crown of (*her*) head[1] and gratulated by the hermit-matrons, carrying[2] wild-rice in (their) hands[2] and uttering[3] benisons[3] upon her. Let's go up to her.

(*They move near*).

॥ (ततः प्रविशति यथोद्दिष्ट-व्यापारा आसनस्था शकुन्तला)॥

तापसीनां मन्यतमा—(शकुन्तलां प्रति) जादे, भत्तुणो बहुमाण-सूअअं महादेई-सद्दं लहेहि (जाते, भर्तुर्बहुमान-सूचकं[4] महादेवी-शब्दं लभस्व)।

(*Enter Śakuntalā resting on a seat engaged as descr ibed*).

One of the Hermitesses (*To Śakuntalā*)—

My child, mayest thou obtain the title of "Great Queen" indicative[4] of the high esteem of (*thy*) husband.[4]

द्वितीया—वच्छे, वीर-प्पसविणी होहि (वत्से, वीर-प्रसविनी भव)।

Second—Child, mayest thou give birth to a hero.

तृतीया—वच्छे, भत्तुणो बहुमदा होहि (वत्से, भर्तुर्बहुमता भव)।

॥ (आशिषो दत्त्वा गौतमीवर्जं निष्क्रान्ताः)॥

Third—Child, mayest thou be (*thy*) husband's "thought-much-of." (*After bestowing blessing, exeunt all save Gautamī*).

V. L.—'शिखामज्जिता'—R. V. 'शिखामार्जिता'—M 'शिखामग्ना'—S. 'कृतमज्जना'—B. प्रतीष्ट'—V. B. S. HS. 'प्रतिष्ठित'—R. M—

प्रियंवदेति।। 'शिखायाः' चूडायाः 'मज्जः' (भावे घञ्) मज्जनं स्नानम् इति यावत्। तादृशः 'शिखामज्जः' अभ्यङ्ग-स्नानम् सञ्जातः अस्याः (इति तारकादिभ्य इतच्-५।२।३६)। 'प्रतीष्टाः' मङ्गलार्थं गृहीताः 'नीवाराः हस्ते-' यासां ताभिः। 'स्वस्तिवाचनं माङ्गल्य-कर्मारम्भ-कालीन-मन्त्रोच्चारण-पूर्वक-तण्डुल-विकिरणम् (इति शब्दकल्पद्रुमे) तत् विधातुं प्रयोजनम् आसाम् इति 'स्वस्ति-वाचनाः' ('पुण्याह-वाचनादिभ्यःलुग् वक्तव्यः'—वाः(५।१।११)इति छ-प्रत्ययस्य लोपः। ततः स्वार्थिक-कन्-प्रत्ययेन स्त्रियां 'स्वस्ति-वाचनिका' पदं सिद्धम्) तादृशीभिः 'तापसीभिः अभिनन्द्यमाना' संस्तूयमाना 'तिष्ठति'। शकुन्तलामिति।

'बहुमान-सूचकं' बह्वादर-व्यञ्जकं 'महती देवी' महिषी ('देवी कृताभिषेकायाम्' इत्यमरोक्तेः) इति 'शब्दम्' आख्याम् 'लभस्व'। द्वितीयेति। 'वीर' (स्फा-यि-तञ्चि–,'उः–१७८,–इति अयतेः रक्, वि-भावश्च), प्रसूते या सा 'वीर-प्रसविनी' (इनि—३।२।१५७)। तृतीयेति। 'बहुमता' पूजिता। ('भर्ता नाम परं नार्या भूषणं भूषणादपि' इति भर्तुः बहुमानात् परं नास्ति किमपि आकाङ्क्षितम् नारीणाम् इति भावः। आशिष इति। ["वात्सल्यात् यत्र मान्येन कनिष्ठस्याभि-धीयते। इष्टावभारकं वाक्यमाशीः सा परिकीर्तिता]। गौतमीं वर्जयित्वा' इति 'गौतमी-वर्जम्' ('द्वितीयायाञ्च' (३।४।५३) इति णमुल्। 'तत्र हि परीप्सा-याम् इति प्रायिकम्' इति पदमञ्जर्यां हरदत्तमिश्राः)।

128.—1. **शिखा-मज्जिता**—Cf. 'शिरःस्नातजनैः'—*Rām. II.* 7. 3. On the eve of the performance of 'यात्रादि-मङ्गल-कर्म' **bathing** is absolutely necessary. Cf. 'अस्नानस्तु पुमान्नार्हो जप्यादि हवनादिषु' —*Smṛti.* **प्रतीष्ट** &c.—प्रति+इष+क्त कर्मणि=प्रतीष्टः—Carried; 'प्रति+ इष् means "**to carry**". Cf. 'किं किं **प्रतीप्य** मन्त्रयसे'—PN. I ; 'सत्कारः सत्कारेण **प्रतीष्टः**'—*SV. IV* ; '**प्रतीच्छे** मां रत्नमालिकां—*MK. III* ; (**187n. 5** ; *Rām. IV.* 10. 3). **नीवार** &c.—(19*n*. 1). As to the carrying of नीवार (*MS. VI.* 16.) by the matrons, R remarks '**शून्य-हस्तानाम् आगमनम् अनुचितम् इति नीवारा इत्याद्युक्तिः**', but this is '**चिन्त्य**', for the matrons carried particularly paddy as it is a *sine qua non* in **the** ceremony named **स्वस्तिवाचन** । In this ceremony **paddies must** be sprinkled with some Mantras in the beginning of that rite. " * * * स्वस्ति नो वृहस्पति दधातु' इति पठित्वा **तण्डुलान्** विकिरेत्। प्रमाणं **यथा** व्यासः—'संपूज्य गन्ध-पुष्पाद्यैः ब्राह्मणान् स्वस्ति वाचयेत्। धर्म्ये कर्मणि माङ्गल्ये संग्रामाऽद्भुतदर्शने'--*Kalp. P.* 1843. स्वस्ति इत्यस्य वाचनम् स्वस्ति-वाचनम्। स्वस्तिवाचनम् प्रयोजनम् आसाम् इति स्वस्ति-वाचनाः। The Tadhita-affix 'छ' is **elided** by the *Vārt.*—"पुण्याह-वाचनादिभ्यः लुग् वक्तव्यः"—(Com.). Next स्वस्तिवाचना+कन् स्वार्थे—(127*n*. 1.) and the required from is obtained in the feminine by '**प्रत्ययस्थात्** कात् पूर्वस्यात इद्, आप्यसुपः' (7. 3. 44). In *Vik*. the jester is propitiated by a '**स्वस्तिवाचन**' consisting of '**मोदक**-शरावः' (*dish of sweetmeats*). 'एतत् उपपादितं स्वस्तिवाचनिकम्'—*Vik. III.* **2. आसमस्या**

प्रविशति—(86n. 3). **3. अन्यतमा**—(106n. 2). **4. महादेवी**—देवी means a **coronated queen** (*Com.*), hence if the king confers the title of 'महा-देवी' on her who is not yet coronated, it would reflect his high esteem and regard. Cf. 'अपरिमित—गुणाकृष्ट-हृदयश्च अन्य-वनिता-दुर्लभेन * * **महादेवी-शब्देन** परं प्रीतः प्रसादम् अकरोत्—*Kād. P.* 658. Vide नाट्यशास्त्रम्, Ch. 34. Note that '**महादेवी**' is a technical term for '**दुर्गा**'—'पूज्यते या सुरैः सर्वैः महांश्चैव प्रमाणतः। धातुर्महेति पूजायां महादेवी ततः स्मृता ॥" **5. वीर-प्रसविनी**—अज्+रक्= वीरः। तं प्रसूते इति वीर+प्र+सू+इनि ताच्छील्ये (स्त्रियाम्)= वीरप्रसविनी ("जि-दृ-क्षि-विश्रीण्-वमाऽव्यथा-भ्यम-परिभू-प्रसूभ्यश्च'— 3. 2. 15). "वीरप्रसवा भवेति"—*KU. VII.* 87. **वत्से**—Originally the **calf** of an animal. Thence a term of endearment. **6. बहुमता**—The third matron wishes Śak. the *love* of her husband. (मतिः बुद्धीच्छयोः' इति भानुजि-धृतः कोषः)। Vide (210*n.* 1). **7. गौतमीवर्जम्**—(All except Gautami)—'णमुल्' is here **anomalous**, as 'गौतमीम् वर्जयित्वा' does not signify '**परीप्सा** or **त्वरा**' (**haste**). ['अस्यां हि परिभाषायां **त्वरा** विवक्षिता'—T], so 'णमुल्' by 'द्वितीयायां च'—(3. 4. 53) is not available. Some opine that the idea of **haste is not imperative** in the Sūtra, as Pāṇini himself has 'णमुल्' in 'अनुदात्तं **पदमेकवर्जम्**'—(6. 1. 48). where the **idea of haste is absent**. *Cf.* "लोष्ट्रग्राहं युध्यन्ते"—एवं नाम **त्वरन्ते** यत् आयुधान्यपि अनादृत्य यत्किञ्चिदासन्नं लोष्ट्रादिकं, तेनैव युध्यन्ते इत्यर्थः। "**इह द्वितीया-स्थले त्वरायां नानुवर्तते इति केचित्**, **तेन 'एकवर्जम्'** इति सिध्यति"—**Prabhā.** (*Com.*). *G* suggests an alternative 'यद्वा, गौतम्याः 'वर्जः वर्जनं यस्मिन् कर्मणि तत् यथा तथा इति बहुव्रीहिः" but **such a व्यधिकरण-बहुव्रीहि is not sanctioned by Pāṇini.** (125n. 2). Cf. 'अमन्त्र-**वर्जम्**—Ku, VIII. 72 ; त्रयी-**वर्जम्**—UC. II. 'ब्राह्मण-वर्जम्'- **Gautama.** **8. आशिषः**—The grammarians and the lexicographers are not unanimous as to whether the base is "**आशिष्**" or "**आशिस्**"। *AK* and Medinī has '**आशिस्**' which has been approved of by *Cappeler, St. Peters-burg Dictionary, Benfey, MW,* and the great '**वाचस्पत्य**' of **Tarānātha and** शब्दकल्पद्रुम। The commentator

Bhānuji derives 'आशिस्' thus—आ+शास्+क्विप्, but when 'शास्' is preceded by "आ", it **does not** become 'शिस्' by "शास् इदङ् हलोः—(6.4.34). So BhD accounts for the 'इत्व' by a *Vārt.* "**आशासः** क्वावुपधाया **इत्वं** वाच्यम्", but it is very **strange** that BhD, क्षीरस्वामी and other टीकाकारs are silent about the fact that when "**शा**" becomes '**शि**' by the Vārt, "शास् must also be changed into '**शिष्**' by 'शासि-वसि-घसीनाञ्च" (8.3.60). Their **silence proves that they approve** of the '**सान्त**' **spelling of** Ak, Pāṇini himself has used this word in "**आशिषि च**"—(3.1.150), "**आशिषि नाथः**'—(2.3.55.), "**आशिषि लिङ् लोटौ**"—(3.3.173); '**आशिषि हनः** (3.2.49); '**क्षियाशी' प्रैषेषु तिङाकाङ्क्षम्**'—(8.2.104), but from these whether the base is '**सान्त**' or '**षान्त**' is not quite clear. Later grammarians reject the *Vārt.* "आङ् शासे नेष्यते। **आशास्ते।** कथं क्विपि आशीः? 'क्षियाशीः प्रैषेष्विति'—सूत्रकार-प्रयोगात्"—**Prabhā**. "**वस्तुतस्तु**" आशिषि लिङ्-लोटौ", "क्षियाशीः प्रैषेषु" इत्यादि-निर्देशात् सिद्धम् इति नेदपूर्ववार्तिकम्"–T. (2984). The great श्रीरामतर्कवागीश is in favour of '**आशिस्**', 'while *Durgādāsa* prefers, '**आशिष्**' and opines that this is also the view of *Durgasingha*, **Śrīpatidatta** and even of **Pāṇini**. BD and his followers all have 'आशिष्' **Vopadeva** after citing illustrations of 'सजुष्', says 'एवम् आशीः' । Thus it seems he is also in favour of **आशिष्** । In fact the **base** of **आशीः** is hardly found in literature, and the declined forms are same whether the base is '**आशिस्**' or '**आशिष्**' । So both are allowed.

Text :—सख्यौ (उपसृत्य)—**सहि, सुहमज्जणं दे, होदु** ।

(सखि, सुख-सज्जनं ते भवतु) ।

Friends (*Approaching*)—Friend, may a bath in happiness be yours.

शकुन्तला—साअदं मे सहीणं । इदो णिसीदह ।

(स्वागतम् मे सखीभ्याम् । इतो निषीदतम्) ।

Śakuntalā—Welcome, my friends. This way sit down,

उभे (मङ्गल-पात्राण्यादाय उपविश्य)—हला, सज्जा **होहि । जाव मङ्गल-समालम्भणं विरएम** [हला, सज्जा भव]। यावत् मङ्गल-समालम्भनं विरचयावः)।

Both (*Taking up the propitiatory vase and sitting down*)—Dear friend, be ready (*now*). (*We*) will just perform the [1]auspicious decorations.[1]

शकुन्तला—इदम्पि बहु मन्तव्वं। दुल्लहं दाणि मे सही-मण्डणं भविस्सदि (इदमपि बहु मन्तव्यम्। दुर्लभमिदानीं मे सखी-मण्डनं भविष्यति)।

(इति बाष्पं विसृजति)।

Śakuntalā—Even this (*is*) to be highly valued (*to day*). Hence-forward decorations by (*my*) friend, will be a rare occurrence for me. (*This said, she sheds tears*).

उभे—सहि उइअं ण ते मङ्गल-काले रोइदुं (सखि, उचितं न ते मङ्गल-काले रोदितुम्)। (इति अश्रूणि प्रमृज्य नाट्येन प्रसाधयतः)।

Both—Friend, it ill becomes you to weep at an auspicious occasion. (*This said, wipe off her tears and by way of acting trim her*).

प्रियंवदा—आहरणोइदं रूवं अस्सम-सुलहेहिं पसाहणेहिं विप्पआरीअदि (आभरणोचितं[2] रूपम् आश्रम-सुलभैः प्रसाधनैः विप्रकार्यते[3])।

Priyaṃvadā—Your ornament-worth[2] beauty is marred[3] [*Lit. insulted*] by the easily-found trimmings of the hermitage.

(प्रविश्य उपायन-हस्तौ) ऋषि-कुमारकौ—इदमलङ्करणम्। अलङ्क्रियताम्-अत्रभवती। (सर्वा विलोक्य विस्मिताः)। (*Entering with ornaments in hand*) Two Hermit-boys—Here is decoration. Let Her Ladyship be adorned. (*All looking at these are astonished*).

गौतमी—वच्छ णारअ, कुदोएदं (वत्स नारद, कुत एतत्) ?

Gautamī—My son Nārada, whence is this ?

प्रथमः—तात-काश्यप-प्रभावात्।

First—Through the (*miraculous*) power of Father Ksāyapa.

गौतमी—किं माणसी सिद्धी (किं मानसी सिद्धिः[4]) ?

Gautamī—Is it a mental creation[4] ?

V. L—'सुखमज्जनम्'—B. R. V. 'सुखमार्जनम्'—M. 'सुमज्जनम्'—S. 'इदमपि'—R. V. M. 'उचितमपि'—R. V. 'भविष्यति'—B. V.M. S. 'भविष्यति इति'—R. "विप्रकार्यते"—R. V. M. 'विप्रक्रियते'—S. 'विकार्यते' K. 'विप्रलभ्यते' &. 'विप्रतार्यते'—B.; K has 'सृष्टिः' for 'सिद्धिः'। "हारीत" for 'नारद'—B. P. HS.

शकुन्तलेति। 'निषिदतम्' उपविशतम् ['सदिर प्रतेः'–(८।३।६६)–इति षत्वम्]। उभे इति। 'सज्ज्जा' उद्युक्ता 'भव' (सज्जतेः कर्तरि अच्। स्त्रियां टाप्। 'सज्ज-धातुः आत्मनेपदी अपि' इति भट्टोजिः)। प्रियंवदेति। 'इदं'' प्रियसखीभ्यां प्रसाधनम् 'बहु मन्तव्यम्' आदरातिशयेन स्वीकर्तव्यम्। यतः 'मे' ("शेषे षष्ठी तु स्यादेव"इति दीक्षितोक्तेः शेषे षष्ठी) 'दुर्लभं (खल्-३।३।१२६) भविष्यति'। (बाष्प-विसर्जनेन भविष्यद्वियोगः सूचितः)। उभे इति। 'उचितं न रोदितुम्'(इत्यत्र अर्हार्थोपपदे रुदेः तुमुन्)। प्रियंवदेति। 'आभरणोचितम्' अलङ्कारार्हं 'रूपम् आश्रमे' तपोवने 'सुलभानि' अनायास-लभ्यानि यानि 'प्रसाधनानि' बिटप-किसलयादीनि अलङ्करणानि तैः 'विप्रकार्यते' विकृतं क्रियते, दूष्यते इत्यर्थः। ('निकारो विप्रकारः स्यात्' इत्यमरः)। तथापि मङ्गलार्थं मगत्या क्रियते। प्रविश्येति। 'उपायनं' उपहार-द्रव्यं 'हस्ते' ययोः तौ ('उपायनम् उपग्राह्यम् उपहारस्तथोपदा' इत्यमरः)। ["गड्वादेः परा सप्तमी"—(वाः ८९८) इति सप्तम्याः परनिपातः]। गौतमीति। 'मानसी' मनःकृता 'सिद्धिः प्राप्तिः अलङ्काराणाम् इत्यर्थः (तथा च तिथितत्त्व-धृतं मत्स्यपुराणं—'तपोभिः प्राप्यतेऽभीष्टं नासाध्यं हि तपस्यतः। दुर्गमत्वं तथा लोको वहते सति साधने')।

129.—1. **सुख-मज्जनं**—The implication is—'May you hence-forward be plunged in the happiness, caused by the love of your husband. **2.** **स्वागतं**—is used in greeting a person, who is put in the **dative**. Cf. 'स्वागतं देव्यैः—*Māla. I.* & *Vik. II* ; 'स्वागतं भवत्यैः'—*Vik. II.* 'तस्मै स्वागतं व्याजहार'—*PA&MD.* 4 ; 'स्वागतमतिथये. -*PN.V* ; *KU. II.* 18 ; (101*n.* 4; 225*n.* 5). *Rām. III.* 5. 20 ; 23. 28. 'चार्वाक, स्वागतं ते'—*PC. II.* 3. **रोदितुम्**=रोदनम्, as तुमुन् is here भावे—(31n. 3). Weeping is *prohibited* at the time of departure. Cf. 'कथमपि गुरुशोकान् मा रुदन् माङ्गलिक्यः'—*BK. I.*26 4. **विप्रकार्यते**—वि+प्र+कृ+णिच् (स्वार्थे)+लट् ते कर्मणि। "विप्र+कृ" means '*to insult*'. Her beauty seems to have been insulted by the decoration of sprouts of grass etc. (Com.). 'तस्मिन् **विप्रकृताः** काले'—*Ku. II. I.* 'भर्तुः **विप्रकृतापि**'—*IV.* 18. *Infra.* 'किं सत्त्वानि **विप्रकरोषि**'—*Act VII. Infra. VI.* 31. For a different sense vide *Ku. VI.* 95. **6.** **मानसी सिद्धिः**—Refers to 'कामावसायित्व.' by which one can obtain anything desired instantaneously. Cf. "अणिमा महिमा

न्चैव लघिमा प्राप्तिरेवच। प्राकाम्यञ्च तथेशित्वं वशित्वञ्च तथापरम्। यत्र कामावासयित्वं गुणानेतान् अथैश्वरान्। प्राप्नोति अष्टौ नर-व्याघ्र परनिर्वाण-सूचकान् ॥"–*Mārkaṇḍeya Purāṇa*. "त्रैलोक्ये सर्वभूतानां दुष्प्राप्यं समुदाहृतम्। **तच्चापि भवति प्राप्यं** प्रथमं योगिनां बलात्' &c.—*Vap.* 'योगिनां तु तपसाखिलसिद्धिः'—*NC. V.* 3.; *Ki. XII.* 29 ; *Yoga-darśana. III.* 45 ; (119*n.* 5) ; '०पुजयामास कुमारं क्लान्तवाहनं। **तपःप्रभाव-सिद्धिभि** र्विशेष-प्रतिपत्तिभिः"—*Ra. XV.* 12 ; also Com.

Text :– **द्वितीयः—न खलु। श्रूयताम्। तत्रभवता वयमाज्ञप्ता श्शकु-न्तलाहेतो र्वनस्पतिभ्यः कुसुमान्याहरतेति। तत इदानीम्—**

क्षौमं[1] **केनचिदिन्दु-पाण्डु**[2] **तरुणा माङ्गल्य**[3]**माविष्कृतं**[4]
शार्दूलविक्रीड़ित **निष्ठ्यूत**[5]**श्चरणो-पराग-सुभगो**[6] **लाक्षा-रसः केनचित्।**
(मसजसततग) **अन्येभ्यो वन-देवता-कर-तलैः, रापर्व-भागोत्थितैर्**[7]
दत्तान्याभरणानि नः किसलयो-द्भेद-प्रतिद्वन्द्विभिः[8] ॥५॥

Second--Not indeed, please listen. By His Holiness we were ordered—'For Śakuntalā's sake, get flowers from the forest-trees.' Then—*(At once)* by a certain tree, an [3]auspicious [2]moon-white[2] silken[1]robe was presented[4]unto us ; while by another was exuded[5] lac-juice fit[6] for dyeing the feet with[6]; (*and*) from other (*trees, these*) ornaments were delivered by the palms of the Dryads, stretched[7] out (*so as to be visible*) as far as the wrist,[7] emulating[8] (*their*) burst-out leaflets.[8] (5)

V. L.—'मङ्गल्यम्'—S. 'माङ्गल्यम्'—R. V. B. M. 'उपराग-सुभगो'—V. B. '०उपयोग-सुलभो'—S. '०उपभोग-सुलभो'—R.M. 'नः'—B.S. 'तत्' R. V. M. S. 'किसलयोद्भेद-प्रतिद्वन्द्विभिः'—R. V. M. 'किसलय-च्छाया-परिस्पर्धिभिः'—B.HS.

द्वितीय इति। 'शकुन्तला' एव 'हेतुः' कारणं तस्मात् ['निमित्तकारणहेतुषु सर्वासां प्रायोदर्शनम्' इत्युक्ते (६०८) हेतौ ५मी, शेषे षष्ठी वा] 'कुसुमानि वन--स्पतिभ्यः' वृक्षेभ्यः (**'वनस्पति र्वृक्षमात्रे** विना पुष्पं फलिद्रुमे' इति विश्वः)। **क्षौममिति।** 'नः' अस्मभ्यं (सम्प्रदाने ४र्थी) 'केनचित् तरुणा' वृक्षेण 'इन्दुवत्' चन्द्र इव पाण्डु' सितं शुभ्रम् इति यावत् ("**पाण्डुः** कुन्ती-पतौ **सिते**" इति हैमः) अतएव मङ्गल-कर्मणि साधु इति 'मङ्गल्यम्' ('तत्र साधु'-(४।३।९८)-इति यत्)। मङ्गल्यम् एव 'माङ्गल्यम्'—'प्रज्ञादिभ्यश्च'-(५।४।३८)-इति स्वार्थे अण्) '**क्षौमं**' दुकूलम् ("अंशुकञ्च उत्तरीयञ्च **दुकूलं क्षौम** मस्त्रियाम्" इत्यमर-

माला) 'आविष्कृतम्' स्वदेहात् आविष्कृत्य दत्तम् इत्यर्थः। 'केनचित्' अपरेण वृक्षेण 'चरणयोः उपरागः रञ्जनम् इत्यर्थः। तत्र 'सुभगः' सुन्दरः योग्य इत्यर्थः "(सुन्दरेऽधिकभाग्ये च दुर्दिनेतर वासरे। तुरीयांशे श्रीमति च सुभगः"— इति शब्दार्णवः) 'लाक्षारसः' अलक्तक-द्रवः 'निष्ठ्यूतः' उद्गीर्णः दत्त इत्यर्थः। (वाच्यार्थस्य गुणीभूतत्वात् नाश्लीलता-दोषापत्तिः। ष्ठिवु निरसने क्तः (३।२।१०२), 'उदितो वा-(७।२।५६)-इति सूत्रेण उकाराऽनुबन्ध-धातोः परस्थो वैकल्पिकः इडागमः, 'यस्य विभाषा'-(७।२।१५)-इति सूत्रेण वारितः। ततः 'च्छ्-वोः श्-ऊठ् अनुनासिके"-(६।४।१९)-इति वकारस्य ऊठि चादेशे सति 'निष्ठ्यूत' इति रूपम्।) 'अन्येभ्यः' वृक्षेभ्यः (इति अपादाने ५मी। यद्वा 'अन्यान् आश्रित्य' इति ल्यब्लोपे कर्मणि ५मी)। 'आपर्व-भागोत्थितैः' मणिबन्धं यावत् निर्गतैः' (अनेन वनदेवतानाम् अदृश्यत्वं सूचितम्), अतएव 'किसलयानां' नव-पल्लवानाम् 'उद्भेदाः, विकाशाः, उद्भिद्यमान-पल्लवा इत्यर्थः ('भावानयने द्रव्यानयनम्' इति न्यायात्। लक्षणया रक्त-तरत्व-कोमलत्वादि व्यङ्ग्यम्) तेषां 'प्रतिद्वन्द्विभिः' प्रतिस्पर्धिभिः सदृशैः इत्यर्थः 'वनदेवतानां करतलैः' हस्तैः कर्तृभिः, 'आभरणानि' रत्नालङ्कारादीनि शकुन्तलार्थं 'दत्तानि' (अत्र वनदेवता-करतल-दत्ताभरणेन तस्या आजन्माऽवैधव्य-सौभाग्ये, आभरणानाम् अनर्घत्वादि च व्यज्यते। प्रथमचरणे चतुर्थे च उपमालङ्कारः। श्रुति-वृत्त्यनुप्रासौ। अर्थावृत्तिर्हेतुश्च। अनेन निदर्शनानाम भूषणम्। 'पूर्वं सिद्धार्थ-कथनं निदर्शन रितिकीर्त्यते' इति दर्पण-लक्षणात्। शार्दूलविक्रीडितं वृत्तम्। "अन्यैः तैः" इति पठित्वा कर्तृ-प्रक्रम-भङ्गः समाधेयः) ॥५॥

130n.—1. **शकुन्तला-हेतोः**—Cf. 'खिद्यसे लोकहेतोः'—*Śak. V.* 7. **वनस्पतिभ्यः**—वनस्पति means a "**Cryptogamia**", *i.e. a* tree which bears fruits without flowers, but here it has the sense of trees in general, specially the umbrageous ones (Com.). Cf. '**अपुष्पाः फलवन्तो** ये ते वनस्पतयः स्मृताः'—*MS. I.* 47. 'वानस्पत्यः फलैः पुष्पात्, तैरपुष्पात् वनस्पतिः'—*AK* The form expected was **वनपतिः**' (वनस्य पतिः) but an augment सुट् comes in by 'पारस्कर-प्रभृतीनि च संज्ञायाम्'—(6. 1. 157)—'संज्ञायाम् इति किम्? **वनपतिः** अयं व्याधः'। **2. क्षौमम्**—क्षुमायाः विकारः क्षौमम्—Fine silk. According to शब्दरत्ना-वली, क्षौम (=शणज=अतसीपट्ट,) means (common flax). Cf. 'क्षौमं शणजेऽपि स्यात् अतसीजे नपुंसकम्', but according to others, it means

'*wove silk*'. *Vide Ra. X.* 8 ; *Rām. II* 7. 7. 3 इन्दुपाण्डु—पाण्डु generally means 'yellowish white'. (90n. 2). 'पाण्डुस्तु पीत-भागार्धः केतकी-धूलि-सन्निभः'—*Śabdārṇava*. Here it means 'white' (*Com*). 4. माङ्गल्यम्—मङ्गलमेव इति मङ्गल+स्वार्थे अण् (5. 4. 38)=माङ्गलम्। Next माङ्गले साधु इति माङ्गल+यत् (4. 4. 98)=माङ्गल्यम्—Auspicious, (*also Com.*). 5. निष्ठ्यूतः (Com.)—(65n. 5) ; MN on MD. 26. 6. लाक्षा-रसः—"A red dye prepared from an insect, analogous to the cochineal insect. This minute red insect is found in great numbers in the Palāsa, Indian fig tree and some other trees." —M. "Largely used by women in ancient times as an article of decoration, especially for the sole of the feet,"—*Apte*. Cf. 'लाक्षा-रसं चरण-कमल-न्यास-योग्यम्'—*PA&MD. II*. 12. 'तनूनि लाक्षा-रञ्जितानि'—R̥S. *VI*. 13 ; *Ki. V*. 23. अन्येभ्यः—For rhetorical fault vide Com. 7. आपर्व &c.—पर्व=joint. 'ग्रन्थि र्ना पर्व-परुषी'—*AK*. पर्वणः भागः पर्वभागः=Wrist—*K*. आ पर्व-भागेभ्यः=आपर्वभागम्। ('आङ्-मर्यादाऽभिविध्योः'—(2. 1. 13) इति अव्ययीभावः)—As far as to the wrist. आपर्वभागम् उत्थिताः इति 'आपर्वभागोत्थिताः'। 'सहसुपा'– (२।१।४) इति समासः, तैः। 8. किसलय &c—(द्वन्द्व=Couple–74n. 7), here it means 'strife'. 'द्वन्द्वं रहस्ये कलहे तथा मिथुन-युग्मयोः'। प्रतिगतं द्वन्द्वं प्रतिद्वन्द्वम् Emulation. मत्वर्थे इनिः=प्रतिद्वन्द्वी–A rival (*Com.*).

Remark :—In a similar way महाश्वेता got fruits for चन्द्रापीड़—Cf. "चोत्थाय सा कन्यका भिक्षा-कपालमादाय तेषामायतन-तरूणां तलेषु विचचार। अचिरेण च तस्याः **स्वयं पतितैः** फलैरपूर्यत भिक्षा-भाजनम्। * * * आसीच्च तस्य चेतसि—**नास्ति खल्वसाध्यं नाम तपसाम्**। विस्मतः परम् आश्चर्यम्, यदत्र व्यपगत-चेतनापि सचेतना इवास्यै भगवत्यै समतिसृजन्तः फलानि **आत्मानुग्रहम् उपपादयन्ति वनस्पतयः**"—*Kād. P.* 519 ; also read 'सर्व-काम-फलास्तत्र केचिद वृक्षा जनाधिपः। **वस्त्राणि च प्रसूयन्ते फलेष्वाभरणानि च**'—*Mahā. Vīṣma. VII*. 4-5 ; "—सूक्ष्माणि **वासांसि** फलन्ति वृक्षाः॥ हारान्मणीनुत्तम-कुण्डलानि केयूर-वर्याण्यथ नूपुराणि।. एवं विधान्याभरणानि यत्र स्वर्गानुरूपाणि **फलन्ति वृक्षाः**"—SN. X. 22-23.

Text :—**प्रियंवदा** (शकुन्तलां विलोक्य) **हला, इमाए अब्भुववत्तीए सुइआ**

दे भत्तुणो गेहे अणुहोदव्वा राअलच्छि (हला, अनया अभ्युपपत्त्या[1] सूचिता ते भर्तुर्गेहे अनुभवितव्या[2] राजलक्ष्मीः) । (शकुन्तला व्रीडां रूपयति) ।
Priyaṁvadā (*Looking at Śakuntalā*)—By this favour[1] is foreshadowed the royal fortune that is to be enjoyed[2] at your husband's place. (*Śakuntalā looks bashful*).

प्रथमः—गौतम, एह्येहि अभिषेकोत्तीर्णाय काश्यपाय वनस्पति-सेवां निवेदयावः ।

First—Come, come Gautama, we will impart the services of the trees to Father Kāsyapa, who (*must*) have finished his ablution.

द्वितीयः—तथा (निष्क्रान्तौ) । Second—All right. (*Exeunt ambo*).

सख्यौ—अए, अणुवहुत्त-भूसणो अअं जणो । चित्त-कम्म-परिअएण अङ्गेसु दे आहरण-विणिओअं करेम्ह (अये, अनुपभुक्त-भूषणो[3]ऽयं जनः । चित्र-कर्म-परिचयेन[4] अङ्गेषु ते आभरण-विनियोगम्[5] कुर्वः) ।

Friends—Alas! we are [3]unused to decorations[3]. (*However*) we will arrange[5] the ornaments on your limbs, by (*our*) acquaintance[4] with the art of painting[4].

शकुन्तला—जाणे वो णेउणं (जाने वां नैपुणम्) । (उभे नाट्येनालङ्कुरुतः) ।
Śakuntalā—(*I*) know your skill. (*Both act decorating her*).

V. L—'राजलक्ष्मीः'—B. V. M. S. 'राजलक्ष्मीरिति'—R. 'अभिषेकोत्तीर्णाय'—R. B. V. M. 'अभिषेकावतीर्णाय'—S. 'अनुपभुक्त'—K. M. V. Mackenzie Mss. 'अनुपयुक्तः'—R. S. 'अननुभूतः'—B. 'अलङ्कुरुतः'—R. V. M. 'अलङ्करोति'—S. 'अलङ्कारान् विनियुञ्जाते"—B.

प्रियंवदेति । 'अभ्युपपत्त्या' वनस्पतीनाम् अनुग्रहेण ('अभ्युपपत्ति रनुग्रहः' इत्यमरः) 'अनुभवितव्या' उपभोग्या 'राजलक्ष्मीः' 'राजश्रीः ('शोभा-सम्पत्ति-पद्मासु लक्ष्मीः श्रीरिव दृश्यते' इति शाश्वत.) 'सूचिता' अनुमापिता, ज्ञापिता इति यावत् । ('प्रविश्य' इत्यारभ्य एतदन्तेन **उदाहरणमङ्ग**मुपक्षिप्तम् । 'यत्तु सातिशयं वाक्य **तदुदाहरणं** स्मृतम्' इति तल्लक्षणात्) । **प्रथम इति ।** 'अभिषेकात् स्नानात् 'उत्तीर्णः' उद्गतः तस्मै, तं बोधयितुम् इत्यर्थः '(कर्मणि ४र्थी-२।३।१४) 'वनस्पतीनां सेवा' दुकूलादि-दानरूपा ताम् । **सख्याविति ।** 'अये' इति सम्भ्रमे ('अये क्रोधे विषादे च **सम्भ्रमे** स्मरणेऽपि च' इति विश्व) 'अयं जनः' अस्मादृश. जनः किंविध. ? 'अनुपभुक्तं' न परिहित 'भूषणं' येन तथाविधः । कतमत् अलङ्करणं कतमस्मिन्नङ्गे परिधीयते तन्न वयं जानीमः अत. सम्भ्रमः । किन्तु 'चित्रकर्मणां

परिचयेन' ज्ञानेन, अस्माभिः बहूनि आलेख्यानि अवलोकितानि, तत्र स्त्रीणाम् अङ्गेषु आभरणानि चित्रितानि दृष्टानि, तदनुसारेण इत्यर्थः (इति विद्यासागर-चरणाः)। चित्रे यथाभरण-प्रयोगः दृश्यते तेनैव प्रकारेण। यद्वा, 'चित्र-कर्मणः आलेख्याऽङ्कनस्य **'परिचयेन' अभ्यासेन** (इति शिशुपालवध-टीकायां मल्लिनाथाः १।७५) 'आभरणानां विनियोगं' विन्यासं संस्थापनमिति यावत्।

131n.—1. अभ्युपपत्त्या—(By this favour)—Act III. p. 270. The unexpected presentation of the ornaments is considered by Priyaṁvadā as a condescension, but the ascetics call it a service (सेवा), rendered by the Dryads only to please the sage, as they were fully aware of his great power to command trees. **2 व्रीडां**—व्रीड्+अ भावे=व्रीडा—Bashfulness· **'व्रीडः'** is also correct. ['व्रीडः अपि'. with घञ् भावे)—*BhD*.'व्रीडोऽस्त्रीवे त्रपा लज्जा'—*Ravasa*. **3 अभि-षेकोत्तीर्णाय**—The sage was performing his ablution when the pupils were going to collect flowers according to his orders and hence they now suppose that he must have finished his bath by that time. (Cf. ततः प्रविशति **'स्नानोत्तीर्णः'** काश्यपः—infra,) **4 चित्र-कर्म-परिचयेन**—परिचय—*Acquaintance*', '*knowldge*'. 'संस्तवः स्यात् परिचयः'—AK, We shall decorate your body from our *knowledge* acquired from the observation of pictures (**चित्रकर्म**) painted by others; or 'चित्रकर्म' means '*portrait*,' then 'परिचय' will mean '**practice**'. For this sense Cf. 'हेतुः **परिचय-स्थैर्ये**' —*ŚPB. II*. 75, where *MN* remarks 'परिचय-स्थैर्ये **अभ्यासदार्ढ्ये**'। Also *Ra. IX*. 49; 'वर्ण—परिचयं करोति'—(152n. 4). Hence. our practised ability in the art of painting will be our guide.

Text :— । (ततः प्रविशति स्नानोत्तीर्णः काश्यपः)।

काश्यपः—यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्ट[1]मुत्कण्ठया[2]
शार्दूलविक्रीडित **कण्ठः स्तम्भित-बाष्प-वृत्ति-कलुष[3]श्चिन्ता-जडं[4]दर्शनम्[5]।**
(ममजमतनग) **वैक्लव्यं[6] मम तावदीदृशमहो स्नेहादरण्यौकसः[7]**
पीड्यन्ते[8] गृहिणः कथं नु तनया-विश्लेष-दुःखैर्नवैः[9] ॥६॥
। (इति परिक्रामति)।
(*Enter Kāśyapa risen from his bath*).

Kāśyapa—Because Śakuntalā will depart to-day, (*my*) heart is deeply[1] touched[1] with melancholy[2], (*my*) voice is choked[3] by suppressing the flow of tears[3] and (*all my*) senses[5] are[4] paralysed by anxious thought.[4] So great indeed through affection is the affliction[6] (*Helplessness—Robi Datta*) even of me, a recluse[7] in the forest[7]. How (*bitterly*) alas ! are the house-holders stung[8] [9]by the pangs of first separation from (*their*) daughters[9]. (6)

(*This said, walks round*).

V. L.—'कण्ठः स्तम्भित-बाष्प-वृत्ति-कलुषः'—R. V, M. HS. 'अन्तर्बाष्पभरोपरोधि गदितम्'—B. S. 'ईदृशमहो'—V. S. 'ईदृशमिदम्'—R. 'ईदृशमपि'—B. M. 'कथं नु'—V. M. S. 'कथं न'—R. B. HS.

यास्यतीति। 'अद्य' अस्मिन् अहनि '**शकुन्तला**' ममेयम् इत्यभिमानेन **पालिता** कन्या पतिगृहं 'यास्यति इति' हेतोः (न तु याता, नापि याति, अपि तु यास्यति इति भविष्यत्-कालीन-तद्गमनं मनसि कृतमात्र एव इति भावः) 'मम हृदयम् उत्कण्ठया' (उत्कण्ठा-लक्षणं तूक्तं प्राक्) दुःखेन इत्यर्थः। 'संस्पृष्टं' सम्यक् भिन्नम् अभिभूतम् इति यावत् (समातिशयः द्योत्यते)। 'कण्ठः' स्वरः ("स्वरेऽपि कण्ठ आख्यात" इति हारावली) 'स्तम्भिता' अवरुद्धा या 'बाष्पस्य नेत्र-जलस्य 'वृत्तिः' प्रवृत्तिः आरम्भ इति यावत्, तया 'कलुषः' विकृतः स्वर-भङ्गवान् कण्ठ इत्यर्थः। (स्तम्भितत्वे कारणं पुरुषगतं धैर्यम्। प्रवृत्तस्य स्तम्भयितुम् अशक्यत्वात् वृत्ति-पदोपादानम्। एतेन स्फुटं वाचोऽप्रवृत्तिर्ध्वनिता)। 'दर्शनं तत्तन्द्रियजं ज्ञानम् ('**दृष्टिः ज्ञानेऽक्ष्णि** दर्शने' इति कोषः) 'चिन्तया' शकुन्तला-गमन-रूपया 'जड़' स्वस्व-विषय-ग्रहणे असमर्थम्। तेनाहं नयनाभ्यामीक्षितुं, कर्णाभ्यां श्रोतुं च न समर्थ इत्याशयः (तथा च शङ्कर-पादोद्धृतं भारत-वाक्यं 'निद्रा-नाशश्च चिन्ता च भ्रान्तिश्चोत्सुक-चेतसाम्')। 'अरण्यम् ओकः' आश्रयः यस्य ('ओकः सद्माऽऽश्रयश्चौका' इत्यमरः) तादृशस्य ममत्वादि-शून्यस्य वनवासिनः 'मम' (अनेन वैक्लव्य-योग्यतापि असम्भावनीया इति व्यज्यते)। 'तावत्' इत्य--वधारणे, नैष्ठिक-ब्रह्मचारिण इति भावः 'स्नेहात्' परिरक्षणादि-कर्म-सह-वासजात्। ममत्वात्, न तु **अपत्य-स्नेहात्**। अतएव प्रथम-चरणे **शकुन्तला** यास्यति इत्युक्तं, न तु **कन्यका** इति भावः। 'ईदृशम्' एवंविधं गुरुतरं 'वैक्लव्यं' वियोग-वैधुर्यं तावत् जातम्' इति शेषः। 'अहो' इति करुणार्थ-सूचकम् ('अहो धिगर्थे शोके च करुणार्थ-विषादयोः' इति मेदिनी) 'गृहिणः' ('गृहाः' दाराः सन्ति एषाम् इति नित्ययोगे मत्वर्थीयः इनिः—५।२।२२५) कृत-दार-परिग्रहाः संसारिणः तद्दुःखाभिज्ञा

इति भावः। न तु ब्रह्मचारिणः। 'नवैः' प्रथमोत्पन्नैः (द्वितीय-वारादौ पूर्वानुभूतत्वात् न तादृशं दुःखम् इत्याशयः) 'तनयाभिः' आत्मजाभिः न तु कृतक-कन्याभिः,यो 'विश्लेषः' विच्छेदः, तस्मात् यत् 'दुःखं' तैः। 'कथं' केन प्रकारेण 'नु' इति प्रश्ने ('नु पृच्छायां विकल्पे च' इत्यमरः) 'पीडयन्ते' व्याकुलीक्रियन्ते। अनपत्यस्य आरण्यकस्य मे कृतक-तनया-विश्लेषेण एवं दुःखं यदि, मन्ये तेषां ममत्ववतां गृहस्थानां स्वाङ्ग-भूतानां कन्यकानां वियोग–वैधूर्यं नितरा दुर्वहम्। ('वैक्लव्यं प्रति उत्कण्ठा-स्पर्शरूपे एकस्मिन् कारणे सत्यपि कण्ठ-कालुष्यादि-कारणान्तर-द्वयोपन्यासात् समुच्चयोऽलङ्कारः। परार्धे प्राकरणिकात् मुनि-वृत्तान्तात् अप्रकार-णिको गृहस्थ-वृत्तान्तोऽर्थादापततीत्यर्थापत्तिरलङ्कारः। गृहिण इति व्यतिरेकः। छेक-वृत्त्यनुप्रासौ। इति-शब्दोपादानात् हेतुरपि। "दृष्टिर्जड़ा चिन्तया" इति पठित्वा उद्देश्य-प्रतिनिर्द्देश्य-प्रक्रम-भङ्गः समाधेयः। शार्दूलविक्रीडितं वृत्तम् ॥६॥

132n.—1. प्रविशति काश्यपः—This is the first time Kaṇva appears before the audience; though a strict performer of austerities his first speech clearly gives vent to the softer feelings of his heart. He is a brilliant contrast to the irascible and inexorably severe दुर्वासाः, in whose eyes the slightest offence deserve of the most fearful punishment. **2. यास्यति**–For the force of the लृट् see (*Com.*). 3. **संस्पृष्टम्—Deeply** touched. "सम्" is intensive"—*R.* (*Com*·). **4. कण्ठः** &c.—"कण्ठ शब्दे गलेऽन्तिके"—Bhoja. Also (*Com.*). **स्तम्भित** (with णिच्) = Suppressed. **वृत्ति**—Appearance, flow. **कलुषः**—['लुष हिंसायाम्.' 'इगुपध—(३।१।१३५ ' इति कः। 'कस्य' जलस्य 'लुषः' घातकः। "कलुषं त्वाविले पापे' इति विश्वः]—BhD. = Muddy. Cf. 'गङ्गारोधः पतन-कलुषा'—*Vik. I.* 8); here "Husky." ('गद्गदः'—A.) 'वाष्प-प्रकर-कलुषाम्'—*Śak. V.* 19.; *Ra.V.*64. विषाद-संबन्ध-कषाय-गद्गदं'" —BC. VIII. 31. 'वाष्प-गद्गदया गिरा'—*Rām. II.* 93. 28; *IV.* 18. 49; *V.* 25. 2. For a similar idea Cf. 'निरुद्ध-बाष्पोदय-सन्न-कण्ठम् उवाच कृच्छ्रादिति राजपुत्री'—*Ki. III.* 38. 'वाष्प-स्तम्भित-कण्ठत्वादनुक्तैव वनं गताः'—*PN. II.* 17 ; Rat. IV. 13. Kāśyapa with great patience suppressed the coming tears and hence his voice was hoarse. ("धनेन स्तंभते सर्वः, स्तम्भात्यन्यश्च विद्यया। धन-विद्या-समृद्धोऽपि न स्तम्नोति स सज्जनः" ॥—*KR.* 82. **5. चिन्ता-जडं** &c—**'दर्शनम्'**—Refers to all

the senses—(*R*)—जात्यैकवचनम् । चिन्ता—Continuous thinking of the same thing. जड़—Having no perception of external objects. Cf. "चिता चिन्ता द्वयोर्मध्ये चिन्ता नाम गरीयसी । चिता दहति निर्जीवं, चिन्ता तु सजीवं दहेत्" ॥ (*Com.*). अरण्यौकसः—Cf. 'स्वर्गौकसाम्'—*Ku. IX.7.* "वनौकसः"–SN. X. 7. (145n. 1; 229n. 1). ओकस् =उच्यति (दिवादिः) समवैति अत्र इति उच्+असुन् ('सर्वधातुभ्योऽसुन्', उ—६२८). By 'न्यङ्क्वादीनाञ्च'—(7.3.53.), 'च' becomes 'क'। ओकस् is also 'अदन्त', 'ओकः उचः के'–(८।४।६४)–इति निपातनात् अदन्तोऽपि'—*BhD.* "ओकम् आश्रयमात्रे च मन्दिरे च नपुंसकम्"—Medinī. (Cf. Greek. 'Oikos'—a house). Kāśyapa thought that he was above all emotions, but now he is surprised at his wrong belief ; hence 'अहो' is 'करुणार्थ' (*mixed with* विस्मय) । If he, a veritable recluse of the forest, be subject to such a worldly feeling, at the parting of one whom he had **only nurtured** from her childhood, (Mark that Kāśyapa uses the word 'शकुन्तला', and not 'कन्यका', in the first line), how greatly the worldly men must be afflicted on such an occasion [**नवैः**—First time, and not on every occasion], when they are separated (**विश्लेष**—Ra. XIII. 23) from their **self-begotten daughters (तनया)**. Note the difference between '**वैक्लव्यं**' (=Mental agitation—112n. 4; Rām. VI. 46. 37.) and '**पीड्यन्ते**' । 'अपि' **(B & M)** for 'अहो' is not good. As it is placed before and not **after** **०ओकसः**, there is unnecessary '**अक्रमतादोष**' ।

Remark :—This is one of the **four best stanzas** of this **drama. The sentiments here have been so exquisitely and naturally delineated that the verse at once appeals to all and sundry.** 'कालिदासस्य **सर्वस्वमभिज्ञानशकुन्तलम्** । शाकुन्तले **चतुर्थाङ्कस्तत्र श्लोकचतुष्टयम्**' । **"The fourth act of the Shakuntala is a model of tender sorrow and the loving kindness with which even the trees take farewell of their beloved one, contrasts with the immediate harsh reception which awaits her at the royal court, Kālidāsa here, as in the Fourth Act of विक्रमोर्वशीयम् and in the garden scenes of the मालविकाग्निमित्रम् displays admirably his love for nature and**

his power of description of all the stock elements of Indian scenery, the mango, the Bimba fruit, the Aśoka, the lotus and his delicate appreciation of the animal world of India"—*Keith*.

Text :—सख्यौ—हला सउन्दले, अवसिद-मण्डणासि। परिधेहि संपदं खौम-जुअलं (हला शकुन्तले, अवसित-मण्डनासि[1]। परिधत्स्व साम्प्रतं-क्षौम-युगलम्)। (शकुन्तला उत्थाय परिधत्ते)।

Friends—Dear Śakuntalā, you have your decorations[1] completed.[1] Now don this pair of linen mantles.

(*Śakuntalā* rises and puts them on).

गौतमी—जादे, एसो दे आनन्द-परिवाहिणा चक्खुणा परिस्सजन्तो विअ गुरू उवट्ठिदो। आआरं दाव पडिवज्जस्स) जाते, एष ते आनन्द-परिवाहिना[2] चक्षुषा परिष्वजमान[3] इव गुरुः उपस्थितः। आचारं[4] तावत् प्रतिपद्यस्व)।

Gautami—My child, here comes your father, embracing[3] (*you*), as it were, with a joy–flowing[2] eye. Just perform the customary[4] (*salutation*).

। (शकुन्तला सव्रीडं वन्दनां करोति)।

(*Śakuntalā bashfully salutes Kāśyapa*)

काश्यपः—वत्से,—"ययातेरिव शर्मिष्ठा भर्तुर्बहुमता भव।

श्लोक **सुतं त्वमपि सम्राजं सेव पूरुमवाप्नुहि" ॥७॥**

Kāśyapa—Child, mayest thou be highly honoured by (*thy*) husband, as was Śarmiṣṭhā by Yayāti. As she got Pūru, mayest thou too obtain an imperial son. (7)

गौरेमी—भअवं, वरो क्खु, एसो। ण आसिसा।

(भगवन्! वरः[1] खल्वेष न आशीः[2])।

Gautami—Almightly Sir, a boon[2] inded this is,—not a (*mere*) benison.[1]

काश्यपः—वत्से, इत स्सद्यो हुतानग्नीन् प्रदक्षिणी-कुरुष्व।

। (सर्वे परिक्रामन्ति)।

Kāśyapa—My child, do thou circumambulate these newly fed fires (*thrice*), keeping thy right side towards them.

(This said, all turn round).

V. L.—'०परिवाहिणा'—R. V. M.—०'स्यन्दिना' —S. ०'बाष्प-परिवाहिणा'–B. 'शकुन्तला—(सव्रीडम्) तात ! बन्दे'–R. V. M. S. शकुन्तला सव्रीडं वन्दना करोति'—B.HS. 'भर्तुः'—R. V. M. S. 'पत्युः'—B. D. 'सद्योहुतान् अग्नीन्'—B. V. Taylor Mss. 'सद्योहुताग्नीन्'—R. M.

गौतमीति 'आनन्दं' स्वकन्यायाः स्वामि-संयोग-प्राप्ति-संभावना-जनितं सुखं साधु 'परिवाहयति' परितः प्रेरयति इति 'आनन्द-परिवाहि' तादृशेन आनन्दजा-श्रु-विमुञ्चता 'चक्षुषा परिष्वजमानः' आलिङ्गन्निव (**इत्युत्प्रेक्षा**) 'गुरुः' पिता कण्वः। 'आचारं' बन्दनादिकं 'प्रतिपद्यस्व' अनुतिष्ठ। **ययातेरिति।** हे 'वत्से शकुन्तले', त्वं 'शर्मिष्ठा' दानव-राजस्य वृषपर्वणः कन्या, 'ययातिः' नाहुषः (इति जटाधरः) तस्य, 'इव भर्तुः' (२।३।६७) स्वामिनः दुष्यन्तस्य 'बहुमता' अत्यादृता 'भव' (इति आशिषि लोट्। यथा बह्वीषु पत्नीषु विद्यमानासु सतीषु दानव-नन्दिनी शर्मिष्ठा भर्तुः पार्थिवस्य ययातेः गौरव-भागिणी महाराजी-पदं लब्ध-वती, तथा त्वमपि भर्तुः पार्थिवस्य दुष्यन्तस्य आदरणीया भव)। 'त्वमपि सा' शर्मिष्ठा 'पूरुं' स्वनाम-धन्यं चन्द्रवंश-प्रदीपम् 'इव सम्राजं' सार्वभौमं 'सुतं' पुत्रम् 'आप्नुहि' लभस्व। शर्मिष्ठायाः तनयः पुरुर्यथा सापत्न-भ्रातृषु बहुषु सत्स्वपि साम्राज्यं लेभे, तद्वत् तव पुत्रोऽपि चक्रवर्ती भूयात् (अत्र शर्मिष्ठा बहुमता '**अभूत्**', त्व तु '**भव**' इति, अपि च सा पूरुम् '**अवाप्तवती**', त्वं तु '**अवाप्नुहि**' इति **काल-भेदात् विधि-भेदाच्च भग्न-प्रक्रम-दोष**-द्वयम्, "चिरं जीवतु ते सूनु र्मार्कण्डेयमुनिर्यथा" इति साहित्य-दर्पणोदाहरणवत्। तच्च वक्ष्यमाण-रीत्या समाधेयम्–"**ययातेरिव शर्मिष्ठा भर्तुर्बहुमता सती। सम्राजं पुरुवत् पुत्रं तत्समा त्वमवाप्नुहि**"–इति सिद्धान्त-वागीश-पादाः]। अत्र **क्रम**-लक्षणमङ्गमुपक्षिप्तम्। तल्लक्षणं यथा—"तत्त्वोपलब्धिः **इष्टस्य क्रम** इत्यभिधीयते" इति। आशीर्वादच्छलेन तस्य वरत्वेन च कथनात् **आशीर्लक्षणो** नाट्यालङ्कारोऽपि। तल्लक्षणं यथा दर्पणे—'**आशीरिष्टजनाशंसा**'। श्लोकोऽयं तत्रैव षष्ठाध्याये उदाहृतः। **श्लोको** वृत्तम्) ॥७॥ **गौतमीति**। 'एषः वरः खलु' इति अवधारणे ('तपोभिरिष्यते यस्तु देवेभ्यः स वरोमत' इति **भरतः**)। 'भगवन्' इति सम्बोधनेन अस्य वचसः **अमन्यथात्वं** सूच्यते। (तथा च—"न हीश्वर-व्याहृतयः कदाचित् पुष्णन्ति लोके विपरीतमर्थम्' इति **कुमारसम्भवे** ३ सर्गे ६३ श्लोकः) 'न आशीः' केवलमनियत-फला हितैषणा, '(**आशीर्हितैषणा**' **इति हैमः**। अपि चोक्तम् 'वात्सल्यात् यत्र मान्येन **कनिष्ठस्याभिधीयते। इष्टाव-धारकं वाक्यमाशीः** सा परिकीर्तिता' इति)। **काश्यप इति**। '**सद्यो हुतान् अग्नीन्**' **अस्मिन्नेव क्षणे कृत-होमान् त्रिविधान् अग्नीन् इत्यर्थः** (**समाने अहनि इत्यर्थे** 'सद्यः पवत्-परार्य-ऐष मः—'(५।३।२२) **इति सूत्रेण 'सद्य' इति अव्ययं**

निपातनात् सिद्धम्) 'अप्रदक्षिणान्' प्रदक्षिणान् 'कुरुष्व' दक्षिणाऽऽवर्तनेन भ्रम इति भावः।

133n.—1. क्षौम-युगलम्—युगं लाति इति युग+ला+क कर्तरि (3. 2. 3); यद्वा, युगम् अस्ति अस्य इति 'सिध्मादयश्च' (५।२।९७) इति लच्, यद्वा 'वृषादिभ्यश्च', (उ–१११) इति युज्+कलच्=युगलम्–(*pair*)—BhD. 'नैक-वस्त्र-धरस्तया' इत्यनेन वैध-कर्म-मात्रे **एक-वस्त्र-धारण-निषेधात्"क्षौम-युगलम्"** इत्युक्तम्'—HS. **आनन्द-परिवाहिणा**—(18n. 1); also Ra. II. 39. **2. शकुन्तला सर्वोऽइं** &c.—Is certainly **better than** the Devanāgarī reading, as in the latter case a **stage direction**—('इति वन्दते,") after Śak.'s speech will be **necessary**. **3. ययातेः**—Yayāti of the Lunar Dynasty had two wives, 'देवयानी', daughter of 'शुक्राचार्य',and'शर्मिष्ठा',daughter of 'वृष-पर्वा', the demon-king. 'शर्मिष्ठा' was originally sent with 'देवयानी' as her maid-servent, and like 'शकुन्तला' she was married by the king according to Gāndharva form, and later on she rose to be the **chief queen**, owing to her intrinsic virtues, Now (vide 15n. 2. and "पुरु" with "ऊ")–*MP*. 33; *Mahā. Ādi*. 70. **4 सम्राजं**–सम्यक् राजते इति सम्+राज्+क्विप्–(3.2.61.); 'म' is not changed into 'अनुस्वार' by 'मो राजि समः क्वौ'–(8. 3. 25), 'क्वौ किम्? संराजते'– **Prabhā**, Hence the feminine form is also "सम्राज्", and not "सम्राज्ञी"(though it is met) with in the Vedic Literature—"सम्राज्ञी श्वशुरे भव", [where any rule may be considered **optional**]. Note also that 'सम्मता राज्ञी' can give the from 'संराज्ञी' and never '**सम्राज्ञी**' as there is no **क्विप् प्रत्यय**) सम्राट्—a paramount lord, 'performer of राजसूय-sacrifice. 'येनेष्टं राजसूयेन मण्डलस्येश्वरश्च यः। शास्ति यश्चाज्ञया राज्ञ: स **सम्राट्'**——Ak· Qtd *MN on Ra. II*. 5."राजा तु त्रिविधोज्ञेयः सम्राट् च सकरोऽकरः। सर्वेभ्यः क्षितिपालेभ्यः नित्यं गृह्णाति वै करम्। स सम्राडिति विज्ञेय **श्चक्रवर्ती** स एव हि॥"—Rāja-Nīti-Ratnākara of Candeśvara. **अवाप्नुहि**–Cf.'वत्स-राज-सदृशं पुत्र-मवाप्नुहि'—Rat. IV. **5. भगवन्**—(*Com* ; 119n. 2-3). **6. वरः खलु** &c.—(**आशिस्**—Read discussion on 128n. 8) is merly an expression of one's **good wishes**, which may or may not fructify, while '**वर**' (boon) is more permanent in character and is

sure to come to pass—"संतुष्ट-देवतादीनामवश्यम्भावि वचनं वरः। आशीस्तु कदाचित् फल-विधायिनी वाक्"—*C.* *Cf.* 'लौकिकानां हि साधूनाम् अर्थं वागनुवर्तते। ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति'——*UC. I.* 10 7. **प्रदक्षिणीकुरुष्व**—प्रगतो दक्षिणं प्रदक्षिणः (इति अव्ययीभावः समासः) by 'तिष्ठद्गु प्रभृतीनि च' (2.—1. 17). **'प्रदक्षिण'** **belongs to 'तिष्ठद्गु'** class—(गणपाठ—*Ch. II.*), Next अप्रदक्षिणं प्रदक्षिणं संपद्यमानं कुरुष्व इति प्रदक्षिण+च्वि+कृ+लोट् स्व। Cf. 'प्रदक्षिणीकृत्य'—*Ra. II.* 21 ; *II.* 71; *VII.* 24; *Ku. VII.* 79; *III.* 14; *IV.* 25. **प्रदक्षिण**—Means to go round **once** or **thrice**. (Cf. 'तौ दम्पती त्रिः परिणीय वह्निम्'—*Ku. VII.* 80.) an object, worthy of veneration, in a **clock-wise** direction, so that **right side** is always turned to the object circumambulated .Cf. 'प्रसार्य दक्षिणं हस्तं स्वयं नम्रशिराः पुनः। **दक्षिणं दर्शयन्** पार्श्वं मनसापि च दक्षिणः। सकृत् त्रिर्वा वेष्टयेत् ता देव्याः प्रीतिः प्रजायते। स च **प्रदक्षिणो ज्ञेयः** सर्व-देवौघ-तुष्टिदः—*Kālikā-Purāṇa. Ch.* 70.

Text:—**काश्यपः—वत्से !**

वातोर्मी–(११३) **अमी वेदीं परितः क्लृप्त-धिष्ण्याः**[1]
मभतगग **समिद्वन्तः**[2] **प्रान्त-संस्तीर्ण-दर्भाः**[3]।
शालिनी–(२१४) **अपघ्नन्तो**[4] **दुरितं**[5] **हव्य-गन्धैः**।
मततगग [6]**वैताना स्त्वां वह्नयः पावयन्तु ॥८॥**

(शकुन्तला प्रदक्षिणं करोति)

वत्से, प्रतिष्ठस्वेदानीम्। (सदृष्टिक्षेपम्) **क्व ते शार्ङ्गरव-मिश्राः ?**

Kāśyapa—My child, may yonder sacrificial[6] fires, whose[1] places are assigned round the altar,[1] fed[2] with faggots,[2] having[3] 'Darva' strewed at their margin,[3] sanctify thee, after destroying[4] (*thy*) sin[5] by the perfume of the oblations, (8)

(*Śak. goes round the fire thrice*).—My child, now set out. *Casting glance*). Where are Śārangarava and others ?

(प्रविश्य) **शिष्याः—भगवन् ! इमे स्मः।**

Disciples (*Entering*)—Here are we, Holy Sir

V. L.—'वत्से—B.. 'ऋक्छन्दसा आशास्ते'—R. V. M. S. 'शकुन्तला प्रदक्षिणं करोति'—B. Omitted by M. R and S. 'शिष्य:'—R. V. M. 'शिष्या:'—S. 'शिष्यौ'—B. 'पावयन्तु'—R. V. M.' पालयन्तु'—B. K. S. C.

अमीति। 'वेदिं परितः' समन्ततः ('समन्ततस्तु परितः सर्वतो विष्वग् इत्यपि' इत्यमरः। 'पर्यभिभ्यां च' (५।३।९) इति परि-शब्दात् तसिल्। 'अभितः परितः समया निकषा हा प्रतियोगेऽपि दृश्यते', (वा:—५४४) इति २या। अनेन सर्वस्यामेव दिशि **हव्य-गन्ध-प्राप्ति-संभवः** दर्शितः) 'समिद्वन्तः' समित्सम्बर्धिताः (अनेन अग्नीनां **स्थायित्वं** सूचितम्) 'क्लृप्तानि' रचितानि नियतं निर्दिष्टानि 'धिष्ण्यानि' स्थानानि येषां तादृशाः ('धिष्ण्यं स्थानाऽग्निःसद्मसु' इति मेदिनी) 'प्रान्तेषु' पार्श्व-चतुष्टयेषु 'संस्तीर्णा' आकीर्णाः कृतविक्षेपा इति यावत्। 'दर्भाः' कुशा येषां तादृशाः। 'अमी' पुरतो दृश्यमाना 'वितानस्य' यज्ञस्य इमे इति 'वैतानाः' यज्ञियाः ('वितानो यज्ञ उल्लोचे' इति मेदिनी) 'वह्नयः' दक्षिणाग्नि-प्रभृतयः 'हव्यानां' देवोद्देश-दत्तानां 'गन्धैः दुरितं' पापम् 'अपघ्नन्तो' दूरीकुर्वन्तः 'त्वां पावयन्तु' पुनन्तु (पुनातेः स्वार्थे णिच्। आशिषि लोट्)। (अत्र विशेषणानां विशेष-विशेषा-भिप्रायेण प्रयुक्तत्वात् **परिकरालङ्कारः**। अतएव **नापुष्टार्थत्व-दोषः**। "अत्र प्रथम-तृतीय-पादौ वातोर्म्याः, द्वितीय-चतुर्थ-पादौ **शालिन्या** इति **उपजाति नाम** वृत्तम्। * * * **प्रयोगानुसारेण उपजातयो द्रष्टव्या इति हलायुधे-नोक्ताः**"—इति न्यायपञ्चानन-चरणाः) ॥८॥ 'प्रतिष्ठस्व' प्रस्थानं कुरु ('समव-प्र-विभ्यः स्थः' (२६८९) इति आत्मनेपदम्)। **शिष्या** इति। "देवाश्च मुनयश्चैव लिङ्गिनः साधकाश्च ये। **भगवान्** इति ते वाच्याः सर्वैः स्त्री-पुं-नपुंसकैः" इत्युक्तेः 'भगवन्' इति संबुद्धिः।

134n.—1 The stage direction 'ऋक्छन्दसा आशास्ते (M. R.) is *redundant*, as otherwise before every Śloka a stage-direction explaining its metre would be necessary. **2. क्लृप्त-धिष्ण्याः**—दिधेष्टि (धिष्णोति इति वा) इति धिष् (ह्वादि) or धृष् (**स्वादि**) +ण्य अधिकरणे (*Unādi.* 557)=**धिष्ण्यम्**=Place, seat. In the latter case 'ऋ' irregularly becomes 'इ'। 'ऋकारस्य इकारः'—*BD*. This *infrequent* word has again been used by our poet—'न भौमान्येव **धिष्ण्यानि** हित्वा ज्योतिर्मयाण्यपि—*Ra. XV.* 59. 'धिष्ण्यानि स्थानानि'–MN. 'विवेश धिष्ण्यं'—BC. 3,6.102. **3. संस्तीर्ण-दर्भाः**—This strewing of दर्भ is **necessary**. Cf. 'दर्भाः पवित्रं पूर्वाह्णो ह्रविष्याणि च सर्वशः। पवित्रं यच्च पूर्वोक्तं विज्ञेयाः हव्यसम्पदः'—*MS. III.*

256. **4. हव्य-गन्धैः** &c.—The reek of sacrificial fire sanctifies the object with which it comes in contact. Cf. 'त्रेताग्नि-धूमाग्रम् * * * घ्रात्वा **हविर्गन्धि रजोविमुक्तः** समश्नुते मे लघिमानमात्मा'—*Ra. XIII.* 38 ; 'पुनानं पवनोद्धूतैः **धूमैराहुति-गन्धिभिः**'—*Ra. I.* 53. **5. वैताना वह्नयः**—Refers either to (*i*) the **Triple** fires viz. **'गार्हपत्य'** (*in the middle of the western part of the altar*), **'आहवनीय'** (*at the eastern end*), and **'दक्षिण'** (*at the south-western corner*) ; or, (*ii*) to the **Four Vedic Fires**—**'आहवनीय,**, **'माञ्जलीय'**, **'गार्हपत्य'** and **'आग्नीध्रीय'** which are kindled at the four cardinal points, east, west, north and south. *Vide Indian Wisdom P.* 205. & *Sāyana's Com.* on the Ṛ V. I. I. 4. Also Cf. 'Thou **four-eyed** Agni, blazest as the protector of the worshippers &c.'—RV. I.31. 13. "**वसंश्चतुर्थोऽग्नि**रिवाग्न्यागारे'—*Ra. V.* 25. **'चतुर्णां** ज्वलतां हविर्भुजां'–*Ku. V.* 20. *Rām. IV.* 13.23. and *Dr. Wilson's* **RV.** *P.* 3. *Notes.* (Also 126n. I). **प्रतिष्ठस्व**—Cf. 'प्रस्थितायां प्रतिष्ठेथाः'—Ra. 1. 89. **6. शिष्याः** (S)—Is **better** than the readings with Singular or Dual number. Cf. "हस्तिनापुरगामिनः (**ऋषयः**) शब्दाय्यन्ते"—p. 337— "हिमगिरेरुपत्यकारण्यवासिनः * * * **तपस्विनः**—(Speech of Kañcuki). "राजा—वेत्रवति ! किमुद्दिश्य काश्यपेन **ऋषयः** प्रेषिताः स्युः" । "प्रतिहारी—सुचरिताभिनन्दिनः **ऋषयः**" ।। "ततः प्रविशति शकुन्तलाम् पुरस्कृत्य (**मुनयः**):" ।। "निष्क्रान्ता सह पुरोधसा **तपस्विभिश्च**" ।। "परावृत्तेषु (**कण्वशिष्येषु**)" —*Śak. Act. V.* [*For* **उपजाति** metre see Appendix I. E.]

Text :—काश्यपः—भगिन्या स्ते मार्गमादेशय[1] ।

Kāśyapa—Show[1] the way to the sister.

शार्ङ्गरवः— इत इतो भवती । (इति सर्वे परिक्रामन्ति) । Śārṅgarava—This way, Your Ladyship, this way. (*This said, all turn round*).

काश्यपः—भो भोः सन्निहिता स्तपोवन–तरवः !!

पातुं न प्रथमं व्यवस्यति[2] **जलं युष्मास्वपीतेषु**[3] **या**

शार्दूलविक्रीडित **नाऽऽदत्ते**[4] **प्रिय-मण्डना**[5]**ऽपि भवतां स्नेहेन या पल्लवम्**

(मसजसततग) **आद्ये वः कुसुम-प्रसूति-समये**[6] **यस्या भवत्युत्सवः**

सेयं याति शकुन्तला पति-गृहं सर्वै रनुज्ञायताम्[7] ।।९।।

।।(कोकिल-रवं सूचयित्वा)।।

अपरवक्त्र
(ननरलग १।३
नजजर २।४)

अनुमत-गमना शकुन्तला
　　तरुभि रियं वन-वास-बन्धुभिः।
परभृत-विरुतं[8] कलं[9] यतः
　　[10]प्रतिवचनीकृत मेभि रात्मनः ॥१०॥

Kāśyapa—Ho ! Ho ! ye neighbouring trees of the penance-grove ! She who doth never try[2] to drink water first, until[3] you are watered[3] ; she who though fond[5] of ornaments[5], doth never pluck[4] (*your new*) tendrils, out of affection for you; she whose (*greatest*) festivity is at the season of the first appearance[6] of your blossoms[6],—even that same Śakuntalā doth now proceed to her husband's abode. Let this be approved[7] by you all. (9)

(*Acting as if he heard the note of a cuckoo*)

Here Śakuntalā has been permitted to depart by the trees, (*her*) sylvan companions ; since the sweet[9] warble[8] of the cuckoo[8] has, by them, been [10]employed as a response[10] of theirs. (10)

V L. 'भोभोः'—R. V. B. M. 'हंहो'—S. 'अपीतेषु'—V. M. R. K. 'असिक्तेषु'—B. 'आद्ये'—V. R. M. 'आदौ'—B. 'प्रसूति'—R. V. M. 'प्रवृत्ति'—B. 'यतः'—B. 'यथा'—R. V. M. S. 'आत्मनः'—B. 'ईदृशम्' —R. V. M. S. In B. Śl. 10 has been assigned to शार्ङ्गरव।

पातुमिति। 'पीतं' पानम् पिवतेः '**नपुंसके भावे** क्तः' (३।३।११४) इति **भावे क्तः तत् अस्ति** अस्या इति '**पीतः' पीतवान् इत्यर्थः**।–('अर्श आदिभ्योऽच्' (५।२।१२७) इति अच् प्रत्ययः]। 'युष्मासु न पीतेषु' अर्थात् युष्माकम् एकस्यापि मूलेषु जल-सेकेषु अकृतेषु (भावे ७मी) 'या' शकुन्तला 'जलं प्रथमम्' इति पान-क्रियायाः विशेषणम्)। 'पातु न व्यवस्यति' प्रथमं जलपानं न करोति इति भावः ('व्यवस्यति' इति वर्तमान-प्रत्ययेन **अधुनापि एतदवस्थाया** अपि तन्नि-र्वाह इति ध्वन्यते। एवम् अग्रिम-वर्तमान-प्रत्यययोः अपि व्यञ्जकत्वं **बोद्धव्यम्**' इति राघवचरणाः)। 'मण्डनं' भूषणं 'प्रियं' यस्याः सा 'मण्डन-प्रिया' ('प्रिय-मण्डना') वा। ('वा प्रियस्य'—८९६—इति प्रिय-शब्दस्य **पूर्वनिपातः पाक्षिकः**) तादृशी सती, अपि 'या' युष्माकं 'पल्लवं' नव-किसलयं 'न आदत्ते' अवतंसादि कर्तुं न गृह्णाति, युष्माकं दुःखानुभव-सम्भवात् इति भावः। ('आङो दोऽनास्य-विहरणे'—(१।३।२० ; २६८६) इत्यत्र आत्मनेपदम् इति यत् विद्याम्बुधिपादैः उक्तम्। तच्चिन्त्यम्। तथा च तत्त्वबोधिन्याम्। "**अ-कर्त्रभिप्रायार्थमिदम्**"

इति ।। अतः अत्र 'स्वरितञितः कर्त्रभिप्राये क्रियाफले' (१।३।७२) इत्यात्मनेपदम् इत्येव सुवचम्) । 'वः' युष्माकम् 'आद्ये' प्रथमे 'कुसुम-प्रसूति-समये' पुष्पोत्पत्ति-काले 'यस्याः शकुन्तलायाः 'उत्सवः' परमानन्दः 'भवति' (फल-प्रसूति-समयजः आनन्दातिशयः वक्तुमेव न शक्यत इति भावः ।।) 'सा इयं' भवत्-स्नेह-निधानं शकुन्तला 'पति-गृहं याति' अतः 'सर्वैः' तपोवन-वृक्षैः एकत्रीभूय, 'अनुज्ञायतां' तस्याः गमनम् अनुमन्यताम् । (**प्रत्येकाऽनुज्ञा-दाने काल-विलम्बो** भविष्यति इत्याशयः । 'पतिगृहम्' इत्यनेन अनुज्ञानस्य उचित-समयत्वं ध्वनितम्) । (तरून् प्रति शकुन्तलायाः स्नेहाधिक्य-प्रतिपादन-कार्ये कारण-त्रयोपन्यासात् **समुच्चयालङ्कारः** । ज्येष्ठ-भगिनी—व्यवहार-समारोपात् **समासोक्तिश्च । छेक-वृत्ति-श्रुत्यनुप्रासाः । हेतुश्च** । "गृह्णाति प्रियमण्डनापि न च या स्नेहाद्भवत्पल्लवम्" इति पठित्वा द्वितीय-पादस्थः **आत्मनेपद-प्रक्रम-भङ्ग-दोषः** समाधेयः । **शार्दूलविक्रीडितं** वृत्तम्) ।।९।। **कोकिलेति** । 'कोकिल--रवं सूचयित्वा' इति नेपथ्य-गत-नटत्वेन । तेहि सुशिक्षिताः सर्वे विहग-कूजितं कुर्वन्ति । **अनुमतेति** । 'इयं' पतिगृह--गमनोन्मुखी 'शकुन्तला' 'वने वासः' येषाम् ('शय-वास-वासिष्वकालात्' (६।३।१८) इति **सप्तम्याः लोपः पाक्षिकः** ।) तादृशाः एव 'बन्धवः' (इति **रूपकम्**) तैः, '**तरुभिः अनुमतम्**' अनुमोदितं 'गमनं' भर्तृगृह-प्रस्थानं यस्याः तादृशी जाता इत्यर्थः (सापेक्षत्वेऽपि गमकत्वात् समासः) । 'यतः' यस्मात् हेतोः 'एभिः' आश्रम-वृक्षैः 'कलम्' अव्यक्त-मधुरम् 'परेण' अपर-विहगेण काकेन इत्यर्थः । 'भृतः' शैशवे पालित इति 'परभृतः' कोकिलः ('वनप्रियः परभृतः कोकिलः पिक इत्यपि' इत्यमरः) तस्य 'विरुतं' कूजितं ('तिरश्चां वासितं रुतम्' इत्यमरः) 'आत्मनः' स्वस्य (जात्येकवचनम्) । अप्रतिवचनम् प्रतिवचनं कृतम् इति 'प्रतिवचनीकृतं' प्रत्युत्तरीकृतम् । (विरुतस्य प्रतिवचनेन रूपेण प्रतिरूपयोगात् **परिणामालङ्कारः** । सच समान-विभक्तिकत्वात् तुल्या-धिकरणरूपः । **अनुप्रासश्च** । **अपरवक्त्रं** वृत्तम् ।) ।।१०।।

135n.—1. भगिन्याः—This is the **usual address**–(37*n.* 2). For ६ष्ठी–(17*n.* 5.)–(*Com.*) Also **2. आदेशय**=दर्शय । (अनेकार्थत्वात् धातूनाम्) । This is **frequently** used in dramas in this sense. Cf. '**भवान् प्रमोदमार्गम् आदेशयतु**'—*Vik. III.* 'वेत्रवति, अग्निशरण-मार्गम् आदेशय'—Act. V. infra. **भो भोः**—(51*n.* 1). **3. पातुं न प्रथमं** &c.—The idea is that she did never drink water only before watering the trees for the **first time** in the morning, (Vide Kād. quoted below) for

we cannot conceive of her doing like this **on every occasion** she was thristy. **व्यवस्यति**—(Attempt)—Śak.I.17. **4. युष्मास्वपीतेषु**—As 'पा' is *transitive*, it cannot take 'क्त' in the **active voice**. So **'पा'+क्त'** in **passive voice** will mean '*which is drunk*', but the trees cannot be drunk like water. This **difficulty** is removed thus :—(i) "पा+क्त" भावे=**पीतम्**=(Drinking–'कृदभिहितो भावोद्रव्यवत् प्रकाशते') । Next पीतम्+मत्वर्थे अच् ['अर्शआदिभ्य: अच्'–5. 2. 127]= पीत:—'who has his drinking (*finished*'). Read "अकारोमत्वर्थीय: । विभक्तम् एषाम् अस्ति इति **विभक्ता:** । पीतम् एषाम् अस्ति इति **पीता:** । भुक्तम् एषाम् अस्ति इति **भुक्ता:** इति सर्वत्र"—**MBh.** Or, (ii) **पीत** may stand for **'पीत-जल'**, the **उत्तरपद (जल) has been dropped** as it is easily understood, Cf. 'उत्तर-पदलोप: अत्र द्रष्टव्य: । विभक्त-धना: **विभक्ता:**, पीतो-दका: **पीता:**'– *Ibid.* **गम्यमानस्याऽप्रयोग एव लोपोऽभिमत:**'—*KT*. Or, (iii) **'पीत'** by **उपचार** (*Transference of Epithets*) *may mean* **पीत-जल,** i.e. here the quality of the object is **transferred** to the **agent**. "विभक्ता: भ्रातर:' इत्यत्र च **धनस्य यत् विभक्तत्वं** तत् भ्रातृषु उपचर्यते । पीता: गाव:, इत्यत्रापि उदकस्य पीतत्वं गोषु आरोप्यते । भुक्ता: **ब्राह्मणा:**, इत्यत्र **अन्नस्य भुक्तत्वं** ब्राह्मणेषु उपचर्यते'—KT. Paternal wealth is divided among the brothers, but the owners of the property, i.e. brothers are consequently **said to be divided**. Similarly water is drunk but the agent of drinking is, by a **periphrastic** way, said to be drunk. (Cf. 'Sleepless pillow') ; Or, (*iv*) Though *transitive*, 'पा' may be used *intransitively*. [121*n*.3]. Hence कर्तरि क्त: । (**"सकर्मकादपि अविवक्षिते कर्मणि** क्त: । 'आशित: कर्ता'–६।१।२०७–इत्यादौ यथा")—*MN on Ki.* 1. 1. 'अशे: अयम् आङ् पूर्वात् अविवक्षिते कर्मणि कर्तरि क्त:'—('स वर्णिलिङ्गी 'विदित:')—*KV. i.e. Pāṇini* himself has used "कर्तरि क्त' after 'आ+अश्' which is transitive. but **this view (i. e. कर्तरि क्त in आशित) of MN and KV is 'चिन्त्य'**, for **T clearly says** that (कर्तरि क्त: in this particular case is by **'निपातन'** । **'आङ् पूर्वादश् भोजने कर्तरि क्त: निपात्यते'**—JS. For similar use 'सर्वस्याऽप्रार्थितोऽपि**चक्षुष्य: जन: "—HC. I. 20. **5. आद्ये व: कुसुम-प्रसूति** &c.—For 'joy caused by the first show of flowers'. Cf. 'आत्म-संवर्धित-लता-**प्रथम**-कुसुम-निर्गम-

निवेदनागताम् उद्यान-पालीम् अशेषाभरणदानेन सम्मानयन्तीम्'–*Kād. P.* 686.

Remark—According to GPŚ Kāli. is *indebted* (?) to the following Śloka of *Bhāsa* :—"यस्यां न प्रिय-मण्डनाऽपि महिषी देवस्य मन्दोदरी। स्नेहात् लुम्पति पल्लवान् नव पुर्नवीजन्ति यस्यां भयात्। वीजन्तो मलयानिला अपि करैरस्पृष्ट-बालद्रुमा। सेयं शक्ररिपोरशोक-वनिका भग्नेति विज्ञाप्यताम्"—*Aviṣeka. III.* I; (Now read Introduction—'Kāli. & Bhāsa').

6. कोकिल-रवं &c.—The note of cuckoo is made by some of the **actors** who are very **expert** in imitating any kind of sounds. Read "एषा रङ्ग-प्रवेशेन कलानां चैव शिक्षया। स्वरान्तरेण दक्षा हि व्याहर्तुं तत्र मुच्यताम्"—*Cārudatta. I.* 24. 7. **वन-वास-बन्धुभिः** &s.—Cf. 'यत्र द्रुमा अपि···बन्धवो मे'—*UC. III.* 18 **'तरुभिः'—does not take षष्ठी** by "क्तस्य च वर्तमाने" (2. 3. 67), as 'क्त' in 'अनुमतं' &c has been used in the **passive voice** (**अतीते**)। "यदा **वर्तमाने** क्त., (तदा षष्ठी)। **समास-निषेधश्च**। यदा तु 'भूते **क्त' स्तदा कर्तरि** तृतीया। यथा 'पूजितो यः सुरासुरैः' इति। तस्या 'कर्तृकरणे कृता बहुलम्' (३।२३२) इति समासः। न च **तक्र-कौण्डिन्य-न्यायात्** 'वर्तमाने **क्तः**' (**इह**) 'भूते **क्तं**' **बाधते इति वाच्यम्**। "**तेन**" (४।३।१०१) इत्यधिकारे '**उपज्ञाते**' (४।३।११५) **इति निर्देशेन अबाध-ज्ञापनात्**। न च **ज्ञानार्थ-मात्र-विषयकम्**, ज्ञापकम्। उदाहृत-प्रयोगाऽनुरोधेन सामान्य-विषयकत्वस्यैव न्याय्यत्वात्"—**Maitreya Rakṣita**(अनुन्यास)। The gist is :–*Pāṇini* himself connects the Sūtra "**उपज्ञाते**" (4.3 115) with "**तेन**" 4.3.101-("तेन"इत्येव। **पाणिनिना उपज्ञातं** पाणिनीयम्"—*BD*), therefore **मति, बुद्धि** and **पूजार्थक** roots will **also** take"क्त-प्रत्यय"in the **past tense,** and hence their subjects may take **तृतीया** विभक्ति। This is the view of **BD** and **नव्याः**। Also MN on Ki.II. 22. But **HD** and **KT** are **against this view.** "स्यादेवं यदि भूते क्तः लभ्यः। न। नाप्राप्ते तस्मिन् आरभ्यमाणो **वर्तमाने** क्तः **अस्य बाधको** भवति। एवञ्च 'पूजितः यः' सुरा-सुरैरित्यविकित्स्योऽपशब्दः। **'त्वया ज्ञातो, 'मया ज्ञात'** इति तु **भवत्येव**। **'तेन'** इत्यधिकारे **'उपज्ञाते'** इति निर्देशात्—*PM.* (*on* 2.2.12.); *Bhāsya-Pradipa* on (3.2.118). Hence according to them **तृतीया with ज्ञानार्थक roots** may be **allowed,** but **तृतीया with 'इच्छार्थक' or 'पूजार्थक' roots is**

absolutely wrong. Therefore the following uses are **erroneous** —' अनुप्रासधिया **गौड़ै स्तदिष्टं** बन्धगौरवात्'—*KA*. 1. 44; 'कलहं **राम-महितः** कृतवान्'—*BK. X*. 2. 'स पूण्यकर्मा भुवि **पूजितः नृपैः**'—*Ss*. 8. **परभृत** —The cuckoo is so termed because the female ones are supposed to keep their eggs in the nests of crows which hatch them. The cock-koil sits himself on a prominent part and lifts up his voice and shouts aloud and very soon attracts the attention of the owners of the nest (i.e. crows) who rush out to attack and chase him away. Now comes the chance of his wife who forthwith nips in to deposit her eggs'—*D. D. Cunnigham*. (*Indian Friends and Acquaintances. pp*. 64-65). 'परभृत इव नीड़े रक्षितः वायसीभिः'—*MK. II*. 3.'अन्यै द्विजैः परभृता खलु पोषयन्ति—*Śak. V* 22; *Ra, IX*. 43 ; *Ku. I*. 2. For a similar idea Cf. 'उदीरयामासुरिवोन्मदानामालोक-शब्द वयसां विरावैः.' Ra. II. 9. Mark that the **crow** is called '**परभृत्**' (पर बिभर्ति। क्विप्) । **कलं** (*adj*) means 'sweet'. '**विरुतं कलं**'—Sweet warblings of the cuckoo. Cf. 'कलम् अन्यभृतासु भाषितम्, कलहंसीषु मदालसं गतम्'— *Ra. III*. 59.

Text :— (आकाशे)

'रम्यान्तरः कमलिनी-हरितैः सरोभिः
वसन्त तिलका 'छाया-द्रुमैर्नियमितार्क-मरीचि-तापः' ।
(सभजजगग) भूयात् कुशेशय-रजो-मृदु-रेणु रस्याः
शान्ताऽनुकूल-पवनश्च शिवश्च पन्थाः ॥११॥

। (सर्वे सविस्मयमाकर्णयन्ति) ।

(*In the air*)—May her path,—[1]with its intervals made fascinating[1] by[2] the lotus-verdant[2] pools, (*and*) [4]with the glare of the sun's rays moderated[4] by the umbrageous[3] trees,—have[5] its dusts mollified as the lotus-pollens.[6] and (*may it have*) gentle and favourable breeze, and be (*altogether*) blissful[6] (11).

(*All listen with astonishment*).

V. L.—'मरीचि'—B. HS. 'मयूख'—R. V. M. S.

रम्यान्तर इति। 'कमलिनीभिः' पद्मिनीभिः 'हरितैः' श्यामलैः (इति शब्दरत्नावली। **तद्गुणालङ्कारः**) तादृशैः 'सरोभि कासारैः ('कासारः सरसी सरः' इत्यमरः। सरोभिः इति **बहुवचनेन प्रतिपदं सरसः सत्त्वं द्योत्यते।** अनेन पिपासा-निवृत्तिः), 'रम्याणि' मनोहराणि 'अन्तराणि' मध्यप्रदेशाः यस्य तादृशः। "छाया-**प्रधानाः** द्रुमाः" (उत्तर-पदलोपी कर्मधारयः। वृक्षमात्रेण सूर्य-ताप-निरासः कर्तुं न शक्यते इति छाया-प्रधानत्व-विशेषणं बहुवचनमपि। तेन विश्रान्ति-स्थल-सत्त्वं व्यज्यते। **विशेषण-प्रक्रम-भङ्गश्च** निरस्तः) तैः, 'नियमितः' प्रशमितः, 'अर्कस्य' सूर्यस्य 'मरीचिः' गभस्तिः किरण इति यावत् ('मरीचिर्मुनिभेदे ना गभस्तौ वनपुंसकम्' इति मेदिनी), तस्य 'तापः' यस्मिन् तथाभूतः। 'अस्याः शकुन्तलायाः। पथन्ते गच्छन्ति अनेन इति 'पन्थाः' मार्गः। 'कुशे' जले ('कुशो रामसुते दर्भे योक्त्रे द्वीपे **कुशं जले**' इति विश्वः) शेते इति 'कुशेशयं' 'कमलं' ('शतपत्रं कमलं कुशेशयम्' इत्यमरः। 'अधिकरणे शेते' (३।२।१५) इति अच्। 'शय-वास-वासिष्वकालात्' (६।३।१८) इति **सप्तम्या अलुग्भावः पाक्षिकः**) तस्य 'रजांसि' परागाः इव 'मृदवः' कोमला 'रेणवः' धूलयः यस्मिन् तादृशः [अनेन चरणानुपघातो व्यज्यते]। 'शान्तः' (७।२।२७) अवेग-वाहित्वात् सौम्यः 'अनुकूलः' अविपरीतः सहगामी इति यावत्, 'पवनः' यस्मिन् तादृशः 'च शिवश्च' शुभश्च मङ्गलकरश्च इति यावत् ['शिवं मोक्षे शुभे भद्रे' इति विश्वः ॥ अर्श आदिभ्यः अच्' (५।२।१२७) इति अच्] 'भूयात्' ('आशिषि लिङ्लोटौ)' ३।३।१७३)। (वायु-मार्गयो रुभयोः प्राकरणिकत्वाद् **तुल्ययोगिता**। योग्येन वायुना योग्यस्य पथः सम्बन्ध-द्योतनात् **समालङ्कारो** व्यङ्ग्यः। शिवत्वं प्रति बहु-कारणोपन्यासात् **समुच्चयोऽ**लङ्कारश्च। परस्परोपकरणात् **अन्योन्या-**लङ्कारोऽपि। वृत्ति-श्रुत्यनुप्रासौ। **उपमा-हेतु-परिकरा**लङ्काराः। **वसन्त-तिलका** वृत्तम्) ॥११॥

136n—1. आकाशे—This stage-direction is **different** from 'आकाशे in *Act. III.*; *V. I.* (*Vide* 82*n*. 6). This is used when the utterance is from Dryads or some superhuman agency. Read 'दूरस्थाऽऽभाषणं यत् स्यादशरीर-निवेदनम्'। परोक्षान्तरितं वाक्यं तत् आकाशे निगद्यते'—*Bharata*. This sort of oracles (आकाशवाणी) at the time of departure bespeaks of good omen. Cf. '**आकाशवाणी** मङ्गीतां जयस्ते भवितेति च * * * चकार यात्रां भगवान् श्रुत्वा एव-विधं शुभम्)'—*BrP. Ch.* 33. **2. छाया-द्रुमः** —According to *C*, the

foliage and extent of छाया-द्रुम are so great that there is always a shade under it from sun-rise till sun-set. The qualifying attribute (प्रधान–Com.) corresponds to the adjective 'हरित्' in the first line, hence विशेषण-प्रकम-भङ्ग-दोष does not arise (*Com.*) **3. कुशेशय** &c.—कुशेशय=Lotus (*Ra. I.* 18). The idea is—Let the pollens of lotuses being blown by the wind, be deposited upon the dusts, thus making the path smoother, and then the travellers walking there may not be troubled in any way. This also suggests the *abundance of lakes fraught with lotuses* through out the whole path (*Com.*). **4. शान्तानुकूल** &c.—Wind blowing from behind (*i.e. favourable*) at the time of departure is also a good omen. 'शुभगन्धे च शब्दे च **सानुकूले च मारुते। प्रस्थिते सर्वकार्याणि सर्वसिद्धिः** ध्रुवं भवेत्'—*Pālakāypa.* 'अभिमुख-पवनस्य कार्य-सिद्धि-करत्वम्'—*BRŚ.* 'वामे मधुरवाक् पक्षी, वृक्षः पल्लवितोऽग्रतः। **अनुकूलो वहन् वायुः** प्रयाणे शुभशंसिनः—*Qtd. N.* '**पवनस्य अनुकूलत्वात्** प्रार्थना-सिद्धिशंसिन'—*Ra. I.* 42; 'मन्दं मन्दं नुदति पवनश्चानुकूलः'—*PA & MD.* 9; '**शान्तः='पाटच्चरादि-शून्यः —Free from thieves and high-waymen**—(Ś. & C.). **5. शिवश्च पन्थाः**—Cf. 'भद्र शिवास्ते पन्थानः'—*UC. II.* "पन्थानः सन्तु ते शिवाः"—*BK. XX.* 25. 'पन्थानः ते सन्तु शिवाः' —*Hit.* 'शिवास्तु ते सन्तु पन्थानः'—Infra.

Remark—It is quite likely that in writing this Śloka, our poet, fond as he is of *Vedic(uses)*, was thinking of the **Pūṣan Hymns** in the (ṚV.I.42.2-3)–Pūṣan is decribed as the custodian of the road. The hymns run thus—"Pūṣan clears and makes **level the path,** fills the meadows with emarald grass and makes the **paths pleasant** and **journey safe** for his devotee. He **drives away the wicked wolf and treacherous robber** from the road." (Cf. Ś & C above)

Text :—गौतमी—जादे, ञ्जादि-जण-सिणिद्धाहिं अणुण्णाद-गमणासि तवोवण-देवदाहिं। ता पणम भअवदीओ [जाते,[1] ज्ञाति-जन-स्निग्धाभिः[2] अनुमत–गमनाऽसि तपोवन-देवताभिः। तत् प्रणम भगवतीः]।

Gautamī—My child,[1] you have your departure sanctioned by the Dryads of the penance-grove who are as affectionate[2] as your relatives.[2] So bow to the divine ones.

शकुन्तला (सप्रणामं परिक्रम्य। जनान्तिकम्)—**हला प्रियंवदे, णं अज्जउत्त-दंसणुस्सुआए वि अस्सम-पदं परिच्चअन्तीए दुक्ख-दुक्खेण मे चलणा पुरदो पवट्ठन्ति** (हला प्रियंवदे, ननु आर्यपुत्र-दर्शनोत्सुकाया अपि आश्रम-पदं परित्यजन्त्या दुःख-दुःखेन[1] मे चरणौ पुरतः प्रवर्तेते।)

Śakuntalā (*Turning round with a bow—Aside*)—Dear Priyaṁvadā, eager as I am to see (*my*) lord, my feet move onward with[3] great sorrow[3] as I am quitting the region of the hermitage.

प्रियंवदा—ण केवलं तवोवण-विरह-कादरा सही एव्व। तुए उवट्ठिद-विओअस्स तवोवणस्स वि समवत्थां पेक्ख दाव।

(न केवलं तपोवन- विरह-कातरा सखी एव। त्वया उपस्थित-वियोगस्य[1] तपोवनस्यापि समवस्थां[2] प्रेक्षस्व। तावत्)—

आर्या **उग्गलिअ-दब्भ-कवला मिआ, परिच्चत्त-णच्चणा मोरा।**
[12. 18, 12, 15] **ओसरिअ-पण्डु-पत्ता मुअन्ति अस्सू विअ लदाओ॥१२॥**

(उद्गलित-दर्भ-कवला[3] मृगाः, परित्यक्त-नर्तना मयूराः।
[4]अपसृत-पाण्डु-पत्रा. मुञ्चन्त्यश्रूणीव लताः॥१२॥

Priyaṁvadā—It is not that (*our*) friend alone is grieved at the separation from the penance-grove. Just behold the (*troubled*) [2]condition of the penance-wood whose[1] separation from you is impending.[1] The deer have dribbled[3] adown the mouthful of Kuśa-grass[3]; the pea-fowls have given up their dancing; creepers [4]with their brown leafage falling[1], are shedding tears, as it were. (12)

V. L.—'तत् प्रणम'—B. HS. Others omit तत्। 'दुःखेन'—R. V. M. K. 'दूःखदू.खेन'—B. S. Ś. Dr. 'पुरत प्रवर्तते'—R. V. M. 'पुरमुखौ न निपततः'—B. 'पुरमुखौ वर्तते'—S 'समावस्था'—Taylor Mass. 'समवस्थां'—Patankar. 'समवस्था'—R. M. S. 'अवस्थाम्'—B. 'उद्गलित' —R. V. M. S. 'उद्गीर्ण'—B. 'मृगाः & मयूराः'—V. M S. 'मृगी' & मयूरी'—B. HS. 'मृग्यः'—R.

गौतमीति। 'ज्ञाति-जनः' बन्धुवर्ग 'इव स्निग्धाभिः' स्नेह-युक्ताभिः इत्यर्थः ('स्निग्धस्तु वत्सलो वत्सः स्नेह-युक्त-जने भवेत्' इति शब्दरत्नावली)। **शकुन्तलेति।** 'आर्यपुत्र-दर्शने', यद्वा 'आर्यपुत्र-दर्शनेन उत्सुका' इति **सहसुपेति**

समासः। ('प्रसितोत्सुकाभ्यां तृतीया च'-(२।३।४४)-इति तृतीया सप्तमी वा)। 'दुःखदुःखेन' नितरां दुःखेन हेतुना। **प्रियंवदेति।** 'त्वया उपस्थित-वियोगस्य' आसन्न-वियोगस्य, न तु भूत-वियोगस्य नापि भावि-वियोगस्य इति उपस्यार्थः ('सापेक्षत्वेऽपि गमकत्वात् समासः') 'तपोवनस्य' अचेतनस्यापि इति भावः 'समवस्थां' दशाम् (इति रघुटीकायां मल्लिनाथपादाः-८।४१)। समवस्थां गाथिकया कथयति। **उद्गलितेति।** मृग्यश्च मृगाश्च इति 'मृगाः'-(१।२।६७)-'उद्गलिताः' चर्विताः अपि मुखात् भ्रष्टाः 'दर्भ-कवलाः' कुश-ग्रासाः येषां तादृशः, मयूर्यश्च मयूराश्च इति 'मयूराः'-(१।२।६७) त्वद्गमन-दुःखेन परिहृतं 'नर्तनं' नृत्यं यैः तथाभूताः तिष्ठन्ति इति शेषः। न केवलं चेतनाः तद्वियोग-कातरा, अपितु अचेतनाः 'लताः' वल्लर्यः त्वद्विरह-कातराः 'अपसृतानि' मुहुः च्युतानि 'पाण्डूनि' हरिणानि शुष्काणि इति भावः 'पत्राणि' याभ्यः तादृश्यः सत्यः 'अश्रूणि' वाष्पाणि 'मुञ्चन्ति' विसृजन्ति 'इव' (इति **क्रियोत्प्रेक्षा।** तपोवनस्य विरह-प्रतिपादन-रूप-कार्य प्रति **कारण-त्रयोपन्यासात् समुच्चयालङ्कारः।** बन्धुजन-व्यवहार-समारोपात् **समासोक्तिः। अनुप्रासश्च। आर्या जाति**)ः ॥१२॥

137n.—1. ज्ञाति-जन &c.—*BhD derives* 'ज्ञाति' thus—'जानाति। **क्तिच्** (३।३।१७४); ज्ञायते वा। **क्तिन्** (३।३।९४) *i.e.* attaching 'क्तिच्' in (कर्तृवाच्य) or 'क्तिन्' in (करणवाच्य) । Hence acording to him **'ज्ञाति'** is **optionally feminine**, though it is generally **masculine. दुःख-दुःखेन**—Repetition implies **excess**–(91n. 1). **पुरतः**—Most grammarians consider it to be **erroneous. For detailed discussions,** Vide (261n. 7). **2. त्वया** &c.—*Pāṇini* sanctions ३या **समास** with **ऊनार्थक** words.–('पूर्व-सदृश-समोनार्थ-कलह-निपुण-मिश्र-श्लक्ष्णैः'—**(2.1.31)**, but there is no Sūtra sanctioning '३या विभक्ति' with **'ऊनार्थक'** words, yet ३या **विभक्ति** may be available by implication of this समास-Sūtra. Read "अस्मादेव वचनात् पूर्वादिभिर्योगे तृतीया भवति,"–*KV*. "इदं सूत्रमेव समो-नार्थ-शब्द-योगे **तृतीयायाः ज्ञापकम्**"–**Prabhā**. Here **'वियोग'** has the sense of **'ऊन'**। Now vide (9n. 7). **3. समवस्थां—(Oldest** reading–89n. 6). Also "द्वितीया–अस्ति खलु लोकप्रवादः आगामि सुखं दुःखं वा हृदय-**समवस्था** कथयतीति"—*Māla. V.* "द्वितीया—अतः खलु भर्तृ-दारिकाया इयं **समवस्था** संवृत्ता"—*Ibid. V.* **4. दर्भ-कवला** &c.—Cf. 'मृग्यश्च दर्भाङ्कुर-निर्व्यपेक्षा स्तवागतिज्ञं समबोधयन् माम्'—*Ra. XIII.* 25.

"अधुनापि यत्र जलधर-समये * * * भगवतो रामस्य चापघोषस्य स्मरन्तो न **गृह्णन्ति शष्प-कवलम्** अजस्रम् अश्रु-जल-लुलित-दीन-दृष्टयो वीक्ष्य शून्या **दशदिशो * * * जानकी-संवर्द्धिता जीर्णमृगाः**"—*Kād. P.* 80. For similar idea, Cf. "नृत्यं मयूराः,कुसुमानि वृक्षा, दर्भानुपात्तान्विजहुर्हरिण्यः। तस्या प्रपन्ने सम-दुःख-भाव मत्यन्तमासीत् रुदितं वनेऽपि"—*Ra. XIV.* 69 "शीर्णा गोकुल-मण्डले **मृगकुलं शष्पाय न स्पन्दते।** मूकाः कोकिल-पङ्क्तयः, **शिखि-कुलं न व्याकुलं नृत्यति।** सर्वं तद्विरहेण हन्त नितरा गोविन्द ! दैन्यं गतं। किन्त्वेका यमुना कुरङ्ग-नयना नेत्राम्बुभि र्वर्धते॥" "हृष्टाश्च केका मुमुचु र्मयूराः दृष्ट्वाऽम्बु नीलमिवोन्नमन्तम्। शष्पाणि मुक्त्वाऽभिमुखाश्च तस्थुः मृगाश्चलाक्षा मृग-चारिणश्च"—BC. VII. 5. For the dancing of the peacocks. vide *R̤S. II.* 6. *PA & MD.* 46, 78 ; *Śs*—43. **मुञ्चन्ति अश्रूणि**—Cf. 'अमुना कुसुमाश्रु-वर्षिणा त्वमशोकेन सुगात्रि शोच्यसे'—*Ra. VIII.* 63.

Remark :—According to GPŚ, Kāli. is indebted (?) to the following Śloka of *Bhāsa*, (*at the time of Rāma's deparature*) "नागेन्द्रा यवसा-भिलाष-विमुखाः सास्रेक्षणा वाजिनः। ह्रेषा-शून्य-मुखाः सवृद्ध-वनिता-वालाश्च पौरजनाः॥ त्यक्त्वा-हार-कथाः सुदीन-वदनाः क्रन्दन्तः उच्चैर्दिशा। रामो याति यया सदारसहजस्तामेव पश्यन्त्यमी"—*PN. II.* 2.

Text :— शकुन्तला (स्मृत्वा)—**ताद ! लदा-बहिणिअं वणजोसिणिं दाव आमन्तइस्सं** (तात! लता-भगिनीं वनज्योत्स्नां तावदामन्त्रयिष्ये[1])।

Śakuntalā (*Remembering*)—I will just bid[1] adieu to[1] (*my*) tendril-sister, the "Moon-light of the Grove."

काश्यपः—वत्से ! अवैमि ते तस्यां सोदर्या-स्नेहम्। इयं तावत् दक्षिणेन।

Kāśyapa—My child ! (*I*) am aware of thy sisterly affection for her. She is just to the right.

शकुन्तला (उपेत्य लतामालिङ्ग्य)—**वणजोसिणि ! चूद-सङ्गदा वि मं पच्चालिङ्ग इदोगदाहिं साहा-बाहाहिं। अज्ज-पहुदि दूर-परिवत्तिणी दे क्खु भविस्सं** (वनज्योत्स्ने ! चूत-सङ्गतापि[2] मां प्रत्यालिङ्ग इतोगताभिः[3] शाखा-वाहाभिः। **अद्य-प्रभृति दूर-परिवर्तिनी ते खलु भविष्यामि**)।

Śakuntalā (*Approaching and embracing the creeper*)—Forest-moon-light ! [2]though united with the mango tree[2], yet, prithee, embrace me [3]with your hitherward[3] bough-arms. From this day forth (*I*) will indeed be far away from you.

V. L.—'सोदर्या-स्नेहम्'—V. 'सोदर्य-स्नेहम्'—M. R. S. 'सौहार्दम्'—B. HS. 'शाखाबाहाभिः'—K. R. M. V. 'शाखामयैः बाहुभि.'—B. 'उपेत्य लता मालिङ्ग्य'——B. 'लतामुपेत्य'—R. V. M. S.

शकुन्तलेति। 'लताभगिनीं' भगिनीत्वेन परिगृहीता लताम् (इति **परिणामालङ्कारः**)। **काश्यप इति।** 'अवैमि' जानामि। सोदर्यायाः ('सोदरात्यः'—४।४।१०९) भगिन्याः यः स्नेहः' तम्। 'तावत्' इत्यवधारणे। '**दक्षिणेन**' **अदूरे दक्षिण-दिग्विभागे** ('एनप्'–५।३।३५)। **शकुन्तलेति।** 'चूतेन' प्राणनाथेन आम्रतरुणा 'सङ्गता' मिलिता 'अपि' इत्यनेन अन्य-बन्धुजनानां विस्मरण-शङ्का। 'इतोगताभिः' अस्यां दिशि प्रसृताभिः। 'शाखा-वाहाभि' (इति एकदेश-विवर्ति **रूपकम्**)।

138.—1. 'लता-भगिनीं'—This idea of लता might have come to her mind from Priyaṁvadā's uttering 'लता' in the fore-going Śloka. **2. आमन्त्रयिष्ये'–**(109n. 3). **Remark**—Similar ideas occur in *Bhāsa's PY*–"आपृच्छ पुत्र-कृतकान् हरिणान् द्रुमांश्च। विन्ध्य वनं तव सखीर्दयिता लताश्च"—*V. II.* **3. अवैमि**—अव+इ (*to know*) is a **favourite root** with our poet. Cf. **'अवेहि मां किङ्करमष्टमूर्तेः**—*Ra. II.* 53. **'अवेहि मां'**—*III.* 63. 'वार्तम् **अवेहि** राजन्—*V.* 13. '**अवेहि** मा गन्धर्वपते, स्तनुजम्'—*V.* 53. '**अवेहि** चैनाम्'—*XIV.* 40 '**अवैमि** कार्यान्तरमानुषस्य' —*XVI.* 82. '**अवैमि** ते'—*Ku. III.* 13; *IV.* 8; *V.* 49; 'सुखसङ्गिनम् **अवैमि**'–Ś*ak. V.* 11; *IV.* 4; (126n. 3). **5. सोदर्या** &c.—समानोदरे शयिता इति समानोदर+य [by 'सोदरात् यः'—4. 4. 109]. Now before the affix '**य**' is added to the word, 'समान of समानोदर' *optionally* becomes 'स' by 'विभाषोदरे'—(6. 3. 88) giving the form '**सोदर्या**'। But when there is **no change**, then 'समानोदर' takes 'यत् (*and not* '**य**' as *Prof. G. has it*) by '**समानोदरे शयित ओ चोदात्तः**'(4. 4. 108), and the Udātta will fall on the letter ओ and not on 'य'—(Vide T & BM. 1659.) **दक्षिणेन**–(22n.1). **5.** शाखा-**बाहाभिः**—'बाहा' has been preferred to '**बाहु**' as it suits very appropriately with शाखा (*feminine*).

Text :—काश्यपः—वत्से—

"सङ्कल्पितं प्रथममेव मया तवार्थे
वसन्ततिलका भर्तारमात्म-सदृशं[1] सुकृतैर्गता[2] त्वम् ।
(तभजजगग) [3]चूतेन संश्रितवती[4] नवमल्लिकेयम्
अस्यामहं त्वयि च सम्प्रति वीत-चिन्तः[5]" ॥१३॥
॥ तदितः पन्थानं प्रतिपद्यस्व ॥

Kāśyapa—My child, thou hast obtained[2] by dint of (*thy*) merit[2], a spouse[1] worthy of thee[1]—just as previously determined by me on thy account. This Navamallikā is (*also*) twined[4] with the mango[3] tree. Now I (*am*) free[5] from solicitude[5] for thee, as well as for it. (13). So set out on (*thy*) way hence.

शकुन्तला (सख्यावुपेत्य)—**हला, एसा दुवेणं वो हत्थे णिक्खेवो**[5] (हला एषा द्वयो र्वां हस्ते निक्षेपः[5]) । Śakuntalā (*Going up to her friends*)–Dear friends! she (*is*) in the hands of you both, a pledge[5].

उभे—अअं जणो दाणिं कस्स हत्थे समप्पिदो (अयं जनः इदानीं कस्य हस्ते समर्पितः) । (इति वाष्पं विहरतः) । Both—But to whose charge, are we now committed (*by thee*) ? (*This said, shed tears*).

V.L,—'संश्रितवती'—K.R.M. 'संस्कृतवती'—M's Mss. 'सस्मितवती'–Colebrooke's Mss. The Śloka No. 13 is found in B as follows—** 'तदर्थम् * * * स्वगुणैर्गतासि । अस्यास्तु सम्प्रति वरं त्वयि वीतचिन्तः कान्तं समीप-सहकारमिमं करिष्ये' ॥ 'सख्यावुपेत्य'—B. 'सख्यौ' प्रति'—R. M. S. 'इदानीम्'—Only B. S. HS.

सङ्कल्पितमिति । 'मया' तपोनिधिना 'तवार्थे' तव कृते, त्वत्-प्रयोजन-निमित्तं (प्रयोजनञ्च **योग्य-समागम** एव) 'प्रथममेव' आदावेव, दुष्यन्तस्य ममा--श्रमाऽऽगमनात् प्रागेव 'सङ्कल्पितं' मनसा विभावितम्, 'आत्मनः सदृशम्' अभिजन-गुणैः सौन्दर्येण वयसा च तुल्यम् इत्यर्थः । 'भर्तारं' पतिं (केवलं तद्भरणात् न, अपि तु त्रिभुवन-भरणात् भर्तारम् इत्याशयः) 'त्वं सुकृतैः' प्राक्तन-पुण्य-फलैः 'गता' लब्धवती असि (योग्य-समागमश्चिचतिन्तोऽपि पुण्याऽतिशायदेव भवतीति भावः) । 'इयं' पुरतः स्थिता 'नवमल्लिका' वनज्योत्स्ना 'चूतेन' आत्म-योग्येन आम्रेण सह 'संश्रितवती' सङ्गतवती मिलिता इति यावत् । (अत्र नायक-व्यवहार-समारोपात् **समासोक्तिः** । उभयोः प्राकरणिकत्वात् **तुल्ययोगिता** च) । अतएव 'सम्प्रति',

अधुना 'अहम् अस्यां नवमल्लिकायां 'त्वयि' तद्विषये च 'वीता' विशेषेण गता 'चिन्ता' वर-संग्रह-भावना यस्य तादृश. संवृत्तोऽस्मि (योग्येन योग्य-समागमात् **समालङ्कारः**। परस्परोपकरणाद् **अन्योन्यालङ्कारो** व्यङ्ग्यः। पुनः सुकृत-रूप-कारणान्तरोपन्या-सेन आत्म-सदृश-पति-लाभ-रूप-कार्यस्य सुकरत्वात् **समाधिः** अलङ्कारश्च— '**समाधिः** कार्यसौकर्यं कारणान्तर-सन्निधेः" इति तल्लक्षणात्। **हृस्वनुप्रासौ**। **वसन्ततिलका** वृत्तम्)। **शकुन्तलेति**। निक्षिप्यते यः सः 'निक्षेपः' न्यासः स्थाप्य. इति यावत्। ("यथा स्थाप्यः रक्ष्यते तथा इयम्" इति शङ्करपादाः)। इतः परं युवाभ्याम् इयं निक्षेप इव यत्नतो रक्षणीया इत्यर्थः।

139n.—1. तवार्थ—तव+अर्थे=तव कृते—*K*. 'अर्थे' & 'कृते' (निपात) mean '*for the sake of*'. "**अर्थे कृते अव्ययं** तावत् तादर्थ्ये वर्तते द्वयम्" इति कोषसारः। "अन्ये च बहवः शूरा **मदर्थे** त्यक्त-जीविनाः"—*Gitā I*. 9. '**गवार्थे ब्राह्मणार्थे** च'—*PT. I*. 420. "**तवार्थे**"—(*Rām. III*. 74. 18). **सुकृतैः**—By meritorious actions done in former life. Cf. 'तच्चिन्त्यमान सुकृत तवेति'—Ra. XIV. 16. **2. संश्रितवती**—सम्+श्रि+क्तः भावे=संश्रितम् [=संश्रयः–(27*n*. 3).] सश्रित+मत्वर्थे मतुप्+ङीप्—संश्रितवती (म=व 8.2.91). **3. अस्यां त्वयि च**—Here is क्रम-प्रक्रम-भङ्ग-दोष, as शकुन्तला has been mentioned after 'नवमल्लिका' in the **last** line, though she is mentioned **first** in the **first** half. Śak.'s pet **creeper** has been **given importance** by being put first and this is **intentionally** done with a view to pleasing *Śak*'. For this will show that the sage has tender affection for her beloved creeper. 'शकुन्तला-परिगृहीता सा इति तस्याः सन्तोषोत्पादनार्थम् "**अस्याम्**" **इति पूर्व-निर्देशः**। तेन क्रम-प्रक्रम-भङ्गः परिहृतो भवति। 'तय्यत्र चाहमिति संप्रति" इति पठित्वा वा परिहर्तव्यः। अस्मिन् पाठे **यथासंख्यालङ्कारः**'—*R*. **वीत-चिन्तः**—Cf. the idea with 'देवि तरुणी भूता वत्सा राज्यश्रीः। एतदीया गुणवत्तेव क्षणमपि हृदयात् नापयाति मे चिन्ता"—HC. IV. 31. **निक्षेपः**=न्यासः—An **open deposit** without being sealed—(151*n*. 5). **4. अयं जनः**—This phrase is used instead of the 1st Personal Pronoun by a speaker in reference to himself in the 3rd person irrespective of gender and number. *Ku. V*. 40; *Ra. VIII*. 81. **विहरतः**—Shed tears '*Wipe away*'—*M*.

Text :—**काश्यपः—अनसूये, अलं रुदित्वा। ननु भवतीभ्यामेव स्थिरी-कर्तव्या।** (सर्वे परिक्रामन्ति)।

Kāśyapa—Weep not, Anasūyā ; Śakuntalā has indeed to be cheered[1] up by you both. (*All turn round*).

शकुन्तला (विलोक्य)—ताद, एसा उडअ-पज्जन्त-चारिणी गब्भ-भार-मन्थरा मअ-बहू जदा अणघ-प्पसवा होइ, तदा मे कंपि पिअ-णिवेदइत्तिअं विसज्ज-इस्ससि (तात, एषा उटज-पर्यन्त-चारिणी[2] गर्भ-भार-मन्थरा[3] मृग-वधूः यदा अनघ-प्रसवा[4] भवति, तदा मे कमपि प्रिय-निवेदयितारं[5] विसर्जयिष्यसि)।

Śakuntalā (*Looking*)—Father, when this doe, [2]grazing close to the cottage[2] (*and*)[3] slow with the weight of (*her*) young,[3] is safely[4] fawned,[4] (*you*) will send some one as[5] an announcer of the happy news[5] to me.

काश्यपः—वत्से। नेदं विस्मरिष्यामः।

Kāśyapa—This (*I*) will not forget, my child?

शकुन्तला (गति-भङ्गं[6] रूपयित्वा)—(**अम्मो! को णु क्खु एसो णिवसणे मे सज्जइ** (अम्मो! कोनु खल्वेष निवसने मे सज्जते[7])। (इति परावर्तते)।

Śakuntalā (*Representing a break[6] of gait[6]*)—O what, indeed, is clinging[7] to my garment? (*This said, turns round*).

V. L.—'अनसूये प्रियंवदे'–B. 'अनसूये'–R. V. M; B. HS have 'रुदितेन' for 'रुदित्वा'। 'गर्भ-मन्थरा'—R. V. M. S.—'गर्भ-भार-मन्थरा'—B. 'अनघ-प्रसवा'—R. V. K. M. 'सुखप्रसवा'—B. 'विसर्जयिष्यथ'—R. V. M. 'विसर्ज-यिष्यसि'—B. 'विसृज'—S. 'सज्जते'—R. S. 'सज्जति'—M. 'सजति'—B

काश्यप इति। 'अलं रुदित्वा' रोदनेन किम् ['अलं खल्वोः प्रतिषेधयोः प्राचां क्त्वा'—(३।४।१८) इति तुमुन्नर्थे क्त्वा] 'ननु' इति प्रश्ने आक्षेपे वा। **शकुन्तलेति।** 'गर्भ-भारेण' भ्रूण-भारेण इत्यर्थः (गर्भो भ्रूणेऽर्भके कुक्षौ सन्धौ पनसकण्टके' इति मेदिनी) 'मन्थरा मन्दगामिनी अलस-गमना इति यावत् ('मन्द-गामी तु मन्थर' इत्यमरः) अत 'उटजस्य' पर्ण-शालायाः 'पर्यन्तेषु' 'चरति' या तथाभूता। 'अनघः' निर्विघ्नः ('दुःखैनो-व्यसनेष्वघम्' इति रघुटीकायां मल्लिनाथ-धृत-यादव-वचनम्) 'प्रसवः' गर्भ-मोचनम् ('स्यादुत्पादे फले पुष्पे प्रसवो गर्भ-मोचने' इत्यमरः) यस्याः तादृशी। 'भवति' भविष्यति (३।३।१३१) 'तदा मे' मम समीपे 'प्रिय-निवेदयितारं' शुभ-सन्देश-वाहम्। **शकुन्तलेति।** 'गति-भङ्गं' पाद-स्खलनं 'रुपयित्वा' अभिनीय आह इति शेषः। 'परावर्तते' दर्शनार्थं परावृत्य पश्यति।

140n.—1. **अलं रुदित्वा** = **खलु रुदित्वा** = अलं रोदनेन—(43n. 4). **ननु**—Implies query, Are you not to cheer up Śakuntalā? Why do you then weep ? Or, take it in the sense of आक्षेप (*mild censure*) as sanctioned by 'अभिधानचिन्तामणि' of (*H*). Anasūyā has been rightly asked not to weep as she is the **oldest** of the trio. Note that the sage Kāśyapa *generally* **takes notice** of 'अनसूया' and always gives her prominence—(43n. 4). **2. अनघ-&c.**—'अघ'= Mishap, hence 'अनघ-प्रसवा'—One whose delivery has been without trouble. Cf. 'इतो भविष्यति **अनघ-प्रसूतेः** अपत्यसंस्कारमयो विधिस्ते'—*Ra. XIV.* 75 ; 'कच्चित् मृगीणाम् **अनघ-प्रसूतिः**'—*V.* 7. Cf. the idea with 'यः सुप्तवान् मदङ्के शिखण्ड-कण्डूयनो-पलब्ध-सुखः । तं मे जातकलापं प्रेषय शितिकण्ठकं शिखिनम्''—*Vik. IV.* 8 ; **नेदं**—Is emphatic. Cf MR. II. 5. **3. सज्जते**—**Like many old poets** *Kāli.* **usually** uses this root in **आत्मनेपद** ; (112n. 8)

Text :—काश्यपः——वत्से,—

"यस्य त्वया [1]**व्रण-विरोपणमिङ्गुदीनां**
वसन्ततिलका **तैलं न्यषिच्यत**[2] **मुखे कुश-सूचि विद्धे**[3]
(तभजजगग) [4]**श्यामाक—मुष्टि-परिवर्धितको जहाति**[5]
सोऽयं न पुत्र-कृतकः[6] **पदवीं**[7] **मृगस्ते"॥१४॥**

Kāśyapa—My child, that same fawn, the factitious[6] son, upon whose mouth when pricked[3] by the spine of kusa-grass,[3] thou wouldst besprinkle [1]the sore-abating[1] Iṅgudi oil and who was (*tenderly*)[4] reared by thee, with handfuls of Syāmāka grains[4], does not forsake[5] your path.[7] (14)

शकुन्तला—वच्छ, किं सहवास-परिच्चाइणिं मं अणुबन्धेसि। अचिर-प्पसूदो-वरदाए जणणीए विणा विवड्ढिदो एव्व। दाणिम्पि मए विरहिदं तुमं तादो चिन्तयिस्सदि। ता णिउत्तस्स (वत्स, किं सहवास-परित्यागिनीं मामनुबध्नासि। अचिर-प्रसूतो-परतया[1] जनन्या विना विवर्धित[2] एव। इदानीमपि मया विरहितं[3] त्वां तातश्चिन्तयिष्यति। तन्निवर्तस्व[4])। (**इति रुदती प्रस्थिता**)।

Śakuntalā—My fondling, why do you follow me, who am deserting (*your*) company? Deprived of (*your*) dam that[1] died directly after bringing (*you*) forth[1], you indeed were carefully

reared[2] (*by me*). (*So*) even now deprived[3] of me as you are, papa will think of you. Go[4] you back[4] therefore.

(*This said, moves on weeping*).

V. L.—B, HS read 'अनुबध्नासि' for 'अनुसरसि'। 'अचिरप्रसूतोपरतया'—B. P. HS. 'अचिरप्रसूतया'—R. M. V.

यस्येति। 'यस्य कुशानां' 'सूचिभिः' सूचीवत् तीक्ष्णाग्र-देशैः 'विद्धे' -(६।१।१६)-जातव्रणे 'मुखे' 'त्वया' अत्यन्तदयार्द्रया (मातृभूतया इति अर्थान्तरसंक्रमितम्) 'व्रणानां' क्षतानां 'विरोपणं'-(७।३।४३)-विशोषकम् 'इङ्गुदीनां' तापसतरूणां ('इङ्गुदी' तापसतरुः' इत्यमरः) 'तैलं' तत्फल-सम्भवं स्नेहं 'न्यषिच्यत' (८।३।६५)—प्रक्षितमित्यर्थः। 'सोऽयं पुरतो दृश्यमानः 'श्यामाकानां' धान्य-भेदानां 'मुष्टिभिः' ग्रासैः 'परिवर्धितकः' अनुकम्पया यत्नेन सह प्रेषितः ('अनुकम्पायाम्' -(५।३।७३)-इति कः, स्वयं भक्षयितुम् अशक्ताय श्यामाकान् मुष्टौ गृहीत्वा अर्पितवती। ('सोऽयम्' इत्यादिना जन्मन आरभ्य यावत् मृगत्वं प्राप्तः, त्वया एव वर्धित इति ध्वन्यते) अतएव 'पुत्र-कृतकः' (२।१।७२) कृत्रिम-पुत्रः, पुत्रत्वेन अभिमन्यमान इत्यर्थः। 'मृगः ते पदवीं' पन्थानं 'न जहाति। स्नेहवशात् त्वदनुयायी भवति। (**मृगस्वभावोक्तिः**। 'पुत्रकृतक' इति **निरङ्गं केवलरूपकमलङ्कारः**। व्रविरो तको तक इति **छेक-श्रुति-वृत्त्यनुप्रासाः। वसन्ततिलका वृत्तम्**) ॥१४॥ **शकुन्तलेति।** 'सह' 'वास' इति 'सहवासः' (सुप्सुपेति समासः) यद्वा 'सदृशः वास' इति 'सहवासः' (अ-स्वपद-विग्रहः नित्यसमासः। **'सह-शब्दः सदृश-वचनः अस्ति'** इति भट्टोजि.), तं साधु परित्यजति या तां सहवासपरित्यागिनीं ['संपृचाऽनुरुधाऽऽङ्यम्—' इत्यादिना-(३।२।१४२)—इति घिणुन्]। 'अचिरं' सद्यः प्रसूतं यया सा 'अचिरप्रसूता' चासौ 'उपरता' मृता चेति सा तादृश्या 'जनन्या विना विवर्धित एव' इति निश्चये। 'मया' कृतक-जनन्या इति भावः। 'तातः चिन्तयिष्यति' कृतक-मातरि मयि गतायां मत्तोऽपि अधिकः पिता कण्वः त्वाम् अवेक्षिष्यते, तस्मान्निवर्तस्वेति भावः।

141n.—1. व्रण-विरोपणं—'That which causes a scar to cicatrize.' 'ह्' of रुह् optioanlly becomes 'प' when णिच् follows, by 'रुहः पोऽन्यतरस्याम्' (7.3.43). **2. न्यषिच्यत**—'स' of सिच् is replaced by **'ष'** after नि। Vide 'उपसर्गात् सुनोति-सुवति—&c.'—(8. 3. 65) ; and

'प्राक् सिताद्, अड्व्यवायेऽपि' (8.3.63). **परिवर्धितकः**—'परि' here has the sense of 'अतिशयेन'—(252n.2). **श्यामाक** &c.—The grain of a kind of grass of the genus *Panicum*. **3. पुत्र-कृतकः**—One that is tended as a son; a factitious son. '**कृतकः**'='कृत्रिम'–Artificial–(Ku. I.19). (*i*) **कृतकः पुत्रः**=**पुत्र-कृतकः**। '**कृतक**' is placed *last* by '**मयूर-व्यंसकादयश्च**' (2.1.72). Cf. '**व्यंसकः मयूरः**=**मयूर-व्यंसकः**' । **मयूरव्यंसकादि** is '**आकृतिगण**'। 'अविहित-लक्षण स्तत्पुरुषः मयूर-व्यंसकादिषु द्रष्टव्यः'—**Prabhā**) (*ii*) पुत्रस्य कृतम् (भावे क्तः, कार्यमित्यर्थः)=पुत्र-कृतम्। 'पुत्र-कृतम्' इव 'कृतम्' यस्य स 'पुत्र-कृत (कः)'। Read 'सप्तमी-पूर्वस्य च बहुव्रीहि वक्तव्य, **उत्तर-पदस्य** च लोपो वक्तव्यः'–*MBh*. Next 'शेषाद्विभाषा'–(5. 4. 154)–इति **समासान्तः** कप् (*iii*) पुत्रः कृतः इति "पुत्रकृतः"—मह्सूपेति समास.। Next स्वार्थे (कन्), अनुकम्पायां वा कः—*G*. (iv) न पुत्र.=अपुत्रः, अपुत्रः पुत्रः सम्पद्यमानः कृतः=पुत्रकृतः'—(K), 'ई' being **dropped** as in 'निपुण-भूतः' 'पूग-कृत.' 'श्रेणिकृत' by 'श्रेण्यादयः कृतादिभि.'–(2.1.59). Next कन्। According to *Śākaṭāyana* '**श्रेण्यादि**' is '**आकृतिगण**'। Read—(एकौघभूतम्॥ 'श्रेण्यादय. कृतादिभिः" इत्यर्थे कर्मधारयः। "**श्रेण्यादि राकृतिगण**" **इति शाकटायनः**—*MN on ŚPB. III*. 35.) Cf. 'यस्योपान्ते **कृतक-तनयः** कान्तया वर्धितो मे बाल-मन्दार-वृक्षः'—PA & *MD. II*. 15 ;—'**पुत्रीकृतोऽसौ** वृषभ-ध्वजेन' —*Ra. III*. 36 ; *V*. 6; *UC.I* 4; *PA*. *V*. 11. "Tender attachment to natural objects is one of the most pleasing compositions of the Hindus. It is very frequently expressed and perhaps in few places with more beauty than in the drama of Śakuntalā, whereupon departing from the bower of her foster-father, she bids adieu to the plants, she had carefully tended and the orphan fawn she had reared"—**Dr. Wilson**. **4. सहवास**=Company. The word may also be taken as an instance of 'बहुव्रीहि' when it will mean a '*companion*'. Cf. 'सहवसति'–*Śak.II*.3; **पदवीं**–Course, Cf. 'पवन-पदवी'–PA&*MD*. 8. **वि-वर्धितः**–You were *carefully* (वि) brought up by me from your infancy when your own mother died. **मया विरहितं**—(137n. 2); '**चिन्तयिष्यति**—Cf. 'त्वयैव चिन्त्यमानस्य'—Ra,1.64 ; 'मातृभिः चिन्त्यमानाना न हि नो दिवसाः गता.'—UC I. 19. **निवर्तस्व**—Return ; (116n. I) . Ra. II. 31.

Text :—**काश्यपः—वत्से, अलं रुदितेन। स्थिरा[1] भव। इतः पन्थानमालोकय—**

[2]उत्पक्ष्मणो नयनयो रुपरुद्ध-वृत्ति[3]
वसन्ततिलका **बाष्पं कुरु स्थिरतया[4] शिथिलाऽनुबन्धम्।[5]**
(तभजजगग) **अस्मिन्नलक्षित-नतोन्नत-भूमि-भागे[6]**
मार्गे पदानि खलु ते विषमीभवन्ति[7] ॥१५॥

Kāśyapa—My child Away with weeping. Be calm[1]. This way look on the path. By (*means of*) firmness[4], dost thou repress[5] (*Lit.* '*lessen*') the continuity[5] of the tears that[3] clogs the function of[3] (*thy*)[2] upturned-eyelashed eyes[2]. Thy footsteps are, indeed, going[7] uneven[7] upon[6](*thy*) route, the[6] undulations of which have not been noticed (*by thee*)[6]. (15).

शार्ङ्गरवः—भगवन्[8]। ओदकान्तं[9] स्निग्धो जनोऽनुगन्तव्य इति श्रूयते। तदिदं सरस्तीरम्, अत्र नः सन्दिश्य प्रतिगन्तुमर्हसि।

*Ś*ārṅgarava—Almighty[8] Sir ! it is enjoined that a kind friend should be escorted[9] up to the brink of the (*first*) water[9]. This, then, is the border of a lake. So having instructed us here, be pleased to return.

काश्यपः—तेन हि इमां क्षीर-वृक्ष[1]-च्छायामाश्रयामः।
। (इति सर्वे परिक्रम्य स्थिताः)।

Kāśyapa—And so, in this milk-tree-shade[1] (*we*) keep awhile.
(*This said, all turn round and stop*).

V. L,—'वत्से &c.—B. Omitted by others. 'शिथिलानुबन्धम्'—HS. Ś. B. Bh. 'विरतानुबन्धम्'—V. M. 'विहतानुबन्धम्'—M's Mss. R. S. 'ओदकान्तं'—B. HS. M's Mss. 'आदकान्तात्'—M. 'उदकान्तम्—R. V. 'नोदकान्तात्'—S. 'अत्र नः'—B. Others omit 'नः'।

उत्पक्ष्मणोरिति। 'उन्नतानि पक्ष्माणि' नेत्र-लोमानि (**'पक्ष्म** सूत्रादि-सूक्ष्मांशे किञ्जल्के **नेत्र-लोमनि**' इति विश्वः) ययोः स्तयोः 'नयनयोः' विषये 'उपरुद्धा' निवारिता 'वृत्तिः' प्रसरो दर्शन-शक्तिः इति भावः। (सापेक्षत्वेऽपि गमकत्वात् समासः) येन तम्, उपरुद्धोत्पक्ष्म-नयन-वृत्तिमित्यर्थः। 'बाष्पं' नेत्राम्बु 'स्थिरतया' आत्मनः धैर्येण, 'शिथिलः' मन्दीभूतः 'अनुबन्धः' पुनः पुनः उत्पत्तिः यस्य तथाविधं 'कुरु' विधेहि, अन्यथा मुहुः नेत्राम्बु-पातेन दृष्टि-शक्ति-लोपात् गर्भिण्यास्ते महान् अनर्थः स्यात्। तथाहि 'न लक्षितः' अवलोकितः क्वचित्

'नताः' क्वचित् 'उन्नता' अतएव बन्धुरा 'भूमि-भागा' भूप्रदेशा यस्मिन् तादृशे 'मार्गे' पथि 'ते पदानि' पाद-विन्यासाः ('**पादन्यासे** पादमुद्रा सुप्तिङन्ते **पदं** भवेत्' इति क्षीरस्वामी) अविषमाणि विषमाणि भवन्ति इति 'विषमीभवन्ति' उच्चावचेषु निपतन्ति इति भावः। ('खलु' इत्यवधारणे निषेधे वा।) (अत्र यात्रासमयेऽमङ्गल-शब्दोच्चारणमपि नोचितमिति तच्छ्रवणे तस्या आशङ्का भविष्य--तीति **विषम-पदत्वं हेतुत्वेनोक्तम्**। पदार्थ-वाक्यार्थ-रूपयोः **काव्यलिङ्गयोः संसृष्टिः**। प्रधानस्य बाष्प-शैथिल्यस्य समासे गुणीभावात् **विधेयाविमर्ष-दोषः**। स च "बाष्पं स्व-धैर्य-वशतो विनिवारय त्वम्" इति पठित्वा समाधेयः। **छेक-वृत्त्यनुप्रासौ। वसन्ततिलका** वृत्तम्) ॥१५॥ **शार्ङ्गरव इति।** 'उदकस्य' लक्षणया जलाशयस्य 'अन्तः' प्रान्तः इति 'उदकान्तः'। 'आ उदकान्तात्' इति 'ओदकान्तं' जलाशय-प्रान्त मर्यादीकृत्य इत्यर्थः [आङ् मर्यादाऽभिविध्योः'(२।१।१३) इति समासः **पाक्षिकः**)। **काश्यप इति।** क्षीर-प्रधानः वृक्षः इति 'क्षीरवृक्षः' (**उत्तरपद-लोपी** कर्मधारयः) उदुम्बर-वृक्ष (इति जटाधर.)। 'आश्रयामः' ("तथा चोक्तं—नदी-तीरे, गवा गोष्ठे, **क्षीरवृक्षे**, जलाशये। आरामेष्वथ, कूपादौ दृष्ट **बन्धुम् विसर्जयेत्**" ॥)—(मन्देशे **विलम्ब-सम्भवात्त**थात्वे च अनातप-देशाऽऽश्रयस्य आवश्यकत्वात् इति भाव इति सिद्धान्तवागीशपादाः)।

142n.—1. बाष्पं—'अश्रुणः पूर्वावस्था'—(K)—*i.e.*, the first stage of tears; the hot lachrymal moisture that overspreads the eyes, before the tear-drop is formed. **2. शिथिलाऽनुबन्धम्**--is preferred, as the Śloka with this reading has been quoted by **Bhoja** in his 'सरस्वती-कण्ठाभरण'। '**अनुबन्ध**'means 'प्रकृतस्याऽनुवर्तनम्'—(*AK*)—'Follo--wing closely after', hence 'continuity.' **ते पदानि**--Thy foot-steps,. Note the difference in the meaning of 'पदं' here and in 'पदं कारिता' (124n. 2) and in other places. **विषमीभवन्ति**--'स्खलितानि स्युः"—Ś.—"Are liable to trip or stumble". Cf. 'त्यक्त्वा त्वरां, व्रज पदैः स्खलितैरय ते। खेदं गमिष्यसि' &c.—*Rat.* 11. 17. 'विषमपदा पदवी विवर्तनेषु'—*Ki. V.* 40; 'बाष्पवेगं विगृह्यताम्'—*Rām. VI.* 46. 30. '**कण्व**'s exhortation to Śak. for the cessation of weeping is extremely touching and accurate showing Kāli'.s grasp of delineation. **3. भगवन्**—*Vide Com. after IV.* 8. **4. ओदकान्तं**—आ (**ङ्**) + उदकान्तम् (*Com.*). "**ङ्**" is elided the by injunction of *Patañjali*. Cf. '**ईषदर्थे**

क्रिया-योगे मर्यादाऽभिविधौ च यः। एतमातं ङितं विद्यात् वाक्यस्मरणयोरङित्' —*MBh. qtd. SK.* 103; also Cf. 'आङ् इषदर्थे अभिव्याप्तौ सीमार्थे धातुयोगे च'—*AK.* Hence this **'आङ' is different from 'आ' which is 'प्रगृह्य''** by 'निपात एकाज् अनाङ्' (1. 1. 14) ; Cf. 'आ प्रगृह्यः स्मृतौ वाक्ये अनुकम्पायां समुच्चये'—*Medinī.* Thus सन्धि **is not barred** by 'प्लुता प्रगृह्या अचि, नित्यम्'—(6. 1. 125). **5. इति श्रूयते**—This is enjoined in the holy writ. Cf. 'ओदकान्तं प्रियं प्रोथमनुव्रजेत्'—*Qtd. Kramadiśvara* in his 'संक्षिप्तसार-व्याकरण'। 'अतिथिं श्रोत्रियं तृप्तमासीमान्तमनुव्रजेत् &c."—*Y. I.* 113 *and Com. thereon.* 'आयान्तम् अग्रतो गच्छेत् गच्छन्तम् तमनुव्रजेत्'—*Tantra-Sāra*—(निगमकल्पद्रुमः') । "ततश्चोदकाऽन्तिक-निर्वतिता-नुयात्रिक-बन्धु-वर्गः"—*AR.* "आ क्षीरवतो वृक्षादा सलिलाद्वा प्रिये ! प्रियं । यान्तं अनुयायादिति वचनं, तेन त्वमितो निवर्तस्व" ॥ —KM. 451. **6. क्षीर-वृक्षच्छायाम्** Optionally '०च्छायम्' (2.4.25)— According to M supported by जटाधर, 'क्षीरवृक्ष' means the *glomerous fig tree* (*Ficus Glomerata*) only. But according to others it means *five umbrageous trees* (*Ficus Indica, Ficus glomerata, Ficus Riligiosa, Ficus Rumphi and Ficus infectoria*) that exude a resinous milky juice (Cf. 'ये क्षरन्ति सदा क्षीरम्'—*Māhā. Vīśma,* 7) from their barks. Read—"न्यग्रोधो-डुम्बराऽश्वत्थ-पारिश-प्लक्ष-पादपाः। पञ्चैते क्षीरिणो वृक्षास्तेषां त्वक् पञ्च-लक्षणम्" ॥ —*RN.*

Text :—**काश्यपः** (आत्मगतम्) **किं नु खलु तत्रभवतो दुष्यन्तस्य युक्तरूप[1] मस्माभिः सन्देष्टव्यम्।** (इति चिन्तयति)।

Kāśyapa (*Aside*)—What message that would be most[1] [1]appropriate, can indeed be submitted to His Honour Duşyanta? (*This said, reflects.*)

शकुन्तला (जनान्तिकम्)—**हला पेक्ख। णलिणी-पत्तन्तरिदं वि सहअरं अवेक्खन्ती आदुरा चक्कवाई आरडदि। दुक्करं क्खु अहं करेमि।**

(हला प्रेक्षस्व। [2]नलिनी-पत्रान्तरितमपि सहचरम् अपश्यन्ती आतुरा[3] चक्रवाकी आरटति। दुष्करं खल्वहं करोमि)।

Śakuntalā (*Aside to Anasūyā*)—Look (*here*), friend. The female sheldrake, stricken[3] with sorrow[3], not perceiving her

(*dear*) mate, even hid[2] by a [2]lotus-leaf, cries (*aloud*). But I'm doing what's (*most*) difficult to do.

अनसूया—सहि, मा एव्वं मन्तेहि (सखि ! मैवं मन्त्रयस्व) ।

आर्या **एसा वि पिएण विणा गमेइ रअणिं विसाअ-दीहअरं ।**

[12, 18 **गरुअं वि विरह-दुक्खं आसा-बन्धो सहावेदि ॥१६॥**

12, 15] (एषापि प्रियेण विना गमयति रजनीं विषाद-दीर्घतराम्[४]

गुर्वपि विरह-दुःख माशा-बन्ध[५] स्साहयति[६]) ॥

Anasūyā—Say not so, my dear. Even she, forlorn of her beloved, passes away the night, made[4] too long by her grief.[4] The bond[5] of expectation[5] (*of meeting again*), makes the agony of separation, however severe, supportable[6]. (16)

काश्यपः—शार्ङ्गरव ! इति त्वया मद्वचनात्[7] स राजा शकुन्तलाम् पुर-स्कृत्याऽभिधातव्यः ।

Kāśyapa—Śārṅgarava ! after presenting Śakuntalā in front, that king should thus be addressed in[7] my words[7], by you.

शार्ङ्गरवः—आज्ञापयतु ।

Śārṅgarava—Let Your Revered Sir, command.

V. L.—'अपि सहचरम्'—R. V. S. 'प्रियसहचरम्'—M. 'खल्वहं करोमि'—S. 'अहं करोमि–इति'—R. M. V ; M omits 'इति' before 'त्वया मद्वचनात्' । B & HS read 'अभिधातव्य for 'वक्तव्यः' ।

काश्यप इति । अतिशयेन युक्तम् इति 'युक्त-रूपम्' ('प्रशंसायां रूपप्'—५।३।६६ ; २०२१ इति रूपप्) । **शकुन्तलेति** । 'नलिन्याः' एकेन 'पत्रेण' पर्णेन, न तु देश-विप्रकर्षेण, पुनः 'अन्तरितम्' केवलम् आच्छादित-विग्रहं, न तु विनष्टम् । 'आरटति' उच्चैः करुणं रोदिति । एषा तु प्रियजनस्य पत्रान्तरित-व्यवधानमपि सोढु न शक्ता, 'अहं तु' इति भेदे । 'दुष्करं करोमि' एतावतो वासरान् प्रियतमेन भर्त्रा विना बहुदूरं स्थितास्मि, नूनमेतत् प्रमदाजनैः सुदुष्करम् । **एषेति** । 'एषा चक्रवाकी' या अधुना क्षण-कालमपि प्रियेण चक्रवाकेण विना न तिष्ठति सा 'अपि इति अपेरर्थः । 'प्रियेण ' सहचरेण चक्रवाकेण विना विषादेन' विरह-वेदनया' 'दीर्घतराम्' अधिकतर-दीर्घत्वेन प्रतीयमानां 'रजनीं (**जातावेकवचनं**) सर्वा रजनीः इति भावः, 'गमयति' अतिवाहयति । अत एषा चक्रवाक-वधूरपि अतीव दुष्करं करोति इत्याशयः । (पुरा किल पम्पा-सरसी-तीरे सीता-वियोग-विकलं राम-मवलोक्य चक्रवाका **हसन्ति** स्म । रामस्तु तदवलोक्य "ममेव युष्माकमपि

यामिन्यां प्रिया-वियोगो भविष्यति" इति शशाप इति अग्निवेश्य-रामायण-वार्तानुऽसन्धेया)। 'आशा' पुनरपि प्रातः मां संगमयिष्यति इति विश्वासः, स 'एव बन्धः' पतन-निवारणम् इति 'आशाबन्धः', 'गुरु अपि' दुर्वहमपि ('दुर्वहोऽपि गुरुः प्रोक्तः' इति गदसिंहः) 'विरहस्य विरहेण' वा यत् 'दुःखं' तत् विरहिभिः 'साहयति' सहन-योग्यं करोति। **रूपक-श्लेषानु-प्राणितोत्प्रेक्षा। अर्थान्तरन्यासश्च।** 'अत्र **आश्वासाऽलङ्कारः**' इति शङ्करपादाः। **इयं गाथा**) ॥१६॥

143n —1. युक्तरूपम्—(77n. 4). **प्रेक्षस्व**—The following sentence is its object. Śak. means to say that hers is a case worse than that of चक्रवाकी **2. नलिनी-पत्रान्तरितं**—(110n. 2). For a similar idea, Cf. "सरसि नलिनी-पत्रेणापि त्वमावृत-विग्रहां ननु सहचरी दूरे मत्वा विरौषि समुत्सुकः"—*Vik. IV.* 20. **आतुरा**—Cf. 'अस्ति खलु लोकप्रवादः—'नव्यवरः **लज्जातुरो** भवति'-*Māla. V* ; 3. **दुष्करं खल्वहं**–The idea is—The female Cakravāka cannot brook the separation (*from her husband*) caused by the intervention of a *single lotus-leaf*, but just think of my condition. What excruciating pain I have been suffering all the while when separated from my husband for a good length of time and also by a far cry. The **bewailings** of the female Cakravāka may be taken to be a **prognostication of coming evil**. So goes the saying, "*Coming evils cast their shadows before*" Hence the separation of the famale sheldrake from her mate **with its body hidden by a lotus-leaf,** foretells the future separation of Śak. from Duṣyanta **with his mind shrouded** by **Durbāsā's curse.** 'शाप-तिरोहित-दुष्यन्तम् अलप्स्यमाना'—*K*. For **दुष्करम्** &c.—Cf. दुष्करं "खल्वहं करोमि"—*SV. IV*. 'पित्रा मे '**दुष्करंकृतम्**'—*PN. IV*. 12 ; **दुष्करं** कृतवान् रामो हीनो यदनया प्रभुः। धारयति आत्मनो देहं न शोकेनावसीदति'—*Rām. V*.15.53 ; 16.27. 'अति **दुष्कर-कारिणी** खलु अहं या ईदृशमपि आर्यपुत्रं पश्यन्ती अद्यापि जीवितं न पश्यामि"—*NN. V*. '**दुष्करं** बत कुर्वन्ति महतोऽर्थां स्त्यजन्ति ये—*Mahā. Śānti* ;"शशिनं पुनरेति शर्वरी, दयिता द्वन्द्वचरं पतत्रिणम्। इति तौ विरहान्तरक्षमौ कथमत्यन्तगता न मां दहेः"—*Ra. VIII*. 56. M and some other read 'इति' after 'करोमि' and explain 'दुष्करम् अहं करोमि' as the **actual** cry of the

female sheldrake, which Śak. fancies she hears—"Friend, see the poor female Cakravāka * * * calls to him thus—"Hard is the lot I suffer"—*M*. But this, with such a laboured explanation, does **not** seem to be a **good** reading. **4. मा मन्त्रयस्व**—'लुङ्' always comes with 'माङ्' by 'माङि लुङ्' (3. 3. 175). But this 'मा' is different from "माङ्। Read "कथं मा भवतु तस्य पापं, मा भविष्यति इति॥ **'असाधुः एवायम्'**॥ केचिदाहुः अङि द् अपरो मा-शब्दः विद्यते, तस्यायं प्रयोगः"—*VM*. "मा अस्तु, इत्यादौ **निषेधार्थक-मा-शब्दः अन्य एव, ननु माङ**"—*T*. **रजनौं**—रजन्ति अनुरक्ता भवन्ति रागिणः अस्याम् इति रज्+अनि=रजनी। 'क्षिपे किच्च' (उ—२७२) इति चकारात् अनिः। 'कित्वात् न लोपः'(6.4.24)–*BhD*. 'ङीष्'by *GS*–(कृदिकारात् अक्तिनः)'–(4.1. 45). Hence '**ङीष् अभावे रजनिः** अपि'—*BhD*. The idea is–The night in which lovers get pleasure, is made sorrowful in the case of this bird. Cf. "स-व्यापारामहनि न **तथा पीडयेन्मद्वियोगः**। शङ्के रात्रौ गुरुतर शुचं निर्विनोदां सखीं ते"—PA & *MD. II*. 27. 'अविनोद-दीर्घयामा कथं नु रात्रिः गमयितव्या'—*Vik. III*. 4. "विद्यापति कहे क्यायसे गोङायवि हरि विने दिन-रातियाँ"—*Vidyāpati*. Mark that **opposite effect** is produced when the **lovers are together**. 'अविदित-गत-यामा रात्रिरेव व्यरंसीत्' —*UC. I*. 27. 'नीता रात्रिः क्षण इव मया सार्धम् इच्छारते र्या। तामेव उष्णैः विरहमहती मश्रुभि र्यापयन्तीम्'–PA&*MD. II*.28. **6. आशा-बन्धः** &c.– It is the tie of hope for **future** reunion that enables one to some-how assuage one's pangs of separation. Cf. '**आशाबन्धः** कुसुमसदृशं प्रायशो ह्यङ्गनानाम्। सद्यःपाति प्रणयि-हृदयं विप्रयोगे रुणद्धि॥"—PA &(*MD*. 10. *qtd.*)–*K*. 'किन्तु तादृश मनुरागं दृष्ट्वा शक्यम् **आशाबन्धेन** आत्मान धार-यितुम्'—Vik. III ; 'दुराशा-मृगतृष्णिकया कपिञ्जलस्य प्रत्यागमनाकाङ्क्षया च तस्मिन् काले तदेव युक्तं मन्यमाना नोत्सृष्टवती जीवितम्॥ **आशया** हि किमिव न क्रियते'—*Kād. p.* 641 'धन्या खलु चक्रवाकवधूः याऽन्योऽन्यविरहिता न जीवति। न खल्वहं प्राणान् परित्यजामि। आयपुत्र पश्यामीति एतेन मनोरथेन जीवामि मन्दभाग्या'—*SV. III* ; "While **hope prolongs our happier hour,** Or deepest shades that deemly lower, And blacken round our weary way, **Gilds** with a **gle**

of distant day"—**Gray.** 7. साहयति—विरहिभिः' इति शेषः—Makes tolerable ; Conjugation see (19*n*. 3).

Text :—काश्यपः— अस्मान् साधु विचिन्त्य संयम-धनान्[1]उच्चैःकुलञ्चात्मन

शार्दूलविक्रीड़ित स्त्वय्यस्याः कथमप्यबान्धव-कृतां[2]स्नेह-प्रवृत्तिञ्च[3] ताम् ।
(मसजसततग) [4]सामान्य-प्रतिपत्ति-पूर्वकमियं दारेषु दृश्या त्वया
[5]भाग्यायत्तमतः परं न खलु तद्वाच्यं[6]वधू-बन्धुभिः ॥१७॥

Kāśyapa—Having well considered us as rich[1] in self-control,[1] as well as the exalted lineage of yours and the (*well known*) flow[3] of attachment[3] of hers towards you, not[2] in any way brought about by her relatives,[2] she ought to be looked upon by you with[4] equal honor[4] amongst (*your*) wives. Beyond this is [5]dependent on destiny[5], not indeed ought that to be prayed[6] for by a bride's relations. (17)

V. L.—The first line thus occurs in *M's Mss.*—'अस्मान् साधु समीक्ष्य संयम-परान् &c.; Bhoja reads "भाव-प्रवृत्ति" for"स्नेह-प्रवृत्ति" ।

अस्मानिति । 'संयमः' इन्द्रिय-निग्रह एव धनम्' (इव) येषां तादृशान्'अस्मान् मद्विधान् तपस्विनः 'साधु' सम्यक् 'विचिन्त्य' मनसा पर्यालोच्य यतो वयं संयमधना' अतः मोषकाय एव मुषितं वस्तु प्रतिपद्यते इत्यपि सम्यग् विवेचनीयम्, 'आत्मनः' स्वस्य 'उच्चैः' उन्नतं विश्व-विश्रुतम् इत्यर्थः । 'कुलञ्च' पुरुवंशोत्पत्तिञ्च ('साधु विचिन्त्य' इत्यनुषज्यते । तादृश-कुलोत्पन्नस्य अलीक-प्रतारणादि-संभावना नास्ति, अतः शकुन्तलां प्रति यथायोग्यं सत्कारम् अनाचेष्टितं चेत्, तदा त्वदीयेन आचरणेन अमलवंशे कलङ्क-कालिम्नो नवावतारः स्यात् इत्याशयः) ; 'त्वयि' दुष्यन्ते 'अस्याः' शकुन्तलायाः 'कथमपि' केनापि प्रकारेण 'अबान्धव-कृतां' मित्रादीनां प्रयासं विनैव घटिताम् (अनेन प्रेम्नः परावस्था सूचिता) 'ताम्' तपोवने त्वया स्वयमेवाऽनुभूतपूर्वां (अतः यच्छब्दस्य अनपेक्षा) 'स्नेह-प्रवृत्तिं' प्रेम-प्रवाहं ('प्रवृत्तिः वृत्त-वृत्तान्त-प्रवाहेषु प्रवर्तने' इति हैमः) 'साधु विचिन्त्य' (इति पूर्ववत् अनुषज्यते अत्र । तेन कारक-क्रियावोपकम् । 'अस्याः त्वयि' इत्यनेन तव दर्शनमारभ्य प्रतिक्षणोपचीयमान-राग-सागरत्वं ध्वनितम्, अतएव 'तव अस्याम्' इति न उक्तम्— इति राघवपादाः) । तथाभूतस्य नैसर्गिकस्य अर्थात् कुमारी-हृदयान्तरालात् स्वत एव समुत्सृतस्य अनुरागस्य कीदृशं प्रतिदानं युक्तम् इति सम्यग् पर्यालोच्य इति सरलार्थः । 'त्वया' दुष्यन्तेन 'इयं' शकुन्तला 'दारेषु ' गृहीतासु ग्रहीष्यमाणासु च भार्यासु मध्ये 'सामान्या' साधारणी तुल्या इत्यर्थः ('साधारणं तु सामान्यम्' इत्यमरः,)

-या 'प्रतिपत्तिः' गौरवं ('प्रतिपत्तिः प्रवृत्तौ च प्रागल्भ्ये गौरवेऽपि च' इति मेदिनी) -सा 'पूर्वा' यस्मिन् कर्मणि तत् यथा स्यात् तथा 'सामान्य-प्रतिपत्ति-पूर्वम्', तदेव इति 'सामान्य-प्रतिपत्ति-पूर्वकम्" (स्वार्थे कन्-२०७७ ॥ 'यादृशेन गौरवेण अपरा वधूः आलोक्यते तादृशेन' इति शङ्करपादाः) 'दृश्या' **ज्ञातव्या, न तु कर्तव्या**,अस्माकं तत्र नियोगासंभवात्। कुतो विशेष-प्रतिपत्तिः नेष्यते इत्याह **भाग्येति**। 'अतः' अर्थात् सामान्य-प्रतिपत्तेः 'परम्' अधिकं सौभाग्यं महिषीत्वाऽभिषेकादिकं 'भाग्यस्य आयत्तम्' अधीनम्। महादेवी-पदमस्या भवेच्चेद्भवतु नाम, परं 'तत् खलु' निश्चितं 'वध्वाः बन्धुभिः' पित्रादिभिः महाकण्ठेन 'न वाच्यं' न कथनीयम्, यतस्तेन पक्ष- -पातित्व-दोषश्च प्रसज्येत, राज-दाराणामपरेषां स्वजनानां च दुःखं स्यादिति भावः। (अत्र 'मया एतन्न वक्तव्यम्' इति **विशेषे** प्रस्तुते यत् **सामान्य-वचनं** तेन**अप्रस्तुत-प्रशंसा**। खलु हेत्वर्थ स्तेन **काव्यलिङ्गमपि**। एकया 'विचिन्त्य' इति क्रियया सह 'अस्मान्' इत्यादिनां त्रयाणां कर्मतयाभिसम्बन्धात् **तुल्ययोगिता च**। **श्रुति- -वृत्त्यनुप्रासौ**। **शार्दूलविक्रीडितम्** छन्दः) ॥१७॥

144n.—1. अस्मान् **(संयम-धनान्)**—अस्मान् (=माम्) may refer to Kaṇva alone by 'अस्मदोद्वयोश्च'—(1. 2. 59) ; then the attribute 'संयमधानान्' should be taken **predicatively**. Vide (159n.1.), as otherwise the *Vārt.* 'सविशेषणानां प्रतिषेधः'–(818),–will bar-(1.2.59), Cf. 'अहं ब्रवीमि, आवां ब्रुवः,' (वयं ब्रुमः वा)। नेह, पटुरहं ब्रवीमि'–**Prabhā**. 'अत्र मुन्यादि-पद-त्यागेन संयम-धन-पद-ग्रहणम् अङ्गीकाराऽनङ्गीकारयोः भया-नुग्रहौ दर्शयति ॥' —R. 'वयं निर्धना इति नावमन्तव्याः। संयमे धनत्वारोपणेनार्जन-रक्षण-तात्पर्यं व्यज्यते, तेन तत् प्राचुर्यम्, तेन निग्रहनानुग्रह-सामर्थ्यञ्च'–A. [You have married my daughter without my consent and it is but quite natural. that you should be afraid of my latent anger (*II. 7. supra*). But self-controlled as we are, we have taken a proper consideration of the whole affair and have approved your conduct. So considering our power and penances, we hope, you will also properly receive Śak.] Or, You know very well that we are self-controlled (**संयमधनान्**), **(and hence we shall in no case be incensed with fury even if Śak. be not treated properly. But then hard will be the lot of that poor girl. So we hope that considering all these, you will rank her, at least with common honor amongst your wives. 2. उच्चैः**

कुलं-(Ku. V. 64; VI. 75). (साधु विचिन्त्य)—This is necessary, for such thoughts will impell him to **act in a way befitting his noble race.** He acting otherwise, the fame of his exalted race will certainly be sullied. **3. अ-बान्धव-कृतां**—Not forced by the influence of her relatives. This shows the **deep nature** of her love. *Cf. UC. VI.*12. **4. ताम्**–Refers to 'स्नेह-प्रवृत्तिं' (*flow of attachment*) **previously experienced** (अनुभूताम्) by the king in the hermitage ; hence 'यच्छब्द' is not necessary (*Com.*). Cf. 'ते हि नो दिवसा गताः'—*UC. I.* 19. **Bh.** cites this Śloka as an instance of 'वंन्य' and reads **'भाव-प्रवृत्ति'** which **suits the context very nicely**. Read "निर्विकारात्मके चित्ते भावः प्रथम-विक्रिया" । **5. सामान्य** &c.—सामान्य=Equal–'सामान्या प्रतिपत्तिः' (*Honour*–Śak. *VII.*1.) पूर्वा' 'यस्मिन् कर्मणि तत् 'सामान्य'-प्रतिपूर्वं[illegible]हुव्री)। N ext स्वार्थे कन् (127*n.* 1). This **round-about process** is ne[illegible]ry, as otherwise with समासान्त 'कप्' (by "शेषाद् विभाषा"—5. 4. 154), the form will be "सामान्य-**प्रतिपत्ति-पूर्वकम्**" । Read—**'कपि परे अणो ह्रस्वः न स्यात्, कल्याण-पञ्चमीकः पक्षः'**—BD. Now Cf. 'न चास्याम् आयुष्मता **परिजन-सामान्य-दृष्टिना** भवितव्यम्'--*Kād. p.* 395. **6. दारेषु दृश्या**—'दृश+क्यप् ('ऋद् उपधाच्चाक्लृपि-चृतेः'—2859] ; टाप्=दृश्या । दारयन्ति भ्रातॄन्—दृ+णिच्+घञ् ('दारजारौ कर्तरि णिलुक् च'—*Vārt.* 3.3.20]= **दाराः**–Wives are so called as they are supposed to create ill-feeling amongst brothers. (दारयन्ति **भ्रातृभ्यः पतिं पृथक् कारयन्ति**——Raghunātha)—**'दाराक्षत-लाजासूनां बहुत्वञ्च'**। Note that **'दारा'** (**आकारान्त–Fem.**) **is also correct.** 'टाबन्तोऽपि'—BhD ; **"क्रोडा हारा तथा दारा** त्रयऍते यथाक्रमम्। क्रोडे हारे च **दारेषु** शब्दा प्रोक्ताः मनीषिभिः" Qtd, *Vyāḍi, Suvāṅka and Haṭṭacandra, RM, BhD, Bharata* and *Raghunātha*. **अतःपरं** &c–Here **कण्व** tells the reason why he does not demand higher rank or greater honour for Śak. (S). **भाग्या-यत्तम्**——Cf. 'दैवायत्तं कुले जन्म मदायत्तं तु पौरुषम्'—VS, III. 33. **"न खलु—** **"आक्षेपोऽलङ्कारः** * * किमर्थं वयं ब्रूमः इति कैमर्थक्य-परामर्शलोचन-मत्राक्षेपः। अनेन अवश्य-वक्तव्यत्व-लक्षणो विशेषो द्योत्यते। 'निषेधो वक्तुमिष्टस्य यो विशेषाभिधित्सया। वक्ष्यमाणोक्तविषयः स **आक्षेपो** द्विधा **मतः"—A**

Remark.—According to some this is the **Second Best stanza,** instead of 'अभिजनवतः भर्तुः &c.—Śl. 19. *Infra.*

Text:—शार्ङ्गरवः—गृहीतोऽयं सन्देशः।

Śārṅgarava—This message has been (*well*) received.

काश्यपः—(शकुन्तलां विलोक्य)—**वत्से! त्वमिदानीं मनुशासनीया[1]सि। [2]वनौकसोऽपि सन्तो लौकिकज्ञा[3] वयम्।**

Kāśyapa (*Looking at Śakuntalā*)—And, now (*my*) daughter, thou[1] hast to be instructed[1]. Though dwelling[2] in the woods[2], we (*are*) acquainted[3] with worldly affairs.[3]

शार्ङ्गरवः—भगवन्! न खलु कश्चिदविषयो[4] नाम धीमताम्[5]।

Śārṅgarava—Almighty Sir, nothing, indeed, can possibly be outside[4] the ken[4] of the talented.[5]

काश्यपः—सा त्वामितः पति-कुलं प्राप्य[1]—

[2]शुश्रूषस्व गुरून्, कुरु प्रिय-सखी-वृत्तिं सपत्नी-जने,[3]
शार्दूलविक्रीडित **भर्तुर्विप्रकृतापि[4] रोषणतया[5] मास्म प्रतीपं[6] गमः**
(मसजसततग) **भूयिष्ठं भव दक्षिणा[7] परिजने, भोगेष्वनुत्सेकिनी[8]**
यान्त्येवं गृहिणी-पदं युवतयो, वामाः[9] कुलस्याधयः[10] ॥१८॥
कथं वा गौतमी मन्यते?

Kāśyapa—Having reached[1] (*thy*) husband's house from here,—(*Thou*) shouldst (*always*) serve[2] (*thy*) superiors; (*and*) act the part of a darling friend unto (*thy*) fellow-bride.[3] Even if insulted[4] thou shouldst never, out of ire[5], show a refractory[6] spirit[6] *against thy* husband[4]. Be vastly courteous[7] towards(*thy*) attendants, (*and*) not [8]puffed up with vanity[8] in enjoyments. In this way do young women attain the position of house-wives, (*while*) the perverse[9] (*are*) the pests[10] of the race. (18)

Or, how does Gautamī think (*of this advice*) ?

V. L.—'शकुन्तलां विलोक्य', & 'भगवन्'—B. Omitted by others, 'वृत्तिम्'—R. V. M. S. 'वृत्तम्—D. Ś. B. 'भोगेषु'—B. HS Bh. Ś. KS. 'भाग्येषु'—R. V. M. C.

शार्ङ्गरव इति। 'सन्देशः' संवाद (इति शब्दरत्नावली)। **काश्यप इति।** 'अनुशासनीया' गार्हस्थ्य-विषये उपदेशनीया। 'लौकिकज्ञा' अर्थात् गृहस्थ-लोक-समाजाऽऽचारज्ञा (जानातेः कः)। **शार्ङ्गरव इति।** 'खलु' इत्यवधारणे।

'धीमतां' बुद्धिमतां 'कश्चित् अविषयः' अगोचरः अज्ञात इत्यर्थः ('विषयो गोचरे देशे तथा जनपदेऽपि च' इति मेदिनी। तथाचोक्तम् भारते,—"पशुः पश्यति गन्धेन, बुद्धया पश्यन्ति पण्डिता" इति)। 'नाम' इति सम्भावनायाम्। शुश्रुषस्वेति। 'गुरून्' श्वश्रू-श्वशुर-प्रभृतीन् पूजनीयान् सर्वान् 'शुश्रुषस्व' (१।३।५७) सादरं परिचर्यां कुरु ('वरिवस्या तु शुश्रूषा परिचर्या उपासना' इत्यमरः) 'सपत्नी' (४।३।७५) एव 'जनः' तस्मिन् (यद्वा 'सपत्नीनां जने' समूहे) 'प्रियायाः सख्याः वृत्ति' व्यवहारं 'कुरु', ताभिः सह कलहं मा कार्षीः इति भावः। 'विप्रकृता' स्वामिना निकृता अवमानिता इति यावत् ('निकृतः स्यात् विप्रकृतः' इत्यमरः) 'अपि रोषणतया' कोपवशात् 'भर्तुः', पत्युः 'प्रतीपं' प्रतिकूलम् (इति हेमचन्द्रः) 'मास्म गमः' मा याहि ("मास्म मा वारणे" इत्यमरः। 'स्मोत्तरे लङ् च' (३।३।१७६) इति लुङ्) 'परिजने' नियत-सन्निधिवर्ति-परिचारके (इति आनन्दलहरी-श्लोक व्याख्यायां श्रीगोपी-रमण-तर्क-पञ्चाननाः। जातावेकवचनम्) 'भूयिष्ठम्' बहुलं यथा स्यात् तथा 'दक्षिणा' उदारा अनुकूला इति यावत् ['दक्षिणे सरलोदारौ" इत्यमरः] अर्थात् सापराधेऽपि क्षान्ता निरपराधेऽपि प्रसन्ना 'भव'। 'भोगेषु' समृद्धिषु 'अनुत्सेकिनी' अदृप्ता 'भव' [तथाचोक्तम् वात्स्यायनेन—'भोगेषु अनुत्सेक' इति) 'एवम्' अनेन आचरणेन 'युवतयः' ('युनस्तिः' ४।१।७७; ५३१) 'गृहिण्याः' गृह-लक्ष्म्याः 'पदम्' स्थानम् (शब्दम् इति शङ्करपादाः'), यद्वा 'गृहिणीति 'पदम्' अधिकारम् ('गृहिणी स्त्रियाम्। भार्यायाञ्च गृह-कार्य-कुशलायाम्' इति शब्दाब्धिः) 'यान्ति' प्राप्नुवन्ति। 'वामा' यौवन-जनित-गर्वेण प्रतीपाः प्रतिकूलाचारिण्य इत्यर्थः ('वामं धने, पुंसि हरे, कामदेवे पयोधरे। वल्गु-प्रतीप-सव्येषु त्रिषु, नार्यां स्त्रियाम्' इति मेदिनी) 'कुलस्य' वंशस्य 'आधयः' पीड़ाः ('बन्धकं व्यसनं चेतः पीड़ाऽधिष्ठानम् आधयः' इत्यमरः) व्याधय इव क्लेश-दायिन्यः भवन्ति। अत उक्तरूप-विपरीता मा भूरिति भावः। (अत्र 'गृहिणीपदं यान्तीति' साधर्म्येण, 'वामा' इत्यादि वैधर्म्येण अर्थान्तरन्यासोऽलङ्कारः। विषमालङ्कारश्च। कार्य-भूतेन आधिना सह कारण-भूताया वामाया अभेदेन अभिधानात् हेतुनामालङ्कारश्च। रूपकानुप्रासौ। अत्र उपविष्ट नामा नाट्यालङ्कार उपक्षिप्तः। 'उपविष्टं मनोहारि वाक्यं शास्त्रानुसारतः' इति तल्लक्षणात्॥ शार्दूलविक्रीड़ितं वृत्तम्। सिद्धान्तवागीश-मते 'अत्र अन्यस्य वृत्तिं कथमन्यः करोतीति वस्तु-सम्बन्धोऽसम्भवन् प्रियसखी-वृत्तिवत् वृत्तिमिति सादृश्याक्षेपाद-सम्भवद्-वस्तुसम्बन्धा निदर्शना') ॥१८॥

145n.—1. वनौकसोऽपि &c.—(132n. 6; Rām. II 99. 42). 'वयम्' refers to *Kanva* hence here also the attribute 'कौशिकमाः'

should be taken *predicatively*. (144n. 1). **अविषयः**—Not a province of comprehension. 2. **शुश्रूषस्व**—*Vide*(*Atmp.*) by "ज्ञा-श्रु-स्मृ-दृशां सनः' (1. 3. 57; 2231). Cf. "श्वश्रू-श्वशूर-शुश्रुषापि च ते वर्तयितव्या"—PN.I; "**गुरुषु, भृत्य-वर्गेषु, नायक-भगिनीषु तत्पतिषु, च यथार्हं प्रतिपत्तिः**"—*KS. III.* 1. 5; गुरु-शुश्रूषणे रताः'—*Rām. VI.* 3. 65. 3. **सपत्नी** &c.— समानः पतिः यासां ताः सपत्न्यः। Ordinarily 'पति' at the **final** of a compound *optionally* takes the augment नुम्' and 'ङीप्' in the feminine ["णत्वपक्षे 'ऋन्नेभ्यो'—३०६ इति ङीप्"—*BM*] by 'विभाषा-सपूर्वस्य—4. 1. 34; 491. Thus 'स्थूलपतिः' 'स्थूलपत्नी' &c. But '**नित्यं सपत्न्यादिषु**'—(4. 1. 33) bars the previous one and makes 'ङीप्' and 'नुम्' **compulsory**; and 'समान' becomes 'स' by **निपातन**। "सपत्न्यादिषु **नित्यं** पत्युः **न-कारादेशः** भवति, ङीप्, तु लभ्यते एव। पूर्वेण विकल्पे प्राप्ते वचनम्'—*VM* '**समानस्य स-भावोऽपि निपात्यते**'—*SK*. "तस्य च निपातनादेव नित्यं स-भाव इति भावः"—*BM*, The word is very significant, as Śak. will have lots of co-wives. The king himself has admitted this fact. (III. 17, supra). **कुरु** &c.—Cf. '**आगतां चैनां (सपत्नीं) भगिनीकावलोकेत**'—KS. III. 2. 5; 54; 4. **विप्रकृता**—(129*n*.5.). 5. **रोषणतया**—रुष्+शीलार्थक युच् कर्तरि=रोषणा, तस्याः भावः रोषणता—Anger, तया। 6. प्रतीपं—प्रतिगता आपः यस्मिन् तत् —Against the current *i.e.* in a refractory way. NC. 1. 6. समासान्त 'अ' by 'ऋक्-पूर्-अव्-धूः -पथामानक्षे'—(5. 4. 72.). Next (अप्"=ईप्'; 'द्व्यन्तरुपसर्गेभ्यः अप ईत्'—6. 3. 97). Cf."प्रतीप-पवनादि-वैकृतं"—*Ra. XI.* 62, 58, For 'लुङ्' with 'मास्म'—See (*Com*). .Cf. 'आक्रुष्टापि न चाक्रोशेत् ताड़ितापि प्रसीदति'—*Sk. Kanda Purāṇa.* '**न चोपालभेत वामतां च न दर्शयेत्**'—KS. III. 2. 68. 7. '**भोगेषु**' has the **weighty support of Bhoja corroborated by Kāma-Sūtra.** Read—'**श्वश्रु-श्वशुर-परिचर्या**' ।३७। ('**भोगेषु अनुत्सेकः**) ।३९। '**परिजने दाक्षिण्यम्** ।४०'—KS. Besides '**भोग**' is the *direct* cause of pride (उत्सेक), while '**भाग्य**' (**R**) **may be ill or well.** [Cf. 'पुरोहितः— **सा निन्दन्ती** स्वानि **भाग्यानि** बाला'—Śak. *V.* 30.] So it is **well rejected.** 8. **अनुत्सेकिनी**—Not puffed up with (*pride and haughtiness*—*AD*). Cf. अनुत्सेकः को लक्ष्याम्'—*NŚ*. 63; Also *KS*

above. युवतयः-(Vide 67*n*.2.). 9. वामाः—टुवम् (उद्गीरणे)। वमति स्नेहम् इति वम्+ण कर्तरि ('ज्वल्-इति-कस्-अन्तेभ्यः' 3. 1. 140; or, घञ् by 3. 3. 19)=वामः। Next स्त्रियाम् आप्, 'वामा'। Or, 'वामः' कामः अस्ति अस्या इति वामा मत्वर्थे अच् by 'अर्श आदिभ्यः अच्'—(5. 2. 127). It means either (*i*) 'women in general,' or (*ii*) 'one acting in a refractory way (प्रतीपा) [*Com.*], Similarly आधि—means either (*i*) 'a curse or bane'=(पीड़ा), or (*ii*) 'main-stay'=(अधिष्ठान) (*Com.*) Hence the last line may be construed differently thus 'एवं युवतयः वामाः (नार्यः) कुलस्य आधयः (भूत्वा, कालेन) गृहिणी-पदं यान्ति'। In this way young women followiug this advice become the main-stay of their family (*and in course of time*) attain &c. पदं='शब्दम्'=Title—S. 'प्रतिष्ठाम्'—C. (Vide n. 2.)

Remark—The advice (Note **its striking similarity with the advice of Kāma-Sūtra, (n. 9.)** also with "मूर्धानं पत्युरारोह, प्रजया च विराड् भव, सम्राज्ञी श्वशुरे भव, सम्राज्ञी श्वश्रू भव, ननन्दरि सम्राज्ञी भव, सम्राज्ञी अधि देवृषु पत्नीनां च देवृणाम् सजातानां विराड् भव"—Śruti,). embodied in this Śloka is the noblest of its kind that can ever be given to young women on the eve of their entering into the family of their husbands and it is considered to be one of the **best** four ślokas. The first half of it is quoted by *VK* in (*SD*· *Ch. VI*) as an illustration of उपदिष्ट (*Com.*).

Text :—**गोतमी—एत्तिओ क्खु वहू-जणस्स उवदेसो। जादे, एदं क्खु सव्वं ओधारेहि** (एतावान् खलु वधू-जनस्योपदेशः। जाते! एतत् खलु सर्वमवधारय[1])।

Gautamī—Such indeed (*is*) the bride's motto. My child ! to all this, indeed, you'll pay[1] heed.

काश्यपः—वत्से। एहि परिष्वजस्व[2] मां सखीजनञ्च।

Kāśyapa—Come, my child, embrace[2] me and (*thy*) friends.

शकुन्तला—ताद! इदो एव्व किं पिअसहीओ णिवत्तिस्सन्ति (तात, इत एव किं प्रियसख्यौ निवर्तिष्येते[3])।

Śakuntalā—Father, is it even from here that (*my*) dear friends will turn[3] back ?

काश्यपः—वत्से ! इमे अपि प्रदेये। तन्न युक्त मनयोस्तत्र गन्तुम्। त्वया सह गौतमी यास्यति।

Kāśyapa—They too, my child! have to be given away. So it is not meet for them to go there. With thee, Gautamī will go.

शकुन्तला (पितरमाश्लिष्य)—**कहं दाणिं तादस्स अङ्कादो परिब्भट्ठा मलय-तटोन्मूलिआ चन्दन-लदा विअ देसन्तरे जीविअं धारइस्सं** (कथमिदानीं तातस्य अङ्कात्[3] परिभ्रष्टा[4] मलय-तटोन्मूलिता चन्दन-लतेव देशान्तरे जीवितं धारयिष्यामि)। (इति रोदिति)।

Śakuntalā (*Clasping her father*)—How now, removed[4] from (*my*) sire's lap[3] like a sandal-plant, uprooted from the slopes of the Malaya (*Malbar hills*), shall I be able to support life in a foreign soil ? (*This said, she weeps*).

V. L.—'प्रियसख्यौ'—B. 'प्रियंवदानुसूये सख्यौ'—S. 'प्रियंवदामिश्राः सख्यः'—R. V. M. 'एहि'—B. Omitted by others.

शकुन्तलेति। 'निवर्तिष्येते' आश्रमं प्रत्यावर्त्स्यतः ('वृद्भ्यः स्य-सनोः' (१।३।९२)—इत्यात्मनेपदम् **पाक्षिकम्**)। **काश्यप इति।** 'प्रदेये' पात्रसात् कर्तव्ये। तस्मादेव अनूढयोः तयोः निःसम्पर्के स्थाने गमनमयुक्तम् इति भावः। **शकुन्तलेति।** 'अङ्कात्' क्रोड़ात् 'परिभ्रष्टा' विच्युता वियुक्ता इति यावत्। 'मलयस्य' तदाख्यस्य अद्रेः 'तटात्' रोधसः। 'चन्दनस्य लता' शाखा (व्रततिश्च लता ख्याता, 'लता शाखा च शाखिनाम्' इति शाश्वतः) अत्र लक्षणया चन्दन-वृक्षक इत्याशयः। स 'इव' देशान्तरे (७५४) अन्यदेशे, शकुन्तलापक्षे भर्तृगृहे। (**'महानन्यन्तरं यत्र तद्देशान्तरम्' इति** स्मृतिः)।

146n.—1. अवधारय—'Treasure up in thy heart,' 'ponder well'—*M*. **2. प्रदेये**—For the force of 'प्र', Cf. 'सकृत् कन्या प्र-दीयते'—*Manu.* Mark also how skilfully the two friends are debarred from going, as their accompanying Śak. will **interfere with** the imprecation of Durbāsāh. **3. गन्तुम्**—गम्+तुम् by (अर्हार्थोपपदे) ('शक-धृष-ज्ञा-ग्ला-घट-रस-लभ-क्रम-सहार्हाऽस्त्यर्थेषु तुमुन्'—(3. 4. 65); **गमनमित्यर्थः। युक्तम्**—(46n. 3). **4. मलय-तट** &c.—'चन्दन-लता' by 'लक्षणा' means a *delicate* sandal-plant, "The Candana (*Gr. Santalon,—Sirium Myrtifolium*) is a large kind of myrtle with

pointed leaves. Now vide (246n. 5): 'तट'(B)—is preferable to 'तरु', for 'तट' is synonymous with उत्सङ्ग (the slope of a hill) and a child is supposed to be on the lap of its parent. Cf. 'मलयाद्रे उपत्यका'—Ṛs. IV. 46 ; 'उत्सङ्गे वृद्धानाम्'—Vik. V. 9.

Text :—काश्यपः—वत्से, किमेव कातरासि—

अभिजनवतो¹ भर्तुः श्लाघ्ये²स्थिता गृहिणी-पदे

हरिणी **विभवः—गुरुभिः³ कृत्यैः स्तस्य प्रतिक्षणमाकुला⁴ ।**

(नसमरसलग) **तनयमचिरात् प्राचीवार्कं प्रसूय च पावनं⁵**

मम विरहजां न त्वं वत्से ! शुचं⁶ गणयिष्यसि ॥१९॥

। (शकुन्तला पितुः पादयोः पतति) ।

Kāśyapa—My child, why art thou so troubled ? Stationed in the honourable[2] position of the house-wife to a high-pedigreed[1] husband (*and*) at every moment distracted[4] with his affairs, [5]important by reason of excessive wealth[3] ; and having erelong brought forth a hallowed[5] son as the east (*gives birth to the holy*) sun, thou wilt not, my child, take account of the pangs[6] of separation from me. (19). (*Śakuntalā falls at the feet of her father*).

काश्यपः—वत्से ! यदिच्छामि तदस्तु ते ।

Kāśyapa—My child let that be, what, (*I*) wish thee.

V. L.—B reads 'कृत्यैरस्य' for 'कृत्यैस्तस्य' ।

अभिजनेति । हे 'वत्से' त्वम् प्रशस्तः अभिजनः कुलम् ('अभिजनः कुले ख्यातो जन्मभूम्यां कुलध्वजे' इति विश्वः । 'भूम-निन्दा-प्रशंसासु नित्ययोगेऽतिशायने । संसर्गेऽस्ति-विवक्षायां भवन्ति मतुबादयः'—(वाः-१८९५), इति **प्रशंसायां** मतुप् । मस्य वत्वम्–८।२।९) 'भर्तुः' दुष्यन्तस्य 'श्लाघ्ये' स्पृहणीये, सर्वोत्कृष्टेइत्यर्थः, तादृशः–प्रेम्तानुमितत्वात् । 'गृहिणीपदे' गृहिणी-स्थाने, अथवा गृहिणी-लक्षणा-धिकारे 'स्थिता' सती 'तस्य भर्तुः सकल-जगद्भरण-शीलस्य स्वामिनः 'विभवैः' धनैः सम्पद्भिरिति यावत् ('विभवो धन-निवृत्योः' इति हैमः) 'गुरूणि' महान्ति । तादृशैः 'कृत्यैः' कार्यैः 'प्रतिक्षणं' (कृत्यानां बहुत्वात्) 'आकुला' व्यग्रा (कृत्यानां विभिन्नत्वात् इति भावः । 'स्वगृह-कार्य-सहस्र-निमग्ना विगलित-वेद्यान्तरा भविष्यसि' इति राघवपादाः) 'अचिरात्' शीघ्रं गर्भिणीत्वात् 'प्राची', पूर्वदिक् 'पावनं' पवित्रता-जनकम् 'अर्कम् इव' सूर्यमिव ("पवित्रता-कारणाय तस्मै शुद्धात्मने नमः" इति विष्णुपुराणोक्तेः) 'पावनं' पुण्यम् अर्क-सदृशं, जगद्भीयमानं

(तन्नाम-ग्रहणेन अन्येऽपि पावना भवन्ति इत्याशयः) 'तनयं' पुत्रं 'प्रसूय' उत्पाद्य 'च' (इति समुच्चये)। तस्मिन् तनये ममत्वा-पहृत-चित्ता सती इति भावः। 'मम विरहजां' वियोग-निमित्त-भूतां (सापेक्षत्वेऽपि गमकत्वात् समासः) 'शुचं' (३।३।१०८) शोकं 'न गणयिष्यसि' निरन्तरमेव विविध-कार्येषु अभिनिविष्ट-मानसत्वात् पितुश्चिन्तायां ते अवसरः न भविष्यति इति हृदयम्। चतुर्थ-चरणार्थं प्रति पूर्वोक्तत्रयं हेतुत्वेन योज्यम्। उपमा-समुच्चय-काव्यलिङ्ग-श्रुति-वृत्त्यनुप्रासाः। अनेन संग्रह-लक्षणमङ्गमुपक्षिप्तम्। तल्लक्षणं तु—'साम-दानार्थसंयोगः संग्रह परिकीर्तितः' इति। हरिणी वृत्तम्) ॥१९॥

147n.—1. **अभिजनवतः**—अभि जायते अस्मिन् इति अभि+जन्+घञ् अधिकरणे ('हलश्च'—3. 3. 121) or अभिजन्यतेः कर्मणि। घञ् (३।३।१९) 'णि-लोपस्य स्थानिवत्त्वात्, 'जनिवध्योश्च', (६।३।३५) इति निषेधाद्वा वृद्धि नं'—BhD. वृद्धि **being barred,** the form is 'अभिजन'। (*Now Com.*) =High-pedigreed ; or अथवा 'अभिजन-पदेन तदुत्पन्न-जना लक्ष्यन्ते। तद्वतः तद्बहु जनवतः अभितः समन्ततो जनवतः स्वजनवत इति वा'—R. One who possesses good many a person around him, hence the duties of a house-wife of such a person, who is to support a large family, must certainly be very great. *BhD* also in one place, gives a similar derivation of 'अभिजन' (Cf. *Rām. V.* 16. 5). So she is likely to be *busied with the income and expenses* of the family, *reception of the guests and multifarious other aflairs.* Cf. Draupadī's speech to 'सत्यभामा'—'सर्वं राज्ञः समुदयमायं च व्ययमेव च। एवाहं वेद्मि कल्याणि * * * सुखं सर्वं परित्यज्य रात्र्यहानि घटामि वै"—Mahā. **2.** **प्राचीवार्क**—'अर्क' is from 'अर्च्' 'to worship'. Hence the idea is—As the sun is known and worshipped by all people, so also will your son be world-renowned and worshipped. Besides just as 'प्राची'is not stript of darkness before the rising of the sun, so also Duṣyanta's **darkness due to curse** shrouding his memory **will not be removed** until a sun-like son is born unto him (व्यङ्ग्यः अर्थः), **3.** **पावनं**—Suggests that Śak, in spite of her co-wives, will have her son installed as a king, for the kings like fire are always pure (18*n*. 2.). Not only he himself will be pure but people uttering his

name will also be purified. **4. गणयिष्यसि** &c.—Bespeaks Kaṇva's wonderful knowledge of human nature and psychology. Though a veritable recluse of the forest, he knows very well that girls on the eve of their departure from their father's house, become exceedingly sad and think that they wont be able to live separated from their parents ; but these surmises have no foundations at all and what actually occurs is quite opposite to this. In their husband's house they hardly find any time to think of them. 5. **यदिच्छामि** &c.—Cf. 'यथाहमिच्छामि तवास्तु तथा'—*Mahā. Karṇa,* 71.40. The sage by virtue of his power of 'तपस्या' was aware of Durbāsā's curse, future repudiation of Śak. and her ultimate union with her husband (Vide. "मारीच-**तपः प्रभावात् प्रत्यक्षं सर्वमेव तत्रभवतः**"—Act. VII. infa). 'but he was a 'मुनि' (Cf. 'दुःखेषु अनुद्विग्न-मना स्सुखेषु विगतःस्पृहः । वीतराग-भय-क्रोधः स्थितधी र्मुनि रुच्यते' (Gītā, II 56), so he remained totally unperturbed and only prayed (**इच्छामि**) to the almighty so that the **love for flesh** of the couple might be transformed into **commingling** of souls (Vide. Introduction).

Remark—This is the third **best** śloka.

Text :—**शकुन्तला** (सख्यावुपेत्य) **हला, दुवे वि मं एव्व परिस्सजह** (हला, द्वे अपि मां समसेव[1] परिष्वजेथाम्[2]) ।

Śakuntala (*Going up to her friends*)—Dear, even both of you hug[2] me synchronously[1].

सख्यौ (**तथा कृत्वा**)—**सहि, जइ णाम सो राएसि पच्चहिण्णाण-मन्थरो भवे, तदो से इमं अत्त-णामहेअङ्किअं अंगुलिअअं दंसेहि** (सखि, यदि नाम सराजर्षिः प्रत्यभिज्ञान-मन्थरो[1] भवेत्, तदा तस्मै इदम् आत्म-नामधेयाऽङ्कितमंगुली यकं दर्शय)।

Friends (*Doing so*)—If perchance, my friend, that royal-sage be slow[1] to recognize[1] (*you*) then show him this ring, marked with (*his*) own name.

शकुन्तला—इमिणा संदेहेण वो आकम्पिद म्हि (अनेन सन्देहेन[1] वाम् [2]आकम्पितास्मि) ।

Śakuntalā—(*I*) shudder[2] at this misgivings[1] of you two.

सख्यौ—सहि ! मा भाआहि। अतिसिणेहो पावसङ्की (सखि ! मा विभीहि। अतिस्नेहः पापशङ्की[1])

Friends—Don't fear, my friend! Excessive affection (*is*) apt[1] to suspect evil.[1]

शार्ङ्गरव (विलोक्य)—**युगान्तरमारूढः सविता[1]। त्वरता भत्रभवती।**

Śārṅgarava (*Looking*)—The sun[1] has ascended another division (*of the sky*). Please make haste.

शकुन्तला (भुयः पितरमाश्लिष्य आश्रमाभिमुखीभूय च)— **ताद, कदा णु क्खु भुओ तवोवणं पेक्खिस्सं** (तात, कदा नु खलु भूयस्तपोवनं प्रेक्षिष्ये)।

Śakuntalā (*Again clasping her father and facing the hermitage*). —Father, when shall (*I*) see the penance-grove again ?

V. L.—'राजर्षिः'—B. Others have 'राजा'। 'सन्देहेन'—R. M. 'सन्देशेन'—B. V. 'अतिस्नेहः'—Taylor Mss. M. K. 'स्नेहः'—B. V. R.; B reads 'पापमाशङ्कते' for 'पापशङ्की'। 'युगान्तरमारूढः'—C. R. M. V. 'दूरमधिरूढः'—B. 'युगान्तमधिरूढः—Mackenzie Mss. 'गगनान्तरमधिरूढः' —Che'zy.

सख्याविति। 'यदि नाम' इति सम्भावनायाम्। 'प्रत्यभिज्ञाने' इयम् एव मया परिणीता शकुन्तला इति संस्मरणे 'मन्थरः' शिथिलः असमर्थः इति यावत्। 'तस्मै' तं दुष्यन्तं बोधयितुम् इत्यर्थः ("क्रियार्थोपपदस्य च कर्मणि स्थानिन" इति ४र्थी) अनेन **रूप**-लक्षणमङ्गमुपक्षिप्तम्—'"**रूपं** वितर्कवत् वाक्यम्" इति दशरूपक-लक्षणात्। 'आकम्पितास्मि' इत्यनेन "**संभ्रम**"—लक्षणमङ्गम्। "शङ्का-त्रासौ च **संभ्रम**" इति तल्लक्षणात्। "पापशङ्की" इत्यादिना **अधिबल**-लक्षणम् अङ्गम्। "कपटे नाप्तिसंधानं ज्ञेयं **चाधिबलं** बुधैः" इति तल्लक्षणात्। **शार्ङ्गरव इति—** अन्यत् युगं 'युगान्तरं' यामान्तरम्' (इति चन्द्रशेखर-पादाः) द्वितीय-प्रहरम् इत्यर्थः।

148n.—1. परिष्वजेथाम्—Cf. 'तद्गाढं परिष्वजस्व माम्''—*PC. IV.* **प्रत्यभिज्ञान** &c.—प्रत्यभिज्ञान=Recollecton (स्मृति)+Direct perception (अनुभूति)। Cf. 'प्रत्यभिज्ञान-रत्नं च रामाय दर्शयेत् कृती'—*Ra.XII.* 64 (25*n.* 3.) Though the curse incident was not divulged, yet the friends warned Śak. by a clever insinuation about the signet ring; as ill luck would have it, Śak. did not comprehend the full significance of the warning. **2. अतिस्नेह** &c.—Cf. 'प्रेमः पश्यति

भयान्यपदेऽपि'—*Ki. IX.* 70, *qtd. Ś.* 'स्वगृहोद्यानेऽपि स्निग्धे पापं विशङ्कयते स्नेहात्'—*NN. V. I* ; 'पापशङ्की च मे मनः—*Râm. IV.* 9. 16 ; 'तथापि स्नेहः प्रलापयति'—*MK. IV.*;'अतिस्नेह—परिष्वङ्गात्'—*Ram IV.* 1.116. 3. मा बिभीहि–(143*n*.4.–O-F.–बिभिहि) । 4. युगान्तरम् - According to C, 'युग' is equivalent to 'प्रहर' or 'याम' *i.e.* a division of the day comprising one-eighth of the sun's diurnal revolution or three hours." Hence the time is just past nine and may extened up to 12 midday. 'The sun is in mid-heaven'–'Ryder. *R* observes "युगान्तरम् हस्त-चतुस्कावधि । 'युगं हस्त-चतुष्केऽपि" इति विश्वः (also मेदिनी) *i.e.*, The sun makes an angle with the horizon from an apparent height of 4 cubits. *Dr. Boethlingk* translates—"The sun has already entered the afternoon quarter (?) of the heaven".

Text :—काश्यपः—श्रूयताम्—

"भूत्वा चिराय चतुरन्त-मही-सपत्नी[1]

वसन्ततिलका दौष्यन्तिमप्रतिरथं तनयं निवेश्य[2]

(तभजजगग) भर्त्रा तदर्पित-कुटुम्ब-भरेण[3] सार्धं

शान्ते करिष्यसि पदं पुनराश्रमेऽस्मिन्" ॥२०॥

Kāśyapa—Listen—

Having for a long time lived as a fellow-bride of the earth[1], bounded by the four[1] (*oceans, or cardinal points, and*) having settled[2] (*in marriage or placed on the throne*) Dauṣyanti, without a rival (*or with car unchecked,*) (*thou*) wilt again set foot in this tranquil hermitage along with (*your*) consort, by[3] whom the burthen of the kindred (*on thy side*), shall have been (*first*) transferred[3] to him. (20)

V. L.—The Bengali edition reads this Śloka thus—*"सदिगन्त-मही सपत्नी, * * प्रसूय। तत्संनिवेशित-धुरेण सहैव भर्त्रा, * शान्त्यै *" ॥

भूत्वेति। 'चिराय' दीर्घकालम् (इति हेमचन्द्रः) व्याप्य, 'चत्वारः' चतुरर्णवाः (विशेषणेनैव विशेष्य-प्रतिपत्तिः) ते 'अन्तः' प्रान्तः सीमा इति यावत् ('अन्तः स्वरूपे निकटे प्रान्ते निश्चय-नाशयोः' इति हेमचन्द्रः) यस्याः तादृशी या 'मही' विपुला पृथ्वी तस्याः 'सपत्नी' प्रतिद्वन्द्विनी 'भूत्वा'। (अनेन पत्युः सार्वभौमत्वं, दम्पत्योः सुदीर्घमायुश्च सूचितम्) अविद्यमानः 'प्रतिरथः' विपक्षः प्रतिद्वन्द्वी इति

यावत् यस्य सः। यद्वा 'प्रतिहतः रथः' यस्य स 'प्रतिरथः', न तादृशः। एवंविधं 'तनयं दौष्यन्ति' (४।१।९५) दुष्यन्तस्य अपत्यं 'निवेश्य' विवाह्य (इति रघोरेकादशे मल्लिनाथपादाः। तथा च हैमः—'निवेशः सैन्य-विन्यासे न्यासे रङ्ग—विवाहयोः' इति) 'तस्मिन्' पुत्रे 'अर्पितः' न्यस्तः 'कुटुम्बानां' पोष्य-वर्गाणां ('कुटुम्बं पोष्य-वर्गे च' इति अमरमाला) 'भरः' भरणं पालनभार इत्यर्थः येन, तादृशेन 'भर्त्रा' पत्या दुष्यन्तेन 'सार्धं' सह, न पुनर्वैधव्यात् एकाकिनी इत्याशयः। 'शान्ते' (७।२।२७) शम-रस-प्रधाने 'अस्मिन् आश्रमे पुनः पदं' स्थितिं वसतिं 'करिष्यसि' वार्धके पुत्राय राज्यं प्रदाय अत्रागत्य वानप्रस्थधर्मं ग्रहीष्यसि इत्याशयः। (अत्र तस्यां मही-सपत्नीत्वं, तस्यां तन्निवेशनम्, तस्मिंश्च कुटुम्ब-भरण-निवेशनम् इति **माला-दीपकम्।** सपत्नी इत्यनेन मह्यामपि पत्नीत्वारोपः व्यज्यते इति वस्तुना **रूपकालङ्कार-ध्वनिः। वसन्ततिलका** वृत्तम्) ॥२०॥

149n.—1. **चिराय**—The modern *philologists* opine that the अव्ययs were originally **declinable words** as will be evident from the following forms still in vogue—**चिरम्**–(Ra.III.35) ; **चिरेण**-(Ra. V. 64) ; **चिराय** (Ra. XIV. 59) ; **चिरात्**—(Ra. III. 26 ; Śak. V. 18) ; **चिरस्य** —(AK. & H. ; Śak. V. 15) ; **चिरे** (७मी) —RM. "**चिरे** कुर्यात्'—Śatapatha Brāhmaṇa. 'अन्तरम्' (२या), 'अन्तरेण' (३या) 'कृते', 'अर्थे', 'स्थाने' (७मी) ; 'साक्षात्' (५मी) &c. 2 . **मही-सपत्नी**—The earth is frequently considered to be a 'सपत्नी' by our poet. Cf. "रत्नाऽनुविद्धार्णव-मेखलायाः दिशः **सपत्नी** भव दक्षिणस्याः—" *Ra. VII.* 63. **चतुरन्त** &c.—Śak. III. 17 ; Ra. II. 1 ; "चतुरन्तां महीं भुक्त्वा"—Rām. II. 104. 12, 3. **दौष्यन्तिम्**—*Trikāndaśeṣa* has '**दौष्मन्तिम्**'–(B). Vide Mahā. Droṇa,. 681. This **indirect reference** is necessary, as an issue cannot be named until 'it is born'. 4. **अप्रतिरथं**—'One who has no rival'. रथः=(रथ+अर्शआदि अच्)=(रथिकः) i.e. रथी ; or one with car unchecked'. — Roby Datta, (*Com.*) 5. **निवेश्य**—"नि+विश्+णिच् 'may mean (*i*) 'To **paint**'. Cf. 'चित्रे निवेश्य—**Śak.** *II.* 19. *Māla* ; *III.* 11. (*ii*) '*to* **encamp**" (*as an army*)—*Ra. XV.* 42 ; *XVI.* 37. (*iii*) "*to* **install on the throne**[1] Cf. 'स निवेश्य कुशावत्यां रिपुनागाङ्कुशं कुशम्'—*Ra. XV.* 97 ; (*iv*) "to **get oneself married**".—Cf. 'तान्निवेश्य

चतुरोपि तत्र सः"—*Ra. XI.* 57. (Com.) Commenting on 'अहञ्चाप्यनिविष्टो वै भीमसेनश्च पाण्डवः। पार्थेन विजिता चैषा रत्नभूता सुता तव'—*Mahā. Ch.* 195, 24, *Nilakanṭha* remarks **'अनिविष्टः अकृतः-विवाहः'** । Here the fourth sense is approved by the Commentator *K*, while *R* prefers the third one, but as the idea **of installation can be inferred from** 'तदर्पित-कुटुम्ब-भरेण', the fourth sense seems to be preferable. **6. भर्त्रा तदर्पित– कुटुम्ब**—&c.—Cf. 'तदुपहित-कुटुम्बः'—*Ra. VII.* 71. (248n. 1.) A house-holder is to retire to a hermitage to observe 'वानप्रस्थ' **with or without his wife** in his old age. Only when his son is quite capable of taking the charge of the dependent Kinsmen. Cf. 'पुत्रेषु भार्यां निक्षिप्य वनं गच्छेत् सहैव वा'—*GP*. 'वानप्रस्थाश्रमं गच्छेत् सदारः साग्निरेव च। निक्षिप्य भार्यां पुत्रेषु गच्छेत् वनमथापि वा'—*KP*; *MS. VI.* 23; 206. "सत्यभामा तथैवान्या देव्यः कृष्णस्य संमताः। वनं प्रविविशुः राजन् तापस्ये कृतनिश्चयाः ॥"—*Mahā. Mauṣal. VII.* 74. This was invariably the practice with the kings of इक्ष्वाकु *Dynasty. Cf.* "सोऽभिषिच्यर्षभः पुत्रं भरतं पृथिवीपतिः। वानप्रस्थाश्रमं गत्वा तपस्तेपे यथाविधि"—*KP. Ch.* 39, 39. "अहमपि सुतावद्य विन्यस्य राज्यम् विचरित-मृग-यूथान्याश्रयिष्ये वनानि"—*Vik. V.* 17; *Ra. I.* 8; *III.* 70; *VII.* 71; *XIX I. Vap. Ch.* 33. 52-53;—(124*n.* 2). **पदं करिष्यसि** (Set foot)—Cf. "स्तनद्वयेस्मिन् हरिचन्दनास्पदे। **पदं**-चिता-भस्म-रजः **करिष्यति**"—*Ku. V.* 69.

Remark—According to some this is the Fourth **best** Śloka instead of Śl. 21.

Text :—**गौतमी—जादे, परिहीयदि दे गमण-वेला। ता णिवत्तेहि पिदरं। अहवा चिरेण वि पुणो एसा मन्तइस्सदि। ता णिवत्तेदु भवं** (जातेः, परिहीयते[1] ते गमन-वेला। तन्निवर्तय पितरम्। अथवाचिरेणापि पुनः पुनः, एषा एवं मन्त्रयिष्यते। तन्निवर्ततां भवान्)।

Gautami—My child, the time for thy departure is (*fast*) passing[1] away. So make (*thy*) father return. Or, (*since*) even for a long time she will go on speaking like this again and again, let Your Honour return.

काश्यपः—**वत्से, उपरुध्यते**[1] **मे तपोऽनुष्ठानम्।** Kāśyapa—The prosecution of my penance is being interrupted[2] (*by detention*).

शकुन्तला (भूयः पितरमाश्लिष्य) —**तव-च्चरण-किसं ताद-सरीरं। ता मा अदिमेत्तं मम किदे उक्कण्ठिदुं** (तप-श्चरण-कृशं तात-शरीरम्। तन्मा अतिमात्रं मम कृते उत्कण्ठस्व)।

Śakuntalā (*Clasping her father again*) -(*My*) father's body is (*already*) emaciated by penitential exercises, so do not allow thyself to sorrow too much on my account.

काश्यपः— (निश्वस्य) —

आर्या [12, 18 12, 15]
शममेष्यति मम शोकः कथं नु वत्से ! त्वया रचित-पूर्वम्।
उटज-द्वारि विरूढं[1] **नीवार-बलिं विलोकयतः ॥२१॥**
गच्छ। **[2]शिवास्ते सन्तु पन्थानः।**

(निष्क्रान्ता शकुन्तला सहयायिनश्च)।

Kāśyapa (*Sighing*)—How possibly, my child, will the grief of me, beholding the offering of Nivāra, formerly made by thee, (*now*) germinating[1] at the cottage-door, ever go to assuagment ?
(21) Go, speeding[2] to thee, be thy ways.

(*Exeunt Śakuntalā and the escorts*).

सख्यौ (शकुन्तलां चिरं विलोक्य, सकरुणम्) —**हद्धी ! हद्धी ! अन्तरिदा सउन्दला वण-राईहिं** (हा धिक् ! हा धिक् ! अन्तरिता शकुन्तला वन-राजिभिः)।

Friends (*Gazing long at Śakuntalā, piteously*)—Alas ! alas ! lost (*is*) Śakuntalā in the row of woods

V. L.—'ते गमनवेला'—B Others omit 'ते'। 'तन्निवर्तय'—B. Others simply 'निवर्तय'। 'मे तपोऽनुष्ठानम्'—B Others omit 'मे'। 'उत्कण्ठस्व'—M. 'उत्कण्ठितुम्'- R. V. B: M and Colebrooke Mss. read 'नरित-पूर्वम्' for 'रचित-पूर्वम्'। ०'द्वार-विरूढम्'—R. B. M ०'द्वारि विरूढम्'—V. 'अन्तरिता'—B HS 'अन्तर्हिता'—R. V. M.

गौतमीति। 'परिहीयते' ईदृशालोचनेन क्षीयते (जहातेः कर्मकर्तरि लट्)। शकुन्तला-कर्तृक स्वेच्छया निवर्तनमसम्भाव्यमाशङ्क्य आह 'अथवा' इति पक्षान्तरे **शकुन्तलेति।** 'तपस चरणेन अनवरत-तपोऽनुष्ठान-कार्येण कृश क्षीणम् ('अनुप-सर्गात् फुल्ल-क्षीव-कृशोल्लाघाः'—(८।२।५५)—इति का.)। 'मा उत्कण्ठस्व

('मा'-योगे लोट्। तथाचोक्तम् तत्त्वबोधिन्यां—"मा अस्तु', इत्यादौ निषेधार्थक-मा-शब्दः अन्य एव, न तु माङ्) । **शममिति**। अयि 'वत्से! त्वया 'पूर्वं' पक्षि-पशूनां भक्षणार्थं 'रचितम्' इति 'रचितपूर्वम्' (सुप्सुपेति समासः। 'भूत-पूर्व'-वत् क्तान्त-शब्दस्य पूर्व-निपातः पाक्षिकः—६५०) 'उटजस्य' पर्णशालायाः 'द्वारि' एव न तु अन्यत्र। 'विरूढम्' इदानीम् अङ्कुरितं ('विरूढस्तु सञ्जाताऽङ्कुरितेऽन्यवत्' इति विश्वः) 'नीवारस्य' (३।३।४८) धान्य-भेदस्य 'बलिम्' उपहारं ('बलि र्दैत्यप्रभेदे च कर-चामरदण्डयोः। उपहारे पुमान् स्त्री तु जड़या श्लथचर्मणि' इति मेदिनी) 'विलोकयतः' द्वारि स्थितत्वात् सततमेव पश्यतः 'मम' काश्यपस्य ('बाल्यात् आरभ्य त्वत्कृतपरिपालनस्य इति अर्थान्तर-संक्रान्तत्वम् इति राघवपादाः) एवंभूतस्य 'शोकः' तद्विरह्-निबन्धन-विषादः 'कथं नु महता कष्टेनैव ("ज्ञात-हेतु-विवक्षाया मप्यादि कथमव्ययम्। कथमादि तथाप्यन्तं यत्न-गौरव-बाढयोः" इत्युत्पलमाला) 'शमं' शान्तिम् 'एष्यति' प्राप्स्यतीति भावः। (अत्र नीवार-वलि-विलोकनमेव शोकाऽनपगमनं प्रति हेतुरिति पदार्थ-हेतुकं काव्यलिङ्गम्। तदनुप्राणिता चार्थापत्तिः इत्युभयोरङ्गाङ्गि-भावेन सङ्करः। आर्या जातिः) ॥२१॥

सख्याविति। वनानां राजिभिः' श्रेणीभिः 'अन्तरम्' अन्तर्धिम् ('अन्तरमवकाशाऽवधि परिधानाऽन्तर्धि-भेद-तादर्थ्ये' इत्यमरः) तदस्याः संजातम् इति 'अन्तरिता' (तारकादिभ्य इतच्—४ ५।२।३६) तिरोहिता, अदर्शनीया संवृत्ता इत्यर्थः।

150n,.—1 परिहीयते—'परि-हा' means '*to leave*', hence here '*to pass away*'. Cf. 'विभावरी परिहीणा'—*BK. XIII.* 1. 'उर्वशी न किमपि परिहीयते'—*Vik.III*; *MS. XIII.92.* (4*n.* 1).). **2. उपरुध्यते मे तपोऽनुष्ठानम्**—'सङ्कटा ह्याहिताग्नीनां प्रत्यवायैः गृहस्थता'—*UC*. 1. 8. '**उपरुध्यते (मे)** आश्रम-वास-धर्मः'—*Vik. V.* This quotation from **Vik. proves the genuineness of ('मे'**—B). **मम कृते**—(139n.1). **उत्कण्ठितुम्** —Allmost all (except M) reads this. But Infinitive (तुमुन्) with **'मा'** can be justified **only** with the help of the rules of **Vedic Grammar**. We have often noticed Kāli.'s fancy for **Vedic uses**. So according to some this is the **genuine** reading. **'रुणद्धि** रोदसी कीर्त्या **स्वधर्ममनुरुध्यते'**—KR. 253 **3. शममेष्यति** &c.—**An extremely *pathetic* stanza. It is considered to be one of the four best ślokas. Kāśyapa is so deeply moved that he is about to shed tears but perhaps considering that act to be inauspicious (Cf.**

'गुरु-शोका: कथमपि मा रुदन् माङ्गलिक्य:'—*BK*. 1. 27), he somehow checks them, and his latent tears of grief are made patent by a deep sigh. (निश्वस्य) । 4. उटज-द्वारि—(Ra. 1. 50.) is significant. Because the grains will germinate at the entrance of the cottage. so these will always remind him of Śak. M opines that **'नीवार-बलि'** has a reference to 'भूतयज्ञ' (*MS. IV.* 21 ; *III.* 80-87, 90, 92. 117, 121). 'बलि' therein is a **cooked food** ('प्रहुतोभौतिक: बलि:'—*MS. VI.* 74). But *germination is not possible from cooked rice*. Better take it to refer to rice-grains which are *usually* thrown by hermit-girls as *a present* [*i. e. ford* ; बलि:= उपहार) to the beasts and birds.] Cf. बलिपुष्ट=बलिभुज्—crow). Those that might escape being partaken of, will naturally germinate. Cf. 'यासां बलि: सपदि मद्गृह-देहलीनां, हंसैश्च सारस-गणैश्च विलुप्त-पूर्व: । तास्वेव पूर्व-बलि-रूढ़-यवाङ्कुरासु वीजाञ्जलि: पतति कीटमुखा-वलीढ:''—*Cārudatta* 1. 2. 'आकीर्णमृषीपत्नीनाम् उटजद्वार-रोधिभि: । अपत्यैरिव नीवार-भागधेयोचितै: मृगै:' ।—*Ra. I.* 50 ; *MK. I.* 9 ; *JH. V.* 3.

Remark :—According to *HS*, Śloka (21) contains **'समाप्त-पुनरात्तता-दोष'** (vide 48*n*. 7) in the first line, as 'शममेष्यति मे शोक: कथम्' seems to be a *complete sentence*. Read—"इत्यनेन वाक्य-समाप्तावपि पुनस्तदन्तर्गतस्य 'मम' इत्यस्य विशेषणतया 'त्वया रचितपूर्वम्' इत्यारभ्य द्वितीयार्धस्य पुनरात्तत्वात् समाप्त-पुनरात्तता-दोष: । स च "निर्वर्तिष्यते शोक:" इति प्रथम चरण-पाठेन, 'नीवारबलिं पश्यतो मे' इति चतुर्थ-चरण-पाठेन च समाधेय: । तादृश-पाठे तु 'मे' इति विशेष्यस्यापि पुनरात्तत्वात् नोक्त-दोष: । समाप्त-वाक्यान्तर्गतस्य कस्यचिद्विशेषणतयैव पुनरुपादाने तद्दोषाङ्गीकारात्''—*HS*.

Text :—**काश्यप:** (सनि:श्वासम्) **—अनसूये ! गतवती वां सह-चारिणी' । निगृह्य शोकम् अनुगच्छ माम्** । (सर्वे प्रस्थिता:) ।

Kāśyapa (*With a sigh*)—Anasūyā, gone is your companion[1]. (*So*) moderate (*your*) grief, and follow me. (*All start to go*).

उभे—ताद, सउन्दला-विरहिदं सुण्णं विअ तवोवणं पविसामो ।

(तात, शकुन्तला-विरहितं शून्यमिव तपोवनं प्रविशाम: ।)

Both—Father, (*we*) enter the penance-grove, empty as it were, being shorn of Śakuntalā.

काश्यपः—स्नेह-प्रवृत्तिरेवंदर्शिनी । (सविमर्शं परिक्रम्य) **हन्त भोः। शकुन्तलां पति-कुलं विसृज्य लब्ध मिदानीं स्वास्थ्यम्[1] । कुतः—**

इन्द्रवज्रा **[2]अर्थो हि कन्या परकीय[3] एव, तामद्य संप्रेष्य परिग्रहीतुः[4] ।**

(ततजगग) **जातो ममायं विशदः[5]प्रकामं [6]प्रत्यर्पित-न्यास[6] इवान्तरात्मा ॥२२॥**

॥ (निष्क्रान्ताः सर्वे) ॥

Kāśyapa—The course of affection views (*it*) thus. (*Pensively walking round*) Ha ! ho ! Śakuntalā being sent to (*her*) husband's home, (*natural*) serenity[1] of mind has been achieved now. For—Verily a daughter (*is*) another's[3] property[2]. Having sent her today to (*her*) husband[4], this inward soul of mine has become quite [5]clear like [6]one who has rendered a deposit[6] (*to its owner*). (22)

(*Exeunt Omnes*)

॥ चतुर्थोऽङ्कः ॥

(*End of the Fourth Act*).

V. L.—'सहधर्म-चारिणी'—R. M ; 'सहचरी'—P. B. HS. 'सहचारिणी'—S. Patankar. 'माम् अनुगच्छतम्'—B, 'अनुगच्छ माम्'—V. 'अनुगच्छतं मां प्रस्थितम्'—R. M. 'तपोवनम्'—B. V. 'तपोवनम् कथम्'—R. M ; B has 'जातोऽस्मि सद्योविशदान्तरात्मा चिरस्य निक्षेपमिवार्पयित्वा' for the last half of Śl. 22.

काश्यप इति। 'सहचारिणी' सहचरी। 'प्रस्थिताः' चलितुमारब्धाः ('आदिकर्मणि क्तः कर्तरि च'—३।४।७२)। (**'सहधर्मचारिणी' इत्यपपाठः**)। **काश्यप इति।** 'हन्त' इति हर्षे। (**'हन्तेति हर्षे** विषादेऽनुकम्पायां वाक्यारम्भे च' इति तत्त्वबोधिनी) क्लेश-विशेषस्य अत्ययात् हर्षः। 'इदानीम् अनेन इयन्तं कालं शकुन्तलाया रक्षण-संस्कार-विनयाधानादिना व्याकुलत्व व्यज्यते॥ स्वस्थस्य भावः 'स्वास्थ्यम्' सन्तोषम् (इति हेमचन्द्रः), निरुद्वेगत्वम् इत्यर्थः। तत्कारणमाह कुत इति। **काश्यप इति।** 'कन्या' 'परस्य अयम्' 'परकीयः' अन्य-स्वामिकः 'एव हि' इति निश्चये। 'अर्थः' धनम् (यावत् कन्या पित्रालय तिष्ठति तावत् पिता तां न्यस्तं धनमिव सयत्नं रक्षति इति भावः। अतः अवश्य-सम्प्रदानीयत्वेन उपदेशात् अन्यदीयत्वस्य भावित्वेऽपि भूतवत् उपचारेण कन्या-सामान्यस्य परकीयत्वोक्तिः॥ "अत्र **एव-शब्दस्य** स्थितौ पुनः **हि-शब्दस्य** उपादानेऽपि,

'**यः कौमारहरः स एव हि वरः**' इति शब्द-द्वयेनैव अत्यन्ता-वधारण-सूचनात् न **निरर्थकत्व-दोषः**—"इति सिद्धान्तवागीशपादाः") अतः 'ताम्' तादृशीं परधन-भूतां कन्याम् 'अद्य परिग्रहीतुः' स्वामिनः सम्बन्धे (इति सम्बन्ध-मात्र-विवक्षया षष्ठी, यद्वा 'समीपम्' इत्यध्याहारेण व्याख्येयम्) 'सम्प्रेष्य' प्रेरयित्वा ('**स्थितस्य**'. **अनेन असमान-कर्तृकत्व-दोषः निरस्तः**) "मम अयम् अन्तरात्मा' चित्त 'प्रत्यर्पितः' पुनरर्पितः 'न्यासः' निक्षेपः, न्यस्त धनमिति भाव । ('आहितं निहितं न्यस्तमारोपितमिति स्मृतम्' इति हलायुधः) येन, तादृशः 'इव' (**इत्युत्प्रेक्षा**) 'प्रकामम्' अत्यन्त ('कामं प्रकामं पर्याप्तं निकामेष्टं यथेप्सितम्' इत्यमरः) 'विशदः' विमलः (इति हेमचन्द्रः) चिन्ता-निर्मुक्त. इत्यर्थः 'जातः' (इदमे**वोत्प्रेक्षायां** न्यासेन सह साधर्म्यं ज्ञेयम् । **इन्द्रवज्रा** वृत्तम्) ॥२२॥

॥इति गौतम-श्रीरमेन्द्रमोहन वसु-विरचितायामभिज्ञान-शकुन्तल-टीकायां कुमार-सन्तोषिण्यां चतुर्थोऽङ्कःसमाप्तः ॥

151n.—1. सह-चारिणी—Companion [Cf. 'सङ्गीत-**सह-चारिणी**'—*Māla.* I. '**तत्सह-चारिणीभिः** तया वा सखी ते हृता'—*Act VI Infra.*] **Reject 'सह-धर्मचारिणी'—which always means 'wife'.** Cf 'मारीच.—इय तपस्विनी **सह-धर्मचारिणी**'—*after Śl.* 31. *Act VII*: 'इदानीं **सह-धर्मचारिणी**' प्रति'—&c. Ibid. before Śl. 31. 'तस्य **सह-धर्मचारिणीं**—*Ra. XIX.* 55. 'प्रतिगृह्यताम् **सह-धर्मचारणीय**'—*Act V.* **Infra** 'ननु **सह-धर्मचारिणी** खल्वहम्'—*PN. I. II*; "सहधर्मचारिणी"—**BC.** III. 61 '**सह-धर्मचारणी** त्व प्राणेभ्योऽपि गरीयसी—*Rām. III.* 10. 21. *VIII.* 29. 51; **सहचरी—**(B) is also a **favourite** word with *Kāli.* Cf. 'अह रथाङ्गनामेव प्रिया **सहचरीव** "मे"—Māla. I. 9; 'तत्रभवत्या. **सहचर्या** एतया भवितव्यम'—*VIK. II*: **सहचरी**—दु.खालीढ़'—*Ibid. IV.* & *II.* 3.; 'पृथुलोचना **सहचरी**' -*Ibid.* '**सहचरीं** दूरे मत्वा'—*Ibid. IV.* 33. So it is not easy to find out the genuine reading. **सनिःश्वासम्** &c.—Mark that the sentiment of pathos (**करुण-रस**) which is the prevailing sentiment of this Act, begins with the entrance of Kāśyapa and it *reaches its climax* here and *ends* with "* * शून्यमिव तपोवन प्रविशामि" ।
2. स्नेह-प्रवृत्तिः—प्रवृत्तिः=प्रवाहः—Flow—'प्रवृत्ति. कथिता वृत्तौ प्रवाहो-

दन्तयोरपि' इति विश्वः। 8. परकीयः—परस्य अयम् इति पर+छ ('गहादिभ्यश्च'—४।२।१३८) =परकीयः। 'कुक्' by the GS. 'कुक् जनस्य परस्य च'–(4. 2. 138). 4. एव हि—The two together emphatically imply 'certainty', or, take 'हि' as expressive of 'हेतु'। 'संप्रेष्य' has its कर्त्ता (अहम्) understood, while 'जातः' has a different Nominative (अन्तरात्मा)। So there is no 'एक-कर्तृकत्व'। Now read (68n. end). 5. प्रत्यर्पित-न्यासः—न्यासः (*Rām. VI.* 127. 54. "नन्दिग्राम-गतस्तस्य राज्यं न्यासमिवाभुनक्" *Ra. XII.* 18.)=A *deposit* ; "पुमान् उपनिधि न्यासः प्रतिदानं तदर्पणम्"। To keep ur another's deposit is a very difficult task, and perfect ease cannot be had until it has been returned in toto to its owner. Śak, was also, as it were, a property held in trust (न्यासः) to Kaṇva, (Cf. 'विटः—काणेली-मातः, वसन्तसेना तव हस्ते न्यासः'—*MK. VIII*. "निर्यातयैनमुर्वशी-हस्ते न्यासमिति"—*VIK. V.*) and now that she has been sent back to her husband Duṣyanta, he is feeling perfect satisfaction. Now contrast the crude and queer idea of young 'बाणभट्ट', regarding the marriage of one's daughter He **disapproves** the practice of sending to the house of an unknown person, their daughters, born of the body of their parents and caressed on their laps :—"केनापि कृता धर्म्या नाभिमता मे स्थितिरियं यदङ्ग-सम्भूता-न्यङ्क-लालितानि अपरित्यज्यानि अपत्यकानि अकाण्डे एव आगत्यासंस्तुतैः नीयन्ते"—"HC. IV. 31. Read the while passage.

Remark.—For a similar idea : Cf. "सुखमर्थो भवेत् दातुं सुखं प्राणाः, सुखं तपः। सुखमन्यद् भवेत् सर्वं, दुःखं न्यासस्य रक्षणम्"॥—*SV. I.* 10. Our poet here through the mouth of Kāśyapa, gives vent to his *own view* about the proper nurturing of girls. According to him. until betrothal, a daughter seems to be looked upon with keener affection and greater attention than a male issue.

Time-analysis of Act IV :—About three weeks' interval separates the विष्कम्भक of this Act from the third. In the interim the Gāndharva marriage has been performed and Śak, has duly

conceived. The prelude begins a bit late in the morning, when Anasūyā and Priyaṁvadā are culling flowers for worship, and the king has left the hermitage on that very day early in the morning. "अद्य स राजर्षिः इष्टिं परिसमाप्य" &c.; "अद्य पुनः हृदयेनासन्निहिता" । The month is probably the later part of ज्येष्ठ, or the first part of Āṣāḍha. The *Act proper* beings early in the morning ['हन्त प्रभातम्' ।। 'अन्तर्हिते शशिनि' ।। 'प्रतिबुद्धापि किं करिष्यामि') and the time is somewhere near the *full-moon* day when the moon and the sun are **synchronously** visible ['तेजोद्वयस्य युगपत् व्यसनोदयाभ्याम्'] । A *long time* intervenes between the main scene and the prelude ['एतावतः कालस्य लेखमात्रमपि' &c.; 'दुष्करमहं करोमि'] । Śak. has shown *visible sign of pregnancy* ('दुष्यन्त-परिणीताम् आपन्नसत्त्वाम्'), and hence it must be *at least* **five months** after the Gāndharva marriage. *According* to PP, Śak, is now in the *seventh* month of her pregnancy. (124*n*. 4). Hence the rainy season is past ("अपसृत-पाण्डु-पत्रा") and the main scene commences in autumnal morning ("हन्तप्रभातम्"–P318 "उपस्थितां होमवेलाम्"—P.325 प्रतिबुद्धापि"—P.362 "स्नानोत्तीर्णः काश्यपः"=P.351 'प्रवृत्तनृत्यं बर्हिणाम्'—*ṚS. II.* 6; 'परित्यक्तनर्तना मयूराः' *Act.IV*.12 ;' शिरसि बकुल-मालाम्'—*ṚS. II*.14; 'कालान्तर-क्षमा केशरमालिका'—*Act. IV* P.336 ; 'चारुकमलावृतभूमिभागः'—*ṚS. IV*. 3 ; 'रम्यान्तरः कमलिनी-हरितैः सरोभिः'—*Act. IV*. 11. ; 'स्फुटकुमुद-वितानाम्'—*ṚS. IV*. 21 ; 'सैव कुमुद्वती मे'—Act. IV.3). On the *very day* of the commencement of the main scene, Śak. is sent to her husband's place by Kāśyapa who had arrived from his sojourn *on the previous night*. ('तत्रभवता प्रवासादुपावृत्तेन काश्यपेन'; 'अद्यैव ऋषिप्रतिरक्षितां त्वां भर्तुः सकाशं विसर्जयामि') । The Act ends sometime between 9 A. M. and 12 noon (शार्ङ्गरवः—युगान्तरमारूढः सविता) ।

पञ्चमोऽङ्कः

Text :—(ततः प्रविशत्यासनस्थो राजा विदूषको विभवतश्च परिवारः[१]। नेपथ्ये वीणा-शब्दः) **विदूषकः (कर्णं दत्त्वा)—भो वअस्स ! सङ्गीद-सालब्भन्तरे अवहाणं देहि ! ताल-लय-विसुद्धाए वीणाय सर-संजोओ सुणीअदि । जाणे तत्तहोदी हंसवदिआ वण्ण-परिअअं करेदि त्ति ।** [भो वयस्य ! सङ्गीत-शालाऽभ्यन्तरे अवधानं[२] देहि । ताल-लय-विशुद्धायाः[३] वीणायाः स्वर-संयोगः[४] श्रूयते । जाने तत्रभवती हंसपदिका वर्ण-परिचयं करोतीति) ॥

(*Enter on a seat the King. The Jester and attendants*[1] *according to position. In the tiring room, the sound of a lyre*).

Vidūṣaka (*Leaning his ear*) :—Ho friend ! (*please*) pay[2] heed to[2] the interior of the music-saloon. A [4]combination of notes[4] of lyre, perfectly[3] faultless with reference to (*musical*) timing and concord[3], is being heard. Methinks Her Ladyship Haṁsa-padikā is practising (*her*) notes.

राजा—तूष्णीं भव । यावदाकर्णयामि ।

King—Hush, that (I) may listen.

(आकाशे गीयते)—

अपरवक्त्र **अहिणव-महु-लोलुवो तुमं तह परिचुम्बिअ चूअ-मञ्जरिं ।**
[ननरलग ११३ **कमल-वसइ-मेत्त-णिव्वुदो महुअर विसुमरिदोसि णं कहं ॥१॥**
नजजर २।४]

(अभिनव-मधु-लोलुप[१] स्त्वं तथा परिचुम्ब्य चूत-मञ्जरीम्[२]।
[३]कमल-वसति-मात्र-निर्वृतो मधुकर ! विस्मृतोऽस्येनां कथम्) ॥

(*In the air is sung*)—O drone ! how is it that thou, eagerly hankering[1] after fresh-honey[1], after having so kissed the mango-blossom[2], shouldst (*at last clean*) forget her, [3]being contented with a mere stay on the lotus[3]. (1)

V. L. :—'०अभ्यन्तरे'–B. 'अन्तरे'—R. V. M. 'अवधानं' —R. V. M. 'कर्णं''–B. अवधारणम्'–K. 'ताल-लय-विशुद्धाया वीणायाः'–B.H.SP. Others

have 'कल-विशुद्धाया गीतेः'। B has 'हंसवती' for 'हंसपदिका'। '०लोलुपस्त्वं'—R. V. M. 'लोभभावितः'—B. HS.

ततः इति। 'परिवारः' (६।३।१२३) प्रतिहारी-प्रभृति-परिजन : ('परिवारः परिजने खड्ग-कोशे परिच्छदे' इति मेदिनी) 'विभवतः' पद-मर्यादानुसारेण अभिनेतृ-वृन्दस्य यावत् सम्भवति तावत्संख्यकः परिजनः इत्यर्थः। (तृतीयायां तसिः) **विदूषक इति॥** 'सङ्गीतस्य' प्रेक्षणार्थ-नृत्य-गीत-वाद्य-रूपस्य ("**गीत-वाद्य-नृत्य-त्रयं** नाट्यं तौर्यत्रिकञ्च तत्। **सङ्गीतं** प्रेक्षणार्थे स्यात् शास्त्रोक्ते नाट्यधर्मिका" इति अभिधान-चिन्तामणिः) 'शाला' गृहं ('शाला तरु-स्कन्ध-शाखा, **शाला भवन-मिष्यते**' इति शाश्वतः। **अश्व-घासादिवत् तादर्थ्ये षष्ठी-समासः**') तस्या "अभ्यन्तरे' मध्ये' 'अवधानं देहि' एकाग्र-मनसा श्रृणु इत्यर्थः। 'तालः' काल-क्रिया-मानम् अर्थात् ("अयं स्वर इयत्कालं गेयः", 'इयत्कालं विलम्बितम्', 'इयत्कालंद्रुतम्' 'इयत्कालं मध्यमिति' बोधयितुम् ईदृशैः हस्तैः अंगुल्या-कुञ्चन-प्रसारणादि-क्रियाभिः नर्तितव्यम् गातव्यञ्च इति काल-क्रियायाः प्रमाणं तालः"—इति शब्द-कल्पद्रुमः) 'लयः' गीत-वाद्य-पादादि-न्यासानां क्रिया-कालयोः साम्यम्' इति भानुजिः। ताभ्यां 'विशुद्धा' ताल-लयमधिकृत्य निरवद्या अर्थात् सङ्गीत-दामोदरोक्त-चतुर्दश-दोष-विवर्जिताः। तादृश्याः 'वीणायाः' 'स्वराणां षडजादीनां सयोगः' तत्सम्बन्धि स्वरा-लापः। 'हंसपदिका' तन्नाम्नी राज्ञी 'वर्णस्य' गीति-क्रमस्य ["**गीति-क्रमे** स्तुतौ भेदे **वर्णः**--शब्दः प्रयुज्यते' इति अभिधानरत्नमाला) 'परिचयम्' अभ्यासम् (इति शिशुपाल-वध-टीकायां—२७।५—मल्लिनाथपादाः) अर्थात् स्थाय्या-रोह्य-वरोही-सञ्चार्यात्मक-गानक्रिया-भ्यासम् इत्यर्थः। 'करोति' विदधाति (तथाचोक्तं—'गान-क्रियोच्यते वर्णः स चतुर्धा निरूपितः। स्थाय्या-रोह्य-वरोही च सञ्चारी'ति)। **अभिनवेति॥** हे 'मधुकर' भ्रमर (हे मधुर-सुरत-सुखकर कामुक दुष्यन्त! इति च ध्वन्यते। तथाचोक्तं विश्वप्रकाशे 'मधुव्रते **मधुकर कामुकेऽपि** प्रकीर्तितः') 'अभिनवं' नूतनमनास्वादित-पूर्वं यत् 'मधु' पुष्प-रसः ('मधुश्चैत्रे च, दैत्ये च मद्ये पुष्परसे मधु' इति हट्टचन्द्रः। अनेन शकुन्तलायां राज्ञः नूतन-प्रेम-रसेङ्गितम्। तथाचोक्तं प्राक्—'**मधु नवमनास्वादित-रसम्**'-२।१०)-तस्य 'लोलुपः लुब्धः 'त्वं चूतस्य' आम्रस्य 'मञ्जरीं' वल्लरी ('मञ्जरी वल्लरी स्त्रियाम्' इत्यमरः। अन्यत्र चूत-मञ्जरीवत् परम-लोभनीयाम् तरुणीम्। अनेन शकुन्तला च लक्षिता) 'तथा' तादृशं सप्रणयं 'परितः' समन्तात् 'चुम्बित्वा' इति 'परिचुम्ब्य' वात्सायन-रचित-काम-शास्त्रोक्त-सर्वस्थानेषु चुम्बनं विधाय इत्यर्थः। 'कमले' पद्मे (परिभोगा-नर्हे राजावरोधे इति गूढार्थः) 'वसतिः' वासः ("**वासेऽपि वसतिः**' इति त्रिकाण्डशेषः) 'एव' इति 'वसति-मात्रं' तेन, अर्थात् केवलमवस्थानेन परिणत-प्रायत्वात् तादृश-

मध्वभावात् रस मनास्वाद्य इत्यर्थः। 'निर्वृतः' सुखिनः सन् 'कथं' किमपदेशेन 'एनां' चूतःमञ्जरी (तथा परिचुम्बित-पूर्वा हंसपदिका शकुन्तला च इति भावः) 'विस्मृतः असि' (ज्ञानार्थस्य गत्यर्थे पर्यवसनात् कर्तरि क्तः)। (हेत्वनुप्रासौ। नात्र समासोक्तिः नापि अप्रस्तुतप्रशंसा। केवलम् अर्थ-शक्त्या सामाजिक-वर्गाणा मनसि हंसपदिका शकुन्तला च उपक्षिप्यते। अनेन दर्पणोक्त प्रथम-पताका-स्थानम्। तल्लक्षणं तूक्त प्राक्। अत्र प्रच्छेदकाऽऽख्यं लास्या-ङ्गञ्चांक्तम्। तथा न दर्पणोद्धृतं कविकण्ठहार-वाक्यम् 'अन्यासक्तं पतिं मत्वा प्रेम-विच्छेद-मन्युना। वीणा-पुरःसरः गानं स्त्रियाः प्रच्छेदको मतः"। अत्र राज्ञः दुष्यन्तस्य शकुन्तला-विस्मरणस्य गम्यताद् आक्षेप-नामाङ्गमुपक्षिप्तम्। 'गर्भ-बीज-समुद्भेदादाक्षेपः परिकीर्तितः' इति तल्लक्षणात्। अपरवक्त्रं वृत्तम्] ॥१॥

152n.—1. (**विभवतश्च**) **परिवारः**–(Occurs in Māla.). **'परिवार'–Any** attendant such as the portress &c.; *Optionally* **'परीवारः'**—**'उपसर्गस्य** —&c.'-(६।३।१२३)-**इति दीर्घः**। *Cf.* 'यथानिर्दिष्ट-परिवारो राजा'—*Act.* II P.156. This part of the stage direction is necessary, as otherwise the **presence** of *Vetravatī* (*portress*) a lttle after cannot be accounted for . Cf. "**ततः प्रविशति** पर्युत्सुको राजा **प्रतिहारी च**"—Māla. *Act.* IV. **2. सङ्गीत-शाला**—Mark that **Music and Painting** (*for which vide Act VI.*17;18.) were *sin qua non* in the days of our poet. It was perhaps considered a part of accomplishment (*even of the noble ladies*) in the society. (Vide Rām II, 17-18 ; PN—Act. II.3). **ताल**—Musical time or measure. **लयः**—Musical concord or harmony. **विशुद्धा**—A song is 'विशुद्धा' when it is sung faultlessly with reference to musical time and concord. *Cf* "गीतयः पञ्च शुद्धाख्या भिन्ना गौड़ा निवेसरा। साधारणी विशुद्धा स्यादवक्र-ललितैः स्वरैः"–SR. **वीणायाः** —वीणा(*Lute*) is a kind of 'Se-tar' (से-तार)ordinarily consisting of *three* strings. (**त्रितन्त्री**,—Persian **'से'** three). A variety of this with *seven* strings is called **'परिवादिनी'** (*i.e. modern Setar*)– "सा तु **तन्त्रीभिः सप्तभिः** परिवादिनी'—AK. Viṇā is a *very old* musical instrument, as mention of it along with Drum (दुन्दुभि) and '**flute**' is made even in the ṚV. A variety of it with **hundred strings** has been noticed by *Kātyāyana* in

his *Kalpasūtra.* The sound of lyre was first noticed by the king, the song of *Haṁsapadikā* following a little after, is heard later on 4. **स्वर-संयोगः**—Refers to seven sounds 'ष', 'ऋ', 'ग', 'म', 'प', 'ध',' 'नि'—**first discovered by the Hindus**. These **key-notes** of **music** were taken from the sounds of beasts and birds. "**षड्जं** रौति **मयूरोहि, गावो** नर्दन्ति **ऋषभम्**। **अजा** विरौति **गान्धारं, क्रौञ्चो** नर्दति **मध्यमम्**। पुष्पसाधारणे काले **कोकिलो** रौति **पञ्चमम्**। **अश्वश्च धैवतं** रौति, **निषादं** रौति **कुञ्जरः**"–*Nārada*. Hence स्वर-संयोग means the permutations and combinations of various 'स्वर's। **वर्ण-परिचयं**—(Practising) ष, ऋ,ग,म,&c, (131*n*. 4.). According to M, 'वर्ण' means a musical mode; these are numerous, personified either as **male** (रागः) or **female** (रागिणी)। 'गीतिषु चत्वारोवर्णाः भवन्ति यदाह भरतः॥ 'स्थायी' तथैव 'संचारी' तथा 'रोहाऽवरोहिणी'। वर्णाः चत्वार एवैते: कथिताः सर्व-गीतिषु॥—Ś & C. 5. **लोलुपः**–Greedy. (64*n*, 1). 6. **चूत-मञ्जरीं** &c.—An instance of **Dramatic Irony**. Though Śakuntalā-afffair is not known in the harem, still the audience will find a hidden allusion to her. (Vide122*n*.1.*middle*). 7. **कमल-वसति**-(*Cf*. 'लब्ध-वसतिः' –*Ra. VIII.* 73) &c.–You were once excessively fond of mango-blossom and consequently kissed her ever and anon. But now you seem to be quite satisfied, by having only a stay (**वसति**, *which suggests the absence of enjoyment*) in a lotus which must be full-bloomed and hence whose charm of youth is gone. For गूढार्थ (See Com.). Now '**०वसति-मात्र**' is a case of 'मयूरव्यंसकादि नित्समास, hence its **further compound** with 'निर्वृत' (*like words of* तिष्ठद्गु–*class*) is **barred**. "चकारः अत्र अवधारणार्थः। तेन "**परम-मयूर-व्यंसक**" इत्यादि समासान्तरं न स्यात्"—*T.* 754. But **Bhoja** solves the difficulty by saying that they may **lead, and not follow** in a compound. ("**मानेन समासः, अयन्तु समस्यते एव**")। In a similar way '**प्रदक्षिणीकृत्य**'—*Ra. I.* 21 ; '**प्रदक्षिण-प्रक्रमणात्**'—*VII.* 24 ; '**जननान्तर-सौहृदानि**'—*V.* 20. infra, are justified. In this particular place, however, we can **avoid the difficulty** by attaching the affix 'मात्रच् in स्वार्थे (प्रमाणार्थे)। **Bees are often described**

as **confined** in lotuses. 'गुञ्जद्द्विरेफो ह्ययमम्बुजस्थः'—*RS. VI*, 14 ; 'इदं रुणद्धि मां पद्ममन्तः कूजित-षट्पदम्'—*Vik. IV*. 40. (214*n*. 4). 8. **विस्मृतः**—Though 'स्मृ' is 'सकर्मक', Kāli. frequently uses this with '**क्त-प्रत्यय** in the **active voice**. Cf. 'अहो **विस्मृतं** मम हृदयम्'—*Vik. II.*; 'प्रथमं पुनः पुत्रदर्शनेन **विस्मृतास्मि**'—*Act. V.* 'सौध-वासमुटजेन **विस्मृतः** सञ्चिकाय'–*Ra.* X*I*X. 2 ; 'अनसूया–एनां **विस्मृतासि**' ?–*Śak*. 1. 'शार्ङ्गरवः—यदा तु पूर्ववृत्तम् व्यासङ्गात् **विस्मृतो** भवान्'—*Act. V.* (*Vide* 27*n*. 3.)

Remark :—The song of Haṁsa-padikā (which is described by 'Ravīndra Nātha' as a small tear in the veil through which we can form a notion of the royal sin) is introduced only to show that the imprecation of Durbāsāh has now produced a complete change in the king's mind. (Read "गीतार्थमाकर्ण्य इष्ट-जन-विरहादृतेऽपि" &c, infra) We are shocked by the vivid description of the gallant nature of the king. Like the greedy 'मधुकर' (Com.), he is always hankering after newer enjoyments, and newer हंसपदिकाs, and he is not a bit ashamed to forsake his beloved after a short while. Thus the audience can *preconceive* how the king will deal with Śak. and her party. The King is terribly agitated by the song, but it could not revive his hankering for the abandoned lady. Besides Vidūṣaka's dismissal (*see next*) at this stage is necessary. For though the king at the end of the Second Act (Śl. 15) told the jester that there was not a jot of truth in Śak. affair, still we have strong belief that had he been present when the party of Śak. approached the king, he would have surely contradicted the king's statement. The King hearing Haṁsa-padikā's song, sends the jester to pacify her and thus an undesirable situation is cleverly nipped in the bud.

Text :—राजा—अहो ! राग-परिवाहिणी[1] गीतिः ।

King—Oh, a what strain overflowing with affection (*or passion*).

विदूषकः—भो वअस्स ! किं दाव गीदीए अवगदो अक्खरत्थो
(भो वयस्य ! किं तावत् गीत्या अवगतः अक्षरार्थः[2]) ?

Vidūṣaka—Ho friend ! Do you comprehend the meaning[2] of the wordings[2] of the song ?

राजा (स्मितं कृत्वा)–[3]सकृत्-कृत-प्रणयोऽयं जनः । तदस्या देवीं वसुमतीम् 'अन्तरेण मदुपालम्भनं' गतोऽस्मि । सखे माधव्य ! मद्वचनादुच्यतां हंसपदिका । निपुणमुपालब्धो[4]ऽस्मीति ।

King (*Smiling.*)—[3]Once did I make love[3] to this lady. So I have incurred a mighly censure[5] (*from her*) apropos[4] of queen Vasumatī. Friend Mādhavya ! tell Haṁsapadikā, using my word, that I have been cleverly[6] reproved[6]

विदूषकः—जं भवं आणवेदि (यत् भवान् आज्ञापयति)। (उत्थाय) **भो वअस्स ! गहीदस्स ताए परकिएहिं हत्थेहिं सिहण्डए ताडीअमाणस्स अच्छराए वीद-राअस्स विअ णत्थि दाणिं मे मोक्खो।**

(भो वयस्य ! गृहीतस्य तया परकीयैः हस्तैः शिखण्डके[१] ताडयमानस्य, अप्सरसा वीत-रागस्येव[८] नास्ति इदानी मे मोक्षः[९])।

Vidūṣaka—As Your Majesty commands. (*Rising.*) Ho friend! (*Once*) caught hold of by her, through others' (*i.e. maids'*) hands by the hair-tuft[6]. (*and*) being beaten (*to jelly*). there will be no liberation[9] for me, as for a passionless[8] (*hermit*) when captured (*unawares*) by a (*celestial*) nymph.

राजा—गच्छ, नागरिक-वृत्त्या[१०] सान्त्वयैनाम्।

King—Go (*and*) pacify her in the fashion[10] of a spark[10].

विदूषकः—का गइ (का गतिः)। (इति निष्क्रान्तः)।

Vidūśaka—What help ? (*This said, goes out*).

V. L. :—B adds 'इत्यक्षरार्थः' after 'सकृत्' &c. 'महदुपालम्भन गतोऽस्मि'—V. M. 'उपालम्भनम् आगतोऽस्मि'—B. 'मदुपालम्भमवगतोऽस्मि' —R. 'तदद्य देवीं * * उपालम्भम् उपाकृतोऽस्मि'—R's Com. B reads 'सम्यक्' for 'निपुणम्'। For 'गृहीतस्य तया परकीयैः' &c B reads. गृहीतस्तया परकीयाभ्या हस्ताभ्यां शिखण्डके अच्छभल्लः। तद्वीतरागस्य अशरणस्य नास्ति मे मोक्षः'। 'संज्ञापय'—R. V. M. 'सान्त्वय'—B.HS.P.

राजेति। 'अहो इत्याश्चर्ये। 'रागम्' अनुरागं 'परितः' समन्तात् 'वहति' प्रवाहेण स्रवति इति। अनुराग-निष्यन्दिनी इत्यर्थः। यद्वा 'रागस्य' गान्धारादिस्वरस्य ('रागस्तु मात्सर्ये लोहितादिषु क्लेशाद्यनुरागे च गान्धारादौ नृपेऽपि च' इति मेदिनी) 'परिवाहः' उच्छ्वासः अत्रास्ति इति भावः। **विदूषक इति।** 'ताव'च्छब्दः साकल्ये। 'अक्षराणाम्' वर्णानाम् 'अर्थः' व्यङ्ग्यार्थः गूढ़-तात्पर्यम् अर्थात् कस्य विवक्षया गीतमिदं प्रवृत्तम्। **राजेति।** गीतेः गूढ़-तात्पर्य स्व-गामि इति नृपस्य ईषद्धास्यम्। 'अयं' जनः '**हंसपदिका-लक्षणः** 'सकृत्' एकवारम् ["एकस्य सकृच्च' (५।४।१९) इति वारार्थे एक-शब्द-स्थाने सकृत् आदेशः। "सकृत् सह-क-वारयोः" इत्यजयः] 'कृतः' दर्शितः प्रणयः' यस्मिन् तादृशः। 'तत्'

तस्मात् हेतोः, एकवारमुपभुज्य विस्मरणात् 'देवीं **वसुमतीम् अन्तरेण**' वसुमतीम् **अभिलक्ष्य** 'अस्याः' हंसपदिकायाः महत् उपालम्भनं' तिरस्कारं ("दुर्वादः स्यादुपालम्भ" इति जटाधरः) 'गतः' प्राप्तोऽस्मि—'हंपदिका उच्यतां ' त्वयेति शेषः। (अनेन आत्मनो **दक्षिण-नायकत्वं** सूचितम्। तथाचोक्त दर्पणे—"एषु त्वनेकमहिलासु **समरागः दक्षिणः** कथितः' इति) **विदूषक इति**॥ 'तया' हंसपदि-कया 'परकीयैः-(४।२।१३८)दास्यादीनां 'हस्तैः शिखण्डके' काकपक्षे चूड़ायामिति यावत् ('काकपक्ष. शिखण्डक' इत्यमरः। 'शिखण्डो वर्हचूड़योः' इति अभिधानचिन्तामणिश्च। शिखायाः अण्ड इव ['इवे प्रतिकृतौ'–(५।३।९६)–इति कन्। 'शकन्धादिषु पररूपम्'—वाः ६।१।९४] 'गृहीतस्य' धृतस्य तत 'ताड्यमानस्य' आहन्यमानस्य 'मे इदानी वीतरागस्य' विषयासक्ति–रहितस्य ('विशेषण-मात्र-प्रयोगः विशेष्य-प्रतिपत्तौ' इति वामनः)। 'अप्सरसा' स्व-वेश्यया ("अप्सरस्सु, अप्सराः प्रोक्ता, सुमनाः सुननस्सु च" इति द्विरूप-कोषात्)। कराभ्यां गृहीतस्य इव 'मोक्ष.' विदूषक-पक्षे **मोचनं. परित्राणम्**। वीत-रागस्य पक्षे **निःश्रेयसं कैवल्यम्** ('मोक्षः निःश्रेयसे वृत्तविशेषे मोचने मृतौ' इति हेमः। अत्र **श्लेषोपमा)**। **राजेति**। **'नागरिकस्य'** (अपाणिनीयोऽयं प्रयोगः) प्रवीणस्य प्रमदा-जन-संभाषण-कुशलस्य अर्थात् काम-शास्त्रोक्त-**नागरकस्य** 'वृत्ति ' व्यवहारः' तया, चातुर्येण इत्यर्थः। सुसभ्य-रसिक-जनवत् 'एना सान्त्वय' प्रसादय। आश्रम-ललाम-भूताया शकुन्तलायां स्वप्रेमा राज्ञा स्वयमेव विदूषकाय निवेदितः, अतस्तत्सन्निधाने शकुन्तला-प्रत्यादेशोऽयुक्त इति सुचतुर-कविना स व्याजेन निर्गमितः।

153n.—1. राग-परिवाहिणी—Overflowing with melody or passion. (78n. 1). **2. अक्षरार्थः**—The sense of the words *i.e.* letters put together—(99n. 5). The jester seems to be sarcastic here- **3. अयं जनः**—Refers to the singer *i.e.* '**हंसपदिका**'। M supported by Ś refers this to the king (मद्रूपः), Ours seems to be the better meaning. **4. वसुमतीम् अन्तरेण**—'अन्तरेण' here means "**with reference to" and not** 'विना'। "On account of"—M. 'अन्तरेण' विना, परित्यज्य स्थित इत्यर्थः'–HS. 'विना ततसहयोगाभावेन'–N, In any case the use of द्वितीया here is **irregular**. (Vide 70n.4). **5. शिखण्डके (गृहीतस्य)**—'शिखण्डक' or 'शिखाण्डक' means a '**queue**'—'शिखाण्डक-शिखण्डकौ' इति वाचस्पति-सुभूती। For **सप्तमी**—(81n.3). ग्रह+क्त कर्मणि= गृहीतः, र=ऋ (६।१।१५)-'ग्रहोऽलिटि दीर्घः'–(६ ७।२।३७) इति इटः दीर्घत्वम्)- —**Caught hold of** (*in the case of* (विदूषक), **seduced** (*in the case of*

वीतराग)। Cf. "बिड़ाल-गृहीतायाः पवभृतिकायाः"—Māla.IV. 6. अप्सरसा —(41*n*. 4. According to the Rām., they sprang up from the churning of the ocean (*i. e. water*, अप+सृ+असुन्) but according to the Mahā, Ādi. 65, they are the daughters of *Kāśyapa* and *Ariṣṭā*; (*Kād. P.* 525-524 and *VaP. Ch.* 69). 7. **मोक्षः**—Has double sense, viz, (*i*) Liberation of the body from danger: (*ii*) Liberation of the soul from further transmigration.(41n.6); In this connexion read how a **jester** was **chastised** by '**वासवदत्ता**' and 'काञ्चनमाला' in Rat. III before Śl. 19. **8. नागरिक &c.**— 'नागरिक-वृत्त्या प्रवीणस्य रीत्या'—K. Hence '**नागरिक**'here seems to be **loose** in grammar, for when '**cleverness**' or "**censure**" is meant the form is '**नागरक**' with वुञ् by 'नगरात् कुत्सन-प्रावीण्ययोः"—(4.2.128 ;1352), otherwise the form is '**नागर**'(क)। Read 'नागरक श्चौरः शिल्पी वा'—BD. 'इह नगरे मनुष्येण संभाव्यत एतन्नागरकेण। प्रवीणा हि नागरका भवन्ति। कुतस्मित-प्राविण्ययोरिति किम्? नागराः ब्राह्मणाः'। —VM. 'अन्य-सङ्क्रान्त-प्रेमाणो नागराः—Vik. III; Rat. I; (193n. 2) '**नागरिक**' derived by 'तत्र नियुक्तः'-(4. 4. 69) or 'रक्षति'-(4. 4. 33) means '*City–Police*. *Cf*. 'ततः विशति नागरिकः श्यालः'—*VI. Infra* or 'नागरिक' may be justified by **Vedic Grammar**. where every thing is optional. R. takes नागरिक–वृत्ति in a **technical sense**— 'नागरिक-वृत्त्येति त्रिपताकस्य मध्यमा-तर्जनीभ्यां वक्राभ्याम् अधोमुखं कम्पिताभ्याम् इत्यर्थः', but this meaning is not intended here. Mark that Kāli. **deliberately** repeats the word '**नागरिक**' elsewhere also. 'उर्वशी—साधु, आर्य नागरिकोऽसि'—*Vik. II*. The king asked *Vidūṣaka* to approach the queen like a spark and pacify her by dextrous method or **fashionable style** (**नागरक-वृत्तम्**) as described by **Vātsāyana in KS**. (Ch. IV. q.v.)—(225n.-1, **9. का गतिः**—Vidūṣaka is sorry as he is to act against his wish. Cf. 'विदूषकः—'(आत्मगतम्) का गतिः'—*Vik. II*; *also* Act. II. (Vidūṣaka's speech), Supra. P, 136.

Text :—**राजा** (स्वगतम्)—**किं नु खलु गीतार्थमाकर्ण्य इष्ट-जन विरहादृतेऽपि बलवदुत्कण्ठितोऽस्मि। अथवा—**

रम्याणि वीक्ष्य मधुरांश्च निशम्य[2] शब्दान्[2]
[3]पर्युत्सुको भवति यत्सुखितोऽपि जन्तुः ।
वसन्ततिलका तच्चेतसा स्मरति नूनमबोध-पूर्वं[4]
(तभजजगग) [5]भाव-स्थिराणि जननान्तर-सौहृदानि[6] ॥२॥
॥ (इति पर्याकुलस्तिष्ठति) ॥

King (*Aside.*)—O why, indeed, on hearing[1] what is sung[1] have I been deeply agitated, even though I am not wrenched from a desired person? Or—When a being, though happy, becomes perturbed[3] on beholding (*some*) pleasing (*views*) or hearkening[2] unto (*some*) sweet numbers,[2] then certainly it recalls with its mind, without[4] consciousness[4] the likings[6] of previous birth[6] [5]firmly rooted in the heart (*or permanently impressed through association*[5]). (This *said, stands all worried*).

V.L.—'गीतार्थम्'—M.R. 'गीतम्'—R's Com. 'गीतामेवंविधार्थम्'—B. For 'रम्याणि'—K has 'रूपाणि'। 'पर्युतसुकोभवति'—B.P. HS. 'पर्युतसुकी-भवति'—K.V.M.; K reads '०स्थितानि' for '०स्थिराणि'।

राजेति—'किं' 'नु' इति वितर्क-गर्भ-प्रश्ने। 'खलु' निश्चये। सतु उत्कण्ठाविषये। 'गीतेः अर्थ' वस्तु ('अर्थोऽभिधेय-रै-वस्तु-प्रयोजन-निवृत्तिषु' इत्यमरः) 'आकर्ण्य' श्रुत्वा। **रम्याणीति**—"रम्याणि' मनोज्ञानि पार्थिव-वस्तूनि इत्यर्थः ('विशेषणमात्र-प्रयोगः विशेष्य-प्रतिपत्तौ' इति वामनः। अतएव **भग्न-प्रक्रम-दोषः**)। 'मधुरान्' श्रुति-सुखदान्' संगीतालापादीन् 'निशम्य च' श्रुत्वा च सुखं संजातमस्य इति 'सुखितः अपि' ('तदस्य संजातं तारकादिभ्य इतच्'-(५।२।२६) —इति 'इतच्' [नित्यसुखी अपि विरही भवति इति अपि-शब्दार्थः')। 'जन्तुः' प्राणिमात्रं 'पर्युतसुकः' सोत्कण्ठः 'भवति' इति 'यत्', 'तत् नूनम्' निश्चितं 'भावैः' वासनाख्यैः संस्कारैः 'स्थिराणि' निश्चलानि जन्म-सहस्रैरपि दूरीकर्तुमशक्यानि इति राघवपादाः। यद्वा 'भावेन' स्वभावेन' स्थिराणि अक्षयाणि ('भावः सत्ता-स्वभावाऽभिप्राय-चेष्टाऽऽत्म-जन्मसु' इति मेदिनी)। अन्यत् जननं 'जननान्तरम्' पूर्वजन्म इत्यर्थः (मयूर-व्यंसकादिः नित्यसमासः) तस्य, सुहृदयस्य भावः 'सौहृदानि प्रणयादीनि (सुहृदय-शब्दात् अणिकृते सौहृद-पदं सिद्धम् (५।१।१३०; ६।३।५०, ७।३।२१) अत्र मयूरव्यंसकादित्वेऽपि भोज-रीत्या समासान्तरम्। तथा-चोक्तं गणकारेण—"भोजस्तु न चानेन समास इति वचनात् अयमन्येन सह समस्यते एव इत्याह—मयूर-व्यंसक-प्रिय" इति) यस्मिन् कर्मणि तत्। 'बोधपूर्वं' ज्ञानपूर्वकं', तन्न भवति इति 'अबोधपूर्वं यथा स्यात् तथा। विषय-विशेष-ज्ञानाऽभावपूर्वं

'चेतसा' मनसा 'स्मरति' स्मृतिपथम् आरोपयति, सम्यक् वोधस्तु न जायते। (अत्र विशेषे प्रस्तुते सामान्योक्तेः **अप्रस्तुत-प्रशंसा**, तेन स्थायिन्या रतेरविच्छेदो ध्वनितः। अत्र 'नूनम्' इति उत्प्रेक्षायाम् इति केचित् ॥ **तन्न** ॥ यतः जन्मान्तरीय-स्मरण शास्त्र-सिद्धमेव। **काव्यलिङ्गम्**। 'अबोधपूर्वं स्मरति' इति शब्द-शक्ति-मूलो **विरोधाभासो** व्यङ्ग्यः। अथच वोध-रुप-कारणाभावेऽपि स्मरण-रुप-कार्योत्पत्तेः **विभावनालङ्कारः**। म्याम्यंति यत्सु यत्सु इति नून ननेति **छेक-वृत्ति-श्रुत्यनुप्रासाः**। **वसन्ततिलका** वृत्तम्) ॥२॥

154n.—1. इष्ट-जन-विरहावृतेऽपि—The king has become mysteriously anxious (उत्कण्ठित—"चिन्ता तु स्मृतिराध्यान स्मरणं मस्पृहे पुनः उत्कण्ठोत्कलिके तस्मिन्'—Śabdārṇava), as if he has had separation from some of his dear and near ones. but he can neither recollect any such separation nor can account for why lovely objects and sweet music should sadden his mind. This shows that the imprecation of the sage दुर्वासा has already told upon him, *For similar uneasiness in Rāma's mind on beholding the hermitage of VM. Cf.* 'वामनमाश्रमपदं ततः पावनं श्रुतमृषेरूपेयिवान्। **उन्मनाः** प्रथम-जन्म-चेष्टितान्य**स्मरन्नपि** बभूव राघवः'—*Ra. XI.* 22. "In sooth, I know not why I am so sad * * But how I caught it, found it or came by it * * I am to learn"—**Merchant of Venice.**—1. 1. **2. रम्याणि**—Refers to 'वस्तूनि'। For similar use Cf. '**रूक्षाणि** परिवर्जयन्'—Rām. IV. 3; '**पक्वाणि** अवोचत्'—Mahā, Vana. 236; Karṇa. 66; K reads 'रूपाणि'। **3. पर्युत्सुको भवति**—*V. M* and others read '**पर्युत्सुकी-भवति**' but this is **rejected**, as 'च्वि' (*i.e.*, the idea of अभूत-तद्भाव) is **redundant**, that idea being **already expressed by the affix** 'इतच्' in 'सुखित'। 'कालाक्षमत्वम् औत्सुक्यम् इष्ट-वस्तु-वियोगतः। तद्दर्शनात् रम्य-वस्तु-दिदृ--क्षादेश्च'—*Sudhākara quoted by R.* Vide (42n. 4). **4. चेतसा स्मरति**—Though it is always the mind that recollects (स्मरति), still 'चेतसा is used to show that the idea of separation is coming to his mind, he himself not recollecting any such single instance of separation. **5. नूनम्**—M takes it in the sense

of उत्प्रेक्षा (*Com*), **'in all probability'**—but this seems to be **inaccurate (Com.)**, better take it in the sense of 'अवधारण' (*i.e., certainty*). **जननान्तर-सौहृदानि**–(Vide 35n.3). Kā'i. here refers to the *transmigration of the soul* from one body to another—the peculiar dogma of the Hindu philosophy. "Dim recollections of occurrences" and experiences of antenatal existence cling to the soul of an individual as a result of his deeds (वासना) like the *smell of garlic or onion* which remains behind clinging to the receptacle after the source of the smell is removed from it. (Vide **सिद्धान्तलेश**). These impressions though dormant, sometimes cross the mind and "the present condition of all human beings is supposed to derive its character of happiness or misery, elevation or degradation from **दैव** *i.e.*, actions (virtue & vices) done in the previous birth. *Cf.* 'पूर्वजन्मकृतं कर्म तद्दैवमिति कथ्यते'—*Y.* Read **Svāmi Vivekānanda's Lectures in the Chicago Congress of Religion,** *P.* 5-6. *Bhāṣya of Śaṅkara on Brahma Sūtra III. I. 1.* & 8 ; Gītā. VIII. Our king may be supposed to have another **new life** after the imprecation of Durvāsāh, hence he cannot find out the reason of the agitation rising in his mind. Hearing a sweet song, instead of being glad, he is anxious for some near and dear one, but he does not know exactly who that person might be. Though due to Durbāsāh's curse he has forgotten Śak., yet the **impression of her love is still adhering to his mind though vaguely**. For Similar ideas—Cf. 'फलानुमेयाः संस्काराः प्राक्तना इव'—*Ra. I.*20 ; 'रतिस्मरौ नूनमिमावभूतां राज्ञां सहस्रेषु तथाहि बाला। गतेयमात्मप्रतिरूपमेव मनो हि **जन्मान्तर-सङ्गतिज्ञम्**'—*VII.* 15, There MN, remarks– यस्मात्मनो जन्मान्तर-संज्ञतिज्ञं भवति। तदेवेदमिति प्रत्यभिज्ञा-भावेऽपि वासना-विशेष-वशाद-नुभूतार्थषु मनः प्रवृत्तिरस्तीत्युक्तम्। जन्मान्तर-साहचर्यंवेमेवात्र प्रवर्तकमिति भावः" । Ku. I. 30. *Vide* also *Kād.* where **महाश्वेता feels an agitation for पुण्डरीक** on seeing some-spots, & *also* **Ivanhoe** (of **Scott**) where he feels himself drawn to stand as a champion for **Rebeca**. The following lines

from **Charles Dickens, Wordsworth, and Tennyson** may be cited in this connection by way of illustrations—"Thus a strain of gentle music, or the rippling of water in a silent place, or the odour of a flower, or the mention of a familiar word will sometimes **call up sudden remembrances of scenes that never were in this life** * * which some brief **memory of a happier existence long gone by**, would seem to have awakened ; which no voluntary exertion of mind can recall"—**Oliver Twist**. "So might we, if our state were such, As one before remember much for thou two likes might meet and touch * * Some vague emotion of delight**Some yearning toward the lamps of night Moreover, something is or seems That touches me with mystic gleams, Like glimpses of forgotten dreams—Of something **felt, like something here, Of something done, I know not where**, such as no language may declare'—(**Two Voices**) ;

"Hence in a season of calm weather,
Though inland far we be
Our souls have sight of that immortal sea
Which brought us hither :

Can in a moment travel thither ;—
And see the children sport upon the shore,
And hear the mightly waters rolling over more,
Our **birth is but a sleep and a forgetting**
The soul that rises with us our life's star.
Hath had elsewhere its setting

And cometh from afar ;
Not in entire forgetfulness
And not in utter nakedness,

But trailing clouds of glory do we come
From God, who is our home"—

(Ode on the Intimation of Immortality.)

Text—(ततः प्रविशति कञ्चुकी)। **कञ्चुकी—अहो नु खलु ईदृशी मवस्थां प्रतिपन्नोऽस्मि।**

[1]आचार इत्यधिकृतेन मया गृहीता[2]
वसन्ततिलका **या वेत्र-यष्टि रवरोध-गृहेषु राज्ञः**
(तभजजगग) **काले गते बहुतिथे[3] मम सैव जाता**
[4]प्रस्थान-विक्लव-गते रवलम्बनार्था[5] ॥३॥

भोः, [6]सत्यं धर्म-कार्यमनतिपात्यं[7]देवस्य। तथापि इदानीमेव धर्मासनादुत्थिताय पुनरुपरोधकारि[8] कण्व-शिष्यागमनमस्मै नोत्सहे[9] निवेदयितुम्। अथवा अविश्रमोऽयं लोक-तन्त्राधिकारः[10]। कुतः—

इन्द्रवज्रा भानुः सकृद्युक्त-तुरङ्ग एव, रात्रिन्दिवं गन्धवहः[11] प्रयाति।
(ततजगग) [12]शेषः सदैवाहित-भूमि-भारः षष्ठांश-वृत्तेरपि[14]धर्म एषः ॥४॥

यावन्नियोगमनुतिष्ठामि। (परिक्रम्यावलोक्य) एष देवः—

प्रजाःप्रजाःस्वा इव तन्त्रयित्वा,[15]
उपजाति निषेवते श्रान्तमना विविक्तम्[16]।
(जतजगग यूथानि[17] सञ्चार्य[18] रविः-प्रतप्तः
ततजगग) शीतं गुहा-स्थानमिव द्विपेन्द्रः ॥५॥

(उपगम्य) जयतु जयतु देवः। एते खलु हिम-गिरेरुपत्यकाऽरण्य-वासिनः काश्यप-सन्देश मादाय सस्त्रीका स्तपस्विनः संप्राप्ताः। श्रुत्वा देवः प्रमाणम्।

(Then enter Chamberlain i.e. a liveried servant)

Chamberlain—Alas ! is it, indeed, that to such state (*of old age*) I have got ? Appointed in the king's seraglio, the same cane-staff which I assumed[2] (*at first*) as a matter[1] of form[1], has now after a long[3] lapse of time,[3] come to be (a) useful (*crutch only*) for the[5] support of me whose[4] step is faltering[4] in walking. (3)-

Granted[6] that a matter of sacred duty must[7] not be deferred[7] by His Majesty, yet to him who has just now risen from the Judgment seat, I dare[9] not announce the arrival of Kaṇva's disciples, [8]which will again give (*him*) trouble[8]. Or perhaps, without repose (*is*) this office[10] of ruling a people.[10] For—

The sun has his coursers yoked but once ; the scent-fraught[11] (*wind*) blows day and night ; Śeṣa[12], (Lord of Snakes) indeed, has the burthen of the earth unintermittently resting on (*his head*) ; even so is the duty of the enjoyer[14] of the six part[14] (*of the produce of the soil*). (4)

Very well, (*I*) will do (*my*) duty, (*Turning round and looking.*) Here is His Majesty, who having[15] governed (*his*) subjects as his own offspring, is enjoying repose with a wearied mind in [16]solitude, like an elephantine-monarch betaking himself to a cool cave, scorched by the Sun, after having conducted[18] his [17]herds (*to their pastures*), (5)

(*Going up*). Victory to Your Majesty. Here, indeed, have come some anchorites, living in woods of the *Snowy Mountain's Valley*, with ladies (*in their company*) and bearing a message from Kāśypa. Having heard, Your Majesty will command.

V. L.—The entrance of the Chamberlain is given at the very opening of this scene in B.P.HS. 'अधिकृतेन'–B. P. 'अवहितेन'–M.R.V. 'अवलम्बनार्था'—R. V. 'अवलम्बनाय'—B. 'अवलम्बनार्थम्'—M. 'अविश्रम:'—R.V. 'अविश्राम:—M. 'कुतो विश्रामो लोकपालानाम्"—B. 'नियोगम्' —R.V. 'कण्वनियोगम्'—M. 'तन्त्रयित्वा'—B. K. R. M. 'हर्षयित्वा'— —Mackenzie Mss. "शान्त्वयित्वा—M. Com. 'श्रान्तमना:—K. B. V. Mackenzie Mss. 'अशान्तमना:—R 'शान्तमना':—R's Com M's. Mss. 'दिवा'—R. M. V. 'गुहा'—B. P. HS. 'हिमगिरे:'—R. B. 'हिमवतो गिरे:—V. M.

कञ्चुकीति ॥ 'कञ्चुक:' चोलक: अस्ति अस्य इति 'कञ्चुकी' ('अत इनि-ठनौ'-(५।२।११५)-इति इन्) "अन्त:पुराध्यक्ष । (मनु बहि: सञ्चरन्तीनां पुरस्त्रीणां प्रेक्षक-पुरुषान्तर-वारणाय राज्ञा स्त्र्यागारे यो वेत्रधरो नियुक्त'; –इति शब्दकल्पद्रुमे) । 'अहो' इति विषादे । 'नु' वितर्के । 'खल्व' वधारणे । **आचार इति** ॥ 'राज्ञ: अवरोध-गृहेषु' अन्त:पुरेषु ("गृहं गृहाश्च पुं भूम्नि कलत्रेऽपि च सद्मनि" इत्यभिधानात् **बहुवचनम्**) 'अधिकृतेन' कञ्चुकि-पदे नियुक्तेन तत्-परिरक्षकेण इति भाव: 'मया आचार इति' कञ्चुकिभि: सदैव हस्ते वेत्रयष्टि: ग्रहीतव्या इति नियमात् हेतो: (**इति प्रकरणे हेतौ** प्रकाशादि-समाप्तिषु" इति विश्व:) 'या' अधिकार-लक्षण-द्योतिका 'वेत्रयष्टि: गृहीता' धृता 'सा एव' वेत्रयष्टि: बहूनां पूरणे 'बहुतिथे ('बहु-पूग-गण-सङ्घस्य तिथुक्'— ५।२।५२) 'काले' शैशव-कौमार-यौवनादिसमये 'गते' अतीते सति, सम्प्रति पूर्णवार्धकात्, 'प्रस्थाने' स्थानान्तर-गमन-समये 'विक्लवा' विह्वला ('विक्लवो विह्वल' इत्यमर:) 'गति:' पाद-प्रक्षेप. यस्य तादृशस्य 'मम अवलम्बनं' भूम्यां पतन-वारणम् 'अर्थ:' प्रयोजनं यस्या: तादृशी जाता', पूर्वं तु शोभार्थं वेत्रयष्टि: गृहीता, इदानीं तु सैव अवलम्बनार्था इति विस्मय (उत्तरार्धे वार्धक-गमन-लक्षण-कार्यारम्भे वेत्रयष्टे: सहायतो-पादानात् **समाहितम्** । 'कार्यारम्भे सहायाप्ति:' इति तल्लक्षणात् । अथच 'एकस्या एव वेत्रयष्टे: अनेक-गोचरत्वात् **विशेषालङ्कार: । छेक-वृत्ति-श्रुत्यनुप्रासा: । वसन्ततिलका वृत्तम्**) ॥३॥ **भो इति** ॥ 'देवस्य' दुष्यन्तस्य (शेषे षष्ठी) 'अनतिपात्यम्' अनतिक्रमणीयम् ('पर्यय: अतिक्रम

स्तस्मिन् अतिपात उपात्यय' इत्यमरः') 'सत्यम्' इति स्वीकरोमि इत्यर्थः ('सत्यं' प्रश्नेऽभ्युपगमे' इति मेदिनी) 'तथापि' अर्थात् अनुल्लङ्घनीयत्वेऽपि 'धर्मासनात्' 'उत्थिताय' प्रारब्ध-विश्रमाय 'अस्मै पुनः उपरोधं करोति' विश्रम-व्याघात-रूपां पीड़ां जनयति यत् तत् 'कण्व-शिष्या-गमनं निवेदयितुम्' 'न उतसहे' समर्थोऽस्मि। 'अथवा' पक्षान्तरे 'अयं' लोकस्य' त्रिभुवनस्य 'तन्त्रं' धारणं परिरक्षणम् इति भावः (तन्त्रिः धारणे। घञ्–३।३।१८) तद्रूपः 'अधिकारः' कर्तव्यं कर्म॥ यद्वा॥ 'लोके' भुवने 'तन्त्राधिकारः' प्रधानाधिकारः ('तन्त्रं प्रधाने सिद्धान्ते सूत्रवाये परिच्छदे' इत्यमरः) 'अविश्रमः' विश्रान्ति-रहितः भवति। प्रजा-रक्षणे नियुक्तस्य कदापि विश्रान्तिः न सम्भवति इत्याशयः। ['नोदात्तोपदेशस्य मान्तस्याऽनाचमेः'–(७।३।२४) इति विश्रम-पदे वृद्धयभावः]। भानुरिति॥ सम्प्रति 'अविश्रमो राज-तन्त्राधिकार' इति प्रपञ्चयति। 'भानुः' सूर्यः 'सकृत्' जीवने एकवारं ('सकृत् सहैकवारयोः' इत्यजयः) 'युक्ता' नियोजिताः तुरङ्गा' अश्वा येन यस्य वा तथाविध 'एव' भवति (तथा च श्रुतिः–'पश्य सूर्यस्य श्रेमाणं यो न तन्द्रयते चरन्' इति) सर्वदैव योजिताश्वेन रथेन सञ्चरते, न कदापि तान् विमोच्य विश्राम्यति इत्यर्थः। 'गन्धवहः वायुः। रात्रौ च दिवा च, तयोः समाहारः 'रात्रिन्दिवम्' अहर्निशम् ['अचतुर-विचतुर-सुचतुर-स्त्रीपुंस-धेन्वनडुह-र्कसाम-वाङ्मनसाऽक्षिभ्रुव-दारगवो-र्वष्ठीव-नक्तन्दिव रात्रिन्दिव–' (५।४।७७)–इति सूत्रेण निपातनात् साधुः। अत्यन्त-संयोगे २या, ३।३।५) 'प्रयाति' वहति। 'शेषः' नाग-स्वामी अनन्तः ('शेषोऽनन्ते वधे सीरिण्युपयुक्तेतरेऽपि च' इति—हैमः) 'सदैव' अनिशमेव 'आहितः' न्यस्तः 'भूमिभारः' पृथिवी-भारः यस्मिन् तादृशः भवतीति शेषः (सामान्य-क्रियानिर्देशात् अध्याहार-दोषाभावः। लट्-प्रत्ययः नित्य-वृत्तत्वं द्योतयति)। 'षष्ठांशः' षष्ठभागः 'वृत्तिः' जीविका यस्य ('आजीवः जीविका वार्ता वृत्तिः वर्तनजीवने' इत्यमरः। तथाचोक्तं मानवे—"सर्वतो धर्म-षड्-भागो राज्ञः भवति रक्षत' इति) तादृशस्य राज्ञः 'अपि' इति समुच्चये। 'एष' एवंभूतः अविश्रम-रूपः धर्मः'। (अत्र एक एव अविश्रम-रूपः सामान्यो धर्मः विभिन्न-शब्दैः पृथक् पृथक् निर्देशात् प्रतिवस्तूपमा-लङ्कारः। सा चात्र मालारूपा। "विमल एव रविर्विशदः शशी" इति साहित्य दर्पणोदाहरणवत्। "दुष्यन्तस्य इति विशेष वक्तव्ये सामान्य-वचनात् अप्रस्तुत-प्रशंसापि। 'एव' शब्दाभ्यां कादाचित्क-तुरङ्ग-मोचनादि -धर्म-व्यपोहनात् शाब्द-परिसंख्या-त्रयञ्च इति सिद्धान्तवागीशपादाः। वृत्यनुप्रासः। इन्द्रवज्रा वृत्तम्]। 'यावत्' इति वाक्यालङ्कारे अवधारणे वा। प्रजा इति॥ सम्प्रति श्रान्तं राजानं विशिनष्टि। 'एष' पुरतः दृश्यमानः 'देव' दुष्यन्तः 'स्वाः' स्वकीयाः 'प्रजा इव' सन्तत्य इव ['प्रजा स्यात् सन्ततौ जने' इत्यमरः] अपत्य-निर्विशेषम्

इति भावः। 'प्रजाः' प्रकृति-पुञ्जान् 'तन्त्रयित्वा' पालयित्वा 'श्रान्त-मनाः' परिखेदित-चेताः सन् 'यूथानि' हस्तिकुलानि ('सजातीयैः कुलं यूथम्' इत्यमरः) 'सञ्चार्य' इतस्ततः भ्रमयित्वा (चर गति - भक्षणयोरिति धातुपाठः) 'रविणा' लक्षणया आतपेन 'प्रतप्तः' भृशं पीड़ितः 'द्विपेन्द्रः' गजराजः 'शीतं' शीतलं **'गुहा-स्थानमिव'** गह्वर-प्रदेशमिव 'विविक्तं', विजन-प्रदेशं [**'विविक्तौ पूत-विजनौ'** इत्यमरः) 'निषेवते' (८।३।७० ; २२७५) आश्रयति। **यमकोपमयोः छेक-वृत्तानुप्रासयोश्च संसृष्टिः। वृत्यनुप्रासः।** अत्र **उपेन्द्रवज्रा**-वृत्तम् इति यत् राघवपादैः उक्तम् स **प्रमाद** एव। वस्तुतस्तु अस्मिन् श्लोके इन्द्रवज्रो-पेन्द्र-वज्रयो. मेलनात् **आख्यायनकी** इत्यपर-नाम **उपजातिः** वृत्तम्)। **जयत्विति** ॥ 'जयतु' इत्यनेन राजा संबोध्यः। (जयः सर्वेभ्यः उतकर्षः। तेन स्वापेक्षयापि उतकर्ष वोधनात् तस्य **नमस्कार-व्यञ्जकता।** तथाचोक्तं प्रकाशकारेण—'जयत्यर्थेन नमस्कारः आक्षिप्यते' इति)। हिमप्रधानः गिरिः इति 'हिमगिरिः' (**उत्तर-पदलोपि-कर्म-धारयः**) तस्य 'उपत्यका' आसन्नभूमिः ['पर्वतस्यासन्न स्थलम् उपत्यका, आरूढं स्थलमधित्यका' इति भट्टोजिः। 'उपाऽधिभ्यां त्यकन् आसन्नाधि-रूढयोः'–(५।२।३४ ; १८३५)–इति त्यकन्] तस्यां यत् 'अरण्य', तस्मिन् 'वासिनः' ['शय-वास-वासिष्वकालात्',— (६।३।१८ ; ९७६)-इति सप्तमीसमासः] 'सन्देश' संवादम् (इति शब्दरत्नावली) 'आदाय' गृहीत्वा' सस्त्रीकाः' स्त्रीलोक-महिताः ('नदृतश्च:–५।४।१५३ ; ८३३—इति समासान्तः कप्) 'सप्राप्ता' आगता। तत् वाचिकं 'श्रुत्वा' 'देवः' महाराज एव 'प्रमाणम्' कर्तव्य-निश्चयकृत् भवतु इति शेषः। महाराज एव अनन्तर-करणीयम् अवधारयतु।

155n.—1. कञ्चुकी—So yclept from the 'कञ्चुक' or the long robe he wore. (*Com.*) ; "सौविदल्लाः कञ्चुकिन्यः स्थापत्याः सौविदाश्च तै"—AK. He is an attendant of seraglio. (If the guard be a **lady** she is called **'महत्तरिका'**"—KS. III. 2). "अन्तःपुरचरो वृद्धो विप्रः गुणगणान्वितः। सर्व-कार्यार्थ-कुशलः **कञ्चुकी**त्यभिधीयते। जरा-वैक्लव्य-युक्तेन विशेद् गात्रेण **कञ्चुकी**। –Bharata. 'ये नित्यं सत्य-सम्पन्नाः काम-दोष -विवर्जिताः। ज्ञान-विज्ञान-कुशलाः कञ्चुकीयास्तु ते स्मृताः.'—MG. On his first entrance he generally gives to his despondency due to infirmities of old age. *Vide Vik. III.* 1 ; *VS.* II. 7 ; *Rat.* II. 3 ; *AR. III.* 1 ; *MR.* III. 1. 2. **अधिकृतेन**—R reads **'अवहितेन'**—'carefully'. Of course that enhances alliteration, but the

Chamberlain certainly began to use the cane-stick (आचार) from that very time when he was first *appointed* (अधिकृत) in the king's seraglio (अवरोधगृहेषु); but then as ('अधिकृत') is to be connected with 'अवरोध-गृहेषु,' there is 'दूरान्वय-दोष,' though it is not *unsual* with our poet. Again 'अवहितेन' when connected with 'गृहीता' *prominently* brings out the present deplorable plight of the Chamberlain. Mark VS has 'अधिकृता यष्ठिः'—II, 7. which supports our reading. 3. **वेत्रयष्टिः**—A cane-stick generally mounted with gold or silver cap. Cf. 'वाम-प्रकोठार्पित-हेम-वेत्रः'—*Ku.* 3.41. "It is a badge of office like the gold stick or black rod in European court"—M. **4. अवलम्बनार्था**— अवलम्बनम् एव अर्थः (प्रयोजनं) यस्याः तादृशी—The sole object of which is **to support**. 5. Cf. 'तस्य पाण्डु-वदनाऽल्पभूषण **सावलम्ब-गमना**'—*Ra. XIX.* 50 **अनतिपात्यम्**—Not to be delayed. Cf. '**कार्यातिपातः**'—Act. I, p. 45. It will be interesting to note that king **Aśoka in his sixth Rock Inscription (Girnar)** made a proclamation that "**in whatever state he might be, whether in seraglio, or in the bath-room, or in a vehicle, or in pleasure-garden, or engaged in eating, he must be forthwith informed of the grievances of his subjects**"—("त मया एवं" कतं सवे काले भुंजमानस मे ओरोधनम्हि गभागारस्थि वचम्हि च विनीतम्हि च उयानेसु च सर्वत्र पटिवेदिका ष्टिता अथ मे जनस पटिवेदथ इति") । 6. **सत्यं**—'It must be admitted'. (*Com.*). Cf. 'सत्यम् अर्काच्च सोमाच्च परमध्यास्महे पदम्'—*Ku. VI.*19. ('**कामम्**') also means the same thing. 7. **अविश्रमः**—(64n. 5). **8. लोक-तन्त्रा-धिकारः**—'The office (**अधिकार**) of protecting (**तन्त्र**) the subjects,' or 'the office of the head (तन्त्र) of the people' (*Com.*). 9. **तुरङ्गः**—तुर् (त्वरणे) + क (घञर्थे—*Vārt.* 3.3.58) or तुर् + घञ् बाहुलकात् = तुरः । (3. 3. 18)—संज्ञापूर्वकत्वात् न गुणः' —*BhD.* तुरेण वेगेन गच्छति इति तुर + गम् + खच् ('गमेश्च'—3. 3. 47). Next by Vārt. 'खच्च वा डित् वक्तव्यः', we have तुरङ्गः । 'इह-खच् प्रययो डकार-लोपि-प्रत्ययवत् फलं ददाति'—**Prabhā**; 'मुम्' *by* 'अरुर्द्विषजन्तस्य मुम्' (5.3 67 ; 2942). **10. रात्रिन्दिवं**—Is *irregularily* formed with the aug--ment 'नुम्' after 'रात्रि' and 'समासान्त अच्' at the end. (*Com.*). **11. शेषः**—

The thousand-hooded snake of the Purāṇas who forms a couch of Viṣṇu at the end of every cycle and who supports the earth on its hoods at the request of Brahmā. शेते हरिः अस्मिन् (घञ्=शेषः) —Kṣirasvāmī. **Amara makes a distinction** between **'वासुकि'** (King of snakes) and **'अनन्त'** (शेष), but *** तथापि गतानुगतिकतया **कवयोऽभेदेन प्रयुञ्जते** यथा 'स्वमिव भुजङ्गविशेषं व्युपधाय स्वपिति यो भुजङ्गविशेषम्' इति वृन्दावने', 'वलयायितशेष-शायिनः सखितामादितः पीतवाससः" इति नैषधे—*RM.* Cf. 'किं शेषस्य भरव्यथा न वपुषि क्ष्मां न क्षिपत्येष यत्'—*MR. II.* 18, *Ku. III.* 13 ; *VI.* 68. **12. षष्ठांश-वृत्तेः**—Cf. 'षडंशभाक्'—Ra. XVII. 65 ; (72n. 2, 7). **13. तन्त्रयित्वा**—'तन्त्र' means 'to support, maintain as a family—'*AD.* This shows that Duṣyanta looked upon his subjects **as forming members of his own family,** This corresponds to **'संचार्य'** (*having led them safely to the pastures*). **14—श्रान्त-मनाः**—Fatigued in mind. This corresponds with 'रवि-प्रतप्तः' । *R* reads 'अशान्तमनाः' and **condemns** the reading 'शान्तमनाः'—'शान्तमनाः' इति नु च्छेदे रविप्रतप्त इत्युपमानेन सह विरोधः स्यात्' । Still it is obvious that his reading does not favour the simile, besides a little after we have 'राजा—एते **क्लान्त-मनसः** पुनर्नवीकृताः स्मः'—Infra. *Act. V.* **15. गुहा**—Is preferable to **'दिवा'**, for the latter seems to be **redundant,** the idea of 'दिवा' being already **expressed** by **'रवि-प्रतप्तः'** । Cf. **'दरीं गतः** कानने परिभ्रमति गजेन्द्रः'—Vik. IV. 28. 'गन्तुं वनं यूथपते रिवेभाः"—*Ku. XIII.* 22.

Remark :—After Śloka 3, the Bengali recension has the following which, it is needless to say, gives a very good sense. 'यावदभ्यन्तर-गताय देवाय स्वमनुष्ठेयमकालक्षेपाहं निवेदयामि । (स्तोकमन्तरं गत्वा) किं पुनस्तत् ? (विचिन्त्य) आं ज्ञातम् । कण्व-शिष्यास्तपस्विनो देवं द्रष्टुमिच्छन्ति । भोः ! चित्रमेतत्—

श्लोक 'क्षणात् प्रबोधमायाति लङ्घ्यते तमसा पुनः ।
निर्वास्यतः प्रदीपस्य शिखेव[१] जरतो मतिः ॥

"I will, as he is gone inside, inform His Majesty of[1] a duty not letting time to be thrown away[1]. (*Going a little distance*) What

now is it ? (*Remembering*) Ah yes ! Kaṇva's pupils, hermits, wish to see His Majesty. Ho ! strange this is.

All in a while the sense returns ;
'Tis overrun by gloom again ;
Like flame[2] of a lamp, ere out it burns,
An old man's mind both wax and wane"—*Roby Datta.*

Text :—**राजा**—(सविस्मयम्)—**किं काश्यप-सन्देश-हारिणः सस्त्रीकास्तपस्विनः ?**

King (*Astonished*)—What ! anchorites with ladies, bringing a message from Kāśyapa !

कञ्चुकी—अथकिम्। Chamberlain—Even so, (*My Liege*).

राजा—तेन हि मद्वचनात् विज्ञाप्यतामुपाध्यायः सोमरातः अमुनाश्रमवासिनः श्रौतेन विधिना सत्कृत्य[१] स्वयमेव प्रवेशयितुमर्हतीति। अहमप्येतांस्तपस्वि-दर्शनोचित-प्रदेशे[२] प्रतिपालयामि[३]।

King—Then let (*our*) chaplain Somarāta be informed in my word, that he should himself introduce (*these*) hermitage-dwellers, after having received[1] them in a manner after the Holy Writ ; while I too shall await[3] them here, (*staying*) in[2] a place suited to the visit of the anchorites.[2]

कञ्चुकी—यथाज्ञापयति देवः। (निष्क्रान्तः)।

Chamberlain—As Your Majesty commands. (*Exit*).

राजा (उत्थाय)—**वेत्रवति, अग्नि-शरण-मार्गं[१] मादेशय[२]।**

King (*Rising*) Vetravatī ! direct[2] the[1] way to the fire-sanctuary[1].

प्रतिहारी—इदो इदो देवो [इत इतो देवः]।

Portress—This way, My Liege, this way.

राजा (परिक्रम्य, अधिकारखेदं निरूप्य च)—**सर्वः प्रार्थितमर्थं मधिगम्य सुखी सम्पद्यते जन्तुः, राज्ञान्तु चरितार्थता[१] दुःखोत्तरैव[२]।**

औत्सुक्य-मात्र[४] मवसादयति[५] प्रतिष्ठा[६]
वसन्ततिलका **क्लिश्नाति[७] लब्ध-परिपालन-वृत्ति[१]रेव।**
(तभजजगग) **नाऽति-श्रमाऽपनयनाय यथा श्रमाय**
राज्यं स्व-हस्त-धृत-दण्ड[८] मिवातपत्रम्[९]॥६॥

King (*Turns round, and gesticulating fatigue from offiice*)—Every creature is happy on attaining his wished for objects. But the

fulfilment[1] of king's end[1] (*is*) chiefly[2] for troubles[2] (*or is only followed[2] by fresh troubles[2]*).

High[6] dignity (*or success[6]*) puts[5] an end to[5] anxious[4] longing[4] merely; the very task of guarding the thing acquired harasses.[7] A kingdom (*the administration of which is in one's own hand*) is not for the removal of the great fatigue as for fatigue, like a parasol[9], the handle[8] of which is held in one's own hand[8] (6).

V. L.—'सविस्मयम्'—B.P.HS. 'सादरम्'—R.M.V. 'काश्यप-सन्देश—R.M.V. 'कण्व-सन्देश'—B. 'सस्त्रीकास्तपस्विनः'—B. HS. Omitted by others, 'अत्र'—R.M.V. 'एतान्'—B. HS. 'स्थितः'—R.V. Omitted by M.B. ; Ś reads 'प्रतिष्ठाम्' for 'प्रतिष्ठा'। 'दुःखोत्तरा'—S.B.V.M. R'S. Com. ; 'दुःखान्तरैव'—R. 'अवसाययति'—R.V. 'अवसादयति'—B.M.Ś. C. 'वृत्तिरेव'—B. M. V. 'वृत्तिरेनम्—R. 'यथा श्रमाय' '—V. B. न च श्रमाय'—M. R. K.

राभति ॥ 'विस्मयेन' **सस्त्रीका** इति श्रवणाद् आश्चर्येण 'सह'। **राजेति ॥** 'मद्वचनात्' इति ल्यब्लोपे ५मी। 'श्रौतेन' वेदोक्तेन। 'सत्कृत्य' पूजयित्वा ('आदराऽनादरयोः सद् असती'-(१।४।६३)-इति गतिसंज्ञा) 'स्वयमेव' इत्यनेन गौरवातिशयो द्योत्यते। 'प्रतिपालयामि' प्रतीक्षिष्ये ['वर्तमान-सामीप्ये वर्तमान-वद्वा'-(३।१।१३१)-इति भविष्यदर्थे वर्तमान-प्रयोगः]। **राजेति ॥** 'अग्निशरण-मार्गं' त्रेताग्नि-गृह-पथम् 'आदेशय' प्रदर्शय। (तथाचोक्तम्—'अग्न्या-गार-गतः कार्यं पश्येत् वैद्य-तपस्विनाम्। पुरोहिताऽऽचार्य-सखः प्रत्युत्गम्याऽभिवाद्य च' इति) **राजेति ॥** यत्-कार्यस्य भावः यस्मिन् वर्तते स एव तस्य 'अधिकार' उच्यते, अतः 'अधिकारस्य' प्रजा-पालन-रूप-कर्तव्यस्य यः 'खेदः' क्लेशः, तं 'निरूप्य' नाटयेन अभिनीय आह। 'प्रार्थितम्' आकाङ्क्षितम् 'अर्थ' द्रव्यम् 'अभिगम्य' लब्ध्वा। 'सम्पद्यते' जायते। 'राज्ञां चरितार्थता' अभिकाङ्क्षित-सिद्धिः 'दुःखम् उत्तरम्,' उत्तमं, प्रधानम् इति यावत् ('उत्तरं प्रतिवाक्ये स्यात् ऊर्ध्वो-दीच्योत्तमे अन्यवत्' इति विश्वः) यस्यां तथाभूता। दुःखाधिका इत्यर्थः। 'एव' इत्यवधारणे। **औत्सुक्येति ॥** 'प्रतिष्ठा' ('कर्त्री) अर्थात् राज्य-प्रतिष्ठा, सिंहासनाधिरोहणम् (इति विद्याम्बुधिपादाः), यद्वा 'प्रतिष्ठा' प्रजापालनोत्पन्ना ख्यातिः, सर्वोत्कृष्ट-गौरवम् (इति राघवपादाः)। ('प्रतिष्ठा स्थानमात्रके गौरवे' इति विश्वः)। औत्सुक्यम् एव इति 'औत्सुक्यमात्रं' कदा राजा भविष्यामि इत्यादिकम् उत्-कण्ठामात्रम् 'अवसादयति' निवर्तयति समाप्तिं नयतीत्यर्थः। 'लब्धस्य' प्राप्तस्य

वस्तुनः राज्यस्य वा यत् 'परितः पालनं' सर्वतोभावेन रक्षणं, तत्र या 'वृत्तिः' व्यापारः अर्थात् सुश्रृङ्खला-स्थापनाय कदाचित् अहोरात्र-जागरणं तत्रैव कदाचिदच्छिन्न-धारावृष्ट्यनुभव इत्यादिकम् 'क्लिश्नाति एव' नूनं सातिशयां पीड़ां जनयति। अस्मादेव हेतोः 'राज्यम्' (कर्तृ) 'आतपत्रमिव' छत्रमिव 'स्वेन हस्तेन 'धृतः' कृतः 'दण्डः' दुष्ट-दमनम् यस्मिन्, एकत्र स्वयं कृत-शासनम् इति भावः। अन्यत्र 'स्व-हस्तेन 'धृतः' रक्षितः 'दण्डः' छत्रस्य लगुरः यस्य तत्। ('दण्डो यमे मानभेदे लगुरे दम-सैन्ययोः' इति विश्वप्रकाशः ॥) 'श्रमस्य अपनयनाय' नाशाय 'न अति' (इति निपातः प्रशंसायाम्) न प्रशंसनीय इत्यर्थः। 'यथा श्रमाय' क्लेशोत्पादनाय भवति। (वाक्यार्थ-हेतुकं **काव्यलिङ्गम्।** **अनुमानालङ्कार** इति केचित्। **श्रौतोपमा यथासंख्यं श्लेषश्च।** अथच संबन्धेऽसंबन्ध-रूपाऽसंबन्धे संबन्ध-रूपा **द्व्यतिशयोक्तिरपि।** **छेक-वृत्त्यनुप्रासयोः** संसृष्टिः। **श्रुत्यनुप्रासोऽपि। वसन्त-तिलका** वृत्तम्) ॥६॥

156n.—1. सविस्मयम्—The king is surprised to hear that ascetics have come *accompanied by ladies* (*Com.*) **2. उपाध्यायः—Any teacher is 'उपाध्याय,'**—'उपाध्यायोऽध्यापकः'——AK. But according to MS 'उपाध्याय' is a religious preceptor who is **inferior** to an '**आचार्य**' and **instructs for wages, only in a part of the Vedas.** Cf. '**एकदेशं तु वेदस्य** वेदाङ्गान्यपि वा पुनः। योऽध्यापयति **वृत्त्यर्थम्** उपाध्याय स उच्यते' – *II.* 141. 'उपाध्यायस्य पत्नी **उपाध्यायानी, उपाध्यायी** वा। या स्वयमेव अध्यापिका तत्र ङीष् वा वाच्यः। **उपाध्यायी, उपाध्याया वा**'—**Prabhā**. **3. सत्कृत्य**—Having honoured. Cf. 'सद्भावे साधुभावे च सदित्येतत् प्रयुज्यते। प्रशस्ते कर्मणि तथा **सच्छब्दः** पार्थ युज्यते॥ यज्ञे तपसि दाने च स्थितिः **सदिति** चोच्यते। कर्म चैव तदर्थीयं **सदित्येवाऽभिधीयते**'—*Gītā. XVII.* 26-27. **4. अग्निशरण**— (126n. 1). **5. प्रतिहारी**—A portress.. प्रतिह्रियते प्रतिनिवर्त्यते जनः अनेन इति **प्रतीहारः**—(door, also door-keeper)—"उपसर्गस्य घञ्यमनुष्ये बहुलम्' इति पक्षे प्रतेदीर्घत्वम्-(६।३।१२२),—गौरादित्वात् ङीष् (४।१।४१)—'प्रतिहारो द्वारि द्वाःस्थे द्वाःस्थितायां तु योषिति" इति मेदिनी। Also 'सन्धि-विग्रह-सम्बन्धम् नानाकार्य-समुत्थितम्। निवेदयन्ति याः कार्यं **प्रतिहार्यस्तु** ताः स्मृताः'—*MG.* **6. चरितार्थता**—The state of **having attained the wished for object. "The attainment of the throne"**

(राज्य-प्राप्तिः)—Ś. 7. दुःखोत्तरा— 'उत्तर' here means 'प्रधान"—"Consisting chiefly of". Cf. 'सखीभिः अस्रोत्तरमीक्षिताम्—'Ku. V. 61 ; *Ra.VI.* 50; *VIII.* 39 ; or उत्तर=Full of—(Ś).Cf. 'कम्पोत्तरम्—' *Ra. XIII.* 28. In the case of an ordinary mortal the, attainment of the wished for objects causes happiness, while in the case of the king, it but enhances troubles. Cf. 'Unhappy lies the head that wears a crown'—**Shakespeare**. 'सुखोपरोधि वृत्तं हि राज्ञामुपरुद्धवृत्तम्'—Ra. XVIII. 19. **8. औत्सुक्य-मात्रम्**—Merely longing *(for possessing the throne)*. **प्रतिष्ठा**—*(i)* 'Position', 'high authority', here 'attainment of the throne.' Cf. 'प्राण-प्रच्युति-भीरुणा न च मया नात्मप्रतिष्ठार्थिना'—MR. *II.* 5. 'ते गच्छन्त्यनु ये विपत्तिषु पुनस्ते तत् प्रतिष्ठाशया'—I. 14. or *(ii)* 'glory', 'celebrity'. Cf. ' मा निषाद प्रतिष्ठां त्वमगमः शाश्वती समाः'—*UC. II.* 5. A man generally becomes extremely eager for the thing or the position which is mostly desired by him. But as soon as he is in possession of the thing or position in question, his former eagerness is no more seen. For a similar idea, Cf. "The hours we pass in **happy prospects in view** are more pleasant than those supplied with fruition'—**Vikar of Wakefield.** Śaṅkara reads "**प्रतिष्ठाम्**" and places it in opposition to "औत्सुक्यमात्रम्",making 'राज्यम्' *(understood)* as Nominative of 'अवसादयति' । This construction, however, gets a **weighty** support from the following line of Vik.—'अस्माकन्तु प्रतिदिनमियं **सादयन्ती** प्रतिष्ठाम्"—*Act. III.* 1. Note also that owing to this **very line**, the reading '**अवसादयति**' should be preferred to '**अवसाययति**' । C, however, censures this explanation and adopts the reading given in the text. **10. यथा श्रमाय**—*R* has "न च श्रमाय" but this is to be **rejected** as it contradicts the previous statement—'राज्ञां तु चरितार्थता दुःखोत्तरैव" । *K*, apprehending this anomaly, repeats the first negative (नाऽस्ति) before 'न च श्रमाय', the two negatives are here employed affirmatively *i.e.*, to affirm that royalty does but lead to personal fatigue. It is not for the removal of great fatigue

and *not not for* fatigue—M.—(25n. 4). **अति**—Implies **प्रशंसा।** 'Cf. "अति-शब्दः प्रशंसायां प्रकर्षे लङ्घनेऽपि च"–*Viśva qtd.BhD*.Cf.'तथा परिश्रमः परिखेदं नोत्पादयति यथायं परिश्रवः'—SV. I ; 'It shall advantage more than do us wrong'—**Julius Caesar**. *III I*. **11.** **धृतदण्ड** —In the case of the '**king**', 'दण्ड' means 'dispensation of justice', 'chastisement'. Cf. "यथापराधःदण्डानाम्"—Ra. I. 6, 'कृत-दण्डः स्वयं राज्ञा'—*XV*, 53, 'दण्डं दण्डयेषु पातयेत्'–*MS. VIII*. 126 ; *VII*. 22 ; 23 ; 24 ; In the case of '**umbrella**', it means the 'handle', Cf. '**ब्रह्माण्ड-च्छत्र-दण्ड** &c'—*DK* (*opening verse*) ; '**छत्रेषु** कनक-दण्डः:-*Kād* ; *Ku. VII*. 89. If the office of governing the people is looked after by an able minister, then it brings comfort and happiness ; personal supervision, on the other hand, conduces only to misery like a heavy parasol when carried in one's own hand. Cf. "His big umbrella was more of a liability than an asset"—**Edgar Wallace**–(**The Squeaker**). **12.** **आतपत्रम्**—आतपात् त्रायते इति आतप +त्रै+कः by 'आतोनुपसर्गे कः'-(3 2 3.)-इति कः—*BhD*, but it is **open to objection** as we have not **कर्मकारक**' in आतप। Cf. 'आदन्तात् धातोः अनुपसर्गात् **कर्मण्युपपदे** कः स्यात्, न अण्'—*SK*. 2941. Hence according to RM, 'क' comes by the *special rule* 'सुपि' obtained from the **योगविभाग** of the rule 'सुपि स्थः' (3.2.4). **Umbrella** *was known to the Hindus from a very ancient time*, It was considered to be the principal badge of sovereignty.—Vide HC.IV. 30. The *Mahā*. makes frequent mention of umberella (*Vide* दानधर्म–*section*); *Pāṇini long* before *Buddha* mentions umbrella (**छत्र**) and **gives its derivation** in the Sūtra 'इस्-मन-त्रन्-क्विषु च'–(6. 4. 97) and '**स्मृतिकार**'s both modern and ancient all follow the *Mahā*. in praising the gift of umbrella. For detailed discussion on various kinds of umbrella. *Vide Jukti-Kalpataru of Bhoja*.

Remark :—'प्रतिहारी' being an '**अधम**' 'attendant' **should not address** the king as '**देव**' । The proper terms is '**भट्टा**'(Cf. '**अहो धम्मा-वेक्खिदा भट्टि णो**'–Act, V after 169n. 4), Kāli'.s **प्रतिहारी** uses this terms in Māla. Same is the case with all the Bhāsa dramas, Ratnāvali.

MR. But excepting **one instance** quoted above, **प्रतिहारी** **everywhere** in Śak, uses the term देव । This is **suspicious.** May be it is a *lapsus calami* on the part of the copyists.

Text :—(नेपथ्ये) **वैतालिकौ—विजयतां देवः ।**

(*In the post-scenium*). Two Bards—Victory to Your Majesty-

प्रथमः— स्व-सुख-निरभिलाषः[१] खिद्यसे[२] लोक-हेतोः
मानिनी **प्रतिदिनमथवा ते वृत्तिरेवं-विधैव ।**
(ननमयय) **अनुभवति हि मूर्ध्ना[३] पादपस्तीव्रमुष्णं[४]**
शमयति परितापं[५] छायया संश्रितानाम्[६] ॥७॥

First—Indifferent[1] to your personal comforts[1], (*you*) toil[2] every day for (*the weal of your*) folk. Or, rather the course of your *action is*) just of this kind. For the tree bears on (*its*) head[3], the dreary[4] heat, (*while*) it allays by (*its*) shade, the heat[5] **(agony)** of the sheltered[6].(7)

V.L.—B supported by K & Ś, read 'सृष्टिः' for 'वृत्तिः' ।

स्व-सुखेति ॥ 'स्वस्य' निजस्य 'सुखे' आनन्दानुभवे 'निरभिलाषः' निराकाङ्क्षः सन् 'लोकस्य' प्रजायाः भुवनस्य वा 'हेतोः' अर्थात् सुख-साधनार्थं,(हेतौ ५मी)न एकाहं, न पञ्चषा-हम् अपितु 'प्रतिदिनम्' निरन्तरम् खिद्यसे' परिश्राम्यसि, दुःखमनुभवसि इत्यर्थः। (अत्र खिद्यते इति खिद परितापे' 'अस्य 'तुदादिकस्य' **कर्म-कर्तरि प्रयोगः**' इति राघवपादाः। एतत् तु **वामन-सम्मतम्** । तथाचोक्तं तेनैव काव्यालङ्कार-सूत्रवृत्तौ—'खिद्यते इति च प्रयोगः दृश्यते, सोऽपि **कर्म-कर्तरि** एव द्रष्टव्यः, **न-कर्तरि**' २।६ ; वस्तुतस्तु एतन्न **मनोरमं**, यतः **दैवादिकः खिद-धातुरपि** विद्यते (२५४३) ; अतः **कर्तरि प्रयोग एव समीचीनः**) । 'अथवा' इति पूर्वाक्षेपे 'ते वृत्तिः वर्तनम् 'एवंविधा' परार्थ दैन्यानुभवाय 'एव' इति निश्चये ॥ **पाठान्तर**-पक्षे 'ते तव सृष्टिः' अर्थात् विधातृ-कर्तृक-निर्माणम् ॥ 'हि' तथाहि 'पादपः' वृक्षः 'मूर्ध्ना' आत्मनः अग्र-भागेण 'तीव्रं' दुःसहम् 'उष्णं' मध्याह्न-संभवम् आतपं ('उष्णः स्यादातपे ग्रीष्मे' इति विश्वप्रकाशः) 'अनुभवति' स्वयं प्रत्यक्षीकरोति किन्तु 'छायया' अनातप-दानेन संश्रितानाम्' अथ उपविष्टानाम् अथच आश्रितानां 'परितः तापम्' **एकत्र** औष्ण्यम्, **अन्यत्र** खेदं, 'शमयति' नाशयति' ('तापोऽभितापे दवथौ खेदे च' इत्यजयः) । (**व्यवहार-समारोपात् समासोक्तिः । काव्य-लिङ्गाऽऽक्षेप-दृष्टान्ताः** ॥ 'मूर्ध्ना' इत्यत्र पदांशगतः **दुःश्रवत्व-दोषः**, 'तद्गच्छ

सिद्धयै कुरु देवकार्यम्' इति दर्पणोदाहरणवत्। स तु 'अनुभवति हि शाखी मस्तकेनोग्रमुष्णम्' इति पाठेन समाधेयः—इति सिद्धान्तवागीशपादाः। वृत्ति-श्रुत्यनुप्रासौ। मालिनीत्यपर-नाम मानिनी वृत्तम्) ॥७॥

157n.—1. वैतालिकौ—They are bards or panegyrists whose duty is to announce the fixed period of time and to praise the king and his ancestors with various kinds of songs accompanied by music. Cf. 'तत्तत्प्रहरण-योग्यैः रागैः स्तत्काल-वाचिभिः श्लोकैः। सरभसमेव वितालः गायन् वैतालिको भवति'—*Bhp*. Generally they are introduced in pair, but **single bard** is seen in NN ; Rat ; Karṇa-Sundarī and Karpura-Mañjarī. In MR वैतालिकs have been mentioned who do not seem to have been in the king's employment as they were remunerated later on (*Act. III.* 20), विताल+ठञ्-('प्रयोजनम्'-५।१।१०९)=वैतालिकः, or '**विताल**' by लक्षणा means '**विताल-गान**' (*singing in diflerent measures* or तालs), *like* '**मृदङ्ग**' meaning '**मृदङ्ग-वादन**' ('मृदङ्गो तद्वादनं शिल्पमेषाम्—*BhD*). Hence विताल-गानं शिल्पम् अस्य इति विताल +ठक् by 'शिल्पम्'—(4. 4. 55). '**लक्षणा is necessary**. 'मार्दङ्गिक इति। **मृदङ्ग-शब्देन मृदङ्ग-वादनं लक्ष्यते। मुख्यार्थे तु प्रयोगः न भवति'—T.** 'क्रियासु कौशलं शिल्पम्। ननु मार्दङ्गिकः इत्युदाहरणं वक्ष्यति। तत्र मृदङ्गं शिल्पम् इति कथं विग्रहः। **मृदङ्गस्य शिल्पत्वाऽसम्भवात्। तत्राह मृदङ्ग-वादनमिति।** मृदङ्ग-वादन-विषयकम् इत्यर्थः। मृदङ्ग-शब्दः लक्षणया मृदङ्ग-वादन-विषयक इति भावः'—BM. on 1605.

2. विजयतां—'वि-पराभ्यां जेः' (1. 3. 19) इत्यात्मनेपदम्। (कथं वनं बहु **विजयति**' ? 'बहुः विः' **पक्षी** यत्र तत् '**बहुवि**' इत्यर्थः-*Śrīpati Datta*. बहुवि= 'Abounding with birds'). **3. खिद्यसे**—खिद् is **निवादि**। 'अयं दैन्ये दिवादौ रुधादौ च'—SK. 2542. 'खिद' दैन्ये। खिद्यते—*'Ibid*. 2513. Cf. 'किं नाम मयि खिद्यते गुरुः'—VS. *I.* 'स पुरुषः यः खिद्यते नेन्द्रियैः'—Hit. '**खिद्यते**यो न भृत्येषु, याचकेष न **खिन्दति। खिद्यते** तेषु यैर्द्रव्यं दीयमानं न गृह्यते। —KR. 68 Now see Com. **4. पादपः**—Is peculiarly appropriate here, for it means 'पादान् चरणान् पाति रक्षति च' *i.e.*, the **king** also may be called 'पादप,' as he protects his subjects who are, **as** it were, his पादs *i.e.* support, mainstay—(R).

Remark :—This Śloka has been cited by *Dhanañjaya* in his "**दशरूपक**" as an instance of 'निरभिलाषता'।

Text :—**द्वितीयः— नियमयसि[1] वि-मार्ग-प्रस्थितानात्त-दण्डः[2]**
मालिनी **प्रशमयसि विवादं, कल्पसे[3] रक्षणाय[3]।**
(ननमयय) **[4]अतनुषु विभवेषु ज्ञातयः सन्तु नाम**
त्वयि तु परिसमाप्तं बन्धु-कृत्यं[5] प्रजानाम् ॥८॥

Second—With mace[2] assumed[2], (*you*) restrain[1] those that have taken to evil course, compose (*all*) dissensions and tend[3] for protection[3]. Let there be relatives, forsooth, in affluent[4] circumstances (*lit. when fortunes are not narrow*) but in you, are consummated the friendly duties[5] apropos of (*your*) folk. (8)

V.L.—'विमार्ग'—B. V. M. 'कुमार्ग'—R ; B supported by Ś reads 'संविभक्ताः' for 'सन्तु नाम'।

नियमयसीति ॥ 'आत्तः'–(७।४।४७)–गृहीतः 'दण्डः' राजदण्डः, तद्द्वारा दुष्ट-नियन्त्रणम् इत्यर्थः। ('दण्डो दमने सैन्ये' इति अभिधान-रत्नमाला) येन तादृशः सन् 'विमार्गेण' विरुद्धेन पथा 'प्रस्थितान्' प्रचलितान् उन्मार्ग-गामिनः जनान् इत्यर्थः। 'नियमयसि' असन्मार्गात् परावर्तयसि (घटादित्वात् मित्त्वं, तेन ह्रस्वः। **दण्ड-स्वरूपं यथाह** मनुः—'तस्यार्थे सर्वभूतानां गोप्तारं धर्ममात्मजम्। ब्रह्म-तेजोमयं **दण्डम्** असृजत् पूर्वमीश्वरः' (७।१४) ; तत् प्रयोग-विषये तत्रैव,–'स्वराष्ट्रे न्यायवृत्तिः स्यात्, **उग्रदण्डश्च** शत्रुषु। सुहृत्सु किल स्निग्धेषु ब्राह्मणेषु क्षमान्वितः' ७।३२) 'विवादं' प्रजानां दायाद्यर्थं परस्परम्-कलहं 'प्र-शमयसि' सुविचारेण प्रकर्षेण वारयसि। 'रक्षणाय' दस्यु-प्रभृतिभ्यः रक्षितुं ['तुमर्थाच्च भाववचनात्'—(२।३।१५)-इति ४र्थी] यद्वा रक्षति इति 'रक्षणः' पालक इत्यर्थः ['नन्दि-ग्रहि-पचादिभ्यः ल्युणिन्यचः, (३।१।१३४) '**नन्द्यादिः आकृतिगण' इति प्रभा**] तस्मै 'कल्पसे' सम्पद्यसे ['क्लृपि सम्पद्यमाने च',—(वाः—५८०) इति ४र्थी]। 'प्रजानां विभवेषु' सम्पत्सु बह्वीषु सतीसु, 'ज्ञातयः' बन्धुजनाः 'सन्तु नाम' इति **कुत्सायाम्**। ('सम्भावनायाम्' इति राघवपादाः)। 'बन्धूनां कृत्यं' त्रिविधं कार्यं विभागात् निवर्तनं, कलह-प्रशमनं, रक्षणञ्च। 'तु' इति पूर्वतो विशेषे। विभवे सति, च इत्यर्थः। 'त्वयि' दुष्यन्ते एव 'परिसमाप्तम्' साकल्येन पर्यवसितम्। त्वया एव प्रजानां हितं विहितं नान्येन इत्यर्थः (अत्र पूर्वार्धार्थो हेतुत्वेनोपात्तः। वाक्यार्थ-हेतुकं **काव्यलिङ्गम्**। नियमयसीत्यादि-**क्रिया-त्रयस्य** 'त्वम्' इति एक-कर्तृ-कारकत्वात् **दीपकालङ्कारः**। बन्धुभ्योऽपि **व्यतिरेक-कथनात्** **व्यतिरेकालङ्कारः**

व्यज्यते। पूर्वार्धे यमकम्। 'रक्षसि त्वं विपद्भ्यः' इति पठित्वा द्वितीयपादस्थ आत्मनेपद-प्रक्रमभङ्गः परिहर्तव्यः। मानिनीत्यपर-नाम मालिनी वृत्तम्) ॥८॥

158.—1. नियमयसि—(Vide 60n. 2.)—Bring to the right course, 2. **आत्त** &c.—आ+दा+क्तः कर्मणि=आत्तः, 'दा'='त' by 'अचः उपसर्गात् तः'-(7. 4. 47). 'स्वरात् किम्? सन्दत्तम्। उपसर्गात् किम्? **प्रादि-समासे** **मा भूत। अवदत्तं** विदत्तञ्च, भवेन दत्तः भवदत्तः'—**Prabhā**. 'अत्र "अव" इत्युपसर्ग-प्रतिरूपकम्, न तु उपसर्गः। ततश्च "अच उपसर्गात् त इति तो नभवति। तादृशे तु 'अवत्तम्' इति स्यात्'—BM. Read (222n. 1) 3. **प्रशमयसि—प्र+** शमयसि–Completely check, settle, adjust, Cf. 'शमयति गजानन्यान्'—Vik. V. 17. 4. **रक्षणाय**—'पालकाय' or 'रक्षितुम्'। **कल्पसे**—'Become competent', "to be adequate". (*Com.*). Cf. 'सति शेषे फलाय **कल्पते**'—*Ra. VIII.* 40; *V.* 13; '**कल्पते** विश्रमाय'—*Vik. III. I*; *Ku.V.*44 ;79 ; 'विषादाय **कल्पते**'—*Śak. VII.* ; *VI.* 24 ; *Rām. V.*25.7 ; PA&MD. 56. 5. **नाम**—Either in 'संभावना' or in 'प्राकाश्य'। Kinsmen appear, as is well known, in times of abundant riches, [सु समये अनेकेइ बन्धु वटे हय', असमये हाय् हाय् केह कारो नय ॥—**Hafiz** translated by Krṣṇa Candra], or in '**कुत्सा**'—it is certainly disgusting that kinsmen &c. 6. **तु**—Shows the contrast *i.e.* you are a friend both in weal and woe. Cf. 'प्रजानां **विनयाऽऽधानात्** **रक्षणाद् भरणादपि**। स पिता, पितर स्तासां केवलं जन्महेतवः'—*Ra. I.* 24 ; *Śak, VI.* 23. 7. **बन्धुकृत्यं**—Cf. 'उत्सवे व्यसने चैव दुर्भिक्षे राष्ट्र-विप्लवे। राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः'—*PT.*

Text:—राजा (आकर्ण्य)—एते **क्लान्त-मनसः पुनर्नवीकृताः**[1] **स्म**।

। (इति परिक्रामति)।

King (*Listening*)—Weary as (*I*) was in mind (*for pressure of duties*), (*I*) have been refreshed[1] (*by these* verses). (*Turns round*).

प्रतीहारी—एसो अहिणव-सम्मज्जण-सस्सिरीओ सण्णिहिद-होम-धेणू अग्गि-सरणालिन्दो। आरुहदु देवो (एषः अभिनव-संमार्जन[1]-सश्रीकः सन्निहित-होम-धेनुः अग्नि-शरणाऽलिन्दः[2] आरोहतु देवः)।

Portress—Here (*is*) the terrace[3] of the fire-sanctuary[3] with the libation-milch-cow (*standing*) close by, (*and looking*)[2] beautiful with recent purification (*lit. sweeping*)[2]. Let (*My*) Liege ascend.

राजा (आरुह्य परिजनांसावलम्बी तिष्ठन्)—**वेत्रवति! किमुद्दिश्य भगवता काश्यपेन मत्सकाशमृषयः प्रेषिताः स्युः ?**

किं तावद् व्रति[४]नामुपोढ़-तपसां[५] विघ्नैस्तपो दूषितं
शार्दूलविक्रीड़ित **धर्मारण्य-चरेषु केनचिदुत प्राणिष्वसच्चेष्टितम्[५]।**
(मसजसततग) **[६]आहोस्वित् प्रसवो[९] ममाऽपचरितैर्विष्टम्भितो[८] वीरुधा-[९]**
मित्यारूढ़-बहु-प्रतर्कम[१०] परिच्छेदाकुलं[११] मे मनः ॥९॥

King (*Ascending and leaning on the shoulders of the attendant*)—Vetravati, for what purpose could the anchorites be sent to me by the revered Kāśyapa ? Has the penance of the sages[4] who have (*just*) commenced (*their*) penitential rites[4], been frustrated by impediments ? Or, has any harm[5] been inflicted[5] by some one on animals that roam in the pious wood ? Or, may[6] it be[6] that the flowering of the creepers[9] has been stunted[8] by my misdeeds ? My mind, with[10] so many doubtful conjectures arising in it, has been perplexed[11] owing to indecision.[11] (9)

V.L.—For '०सश्रीकः' B reads '०रमणीयः'।

प्रतिहारीति ॥ 'सश्रीक': सुन्दरः ('शेषाद्विभाषा' इति कप् पाक्षिकः ५।४।१५४) 'सन्निहिता' संस्थापिता 'होमार्था धेनुः' इति 'होमधेनुः' (शाक-पार्थिवादिः), यद्वा होमस्य धेनुः (इति **अश्व-घासादिवत् तादर्थ्ये षष्ठी-समासः,** -६९८) यस्य तादृशः (विशेषण-द्वयेन पावित्र्याऽतिशयो व्यज्यते)। 'अग्नि-शरणस्य अलिन्दः' बहिर्द्वार-प्रकोष्ठः ('प्रघाण-प्रघणालिन्दा बहिर्द्वार-प्रकोष्ठके' इत्यमरः)। **किमिति** ॥ 'किं तावत्' इति वितर्के। 'व्रतिनां' चातुर्मास्यादि-नियमवतां तपस्विनाम्, अतएव उपोढ़म्' अत्युढ़म् अधिकम् ('उपोढ़ः कथितोऽत्यूढ़े समासन्ने विवाहिते' इति धरणिः') 'तपः' कृच्छ्रादि-कर्म ("तपः कृच्छ्रादि-कर्म च" इत्यमरः) येषां तेषां। 'तपोविघ्नैः' अन्तराय-कर्तृभिः राक्षसादिभिः इत्यर्थः (**इयं साध्यवसाना लक्षणा**) 'दूषितम्' विघ्नितम्। अर्थात् किं ते तत्प्रतिकार-प्रार्थनया अत्रोपस्थिता इत्याशयः। 'उत' अथवा 'धर्मारण्यं' तपोवनं, तत्र 'चरन्ति' ये, ("चरेष्टः" इति टः—३।५।१६) तेषु 'प्राणिषु' जन्तुषु (**धर्म-पदेन मुनीनां महत्वं सूचयता चेष्टितस्य अत्यन्तमनुचितत्वं ध्वन्यते**)। **'केनचित्' अविज्ञात-**

तपःप्रभावेण पामरादिना 'असत्' अनार्यम् आचरितं किम्। 'आहो' इति विकल्पे। 'स्वित् इति प्रश्ने। अथवा 'वीरुधां' लतानां 'प्रसवः' उत्पत्तिः, फल-पुष्प-पत्रादिः इत्यर्थः ('पुष्पं फलं च पत्रञ्च वृक्षाणां **प्रसवं** विदुः' इति धरणिः) ''मम' राज्ञः दुष्यन्तस्य 'अपचरितैः' असदाचरणैः अर्थात् दण्डनीये अदण्डनम्, अपि च अदण्डनीये दण्डनम्' इत्येवंविधैः पापैः। 'विष्टम्भितः' प्रतिबन्धं प्रापितः ('स्तम्भेः'–८।३।६७; २२७२) इति षत्वम्। "विष्टम्भः **प्रतिबन्धं** स्यात् प्रभेदे चामयस्य च" इति मेदिनी) 'इति' अनेन प्रकारेण ('इति प्रकरणे हेतौ प्रकाशादि-समाप्तिषु। निदर्शने प्रकारे स्यादनुकर्षे च संमतम्' इति विश्वः)। "आरूढाः" (८।२।३१) अधिगता 'बहवः प्रतर्काः' संशयाः यस्मिन् तादृशं मे मनः 'अपरिच्छेदेन' निश्चयाऽभावेन 'आकुलं' चञ्चलं भवति इति शेषः (तपतप इति स्विसवो इति **छेक-वृत्ति-श्रुत्यनुप्रासाः**। अपरिच्छेदा-कुलत्वं प्रति आरूढ़-बहु-प्रतर्क-पदस्य आर्थो हेतुरिति पदार्थ-हेतुकं **काव्यलिङ्गञ्च षष्ठी-सप्तम्योरभेदाच्च** विभक्ति-प्रक्रम-भङ्गः। विशेषण-प्रक्रम-भङ्गोऽपि नाशङ्कनीयः, आदौ विशेषणद्वयं, ततस्तदभाव, इत्येव क्रमस्य विवक्षितत्वात्। **शार्दूल-विक्रीड़ितं** छन्दः) ॥९॥

159n.—1. एते **क्लान्त-मनसः (वयम्)**—Here there is another instance of our poet's **deviation from the Pāṇinian rules.** The rule 'अस्मदो द्वयोश्च' (1. 2. 59) allows the use of अस्मद् in the **plural** number for **singular** or **dual**. The Vārt. '**सविशेषणानाञ्च** प्रतिषेधो **वक्तव्यः**' however, restricts such uses when, **अस्मद्** is qualified by any adjective (144n. 1). Later grammarians, however, justify the plural in certain cases by **construing the epithet predicatively**. Read 'न च **विधेयो**ऽर्थे विशेषण-मित्यतिदेशोभवत्येव'—*HD*. '**विधेयत्वात् भवत्येव**'—*Śabda-Kaustuva.* Hence the following uses may be deemed quite correct, 'एते वयममी दाराः कन्येयं कुलजीवितम्'—*Ku.* 'वयं क्व वर्णाश्रम-रक्षणोचिता'—*Ki*, but in this particular case there is, it seems, no justification. **2. अग्नि-शरणा-लिन्दः**—समास is either with '**अलिन्द**' or '**आलिन्द**'—A raised quadrangular place in front of a house-door. 'अल्यते भूष्यते इति अल्+किन्दच् बाहुल्कात्। **प्रज्ञाद्यणि आलिन्दोऽपि**'— BhD. 'गृहैकदेशे **आलिन्दः** प्रघाणः प्रघणस्तथा'—***Amara-mālā.*** **3. दूषित**—Defiled ; hampered ; when णिच् follows

after दुष् then the गुण of उपधा (*i.e.* ओकारः) becomes 'ऊकारः' by 'दोषो णौ'—(6. 4. 90), "दुष्यते उपधाया ऊत् स्यात् णौ"—BD. **उपोढ**—(Hoarded, accumulated or commenced),=उप+वह्+क्त+कर्मणि (ह्=ढ़ by 'ह्रोढः'—8.2.31 Cf. 'उपोढराग'—Vik. II ; Śak. *VII*. 10). **4. आहोस्वित्**—Generally introduces a **third** alternative. 'स्वित् प्रश्न-वितर्कयोः'——*Haima*, 'किं द्विजः पचति, आहोस्विद् गच्छति' —*BD*. **5. ममापचरितैः** &c.—Improper conduct on the part of the king is supposed to tell upon the produce of the soil, and to create various calamities among the subjects. Read '**राज्ञोऽपचारात्** पृथिवी स्वल्प-शस्या भवेत् किल। अल्पायुषः प्रजाः सर्वा दरिद्रा व्याधि-पीड़िताः'— Qtd. R. 'राजन् प्रजासु ते **कश्चिदपचारः** प्रवर्तते। तमन्विष्य प्रशमये र्भवितासि ततः कृती'—*Ra. XV*. 47. 'आत्रेयि ! न **राजापचारमन्तरेण** प्रजासु अकालमृत्युः सञ्चरति'—*UC. II.* 'राज-दोषैः' विपद्यन्ते प्रजा ह्यविधि-पालिताः। **असद्वृत्तौ हि नृपतौ** अकाले म्रियते जनः'—*Rām. VII.* 73. **प्रसवः**—Flowers. Cf. 'लोध्र-प्रसव'—PA&MD. II ; 2. Ra.IX.28 ; Ku. I. 55 ; UC.II. 20. **6. वीरुधाम्**—वि+रुध् ; क्विप्–(3. 2. 178). 'अन्येषामपि दृश्यते'—(6. 3. 137)—इति **दीर्घः**। वीरुध्—*BhD*. **7. अपरिच्छेद** &c.—परिच्छेदः—Lit. 'what is cut all round, hence accurately definable, न परिच्छेदः—इति 'अपरिच्छेदः'—Inconclusion, तेन आकुलम्। *Cf. MM. I.* 31 ; *Ra. X.* 28, *MS, IV*. 9. For a parallel idea Cf. AR. I. 25.

Text :—प्रतिहारी—देवस्स भुअ-दण्ड-णिव्वुदे अस्सम-पदे कुदो एवं। किन्तु सुचरिदाहिणन्दिणो इसीओ देवं सभाजइदुं आअदे त्ति तक्केमि।

(देवस्य भुज-दण्ड-निर्वृते[1] आश्रमपदे कुत एवम्। किन्तु सुचरिताऽभिनन्दिन[2] ऋषयः देवं सभाजयितुमा[3]गता इति तर्कयामि)।

Portress—Your Majesty with (*your*) strong arm, keeping satisfied[1] the seat of the hermitage, how could this be ? But methinks the anchorites, rejoicing[2] at (*your*) good deeds[2], have come to pay[3] homage[3] to Your Majesty.

(ततः प्रविशन्ति गौतमी-सहिताः शकुन्तलां पुरस्कृत्य मुनयः। पुरश्चैषां कञ्चुकी पुरोधाश्च)।

कञ्चुकी—इत इतो भवन्तः

(Enter the sages leading, Śakuntalā along with Gautamī, and in advance of them, the Chamberlain and the Chaplain).

Chamberlain—This way sirs, this way.

शार्ङ्गरवः—शारद्वत ! [4]महाभागः कामं नरपतिरभिन्न[5]-स्थितिरसौ
शिखरिणी कश्चिद्वर्णाना मपथ मपकृष्टो[6]ऽपि भजते।
(य मनसभलग) तथापीदं शश्वत्[7] परिचित-विविक्तेन[8] मनसा
जनाकीर्णं मन्ये हुतवह[9]-परीतं गृहमिव ॥१०॥

Śārṅgarava—Śāradvata, I admit that this illustrious[4] monarch has never swerved[5] from propriety[5] *(and that)* none–not even the [6]lowest of any classes,[6] seek the path of wrong, yet with *(my)* mind [7]ever familiarised[8] to solitude,[8] *(I)* regard this *(place)* thronged with men, like a house encircled[9] by fire[9]. (10)

V. L.—'देवस्य' &c.—R. Omitted by others. '०नन्दिनः'—R.V.M. ०'अभिनन्दिनः'—B. S. 'सभाजयितुम्'—R. V. M. B. 'संभावयितुम्'—S 'प्रविशन्ति'—R.V.M.S. 'प्रविशतः'—B. 'सहितौ'—B. 'सहिताः' —R.V M.S. 'पुरस्कृत्य'— R.V.M. 'आदाय'—B. 'कण्वशिष्यौ'—B. 'मुनय':—R. V.M.S. **Only B, P, HS have 'पुरोधाः'।** 'असौ'—Mackenzie Mss. B. M 'अहो'—R.V.K ; S reads "वनं" for 'गृहम्"।

महाभाग इति॥ 'अभिन्ना' अपरित्यक्ता 'स्थितिः' लोकमर्यादा येन तादृशः मर्यादा-पालकः ('संस्था तु मर्यादा धारणा स्थितिः" इत्यमरः) 'असौ पुरतोदृश्यमानः 'नरपतिः' दुष्यन्तः 'महाभागः' प्रशस्त-भाग्यवान् 'कामम्' इति स्वीकर्तव्यम् ('अकामानुमतौ काममसूयो-पगमेऽपि च' इति रुद्रः), यद्वा, 'कामम्' अतिशयेन 'महाभागः' श्रेष्ठ इति राघवपादाः। नितरां भाग्यवान् इत्याशयः। तथा 'वर्णानां ब्राह्मणादीनां मध्ये 'अपकृष्टोऽपि' जात्या कर्मणा वा अतिहीनोऽपि (का कथा उत्कृष्ट-वर्णानाम् इति अपि-शब्देन द्योत्यते) 'कश्चित् अपथम्' असन्मार्गं ['पथो विभाषा'—(५।४।७२) इति पाक्षिकः समासान्त-विधिः। ततः 'अपथं' नपुंसकम्'—(२।४।३०) इत्यनेन 'अपन्थाः' 'अपथं' पदद्वयम्]। ('अपन्था स्त्वपथं तुल्ये' इत्यमरः, तत्पुरुषात् इत्येव। अपथो देशः—इति दीक्षितः) 'न भजते' सेवते इत्यपि 'कामम्' स्वीकर्तव्यम्, 'तथापि' उद्वेग-कारेणे असत्यपि 'जनैः लोकसमूहैः 'आकीर्णं' पूर्णम् 'इदम्' पुरोवर्ति स्थानं 'शश्वत्' 'निरन्तरं 'परि-

चित्तम्' अभ्यस्तं 'विविक्तं' विजनं ('विविक्तौ पूत-विजनौ' इत्यमरः) यस्य येन वा, तादृशेन 'मनसा' उपलक्षितोऽहं, मनसा हेतुना करणेन वा (उपलक्षणे, हेतौ, करणे वा तृतीया) 'हुत-वह्नेन' अनलेन 'परीतं' वेष्टितं भस्मीक्रियमाणं 'गृह-मिव' अविलम्बेन त्याज्यं 'मन्ये' सम्भावये (अत्र पूर्वार्धे राज-प्रजयोः साधुत्वरूपे कारणे सत्यपि निरुद्वेग-रूप-कार्या-ऽनुत्पत्तिः तद्विरुद्ध-मुखेनोक्तम् इति विशेषोक्तिः। अथच यदग्नि-परीतत्वं कार्यं तत्कारणा-भावस्य तद्विरुद्ध-मतेन पूर्वार्धम् उक्तेन विभावना। साधक-बाधक-प्रमाणाभावात् सन्देह-सङ्करः। 'अपकृष्टोऽपि" इत्यत्र अर्थापत्तिः। 'मन्ये'-शब्दस्य उत्प्रेक्षा-द्योतकत्वेऽपि अत्र न तथा। तत् सामग्र्यभावात्। उपमयैव गतार्थत्वात्। तेनात्र मन्ये-शब्दस्य बुद्धित्व-मात्र-मर्थः। अनुप्रासाः। शिखरिणी वृत्तम्) ॥१०॥

160n.—1. सुचरिता &c.—The country throughout is free from let by the prowess of your massive arm and all are satisfied (Ra. IV. 3) with your successful protection. Hence they must have come to gratulate you on your 'सुचरित'। **2. सभाजयितुं**—To gratulate; to render homage to. "आनन्दयितुं द्रष्टुं, वा"—'अथ द्वे आनन्दन-सभाजने'—*AK* qtd. MN on ŚPB. *XIII.* 14. 'सभाज प्रीति-दर्शनयोः। प्रीति-सेवनयो रित्यन्ये। सभाजयति'—SK—1919. Cf. 'असभा-जयत्'—ŚPB. XIII. 14; 'सभाजने मे भुजमूर्ध्वबाहुः'—Ra. XIII. 43; XIV.18; "पुण्यश्लोकः' सभाजयन्"–UC.1.7. **3. कामं**–(25n.1). **4. महाभागः** –महान् भागः (भाग्यं)यस्य सः–Very fortunate. Cf. 'आरभ्योत्पत्तिमामृत्योः कलङ्को यस्य न भवेत्॥ स्याच्चैवाऽनुपमा कीर्ति र्महाभागः स उच्यते'॥ Also *MS. III.* 192. **5. अभिन्न-स्थितिः**—'स्थिति'=मर्यादा'—Correctness of conduct (*Com.*) **अभिन्न**—Not transgressed, hence the whole epithet means 'not transgressing the proper bounds of duty.' Cf. 'स्थितेः अभेत्ता स्थितिमन्तम्'—*Ra. III.* 27. 'स्थितेः अभेत्ता मर्यादापालकः'—MN. **6. अपथम्**—नञ् has the sense of 'तदन्यत्व' *i.e.,* other than (*the good path*).Cf."तत् सादृश्यम् अभावश्च तदन्यत्वं तदल्पता। अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः"॥ *Now see Com.* **7. शश्वत्-परिचित** &c.—Perpetually familiarized with solitude. Śārṅgarava is afraid of the place which is swarmed with people. शश्वत् may also

be taken as a part of the compound. 8. जनाकीर्णं=जनाकीर्ण-स्थानम् ("विशेषण-मात्रप्रयोगः विशेष्य-प्रतिपत्तौ"—KSV. 5. 1. 10). On this M observes— "जनाकीर्णम्" may perhaps be used as in (*Vik. Act. II*) for a substantive, meaning "a crowded thorough-fare".

आर्या शारद्वतः—स्थाने[१] भवान् पुर-प्रवेशादित्थम्भूतः[२] संवृत्तः। अहमपि—
[22, 18 अभ्यक्त[३]मिव स्नातः[४], शुचिरशुचिमिव, प्रबुद्ध[५] इव सुप्तम्[६]।
12, 15] [७]बद्धमिव स्वैर-गति[८]र्जनमिह सुख-सङ्गिन[९] मवैमि ॥११॥

Śāradvata—It is but proper[1] that[2] you have become thus inclined[3], having entered the city. I, too, regard (*this*) people[9] here given to pleasures[9] (*in the same manner*) as the bathed[4] (*look upon*) one oil-stained[3]; as the pure, (*the*) impure; as the awake,[5] the drowsing[6]; (*or*) as the free-moving[8], the enchained[7]. (11)

शकुन्तला (निमित्तं सूचयित्वा)—अम्महे, किं मे वामेदरं णअणं विप्फुरदि (अहो, किं मे वामेतरं नयनं विस्फुरति?)।

Śakuntalā—(*Gesticulating an omen*) Alack! Why does my right eyelid throb[1]?

गौतमी—जादे, पडिहदं अमङ्गलं। सुहाइं दे भत्तु-कुल-देवदाओ वितरन्तु (जाते! प्रतिहत[२]ममङ्गलम्[३]। सुखानि ते भर्तृ-कुल-देवता वितरन्तु)।

॥ (इति परिक्रमाति) ॥

Gautamī—My child, averted[2] (*be*) the ill[3]. May the tutelary deities of your husband confer joy on you. (*This said, turns round.*).

V.L. 'स्थाने'—B.M.S.K. 'जाने'—R.V. For 'इत्थंभूतः संवृत्तः', B has 'ईदृशः संवेगः'। 'अहमपि'—R.V.M.S. 'अहं तु'—B. For 'किं मे' S reads 'किमिति'। 'वामेतरम्'—R.V.S.B.M. 'वामं दक्षिणम्'—R's Com. 'विस्फुरति'—R. V. M. B. 'विकरोति'—S. 'सुखानि'—R. V. B. S. 'सुभानि'—M.

शारद्वत इति—'इत्थम्भूतः' उद्वेग-युक्तः 'प्रायेण समानाः सहचरा भवन्ति' इति न्यायात्। ("स्थाने' इत्यव्ययं युक्तमित्यर्थः ("स्थाने तु कारणार्थे स्यात् युक्त-सादृश्ययोरपि" इति मेदिनी)। अभ्यक्तमिति—'स्नातः' स्रोतसि कृताभिषेकत्वात्

निर्मलः जनः 'अभ्यक्तमिव' स्नानात् प्राक् तैल-मर्दनादिना मलिनमिव। ("मूर्ध्नि-दत्तं यदा तैलं भवेत् सर्वाङ्ग-संगतम्। स्रोतोभि स्तर्पयेत् बाहू अभ्यङ्गः स उदाहृतः' इति शुद्धितत्व-धृतायुर्वेद-वचनम्॥ 'आभाम्' इति भाषा॥ अनेन पाप-श्लिष्टत्वं ध्वन्यते), 'शुचिः' विहित-काय-मनो-वाक्शौचः जनः 'अशुचिमिव' अपूतमिव (इति **गुणोत्प्रेक्षा**। अन्या स्त्रिस्तः **क्रियोत्प्रेक्षा**। अनेन संसारे वर्तमानानां मोक्षाऽनुपयोगित्वं व्यज्यते), 'प्रबुद्धः' जागरितः (अविद्या-जित इति गूढार्थः) 'सुप्तं' निद्राणं मायाच्छन्नम् 'इव' इत्याशयः '(अनेन अज्ञानाविद्धत्वं व्यज्यते। तथाचोक्तं श्रीमद्भगवद्गीतायां "**यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः**" २।६९) 'स्वैरा' इच्छानुरूपा स्वाधीना इति यावत् ("मन्द-स्वच्छन्दयोः स्वैरम्' इत्यमरः। 'स्वादीरेरिणोः', वाः—७३ इति वृद्धिः) 'गतिः' गमनं यस्य सः स्वच्छन्दचारी 'बद्धमिव' शृङ्खलादिभिः बन्धनमापन्नमिव ('अनेन प्रयत्न-सहस्रा-नयने पर-वशवदत्वं ध्वन्यते) 'अहमपि इह' अस्मिन् राजपुरे 'सुखसङ्गिनं' संसार-सुखासक्त-चेतसं 'जनम् अवैमि' जानामि (लोकानां सुखा-सक्तता-कथने तेषां ममूढत्वं व्यज्यते)। त्वं तु नगरं जनाकीर्णं दृष्ट्वा उद्विग्नोऽसि, अहं पुनरत्र अविद्या-च्छन्न-जनानां दशा विभाव्य सुतराम् अनुकम्पितास्मि इति हृदयम्। (**मालोप-मेयम्**। **तुल्ययोगिता** च। **छेक-वृत्त्यनुप्रासौ**। "स्नातोऽभ्यक्तमिव, प्रबुद्धः सुप्तमिव स्वैरगतिः संयतमिव" इति पठित्वा **प्रक्रम-भङ्गः** समाधेयः। **आर्या** जातिः) ॥११॥ **शकुन्तलेति**॥ "अम्महे" इति सौरसेन्यादिभाषायां सप्रमाद चिन्ता-द्योतक मव्ययम्।

161n.—1. स्थाने—(अव्यय) = 'सत्यम्' (शब्दरत्नावली) or 'योग्यम्' (अमरकोषः)। Cf. '**स्थाने** हृषीकेश तव प्रकीर्त्या जगत् प्रहृष्यति'—Gitā. *XI.* 36; '**स्थाने** प्राणाः कामिनां दूत्यधीनाः'—Māla. *III.* 14; *Ku. VII.* 65; *VI.* 67; *Ra. VII.* 13. **2. अभ्यक्तमिव** &c.—Mark how beautifully Śārṅgarava and Śāradvata are differentiated in regarding the worldly people. The former is disgusted with the bustle and tumult of the city-people, while the latter is aggrieved with their addiction to pleasure and consequent aversion to पर-ब्रह्म-चिन्ता। **स्नातः**—Refers to bodily cleanliness. Bathing purifies a man both *externally* and internally. Cf. 'स्नानं पवित्रमायुष्यम् श्रम-स्वेद-मलापहम्'—*Rāja-ballava.*

'नद्यां प्रत्येकशः स्नाने भवेत् गो-दानजं फलम्'—*MP*; BC. *XI*. 38. Again a man annointed with oil is considered **unclean**, specially by one who has bathed. Cf. 'तैलाभ्यङ्गे चिताधूमे मैथुने क्षौरकर्मणि। तावद्भवति चाण्डालो यावत् स्नानं समाचरेत्'॥ "शिरः स्नातश्च तैलेन नाङ्गं किञ्चिदपि स्पृशेत्'—*MS. IV*. 83. Also *Com*. 3. **शुचिः**—Refers to purity of body, mind and speech (Com.) **4. प्रबुद्धः**—One who is awake *i.e.* who is **endowed with तत्त्वज्ञान** and free from non-knowledge (अविद्या)। **सुप्तम्**—Is the reverse of **प्रबुद्ध** (*Vide Com.*) *i.e.* **those that are devoid of तत्त्वज्ञान**। Read the commentaries of Śaṅkara and Śrīdhara on the Gītā, *II*. 69. "बालस्तावत् क्रीड़ासक्तः, तरुणस्तावत् तरुणी-रक्तः। वृद्धस्तावत् चिन्तामग्नः परमे ब्रह्मणि कोऽपि न लग्नः'—मोहमुद्गरः। ५. **अवैमि**—(138n. 3). **6. अम्महे**—(243 n.2); also 'चिन्तायां सप्रमादायाम् अम्महे इति कल्पितम्। शब्दरूपं विशेषेण प्रयोक्तव्यं प्रयोक्तृभिः" ॥ 7. **वामेतरं—वामम् इतरत् यस्मात् सः। (बहुव्रीहिः)**, **सर्वनाम-संज्ञा** is barred by '**न बहुव्रीहौ**' (1. 1. 29). In **५मी तत्पुरुष** the form will be '**वामेतरत्**'–(*R*). Cf. 'वामेतरस्तस्य करः प्रहर्तुः'—*Ra. II*. 31 ; The throbbing of the right side of a woman and that of the left side of a man are evil omens. Cf.'दक्षिण-चक्षुः-स्पन्दनं बन्धु-दर्शनमर्थलाभं वा। वाम-चक्षुः-स्पन्दनं बन्धु-विच्छेदं धन-हानिं वा॥ स्त्रीणामेतत् फलमविकलं दक्षिणे वैपरीत्यम्'—*Garga*."किं णेदं स्फुरादि दाहिणं णअणं"—*MK. IV*; 'स्फुरादि दाहिणं लोअणं वेबदि मे हिअअं'—*Ibid. VII*; 'सव्यंच नेत्रं स्फुरति प्रसह्य'—*Ibid. IX*.10 ; 'गृहीते हर-कोदण्डे रामे परिणयोन्मुखे। पस्पन्दं नयनं वामं जानकी-जामदग्न्ययोः"—Mahā-Nātaka; *MP. Ch.* 215 *BRŚ. Ch IV.*; *Vide*. (21*n*. 3). Like the Hindus, augury had also been cultivated as a science in ancient *Rome*, as can be seen from **Plutarch** especially of his *Julius Caesar*. For similar idea, Cf "Desdemona—Mine eyes do itch ; doth that bode weeping"—**Othello.** *Act. IV*. 3 ; **Julius Caesar**. *I*. 3. 26-32. **8. प्रतिहतम्**—Is generally used to mean that an evil forboden by a bad omen is averted. It corresponds to our Bengali '**বালাই**' or **ষাট্**' (God forbid). Mark that the past tense is due to a strong desire.

Text :—पुरोधाः (राजानं निर्दिश्य)—भो भोस्तपस्विनः। असावत्रभवान् वर्णाश्रमाणां रक्षिता प्रागेव मुक्तासनो वः प्रतिपालयति। पश्यतैनम्[१]।

Chaplain (*Pointing to the king*).—Ye anchorites, there is His Majesty, the guardian of (*all*) grades and orders (*of life*), who having but just quitted (*his*) seat, is awaiting[1] you. See him.

शार्ङ्गरवः—भो महाब्राह्मण! [२]काम मेतदभिनन्दनीयम्। तथापि वयमत्र मध्यस्थाः[३]। कुतः—

वंशस्थ भवन्ति नम्रास्तरव फलागमै,[४] र्नवाम्बुभि[५] र्दूर-विलम्बिनो[६] घनाः[७]।
(जतजर) अनुद्धताः[८] सत्पुरुषाः समृद्धिभिः[९], स्वभाव एवैष परोपकारिणाम्[१०] ॥१२॥

Śārṅgarava—Ho mighty Brāhmaṇa! true[2] this (*is*) commendable, still we (*are*) indifferent[3] about . that, For—
The (*loftiest*) trees *bend down* by[4] the appearance of fruits[4], clouds[7] (*when pregnant*)[5] with new water[5], *hang*[6] *very low*[6]; good men are (*never*) [8]turned arrogant[8] by riches[9]. This (*is*) indeed the nature of the succourers[10] of others. (12)

V. L.—B. HS read 'महात्मन्' for 'महाब्राह्मण'। 'दूरविलम्बिनः'—R. V. B. S. 'भूरिबिलम्बिनः'—Apte. M. K. 'फलोद्गमैः'—B Nīti-Śataka ; Others read 'फलागमैः'।

पुरोधा इति—('पुरोधास्तु पुरोहित' इत्यमरः)। 'वर्णानाम्' ब्राह्मण-वैश्य-क्षत्रिय-शूद्राणाम् 'आश्रमाणां' ब्रह्मचर्य-गार्हस्थ-वानप्रस्थ-सन्न्यासादीनां च ['कर्तृ-कर्मणोः कृतिः' (२।३।६९) इति कर्मणि षष्ठी] 'रक्षिता' रक्षकः (तृच्-प्रत्यय-निष्पन्नोऽयं शब्दः। तृणा निष्पन्ने षष्ठी वाधिता स्यात्—२-३-६९) 'प्रागेव मुक्तासनो' इत्यनेन विनयाऽतिशयो व्यज्यते। 'प्रतिपालयति' प्रतीक्ष्योऽपि प्रतीक्षत इति भावः (अनेन भक्तयतिशयो व्यज्यते)। **शार्ङ्गरव इति**—'मध्यस्था' उदासीना, न निन्दाम नवा प्रशंसामः, अतः एतदस्माकं वर्णनीयं न भवति इत्यर्थः। **भवतीति**—'तरवः' वृक्षाः 'फलानाम् आ' समन्तात् 'गमः' प्राप्तिः। तैः अर्थात् फलोत्पत्तिभिः नम्राः' अधोमुखा इति किमत्र चित्रमित्यर्थः। विनीताश्च 'भवन्ति'। 'घनाः (३।३।७७) मेघाः ("घनो मेघो, घनः सान्द्रः, कास्यताल-ध्वनि र्घनः। घनः स्वर्गो, घनो नित्यो, घनः स्याल्लौह-मुद्गरः" ॥ इति गदसिंहः) 'नवानि' वर्षा-सम्भूतानि 'अम्बूनि' तैः 'नवाम्बुभिः' जलपूर्णाः सन्तः, 'दूरं' गगनात् बहुदूरं भूतल-सन्निधिम् इत्यर्थः 'विलम्बन्ते' इति

'दूरविलम्बिनः' भूमेः समीपवर्तिनः अर्थात् अतिशय-वर्षुका भवन्ति। अथच विनीता भवन्ति इत्यनुषज्यते। 'सत्पुरुषाः' साधवः 'समृद्धिभिः' ऐश्वर्योत्कर्षैः 'अनुद्धताः' औद्धत्य-रहिता नम्रा इति यावत्। भवन्ति इत्यनुषज्यते (तेन क्रियादीपकम्। तुल्ययोगिता इति केचित्। तरु-घनयोः अचेतनयोः नम्रत्वात्। दूर-विलम्बितत्वाच्च वस्तुतो भिन्नाऽभ्याम् अभेदेन अध्यवसिताभ्याम् अतिशयोक्तिः। विनयस्य साधारण-धर्मस्य नम्र-दूरविलम्ब्यनुद्धत-पदैः पृथक्-निर्देशात् मालाप्रति--वस्तूपमा। दुष्यन्त-लक्षणे विशेषे प्रस्तुते अप्रस्तुत-सत्पुरुषस्य वचनात् अप्रस्तुत-प्रशंसापि। तुरीय-चरणे हि-शब्दाभावेऽपि अर्थान्तरन्यासः। हेत्वनुप्रासौ च। वंशस्थविलं वृत्तम् ॥१२॥

162n.—1. **पुरोधाः** (B)—This seems to be the **genuine** reading in spite of '**पुरोहितः**' being used in all other recensions, *for reasons* [*Vide*182n.2]; पुरोऽग्रे धीयते 'पुरसि च' (उ–१३०) इति धाञोऽसिः। Note That Kāli. *usually* writes **पुरोधाः** elsewhere. *Cf.* "कोसलाधिपतये **पुरोधसम्**"—*Ra. XI.* 49; 'पश्चिम-क्रतु-विदा **पुरोधसा**'—*XIX.* 54. **महाब्राह्मण**—महत् when compounded (2. 1. 61) with such words as मांस, शङ्ख, द्विज, &c. conveys a bad sense. 'शङ्खे तैले तथा मांसे वैद्ये ज्योतिषके द्विजे। यात्रायां पथि निद्रायां महच्छब्दो न दीयते'॥ Hence '**महाब्राह्मण**' means a low Brāhmin. But such an epithet can hardly he applied to the king's hierophant. It may be argued that the aforesaid Kārikā has nothing to do with **synonyms** (*i.e.* ब्राह्मण)। Or, most probably the Kārikā is of *later origin* as Kāli. has compounded 'महत्' with some of the **forbidden** words in a **good sense**. Cf. 'सन्तानकाकीर्ण**महापथं**'—*Ku. VII.* 3; where 'महापथं' refers to the *principal high-road.* Also 'पुण्यो**महाब्रह्म**-समूहजुष्टः' —*BK.*1. 4. 'पर्षद्वलान्**महाब्रह्मैः**'—*Ibid IV.* 12. In the present case, however, the epithet may be taken a bit *sarcastically* for Śārnga--rava did not like the sycophancy of the priest regarding the humility of the king. **2. मध्यस्थाः**—Indifferent. The idea is—You may exaggerate humility on the part of the king, but it does not affect us in the least; we, however, consider it but natural to

every benevolent person. Besides we have no suit to urge nor any petition to present. We are sheer escorts of Śak. and we are not directly concerned with how the king receives us. Cf. Gitā II. 56. 3, **तरवः**—According to *R*, the word refers to the fruit-bearing trees such as mango &c., cryptogamia (वनस्पति) as a whole being excluded. **4. घना**:—हन्+अप् भावे [**"मूर्तौ घनः"**–3. 3. 77 ; 'काठिन्यार्थे हन्-धातोः परः भाववाच्ये अप्-प्रत्ययः स्यात्, हन्-धातु-स्थाने घन-धातुश्च आदेशः स्यात्—**Prabhā** ; otherwise the form is **"वधः"** Cf. the idea with "का पुरुषार्थ-समीहा द्योतयतः शर्वरीं शशाङ्कस्य। तर्पतयां भुवमखिलां सलिल-मुचां कोऽभिकांक्षितोलाभः॥ मण्डयितुं वियद्-दुदयति पुरुहूत-धनुर्विनैव फलवाञ्छाम्। अनपेक्षिताऽऽत्म-कार्यः पर-हित-करण-ग्रह स्सतां सहजः॥"—KM. 1030-31 (of दामोदर-गुप्त)।

Remark—This Śloka, occurs, in *Bhartṛhari's NŚ.* (62) where '०उद्गमैः' is substituted for आगमैः'। [*Now see* 69n. *Remark*].

Text :—**प्रतीहारी—देव, पसण्ण-मुह-वण्णा दीसन्ति। जाणामि विस्सद्ध-कज्जा इसीओ** (देव, प्रसन्न-मुख-वर्णा[1]दृश्यन्ते। जानामि विस्रब्ध-कार्या[2]ऋषयः)।

Portress—My Liege, (the sages) appear to have, a placid[1] appearance on (*their*) faces[1]. (*I*) believe, theirs[2] is a peaceful errand[2].

राजा (शकुन्तलां दृष्ट्वा) **अथाऽत्रभवति—**

आर्या **केयमवगुण्ठनवती नाति-परिस्फुट-शरीर-लावण्या[1]।**
[12, 18
12, 15] **मध्ये तपोधनानां किसलयमिव[2] पाण्डु-पत्राणाम्[3]॥१३॥**

King (*Looking at Śakuntalā.*)—But this noble lady—who could she be possessed of a veil and with[1] the glimmer of her person not fully displayed[1], (*standing*) amongst the anchorites. like a fresh[2] bud in the midst of seared[3] leaves[3] ? (13)

V. L.—'केयम्'—B. 'कास्वित्'—R. V. M. S.

प्रतीहारीति—'प्रसन्नाः' राक्षस-भय-विरहितत्वात् अकलुषिताः मुखस्य 'वर्णाः' रूपाणि येषां तादृशाः ('**वर्णः** स्वर्णे व्रते स्तुतौ'। **रूपे द्विजादौ शुक्लादौ** कुथायामक्षरे गुणे' इति हैमः) 'विस्रब्धं' शान्तम् उद्वेग-शून्यं 'कार्यं' येषां

तथाविधाः, संभ्रमे तु मुखवर्णस्य विपर्यास स्स्यात्, अतः "किं तावत् प्रतिनाम्" इत्यादि-वितर्कस्य नास्त्यवसर इति हृदयम्॥ केयमिति—'अथ' इति संशय-द्योतकः ('अथाऽथो संशये स्याताम् अधिकारे च मङ्गले' इति मेदिनी)। 'तप' एव धनम्' इव यस्य इति 'तपोधनः' (इति कुल्लुकभट्टः) तेषां पीत-वल्कल-परि-हितानाम् ऋषीणां 'मध्ये पाण्डूनां' सित-पीत-वर्णानां जीर्णानामित्यर्थः ('सित-पीत समायुक्तः पाण्डुवर्णः प्रकीर्तितः' इति सुभूतिः) 'पत्राणां मध्ये 'किसलयमिव' नवोद्गत-पल्लवमिव 'अवगुण्ठनं' सशिरो-मुख-प्रावारणं तद्वती, अतएव 'नाति-परिस्फुटं' न सम्यक् बहिरुद्भिन्नं 'शरीरस्य लावण्यं' कान्तिः यस्याः तथाविधा ('नातिपरिस्फुटे' इति नञ् समास, इति यत् राघवपादै रुक्तं स प्रमाद एव। तथाचोक्तं महाभाष्य-कारेण—"नञर्थस्य न-शब्दस्य सुप्सुपेति समास"। लावण्य-लक्षणं प्रागेवोक्तम्)। 'अत्रभवती' मान्या 'इयं 'अग्रतः स्थिता नारी 'का'। मुनि-स्त्रियस्तु प्रायेण अनवगुण्ठिता दृश्यन्ते। अतो मुनीनां मध्यभागे अवगुण्ठन-युक्ता इयं केति संशयः (अत्रोपमालङ्कारः। हेत्वनुप्रासौ। आर्या जातिः) ॥१३॥

163n.—1. **प्रसन्न** &c.—**मुखवर्णा** here means the "outward app--earance" (*Apte*), or the expression of the face. HS omits **वर्ण**। **देव—is unusual in the mouth of प्रतिहारी। Read 156n.—Remark.** **2.** **विस्रब्ध-कार्य**—The root 'स्रम्भ' implies 'विश्वास' and it is never to be spelt with **palatal** 'श' as is found in some editions. The root 'श्रम्भ्', however, implies 'प्रमाद' and can be spelt also with *dental* 'स'। 'स्रम्भु प्रमादे। तालव्यादिः दन्तादिश्च। श्रम्भते। 'स्रम्भते'–SK.'**स्रम्भु विश्वासे। दन्त्यादिरयम्। तालव्यादिस्तु प्रमादे गतः**'—SK. 346 ; 'स्रम्भु प्रतीत्यतिशय' इति गोविन्दभट्टः। 'दन्तादिरयम्' इति वर्णदेशनादयः'—*Manoramā.* Thus **विस्रब्ध** (with स) is the **only form** obtained with 'क्तः'। *Medinī's* '**विश्रम्भ**' (*with palatal* श) supports '**विश्रब्ध,**' but it is **doubtful** whether it is in consonance with Pāṇini's grammar. 3. **अवगुण्ठनवती**—Suggests the **existence of ve il in old times,** which fact again corroborates the existence of '**अवरोध-प्रथा**' in some from or other. But "the custom in its **present rigour** dates undoubtedly from the period of Muslim rule"—*'The Way Of Indian Life' by Sister Niveditā.* "Moreover it must be noted that **the** seclusion**, which were once **mainly due to the fear of the**

Mahomedan conquerors do not exist in the same degree in provinces **unaffected** by those conquerors"—*Brāhmaṇism & Hinduism by* (M). Referring to RV (X. 85. 33) and **Āśvalāyana** Gṛhya Sūtra (1. 8. 7), P. V. Kane observes—'This shows that **no veil was worn by the bride, and she appeared in public without one *** in the Gṛhya & Dharma Sūtras there is no re- -ference to any veil for women when moving in public"**— *History of Dharma Sāstras* (P. 597). Cf. 'व्यसनेषु न कृच्छ्रेषु न युद्धेषु स्वयंवरे। **न क्रतौ न विवाहे च दर्शनं दूष्यते स्त्रियः**' ॥—Rām II. 114. 28. "श्वशुरस्याऽग्रतो यस्माच्छिरः प्रच्छादन-क्रिया। पुत्रैर्दर्भेण सा कार्या मातुरभ्यु- दयार्थिभिः"—*Angirā* ; (164n. 2.). 'अदृष्टपूर्वा या नार्यः भास्करेणापि वेश्मसु। ददृशुस्ता महाराज जना याताः पुरं प्रति'—*Māhā. Śalya*, 29. **4.** **०लावण्या**– '**लवणा**' is the pearl-like glimmer of the bodily complexion, (90n. 2), 'लवणा'means दीप्तिः &c—(मेदिनी and शब्दरत्नावली), ष्यञ् comes in स्वार्थे। **नाति** &c.—(54n. 3.) ; **मध्ये** &c.—Cf. "मम मातुश्च मातुश्च मध्यस्था, त्वं न शोभसे'—PN. III, 16

Text :—**प्रतीहारी—देव, कुदूहल-गब्भो ण मे तक्को पसरदि। णं दंसणीया उण से आकिदी लक्खीअदि** (देव, कुतुहल-गर्भो[१] न मे तर्कः प्रसरति। ननु दर्शनीया पुनरस्या आकृतिर्लक्ष्यते)।

Portress—My Liege, my deliberation (*also*) pregnant[1] with curiosity[1] does not proceed (*to a conclusion*). Worth-seeing, however, her shape appears.

राजा—भवतु। अनिर्वर्णनीयं पर-कलत्रम्।

King—Well, another's wife should[2] not be minutely gazed at[2].

शकुन्तला (उरसि हस्तं दत्त्वा। स्वगतम्)—**हिअअ! किं एव्वं वेवसि। अज्जउत्तस्स तादिस-भावाणुबन्धं सुमरिय धीरत्तणं दाव अवलम्बस्स** (हृदय,किमेवं वेपसे। आर्यपुत्रस्य तादृश-भावानुबन्धं[३] स्मृत्वा धीरत्वं तावदवलम्बस्व)।

Śakuntalā (*Placing her hand on her bosom, aside.*)—Why tremble so, my heart ? Be composed now, remembering the flow[3] of affection[3] of (*my*) lord.

पुरोधाः (पुरो गत्वा)—**स्वस्ति देवाय। एते खलु विधिवदर्चितास्तपस्विनः। कश्चिदेषा मुपाध्याय-सन्देशः**[४]। **तं देवः श्रोतुमर्हति।**

Priest—(*Advancing*.)—Hail, Your Majesty. Here are indeed the anchorites received in due form. (*They bring*) some message[4] from their preceptor[4]. It behoves Your Majesty to hear it.

राजा—अवहितोऽस्मि। King—I am all attentive.[5]

ऋषयः (हस्तमुद्यम्य)**—विजयस्व राजन्!**

Hermits (*Raising the hands*)—Be victorious, O king

राजा—सर्वानभिवादये वः। King—(*I*) salute you all.

ऋषयः—इष्टेन[6] युज्यस्व।

Hermits—Be united with (*your*) cherished- desires.[6]

V. L. :—'प्रतिहृतः'—B. 'प्रहितः—V. 'प्रतिहितः'—M. '०उपहित'-R. 'उपहृतः'—R's Com.; S and some Devanāgara Mss. omit these altogether. Mackenzie Mss, supported by K reads 'प्रतिभाति' for 'प्रसरति'। 'ननु दर्शनीया'—R. M. S. 'दर्शनीया'—B. V. 'भावम्'—R. V. S. 'भावस्थम्'—M. 'तादृशं भावानुबन्धम्'—B. 'स्मृत्वा' for 'अवधार्य'—B. HS,

प्रतीहारीति—'कुतूहलं' ज्ञानेच्छा 'गर्भे' मध्ये यस्य तादृशः 'मे तर्कः' इयं का भवितुमर्हति इत्यनुसन्धानम्। "रम्य-वस्तु-समालोके लोलता स्यात् कुतूहलम्") **राजेति**—'भवतु' इति निषेध-सूचकमव्ययम्। तथाच राघव-धृतम् ("अस्तु भवतु पूर्यते इति निषेधे") 'न निर्वर्णनीयं' न निपुणं द्रष्टव्यं [**'परदारान् न वीक्षेत'** इति विष्णु-सूत्रम्)। **शकुन्तलेति**—'वेपसे' कम्पसे। (अनेन भावि अमङ्गलं व्यज्यते। "अङ्ग-दक्षिण-भागे तु शस्तं प्रस्फुरणं भवेत्। अप्रशस्तं तथा वामे पृष्ठस्य हृदयस्य च" इति मात्स्ये यात्रा-निमित्त-देह-स्पन्दनं नाम २१५ अध्यायः।) तादृश-भावाऽनुबन्धं पूर्वाऽनुभूताऽनुराग-प्रवाहम्। **पुरोधा इति**—'विधिवत्' यथाशास्त्रम्। 'सन्देशः' वाचिकम्। **ऋषय इति**—'इष्टेन युज्यस्व' (आशिषि लोट्) अभिलषितमर्थम् अवाप्नुहि इत्याशयः ('इष्टेन' इत्यत्र **सहार्थस्य शब्दस्य अप्रयोगेऽपि** तृतीया। तथाचोक्तं दीक्षितेन। "विनापि तद्योगं तृतीया, 'वृद्धोयूना'—(१।२।६५)—इत्यादि निर्देशात्"—५६४)।

164n.—7. भवतु—Implies निषेध। (*Com.*) It may also imply 'अङ्गीकार' The king admits that the portress is right to say that Śakuntalā's person is worth-seeing(**दर्शनयोग्य**), still he thinks that

another man's wife should not be scrutinised. Note that an **unmarried girl can be minutely observed specially in a forest** (24n. 9). Cf. also 'निर्दोष-दृश्या हि भवन्ति नार्यः यज्ञे विवाहे व्यसने वने च'—*PN*.1. 29, also'न युक्तं पर-कलत्र-दर्शनम्;—*MK*. 1. This speech of the king bears clear testimony to his **high sense of morality. 2. हृदय, किम्** &c.—This throbbing of the heart prognosticates the coming evil (*Com.*) **3. आर्यपुत्रस्य**—(2n. 1.) **4. उपाध्याय**— (156n. 2.)

Text :—राजा—अपि निर्विघ्न-तपसो मुनयः।

King—Are the anchorites unmolested (*in the prosecution*) *of* (*their*) penances ?

ऋषयः—कुतो धर्म क्रिया-विघ्नः सतां रक्षितरि त्वयि।
(श्लोक) **तम स्तपति घर्मांशौ[1], कथमाविर्भविष्यति ॥१४॥**

Hermits—You being the defender of the good, whence can there be impediments to the religious observances ? The warm-rayed[1] (*sun*) shining, how can darkness prevail ? (14)

राजा—अर्थवान् खलु मे राज-शब्दः। अथ भगवान् लोकानुग्रहाय कुशली काश्यपः।

King—(*Then*) my title of "Rājā" (*has*) indeed (*become*) significant[1]. Is the revered Kāśyapa faring well to bless the world?

शार्ङ्गरवः—राजन्! स्वाधीन-कुशलाः[2] सिद्धिमन्तः। स भवन्त मनामय-प्रश्न-पूर्वकमिदमाह।

Śārṅgarava—O king! men of superhuman powers have (*their*)[2] welfare under their own control[2]. He, with a previous[3] enquiry about (*your*) 'freedom from illness,[3]' says this to Your Highness.

राजा—किमाज्ञापयति भगवान्।

King—What does His Holiness command ?

V. L.—'शार्ङ्गरव—स्वाधीन &c'.—B. V. S. 'ऋषयः &c',—M. R.

कुत इति—'त्वयि' दुष्यन्ते 'सतां' सज्जनानां 'रक्षितरि परिपालके वर्तमाने सति 'धर्मक्रियासु' इज्याद्य-नुष्ठानेषु 'विघ्नः' प्रत्यूहः अन्तराय इति यावत् (सहसुपेति

समासः) 'कुतः' कस्मात् सम्भवति, न कुतोऽपि इत्याशयः। तथाच 'घर्मा' उष्णा 'अंशवः' किरणा यस्य तादृशे सूर्ये ('घर्मः स्यादातपे ग्रीष्मे उष्ण-स्वेदाम्भसोरपि' इति विश्वः) 'तपति' किरणान् वितरति सति 'तमः' अन्धकारः 'कथं' केन प्रकारेण 'आविर्भविष्यति' न कथमपि प्रकटी-भविष्यति इत्यर्थः (अत्र **दृष्टान्तालङ्कारः** स्फुट एव। पूर्वार्ध-परार्धयोः **अर्थापत्ति-द्वयञ्च। छेकानुप्रासौ।** अनेन **उदाहरणं** नाम नाट्यलक्षणञ्चोपक्षिप्तं—"यत्र तुल्यार्थ-युक्तेन वाक्येनाभिप्रदर्शनात्। साध्यते ऽभिमतश्चार्थ **स्तदुदाहरणं** मतम्'—इति दर्पण-लक्षणात्। **श्लोको** वृत्तम्) ॥१४॥ **राजेति**—'अर्थवान्' सार्थकः (प्रशंसायां मतुप्, वाः—१८९४) खलु' इत्यवधारणे। 'लोकस्य' जनस्य भुवनस्य वा 'अनुग्रहाय' (तादर्थ्ये ४र्थी, यद्वा लोका--नुग्रहं कर्तुमिति कर्मणि ४र्थी। **'तुमर्थाच्च भाववचनात्' इति ४र्थी इति केचित्,** स **प्रमाद** एव)। 'अथ' इति प्रश्ने 'कुशली' क्षेमवान् ('पर्याप्ति-क्षेम-पुण्येषु कुशलं शिक्षिते त्रिषु' इत्यमरः। **"ब्राह्मणं कुशलं पृच्छेत्'** इति मनु-वचनात् (२।१२७) कुशल-शब्दाऽवतारणा)। **शार्ङ्गरव इति**—"सिद्धिमन्तः' अणिमाद्यष्ट-सिद्धि--समन्विता योगिनः (विस्तरस्तु मार्कण्डेय-पुराणे दत्तात्रेयाऽलर्क-संवादे योग-वल्लभ-नामाध्याये द्रष्टव्यः) 'स्वाधीनं' स्वेच्छामात्र-सुलभं 'कुशलं' येषाम् तादृशो भवन्ति। 'अनामयम्' आरोग्यम्' ('अनामयं स्यादारोग्यम्' इत्यमरः। **'अत्र-बन्धुमनामयमिति'** स्मरणात्) तस्य 'प्रश्नः पूर्वः' यस्मिन् तत् यथा तथा ('शेषात् विभाषा'—५।४। १५४—इति कप्)।

165n.—1. सतां रक्षितरि—The king was a protector of the good, and *of the evil-door he was no friend.* The poet expresses similar idea through the mouth of the king himself. Cf. 'येन येन वियुज्यन्ते प्रजाः स्निग्धेन **बन्धुना। स स पापादृते** तासां दुष्यन्त इति घुष्यताम्—*Śak. VI.* 23. **'दुर्विनीतानां शासितरि'**—1. 22; भवानेव **'अविनीतानां शासिता'**—(213n, I) ; R, however, construes 'सताम्' with 'धर्मक्रिया'। 'त्वं रक्षिता। त्वयि रक्षितरि सर्वे सन्तः। तेषां (अर्थात् सतां) क्रियामात्र-विघ्नोऽपि न संभाव्यते'–R. "You being the protector, *all were righteous* and the rites which all of them performed, were free from impediments." This also gives good meaning ; but do not the **constant raids** of the cannibals and the Ślokas (8 & 9., *Supra*) support the existence of wicked persons in his kingdom ? **2. तमस्तपति&c.**—Cf. 'ऋते रवेः क्षालयितुं क्षमेत कः, क्षपातमस्काण्डमलीमसं

नभः'—*ŚPB*. 1. 38 'तमांसि तिष्ठन्ति हि तावदंशुमान् न यावि यावदुदयाद्रि-मौलिताम्'—*Māla*. 'सर्वत्र नो वार्तमवेहि राजन् नाथे कुतस्त्वयि अशुभं प्रजानाम्। सूर्ये तपत्यावरणाय दृष्टेः कल्पेत लोकस्य कथं तमिस्रा'—*Ra. V*. 13. 'विरोचने सति हि चकासति प्रागे करोति नो जन-नयनावृति तमः'—*RH*. 1. 24 ; *Vik*. 1. 8. 3. **राज-शब्दः**—Kāli, seems to derive 'राजन्' from 'रञ्ज्' । Cf. 'अप्यक्षर-साम्यमात्राणि निर्ब्रूयात्'—Nirukta, or thus **राजते रञ्जयति** प्रजा इति राज् (धातूनामनेकार्थत्वात् रञ्जनमेवार्थः)+कनिन्। Cf. 'यथा प्रह्लादनात् चन्द्रः प्रतापात् तपनो यथा। तथैव सोऽभूत् अन्वर्थः राजा प्रकृति-रञ्जनात्—*Ra.IV*. 12 ;'यद्यपि राज-शब्दो राजतेः दीप्तार्थत्वात् कनिन् प्रत्ययान्तो, न तु रञ्जतेः तथापि धातूनाम् अनेकार्थत्वात् रञ्जनात् राजा इत्युक्तं कविना'—MN. In exactly similar way VP. (7n.4.) and *Mahā*. (*XII*. 2032) derive राजन् from, रञ्ज्–'to please' ('रञ्जिताश्च प्रजाः सर्वा स्तेन राजेति शब्द्यते) । (It will be interesting to note that the Kings in ancient time, used to take the following **oath** at the time of coronation:—"याञ्च रात्रिम् अजायेहं याञ्च प्रेतास्मि तदुभयमन्तरेणेष्टा पूर्तं मे लोकं सुकृतमायुः प्रजां वृञ्जीथा यदि ते द्रुह्येयमिति"—"Let me be deprived of my issue, of my good station in the next world and also of all the merits accrued to me from my good deeds done in my whole life (i.e. from the date of birth to the date of demise) if I **oppress my subjects**.'' The hermits, however, here compare the king to the sun, deriving राजन् from the root राज्—"to shine",—(*U*. 162), which is the *real* derivation. "Dr. Boehtlingk remarks that in this case it little signifies whether the derivation be true or false." **रक्षितरि**—Read 'रक्षार्थमस्य सर्वस्य राजानम् असृजत् प्रभुः'—*MS. VII*. 3. 4. **लोकानुग्रहाय** —**Don't say 'तुमर्थाच्च'—इति ४र्थी** (*Com.*), Read (51n. 1). 3. **अथ कुशली**—&c,—So says Āpstamba—'**कुशलं** अवर-वयसं समान-वयसं वा विप्रं पृच्छेत्। **अनामयं क्षत्रियं, क्षेमं वैश्यम्, आरोग्यं शूद्रम्**' ॥ (Also Com.). कुशान् लाति गृह्णाति इति कुश+ला+क (३।२।३)=**कुशलः**—Lit, one who plucks the (*sharp*) blades of Kuśa grass, (Ra. V. 4 ; Atharva. XIX, 28), hence 'skilful'. Next it means '**healthy**', for one who is accustomed to roam by the river-side for plucking

Kuśas for the morning sacrifice must be healthy by inhailing the salubrious morning breeze.—(250n. 6) ; 6. सिद्धिमन्तः—(129n. 6). 7. आज्ञापयति—Shows king's humility. Vide (76n. 3).

Text :—शार्ङ्गरवः—यन्मिथः[1] समयात्[2] इमां मदीयां दुहितरं भवान् उपायंस्त[3] तन्मया प्रीतिमता युवयोरनुज्ञातम्। कुतः—

त्वमर्हतां प्राग्रहरः[4] स्मृतोऽसि नः

वंशस्थविल शकुन्तला मूर्तिमती[5] च सत्क्रिया[6]।

(जतजर) [7]समानयंस्तुल्य-गुणं वधू-वरं

चिरस्य वाच्यं[8] न गतः प्रजापतिः ॥१५॥

तदिदानीमापन्न-[9]सत्त्वेयं प्रतिगृह्यतां सह-धर्म-चरणायेति।

Śārangarava—By mutual[1] pact[2], this my daughter, Your Highness took[3] to wife ; (*and*) that (*act*) of you two, has been ratified by me with gladness. For—

Thou art esteemed by us as the [4]foremost of the worthy[4], and Śakuntalā, as [6]pious [6]deed embodied[5]. [7]Uniting a groom and bride of equal merits, the creator has after a long time (*now first*) incurred no censure[8]. (15)

So let this one who is enceinte[9], be accepted now for joint discharge of piety.

V. L. :—'ममयात्'—B. R. V. M. 'समवायात्'—S. 'प्राग्रहरः'—V. HS; R's Com. also supported by some South Indian Mss. 'अग्रसरः'—B. 'प्राग्रसरः'—M. R. S; Coleborooke Mss, supported by R reads यन्' for 'नः'। मूर्तिमती च'—V. M. R. 'मूर्तिमतीव—S. B.

[शार्ङ्गरव-इति—'मिथः समयात्' 'त्वं मे पत्नी', 'त्वं मे स्वामी' इति परस्पर-शपथ-पूर्वक-गान्धर्वेण विधिना इत्यर्थः ('समयः शपथाचारे' इति मेदिनी ॥ "आसुरः द्रविणादानात्, गान्धर्वः समयात् मिथः" इति याज्ञवल्क्यः)। 'उपायंस्त' (१।३।५६) भार्यात्वेन स्वीकृतवान्, विवाहितवान् इत्यर्थः 'तत्' तवोपयमनं 'प्रीतिमता' परस्पर-योग्यत्वात् प्रसन्नेन 'मया अनुज्ञातम्' 'अनुमोदितम्। ["तेन" इत्यधिकारे, 'उपज्ञाते (४।३।११५) इति पाणिनि—निर्देशात् भुते क्तः। विस्तरस्तु चतुर्थाङ्के द्रष्टव्यः]। त्वमिति—'त्वं' दुष्यन्तः 'अर्हतां' पूज्यानाम् ['अर्हः प्रशंसायाम्'—(३।२।१३३)—इति अर्हधातोः परः प्रशंसायाम् शतृ]

'प्राग्रहरः' (३।५।६) अग्रगण्यः श्रेष्ठ इति यावत् ('पराघ्यार्ग्य-प्राग्रहर' इत्यमरः) 'नः अस्माकं स्मृतोऽसि' ('मति-बुद्धि-पूजार्थेभ्यश्च'—(३०८९) इति वर्तमाने क्तः। 'क्तस्य च वर्तमाने' (६२५) इति कर्तरि षष्ठी। त्वमिति एक-वचनेन प्राग्रहरेषु अपि अस्य अद्वितीयत्वं व्यज्यते) 'शकुन्तला च मूर्तिमती' शरीर-धारिणी 'सती' पूज्या चासौ 'क्रिया' च इति 'सत्क्रिया सत्कारभूता (अनेन च अखिल-जन-पूज्यत्वमस्या ध्वनितम्। अतएव तुल्य-गुणत्वम्। सत्कारार्हस्य सत्कार-लाभः युक्त एव इति सरलार्थः) 'प्रजापतिः' ब्रह्मा अर्थात् अयोग्यानां मेलन-सम्पादयिता 'तुल्यगुणम्' समान-गुणं 'वधूश्च' 'वरश्च' तत् 'वधूवरं' ('सर्वोद्वन्द्वो विभाषया एकवद् भवति' इति प्रावृट्-शरदौ, वधू-वरं, वधूवरौ'—इति प्रभा) 'समानयन्' विवाहेण समानं कुर्वन् ('अस्थिभिस्थीनि त्वचा त्वचम्' इत्यादिश्रुतेः। 'समानं सत्-समैकेषु त्रिषु ना नाभि मारुते' इति मेदिनी) 'चिरस्य' बहुकालात् अनन्तरं ('चिराय चिररात्राय चिरस्याद्याश्चिरर्थका' इत्यमरः) 'वाच्यं' अयोग्य-योजी वेधा इति निन्दां ['वचोऽशब्द-संज्ञायाम्']- (७।३।७४-इति चकारस्य ककार-निषेधः। 'वाच्यन्तु कुत्सिते हीने वचनार्हे न पुंसि तु। वृषणे पालने--' इति शब्दाब्धिः) 'न गतः' न प्राप्तः जगत्सृष्टेः प्रारम्भात् इदं हि एकमात्रमुदाहरणं, यस्मिन् प्रजापतिना सम-गुण-सम्पन्नस्य वधु-वरस्य सम्मेलनं विहितम्। (समालङ्कारः। क्रियोत्प्रेक्षा। पदार्थ-हेतुक काव्यलिङ्गञ्च इत्येतेषां गुण-प्रधानभावेनाऽङ्गाङ्गि-भावात् सङ्करः। हेत्वनुप्रासौ। वंशस्थं वृत्तम्। "स्मृतोऽसि सत्क्रियेव यन्मूर्तिमती शकुन्तला' इति पठित्वा क्रम-लक्षणो दोषः परिहरणीय इति राघवचरणाः) ॥१५॥ 'तदि'ति वाक्यसंहारे। 'आपन्न-सत्त्वा' (इति बहुव्रीहिः द्वितीया-समासो वा—२।२।४) गर्भिणीत्यर्थः ('आपन्नसत्त्वा स्यात् गुर्विण्यन्तर्वत्नी च गर्भिणी' इत्यमरः) 'इय' शकुन्तला 'सहधर्म-चरणाय' (तथाचोक्तं 'स-स्त्रीकं धर्ममाचरेत्' इति। अनेन विधिवत् ऊढत्वं व्यज्यते) 'प्रतिगृह्यतां' स्वीक्रियताम् 'इति' भगवता काश्यपेनोक्तम्।

166n.—1. दुहितरं—दोग्धि इति दुह्+तृच्, [उ-260]=दुहितृ—One who used to milk the cows in old times. It belongs to 'स्वस्रादि' class. 'स्वसा तिस्र श्चतस्रश्च ननान्दा दुहिता तथा। याता मातेति सप्तैते स्वस्रादय उदाहृताः'॥ Hence 'स्वस्रादित्वात्' (4. 1. 10) न ङीप्'—*BhD.* 'दूरे हिता' or 'दुर्हिता'=दुहिता (One who is placed at a distant place

after marriage)—Yāska. **2. उपायंस्त**—'उप+यम्' is **आत्मनेपदी in** the sense of **'acceptance'** by 'उपाद्यमः स्व-करणे'-(2729). **'स्वकरण-शब्देन** भार्या-स्वीकारो (marriage) गृह्यते इति वृत्तिकृत्। भट्टिस्तु स्वीकार- मात्रेऽपि प्रायुङ्क्त, 'उपायंस्त महास्त्राणि'—T. 3. **'प्राग्रहर'**—Refers to (**'उच्चैः' कुलञ्चात्मन'** &c.—Act IV. 17 Supra), and **शकुन्तला * * सत्क्रिया'**to (**"त्वयि अस्याः कथमपि**स्नेह्**"&c.–*Ibid.*) and is **preferable** to **प्राग्सरः,** for though **'अग्रसर'** is often met with (*Ra. V.*71; *IX.*23), **'प्राग्सर'—is not found in Kāli's works,** while our poet **repeats** the **word** **'प्राग्रहरः'** in Ra. and Ku. Cf.—'प्रत्यग्रहीत् **प्राग्रहरो** रघूणाम्'—*Ra. XVI.* 23. 'विश्ववसु-**प्राग्रहरैः** प्रवीणैः'—*Ku. VII.* 48. प्रकृष्टम् अग्रम्। प्राग्रे हरति। 'हरते रनुद्यमने अच्'-(3.2.9;2923)–('प्राग्र+हृ+अच्)–*BhD*. 'प्राग्रसरः' also gives the same meaning and is irregularly formed, the **usual form** being **'प्राग्रेसरः'**। Read 'सूत्रे अग्रे इति **एवन्तत्वमपि निपात्यते**। कथं तर्हि, "यूथं **तवग्रसर**-गर्वित-कृष्णसारम्"—**बाहुलकात्** इति हरदत्तः'—SK. 2923

4. समानयन्—(Refers to 'अबान्धवकृताम्—Act IV.17. Supra)—A Nominal verb from 'समान' (*Com*).. Thus the root is"अन्त-**निविष्ट-कर्म**" *i.e.* the meaning of **कर्म** is included in the root, **hence it cannot** further take a कर्म ('वधूवरम्')। On this HS. observes—**'ननु 'अन्तर्निविष्ट-कर्मक-धातोः अकर्मकत्वम्**"इत्युक्तेः 'समानयन्' **इत्यस्य** अन्तर्निविष्ट-कर्मकतया 'वधूवरम्' इत्यस्य **कथं कर्मत्वम्** इति चेत्। न, उक्तानुशासने कर्म--पदस्य प्राधान्येन विधेय-कर्मपरत्वात् उद्देश्य-कर्मस्थितौ बाधकाभावात्। अत्र तु वधूवरमित्यस्य उद्देश्य-कर्मत्वात्। अन्यत्रापि एवं प्रयोगो दृश्यते यथा, नैषधे— "कथं न सा मदगिरमाविलामपि स्वसेविनीमेव **पवित्रयिष्यति**"॥ **5. वधूवरं-एकवचन is optional.** Cf. 'विवाह-साक्ष्ये **वधू-वरौ** सङ्क्रमयाञ्चकार" —Ra. VII. 20. (Vide Com). **'वर'** (husband) being **अभ्यर्हित** should have been placed first. [Cf.**'वर-वधू**-समागमः'–*Ra.XI.*56."वधु-वरानुराग" HC. IV.36] but the rules sanctioning **पूर्वनिपात, in द्वन्द्व is not strictly binding,** as is **inferred** from Pāṇini's Sūtras. Read **"समुद्राभ्रात् घः"** (4. 4. 118.), **"लक्षण-हेत्वो** क्रियाया"-(5.2.126) इत्यादि-निर्देशात् **अनित्यमिदं प्रकरणम्**। तेन 'स **सौष्ठवौ-दार्य-विशेष-शालिनीम्**' इति **भारवि-प्रयोगः सङ्गच्छते**" —T. Also Cf. the Sūtras **"नासिका-स्तनयोः ध्मा-धेटोः"**-(३।२।२९) **'आग्रहायण्य-श्वत्थाद्** ठक्'-(४।२।२२),**'कुमुद-नड-वेतसेभ्यः** ड्मतुप्'-(४।२।५९),

'युष्म-दस्मदोः अन्यतरस्याम्'—(४।३।१) ; 'परि-व्य-वेभ्यः क्रियः'-(१।३।१५) 'इतरेतराऽन्योन्यो—पपदाच्च(१।३।१६) ;'निगरण-चलनार्थेभ्यश्च'-(१।३।८७), 'पूरणाऽर्थाद् ठन्' (५।१।४८) ; 'सर्वभूमि-पृथिवीभ्याम्,अण्अञौ' (५।१।४१) ; Also १।३।२५; १।३।१५ ; १।३।३६ ; १।३।४७ ; १।३।७४ ; २।३।१६; चिरस्य—(149n. 1). 'वाच्यम्—&c.—Cf. दीर्घस्य कालस्य लब्ध-संज्ञः' Mahā, (स्त्री, 7). वाच्यम्=Censure, Vide Ra. VIII. 72; VIII. 54 ; ŚPB.—III. 58. The creator has enjoyed a very unenviable notoriety as taking pleasure by uniting pairs of unequal merits. This fact will be corroborated by the following सुभाषित —"यः सुन्दरस्तद्वनिता कुरूपा, या सुन्दरी सा पतिरूप-हीना। यत्रोभयं तत्र दरिद्रता च, विधेर्विचित्राणि विचेष्टितानि"॥ Also 'प्रायेण सामग्र्यविधौ गुणानां पराङ्मुखी विश्वसृजः प्रवृत्तिः"—Ku. III. 28 ; 'अल्पं तुल्यशीलानि द्वन्द्वानि सृज्यन्ते'—PN. 1. But in this particular case the match-making deity **has made a happy choice by uniting two pairs of equal merits**, and thus has after a long time been freed from censure. Cf. 'परस्परेण स्पृहणीयशोभं, न चेदिदं द्वन्द्वमयोजयिष्यत्। अस्मिन् द्वये रूपविधानयत्नः, पत्युः प्रजानां विफलोऽभविष्यत्'—*Ku. VII.* 66 ; 'चिरात् खलु युक्तकारी विधिः स्यात् यदि युगलकमेतदन्योन्यानुरूपं घटयेत्'—NN. 'विधातुः व्यापारः फलतु मनोज्ञश्च भवतु'—*MM.* 'कुलेन' कान्त्या वयसा नवेन गुणैश्च तैस्तैर्विनयप्रधानैः। त्वमात्मनस्तुल्यममुं वृणीष्व रत्नं समागच्छतु काञ्चनेन'—Ra. VI. 79. "तप्तेन तप्तस्य यथायसो नः सन्धिःपरेणास्तु"—*BK. XII.* 40. 6. सहधर्म-चरणाय—तादर्थ्ये ४र्थी—(51n. I). You should give her the **status of a wife** for the performance of religious duties and nothing else—this may **refer to "सामान्य-प्रतिपत्ति-पूर्वकमियं दारेषु दृश्या"**&c.—Act IV. 17. Supra.

Text :—गौतमी—अज्ज ! किम्पि वत्तुकाम म्हि। ण मे वअणा-वसरो अत्थि। कहंति।

(आर्य, किमपि वक्तुकामा[1]स्मि। न मे वचनावसरो[2]ऽस्ति। कथमिति)।

आर्या णावेक्खिदो गुरु-अणो इमाइ ण तुए वि पुच्छिदो बन्धुः।
[12, 18 एक्कक्कस्स च चरिए भणादु किं एक्क एक्कस्सि॥१६॥
12, 15] (नापेक्षितो[1] गुरुजनः अनया, न त्वयापि पृष्टो[2] बन्धुः।
एकैकस्य च चरिते भणतु किमेक एकस्मिन्॥)

Guatamī—Revered Sir, (*I*) wish[1] to add a few words[1]. (*But*) there is no room[2] for my remark[2]. For—

By her the betters were not waited[3] for, nor did you confer[4] with (*her*) kinsmen. In such a *tete-a-tete*. (*lit, a transaction done singly by each*) what need another say to either ? (16)

शकुन्तला (आत्मगतम्)—**किण्णु खु अज्जउत्तो भणिस्सदि** (किं नु खलु आर्यपुत्रो भणिष्यति) ।

Śakuntalā (*Aside*)—What will My Lord say now ?

राजा (साशङ्कमाकर्ण्य)—**अये! किमिदम् उपन्यस्तम्**[9] ।

King (*In dread, listening worriedly*)–Lo! what is this presented[9] (*to me*) ?

V. L.—For 'आर्य' B has 'भद्रमुख'। 'वचनावसरः'—R. V. M. B. 'वचना-वकाशः—S. 'नापेक्षितः'—R. V. M. B. 'नावेक्षितः' —S. Śl. 16. is (B's) reading. '**खलु पृष्टश्च बन्धुजनः। परस्परस्मिन्ने ** भणामि किमेकैकम्'—R. 'त्वया पृष्टः न बन्धुजनः'—R.'s Com. 'एकक्रम एव कृते भणामि किमेकमेकस्य'—S. ''एकैकमेव चरिते किं भणत्वेक एकस्य'—M. S. 'एकैकमेवं चरिते भणामि किमेकमेकस्मै'—V.

गौतमीति—'वक्तु', 'कामः' यस्याः सा ('तुं काम-मनसोरपि' इति मकार-लोपः)। **नापेक्षित इति**—'अनया' शकुन्तलया परिणय-विधौ अस्मादृशः गुरुजनः पित्रादिः ('**गुरुः पिता गुर्वविप्र**' इति गदसिंहः) 'न अपेक्षितः' परिगणितः अर्थात् कण्वादीना मनुमति-ग्रहणमकृत्वा स्वयमेव कर्तव्यं स्थिरीकृतम्। 'त्वया' दुष्यन्तेन 'अपि' इति समुच्चये। स्वस्य शकुन्तलाया वा 'बन्धुः' ज्ञातिवर्गः 'न पृष्टः' जिज्ञासितः। अन्यत्र विवाह-व्यापारे वरपक्षः कन्या-कर्तारं पृच्छति, कन्या-पक्षश्च तत्कर्तृ-मुखापेक्षी तिष्ठति इत्याशयः। एकस्य एकस्य इति 'एकै-कस्य' एव 'चरिते' रहसि विहिते विवाह-कर्मणि 'एकः' इतरः मादृशः अन्यो जनः ('एकं संख्यान्तरे श्रेष्ठे केवले-तरयो स्त्रिषु' इति मेदिनी) युवयोःउभयोः मध्ये 'एकस्मिन्' जने 'किं भणतु' वदतु। अपरस्य किमपि वक्तव्यं नास्ति इति भावः। (अतएव **अर्थापत्तिलङ्कारः**। **आर्या** जातिः) ॥१६॥ **राजेति**। 'अये', संभ्रमे ('**अये कोपे विषादे च संभ्रमे स्मरणेऽपि च**' इति **मेदिनी**') '**उपन्यस्तं**' वक्तुमारब्धम् ('**उपन्यासस्तु वाङ्मुखम्**' इत्यमरः)।

167n.—1. **न मे वचनावसरो** &c.—I want to say something to you, but I am afraid, whether there is any scope for the speech of me, a third person here, since the marriage took place out of reciprocal love, [Cf. "कथमपि अबान्धव-कृतां" &c.-Act IV. 17.] so much so that neither of you had deemed it necessary to take a formal permission from your respective superiors. For a similar idea, Vide (103n. 2). 2. **एकैकस्य**—The reduplication is due to वीप्सा—(2140) and the *reduplicated* एक-शब्द is considered **बहुव्रीहिवत्** by 'एकं बहुव्रीहिवत्'—(8. 1. 9.) and it is a सर्वनाम। "**द्विरुक्त** एक-शब्दो बहुव्रीहिवत् स्यात्। तेन सुब्लोप-पुंवद्भावौ। एकैकमक्षरम् *** 'न बहुव्रीहौ'—(१।१।२९ ; २२२) इत्यत्र पुनर्बहुव्रीहि-ग्रहण **मुख्य-बहुव्रीहि-लाभार्थम्**। तेनातिदिष्ट-बहुव्रीहौ **सर्वनामता अस्ति** एव इति प्राञ्चः। वस्तुतस्तु भाष्यमते **प्रत्याख्यातमेतत्**। सूत्रमतेऽपि बहुव्रीह्यर्थे अलौकिके विग्रहे निषेधकं ननु बहुव्रीहौ इति इह अतिदेश-शङ्कैव नास्ति'। "एकैकस्मै देहि"—SK. 2144. The reading with '**भणामि**' (R) violates the metre. 3. "किं नु &c— Cf.——"किं णु क्खु भट्टा सम्पदं भणादि"—*Māla. V.*

Text :—शकुन्तला (आत्मगतम्)—**पावओ क्खु एसो वअणोवण्णासो**
(पावकः खल्वेष वचनो-पन्यासः)।

Śakuntalā (*Aside*)—The very introduction[1] of the speech[1] (*is*) fire indeed.

शार्ङ्गरव—कथमिदं नाम। ननु भवन्त एव सुतरां[1] लोक-वृत्तान्त-निष्णाताः[2]

सतीमपि ज्ञाति-कुलैक-संश्रयां,[3] जनोऽन्यथा भर्तृमतीं विशङ्कते।
अतः समीपे परिणेतुरिष्यते, प्रियाऽप्रिया वा प्रमदा स्वबन्धुभिः॥१७॥

(वंशस्थविल—जतजर)

Śārṅgarava—How is this (*from you*)? Your Highness is surely very[1] well[2] steeped in secular affairs[2] (*and knows that*)—people suspect a (*married*) woman, having her husband alive, and residing[3] exclusively in the family of the kinsmen,[3] even though chaste, to be otherwise (*i.e. unchaste*). Hence a young woman is

(*always*) preferred by (*her*) relatives to be near (*her*) husband, whether she is loved by him or not. (17)

राजा—किञ्चात्रभवती मया परिणीत-पूर्वा।

King—And what ? Was this lady married by me before ?

शकुन्तला—(सविषादमात्मगतम्)—हिअअ, सम्पदं दे आसङ्का।
(हृदय ! साम्प्रतं ते आशङ्का)।

Śakuntalā (*Sadly, aside*)—O heart ! your misgivings (*have proved*) right.

शार्ङ्गरवः— 'किं कृत-कार्य-द्वेषा[४] धर्मं प्रति विमुखतोचिता[५] राज्ञः''।

Śārṅgarava—On[4] account of abhorrence for a deed (*formerly*) committed[4], is dislike for duty becoming[5] in a monarch ?

राजा—कुतोऽयमसत्कल्पना-प्रसङ्गः[६]।

King—Where (*is*) the occasion for this false[6] supposition[6]?

शार्ङ्गरवः—''[७]मूर्च्छन्त्यमी विकाराः प्रायेणैश्वर्य-मत्तेषु'' ॥१८॥

Śārṅgarava—Such affections(''*changes of purpose*'', ''*fickleness of disposition*''–*M.*) do generally prevail[7] (*wax strong*) in those that are intoxicated with power (*of affluence*). (18),

राजा—विशेषेणाऽधिक्षिप्तो[८]ऽस्मि।

King—I am grossly censured[8] (*by this speech*).

V. L.—'पावकः खलु एषः'—M. Mackenzie Mss inserts 'एषः' after 'खलु'; Others omit 'एषः'' । 'भवन्त एव' &c.'—R. V. M. 'भवान् लोकवृत्तान्ते निष्णातः'—D ; 'प्रियाप्रिया वा'—D. R.B.C. S. 'तदप्रियापि' —K. R's Com. V. M. 'तदुज्झितापि'—S. 'साम्प्रतम—R. B. V. M. 'साम्प्रतमुचिता'—S. 'विमुखतोचिता राज्ञः'—B. V. M. 'विमुखता कृतावज्ञा'—R. 'कृशावज्ञा'—S. 'प्रसङ्गः'—B. 'प्रश्नः'—R. S. M.'०मत्तेषु'—R. M. S. V. '०मत्तानाम्'—B.

शकुन्तलेति—'पावकः' अग्निः इव मर्मदाहक इत्यर्थः। 'वचनस्य उपन्यासः आरम्भ, आरम्भे एव अस्य वाक्यम् अग्निवद्दाहकं, शेषे न जाने अपरं वा किं भविष्यति इति हृदयम्। शार्ङ्गरव इति।—'नाम' इति क्रोधे गर्हायां वा। ('नाम क्रोधेऽभ्युपगमे विस्मये स्मरणेऽपि च। संभाव्य-कुत्सा-प्राकाश्य-विकल्पेष्वपि

दृश्यते' इति मेदिनी)। 'ननु' इति विशेषामन्त्रणे। 'सुतराम्' नितरां ('किम्-एत्-तिङ्-अव्यय-घाद् आम्व् अ-द्रव्य-प्रकर्षे' (५।४।११) इति उत्कर्षार्थे आमु) 'लोकस्य वृत्तान्ते' आचारे 'निष्णाताः'—(८।३।७९) कुशला अभिज्ञा इति यावत् ('निष्णातः कुशलेऽपि च' इत्यजयः)। **सतीमिति**—'ज्ञातीनां' पित्रादीनां' ('ज्ञातिः सगोत्रे पितरि' इति विश्वप्रकाशः) कुलं' भवनं ('कुल' जनपदे गोत्रे सजातीय-गणेऽपि च। भवने च तनौ क्लीवम्' इति मेदिनी)। 'एकः' केवलः ('एकोऽल्पार्थे प्रधाने च प्रथमे केवले तथा। साधारणे समानेऽपि संख्यायाञ्च प्रयुज्यते ॥) 'संश्रयः ' निवासः यस्याः, तादृशी **नियत-पितृ-गेह-निवासिनीम्** ('एक' इत्यनेन **कादाचित्काऽवस्थानं न निन्दनीयम्** इत्यर्थः सूच्यते) भर्तृमती **विद्यमान-पतिकां ननु विधवां** नारीं ('विशेषण-मात्र-प्रयोगः विशेष्य-प्रतिपत्तौ' इति वामनोक्तेः) 'सतीमपि' साधु चरितामपि ('सती साध्वी पतिव्रता' 'इत्यमरः') 'जनः साधारण लोकः 'अन्यथा'' अन्य-प्रकारेण, नूनम् **व्यभिचारिणीयम् येन पति-सकाशं न गच्छति,** इति 'विशङ्कते' सम्भावयति (तथाचोक्तं पाद्मे—''कन्या पितृर्गृहे **नैव सुचिरं वास महंति। लोकापवादः** सुमहान् जायते पितृवेश्मनि'' इति)॥ एतत् तु लोक-व्यवहार-निष्णातेन त्वया सम्यग् ज्ञातम्, 'अतः' एतादृश-लोक-परिवाद-परिहारार्थं 'स्वस्य बन्धुभिः' पित्रादिभिः 'प्रमदा' **युवतिः ननु, वृद्धा** ('**प्रमदा** चेति विज्ञेया **युवतिश्च** तथा स्मृता' इति भागुरिः) भर्तुः 'प्रिया अप्रिया वा परिणेतुः' स्वामिनः 'समीपे' स्थिता इति शेषः 'इष्यते' वाञ्छयते' (अत्र शकुन्तलायाः त्वत्-समीपे स्थिति-योग्यता इति विशेषे प्रस्तुते यत् सामान्य-वचनं तेनाऽ**प्रस्तुतप्रशंसा** ॥ असत्यां का कथा सतीमपि इत्यर्थान्तरापतनात् **अर्थापत्तिश्च। हेत्वनुप्रासौ।** अनेन **अर्थविशेषण**-नामा नाट्यालङ्कारः उपक्षिप्तः। तल्लक्षणं यथादर्पणे—'उक्तस्यार्थस्य यत्तु स्वादुत्कीर्तनमनेकधा। उपालम्भ-स्वरूपेण तत् स्याद्-**अर्थ-विशेषणम्**' इति॥ **वंशस्थविलं** वृत्तम्) ॥१७॥ **राजेति**—'किम्' इति प्रश्ने 'च' इति पक्षान्तरे ('च पादपूरणे पक्षान्तरे हेतौ विनिश्चये' इति भानुजि-धृत-त्रिकाण्डशेषः)। **किमिति**—'कृतं' मनस आवेगवशात् आचरितं यत् 'कार्यं' गान्धर्व-विवाह-रूपं, तत्र केनापि कारणेन यः 'द्वेषः' न मया एतत् शोभनं कृतमिति मनसोऽरुचिः, तस्मात् हेतोः 'धर्मं प्रति विमुखता' धर्म-भ्रष्टता परिणयाऽनङ्गीकारः 'राज्ञः सदैव येन प्रजावृन्दः अधर्मात् निवर्तनीयः तस्य धर्मनियन्तुः नृपतेः सम्बन्धे (शेषे षष्ठी) 'उचिता' युक्ता (इतिहेमचन्द्रः) किम्? कथमपि नेत्यर्थः। (एकस्य श्लोकस्य प्रथमार्धमिदं) परार्धञ्च राजवाक्यानन्तरं वक्ष्यते। **राजेति**—'असती' अविद्यमाना अधर्म्या वा या 'कल्पना' उद्भावना तस्याः अर्थात् मयेयं परिणीत-पूर्वा। सम्प्रति वीतस्पृहत्वात् परिणयाऽपलापश्च इत्येवंभूतायाः। 'प्रसङ्गः

प्रस्ताव: (इति कल्पद्रुमे) 'कुत:'। अपि तु कुतोऽपि नेत्यर्थः। **मूर्च्छन्तीति—** 'ऐश्वर्येण' धनऽमदेन 'मत्तेषु युक्ता-युक्त-विचार-हीनेषु जनेषु 'प्रायेण' बाहुल्येन 'अमी विकारा:' एतादृशा अवलेप-मूला: प्रकृति-विपर्यया 'मूर्च्छन्ति' समुश्रयन्ति वर्धन्ते इत्यर्थः ('मूर्च्छा मोह-समुश्राययो:' इति धातुपाठे-२२९१)। (**आविष्कारक दीपक-संशय-हेत्व-र्थान्तरन्यासाऽप्रस्तुत-प्रशंसाऽनुप्रासा:**। अनेन **त्रोटकं** नामाङ्गमुप-क्षिप्तम्। "**त्रोटकं** पुन:। संरब्धवाक्" इति दर्पण-लक्षणात्। इयं **गाथा**) ॥१८॥ **राजेति—**'विशेषेण' आधिक्येन अधिक्षिप्त:' भवता तिरस्कृत: (**'अधिक्षिप्त:** कुत्सिते प्रणिहिते **भर्त्सिते** त्रिषु' इति विश्व-मेदिन्यौ)।

168n.—1. उपन्यास:—Lit. means what is juxtaposed or placed near, hence an introduction ; preface. 'उपन्यासस्तु वाङ्-मुखम्'—*AK*. Cf. 'निर्यात: शनकैरलीकवचनोपन्यासमालीजन:'—Aś.23. For a bit different sense, Cf. 'आत्मन: उपन्यास-पूर्वम्'—(97n. 4). **2. निष्णाता:** —नि+स्ना+क्त:—(3.4.72)=निष्णात:। The word means **'expert'** and 'न' is due to 'नि-नदीभ्यां स्नाते: कौशले–'(8.3.89); धातूनामनेकार्थत्वात् स्ना-धातु: इह नैपुण्यार्थक:" —**Prabhā**. Cf. 'निष्णातोऽपि च वेदान्ते साधुत्वं नैति दुर्जन:'—Bhāminībilāsa 1. 87. *ŚPB. VIII.* 62 ; *BK. II.* 25; *MS. VI.* 30 **सुतरां**—*Ra. II.* 53 ; *XVI.* 9. **3. ज्ञाति** &c.—ज्ञाति= **Agnate** relative (137n. 1). **एक**—Suggests that **occasional stay** of **a young woman** during 'उत्सव' or 'व्यसन' in her father's house is **not abominable**, but she must retrun as early as possible. Cf. "कुलस्याऽनभिगमनमन्यत्र **व्यसनोत्-सवाभ्याम्** ॥४९॥ तत्रापि नायक-परिजना-धिष्ठिताया **नाति-काल-मवस्थान**-मपरिवर्तित-प्रवास-वेषता च" ॥५०॥.**KS.***III.* **4. भर्तृमती**—मतुप् here signifies'प्रशंसा'। Cf. 'भूम-निन्दा-प्रशंसासु &c—. *Vārt.* 1894. Hence the implication is this that if a husband happens to be of **ill-character and behaves badly** with his wife, then she may well live with her parents without incurring any censure. A **widow**, of course, may reside in her father's house. **3. प्रियाप्रिया वा**—'प्रियाप्रिया च' इति समीचीन: पाठ:—R. **'तदप्रियापि'** (K) is **rejected,** as **अप्रियत्व** has not yet been proved ; **'तद्'** also

has no propriety. Besides our reading has **weighty support** of *VK* who quotes this very śloka as an instance of **अर्थविशेषण।** (*SD. Ch. VI*). **परिणेतुः**—A husband is so called as he leads (परि+नी) a girl to the sacrificial altar. **6. प्रमदा—**A young woman. The word suggests that the stay of an **old woman** in her father's place is not censurable. **7. विमुखतोचिता** &c.—Dr. Boehtlingk prefers this reading of B and remarks 'कृतावज्ञा is pro- probably an interpolation from the margin. **8. ०कल्पना—** Supposition (*based on falsehood*). In the present case it is three- fold *i.e.* the king **actually performed** the secret marriage; but somehow or other he has lost his former fancy for Śak. and hence he is **intentionally feigning ignorance** of Śak., But the king says that all these assumptions are either false (*or unfair*). **प्रसङ्ग**–Means 'प्रस्ताव'। Cf. 'तत्रैव गङ्गा यमुना च तत्र गोदावरी तत्र सरस्वती च। सर्वाणि तीर्थानि वसन्ति तत्र यत्राऽच्युतोदार-कथा-**प्रसङ्गः**—Qtd. *Kalpa.* **9. विकाराः—**Affections or abberations of the mind. 'स्वरूपादन्य-थात्वं विकारः'—*Śrīpati Datta*; (251n. 5). **10. मूर्च्छन्ति=वर्धन्ते–**(*S*); 'व्याप्नुवन्ति'—*K*, मूर्च्छ—Means '*to loose strength*', but here it means '*to grow strong*' hence, 'to prevail', 'appear'&c.–'मूर्च्छा मोह उच्छ्रये'– *Vopadeva*; 'उच्छ्रयो वृद्धिः * * मुमूर्च्छ सख्यं रामस्य समान-व्यसने हराविति रघुः' (१२।५७) *-Durgādāsa.* 'न पादपोन्मूलन-शक्ति रंहः, शिलोच्चये मूर्च्छति मारुतस्य'—*Ra. II.* 34. 'तूर्यस्वने मूर्च्छति मङ्गलार्थे'–*Ra VI.* 9. "स्वाभाविकं विनीतत्वं तेषां विनय-कर्मणा। मुमूर्च्छ सहजं तेजो हविषेव हविर्भुजाम्॥–*Ra. X.* 79; *XVI.*18, 'नाकनारी मुमूर्च्छे' ति माघ.—Qtd.Manoramā. Also 'याच्ञाच्छलेन **मूर्च्छन्ति** यद्गुणाः शश-लाञ्छनेन। न स **मूर्च्छति** येनासौ दृष्टः सहृदयः प्रभुः'–*KR.* 241. **11. अधिक्षिप्तः**–(censured)—Cf. 'भवादृशेषु प्रमदा-जनोचितं भवत्य **धिक्षेप** इवानुशासनम्'—*Ki.* 1. 28. '**अधिक्षेपः तिरस्कारः**' इति मल्लिनाथः। Cf. "अयं न मे पाद-रजसापि तुल्य **इत्यधिक्षिप्तः**"—*Māla.* Act. *I*...

Text :—गोतमी (शकुन्तलां प्रति)**—जादे'! मुहुत्तअं मा लज्ज। अवणइस्सं दाव ते ओउण्ठणं। तदो तुमं भट्टा अहिजाणिस्सदि** (जाते'! मुहूर्तकं

मा लज्जस्व। 'अपनेष्यामि ते अवगुण्ठनम्'। ततस्त्वां भर्ता अभिज्ञास्यति)।
॥ (तथा करोति) ॥

Gautami (*To Śakuntalā*)—My child[1], lay aside your bashfulness for a moment. (*I*) will just put[2] off your veil[3]. (*Your*) husband will then recognize you. (*Does as said*).

राजा (शकुन्तलां निर्वर्ण्य आत्मगतम्)—

इदमुपनत'मेवं रूप मक्लिष्ट-कान्ति[२],
मालिनी प्रथम-परिगृहीतं स्यान्न वेत्यव्यवस्यन्।
(ननमयय) भ्रमर इव विभाते' कुन्दमन्त-स्तुषारं'
न खलु सपदि भोक्तुं नापि शक्नोमि मोक्तुम् ॥१९॥
॥ (इति विचारयन् स्थितः) ॥

King. (*Minutely surveying Śakuntalā, aside*)—Not determining whether formerly accepted or not (*in marriage*), verily (*I*) am neither able just now to enjoy nor to abandon[5] this beauty, thus presented[1] (*to me*) with unimpaired[2] loveliness[2], like a drone, at the break[3] of day[3], the frosty-bellied[4] Kunda-flower. (19)

(*This said, remains pondering*).

V. L. :—'अव्यवस्यन्'—R's Com. M. S. K. 'व्यवस्यन्—R. V. 'अध्यवस्यन्'—B. R's Com. 'विभाते' —R. V. S. M. 'निशान्ते'—B. The last line (*B*) is read in other recensions thus—'न च खलु परिभोक्तुं नैव शक्नोमि हातुम्'—R. S. V reads exactly this, only 'च' is placed after 'खलु'।

गौतमीति—'अभिज्ञास्यति' ज्ञातामेव पुनः स्मरिष्यति, सैव इयमिति। ('अनुभूतस्य पुनरनुभवः प्रत्यभिज्ञा'' इत्युक्तेः)। (इत आरभ्य षष्ठाङ्क-समाप्ति-पर्यन्तमवमर्शसन्धिः। 'यत्र प्रलोभन-क्रोध-व्यसनाद्यै विमृश्यते! बीजादौ गर्भ-निर्भिन्नः सोऽवमर्श इतीर्यते' इति सुधाकर-लक्षणात्। अत्र शाप-लक्षण-व्यसनेन विमर्शः इति राघवपादाः)। इदमिति—'प्रथमम्' आदौ ('प्रथमस्तु भवेदादौ' इति मेदिनी) 'परिगृहीतं' भार्यात्वेन स्वीकृतं ('परिग्रहः कलत्रे च मूल-स्वीकारयोरपि' इत्यजयः) 'स्यात् न वा, इति अव्यवस्यन्' चेष्टयापि अ-निश्चिन्वन् अहम् 'एवम्' अनेन प्रकारेण गर्भिणी इत्यर्थः। 'उपनतम्' स्वयम् आगतम् 'इदं' पुरो

दृश्यमानम् 'अक्लिष्टा' अम्लाना' निर्दोषा इति यावत् 'क्लान्तिः' लावण्यं यस्य तत् उज्ज्वल-शोभमित्यर्थः (अनेन प्रथमं तारुण्यं ध्वनितम्) 'रूपं' सौन्दर्यं ('रूपं तु श्लोक-शब्दयोः। पशावाकाशे सौन्दर्ये नाणके नाटकादिके' इति हैमः) 'विभाते प्रत्युषे 'भ्रमरः' षट्पदः 'अन्तः' मध्ये 'तुषारः' हिमं यस्य तादृश 'कुन्दमिव' माध्य पुष्पमिव '(कुन्दः माध्येऽस्त्री' इति मेदिनी) सपद्यते अस्मिन् इति 'सपदि' तत्क्षणे ('सद्यः सपदि तत्क्षणे' इत्यमरः) 'खलु' इत्यवधारणे 'न भोक्तुं' शकुन्तलायाः अन्त-सत्त्वत्वात्, कुन्दस्य अन्त-स्तुषारत्वात् इत्याशयः। 'नापि भाक्तु शक्नोमि' मम शकुन्तला-लावण्याऽऽकृष्ट-मानसत्वात्, भ्रमरस्य च कुन्द-पुष्पस्य रस-लुब्धत्वात् इति हृदयम् ('अत्र विभाते इत्युक्तेस्तदनन्तर रविकिरणैः तुषारे अपनीते मकरन्द-भोगः अवश्य एव। एवमिहापि अभिज्ञान-दर्शनेन शापे अपनीते तत्स्वीकार अवश्य एव इति द्योतयन्त्या उपमया रतेः स्थायित्व-दाढर्य ध्वनितम्' इति राघव-पादाः। उपमालङ्कारः। अत्र "भ्रमरः शक्नोति", अहन्तु शक्नोमि" इति पुरुष-भेदात्, 'लतेव राजसे तन्वि" इति दर्पणोदाहरणवत् प्रक्रम-भङ्ग-दोषः। स च "नापि भोक्तु समर्थः" इति पाठेन समाधेय—इति सिद्धान्त-वागीशपादाः। अत्र संशय-नामकं भूषणमुक्षिप्तम्। तल्लक्षणं यथा दर्पणे—'संशयोऽज्ञात-तत्त्वस्य वाक्ये स्याद् यदनिश्चय इति। मालिनी वृत्तम्) ॥१९॥

169n.—1. एवम् उपतम्—Arrived in such a manner *i.e.* as *enceinte*. The king is already informed that Śak, is in her family way. 'तदिदानीम् आपन्नसत्त्वा' &c.—*P*. 465. Act V. Thus Sak is happily compared to the Kunda flower which has dew inside it. **एवम्**—'आत्मेच्छया'—(HS) ; अयत्न-प्राप्तम्'—(R), also Com. Cf. 'सुखोपनतम्'—(111n. 2; *P*. 462.) **2. विभाते** (Morning)—For the significance of it vide R's remark (Com.). **3. अन्त-स्तुषारं**-(With frost inside). Cf. 'विभर्षि चाकार-मनिर्वृतानां मृणालिनी हैममिवोपरागम्'—*Ra. XVI*. 7. **4. न भोक्तुं** (Can't enjoy)—Because Śak. is big with child (*in the case of the King*), and because the flower is surcharged with dew (*in the case of the drone*). **5. न मोक्तुं**-(Can't abandon)—Because both Śak. and the flower possess unblemished loveliness. Cf. "नैव सोढुं न संहर्तुम् शक्नोमि मुषितेन्द्रियः'—PN. II. 9.

Ramark :—अवमर्श-सन्धि—begins with the speech of **Gautami—(R)**; now **(Vide 114n. Remark).**

Text :—प्रतीहारी (जनान्तिकम्)—अहो। धम्मा-वेक्खिआ भट्टिणो। ईदिसं णाम सुहोवणदं रूवं पेक्खिअ को अण्णो विआरेदि (अहो धर्मावेक्षिता[1] भर्तुः। ईदृशं नाम सुखोपनतं रूपं दृष्ट्वा कः अन्यः विचारयति[2])।

Portress (*Aside to the audience*)—Oh, My Lord's devotion[1] to righteousness[1]. Beholding such an easily-arrived beauty surely who else will deliberate[2] ?

शार्ङ्गरवः—भो राजन्! किमिति [3]जोषमास्यते।

Śārṅgarava—Ho king! wherefore art (*thou*) sitting silent[3] ?

राजा—भोस्तपोधनाः! चिन्तयन्नपि न खलु स्वीकरणम्[4]अत्रभवत्याः स्मरामि। तत् कथमिमाम् अभिव्यक्त-सत्त्व-लक्षणां[5] प्रत्यात्मानं क्षेत्रिय[6]माशङ्कमानः[7] प्रतिपत्स्ये[8]।

King—Ho anchorites! even after thinking, (*I*) do not indeed remember (*my*) acceptance[4] of (*this*) lady. How shall (*I*) then [8]take her, dreading[7] myself to be an adulterer[6], as she bears[5] evident signs of pregnancy[5] ?.

शकुन्तला (अपवार्य)—हद्धी! हद्धी! अज्जस्स परिणये एव्व सन्देहो। कुदो दाणीं मे दूराहिरोहिणी आसा (हा धिक्! हा धिक्! आर्यस्य परिणये एव सन्देहः। कुत इदानी मे दूराधिरोहिणी[1] आशा)।

Śakuntalā (*Aside to the audience.*)—Woe! Woe! My Lord has (*his*) doubt about the marriage itself. where now (*is*) my [1]far-mounting hope ?

V. L.—'प्रतीहारी ('स्वगतम्')—B, omitted by M and R. 'जनान्तिकम्'—S 'धर्मावेक्षिता'—B. V. S. M. 'धर्मापेक्षिता'—R. 'धर्मापेक्षिणः भर्तारः'—HS. 'क्षेत्रियम्'—R's Com, P. 'क्षेत्रिणम्'—R. V. M. 'अक्षत्रियम्—B. 'अक्षेत्रिणम्'—S. 'आशङ्कमानः'—R. M. S. V. 'मन्यमानः'—B. 'आशा'—R. S. M. 'आशालता'—B.

प्रतीहारीति—'अहो' इदि विस्मये। 'धर्मम् अवेक्षते' कार्याकार्ये विचारयति इति धर्मावेक्षी' (ताच्छील्ये णिनिः) तस्य भावः। 'सुखोपनतम्' अनायासलब्धं 'विचारयति' स्वीकरिष्यामि न वा इति तर्कयति। शार्ङ्गरव इति—

'जोषं' तुष्णीं ('जोषं सुखे प्रशंसायां तुष्णीं-लङ्घनयोरपि' इति मेदिनी)। राजेति—'स्वीकरणं' पत्नीत्वेन ग्रहणम्। 'तत्' तस्मात्, स्वीकरण-स्मरणाऽभावात् 'अभिव्यक्तं' स्पष्टीभूतं 'सत्त्वस्य लक्षणं' चिह्न यस्यां तादृशीं स्पष्ट-गर्भ-चिह्नाम्, अतएव पर-परिणीतां 'प्रति' ['लक्षणे-त्थंभूताऽऽख्यान-भाग-वीप्सासु प्रति-पर्य-नवः'-(१।४।९०, ५५२) इति प्रतेः एवंप्रकारार्थे कर्मप्रवचनीय-संज्ञा, ततः 'कर्मप्रवचनीय-युक्ते द्वितीया'-(२।३।८) इति ‹या] 'आत्मानं' निजं 'क्षेत्रियं' (५।२।९)-परदारासक्तं ('क्षेत्रियं क्षेत्रजतृणे पर-दार-रतेऽपि च ' इति राघव-धृत-विश्वः) 'आशङ्कमानः' मन्यमानः 'कथम् इमां' शकुन्तलां 'प्रतिपत्स्ये' ग्रहीष्यामि यद्वा प्रत्युत्तरं दास्यामि। शकुन्तलेति—"हा धिक्" इति विषाद-सूचको निपातः। तस्यातिशये द्विरुक्तिः। 'दूरम्' अत्यर्थं, तत्र गत्वा महिषी-पदं प्राप्स्यामि, ततः चक्रवर्तिनं स्वपुत्रं राज्ये निवेशयेयम् इत्यादि अधिरोढुं शीलं यस्याः तादृशी 'आशा'।

170n.—1. किं जोषम् (Silent) &c.—Cf. 'किं तूष्णीमेवास्ते'—*Vik. IV.* **क्षेत्रियः** &c.—क्षेत्रियः–Adulterer–'परदार-रतः'–*Medini* क्षेत्र Wife. 'क्षेत्रं पत्नी-शरीरयोः'—*AK.* Next परस्य क्षेत्रम्=पर-क्षेत्रम्– Wife of another person. Then परक्षेत्र+घच् (by 'क्षेत्रियच् परक्षेत्रे चिकित्स्यः'5.2.92)= **क्षेत्रियः। 'पर' is dropped by** निपातन। 'परक्षेत्र-शब्दात् सप्तम्यन्तात् घच्। **पर-शब्दस्य लोपश्च निपात्यते**' इति मनोरमा। अन्येतु 'परक्षेत्रे चिकित्स्य' इत्यर्थे 'क्षेत्रियच्' इति निपात्यते। **वाक्यार्थे पदवचनं श्रोत्रियवत्** (५।२।८४) इत्यप्याहुः। * * क्षेत्रियं विषं। यत् पर-शरीरे सङ्क्रमय्य चिकित्स्यते। * * * किञ्च क्षेत्रियः पर-दारिकः। परदाराः परक्षेत्रम्। तत्र चिकित्स्यः निग्रहीतव्यः। सर्वेऽप्येते आकरे स्थिताः'—T. (1892). Literally क्षेत्रिय means a **disease that can be cured in another body, hence incurable.**)—("एतच्छरीराऽचिकित्स्यो य स्तत्र क्षेत्रियः स्मृतः'—'Qtd. **Prabhā**) Secondarily it means, one deserving punishment in the matter of another's wife, *hence an adulterer.* The idea is this:—You say Śak is my legal wife, and I have revolved the matter in my mind, but I do not, in sooth, remember to have any connection with her, and this is why I am keeping silence. Nor on the strength of polygamy should you egg me to accept this lady, as

she is enceinte. So my wilful acceptance of her will surely make me an adulterer and guilty thereby. How can I, a **chastiser of adulterers, be an adulterer myself** ? *R* reads **क्षेत्रिणम्** on which he comments thus 'क्षेत्रं पत्नी यस्य असौ क्षेत्री, तं क्षेत्रिणम्। * * * यत इयं गर्भिणी मया चेदधुना प्रतिगृह्येत तत्तदाहं **क्षेत्री** स्याम् न तु **बीजी**। अत एतज्जातापत्यं न **औरसम्** अपितु **क्षेत्रजम्**। तच्च औरसात् हीनमिति शङ्का। अथच अन्येन ऊढ़ाया: **परिग्रहे मत्क्षेत्रत्वमेव** स्यात्, न तु **धर्मपत्नीत्वम्** इति शङ्का'। '**क्षेत्रिन्**' is the **legal owner** of the field and '**बीजी**' is the man who **actually sows** the seed. Hence secondarily 'क्षेत्रिन्' is a **nominal husband** (*AD*), while 'बीजी' is the **actual husband.** Just as a person sowing seed in another's field, the fruit goes to the 'क्षेत्रिन्', the possessor of the 'क्षेत्र' (MS. IX, 32, 48-54), similarly by accepting this pregnant Śak., unto whom seeds have been sowed by another person, the king becomes merely a **nominal** husband and **he will have no right upon the issue.** Besides, the position of a 'क्षेत्रिन्'—practically an adulterer, is not at all honourable, this is why the king is unwilling to accept her. Ours is certainly a better reading. **2. प्रतिपत्स्ये**—Either "receive," or "reply," (*referring to the previous speech of Śārṅgarava*). *Westgarḍ* gives '*respondere*" as one sense of "प्रति+पद्"। Cf. "तच्छ्रुत्वा तथेति प्रत्यपद्यत"—*Rām.* 1.10.15. 'कथं प्रतिवचनमपि न प्रतिपद्यसे"–*PA&MD*; *VI*.–(115n. 2). **अपवार्य** =जनान्तिकम्। 'तद्भवेत् अपवारितम्। रहस्यन्तु यदन्यस्य परावृत्य प्रकाश्यते'—*SD*. (35n,. 5), **3. आर्यस्य—'आर्यपुत्र'** is the usual address to a **husband by the wife** (3*n*. 1) ; but here the marriage is not, **acknowledged** by the king, hence Śak. says '**आर्यस्य**' and not 'आर्य-पुत्रस्य'। Cf. '**आर्यपुत्र** (अर्धोक्ते), संशयिते परिणये न एष समुदाचारः'—*Act V. Infra.*

Text :—शार्ङ्गरव :—मा तावत्।

उपजाति **कृताभिमर्शा**¹**मनुमन्यमानः**² **सुतां त्वया नाम मुनि विमान्यः।**
'मुष्टं प्रतिग्राहयता³ **स्वमर्थं पात्रीकृतो**⁴ **दस्युरिवासि येन ॥२०॥**

Śārṅgarava—Indeed do not (*accept her*).

The sage–who[2]consents to the wrong[1] (*thou*) didst concerning his daughter and who in asking[4] acceptance[4] of his own filched[3] property, has made thee like a thief, an object[5] of gift[5]—certainly deserves to be affronted. (20)

शारद्वतः—शार्ङ्गरव ! विरम त्वमिदानीम् । शकुन्तले, वक्तव्य मुक्त मस्माभिः । सोऽयमत्रभवानेवमाह । दीयतामस्मै [६]प्रत्यय-प्रतिवचनम् ।

Śāradvata—Stop you now, Śārṅgarava. Śakuntalā, we have said our say. Here he—His Highness—speaks in this manner. Let him be given a convincing[6] reply.

शकुन्तला—(अपवार्य)**—इमं अवत्थन्तरं गदे तारिसे अणुराए किं वा सुमराविदेण । अथवा अत्ता दाणिं में सोहणीओ त्ति ववसिदं एवं** (इदम् अवस्थान्तरं[१] गते तादृशेऽनुरागे किं वा स्मारितेन[२] । अथवा आत्मा[३] इदानीं मे शोधनीय[४] इति [५]व्यवसितमेतत्) । (प्रकाशम्) **अज्जउत्त !** (इत्यर्धोक्ते) **संसइदे परिणए ण एसो समुदाआरो । पोरव, जुत्तं णाम दे तह पुरा अस्सम-पदे सहावुत्ताण-हिअअं इमं जणं तह समअ-पुव्वं पतारिअ ईदिसेहिं अक्खरेहिं पच्चाक्खादुं** (आर्यपुत्र ! संशयिते[६] परिणये न एष समुदाचारः[७] । पौरव, युक्तं नाम ते तथा पुरा आश्रमपदे स्वभावो-त्तान-हृदयम्[८] इमं जनं तथा समय-पूर्वं[९] प्रतार्य[१०] ईदृशै--रक्षरैः प्रत्याख्यातुम्) ।

Śakuntalā (*Aside to the audience.*)–When such (*an ardent*) love has been reduced[1] to this state[1], what will it avail to revive[2] (*old recollections*)[2] ? Or, (*at least my*) own self[3] has now to be acquitted[4] ; so (*I*) have[5] set about[5] it. (*Aloud*) My Lord (*this being half-said*) when marriage itself is doubted,[6] this should not be the proper[7] from (*of address*).[7] Paurava, it is indeed worthy of you to repudiate, in such terms, this naturally[8] frank-hearted[8] person, after having formerly hocussed[10] her with solemn pledges[9] in the hermitage.

V. L.—'अभिमर्शाम्'—S. M. K. 'अभिमर्षाम्'—Apte. R. V.. 'अवमर्षाम्'—B. 'मुष्टं'—R. V. M. B. 'इष्टम्'—Taylor Mss; some of B Mss read 'दुष्टम्' । शोधनोय:'—B. C. Chézy, HS. 'शोचनीय:'—K. Ś. R. M. S. 'मोचनीय:'—V. यक्तं'—B. V. S. 'न युक्तं'—R. M. K.

शाङ्गरव इति—'आत्मानं क्षेत्रियम् आशङ्कमानः कथम् इमां प्रतिपत्स्ये इति राजोक्तेः प्रत्युत्तरं सविद्रूपमाह 'मा तावत्' गृहाण इति शेषः। **कृतेति**—'कृतः अभिमर्शः' बलात् स्पर्शः अर्थात् स्पर्शात्मकं सुरतं यस्याः, तादृशीम् (अनेन सातिशया-पराधकृत्त्वं ध्वन्यते) 'सुतां' दुहितरं शकुन्तलाम् 'अनुमन्यमानः' त्वत्-कृतमस्याः कोप-हेतु-भूतं गूढो-पयमनम् अनुमोदमानः 'मुनिः' दाह-रूपात्मक-तेज-उद्गमन-क्षम. कुलपतिः कण्वः (तल्लक्षणं यथा—श्रीगीतायां '**वीत-राग-भय-क्रोधः स्थितधीर्मुनि रुच्यते**' इति) 'त्वया' कृतापराधेन नृपेण 'विमान्यः' अवज्ञातव्यः 'नाम' इति अभ्युपगमे ('नाम कोपेऽभ्युपगमे' इति मेदिनी)। **विद्रूपोक्तिरियम्।** 'येन' कृपालुना मुनिना 'मुष्टम्' (**अपाणिनीयोऽयं प्रयोगः 'मुषितम्' इति साधुः**) बलात् अपहृतं 'स्वं' स्वकीयम् 'अर्थं' धनं कन्यारूपं '(पुनः प्राप्तमित्यर्थः) 'प्रति-ग्राहयता' स्वीकारयता तदधीनं कारयता सता 'दस्युः' चौरः ('दस्युश्चौरे रिपौ पुंसि' इति मेदिनी') 'इव त्वं पात्रीकृतोऽसि' (५।४।५०) अपात्रमपि पात्र सम्पद्यमानः अर्थात् सम्प्रदानीकृतोऽसि ('दानपात्रं सम्प्रदानम्' इत्युक्तेः)। यथा चौरेण अपहृतं द्रव्य पुनस्तस्मै एवार्पितम् अगृह्णन् विमाननां जनयति तद्वत् इत्यर्थः (अत्रोपमा-लक्षणार्थोत्पादनात् **विषमालङ्कारश्च।** दस्युः पात्रीकृतो (**अस्ति**), त्वं तु (**असि**) इति पुरुष-भेदात् **प्रक्रम-भङ्गदोषः।** स च "येन प्रतिग्राहयता स्वमर्थं पात्रीकृतो दस्युरिव प्रमुष्टम्" इति पाठेन परिहार्यः। एवञ्च प्रक्रमस्य आरंभरूपत्वा-दारम्भस्य चोक्तेरेव विवक्षणात् प्रदर्शितपाठे च "असि" इत्यस्य अनुवतत्वात् न तद्दोषावसरः इति सुधीभिर्भाव्यम्"—इति सिद्धान्तवागीशपादाः। **उपजाति-वृत्तम्**) ॥२०॥ **शारद्वत इति**—'प्रत्यय-जनकं' विश्वास-जनकं 'प्रतिवचनम्' उत्तरम् (**उत्तर-पदलोपी समासः**)। **शकुन्तलेति**—'तादृशे' पूर्वानुभूते सातिशये 'अनुरागे' प्रेमणि 'इदम् अवस्थान्तरं' (२।१।७२) विपरीतदशां 'गते' प्राप्ते सति 'स्मारितेन' (३।३।११४) स्मरणहेतुना 'वा किम्' न किमपि प्रयोजनमित्याशयः। यतः अनुरागाभावे केवलं स्मरणस्य अकिञ्चित्करत्वाद्। (करणे तृतीया)। 'आत्मा' निज-स्वभावम् ('आत्मा कलेवरे यत्ने स्वभावे परमात्मनि' इति धरणिः) 'शोधनीयः' लोकापवादात् आत्मनः निर्दोषत्वं प्रतिपादनीयम् 'इति' हेतोः 'एतद्-व्यवसितं स्मारणाय यत्नः कृतः। 'एष समुदाचारः' आर्यपुत्र-शब्देन सम्बोधन-रूपः आचारः 'न' योग्यः। (आश्रमपदे' इत्यनेन त्वयाचरितं पातकं नितरां दोषावहम् इति सूच्यते। 'स्वभावेन' प्रकृत्या 'उद्गतः तानः' विस्तारः यस्मात् तत् 'उत्तानम्' अगभीरं सरलमित्यर्थः ('उत्तानम् अगभीरे स्यात् ऊर्ध्वास्य-शयिते त्रिषु' इति मेदिनी') 'हृदयं' यस्य तादृशम् (अनेन पदद्वयेन आत्मनः अतिमुग्धत्वं, तेन पर-वञ्चनाऽनभिज्ञत्वं परा-त्म-जन-विवेक-शून्यत्वं च ध्वनितम्) 'समय-पूर्वकं'

परिग्रह-बहुत्वेऽपि द्वे प्रतिष्ठे कुलस्य मे,' इत्यादि-वाक्येन **प्रतिज्ञा-पूर्वकं**, यद्वा **सङ्केत-पूर्वक-गान्धर्वेण विधिना** ('गान्धर्वः समयात् मिथ' इति याज्ञवल्क्य-स्मरणात्) **अथच** 'समय-पूर्वं' दिनत्रय-मध्ये मद्गृहे त्वन्नयनाय नेतारं प्रेषयामि, इति **प्रकारेण काल-नियम-पूर्वम्।** 'प्रतार्य' वञ्चयित्वा अधुना 'ईदृशैः अक्षरैः —'चिन्तयन्नपि न खलु स्वीकरणम् अत्रभवत्याः'–इत्यादिभिः हृदयविदारकैः वचनैः 'प्रत्याख्यातुम्' (३।४।६५)अस्वीकर्तुं "युक्तम् उचितं नाम" इति कुत्सायाम्।("उपकृतं बहु तत्र किमुच्यते" इत्यादि-दर्पणोदाहरणवत् **विपरीत-लक्षणया अतीवायुक्तम्** इत्याशयः)

171n.—1. मा तावत्—Cf. 'मा तावत् प्रथितयशसा'—&c.—Māla. (प्रस्तावना) ; (222n. 3). The whole speech of Śārṅgarava is sarcastic. He is highly incensed at the previous speech of the king ('तत् कथम् इमामभिव्यक्त-सत्त्व-लक्षणाम्'&c.–*Supra*). His speech implies "O upright king, you should never accept one who is big with child." *R* construes 'मा तावत्' with 'विमान्यः'। 2. **अभिमर्शम्—** 'अभिमर्श' means 'touch, contact,' hence 'carnal embrace, sexual intercourse.' The root 'मृश्' means '*to touch.* 'मृश आमर्शने। आमर्शनं स्पर्शः'—*SK*, 2541, while 'मृष' तितिक्षायाम् means '*to forgive*' 'आर्य मर्षय'—*VS.* (1 ; 119n. 4), Hence **अभिमर्ष** of *R*, *V*, Apte and others is erroneous and is to be rejected. Read 'विमर्शः परामर्शः। **मृषि इति मूर्धण्यान्तपाठो हेयः। तस्य क्षमैवार्थः**'। Also Cf. 'पराभिमर्शः न तवास्ति' —*Ku. V.* 43, where *MN* has 'पराभिमर्शः पर-घर्षणम्'। Also 'पर-दाराभिमर्शेषु प्रवृत्तान् नॄन् महीपतिः'—*MS. VIII.* 352. 'मनुष्य-मारणं स्तेयं पर-दाराऽभिमर्शनम्—*Nārada*. 'मुद्रास्थानम् परामृश्य'—*Infra*. 3. **नाम—** Implies admittance in an ironical sense. 4. **मुष्टं—**Stolen, because the king married Śak. without previous sanction from her guardian who was absent at that time. **'मुष्ट'** is **grammatically wrong**; (it may be justified according to **Vedic** grammar). (Vide 83n.1.) correct form **(मुषित)** in भाषा is elsewhere **used by our poet**. Cf. 'सैन्यरेणु **मुषितार्कदीधितिः**'—*Ra. XI.* 51. **'परि-मुषितरत्नं**—*MM. V.* 39 **'मूषितं** मुषितार्थकम्'—*AK.* "देवेन **मुषितोऽस्मि'**—*Kād.* ('यो **मुषति** परद्रव्यं तस्य **मुष्णाति** यः शिरः। **मुष्यति** अपहृतार्थानां दुःखं धन-

समर्पणात्'—*KR.* 115). **प्रतिग्राहयता**—Despite your stealing his daughter, the sage (like *Francois Bienvenu Myriel,* the kind Bishop of *D*) took no congnizance of your fault and urged you to accept "the stolen property." Cf. "**Why, I gave the candle-stick too * why did you not take them away with the rest of the plates**" —**Les Miserables.** Kāli., as well as many old writers, takes **ग्राहि** (also **त्याजि**) as **द्विकर्मक।** Cf. 'इदं शस्त्रं मां **ग्राहयामास**'—MS. I. 58 ; '**ग्राहयित्वा** आत्मानं ततो दग्ध्वा च तां पुरीम्'—Mahā ; 'अयाचितारं नहि देवदेवमद्रिसुतां **ग्राहयितुं शशाक**'–KU;BC. XII. 108. "भरतस्तत्र गन्धर्वान् युधि निर्जित्य केवलम् । आतोद्यं **ग्राहयामास समत्याजयतास्ऽयुधम्**' ।—*Ra. XV.* 88 ; 'तमादौ कुविद्यानाम् अर्थम् अर्थविदां-वरः । पश्चात् पार्थिव-कन्यानां पाणिम् **अग्राहयत्** पिता'—*Ra. XVII.* 3. This is in quite consonance with the Kārikā —'तार-ग्राहे स्तथामोचेः त्याजे दर्पेश्च संग्रहः' । Also"**ग्राहेः द्विकर्मकत्वं** यद्यपि '**अजिग्रहत्** जनको धनुस्तत्" इति भट्टि-प्रयोगस्य', 'अयाचितारं नहि देवदेवमद्रिसुतां **ग्राहियितुं**शशाक' इति कालिदास-प्रयोगस्य चानुगुणम् । तथापि **बहूनामसम्मतमेव।** अतएव 'तं धनुः **अजिग्रहत् बोधितवान्**' सुता **ग्राहयितुम्** उद्वाह्यत्वेन **बोधयितुम्**' इत्येवमुक्त-प्रयोगे समर्थयाञ्चक्रिरे—T. 'अन्ये तु एवं विधान् बहून् महाकविप्रयोगान् दृष्ट्वा कुश-काशावलम्बन-न्यायेन किमपि प्रकारान्तरमाहुः—**Goyicandra.** '**आपिशलीयमते****अन्येषां विवक्षावशात् कर्तृत्वं कर्मत्वं च । तेन **पाचयति ओदनं देवदत्तमित्यपि** साधु । अपिच तन्मते **त्यज-पच-मुचादीनामपि द्विकर्मकत्वं विवक्षा-वशात्**' । **तादृशो**— Refers to "तपति तनुगात्रि"— &c —III. 15. "परिग्रह-बहुत्वेऽपि"—III. 18; "किं शीकरैः"—&c. III. 19 ; 'अपरिक्षत"—&c.— III. 21; **5. शोचनीयः** &c.—Śak. feels it necessary to say something **in self-defence**, simply because her character is going to be sullied by the king's wording. **समुदाचारः**—(Proper form)—Cf. 'सर्वसमुदाचार मध्यस्थः'—*PN. III.* 'अतिक्रान्तः समुदाचारः'—SV. VI. **6. पौरवः**—Expresses the acute ire of Śak. **7. आश्रमपदे**— Mark the **significance** of the word (*Com.*) **8. स्वभावो-त्तान**— (Frank by nature) &c.—उत्+तन्+ण=(*by the Vārt.* 'तनोतेरूप-संख्यानम्'—3. 1. 104; 2903)=**उत्तानः** (*also Com.*)—Lit, what is stretched out, hence open, frank. **6. युक्तं नाम**—It is but quite proper. (*Said ironically*). Or, it may imply query. **10.**

समय-पूर्वं—समय means प्रतिज्ञा, सङ्केत, also ज्ञान and काल। The idea is:—You considered me (प्रतिज्ञा-पूर्वम्) as the only mainstay of your family and then married me according to गान्धर्व form (सङ्केत-पूर्वम्), fixed the time (कालपूर्वम्—Act. VI. 12) of my reception and now you are intentionally (ज्ञान-पूर्वम्) cheating me. (Com)..

Text :—राजा (कर्णौ पिधाय)—शान्तं पापम्।

आर्या 'व्यपदेशमाविलयितुं[2] किमीहसे जनमिमञ्च पातयितुम्[3]।
[12. 18
12, 15] 'कूलङ्कषेव[4] सिन्धुः[5] 'प्रसन्नमोघं तट-तरुञ्च ॥२१॥

King (*Shutting his ears*)—Let sin be palliated. Why seekest thou to sully[2] (*thy own*) lineage[1] and demean[3] this person also, just as a river[5], fretting[4](*her*) marge, does (*to stain her*) lucid[6] water and (*to fell or overturn*) the riparian trees. (21)

शकुन्तला—होदु, जइ परमत्थ दो पर-परिग्गह-सङ्किणा तुए एव्वं पउत्तं ता अहिण्णाणेण इमिणा तुह आसङ्कं अवणइस्सं।

(भवतु, यदि परमार्थतः[1] पर-परिग्रह-शङ्किना[2] त्वया एवं प्रवृत्तं तदभिज्ञानेन[3] अनेन तव आशङ्का मपनेष्यामि)।

Śakuntalā—Very well, if really[1] dreading[2] another's wife,[2] this procedure has been adopted by you,then with this keepsake[3], your dread (*I*) will remove.

राजा—उदारः कल्पः। King—An excellent proposal.

V.L.—The last half of the 1st line is read thus in B:—'समीहसे माञ्च नाम पातयितुम्'; 'अम्भः'—R. M. V. S. 'ओघम्'—B.HS. 'पर-परिग्रह-शङ्किना'–R.B.V.M. 'परिग्रह-शङ्किना'–S.'प्रवृत्तम्'—B.M.S.V. 'वक्तुं प्रवृत्तम्'—R. 'अभिज्ञानेन अनेन'—R. V. S. M. 'अभिज्ञानेन केनापि'—B.

राजेति—'कर्णौ पिधाय' हस्ताभ्याम् आच्छाद्य। पाप-वृत्तान्त-श्रवणाऽनिच्छया कर्ण-पिधानम् ('वष्टि भागुरि रल्लोपमवाऽप्यो रुपसर्गयोः' इति भागुरि-वचनात् अ-लोपः पाक्षिकः,') 'पापं' पापजनकं तव भाषणं 'शान्तं निवारितम्

अस्तु इत्यर्थः। शान्तम् इत्यत्राऽव्ययम्। (**अव्ययं वारणे शान्तम्'** इति मेदिनी)। **व्यपदेशमिति**—'कूलं कषति' भिनत्ति या सा 'कूलङ्कषा' तट-संघर्षिणी ('सर्व-कूलाऽभ्र-करीषेषु कषः'—(३।२।४२) इति खच्। खचि मुमागमः) 'सिन्धुः' नदी ('सिन्धुः समुद्रे नद्यां च नदे देशेभ-दानयोः' इति विश्वः) 'प्रसन्नं' निर्मलम् "**प्रसन्ना** स्त्री सुरायां स्यात्, **अच्छ-सन्तुष्टयो** स्त्रिषु" इति मेदिनी) 'ओघं' जल-प्रवाहम् ('**ओघो वेगे जलस्य** च' इति मेदिनी) यथा कलङ्कयित्वा 'तटजातं तरुं' वृक्षं ('शाकपार्थिवादिः') पातयति तद्वत्, व्यपदिश्यते जन-समाजे ख्यायते अनेन इति 'व्यपदेशः' त निर्मलं कूलम् 'आविलयितु' पत्युरनिर्णयात् कलुषीकर्तुम् ('**कलुषोऽनच्छ आविल**' इत्यमरः) 'इमं जनं' मल्लक्षणं निर्मल-वंश-प्रसूत सदाचारपूतम् अथच निःसम्पर्कम् इत्याशयः। 'पातयितु' धर्मात् प्रस्खलयितु 'त्वम् कि' किमर्थम् 'ईहसे' चेष्टसे ('त्वं तु इहागमनेनैव पतिताऽसि इति णिचा ध्वन्यते। [**उपमालङ्कारः**। अत्र भिन्ने अपि गुणक्रिये अतिशयोक्त्याऽभेदेनाऽध्यवसिते। पूर्वार्धे **गुण-क्रिययोः समुच्चयः**। **यथासंख्यमलङ्कार** इति केचित्। 'सिन्धुः ईहते', 'त्वन्तु ईहसे' इति पुरुष-भेदात् अत्रापि **प्रक्रम-भङ्ग-दोषः**। स च 'ईहते' इति पाठेनैव, समाधेयः। अस्मिन् पाठे "**भवती**"त्ति कर्तृपदान्वयादुपपत्तिः। **आर्या जातिः**॥२१॥ **भवतु इति**—। भवतु इति निषेधे।—('अस्तु इति निषेधा-सूया-ङ्गीकारयोः। **भवतु इति अस्तुवत्**' इति गणकारः)। **शकुन्तलेति**—'परमार्थतः' याथार्थ्येन (तृतीयां तसिल्)। 'अपनेष्यामि' दूरीकरिष्यामि ('आशङ्काम् अपनेष्यामि' इत्यत्र 'आशङ्काम् इति कर्मणः अशरीरत्वेऽपि 'अपनेष्यामि' इत्यत्र न आत्मनेपदम्, कर्तृस्थितताऽभावात्। **राजेति**— 'उदारः' महान् ('**उदारः** दातृ-**महतोः**' इत्यमरः) '**कल्पः** न्यायः' ('कल्पः शास्त्रे विधौ **न्याये** संवर्ते ब्रह्मणो दिने' इति मेदिनी)।

172n.—1. व्यपदेशम् &c.—व्यपदेश—"That by which one is designated"—(व्यपदिश्यते अनेन **करणे घञ्**) *i.e.* a **family or race**. Cf. 'अथ कोऽस्य व्यपदेशः'—Śak. VII. 'व्यपदेशकुले जातः'—Rām. IV. 64 ; 20. 117 ; III 12. 13. Sometimes it means a '**name**'. Cf. 'एवं व्यपदेश-भाजः'—*UC. VI.* **ओघं**—Is also derived with **करणे घञ्**—[आ उह्यते अनेन "हलश्च" (३।३।१२१) इति घञ्। न्यङ्क्वादित्वात् (७।३।५३) कुत्वम्—*BhD*] and means '*river current*', and in this sense it has been elsewhere used by our poet, Cf. "पुनरोघेण हि युज्यते नदी"—*Ku. IV.* 44. The word being **masculine** is in **better consonance**

with व्यपदेश, so **reject** 'अम्भः'। 2. **आविलयितुं**—(Com.). आविलं—कर्तुम् इति आविल+णिच् ("तत् करोति तदाचष्टे'—*GS.* 2573)+तुम्=आविलयितुम्—'To soil', 'to render limpid water turbid'. Thus it is **'अन्तर्निविष्ट-कर्म'**, hence it can not further take a **कर्म** (व्यपदेशं) । Now read (166n. 4), 3. **कूलङ्कषा**—Itself is an epithet of the river as it undermines the bank. 'कूलङ्कषा नदी'—*VM & BD.* (III-2-42); 'मुम्' by 'अरुर्द्विषदजन्तस्य मुम्'—(6. 3. 67). Cf. 'जलं कूलावपातेन प्रसन्नं कलुषायते'।—*MR. IX.* 24. "रोधः पतन-कलुषा"—*VIK.*1.7. Now vide Rs. X*I*. 8. 4. **सिन्धुः**—स्यन्दते इति स्यन्द् ('प्रस्रवणे')+उ–['स्यन्देः संप्रसारणं धश्च' (उः-११) इति उः]—*BhD.* A **crorrupt woman** is often compared to a **river.** Cf. "**नद्यश्च नार्यश्च सम-स्वभावाः** स्वतन्त्रता-वेगबलाधिकत्वात्। तोयैश्च दोषैश्च निपातयन्ति **नद्यो हि कूलानि, कुलानि नार्यः॥ नदी पातयते कूलं, नारी पातयते कुलम्।** नारीणाञ्च नदीनाञ्च स्वच्छन्द-ललिता गतिः"—*GP. Ch.* 109. 5. **अपनेष्यामि**—Here"कर्तृस्थे चाऽशरीरे कर्मणि"-(2710) does not apply, as 'आशङ्का' ('कर्म') though अशरीर, **does not belong** to the **agent** शकुन्तला। Read 'कर्तृस्थे इति किम्? शिष्यः गुरोः क्रोधं **विनयति**'—-**Prabhā. 6. उदारः कल्पः—प्रथमः कल्पः** (B)—Seems to be preferable. Read (236n. 3).

Text :—शकुन्तला (मुद्रास्थानं परामृश्य[1]) **हद्धी, हद्धी, अंगुलीअअ-सुण्ण मे अंगुली** (हा धिक्, हा धिक्। अङ्गुलीयक-शून्या मे अङ्गुलिः)।

॥ (इति सविषादं गौतमीमुखमीक्षते) ॥

Śakuntalā (*Feeling*[1] *the place of the ring*)—Alas ! Alas ! my finger is without the ring.

(*This said, looks sadly at Gautamī's face*).

गौतमी—णूणं दे सक्कावदार-ब्भन्तरे सची-तित्थ-सलिलं वन्दमाणाए पब्भट्ठं अंगुलीअअं (नूनं ते शक्रावताराऽभ्यन्तरे शचीतीर्थसलिलं वन्दमानायाः[2] प्रभ्रष्टमङ्गुलीयकम्) । Gautamī—Surely the ring slipped off, as you were bowing[2] to the water of Śacītīrtha in Śakrāvatarā.

राजा—(सस्मितम्) इदं तत् प्रत्युत्पन्नमति[1] स्त्रैण[2] मिति यदुच्यते ।

King (*With a smile*)—This is what is called "ready-witted[1] is womankind[2]."

शकुन्तला—एत्थ दाव विहिणा दंसिदं पहुत्तणं । अवरं दे कहिस्सं । (अत्र तावद्विधिना दर्शितं प्रभुत्वम् । अपरं ते कथयिष्यामि) ।

Śakuntalā—Here indeed fate has shown its power. Another (*convincing incident*) I'll relate to you.

राजा—श्रोतव्यमिदानीं संवृत्तम् ।

King—(*It*) has now become a thing to be heard.

शकुन्तला—णं एक्कस्सिं दिअहे वेदस-लदा-मण्डवे णलिणी-पत्त-भाअण-गदं उअअं तुह हत्थे सण्णिहिदं आसि (ननु एकस्मिन् दिवसे वेतस-लता-मण्डपे नलिनी-पत्र-भाजन-गतमुदकं तव हस्ते सन्निहितम् आसीत्) ।

Śakuntalā—Well, one day, in the cane-bower, you had in your hand, water in a lotus-leaf-cup.

राजा—शृणुमस्तावत् । King—Well, (I) am listening. (*Proceed*).

शकुन्तला—तक्खणं सो मे पुत्त-किदओ दीहापङ्गो णाम मिअ-पोदओ उवट्ठिओ (तत्क्षणं स मे पुत्र-कृतको दीर्घापाङ्गो नाम मृग-पोतक[1] उपस्थितः) । तदो तुए अअं दाव पढमं पिअउ त्ति अनुअम्पिणा उपच्छन्दिदो उअएण । ण उण दे अपरिचआदो हत्थब्भासं उवगदो (ततः त्वया अयं तावत् प्रथमं पिवतु इति अनुकम्पिना उपच्छन्दित[2] उदकेन, न पुनस्ते अपरिचयात्[3] हस्ताभ्यासम् उपगतः) । पच्छा तस्सिं एव्व मए गहिदे सलिले णेण किदो पणओ । तदा तुमं इत्थं पहसिदोसि—सव्वो सगन्धेसु विस्ससिदि । दुवे वि तुम्हे आरण्णआ त्ति (पश्चात् तस्मिन्नेव मया गृहीते सलिले अनेन कृत. प्रणयः । तदा त्वमित्थं[4] प्रहसितोऽसि—सर्वः सगन्धेषु[5] विश्वसिति, द्वावपि युवाम् आरण्यकौ[6] इति) ।

Śakuntalā—Just at that moment, my foster-child,[1] a little fawn, Dīrghāpāṅga by name, came up. (*Then*) you saying, "Let him drink first," kindly coaxed[2] him with the water, but he didn't get near your hand owing[2] to unfamiliarity[3]. (*Immediately*) afterwards, when that very water was taken by me, he made love (*to it*). Then you jested[4] thus—"All naturally confide in (*their*) own kindred;[5] even both of you are wild[6]."

V. L. :—'गौतमीमुखम् ईक्षते'—B, 'गौतमीम् अवेक्षते'—R. M. V. S. 'वेतसलता'—B.HS. 'नवमालिका'; —R.V.S.M.; पुत्रकृतकः—R. B. V. M. 'कृतकपुत्रकः'—S. 'द्वावपि युवाम्'—B.HS. 'द्वावप्यत्र'—R. M. V. S.

गौतमीति—'शक्रावतारः' भागीरथी-तीर-स्थितो जनपद-विशेषः तस्य 'अभ्य-न्तरे' मध्ये 'शचीतीर्थस्य सलिलं वन्दमानाया' उपस्पृश्य नमस्कुर्वत्याः ['लक्षण-हेत्वोः क्रियायाः')-(३।२।१२६)-इत्यत्र शानच् हेत्वर्थः]। अङ्गुलीयकं ('जिह्वामूला-ऽङ्गुलेः छः'-(४।३।६२); छ=ईय-(७।१।२), ततः स्वार्थे कन्), 'प्रभ्रष्टं' तस्य पुरुष-हस्त-परिणाहात् शकुन्तलायाः कृशाङ्गुल्या नद्यां विच्युतम् । नूनमित्यवधारणे । **राजेति**—'स्त्रैणं' स्त्रीसमूहः । स्त्री-जातिः (इति कात्यवेमः । 'स्त्री-पुंसाभ्यां नञ्-स्नञौ भवनात्'-(४।१।८७) इति जात्यर्थे समूहार्थे वा नञ्-प्रत्ययः) । 'प्रत्युत्पन्नमिति' प्रतिभान्वितम् (इति जटाधरः) । (तल्लक्षणं यथा सुधाकरे—"तात्कालिकी तु **प्रतिभा प्रत्युत्पन्नमतिः** स्मृता" ॥ अपिच, "प्रज्ञा नवनवो-न्मेष-शालिनी प्रतिभा मता" इति रुद्रकोषः) । 'इति यत् उच्यते' लोकैः कथ्यते 'तत् इदं' प्रमाणम् । **शकुन्तलेति**—'अत्र' अङ्गुरीयक-प्रपाते 'विधिना' 'प्रभुत्वम्' अभिज्ञान-हरणात्मिका क्षमता 'तावत् दर्शितम्'—दैवमेवात्राऽतिरिच्यते इति भावः । **राजेति**—द्रष्टव्य मभिज्ञानम् 'इदानीं' श्रोतव्यं संवृत्तम्, द्रष्टव्यात् श्रोतव्यस्य दुर्बलत्वात् **सोल्लुण्ठन-वचनमेतत्** । **शकुन्तलेति**—'ननु' इति वाक्यारम्भे (इति हेमचन्द्रः) । 'वेतस-लता-मण्डपे' वानीर-विरचित-विश्राम-गृहे ("अथ मण्डपोऽस्त्री जनाश्रयः' इत्यमरः) । **शकुन्तलेति**—'पुत्र-कृतकः' कृत्रिमपुत्रः । 'मृगपोतकः' हरिणशिशुः ('**पोतः शिशौ** वहित्रे च गृहस्थाने च वाससि' इति मेदिनी) 'उपच्छन्दितः' पानाय अभ्यर्थितः प्रलोभित इत्यर्थः 'हस्तस्य अभ्यासः' अन्तिकः तम्, (अभ्यासोऽभ्यसनेऽन्तिके' इति विश्व-मेदिन्यौ) । 'अनेन' मृगपोतकेन अना-हुतेनापि 'प्रणयः' स्वतः याच्ञा सलिल-पानेच्छा इत्यर्थः । 'प्रहसितः' (कर्तरि क्तः, अकर्मकत्वात्—३।४।७२) । 'सर्वः' प्राणी 'समानः' तुल्यः **गन्धः' 'सम्बन्धः** येषां तेषु, तुल्य-सम्बन्धेषु आत्मीयेषु इति यावत् । ('**गन्धो** गन्धक. आमोदे लेशे **सम्बन्ध-गर्वयोः**' इति विश्वप्रकाशः, "समानस्य"-(६।३।८४)-इति योग-विभागात् पृथक्सूत्रं कृत्वा 'समानस्य' स-भावः-(१९१२)। विस्तरतु प्रथमाङ्के द्रष्टव्यः) 'आरण्यकौ' वन्यौ (अनेन पूर्वभूतानां कार्याणां संगृहीतत्वात् **आदानं** नामाङ्गमुप-क्षिप्तम् । तल्लक्षणं यथा दशरूपके—"**आदानं** कार्यसंग्रहः" । पुनः च "भूत-कार्याऽऽख्यानम् **उत्कीर्तनं**—मतम्' इति दर्पण-लक्षणात् **उत्कीर्तनं** नाम नाट्यालङ्कारश्चोक्तः]।

173n.—1 वन्दमानायाः—(While bowing)—शानच् here implies हेतुः (*Com.*). ' (हेत्वर्थे यथा 'स अर्जयन् आस्ते, 'इह **उपार्जनम्** एव अस्य **प्रवासस्य कारणम्**)। 'स सेव्यमानः विलसति', (अत्र सेवा एव तस्य विलासे कारणम्)। 'विचिन्तयन्तीं यम् अनन्यमानसा तपोधनं वेत्सि न मामुपस्थितम् (अत्र **कान्त -विषयिणी चिन्तैव** तपोधनस्य अवज्ञायाः **कारणम्**)—**Prabhā. विधिना** &c.—Cf. 'भवितव्यतात्र बलवती'—Vik. IV. **2. श्रोतव्यं** &c.—Said tauntingly. You wanted first to give me an *ocular* proof. But now you are producing an auricular proof, or rather a story that is to be heard. Still I must give a patient hearing to your *got-up* story. For 'स चेत् मया न श्रोतव्यः ममाश्रवणापराध एव स्यात् इति प्रयोजनाभावेऽपि श्रवणमात्रे विधिरिति संवृत्त-पद-द्योत्यम्'—*R* 3. **वेतस-लता** &c.—Vide (86n. 2); **Act**—III. 4. **4. शृणुमः** &c.—Mark the **utter indifference** of the king owing to the worthlessness of the evidence. **5. पुत्र-कृतकः**—(141n. 3). **6. उपच्छन्दितः**—उपच्छन्द means '*to entreat*'. '*to coax with flattering language*'. Cf. 'तस्मात् उपच्छन्दयति प्रयोज्यम्'—*Ra. V.* 58. where *MN* remarks 'उपच्छन्दयति प्रार्थयमाने सति'।—['Obsecro (supplicate)'—**Stenzler**]. 7. **सगन्धेषु—**समानः गन्धः येषां ते सगन्धाः। 'समान'='स' (Com.) and (23n. 6) ; **8. आरण्यकौ**—Is to be derived with वुञ्-(4. 2. 129) ; वुञ्=अक्-(7. 1. 1.), and with 'ण' (Vārt. 4. 2. 140) in the case of Śak, and the fawn respectively. Next स्वार्थे कन् (127n. 1.) **For reasons Vide 52n. 2.** Śak. chose this particular incident, as the king out of love perhaps often used to taunt her as "*wild*" (जंली)। (Cf. 'क्व वयं क्व परोक्ष-मन्मथो **मृग-शावैः सममेधितो** जनः'—*Act.* II. 18. For similar idea Cf. **'The sallow knows the basket-making thumb'—Emerson.**

Text :—राजा—एव माविभि रात्म-कार्य-निर्वर्तिनीनां[1] मधुराभि रनृत-वाग्भि राकृष्यन्ते[2] विषयिणः[3]।

King—[3]Voluptuaries are enticed[2] by such and other sweet untruthful words of women [1]seeking to compass their own end'.[1]

गौतमी—महाभाअ ! णारुहसि एव्वं मन्तिदुं । तवोवण-संवड्ढिदो अण-भिण्णो अअं जणो कइदवस्स (महाभाग ! नार्हसि एवं मन्त्रयितुम् । तपोवन-संवर्धितः अनभिज्ञः अयं जनः कैतवस्य[4]) ।

Gautamī—Speak not thus, O illustrious (*king*) Bred in a penance-grove, this person is unaware of deceit[4].

राजा—तापसवृद्धे !

वसन्ततिलका (तभजजगग)

स्त्रीणामशिक्षित-पटुत्व[5] ममानुषीणां[6]
संदृश्यते किमुत याः प्रतिबोधवत्यः[7] ।
प्रागन्तरिक्ष-गमनात् स्वमपत्य-जातम्
अन्यैर्द्विजैः[8] परभृताः[9] किल पोषयन्ति ॥२२॥

King—Old hermit-matron ! Intuitive[5] cleverness[5] is observed (*to exist even*) amongst (*untutored*) females[6] other than human[6] ; what then in the case of those that are [7]gifted with intelligence[7] ? The female cuckoos[9], as is well-known, cause their own young ones to be reared by other[9] birds[9], before soaring in the sky. (22)

V. L.—'निर्वर्तिनीनाम्'—R. V. S. Taylor Mss., Dr. Burkhard. 'प्रवर्तिनीभिः'—B. 'निवर्तिनीनाम्'—M.K. 'मधुराभिः अनृत-वाग्भिः'—B. 'अनृतमय-वाङ्मधुभिः'—R. M. V. 'योषितां मधुर-गिर्भिः'—Mackenzie Mss. 'अनृत-वाङ्मधुराभिः'—S. 'अमानुषीणाम्—B. 'अमानुषोषु'—R. V. M. 'किल'—B. 'खलु'—R. V. S. M.

राजेति—'आत्मज्ञां कमणि' स्वोद्देश्यानि अवश्यं निर्वर्तयन्ति साधयन्ति याः तासाम् ['आवश्यकाऽऽधमर्ण्ययोः णिनिः'—३।३।११०] स्वोद्देश्य-साधने तत्पराणां दुष्टानां नारीणां इत्यर्थः ('विशेषण-मात्रप्रयोगः विशेष्य-प्रतिपत्तौ' इति वामनः) 'एवमादिभिः' ईदृशीभिः 'अनृतवाग्भिः' असत्य-वाक्यैः 'विषयिणः' कामुकाः न तु मादृश-जना'। 'आकृष्यन्ते' आकृष्य स्ववशं नीयन्ते । गौतमीति—'कैतवस्य' छलनायाः 'अनभिज्ञः' ('कैतवं तु च्छले द्युते कैतवः कितवे रिपौ' इति मेदिनी) स्त्रीणामिति—'अमानुषीणां' मानुषी-भिन्नानां 'स्त्रीणाम्' ('मनोर्जातावञ्यतौ षुक् च'—४।१।१६१)—(अनेन मेनका च व्यज्यते, अस्या अमानुषीत्वात्) अपि 'अशिक्षितम्' अनुपदिष्टम् यत् 'पटुत्वम्' अर्थात् उपदेशम् अन्तरेण सहजं विद्यमानं कौशलं, स्वाभाविक-चातुर्यम् इत्यर्थः 'संदृश्यते' परिलक्ष्यते । 'या' नार्यः'

'प्रतिबोधवत्य': विशिष्ट-बुद्धयो मानुष्यः तासां 'किमुत' अनुपदिष्ट-वञ्चकत्व-कौशलं किमधिकं वक्तव्यम् ('किमु सम्भावनायां स्यात् विमर्शे चापि दृश्यते। किमुतातिशये प्रश्ने विकल्पे च प्रयुज्यते ॥" इति विश्व-मेदिन्यौ)। [अतएव अर्थापत्तिरलङ्कारः। 'व्यतिरेक' इति राघवपादाः)। 'परैः' काकैः 'भृताः' पालिताः इति 'परभृताः' कोकिला' ('वनप्रियः परभृतः कोकिलः पिक इत्यपि' इत्यमरः। अथच 'परैः' अन्यैः 'भृताः' पुष्टा, देव-धन-परिवर्धिता इति स्व-वेंश्या मेनका अपि द्योत्यते। अपिच 'परेण' अन्येन महर्षिणा कण्वेन मारीचेन वा 'भृताः' पालिता रक्षिता वा इति शकुन्तलापि लक्ष्यते) 'स्वं' स्वकीयम् 'अपत्य-जातं शावकसमूहं ('जातं जनि-समूहयोः' इति कोषः। अथच 'अपत्यजातं' शकुन्तला-रूपम्) 'अन्तरिक्ष-गमनात्(२।३।२६)प्राक्' आकाशोड्डयनात् प्राक् (अनेन शकुन्तलामुज्झित्वा मेनकायाः स्वर्ग-गमनात् प्राक् इत्यर्थान्तरमपि लभ्यते) 'अन्यैः द्विजैः' (३।२।१०१) वायसादिभिः पक्षिभिः (अथच अन्यैः' विश्वामित्र-भिन्नैः 'द्विजैः' विप्रैः कण्वैरित्यर्थः। 'दन्त-विप्राऽण्डजा द्विजा' इत्यमरः) 'पोषयन्ति' वर्धयन्ति 'किल' इति वार्तायाम्। (अत्र शकुन्तला-लक्षणे विशेषे प्रस्तुते स्त्री-सामान्यस्योक्तत्वात् अप्रस्तुत-प्रशंसा। अर्थान्तरन्यासोऽपि। 'तयाः त्य' इति 'मना मन्यैः इति छेक-वृत्त्यनुप्रासौ। अत्र काकैरेव कोकिल-शावक-पोषण-दर्शनात् अन्यैश्चाऽदर्शनात् काकैरिति पक्षि-विशेषे वक्तव्ये 'अन्यैर्द्विजैः' इति, पक्षि-सामान्याऽभिधानात् विशेषे अविशेषाख्य-दोषः। स च "काकैः पिका किल रहः परिपोषयन्ति" इति पठित्वा समाधेय" इति सिद्धान्तवागीशपादाः। वसन्ततिलका वृत्तम्) ॥२॥

174n.—1. तापसवृद्धे —'परनिपात' of 'वृद्ध' is optional by 'कड़ारा कर्मधारये' (2. .2. 38) The king seems to be extremely irritated. **2. अमानुषीणां—न** मानुषी=अमानुषी–Lower animals, तासाम्। Here 'नञ्' is indicative of 'तदन्यत्व' (160n. 6). Hence the epithet also *indirectly* refers to the celestial nymph Menakā who is also other than human beings. \3. किमुतः ('अव्यय)—"What more"—(*Com*). "Much more"—*M.* 'बलवत् सुष्ठु किमुतः स्वत्यतीव च निर्भरे"–AK. **प्रतिबोधवत्यः**:–प्रति+बुध्+घञ् करणे=प्रतिबोधः—Intellect *i.e.* the instrument of acquiring knowledge. Next मतुप्। This is expressive of his **contrast with** 'अशिक्षित'। **अशिक्षित**—(Untutored) &c.—'**अशिक्षित इत्यत्र प्रधानस्य नञर्थस्य समासे गुणीभावात् विधेयाविमर्श-दोषः**, स च "शाठ्यं

न जन्मावधि शिक्षितो यः" इति पाठेन समाधेयः'— HS. 4. **अन्तरिक्ष-गमनात्**— द्यावा-पृथिव्योः अन्तर् (मध्ये) ईक्ष्यते इति अन्तर+ईक्ष्+घञ् कर्मणि (3.3.19) =अन्तरीक्षम्। वेदे तु छान्दस **ह्रस्वत्वम्**। अन्तर् ऋक्षा–(णि') नक्षत्राण्यस्य। पृषोदरादित्वात्—(6. 3. 109) इत्वम्। अस्मिन् पक्षे 'अन्तरिक्षम्' इति ह्रस्व-मध्यः। अधिकरण-व्युत्पत्तिस्तु नोचिता, ल्युटा घञो बाध-प्रसङ्गात् —*BhD*. The phrase also indirectly refers to Menakā's return to heaven after Śak's birth. Also Infra, 5. **अन्यैर्द्विजैः**—द्विज means both '*bird*' and '*Brāhmaṇa*",. Thus the phrase means—'by birds other than cuckoos, *i.e.* the crows'. Hence **विशेषे अविशेषाख्य-दोषः** (Com.). Next it means—"By a Brāhmaṇa (*Kaṇva or Mārīca*) who was other than Visvāmitra' (*Com*). 6. **परभृता**—Directly refers to *cuckoo* (134*n*. 7), and indirectly to *Menakā* who is a **kept-woman** (*Com*.). The king was absolutely ingorant of Śak-affair owing to the imprecation of Durbāsāh, still his unconscious speech flung correct indecent reference to her birth from a prostitute and also perhaps to her chastity. Most likely she has come to fulfil her own mission (Cf. **आत्मकार्य-निर्वर्तिनीनां**— Supra) *i e*., to make the king to be the father of her illegitimate child. Thus. the king's speech is a beautiful instance of **Dramatic Irony** (152n. 6). In this connexion read Duṣyanta's speech to Śak.— 'जातिश्चापि निकृष्टा ते कुलीनेति विजल्पसे। जनयित्वा त्वमुत्सृष्टा **कोकिलेव परैर्भृता**'—Ādi, 94; Also 'अत्र काव्यार्थोऽपि द्योत्यते। तथाहि अन्तरीक्ष-गमनात् प्राक् **दुष्यन्तस्य मातलिना सह स्वर्गगमनात् पूर्वं** स्वमपत्यजात स्वकीय **पुत्रं अन्यैर्द्विजैः मारीचादिभिः** पोषयन्ति"—Śrīnivāsa Cf—'स्त्रियो हि नाम खल्वेता निसर्गादेव पण्डिताः। पुरुषाणां तु पाण्डित्यं शास्त्रैरेवोपदिश्यते॥ —*MR. IV*. 19;—'वयस्य, निसर्ग—निपुणाः स्त्रियः'—*Māla. III*

Text :—**शकुन्तला** (सरोषम्)—**अणज्ज, अत्तणो हिअआ-णुमाणेण किल सव्वं पेक्खसि। को दाणिं अण्णो धम्म-कञ्चुअ-प्पवेसिणो तिण-च्छण्ण-कूवो-वमस्स तव अणुकिदिं पडिवज्जिस्सदि** (अनार्य' आत्मनो हृदयानुमानेन' किल

सर्वं प्रेक्षसे । क इदानीमन्यो धर्म-कञ्चुक-प्रवेशिन[1] स्तृण-च्छन्न-कूपोपमस्य तवानुकृतिं प्रतिपत्स्यते) ।

Śakuntalā (*In wrath*)—Ignoble man[1] ! (*Thou*) judgest of others. [2]after the manner of (*thy*) own (evil) heart[2]. Who else will act (*so basely*) in imitation of thee. that[3] donning the garb of virtue[3]. '[4]resemblest a straw-covered pit.[4]

राजा—(आत्मगतम्)—सन्दिग्ध-बुद्धिं मां कुर्वन् अकैतव इवास्याः कोपो लक्ष्यते ! तथा ह्यनया—

मय्येव विस्मरण-दारुण-चित्त-वृत्तौ[5]
वसन्ततिलका वृत्तं रह[6] प्रणयमप्रतिपद्यमाने[7] ।
(तभजजगग) [8]भेदाद्भ्रुवोः [9]कुटिलयोरतिलोहिताक्ष्या
भग्नं शरासनमिवातिरुषा स्मरस्य[10] ॥२३॥

(प्रकाशम्) भद्रे. प्रथितं दुष्यन्तस्य चरितम् । प्रजास्वपीदं न दृश्यते ।

King (*Aside*)—Her ire. rendering me wavering in mind. appears like that of one free from fraud, For--

[5]With the attitude of (*my*) mind (*towards her*) turned dreadful, owing to forgetfulness[5], I, having[7] disowned[7] the love made in secrecy[6] (*between us*),—by her with crimson eyes because of extreme anger, is snapped asunder, as it were, the bow of Cupid,[10] through the knitting[8] of her curved[9] eyebrows. (23)

(*Aloud*) Good lady ! Duṣyanta's actions are well-known (*to all*). Such a thing is not noticed even amongst (*his*) subjects.

V. L. :—'प्रजास्वपीदं न दृश्यते'—B.HS. 'तथापीदं न लक्षये—R. V. M. 'तथापीदं न लक्ष्यते'—S. In some Mss, the speech has been assigned to 'पुरोधाः' ।

शकुन्तलेति—'आत्मनः' स्वस्य 'हृदयेन अनुमानं' तेन । अर्थात् स्वहृदयं यथा वञ्चना-पूर्णम् अन्येषामपि तथा इत्यनुमानेन । 'प्रेक्षसे' मन्यसे । 'अन्यः' (इत्यनेन त्वत्तुल्यः दुष्टः नास्ति इति मन्यते) 'धर्म' एव 'कञ्चुकः' बहिरङ्ग-प्रावरणं (रूपक-कर्मधारयः), तं प्रवेष्टुं शीलमस्य अर्थात् व्याजेन साधुत्वं प्रख्यापयतः अतएव 'तृणैः छन्नः' पिहित आच्छादित इत्यर्थः ('छन्नं रहश् छादितयोः' इति

हेमः। 'वा दान्त-शान्त-पूर्ण-दस्त-स्पष्ट-छन्न-ज्ञप्ता.'-(७।२।२७) इति इडागम वैकल्पिकः) यः 'कूपः' वापी तस्य उपमीयते अनेन इति 'उपमा' सादृश्य तथाभूतस्य 'नव अनुकृतिम्' अनुकरण धर्म-वचनं. त्वस्य सत्य-सन्धत्व-प्रख्यापन 'क प्रतिपत्स्यते' विश्वास्यति न कोऽपि इत्यर्थ.। (अर्थापत्तिरलङ्कारः। राग-भाषणात् अत्र संफेट-नामाङ्ग-मुपक्षिप्तम्–'संफेटः रोष-भाषणम्' इति दर्पण-लक्षणात्।) मयीति—'मयि'' दुष्यन्ते 'एत्र विगत स्मरण यस्य तत् विस्मरण' विस्मृति. तत 'दारुणा' भयावहा निष्ठुरा इति यावत् ("दारुणो रसभेदे ना त्रिषु तु स्यात् भयावहे' इति विश्व-मेदिन्यौ) 'चित्तवृत्ति'' मनोवर्तन यस्य तस्मिन्, अतएव 'रह निर्जने 'वृत्तं' सम्पादितं 'प्रणय' प्रणय-घटित-परिणयादिकम् 'अप्रतिपद्यमाने' अजानाने अस्वीकुर्वति सति 'अनिरुषा' महता कोपेन हेतुना 'अत्यन्त लोहितेन' रक्तवर्णे 'अक्षिणी' यस्याः तादृश्या, अनया, सीमन्तिन्या 'कुटिलयो'' वक्रयोः 'भ्रुवोः भेदात्' प्रभङ्गं विधाय इत्यर्थ. ('ल्यब्लोपे कर्मण्यधिकरणे च' इति कर्मणि पञ्चमी) 'स्मरस्य' मदनस्य 'शरासन' धनु. 'भग्नमिव' [येन पुन स्मरो न प्रहर्तुं शक्नुयात् इत्यर्थ। 'भञ्जो आमर्दने' इति धातो 'ओदितश्च'-(८।२।४५) इति क्त-क्तवतु-प्रत्यय-द-कारस्य नत्वम्]। (अत्र भावाभिमानिनी वाच्या क्रियोत्प्रेक्षा-लङ्कारः। काव्यलिङ्गञ्च। रुणरूणेति, वृत्तो वृत्तमिति, प्रत्रेति स्मरस्येति छेकानुप्रासो वृत्त्यनुप्रासश्च। वसन्ततिलका वृत्तम्॥३३॥ प्रकाशमिति— 'प्रथित' सर्वैर्विज्ञातम् ('प्रतीते प्रथित-ख्यात-वित्त-विज्ञात-विश्रुता' इत्यमरः) 'इद वञ्चकत्व 'प्रजास्वपि न दृश्यते' का कथा प्रजा-रञ्जके दुष्यन्ते इत्याशयः। अर्थापत्तिरलङ्कारः।

175n.—1. सरोषम्—Anger is here due to the speech of the king which made bitter reflections on Śak.'s birth and breeding, (P.102) and it is quite justified on the part of a devoted Aryan wife for she can brook all but scandal about her character. Here शकुन्तला has been depicted as an **'अधीरा'** woman. *Cf.* **'प्रियं सोत्प्रास-वक्रोक्त्या मध्या धीरा दहेत् रुषा। धीराधीरा तु रुदितैः, अधीरा परुषोक्तिभिः'** —SD. 2. **अनार्य**—Even though highly incensed, she has not forgotten the advice of her father (*i.e.* **'भर्तुर्विप्रकृतापि रोषणतया मास्म प्रतीप गमः'**—IV, 18) and she does not use a harsher epithet than **अनार्य।** (3n. 1.) **तृण-च्छन्न**-(covered with straw) &c.—कुत्सिता

ईषद्वा आपोऽत्र इति कूपः। 'ऋक्-पुर-व्—'(५।४।७४) इति अः, 'ऊदनोर् देशे' (६।३।९८)इत्यत्र दीर्घ-निर्देशात् अन्यत्रापि ऊत् इति वा"—*BhD*. *Cf*. *Vāli's* rebuke of *Rāma*—'त्वां विनिहृता-त्मानं धर्म-ध्वजमधार्मिकम्। जाने पाप-समाचारं तृणैः कूपमिवावृतम्'—*Rām*. IV. 17 ; III. 46; 'भस्म-च्छन्न-—मिवानलम्'—*PP*. *V*. 42. 84 ; 'Even virtue's self by **Knaves** is made. A **cloak** to carry on their trade"—**Miser and Plutus**. **'A raven's heart within a dove'—Twelfth Night**, *V.I*. **4**. **धर्म-कञ्चुक** &c.—Mark the **confusion of metaphor** owing to her excessive anger. **अनुकृतं** &c.—Śak. means to say that nobody will debase himself by imitating the king who has acted so vilely towards her. For "यद्यदाचरति श्रेष्ठ स्तदेव इतरो जनः। स यत्प्रमाणं कुरुते लोक स्तदनुवर्तते"—Gitā. **अस्याः (कोपः)**—Is not in consonance with **'अत्रभवत्याः'** (p. 478) and **'अत्रभवती'**—(p. 472) 'अत्रभवती-प्रत्ययात्'(481); also 37n.?.-(Com.). This raises great doubt about the authenticity about this line and the following Śloka(23). See Remark. **तथाहि**–(12n.3). **5. मयि एव**—May go with 'भ्रुवोः भेदात्' *i.e.* eyebrows darted against me. 'अतिरुषा' is the instrument of 'अतिलोहिताक्ष्या'—With eyes that were exceedingly crimson owing to intense ire. The epithet may also be taken as an attribute of 'अनया' understood—'by her whose anger was intense and whose eyes were &c.' **6. भ्रुवोः भेदात्**—"भ्रूभेद', 'भ्रूभङ्ग',and **'भ्रूक्षेप'** all mean 'contraction of the eyebrows, a frown.' Cf. **भ्रूभेद-मात्रेण पदान्मघोनः**'—*Ra*. *XIII*.36 ; **भ्रूक्षेप-मात्रानुमतप्रवेशाम्**'—*Ku*. *III*. 69, 71; *VI*. 45. 'तरङ्ग-**भ्रू-भङ्गा**'—*VS*. *IV*.28 ; 'स-**भ्रू-भङ्गमुखमिव**'—*PA&MD*.25. **7. स्मरस्य** &c.—The eyebrows of women are often compared to Cupid's bow. Cf. 'भ्रू-पल्लवं धनुरपाङ्ग-तरङ्गितानि वाणाः' &c.—GG. 'अथ स ललित-योषिद् भ्रू-लता-चारु-शृङ्गम्'&c.—*Ku* ; NC. 2. 28. "The double entendre in the word '*smara*' **(स्मर)** which means '*recollection*' as well as 'the *god of love*' is noticeable". —*M* **8. शरासनं भग्नं**—The idea is :—The king did make love with Śak. but now he is knowingly trying to evade that. At this the god of love became exceedingly exasperated and determined to

punish the king with an arrow forcibly discharged from the bow which was drawn to such an extent as to break the staff. कुटिलयोः—Cf. 'Arched brow'—**All's Well That Ends Well.**

Remark—This Śloka is quoted by *Bhoja* in सरस्वती-कण्ठाभरण। But before this Śloka B has the following which is decidedly superior to Śl.23 in diction, style and import. Second line is quoted by DD—Vide (112n. 8). Read राजा (आत्मगतम्)—वनवासादविभ्रमः[१] पुन रत्रभवत्याः कोपो लक्ष्यते। तथाहि— न तिर्यगवलोकितं[२] भवति चक्षुरालोहितं, वचोऽपि परुषाक्षरं[३] न च पदेषु संसज्जते[४]। हिमार्त[५] इव वेपते[६] सकल एष विम्बाधरः, स्वभाव-विनते भ्रुवौ युगपदेव[७] भेदं[८] गते॥

॥ (पृथ्वी छन्दः) ॥

King (*Aside*)—Owing to her residence in the wood-land, the anger of this lady appears to be genuine[1]. Thus—"(*She*) is not looking askance[2], but (*her*) eyes have become extremely red. (*her*) speech though (*fraught with*)[3] rough wordings is not wavering[8]. The whole of (*her*) under-lip imitating[6] the (*red*) Bimba fruit is trembling[6] like one bitten[5] with frost.[5] (*Her*) eye-brows, naturally curved have even synchronously[6] turned[8] wry[8].

Text :—शकुन्तला—सुट्ठु दाव अत्त सच्छन्द-चारिणी किदम्हि जा अहं इमस्स पुरुवंस-पच्चएण मुह-महुणो हिअअ-विसस्स हत्थब्भासं उवगदा (सुष्ठु तावत् अत्र स्वच्छन्द-चारिणी कृतास्मि। याहमस्य पुरुवंश-प्रत्ययेन मुख-मधो हृदय-विषस्य[१] हस्ताभ्यासमुपगता)। ॥ (इति पटान्तेन मुखमावृत्य रोदिति) ॥

Śakuntalā—Full well now in this I have been represented as a wanton woman, who from confidence in Puru's race, got near the hands of one honey-mouthed[1] but poison-hearted[1].

(*This said, covering her face with the cloth-end weeps*).

शार्ङ्गरवः—इत्थमात्मकृत मप्रतिहतं[८] चापलं[२] वहति।

श्लोक
अतः परीक्ष्य कर्तव्यं विशेषात् सङ्गतं रहः।
अज्ञात-हृदयेष्वेवं वैरीभवति[४] सौहृदम्॥२४॥

Śārṅgarava—Thus does a self-committed hastiness[2] when[1] not counteracted[1], lead to burning. Therefore a secret union should be formed after special circumspection. Thus does a friendship turn[4] into hostility[4] in those whose hearts are not known (*to each other*). (24)

V. L.—'हृदयविषस्य'—B.HS. ''हृदय-स्थितविषस्य'—R.V.M. 'हृदयस्य विषस्य'—S. 'अप्रतिहृतम्'—B.M.S. 'परिहृतम्'—V.K. 'प्रतिहृतम्'—S. Mackenzie Mss. R.

शकुन्तलेति—'स्वस्या. छन्देन' अभिप्रायेण ('**अभिप्रायश्छन्द** आशय' इत्यमर) चरति तच्छीला (ताच्छील्ये णिनि.') स्वैरिणी इत्यर्थः। (साक्रोशोक्ति रियम्। 'तेन च ''उपकृत बहु तत्र किमुच्यते'' इत्यादि-दर्पणोदाहरणवत् विपरीत-लक्षणया नियत-गुरुजन-मतानुचारिणी परम-पतिव्रता एवाह तत्रापि तदन्यथा-मननात् त्वमतीव निर्बोध. प्रतारको वा' इति सिद्धान्तवागीशपादा)। 'पुरुवशे'—पुरु-सदृश-विश्रुतकुले यः 'प्रत्ययः' विश्वासः तेन हेतुना। यतोऽय महति पुरुवंशे जातः, अतोऽय न अधार्मिक इति विश्वासात् इत्याशयः। 'मुखे मधु' यस्य तथाविधस्य। 'हृदये विष' हालाहल यस्य तादृशस्य (उभयत्र व्यधिकरण-बहुव्रीहिः)। 'विषस्य' इत्यनेन कापट्य-निगरणात् **अतिशयोक्तिः**। विशेषण-द्वयेन अति-खल-स्वभावत्व ध्वनितम्)। **अत इति**—'अत.' पूर्वोक्तात् कारणात् अर्थात् चापल्यस्य दाहकरत्वात्, निर्जने यत् 'सङ्गत' वधू-वरस्य सम्मेलन प्रणयादिकम् इत्यर्थः (भावे क्तः) तत् 'विशेषात्' विशेष प्रयत्नातिशयम् आश्रित्य (ल्यब्लोपे कर्मणि ५मी, वा—५९४) 'परीक्ष्य कर्तव्यम्' कन्यया इति शेषः। विपक्षे बाधकमाह। 'अज्ञात-हृदयेषु' व्यवहारादिना अपरिज्ञात-चित्तेषु 'सौहृद' मैत्री 'एवम्' अनेन प्रकारेण अवैर वैर भवति इति 'वैरीभवति' (अभूततद्भावे च्वि.) प्रणयोऽपि विद्वेषायते इत्यर्थ. (पूर्वार्धे शकुन्तला-दुष्यन्तयोः सगतस्य कर्तव्ये विशेषे प्रस्तुते यत् सामान्य-सङ्गतमात्रस्याप्रस्तुतस्य वचनं **साऽप्रस्तुत-प्रशंसा**। **वैधर्म्येणार्थान्तरन्यासः**। वाक्यार्थ-हेतुक **काव्यलिङ्गञ्च**। **श्लोको**वृत्तम्) ॥२४॥

176n.—1. मुख-मधोः &c.—Cf. ''वर्जयेत् तादृशं बन्धुं विषकुम्भं पयोमुखम्' ॥ Also ''सम्मुखे सुन्दर साधु, येन सुधा वर्षे विधु, वने व्याघ्र, मने ता जानिना'—**Dāśarathi Rāya.** '**नवनीतं हृदयं ब्राह्मणस्य, वाचि क्षुरोनिशित-स्तीक्ष्ण-धारः। तदुभयमेतद् विपरीतं क्षत्रियस्य, वाङ् नवनीतं हृदयं तीक्ष्णधारम् ॥**

—Mahā, 'विष' is both *masculine* and *neuter* 2. **अप्रतिहतम्**—A rash act should always be checked ; otherwise it will bring remorse in the long run. 3. **चापलंवहति** &c.—Cf. 'सहसा विदधीत न क्रियामविवेक: परमापदां पदम्'—*Ki. II.* 30. 4. **अतः परीक्ष्य** &c — This is **certainly the poet's own view** about matrimonial alliance contracted in secrecy. He seems to be against such love-affairs and points out its evil consequences. Cf. 'सुजन देखिया करिबि पीरिति, प्रहरी राखिबि आँखि ॥ सुजने सुजने हइले पीरिति, थाकिबि परम सुखे । अरसिक मने करिले पीरिति जनम गोङाबि दुखे'—*Mukunda-dasa*. Shakespeare also expressed his own view about marriage in this way- "Duke— "Too old, by heaven ; let still the woman take An elder than herself." &c.—**Twelfth Night**, II. 4 5 **वैरीभवति** &c.— 'धार्तराष्ट्रैः सह प्रीतिः वैरमस्मास्वमूयते । असन्मैत्री हि दोषाय कूलच्छायेव सेविता' *Ki.XI.* 55. 6. **सौहृदम्**— Vide (35n. 3).

Text :—**राजा—अयि भोः किमत्रभवती-प्रत्ययादेवा ऽस्मान् संयुत-दोषाक्षरैः**[२] **क्षिणुथ ।**

King—O gentle Sir, why do you. simply giving[1] credence to this lady[1], wound me with[2] words of heaped up accusations[2] ?

उपजाति **शार्ङ्गरव (सासूयम्)—श्रुतं भवद्भिरधरोत्तरम्**[१] **।**
(ततजगग **आजन्मनः शाठ्यमशिक्षितो**[४] **यस्तस्याऽप्रमाणं**[५] **वचनं जनस्य ।**
जतजगग) [२]**परातिसन्धान मधीयते यैर्विद्येति ते सन्तु किलाऽऽप्तवाचः ॥२५॥**

Śārṅgarava—(*Sarcastically*)—Do you hear the base[3] (*R*) reply. The declaration of a person who from his birth is un-[4] trained to sleight[4] (*whatsoever*). is without[5] validity[5]. and let those by whom (*the art of*)[2] deceit is studied as[3] a science be (*regarded*) as infallible[3] speakers of truth[3]. (25)

V. L.—"**संयुत-दोषाक्षरैः**'—V. R. '**संभृत-दोषैः**'—B. M. '**संभृत-दोषाक्षरेण**'—K. '**संवृत-दोषाक्षरेण**'—S. M reads 'अधिक्षिपथ' for क्षिणुथ' । '**यैः**'—R.V.M.B. '**ये**'—S. B reads 'अभिसन्धानं for 'अतिसन्धानम् ।

राजेति–'अयि' इति कोमलाऽऽमन्त्रणे [इति कुमारे (५।६२) मल्लिनाथपादाः] 'अत्रभवत्यां प्रत्ययः' विश्वासः तस्मात् 'एव' इत्यनेन प्रमाणान्तर-निरासः । केवल

मस्य वचनात्, न तु युक्त्यन्तर मपेक्ष्य इत्याशयः। 'सम्यक्' न तु ईषत्, 'युताः' संपृक्ताः न तु संस्पृष्टाः 'दोषाः' येषु तादृशानि 'अक्षराणि' तैः। ('असंभृत-दोषैः इति पाठे अकृत-दोषैः इति व्याख्येयम्)। 'क्षिणुथ' हिंस्थ पीड़यथ (क्षि हिंमाया मिति कविकल्पद्रुमः)। **शार्ङ्गरव इति**— 'अधरं' हीनं च तत् 'उत्तरम्' च 'अधरोत्तरम्' (इति राघवपादाः)। 'अधरोत्तरम्' विपरीतम् (इति न्याय-पञ्चाननपादाः)। 'विभाषा वृक्ष-मृग-तृण-धान्य-व्यञ्जन-पशु-शकुन्य-श्व-वड़व-पूर्वा-परा-धरो-त्तराणाम्'—(२।४।१२ ; ९१६)—इति **एकत्वं पाक्षिकम्**)। **आजन्मन इति**—'यो' जनः शकुन्तला-रूपः 'आजन्मनः' जननात् आरभ्य अद्य यावत् (समासस्य विभाषितत्वात् न समासः। समासपक्षे '**आजन्म**' इति स्यात्) 'शाठ्यं' परं प्रवञ्चनम् 'अशिक्षितः' अध्येतुमपि नारब्धवान् ('आदि-कर्मणि क्तः कर्तरि च'-(३।४।७१)-इति प्र-शब्दाऽभावेऽपि कर्तरि क्तः। तथाचोक्तम् **प्रभायां**—"प्र-शब्दः आदि-कर्मद्योतकः। कदाचित् **प्र-शब्दाऽभावेऽपि आदिकर्म-प्रयोगो दृश्यते**। यथा धातवः पठिताः")। 'तस्य' शाठ्य-विवर्जितस्य 'जनस्य' शकुन्तला-रूपस्य 'वचनम् अप्रमाणम्' अविश्वास्यम् अपितु कथमपि न इति तात्पर्यम् (अतएव **अर्थापत्तिरलङ्कारः**)। 'परेषाम् अतिसन्धानम्' वञ्चनम् ('वञ्चनं चाति(चाभि)-सन्धानं व्यलीकञ्च प्रतारणम्' इति हेमचन्द्रः) 'विद्याइति' विद्या-रूप-त्वेन विभाव्य ('क्वचिन्निपातेनाभिधानम्'-वा-५३७ इति प्रथमा) 'यैः' दुष्यन्त-सदृशैः नृपैः अधीयते' यत्नेनाऽनुरागेण च अभ्यस्यते 'ते किल' इत्यरुचौ ('वार्ताया-**मरुचौ** किल' इति त्रिकाण्डशेषः। राघव-मते 'संभावनायाम् किल'। 'किल-शब्दस्तु वार्ताया संभाव्याऽनुनयार्थयोः' इति विश्वः) "आप्ताः" प्रत्ययिताः विश्वास-योग्याः ('आप्तः प्रत्ययित स्त्रिषु" इत्यमरः) 'वाचः' येषां तादृशाः सन्तु, अपितु कुतोऽपि न इति हृदयम्। (सोल्लुण्ठन-वचनमेतत्। अत्रापि **अर्थापत्तिरलङ्कारः**। राघवमते—"शकुन्तला-वचनं सत्यं दुष्यन्त-वचनम् असत्यमिति विशेषे प्रस्तुते यत् सामान्यवचनं सा वैधर्म्येणाऽ**प्रस्तुतप्रशंसा**"। 'अशिक्षित' इत्यत्र प्रधानस्य नञर्थस्य समासे गुणिभावात् **विधेयाविमर्श-दोषः**। सच "शाठ्यं न जन्मावधि शिक्षितो यः" इति पाठेन समाधेय इति सिद्धान्तवागीशपादाः। "शकुन्तला-सुष्ठु तावत्" इत्यादिना एतदन्तेन 'द्रवो' नामाङ्गमुपक्षिप्तम्। '**द्रवो**' गुरुव्यतिक्रान्तिः शोका-वेगादि-सम्भवा" इति दर्पण-लक्षणात्। **उपजातिर्वृत्तम्**) ॥२५॥

177n.—1. संयुत &c.—With wordings every syllable of which is fraught with censure (*Com.*). 2. "**क्षिणुथ—क्षिणाति** दूरितं

दृष्ट्या क्षिणोत्यर्थश्च दुःस्थताम् । भृत्यानां नित्यमज्ञानं क्षिणुते यः सदुक्तिभिः"—KR. 110. **3. अधरोत्तरम्**–अधरं (हीनम्) उत्तरम् *i.e.* a **base reply**–(R & HS). But the king has not given any such reply ; he simply wants to know why Śak, is to be believed and his humble self disbelieved. N explains it as 'विपरीत *i.e.* something done topsy-turvy or in a contrary manner. C explains it as 'निकृष्ट-प्राधान्यम्' *i.e.* **ascendency of the low ;' 'placing that at the top which ought to be at the bottom**[1]—*M.* For this sense Cf. 'अद्यात् काकः पुरोडाशं, श्वा च लिह्यात् हविस्तथा । साम्यञ्च न स्यात् कस्मिश्चित् प्रवर्तेताऽधरोत्तरम्'—*MS. VII.* 21, where *KB* notes—'ब्राह्मणादि-वर्णानां च मध्ये यदधरं शद्रादि तदेवोत्तरं प्रधानं प्रावर्तिष्यत' । Also Cf. 'अदेश्यं यश्चदिशति निर्दिश्यापह्नुते च यः । यश्चाऽधरोत्तरानर्थान्विगीतान्नबाबुध्यते"—*MS. VIII.* 53 ; Devayānī's complaint to her father against his maid शर्मिष्ठा–'अधर्मेण जितो धर्मः प्रवृत्त मधरोत्तरम् । शर्मिष्ठयातिवृत्तास्मि दुहित्रा वृषपर्वणः ॥—*Mahā. Ādi.* 77. 'पापमधरोत्तरम्'—Karṇa. 37. Droṇa. 198. '**नीचोच्चयोः वैपरीत्य-करणम् महत्पापं**'—Nīlakaṇṭha. The whole thing is an address to the audience. "Do you notice the inversion of the proper order of things, by which high (*Śak.*) has been made low, *i.e.* stigmatised as liar, and the low (*King*). who is taught in the various surreptitious and unscrupulous method (See Kunṭilaya's Artha-Śāstra), to be employed against enemy, has been raised high". Or, this is an address to the king by *Sārṅgarava.* (Cf. 'राज्ञः समक्षमेव आवयोः अधरोत्तरं व्यक्ति र्भविष्यति—*Māla.* *I.*). 'You have misunderstood me and consequently have taken my words in a preposterous way. I meant nothing to you with 'अतःपरीक्ष्य etc.' I was only sermonizing Śak. Surely no body will give greater credence to the wordings of a forest-girl than the statement of one who is none other than a king. The whole thing is of course sarcastic. **3. अशिक्षितः**—Involves विधेयाविमर्शदोषः–(Com.& 4n. 7). **4. ०अति-सन्धानम्**=अभिसन्धानम् (*B&Com.*). Cf. 'पराभिसन्धानपरं यद्यप्यस्य विचेष्टितम्'—*Ra.* X*VIII.* 76 ; (84n. 1.) **5. आप्तवाचः**—means '**भ्रम**

प्रमाद-विप्रलिप्सा-करणापाटव-रूप-दोष-चतुष्टय-रहितः। स च ऋष्यादिः' इति स्मृतिः—*i.e.* One whose advice is always correct. Cf. "आप्त-वागनुमानाभ्यां साध्यं त्वां का कथा"—*Ra.* X. 28. **किल**—Either in **अरुचि** or **सम्भावना**। 'The usual definition of the 4th प्रमाण (शब्द) is आप्तवाक्य, you would make it अनाप्तवाक्य—the word of an imporper person'—M.

Text :—राजा—भोः सत्यवादिन्, अभ्युपगतं[1] तावदस्माभिरेवम्। किं पुनरिमामतिसन्धाय[2] लभ्यते।

King—Ho truth-teller ! granted[1] now by us it is so, but what is to be gained by having[2] deceived[2] her ?

शार्ङ्गरवः—विनिपातः[3]। Śārṅgarava—Damnation[3].

राजा—विनिपातः पौरवैः प्रार्थ्यते इति न[4] श्रद्धेयमेतत्।

King—That '*damnation*' is sought after by Puru's descendants is not credible[4].

शारद्वतः—शार्ङ्गरव। किमुत्तरोत्तरेण। अनुष्ठितो गुरु-नियोगः प्रतिनिवर्तामहे वयम्।—(राजानं प्रति)—

श्लोक तदेषा भवतः पत्नी, त्यज वैनां गृहाण वा।
[4]उपपन्तुर्हि दारेषु प्रभुता सर्वतोमुखी॥२६॥

गौतमि, गच्छाग्रतः। (इति प्रस्थिताः)।

Sāradvata—Śārṅgarava, enough of altercation. (*Our*) preceptor's commission has been executed. Let us return. (*To the king*)—This is then your wife. Either desert or accept her. For, a husband[4] (*has*) absolute mastery over (*his*) wife. (26)

Gautami, go ahead. (*This said, they began to move*).

शकुन्तला—कहं इमिणा किदवेण विप्पलद्ध म्हि। तुम्हे वि मं परिच्चअह (कथमनेन कितवेन[5] विप्रलब्धाऽस्मि,[6] यूयमपि मां परित्यजथ)। (अनुप्रतिष्ठते)।

Śakuntalā—How now ! (*I*) have been hocussed[6] by this perfidious[5] man (*and*) you too, are leaving me ?

(This said, starts after them).

गोतमी (स्थित्वा)—**वच्छ सङ्गरव ! अनुगच्छदि णो करुण-परिदेविणी सउन्दला। पच्चादेस-परुसे भत्तुणि किंवा मे पुत्तिआ करेदु** (वत्स शार्ङ्गरव, अनुगच्छति नः करुण-परिदेविनी शकुन्तला। प्रत्यादेश-परुषे भर्तरि किं वा मे पुत्रिका करोतु) ?

Gautamī (*Stopping*)—My child Śārṅgarava, [3]piteous-bemoaning Śakuntalā is following us. Her husband cruelly[4] disowning[4] her, what possibly can my poor child do ?

V. L.—'न श्रद्धेयम्'—R V M 'अश्रद्धेयम्'—B. S omits 'न'। 'शारद्वत'—'भो शार्ङ्गरव'—K.V M R 'शार्ङ्गरव—भो राजन्'—B 'उत्तरैः' —B. 'उत्तरेण'—R.B M. 'उत्तरोत्तरेण'—S 'नियोग'—B 'सन्देश'—R. V. M. S. 'पत्नी'—B. 'कान्ता'—R V. M. S 'उपपन्ना'—R V. M. 'उपयन्तुः'—B. HS. P. 'सर्वतोमुखी'—R V M.S K. 'विश्वतोमुखी'—B. M inserts 'परिदेविनीम' before 'परित्यज्य'। B reads 'तपस्विनी' for 'पुत्रिका'।

राजेति—'भो सत्यवादिन्' अ-शिक्षित-शाठ्य! -सोल्लुण्ठनमेतत्। 'एवम्' अर्थात् वयं पर-प्रतारण-परायणाः। 'अति(अभि) सन्धाय' प्रतार्य "किं लभ्यते" किं लाभकरं प्रयोजन सिध्यति। **शार्ङ्गरव इति**—'विनिपातः' जनानामवज्ञा दैवादि-व्यसनं वा ('विनिपातोऽवमाने स्यात्, दैवादि-व्यसनेऽपि च' इति विश्व) लभ्यते इति वाक्य-समाप्तिः। ('राजा-भो सत्यवादिन' इत्यादिना एतदन्तेन अक्षमा-नामा नाट्यालङ्कारः निबद्धः। '**अक्षमा** सा परिभव स्वल्पोऽपि नाभिमृह्यते" इति दर्पणलक्षणात्)। **राजेति**—'पौरवैः' पुरू-सम-पुण्य-पुरुष-कुलोद्भूतैः पावनैः राजभिः 'विनिपातः' नरक-प्राप्तिः 'प्रार्थ्यते' इष्यते इति न श्रद्धेयम्' (अनेन पूर्व-पुरुषस्य पुरोः नाम-कीर्तनात् **प्रसङ्ग**-नामाङ्गमुपक्षिप्तम्। "गुरुकीर्तनं **प्रसङ्गः**" इति दशरूपक-लक्षणात्)। **तदिति**—उत्तर-प्रत्युत्तरो-पसंहारे। 'एषा' पुरोदृश्यमाना शकुन्तला भवतः 'पत्नी' शास्त्रानुसारेण गान्धर्वेण विधिना परिणीता यज्ञाधिकारिणी स्त्री, **न तु केवलं कान्ता**। 'एनां' ['द्वितीया टौस्वेनः'-('२।४।३४; ३५१) इति अन्वादेशे एनादेशः] यथेच्छ 'त्यज' वा गृहाण वा, तद्विषये अस्माकं किमपि वक्तव्यं नास्तीत्याशयः। 'हि' इति कारणमाह। 'उपयन्तुः' पत्युः (इति जटाधराचार्य-कृतः पर्याय-नानार्थकोषः] 'दारेषु' यथाशास्त्रं परिणीतायां भार्यायां, न तु कान्तायां, 'सर्वतोमुखी' सर्वप्रकारा (इति शङ्करपादाः), अधिकरणसमर्था (इति चन्द्रशेखरचरणाः') अर्थात् ताड़ने स्वीकारे अथवा दाने' 'प्रभुता' भर्तुः

क्षमता अस्ति इति शेषः । (अर्थान्तरन्यासः । श्लोको वृत्तम्) ॥२६॥ **शकुन्तलेति**— 'कितवेन' वञ्चकेन ('**कितवः** धूर्तवन्मत्ते **वञ्चके** कनकाऽऽह्वये इति विश्वः) 'विप्रलब्धा' वञ्चिता ('विप्रलब्धस्तु वञ्चित' इत्यमरः) । महाविषादोक्तिरियम् । 'अनुप्रतिष्ठते' पश्चादागच्छति ['समवप्रविभ्यः स्थः'—(२१८९) इति तङ्]। (अनेन **खेद**--नामाङ्गमुपक्षिप्तम् । 'मनश्चेष्टा-समुत्पन्नः श्रमः **खेद** इति स्मृतः' इति दर्पण-लक्षणात् ।) **गौतमी**——'करुण-परिदेविनी' दयाजनकं विलपन्ती ('विलापः परिदेवनम्' इत्यमरः । 'परिदेवना अपि' इति भानुजिः) । 'प्रत्यादेशेन' प्रत्याख्यानेन ('प्रत्याख्यानं निरसनं प्रत्यादेशः निराकृतिः' इत्यमरः) '**पौरुषः**' निष्ठुरः तादृशे सति इत्यर्थः ।

178n.—1. सत्यवादिन्—Uttered tauntingly. **2. किं लभ्यते** &c.—The idea is :—Nothing is done *without any purpose*. Even if it be granted that all you say is true, still for what *material gain* shall I do as such ? Inquisitive students, for the *fallacy in the king*'s argument, are referred to the Commentary of *Śrī Śaṅkarā-cārya* on the aphorism—'लोकवत्तु लीला-कैवल्यम्'—*Brhama-Sūtra. Ch II.* 3. **विनिपातः**—This is *elliptical* for 'विनिपातः त्वया लभ्यते' । Do you ask me what you will gain ? Then know, it is "eternal damnation." Cf. "**Ruin seize thee, ruthless king**"—**Shakespeare. न श्रद्धेयम्**—Because even a booby will not aspire after "eternal damnation." **4. किमुत्तरोत्तरेण**—No use of bandying words. Cf. 'उत्तरोत्तर-वादिनम्'—Rām. VI. 79, 17 ; 'अलमुत्तरोत्तरेण'—MR. III, **5.** 'गृहाण—ग्रह्+लोट् हि. [श्न-विकरण=शानच् by 'हलः श्नः शानज् झौ' ('३।१।८३), [so पुष्- **पुषाण, मुष-मुषाण,मन्थ्-मथान, बन्ध्-बधान**] । **पत्नी**—कान्ता(R) is not in consonance with '**दारेषु**', or in other words an **उपयन्ता** has "सर्वतोमुखी प्रभुता" upon his **legally married wife** (**पत्नी**) only, and not upon his **mistress** (कान्ता) । Cf. 'भर्ता हि दैवतं स्त्रीणां, भर्ता च गतिरुच्यते । जीवपत्याः स्त्रियो भर्ता **दैवतं प्रभुरेव** च'—*AP.* "व्रजन्तु चरतु धर्म भर्तृनाथा हि नार्यः"—PN. 1. 25. Vide (144n. 6). **उपयन्तुः**(Husband)—Cf. '**अथोपयन्तारमलं**"—KU.V.45. **विप्रलब्धा** &c.—Cf. '**Betrayed, I am,** O false soul of Egypt'—

Antonio & Cleopetra. *IV*. 12. **6. परिदेविनी**—परि-दिव् means 'to lament'. Cf. 'अव्यक्तनिधनान्येव तत्र का **परिदेवना**'—Gitā. *II*. 28. 'न मन्त्र-बल-वीर्येण प्रज्ञया पौरुषेण च। अलभ्यं लभते मर्त्य. तत्र का **परिदेवना** ॥ 'एकवृक्षे यदा रात्रौ नानापक्षि-समागमः। प्रभाते दशदिशो यान्ति तत्र का **परि-देवना**'॥ 'एकसार्थ-प्रयाताना सर्वेषा तत्र गामिनाम्। यद्येक स्त्वरितो याति का तत्र **परिदेवना**'—GP. III. *Ku*. *IV*. 25 "कस्य माता कस्य पिता कस्या भ्राता सहोदरः। काया प्राणै न सम्बन्धः का कस्य परिदेवना॥" 'परिदेवनान्तरम्' —*Ra*. X*IV*. 83.

Text:—शार्ङ्गरवः (सरोषं प्रतिनिवृत्य)—**आ पुरोभागिनि**[1]। **किमिदं** [2]**स्वातन्त्र्य मवलम्बसे ?** ॥ (शकुन्तला भीता वेपते) ॥

Śārṅgarava (*In wrath, turning, back*)—What! forward[1] woman! do you resort to self-rule[2] ? (*Śakuntalā totters in fright*).

शार्ङ्गरवः—शकुन्तले !

द्रुतविलम्बित (नभभर)

"यदि यथा वदति क्षितिपस्तथा
त्वमसि, किं पितुरुत्कुलया[3] **त्वया।**
अथ तु वेत्सि शुचि व्रतमात्मनः
पतिकुले तव दास्यमपि क्षमम्[4]**"** ॥२७॥

तिष्ठ। साधयामो वयम्।

Śārṅgarava—Śakuntalā, if thou art exactly what the ruler of the earth asserts, then what (*use has*) thy father in thee outcast[3] ? But if thou believest thy vow to be immaculate, even salvery in the house of thy husband is proper[4] for thee. (27)

Stay (*here*). We go.

V. L.—'आः पुरोभागिनि'—B.K. S. Ś. C. 'किं पुरोभागे'—R.V.M. S; B supported by Ś reads 'पुनः' for 'पितुः'।

शार्ङ्गरव इति—'आ' इति कोपे॥ 'पुरः प्रथमं भजते' 'दोषमाधत्ते इति पुरो-भागिणी, तत्सम्बुद्धौ '**पुरोभागिनि**' ('कुमति च' इति णत्व ३।४।१५) **दोषैकदर्शिनी** (दोषैकदृक् पुरोभागी' इत्यमरः) शास्त्र-विगर्हित 'स्वातन्त्र्यम्' यथेच्छ वर्तनम् '**अवलम्बसे**' आश्रयसि (अनेन **द्युति**-नामाङ्गमुपक्षिप्तम्। "तर्जनोद्वेजने **द्युतिः**"

इति दश-रूपक-लक्षणात्)। **यदीति**—क्षितिं पाति इति 'क्षितिपः' (३।२।३) राजा दुष्यन्तः 'यथा' यादृश, नेय मया प्राक् परिणीता इति यत् 'वदति यदि त्वं तथा' तादृशी, अनेन **अपरिणीता अथच गर्भवती** इत्याशयः। 'असि', तदा कुलात् उत्क्रान्ता 'उत्कुला' व्यभिचारिणी इत्यर्थः ['निरादयः क्रान्ताद्यर्थे पञ्चम्या'—(७८०) इति प्रादितत्] तादृश्या 'त्वया पितुः' कण्वस्य 'किं' प्रयोजनम् सिध्येत् न किमपि। अतएव न पुनरस्मान् अनुसरेः इत्याशयः। (राज्ञः वाक्यं सत्यं चेत् तदा दुष्यन्तः अस्या न भर्ता, अतएव आह '**क्षितिपः**' न तु '**पतिः**' इति)। 'अथ तु' (इति पूर्वतो व्यतिरेके) पक्षान्तरे यदि आत्मनः स्वस्य 'व्रतं' नियमं पातिव्रत्य-लक्षणं 'शुचि' पवित्रं 'वेत्सि' आत्ममात्रस्य अत्र साक्षित्वात् स्वयं जानासि तर्हि 'पतिकुले स्वामि-भवने' (शकुन्तला-वाक्य सत्य चेत् तदा दुष्यन्तः अस्याः पति स्यात्, अतएव 'पतिकुले' इति न **प्रक्रम-भङ्ग-दोषः**) 'दास्यमपि' दासीकर्म अपि 'तव क्षमं' योग्य' ('**योग्ये** शक्ते हिते **क्षमम्**' इति धरणि.)। (**हेतुरलङ्कारः**। प्रथमार्धे य-काराणाम् असकृत्साम्यात् **वृत्त्यनुप्रासश्च**। "यदि तथा त्वमसि" इति वाक्यमध्ये "यथा वदति क्षितिपः" इति वाक्यान्तरस्य प्रवेशात् **गर्भितता-दोषः**। स च ''वदति यन् नृपति र्नन चेत्तथा" इति पाठेन समाधेय.। **द्रुतविलम्बितं** वृत्तम्) ॥२७॥ **तिष्ठेति**—'साधयामः' गच्छामः (इति साहित्य-दर्पणः)॥ '(अनेन **प्ररोचना**-नामकङ्गमुपक्षिप्तम्। तल्लक्षण यथा दर्पणे—"**प्ररोचना** तु विज्ञेया संहारार्थ-प्रदर्शिनी")।

179n.—1. आः—Implies anger. (116n. 3). **2. पुरोभागिणी** (B)—R & his followers read पुरोभागे (*from* पुरोभागा) and curiously enough explain it with a quotation from AK (*Com.*) ; but Ak's **पुरोभागी** is a quite **different word** from '**पुरोभागा**'। (पुरः भागः यस्याः सा), as the former is formed by a *special* Sūtra viz., "**संपृचाऽनुरुधा—** (3. 2. 142) with **घिनुण्**। **पुरः पुर्व भजते। भज सेवायाम्**। 'संपृचा—'**इति** 'घिनुण्'—**द्वे दोषैकग्राहकस्य**"—*BhD.* **णत्वं** by '**कुमति च**'—(8. 4. 13). Cf. '**स्नेहः पृच्छति न पुरोभागिता**'—*MK.* II. It has been already used by our poet. Cf. "**मां मा पुरोभागिणी इति समर्थयसि**"—*Vik. III.* **पुरोभागः**, however, has been used in the sense of '*Jealous*' Cf. '**प्रायः समानविद्याः परस्परयशः पुरोभागाः**'—Māla. 1. 20. Also '**किमिदानीं पुरोभागम्**'—Rām.IV. 20. 4; **कृतापराधाम् इत्यर्थः**—Rāma. '**पुरोभागिणी**

means one who first chooses the fault, as generally it is taken notice of by people before merit is accounted for. Or, the word may be explained as one that tries to be conspicuous by being put in the front and this is possible only by pointing out faults of others, hence in any case it means *'fault-finding'*. Then the sentence means—You only find fault with the king, because he has disowned you. But you forget that you are also committing an offence by following us without the permission of your husband. (See next). 3. **स्वातन्त्र्यम्** &c.—The scriptures sanction no liberty in the case of women. Cf. 'कौमारे रक्षिता तातो दत्वा पात्राय भर्तृकृती। सर्वदा रक्षिता कान्ता स्तदभावे तत्सुतः॥ त्रिष्ववस्थासु नारीणां रक्षितार स्त्रय सदा। या. स्वतन्त्राश्च ता नष्टा सर्वधर्म-बहिष्कृताः' ।—*BrP XVII* ; *GP.XCV* ; *MS IX*.3 ; *V*.148 ; *Y*.85 ; *Śukra-nīti. III* ; 115. **दास्यमपि**—Cf. 'या दास्यमप्यस्य लभेत नारी सा स्यात् कृतार्था किमुताऽङ्कशय्याम्'—Ku. VII. 65.

Remark—In the last line the word 'पति' is used, while in the first line we have 'क्षितिप', still there is no प्रक्रमभङ्गदोष। For reasons and the proprieties of the two words vide Com.

Text :—राजा—भोस्तपस्विन् किमत्रभवतीं विप्रलभसे[1] ।

आर्या [12, 18, 12, 15,]

कुमुदान्येव शशाङ्कः सविता[2] बोधयति पङ्कजान्यव ।
[3]वशिनां हि पर-परिग्रह-संश्लेष-पराङ्मुखी[4] वृत्तिः[5] ॥२८॥

King—Ho hermit, why do you bamboozle[1] this lady ? The hare-specked (*moon*) unfolds lilies only, (*and*) the sun[2] (*arouses*) lotuses alone. The inclination[5] of the self-controlled[3] is averse[4] to hugging other's spouses[4]. (28)

शार्ङ्गरवः—राजन् ! अथ पूर्ववृत्तं[1] व्यासङ्गा[6] द्विस्मृतो भवेत तदा कथमधर्म-भीरो दार-परित्यागः ।

Śārṅgarava—O king, in case the former[1] event be forgotten owing, to your attachment[6] to something else, then afraid as you are of demerit, what (*will you say about this*) repudiation[7] of (*your own*) wife[7] ?

V. L —'विप्रलभसे'—B. R. V. M. 'विप्रलपमि'—S. The speech of Śārṅgarava (*B*) is found in R. V. M. as follows—'यदातु पूर्ववृत्त-मन्यसङ्गात् विस्मृतो भवास्तदा कथमधर्मभीरुः'।'* अन्यसङ्गात् * भीरुता'—S.

कुमुदानीति—'शशाङ्कः' मृगलाञ्छनः चन्द्रः 'कुमुदानि एव' न तद्भिन्नानि पद्मानि, 'सविता' सूर्यः 'पङ्कजानि एव न तद्भिन्नानि कुमुदानि (इति उभयश्चात्र एव-कारः **अन्य-योगरूढ़-सम्बन्धं वारयति**। तथा चोक्तम् "अयोग मन्ययोगञ्च अत्यन्तायोगमेव च। व्यवच्छिनत्ति धर्मस्य **एवकार स्त्रिधा मतः**") 'बोधयति' विकासयति। वशयन्ति इन्द्रियाणि ये तेषां 'वशिनां' निर्जितेन्द्रियानां 'वृत्तिः' वर्तनं 'परेषा परिग्रहाः' कलत्राणि (**'परिग्रहः कलत्रे** च मूल-स्वीकारयोरपि" इत्यजयः) तेषां 'संश्लेषः' आलिङ्गनं तस्मात् 'पराङ्मुखी' विरता अनासक्ता इति यावत् 'हि' इत्यवधारणे (अत्र दुष्यन्त-शकुन्तला-नङ्गीकारे विशेषे प्रस्तुते सामान्य-वचनेन **अप्रस्तुतप्रशंसा**। पूर्वार्धे वैधर्म्येण **मालादृष्टान्तालङ्कार** इति यत् राघवपादैः उक्तं **तच्चिन्त्यम्**। वस्तुतस्तु एव-कार-द्वयेन कुमुद-पङ्कजाना बोधनस्य इतरा-परिग्रह-संश्लेष-पराङ्मुखत्वेन सह ऐक्यरूप्येण अवभासनात् अत्र **प्रतिवस्तूपमा-लङ्कारः**। 'बोधयति' इत्येकया क्रियया अप्रस्तुतयोरेव शशाङ्क-सवित्रोः कर्तृतया--भिसंबन्धात् **तुल्ययोगिता च**। अङ्काङ्केति, न्येवन्येवेति, परपरीति, **छेक-वृत्त्यनु-प्रासौ**। **आर्या** जातिः) ॥२८॥ **शार्ङ्गरव इति**—'अथ' इति विकल्पमाह ('अथाऽथो मशये स्याताम् अधिकारे च मङ्गले। विकल्पा-नन्तर-प्रश्न-कार्तस्न्याऽऽरम्भ-समुच्चये' इति मेदिनी) 'व्यासङ्गात्' विषयान्तर-सम्पृक्तत्वात् 'पूर्ववृत्तम्' अस्या परिणयादिकं त्वया यदि 'विस्मृत भवेत्' (सभावनाया लिङ्) तदा अधर्मात् भीरुः 'अधर्मभीरुः' [इति **सुप्सुपेति समासः**-(६९९), युक्तिस्तु प्रागुक्ता] तादृशस्य तव इदानीं शकुन्तलायाः प्रत्याख्यानेन 'दार-परित्यागः' स्यात्। तत् कार्य त्वया 'कथं' किंविध मन्यसे। किमेतत् पापं पुण्यं वा तत् ब्रूहि माम् इति सरलार्थः। (अनेन **उत्प्रासन**-नामको नाट्यालङ्कार उपक्षिप्तः। तल्लक्षणं यथा दर्पणे—"**उत्प्रासनन्तु** उपहासो योऽसाधौ साधुमानिनि' इति)।

180n.—1. विप्रलभसे—Deceive—(**'विप्रलब्धस्तु वञ्चित' इत्यमरः। 'विप्रलम्भः** प्रतारणा' **इति गणदर्पणः**) by making her cherish a hope that she will be received by me in the long run as wife, if she persisted in staying here. But **'विप्रलभसे परित्यजसि'। 'विप्रलम्भः** विप्रयोग' इत्यमरः"—N. "विप्रलभसे विरहयसि **परित्यज्य**

गच्छसि, कथमपि नाहं गृह्णामि इति भावः, (अत्र शकुन्तलामवस्थाप्य गमने अवश्यमेव राजा ग्रहीष्यति इति विभाव्य मुनिभिरेवमाचर्यत इति मत्वा राज्ञ उक्तिरियमिति बोध्यम्'—HS. पर-परिग्रह-संश्लेष—&c. 'संश्लेष' means embrace. 'परिरम्भः परिष्वङ्गः संश्लेष उपगूहनम्'—*AK*. 'पर-परिग्रहस्य संश्लेषः'—Embrace with another's spouse. तस्मात् पराङ् मुखी'-सुपसुपेति समासः—One who is averse to such an embrace. R has construed differently by taking सम् (*as an attribute of* पराङ्मुखी) to mean excessive (अतिशयेन) । Cf *** "तस्या आश्लेषः संपर्कः, तस्मात् सम्यग् अतिशयेन पराङ्मुखी"**परकलत्र-पराङ्मुखत्वं नापि तु तत्-सम्पर्क-पराङ्मुखत्वम्, तदपि तन्मात्रं, नापि तु सम्यग्गति, तेन सम्-शब्दः पराङ्मुख-विशेषणतया योज्यः"—R. अधर्म-भीरोः—(Vide 80n. 4)—BM & T on 699.

Remark—For similar idea in the latter half, Cf. "का त्वं शुभे ! कस्य परिग्रहो वा, किं वा मदभ्यागम-कारणं ते। आचक्ष्व मत्वा वशिनां रघूणां मनः परस्त्री-विमुख-प्रवृत्तिः'—*Ra*. X*VI*. 8.

Text :—राजा—भवन्तमेवात्र गुरु-लाघवं[1] पृच्छामि।

श्लोक मूढः स्यामहमेषा वा वदेन्मिथ्येति संशये ॥
दारत्यागी भवाम्याहो पर-स्त्री-स्पर्श-पांसुलः[2] ॥२९॥

King—In this matter, I ask you yourself (*about*) the[1] relative-importance (*of sins. Lit. the superiority and inferiority of the two courses of conduct.*)[1]. In a doubt as to whether I may be infatuated or she may be lying, should I be the (*base*) repudiator of my wife, or a[2] defiled (*adulterer*) by contact with another's wife[2]? (29)

पुरोधाः (विचार्य) —यदि तावत् एवं क्रियताम्।

Priest (*After deliberation*)—If so, let this be done.

राजा—अनुशास्तु[1] मां भवान्।

King—Command[1] me, Your Honour.

पुरोधाः—अत्रभवती तावदाप्रसवाद्[2] अस्मद्गृहे तिष्ठतु। कुत इदमुच्यते इति चेत्। त्वं साधुभिरादिष्ट-पूर्वः। प्रथममेव चक्रवर्तिनं 'पुत्रं जनयिष्यसीति। स चेन्मुनि-दौहित्र स्तल्लक्षणो-पपन्नो[4] भविष्यति, ततः अभिनन्द्य[5] शुद्धान्तमेनां[6] प्रवेशयिष्यसि। 'विपर्यये तु पितुरस्याः समीपनयनमवस्थितमेव[7]।

Priest—Let Her Ladyship then, till[2] child-bearing[3], stay in our house. Why do I say so ?—If you ask this, you have the soothsayers'[3] prophecy[3] that at the very first, you will beget a son, who will be a paramount[4] ruler. If the hermit's grandson be [5]possessed of those signs', then you would cause her to enter your seraglio[7] with felicitations[6]. But on the contrariety[8] (*of the case*), sending (*her*) back to her father is certain.

V. L.—'**पुरोधसं प्रति**'—Only N. 'गुरुलाघवम्'—R. B. V. M. 'गुरुलाघवशम्'--S. 'भवान्'—R. B. V. M. 'पुरोहित:'—S. In B '**कुत-इदम्**' is uttered by the king. '०आदिष्टपुर्व::'—S.R. '०उद्दिष्ट:'—M.V. 'साधु-नैमित्तिकै: उपदिष्टपूर्व:—B. HS.

राजेति—शाङ्‌र्गरवं प्रति एतदुक्तं पुरोधसं प्रति वा। 'गुरु' च 'लघु' च इति गुरुलघु ['विप्रतिषिद्धं चानधिकरणवाचि' (२।४।१३), इति पाक्षिकम् एकत्वम्] तस्य: भाव: 'गुरु-लाघवम्' ('परिमाणान्तस्याऽसंज्ञा-शाणयो:' (७।३।१७) इति **उत्तरपद-वृद्धि:**। लघु-शब्दस्य परिमाण-वाचित्वात्। न चात्र सर्वथा संख्याया इत्यस्याऽनुवृत्ति र्मन्तव्या, काशिकादौ 'उत्तमनैष्किक:,परमनैष्किक इत्यादिषु उत्तर-पदवृद्धि: अनेनैव समर्थनात् **इति भाषावृत्ति-टिप्पनी**)। **वक्ष्यमाण-पक्ष-द्वये-**गुरु किं, लघु वा किं इति भवत: सकाशात् ज्ञातुमिच्छामि इति **राजोक्तेराशय:।** **मूढ इति**—'अहं' स्मृति-भ्रंशात् 'मूढ:' नष्ट-बुद्धि: (तथाचोक्तं श्रीगीतायां—'स्मृति-भ्रंशाद् बुद्धिनाश:' इति) 'स्यां' भवेयं, 'वा' अथवा 'एषा' शकुन्तला 'मिथ्या वदेत्' [उभयत्र 'विधि-निमन्त्रणाऽऽमन्त्रणाऽधीष्ट-संप्रश्न-प्रार्थनेषु लिङ्' (३।३।१६१)-इति संप्रश्ने लिङ्। संप्रश्नो नाम जिज्ञासा ॥ संभावनायां वा लिङ्] 'इति' एवंप्रकारे 'संदेहे' आगते सति, किमहम् अस्या: परित्यागेन 'दार-त्यागी' ['संपृचा—'(३।२।१४२) इति त्यजे: घिनुण्] 'भवामि' किं 'दार-त्याग-रूपं' पातकं मां स्पृशेत्। 'आहो' इति पक्षान्तरे 'परस्त्रिया: स्पर्शेन" 'पांशु' पापम् अस्ति यस्य स 'पांशुल:' पातकी 'भवामि' अस्या मिथ्याभाषित्वे इति भाव: ['कपिल-कादि'—(वा: ८।२।१८) ; —'सिध्मादित्वात्'—(५।२।९७) वा लज्]। **संशय-स्थले पर-स्त्री-संस्पर्शात् दार-त्यागो वरं न वेति पृच्छामि इत्याशय:।** (**श्लोकोवृत्तम्**) ॥२९॥ 'राजा—भो: सत्यवादिन्' इत्यादिना एतदन्तेन **विरोध-**नामकमङ्गमुपक्षितम्। तल्लक्षणं यथा—'उत्तरोत्तर-वाक्यं तु **विरोध** इति संज्ञित:')। **राजेति**—'अनुशास्तु' शिक्षयतु। **पुरोधा इति**—'साधुभि:' सिद्धपुरुषै: निमित्तज्ञैर्वा। पूर्वम् आदिष्ट: विज्ञापित इति 'आदिष्ट-पूर्व: ['भूत-

पूर्वे चरट्'-(५।३।५३)-इति पाणिनि-निर्देशात् **पूर्व-शब्दस्य पर-निपातः पाक्षिकः**] । 'चक्रवर्तिनं' सार्वभौमं ('चक्रवर्ती सार्वभौम' इत्यमरः) । 'मुनेः कण्वस्य 'दौहित्रः' दुहितुः शकुन्तलायाः पुत्रः । 'तस्य' चक्रवर्तिनः लक्षणैः 'चापाऽङ्कुशादि-चिह्नैः 'उपपन्नः' युक्तः । (चक्रवर्ति-लक्षणं यथा सामुद्रके—'अतिरक्तः करो यस्य ग्रथिताङ्गुलिको मृदुः । चापाऽङ्कुशाङ्कितो यस्य **चक्रवर्ती** भवेत् ध्रुवम्' ॥ अपिच—'यस्य पादतले पद्मं चक्रं वाप्यथ तोरणम् । अङ्कुशं कुलिशं चापि स सम्राट् भवति ध्रुवम्' ॥) 'शुद्धान्तः' राजान्तःपुरं ('शुद्धान्तोऽन्तःपुरे गुह्यकक्षभेदे च भूपतेः' इति अजयपालः) । 'विपर्यये' जातस्य अर्भकस्य सामुद्रकोक्त-चक्रवर्ति-लक्षणाभावे-इत्यर्थः । 'तु' इति पक्षान्तरे । 'अस्याः पितुः' कण्वस्य 'समीप-नयनम्' आश्रमे प्रेरणम् 'अवस्थितम्' निर्धारितम् 'एव' इत्यवधारणे ।

181n.—1. **भवन्तमेव** &c.—The passage is **obscure,** for it is not certain to whom the speech is addressed. **M takes it to refer to the priest,** In that case the idea is :—Sir, you have all along heard the conversation that passed between Śārṅgarava and me. The sage insists on my taking this woman as my wife, but I do not remember to have married her at all. The sage, however, suggests an alternative, and a possible one too-that I actually married her, but my attention being diverted by multifarious duties I **have forgotten** her at the present moment. Hence tell me, of the two alternatives (*viz.*, the **repudiation** of the legally married wife and the **fornication,** with another's wife), which is **less sinful**. In this explanation the *following defects* should be noticed. (*a*) There is no earthly reason why a **stage-direction** like '**पुरोधसं प्रति**' should be **omitted** when the speech is uttered respecting a **third person**. **(d)** '**एव**' in '**भवन्त मेव**'seem to lose its force. Again a reference to the priest will suggest an indecision on the part of Duṣyanta who had been all the while thinking that he was right ; besides the speech will go against the saying—'आर्ये', प्रथितं दुष्यन्तस्य चरितम् । प्रजास्वपीदं न दृश्यते' —*Supra*. The next stage direction (*viz*. '**विचार्य**') of course,

in quite consonance with the speech. The priest, being asked abruptly to give his opinion, cannot say anything haphazardly, hence the **necessity of deliberation.** According to महामहोपाध्याय N the passage is **an address to Śārṅgarava himself as suggested by** (एव). Of course in this case no stage-direction is necessary. Then the idea is :—"You mean to say that I am repudiating this lady sheer whimsically and not because I am afraid of sin ; but I ask you yourself, sir, if you yourself **were in such a dilemma,** what would you do ?" Certainly Śārṇgarava could not say that the second alternative was less sinful. His only recourse was to keep silent. But in this explanation the stage-direction '**विचार्य**' **has no significance**, for an *advice gratis* of the priest, a third person, is **quite uncalled for**, specially to a king. Read "**नापृष्टः कस्यचिद् ब्रूयात्र** चान्यायेन पृच्छतः । जानन्नपि हि मेधावी जडवल्लोक आचरेत्' MS. II. 110. The first explanation, however, seems to be preferable, as later on (in *Act. VII.* 31), the king admits that he **had doubt about his own action** towards Śak. Also 'सन्दिग्धबुद्धिं मां कुर्वन्' &c.—*Supra.* 'संशये' in this Śl. also suggests the same. N alone notices a **variant Stage-direction 'पुरोधसं प्रति' which solves the difficulty to some extent. 2. गुरु-लाघवं**— An **extremely common word** in Sanskrit works, specially in 'आयुर्वेद' । Cf. 'आरभेत ततः कार्यं संचिन्त्य **गुरु-लाघवम्**'—MS. IX. 299. '**निश्चित्य गुरुलाघवम्**—Rām. 3. 27. 2 ; 'विमृश्य **गुरुलाघवम्**'—Ibid ; 2. 63. 7; Mahā. XII. 1273 ; III. 10572 ; '**गुरुलाघव**– विद्वैद्यो नराणां **वर्धयत्यसून्**, तस्मादेकं विजानीयात् द्रव्याणां **गुरुलाघवम्**'—Bhela-Saṁhitā ; '**गुरु-लाघवम्** यथा भिषक् &c.-Srimad-Vāgabata. VI.1-8; Ss. (**चिकित्सा**) —VI. 19 ; (**सूत्र**) 46, 130 ; 391 ; 442 ; CS. (**सूत्र**),—5. 105 ; 27.261 ; 276 ; 340 ; 344 ; 352 ; **But the word is not easily derived.** For we may add अण् to गुरु-लघु(*Com.*), but अण् would cause **पूर्वपद-वृद्धि** by 'तद्धितेष्वचामादेः' (7. 2. 117). Now 22 Sūtras beginning from '**उत्तरपदस्य**' (7.3.10) and ending with '**यथातथ-यथापुरयोः पर्यायेण**'—7.3.31) **mention the exceptions** where ञ-ण-

ककारानुबन्ध Taddhita-affixes cause only **उत्तरपद-वृद्धि**। According to **भाषावृत्ति** & its **टिप्पनी** 'उत्तर-पद-वृद्धि, in 'गुरुलाघवम्', "पितृपैतामहम् is caused (*as in* **परमनैष्कक**) by the rule 'परिमाणान्तस्या ऽसंज्ञा-शाणयोः'–(VII. 3. 17). (*See Com.*) But others opine that the form is not available in this way. So **सुपद्म** (*V*. 1. 7.) and **संक्षिप्तसार** (VII. 37) had to frame **Special Sūtra for** this :—**'गुरु-लघ्वादेः उत्तर-पदस्य'**। **हरिनामामृत** follows suit—'गुरु-लघ्वादेः' (VII.9); Also "गुरु-लघु-संहत-परार्थोर्ध्वं-मुहूर्तादीना **मुत्तरपदस्य**' SKN. VII.1.24 ; *Saraṇa Deva,* author of 'दुर्घटवृत्ति' observes : 'कथ गुरु-लाघवम् ? उच्यते। **पर्याय-शब्दानां गुरुलाघव-चिन्ता नास्तीति भाष्यकार-वचन-प्रामाण्यात्** पूर्व-विप्रतिषेधेन इगन्ताच्च (V. 1.131) इत्यण्। 'उत्तर-पदस्य' च इत्यस्य वृद्धे स्तत्र स्वीकारात् सिद्धिः"—**but this must be a slip (Lapsus memoriae) on the part of the great scholar, as the underlined portion does not occur anywhere in the** महाभाष्य (Vide "**महाभाष्य-शब्द-कोष**" by *Śrīdhara Śāstrī, Pāṭhaka*), and this mistake on the part of the great scholar has not been noticed in any other editions. Might be he was thinking of **'सीरदेवीय परिभाषावृत्ति'** which has 'पर्याय-शब्दानां "**गुरु-लाघव-चर्चा**" नाद्रियते (P. 125) but in ·परिभाषेन्दुशेखर is found "**लाघव-गौरव-चर्चा**" instead. Saraṇa Deva, however, suggests an **alternative explanation**—"गुरु शब्देन धर्म-वचनेन लाघव-शब्दस्य वा द्वन्द्वः"। This is quite in keeping with the view of *Bhatta Abhinava Gupta,* according to whom words like **गुरु, मृदु &c are used as गुणवचन**। So मृदु=मार्दवम्। गुरु=गौरवम्, लघु=लाघवम् ("**मृदु-प्रभृतयो हि मुख्यतया भाववृत्तय एव**") *Hema-Candra-Bṛhat-vṛtti* also follows suit :—"गुरुलाघवमिति गुरोः लाघवम्, गुरुश्च (**गुरुत्वं**) लाघवं चेति वा"। *Kaiyata* in his VP (VI. 4.55) has the following : 'भाष्यकारो गुरु-लाघवमनादृत्य यथा न्यासं समर्थयितुमाह" &c. 3. **संशये**—'सम्+शी–lit. means 'to lie down together', hence when two or more propositions come together they create some sort of doubt. **पांसुलः**—Defiled. (*Ra II*. 2). 4. **कुत इदम्** &c.—The speech is quite in keeping with

the peculiar style of the old Professors of Philosophy carrying on discussion on abstruse subjects. आविष्ट-पूर्वः—'आ+दिश्' means 'to pronounce as a boon', 'to predict.' Cf. 'सिद्धादेशकेन साधुना व्याविष्टाः'—Māla. V.; 'सिद्धादेशेन आविष्टा योऽस्याः पाणिग्रहणं करिष्यति' &c.—Rat. IV; 'सिद्धादेश-प्रत्यय' &c.—Ibid I., 'आदेशिकैः आविष्टा देवी भविष्यति'—SV. I; also V; 'सिद्धादेशा नग्न-क्षपणकाम् प्रपच्छ'—Kād. P. 254. 'सिद्धादेश—प्रत्यय' &c.—MK. IV; 'सिद्धादेश-जनित'&c.—Ibid. VI, 'उत्+दिश्' in this sencse is very rare and occurs in Rām. "उद्दिष्टं" दीर्घमायुस्ते"—VI.32.12.; 5. चक्रवर्तिनम्—(15n. 4); (Com.). 6. तल्लक्षणोपपन्नः—Com. and Śak. VII. 16. 7. विपर्यये—The reverse happening. Cf. 'विपर्यये तस्याधिपतेरुल्लङ्घितः क्षात्रधर्मः स्यात्'—VS. V. समीप-नयनं –Cf. "समीपे परिणेतुः&c.—V. 17.

Text :—राजा—यथा गुरुभ्यो रोचते ।

King—As (*it*) pleases (*my*) preceptor.

पुरोधाः—(उत्थाय) वत्से, अनुगच्छ[१] माम्

Priest (*Rising*)—Follow[1] me, my child !

शकुन्तला—भअवदि वसुहे, देहि मे विवरं (भगवति वसुधे, देहि मे विवरम्[१] । (रुदती प्रस्थिता । निष्क्रान्ता सह पुरोधसा तपस्विभिश्च । राजा शाप-व्यवहित-स्मृतिः[२] शकुन्तलागतमेव चिन्तयति) ।

Śakuntalā—O Almighty wealth-bearing (*earth*)! give me (*room in*) a cleft[1] [*This said, starts weeping. Exit with the priest and the hermits. The king with his*[2] *memory intercepted by the curse*[2] *thinks only about Śakuntalā*].

(नेपथ्ये)—आश्चर्यं माश्चर्यम् !

(*In the tiring room*)—A miracle! A miracle!

राजा (कर्णं दत्त्वा)—किं न खलु स्यात् ।

King—(*Listening*)—O what indeed may it be!

(प्रविश्य) पुरोधाः (सविस्मयम्))—देव, अद्भुतं खलु संवृत्तम् ।

(*Entering*) Priest (*with astonishment*)—Sir, a miracle, indeed, has happened.

राजा—किमिव । King—What (*is it*) ?

पुरोधाः—देव, परावृत्तेषु[1] कण्व-शिष्येषु—

शालिनी　　सा निन्दन्ती स्वानि भाग्यानि बाला
(मततगग)　　बाहूत्क्षेपं[2] क्रन्दितुं च प्रवृत्ता ।

Priest—Sir, on the turning[1] back[3] of Kaṇva's disciples, that girl upbraiding her own (*cruel*) fate began to cry by tossing[4] up (*convulsively*) her arms[3] ;—

राजा—किञ्च । King—And then ?

पुरोधाः— [5]स्त्री-संस्थानञ्चाऽप्सरस्तीर्थं मारात्

शालिनी　　उत्क्षिप्यैनां ज्योतिरेकं जगाम ॥३०॥
(मततगग)　　॥ (सर्वे विस्मयं रूपयन्ति) ॥

Priest—When all of sudden a shining, (apparition) having[5] the outline of a woman,[5] snatched her up near the *Nymphs' shrine* and went off with her. (3) (*All gesticulate surprise*).

V. L.—B reads 'अन्तरम्' for 'विवरम्' । 'किमिव'—R.B.V.S. 'किमेवम्'—M. किञ्च'—R.B.V.M. 'किमन्यत्'—S. 'उत्क्षिप्यैनां'—R. B.V.M. 'आक्षिप्यैनां'—S. 'उत्क्षिप्याङ्के'—B. Mackenzie Mss and B read 'तिरोभूत्' for 'जगाम' ।

शकुन्तलेति—'विवरं' गर्तम् ('विवरं दूषणे गर्ते' इति भानुजि-धृत-कोषः) 'प्रस्थिता' गन्तुमारब्धा ['आदि-कर्मणि क्तः कर्तरि च'-(३।४।७१)-इति कर्तरि क्तः] 'पुरोधसा' पुरोहितेन 'सह'। [पुरोऽग्रे धीयते। 'पुरसि च' (उः—६८०) इति धाञोऽसि। 'पुरोधास्तु पुरोहित' इत्यमरः]। 'शापेन' दुर्वाससः अभिसम्पातेन 'व्यवहिता' कृत-व्यवधाना विलुप्ता इति यावत् 'स्मृतिः' यस्य तादृशः। सेति—'कण्वशिष्येषु' शार्ङ्गरवादिषु 'परावृत्तेषु' स्वाश्रमं प्रस्थितेषु 'सा बाला' शकुन्तला 'स्वानि' स्वकीयानि 'भाग्यानि' दुरदृष्टं 'निन्दन्ती'['शप्श्यनोर्नित्यम्'-(७।१।८१)-इति नुम्] सती 'बाहू उतक्षिप्य' ऊर्ध्वं क्षित्वा इति 'बाहूत्क्षेपं' (३।४।५४ ; ३३७६) 'क्रन्दितुम्' उच्चैः आरटितुं 'प्रवृत्ता च' (इति स्वभावोक्तिः)। 'स्त्रियाः संस्थानम्' आकृतिः ("संस्थान माकृतौ मृत्यौ संनिवेशे चतुष्पथे"-इति मेदिनीकरः) स्त्री-संस्थानमिव 'संस्थानं' यस्य तादृशम् (इति उष्ट्र-मुखवत् उत्तर-पद-लोपी बहुव्रीहिः) 'एकं ज्योतिः अप्सरस्तीर्थम् आरात्' समीपे ('आराद्

दूर-समीपयोः' इति तत्त्वबोधिनी । आराओमे २था) 'एनम् उपक्षिप्य' ऊर्ध्वं नीत्वा 'जगाम च' तदभिमुखं प्रस्थितमित्यर्थः (अत्र अद्यतने लिट् । वैदिकोऽयं प्रयोगः) । च-द्वयम् अविलम्ब-द्योतनाय । क्रिययोः समुच्चितत्वात् समुच्चयाऽलङ्कारः । हेत्वनुप्रासौ च । शालिनी वृत्तम् ॥३०॥ 'नेपथ्ये' इत्याद्येतदन्तेन शक्ति नर्माङ्ग मुपक्षिप्तम् । 'विरोध-प्रशमो यस्तु सा शक्तिरिति कीर्तिता' इति तल्लक्षणात् । अनेन अद्भुत-रसोऽपि ध्वनितः) ।

182n,—1. देहि मे &c.—The idea is—'Mother Earth, my face has been defiled by repudiation and as such I am ashamed to show it to the world any more. Please give me a shelter in your bosom'. Cf. 'तथा मे माधवी देवि विवरं दातुमर्हति'—*Rām.* 'णेदु मं अत्तणो अंगेसु विलअं अम्बा'——*UC. VII.* 2. **पुरोधसा**—This is the reading in **all** the **editions,** but **excepting** B, all others have '**पुरोहित**' **elsewhere** throughout in Act V. Thus B's is the **genuine reading**. Vide(162n.1). **तपस्विमिश्र**—Suggests the presence of **ascetics other than** '**शार्ङ्गरव**' and '**शारद्वत**'–*Vide.* (134*n.*6). 3. **आश्चर्यम्**&c.—Exactly occurs in PC (प्रस्तावना) । The reduplication is due to सम्भ्रम । Ordinarily 'चर्' with उपसर्ग does not take 'यत्' by 'गद-मद-चर-यमश्चाऽनुपसर्गे' (III.1.100) but the *Vārt.*—'चरे आङि चाऽगुरौ' allows यत् after 'आङ्+चर्' । Next by '**आश्चर्यं मनित्ये**'–(VI.1.147), 'आश्चर्यम्' is obtained by **निपातन** in the sense of something '*unusual.*' 'अनित्यम् आगन्तुकम् अद्भूतम्'—'**Prabhā**. 'अनित्ये किम् ? आश्चर्यं कर्म शोभनम्'—SK.1062. 4. **बाहूत्क्षेपं—बाहू** उत्क्षिप्य इति बाहु+उत्+क्षिप्+णमुल् भावे (by '**स्वाङ्गेऽध्रुवे**'—III. 4. 54), **throwing her arms convulsively**—'**अध्रुव**' is any part of the body the **loss** of which does not lead to the **destruction** of life. Cf. 'येन विना न जीवनं तद ध्रुवम्'—*BD.* यथा 'शिर उर इत्यादि'—**Prabhā**. Also—'अद्रवं मूर्तिमत् स्वाङ्गं प्राणिस्थमविकारजम् । अतत्स्थं तत्रदृष्टञ्च तेन चेत् स्यात् तथायुतम्'—*Vārt.* (IV.1.54.) 'अध्रुवे इति किम् ? उत्क्षिप्य शिरः कथयति'–*VM. M* **wrongly** considers this to be used in a similar sense as 'लतानुपातम्' &c. *BK.II.I.*, as 'णमुल्' there comes by a **different Sūtra**. (III.4.56). Cf

'पाणिभ्यां रुदती दुःखा दुदरं प्रजघान ह्'—Rām. III. 45, 38 ; IV. 19. 20. 5. (क्रन्दित्') च— (संस्थानं) च—'च' is frequently repeated to express **simultaneousness** or **undelayed occurrence** of two events Cf. 'ते च प्रापु रुदन्वन्तं बुबुधे चादिपुरुष:'—*Ra. X.* 6; *II.* 40. *Ku. III.* 58; 66. *MM.IX.* 39 ; *Śak. VI.* 8. 6. **किञ्च**—The king had seen that Śak. was bewailing tossing up her hands and this fact was **neither unusual nor astonishing in her condition** ; hence he asked 'what next ?' 'इदं ज्ञातमेव इति राजा पृच्छति—किञ्च'—*R.* 7. **ज्योतिरेकं** &c.—'तेजोरूपत्वेन स्पष्ट मदृश्यमान मतएव संस्थान-शब्द-प्रयोग:' —R. The party saw only a luminous something, having the **outline** (**संस्थान**)of a woman but could not exactly determine what it was. 'कीदृशं तस्य **संस्थानम्**'—Rām. *V.* 35. 4 ; 6. 'कबन्धमिव **संस्थानम्**'—Ibid. 19. 20. (**२या with आरात्**) is frequently met with. Vide. Ra. II. 1 ; ŚPB. III. 31. ; VII. 29 ; XII. 28. Our supposition is that like 'ऋते', 'आरात्'was at one time freely used with २या, ('**ततोऽन्यत्रापि दृश्यते**'—Vārt. 45), or construe 'आरात् उत्क्षिप्य, अप्सरस्तीर्थं जगाम'—Snatched her up from afar and went towards Nymph's shrine. With '**तिरोभूत्**'' (Cf. 'शरीरबन्धेनन **तिरोबभूव**'—Ra. XVI. 23 ; 'विश्वयोनि स्तिरोदधे'—Ku. II. 61 ; 'तेन तिरोबभूवे'—KI. XI. 81). **अप्सर-स्तीर्थम्**— May also be taken as an attribute of **ज्योति:**, where '**तीर्थम्=दर्शनम्** । Cf. '**तीर्थं**' शास्त्रे गुरौ यज्ञे योनौ * * पात्रे **दर्शने** च'—*H & N.* अप्सरोवत् तीर्थं **दर्शनं** यस्य—A luminous something (ज्योति)looking (**beautiful**) like a **nymph.** 8. **जगाम**—**The priest saw the whole thing with his own eyes,** so the **use of लिट्** (in **परोक्षे**)may seem to be **inaccurate**. But this is a **Vedic use** of 'लिट्' for 'लुङ्'(III. 2. 110) and refers to **immediate past** (**अद्यतन**). For Kāli.'s fancy for **Vedic uses** Vide. (68n. 1) and (225n.1).

Text :—राजा—भगवन्, प्रागपि सोऽस्माभिरर्थ: प्रत्याविष्ट' एव । किं वृथा तर्केणान्विष्यते । विश्राम्यतु भवान् ।

King—Revered Sir, from the very first, that object[1] was .

repudiated[2] by us. Why is it being uselessly sought with conjectures ? Please rest yourself.

पुरोधाः (विलोक्य)—विजयस्व। (निष्क्रान्तः)।

Priest (*Staring*)—Be victorious. (*Exit*).

राजा—वेत्रवति, पर्याकुलोऽस्मि। शयन-भूमि-मार्गमादेशय।

King—Vetravati, I am perturbed[3]. Direct[4] the way to the bed-chamber.

प्रतीहारी—इदो इदो देवो (इत इतो देवः)। (प्रस्थिता)।

Portress—This way, My Liege, this way, (*Starts*).

राजा (परिक्रम्य स्वगतम्)—

Text :—कामं[1] प्रत्यादिष्टां[2] स्मरामि न परिग्रहं[3] मुनेस्तनयाम्।

आर्या बलवत्तु दूयमानं[4] प्रत्याययतीव[5] मां हृदयम्॥३१॥

12, 18

12, 15 ॥ (निष्क्रान्ताः सर्वे)॥

King (*Walking round, aside*).—True[1] that I do not remember the repudiated[2] daughter of the sage (*as*) espoused[3] (*by me*), yet my heart aching[4] poignantly, leads me to believe[5] it (*all*) as it were. (3). (*Exeunt Omnes.*)

॥ पञ्चमोऽङ्कः ॥

(*End of the Fifth Act.*)

V. L.—'मां हृदयम्'—B.M.S. 'मे हृदयम्'—V.R.

राजेति॥ 'सः अर्थः' तत् शकुन्तला-रूप-वस्तु (इदानीं मनुष्यत्वेऽपि सम्मोहात् अर्थ-शब्द-प्रयोगः) 'प्रत्यादिष्टः' तत्सौलभ्येऽपि प्रत्याख्यातम्। इदानी कुत्र केन किमर्थं वा नीतम् इति विचारेणालम्। राजेति॥ 'प्रत्यादिष्टां' प्रत्याख्यातां 'मुनेः' कण्वस्य 'तनयां' 'परिग्रहं' भार्यां परिणीत-पूर्वाम् इति 'न स्मरामि कामम्' अनिच्छयापि तन्मया अनुमन्तव्यम् ('अकामाऽनुमतौ कामम् असूयगमेऽपि च' इति रुद्रः)। 'हृदयं तु' पुनः 'बलवत्' अतीव 'दूयमानं' पीड्यमानं सत् 'माम्' (अणिकर्तुः कर्मसंज्ञा—१।४।५२) 'प्रत्याययति' (२।४।४६) मया इयं

परिणीतपूर्वां इति विश्वासम् उत्पादयति 'इव' (इत्युत्प्रेक्षा। पीड़ायाः कारणस्य स्मरणस्याऽभावेऽपि पीड़ेति विभावनाऽलङ्कारः। अनुमानाऽलङ्कारोऽपि। तत् प्रत्यायनस्य साध्यत्वं हृदय-पीड़ा-हेतुत्वात् अनुमानम्। अनेन प्रसङ्ग-नामाङ्ग मुपक्षिप्तम्। तल्लक्षणम्—'प्रसङ्ग श्चैव विज्ञेयो गुरूणां कीर्तनं हि यत्' इति। आर्या जातिः) ॥२१॥

इति गौतम-श्रीरमेन्द्र-मोहन-वसु-विरचितायामभिज्ञान-शकुन्तल-टीकायां कुमार-सन्तोषिण्यां पञ्चमोऽङ्कः समाप्तः ॥

183n.—**1.** **सोऽर्थः**:—The king uses this epithet for he now doubts whether she is at all a human. being. This also suggests his non-challant attitude towards Śak. *See next.* **2**. **विलोक्य**—The priest looks at the king with bewilderment at his *utter non-challance* (as expressed by the epithet—सोऽर्थः) to such a **startling** news that astounded everybody—(Cf. 'सर्वे विस्मयं रूपयन्ति') **बलवत्**—(Here adverb. For its **Adjective use** Vide 89n. 3.) 3. **प्रत्याययति**=प्रति+इ+णिच्+लट् ति–Makes me believe. '**इ**' is not replaced by 'गम्' by 'णौ गमिर् अबोधने' (2. 4. 46) ; 'णिच्-प्रत्यये परे इण्-धातु-स्थाने गमि-धातुः आदेशः स्यात्। गमि-शब्दस्य इकार उच्चारणार्थः बोधनार्थे मा भूत्। * * गमयति। बोधनार्थे तु प्रत्याययति (ज्ञापयति)'—**Prabhā.** *Cf.* the idea with the third line of Act. V. 2. Supra.

Time-analysis of Act V—The action of the Fifth Act takes place on the day following the departure of Śak. and her party from the hermitage of Kaṇva. This is inferred from the following reasons—Kaṇva's hermitage was situated somewhere near the valley of the mount Himālaya. ('एते खलु हिमगिरेरुपत्यकाऽरण्यवासिनः काश्यप' &c.—*Act. V*) ; and from the speech of the king to Śak. on the eve of his departure from the hermitage. *Cf.* ('एकैकमत्र दिवसे' &c.—*VI.*12) we know that *three,* four or *eight* days, (205n. 6) are necessary for a journey from the

hermitage to the city and back, and for necessary preparations to receive the bride. This places the hermitage at a considerable distance from the king's capital. Besides this statement is also in quite consonance with the statement of the Mahā, where the metropolis of Duşyanta (*i.e. the city of* 'प्रतिष्ठान' *or* 'हस्तिनापुर' is said to be **2 योजन**s (*i.e.* a little more than **18 miles**) from the hermitage. (*Cf.* 'वनमालोकयामास नगराद् **योजनद्वये** । Also 'आश्रमात्तु * **द्वितीय-योजने** विप्राः प्रतिष्ठानं प्रतिष्ठितम्' । Also 'स्याद् योजन क्रोश-चतुष्टयम्'—Līlāvatī. Again क्रोश=अष्ट-सहस्र-हस्त-परिमाणम् (*Ibid*). Thus one क्रोश=4000 *yds.*=2 miles+480 *yds.*). The Party arrived at the king's place when Duşyanta was taking rest in his inner-apartments, after finishing his mid-day duty (Read 'तथापि इदानीमेव धर्मासनादुत्थिताया' &c.—Kañcuki's speech]. This must be the **sixth** part of the day *i.e.* roughly 1. 30 P.M. to 3 P.M. (Cf. 'व्योममध्ये **षष्ठे काले** त्वमपि लभसे देव विश्रान्तिमह्न'—*Vik. II.* 1 ; *Dr. Wilson's Hindu Theatre P.* 209 ; *MS. VIII.* 221 *and Medhātithi* and *Govindarāja* thereon. The scene perhaps ended a bit late in the afternoon.

षष्ठोऽङ्कः

(ततः प्रविशति नागरिकः श्यालः, पश्चाद्बाहु-बद्धं पुरुषमादाय रक्षिणौ च) ।

रक्षिणौ (पुरुषं ताड़यित्वा)—अले कुम्भीलआ ! कहेहि कहिं तुए एशे महामणि-भाशुले उक्किण्ण-णामाक्खले लाअकीए अंगुलीअए शमाशादिए [अरे कुम्भीरक[1] ! कथय कुत्र त्वया एतत् महामणि-भासुरम्[2] उत्कीर्ण[4]-नामाऽक्षरं राजकीयमङ्गुलीयकं समासादितम् ।]

(*Enter the king's brother-in-law, the Superintendent of the city-police and two constables dragging a man with hands tied behind*). Constables (*Beating the man*)—Say, you (*rascally*) thief[1], where you have got this royal ring, sparkling with **a precious gem**[2] and having the (*king's*) name imprinted[4] on (*it*).

पुरुषः (भीतिं नाटयित्वा)—पशीदन्तु, पशीदन्तु भावमिश्शे । ण हगे ईदिश-कम्मकाली (प्रसीदन्तु, प्रसीदन्तु भावमिश्राः[5] नाऽहमीदृश-कर्मकारी) ।

Man (*Gesticulating fright*)—Please, please, guv'nors[5], I am not the perpetrator of such an act.

प्रथमः—किं क्खु शोहणे बम्हणेशि त्ति कलिअ लञ्ञा दे पडिग्गहे दिण्णे (किं खलु शोभनो ब्राह्मणोऽसि इति कृत्वा राज्ञा ते प्रतिग्रहो[6]दत्तः) ।

First—Was it (*forsooth*) a present[6] awarded by the king, consedering you to be an illustrious Brâhmaṇa ?

पुरुषः—शुणध दाणिं । हगे क्खु शक्कावदाल-वाशी धीवले (शृणुतेदानीम् । अहं खलु शक्रावतार-वासी धीवरः) ।

Man—Deign to listen to (*me*) now. I am really, a fisherman living at Śakrâvatâra.

द्वितीयः—अले पाडच्चला ! किं तुमं अम्हेहिं वशदिं जादिं च पुच्छीअशि (अरे पाटच्चर[7] ! किं त्वमास्माभिः वसतिं[8] जातिञ्च पृच्छयसे) ।

Second—You thief[7] are we asking you about (*your*) caste and diggings (whereabouts[8]) ?

श्यालः—शूअअ, कहेदु सव्वं अणुक्कमेण । मा णं अन्तरा पडिबन्धह (सूचक, कथयतु सर्वमनुक्रमेण[9] । मा एनमन्तरा प्रतिबधान[10]) ।

Superintendent—Sûcaka, let him say all step[9] by step. Don't stop[10] him in the middle.

V. L.—'कुम्भीरक'—R. 'कुम्भीलकः'—B. V. M. S. 'महामणिभासुरम् उत्कीर्णनामाक्षरम्'—B.. P. HS. 'मणिबन्धनोत्कीर्ण-नामधेयम्'—R. V. M.

'नामधेयाङ्कितम्'—S.. 'भीतिं नाटयित्वा'—S.. 'भीतिनाटितकेन'—R. B. V. M. 'कृत्वा'—B. V. M. S. 'कलयित्वा'—R. 'शक्रावतार'—B. S. 'शक्रावताभ्यन्तर'—R. V. M.

तत इति। नगरे (मत्वर्थीयः रः। वाः—५।२।१०७) नियुक्तः, नगरं रक्षति वा इति 'नागरिकः' ('तत्र नियुक्तः'–४।४।६९ ; १६२०) यद्वा, 'रक्षति' (४।४।३३ ; १५८३—इति ठक्)। 'श्यालः' राज्ञः दुष्यन्तस्य पत्न्या भ्राता ('श्यालाः स्युः भ्रातरः पत्न्या' इत्यमरः ।। श्यायते। श्यैङ् गतौ। बाहुल-कात् कालन् इति भानुजिः। 'उच्छिष्ट-मधुपर्कवाची 'श्या' शब्दः। श्यां लाति। 'आतोऽनुपसर्गे (३।२।३) इति कः' इति मुकुटः। "राज–श्यालकस्य उपस्थापनम् अवाधेन अन्तःपुर-प्रवेश-प्रतिपादनार्थम्")। **रक्षिणाविति**। 'अरे' इति नीच-सम्बोधनम् (इति हेमचन्द्रः। 'ओरे' इति भाषा) 'कुम्भीरकः' चौरः ('कुम्भीरको गण्डपद स्तस्करश्च मलिम्लुच' इति धनञ्जय-कविकृत-नाममाला) **'महान्' महार्घः यो "मणिः" तेन 'भासुरम्'** उज्ज्वलम् ('भञ्ज–भास-मिदो घुरच्' ३।२।१६१) 'उत्कीर्णं' व्यक्तीकृतं क्षोदितमिति यावत् 'नामाक्षरम्' दुष्यन्त-नाम-धेयं यस्मिन् तादृशं राज्ञ इदं 'राजकीयं' नृप-संबन्धि ("राज्ञः क च"–४।२।१४०) इति छः प्रत्ययः। राजन्-शब्दस्य नकार-स्थाने क-कारादेशश्च" इति **प्रभा**। 'अङ्गुलीयकं समासादितं' प्राप्तम्। ('**मागधी** राक्षसादेः स्यात्' इति भरतः। अत्र आदि-पद-ग्रहणेन शकार-धीवरादीनामपि ग्रहणादेतेषां मागध्युक्तिः)। **पुरुष इति**। 'प्रशस्याः भावाः' पण्डिताः ('भावो विद्वान्' इत्यमरः। अपिच 'सेनापति-रमात्यश्च श्यालौ भावेति भाष्यते" इति)। 'भाव–मिश्राः' (अस्वपद-विग्रह-नित्यसमासः–२।१।६६ ; ७४७)। ('हगे' अहम्। "वयमो हगे" इति 'अहम्' इत्यस्य हगे आदेशः ।। **प्रथम इति**। 'शोभनः' सदाचार-पूतः अतएव दाशार्हः 'ब्राह्मणोऽसि' इति कृत्वा अर्थात् मनसि मत्वा। 'राज्ञा प्रतिग्रहो दत्त' इति सोपहासोक्तिरियम्। **पुरुष इति**। 'धीवर': 'कैवर्तः' (स तु वैश्या-गर्भे क्षत्रियस्य औरसजात इति ब्रह्म-वैवर्त-पुराणम्। 'कैवर्ते दास-धीवरौ' इत्यमरः)। **द्वितीय इति**। 'पाटच्चरः' चौरः ('दस्युः पाटच्चरः स्तेन' इति हैमः)। **श्याल इति**। 'सूचक' इति रक्षिणोः एकतरस्य नाम। 'अनुक्रमेण' यथाक्रमम् 'अन्तरा' मध्ये 'मा प्रतिबधान' व्याघातं मा जनय ('मा माङ् एतौ निषेधाऽऽशङ्कयोः' इति तत्त्वबोधिनी। **मा-योगे** लोट्)।

184n.—1. नागरिकः—The Superintendent of police; the City-inspector equivalent to Bengali 'सहर-कोतोयाल्'; (Cf. **नागरकः**—153n. 7.) **2. श्यालः**—(*Also* **स्यालः**—*Kṣīrasvāmi*) He is the **brother** of the **king's concubine** (**अनूढ़ा**)। Read 'मद-मूर्खता-

भिमान-दुस्कुलस्त्वैश्वर्य-संयुक्तः। सोऽयमनूढा-भ्राता राज्ञः श्यालः शकार इत्युक्तः' ॥—*SD. III.* 80; 'काणेली-मातः'—*Son of an unmarried lady*—*MK. VII.* Born very low, he is raised to power by reason of his connexion with the king. He is also called 'शकार' for his using Śakāri dialect. 'शकार-भाषा-प्रायत्वात् शकारो राष्ट्रियः स्मृतः' In *MK,* 'शकार' (श्याल) plays a porminent part. **3. कुम्भीरकः**—कुम्भिनं हस्तिनम् ईरयति (अन्यत्र प्रेरयति) इति कुम्भिन्+ईर्+अण् कर्तरि ('कर्मण्यण्'—3. 2. 1)=कुम्भीरः—*BhD.*. Next स्वार्थे कन्। कुम्भीरकः originally means a **crocodile** that drives away an elephant, and next perhaps from the thievish nature of it, the word means a 'thief'. Or, 'कु' means earth, hence secondarily 'an earthen wall'; 'भिद्' means *to break,* hence a burglar that enters a house after breaking the earthen wall. Excepts *R,* others read 'कुम्भीरकः' which also means the same. Cf. 'कुम्भीलः झालमीने च चौर-श्लोकार्थ-चौरयोः'—*Medinī; Kāli.* has used the first *twice* in *Vik,* and the second also *twice* in *Māla.* Cf. 'क्व गतः स रत्न-कुम्भीरक'—*Act. V.* 'गृहीतस्य कुम्भिरकस्यास्ति'—*Act. II.* 'कर्मगृहीतेन कुम्भीलकेन'—*Act. II.* 'अहो कुम्भीलकैः कामुकैश्च'——*Act. IV.* The fisherman here is speaking the 'मागधी' dialect (*a variant of Śakāri language*) in which 'र' is replaced by 'ल', and 'स' or 'ष' by 'श' by the rule 'रसोर्लशौ,' and in the Nominative 'अ' (singular) by 'ए' by the rule ('अत इदेतौ लुक् च') । **4. महामणि-भासुरम्** &c.–is **preferable** to 'मणि-बन्धनो त्कीर्ण-नामधेयम्', for this means either (*i*) that the name was engr--aved on the the *collet* where usually the gem is set (*M*). This supposes the *absence* of any gem; or, (*ii*) the setting of the various gems ((मणीनां बन्धनम्) was so skilfully done on the ring as to **imprint the name** of the king (*i.e.* the three letters दुष्यन्त) therein. This supposes the *existence of many gems.* The former contradicts the lines '* * * तावत् एतत् महारत्न-भासुरमङ्गुलीयकम्', &c. (*speech of* पुरुष) । '* कथयति महार्ह-रत्नेन' &c. (*speech of* जानुक) which clearly state the **existence of a precious gem.** The second also is condradictory to the line 'न तस्मिन् महार्हरत्नं भर्तुः' &c. which proves the existence of a **single gem.** Mark also that the word 'भासुर' (*B*) is repeated in the speech of पुरुष (*Cf.* 'तस्य

उदराभ्यन्तरे एतत् रत्न-भासुरम्' &c.. **5. भावमिश्राः**—(7*n.* 1). A respectable person should be addressed as **'भाव'**। Cf. 'मान्योभावस्तु वक्तव्यः'—*Bharata.* "आत्मा भावो, मनो भावो, भावः सत्ता भवोऽपि च। भावः पुज्यतमो लोके, पदार्थो भाव उच्यते"—*Gada-singha.* **6. राजकीयम्** =राजन्+छ—Pertaining to a king. राजन्=राजक by 'राज्ञः क च'-(4. 2. 140)—छ=ईय (7. 1. 2)—'राज्ञः ककार श्चान्तादेशो भवति, छश्च प्रत्यय.। राजकीयम्। आदेशमात्रमिह विधेयं, प्रत्ययस्तु 'वृद्धाच्छः'–(४।२।१४१) इत्येव सिद्ध'—*Vāmana.* **लज्जा**=राज्ञा ('प्यन्यज्ञक्षां ज्जः'—R). **7. प्रतिग्रहः** —Gift. the receiving of which is one of the **five** duties of a Brāhmaṇa. Cf. "अध्यापनमध्ययनं यजनं याजनं तथा। दानं प्रतिग्रहश्चैव षट्कर्माण्यग्रजन्मनः"—*MS.X.*75; *I.* 88; I. 118. *Bṛhat Parāśara.* Ch. IV; (49*n.* 1.) **कलिय**=कृत्वा (मनसि); Cf. "परकीयमिति कृत्वा" Māla. II; or, **कलिअ**=कलयित्वा—(R)—Regarding. Cf. GG. IV.7; *SPB.* VI. 54; IX 58. **गुग्गुध**=गृग्गुन ('इह हचोर्हस्य' इति धः)। **8. धीवरः**- दधाति मत्स्यान् इति धा+ष्वरच् ('छित्वर-छत्वर-धीवर'—U. 281)='धीवरः =कैवर्तः। **9. भीति-नाटितकेन**—R. M. The 'क' added to 'नाटित', may possibly signify a poor, sorry, or ludicrous gesture. It is often **pleonastic,** but in the plays it will sometimes be found affixed to the past passive participle to which it gives the sense of a verbal noun. Thus 'उद्भ्रान्तक' ('उद्भ्रान्तकेन निष्क्रान्ता'—*Act. VI. Infra.*), ('अपवारितक'—*MK. V*), for 'उद्भ्रान्ति' and 'अपवारण'—*M.* Generally stage direction with क्त्वा or ल्यप् comes at the beginning of a speech. Cf. 'कर्णं दत्त्वा', 'निपुणं निरूप्य', 'अवतीर्य'—Act I. and so on. Hence **'भीतिं नाटयित्वा'—(S)** seems to be preferable. **10 पाटच्चर**—पाटयन् चरति यः सः—One who moves about by breaking walls. (अच्—3. 1. 134). पृषोदरादित्वात् य-लोपः—(6. 3. 109). Otherwise the, form would have been 'पाटयच्चरः'। Cf. **"वर्णागमो गवेन्द्रादौ, सिंहे वर्ण-विपर्ययः। षोडशादौ विकार स्स्यात् वर्ण नाशात् पृषोदरम्"**–*BhD.* Or, पटयन् वेष्टित इव चरति यः सः 'पटच्चरः'—One **that moves under cover** (*of darkness*), hence a thief. Cf. **'चौर-जीर्णपटयोः पटच्चरः' इति नामानुशासनम्।** *Vide* also *Trikāṇḍa-viveka* of *Ramānātha Vidyāvācaspati.* Next **पटच्चर एव पाटच्चरः। स्वार्थे अण्।** Cf. **'पद्मिनी-परिमलाऽलि-पाटच्चरैः'**—***Bhāminivilāsa. II.*** **75.**

Remark:—The City-Superintendent is here speaking शौरसेनी dialect though according to *Viśvantāha Kavirāja* he should speak 'दाक्षिणात्य' form of *Prākṛta* (वैदर्भीभाषा)। Cf. "योध-नागरिकादीनां दाक्षिणात्या हि दीव्यताम्"।

Text:—उभौ—जं आवुत्ते आणवेदि। लवेहि ले

(यदावुत्त[1] आज्ञापयति। लप रे)।

Both—As Your Honour commands. Say on.

पुरुष:—सो हगे जालुग्गालादीहिं मच्छ-बन्धणोवाएहिं कुडुम्ब-भलणं कलेमि

(सोऽहं जालोद्गालादिभि[2] मत्स्य-बन्धनो-पायैः कुटुम्ब-भरणं करोमि)।

Man[2]—With nets, hooks and other[3] contrivances of catching fish, I maintain my family.

श्याल: (विहस्य)–विसुद्धो दाणिं आजीवो (विशुद्ध इदानीमाजीवः[1])।

Superintendent (*Jesting*)—A most refined profession[1] for sooth.

पुरुष:—भट्ट! मा एव्वं भण (भर्तः! मा एवं भण)।

शहजे किल जे विणिन्दिये णहु दे कम्म विवज्जणीअए।

सुन्दरी पशु-मालण-कम्म-दालुणे अणुकम्पा-मिदुए वि शोत्तिए ॥१॥

(ससजग सहजं[4]किल यद्विनिन्दितं न खलु तत् कर्म विवर्जनीयम्[5]।

सभरलग) पशु-मारण-कर्म-दारुणो[6]ऽनुकम्पा-मृदुकोऽपि श्रोत्रियः[7]) ॥

Man—Don't say so, My Liege. They say, a craft in[4] which one is born[4], (*though*) despised is surely not[5] to be abandoned[5]. A [7]Brāhmin read in the Vedas[7], though soft with pity, is savage[6] (*enough*) in the act of slaughtering the (*sacrificial*) beast[6]. (1)

V. L.—'लप रे'—B. Others have 'कथय'। जाल-बडिश-प्रभृतिभिः'—B. HS. जालोद्गालादिभिः'—R. M. V.; R omits 'भर्तः'। 'न हि'—B. V. 'न खलु'—R. S. M. 'मृदुरपि'—V. 'मृदुकोऽपि'—B. 'मृदुरेव'—R. M. S.

उभाविति। 'आवुत्तः भगिनीपतिः ('भगिनीपति रावुत्तः' इत्यमरः। आपम् (३।३।१८४) उत्तनोति इति 'अन्येभ्योऽपि,—' (वाः-३।२।१०१) इति डः)। 'लप' ब्रूहि। **पुरुष इति**। 'जालानि उद्गालाः' बडिशानि च इति 'जालोद्गालं ('जातिरप्राणिनाम्' इति एकत्वम्। उत्-पूर्वक-गृ-धातोः परः 'उद्-न्योर् ग्रः'—(३।३।२९) इति कर्मणि घञ्। ततः 'अचि विभाषा'-(८।२।२१)-इति र-कारस्य लत्वं पाक्षिकम्) तत् आदिर्येषां तादृशैः मत्स्यानां बन्धनस्य उपायैः। **श्याल इति** 'विशुद्ध' इत्यादि सोल्लुण्ठनं वाक्यम्। **सहजमिति**। 'विनिन्दितं" विगर्हणीयम अपि यत् 'कर्म' क्रिया 'सहजं' जन्मनः प्रभृति उत्पन्नं, वंश-परम्परा-

क्रमेण आगतं 'तत् कर्म न हि' इति निश्चये 'विवर्जनीयम्' परित्याज्यम् 'किल' इति श्रूयते ('किल-शब्दस्तु वार्तायां संभाव्याऽनुनयार्थयोः' इति विश्वः)। अपरित्यागे दृष्टान्त मुदाहरति। 'श्रोत्रियः' वेदाभ्यास-रतः ब्राह्मणः ('अनेन नियत-वेद-पठन-निरतत्वात् हिंसा-राहित्वं व्यज्यते। 'अनुकम्पया' दयया 'मृदुकः' कोमलः अपि 'पशूनां' यज्ञीय-पशूनां 'मारण-रूपं यत् 'कर्म' (तथा च श्रुतिः "अग्नीषोमीयं पशु-मालभेत", "वायव्यं श्वेतच्छागल मालभेत" इति) तेन 'दारुणः' भयावहः अति-कठिन इति यावत् ('दारुणो रसभेदे ना, त्रिषु तु स्याद् भयावहे' इति विश्व-मेदिन्यौ)। (**अर्थान्तरन्यासः**। पूर्वार्धे धीवरस्य मत्स्याजीवे विशेषे प्रस्तुते सामान्य-मुक्तमिति **अप्रस्तुत-प्रशंसा**। अनुकम्पा-मृदुकात् श्रोत्रियात् दारुणत्व-रूप-विपरीत--गुणोत्पत्याः **विषमालङ्कारश्च**। **सुन्दरीवृत्तम्**। **वैतालीयं** वृत्तमिति केचित्)॥१॥

185n.—1. **'आवुत्त'**—The epithet seems to have been used to please 'श्याल'। Surely he was not a 'sister's husband' of the constable. "In *MK* the word has been applied as a **title of respect** by a son to **his** father, but *Dr. Boehtlingk* conjectures that this may be an error for **'आवुक'**–the regular theatrical term for father. According to *Dr. Burkhard*, आवुत्त = SK. भाव—An 'honourable sir', 'gentlemen'—M. हगे = अहके = अहम् ("अहमर्थे अहके हगे")। **2.** **जालोद्गाल** &c.—उद्गाल means a fishing hook, (वड़िशम्)-**Optionally** 'उद्गार' (*Com*). **3.** **विशुद्धः** &c.—This is said **sarcastically**. For the fisherman-caste (निषाद) is one of the **lowest.** Vide MS. X. 46-48. Mark that 'श्याल' **himself is interrupting** the fisherman in his speech, though a little before he ordered the first constable **not to do like that.**' आजीवो जीविका वार्ता वृत्तिर्वर्त्तन-जीवने'—*AK*. **दाणि** = इदानीम् (इदानीमो दाणिम्) **4. सहजम्** &c.–'सह' एकत्र जातम् इति सहजम्, ('सहजं कर्म कौन्तेय सदोषमपि न त्यजेत्')—hence 'natural'. In the case of the fisherman, '*killing of Fish*' is his natural profession, but for this nobody should accuse him of possessing natural cruelty or ask him to give up that occupation. **किल**—So say the learned men. Cf. **'सहजं कर्म** कौन्तेय सदोषमपि न त्यजेत्'।–*Gitā. III.* 35 *XVIII.* 47; *Ibid.* 41—46; *MS. X.* 97 *Narasingha Purāṇa XVIII.* 48. 'श्रेयान् **स्वधर्मो** विगुणः परधर्मात् स्वनुष्ठितात्। **स्वधर्मे निधनं** श्रेयः परधर्मो भयावहः'—*III.* 35. 'श्रेयान् **स्वधर्मो** विगुणः परधर्मात् स्वनुष्ठितात्। **स्वभावनियतं** कर्म कुर्वन्नाप्नोति किल्विषम्'—*XVIII.* 47; *Ibid* 42—

46 ; 'वरं **स्वधर्मो** विगुण: न पारक्य: स्वनुष्ठित: । **परधर्मेण जीवन्** हि सद्य: पतति जातित:'—*MS. X.* 97.—'यो यस्य विहितो धर्म: स तज्जाति: प्रकीर्तित: । तस्मात् **स्वधर्मं** कुर्वीत द्विजो नित्यमनापदि ॥ '**ऋते स्वधर्मं** न ते यान्ति परां गतिम्'—*Narasingha Purāṇa* 'देशानुशिष्टं **कुलधर्ममग्र्यं स्वगोत्रधर्मं** न हि संत्यजेत्'—*Qtd. Śuddhitattva; Ki. XI.* 78. **5. पशुमारण** &c.—Our poet **supports the Vedic rites.** Read "**दैवतेन** पशु नानात्वम्"—Āśvalāyana. III. 74 & V. 3. 3; '**बध्नन् प्रजापतयेऽश्वमजं** तुपरं गो-मृगम् &c.—Garga-Nārāyaṇa on Ibid. III. 6.18; Kātyāyana Śrauta Sūtra. IX. 8.2.5; "आग्नेयोऽग्निष्टोम ऐन्द्राय उक्थ्ये द्वितीय ऐन्द्रो वृष्णि षोडशिनि तृतीय: सारस्वती मेष्यतिरात्रे चतुर्थी"—Āśvalāyana V. 2.2. Mark also the **sly insinuation against the Buddhists** (*ln.* 7). Hence R remarks '**विनिन्दितम् इति बौद्धादिभि:**' । **6. श्रोत्रिय:**—One **vastly read** in the **Vedas.** 'श्रोत्रियंश्छन्दोऽधीते (5. 2. 84)' directs **घन्** after '**छन्दस्**' which is **replaced** by '**श्रोत्र**' । Thus **छन्दस्+घन्=श्रोत्र+घ=श्रोत्रिय:** (घ=इय–7. 1. 2; 475) "**द्वितीयान्तात्** छन्दश्शब्दात् अधीते इत्यर्थे घन्, प्रकृते: **श्रोत्राऽऽदेशश्च निपात्यते**"—*MB*; or, '**श्रोत्रियन्**' is a substitute for the sentence 'छन्द:अधीते' **without any affix** by 'निपातन' । 'श्रोत्रियन् इति निपात्यते छन्दोऽधीत इत्यस्मिन् अर्थे । न-कार: स्वरार्थ: । **श्रोत्रियंश्छन्दोधीत इति वाक्यार्थे पदवचनम्**'–*KV*, which of course suggests the **alternative** also. "**यश्छन्दोऽधीते स: श्रोत्रियो भवति ।** भाष्ये '**छन्दोऽधीते' इत्यस्य वाक्यस्यार्थे श्रोत्रिय** इत्येत् पदं **निपात्यते**' इति वाक्यार्थे पद-वचन-पक्ष: । छन्दसो वा श्रोत्र-भावो निपात्यते 'तदधीते' इति एतस्मिन्नर्थे घंश्च प्रत्यय:' इति पक्षान्तरम् च स्थितम्"—*T.* Note also' जन्मना '**ब्राह्मणो**' ज्ञेय:, संस्कारै 'द्विज' उच्यते । विद्याभ्यासी भवेत् 'विप्र:', '**श्रोत्रिय**' '**त्रिभिरेव हि**'–*PP.* (उत्तरकाण्ड). *Ch. CXVI,* 'एकां शाखां सकल्पां वा षड्भिरङ्गैरधीत्य च । षट्-कर्म-निरतो विप्र: श्रोत्रियो नाम धर्मवित्'—*Dāna Kamalākara.* The idea of the sentence is :—A श्रोत्रिय though extremely compassionate cannot give up the performance of the *Vedic rites* which has devolved upon him by nature, simply because those are despised by the **पाखण्डी** and others. Similar is the case with my profession of killing fish. Now read —"The fisherman belonged to his **father's caste of profession.** This calling was looked upon with contempt on the one hand because fisherman killed fish—a sin which was essential to their calling and caste, and on the other

hand **because they stank.** But **Fishermen have also their pride,** and King's brother-in-law can find no agrument against his statement that he must carry on his **father's calling..** How can he, therefore, be to blame ? Kālidāsa was not **alone in his defence of the poor,** but it should be emphasised that a **poet who preaches such thought is to be highly respected" —Dr. Ruben.**

Text:—श्यालः—तदो तदो (ततस्ततः) ।

Superintendent—Then, what next ?

पुरुषः—एक्कस्सिं दिअसे खण्डशो लोहिअ-मच्छे मए कप्पिदे । जाव तस्स उदल-ब्भन्तले पेक्खामि दाव एशे महालदण-भाशुले-अंगुलीअए पेक्खिदे (एकस्मिन् दिवसे खण्डशो रोहित-मत्स्यो मया कल्पितः[1] । यावत् तस्य उदरा-भ्यन्तरे प्रेक्षे, तावत् एतत् महारत्न-भासुरमङ्गुलीयकं प्रेक्षितम्) **पच्छा इह से विक्कअत्थं दंशअन्ते एव्व गहिदे भाव-मिश्शेहिं** (पश्चादिह अस्य विक्रयार्थं दर्शयन्नेव गृहीतो भाव-मिश्रैः) । **मालेह वा कुट्टेह** वा अयं **शे आगम-वुत्तन्ते** (मारयत वा कुट्टयत वा अयमस्य आगम-वृत्तान्तः[2]) ।

Man—One day I cut[1] into bits a Rohita fish (*Cyprinus Rohitas*). Hardly had I looked into its maw, before I saw this rign sparkling with a precious gem. Afterwards (*while*) showing (*it round*) for sale here I was seized by Your Honours. Kill me or chop me, this much (is) the story[2] of its turning up.

श्यालः—(अङ्गुरीयकमाघ्राय) **जाणुअ, विस्स-गन्धी गोहादी मच्छबन्ध एव्व णिस्संसअं । अङ्गुलीअअ-दंसणं से विमरिसिदव्वं, ता एध, लाअ-उलं एव्व गच्छामो** (जानुक, विस्र-गन्धी[3] गोधादी[4] मत्स्य-बन्ध[5] एव निःसंशयम् । अङ्गुलीयक-दर्शनमस्य विमष्टव्यम्[6] । तदेत, राज-कुलमेव गच्छामः) ।

Superintendent (*Smelling the ring*)—Jānuka, (*this feller*)[2] stinking of raw flesh[3] is an iguana-eating[4] catch-fish[5] no doubt. The finding of the ring by him must be investigated[6]. So come, (*we*) will go even to the king's palace.

रक्खिणौ—तह ! (धीवरं प्रति) **गच्छ ले गण्ठि-भेदअ । गच्छ** (तथा । गच्छ रे ग्रन्थि-भेदक ! गच्छ) । (इति सर्वे परिक्रामन्ति) ।

Constables—As you say. (*To the fisherman*) Come on, you cut-purse, come. (*This said, all turn round*).

V. L.—'प्रेक्षे'—B. V. Others omit it. 'प्रेक्षितम्'—B. 'दृष्टम्' M.V. 'दृष्ट्वा'—R. S.; B. has 'महा' before 'रत्न', others omit it.

'कुट्टयत'—B.H.S. 'मुञ्चत'—R. V. M. S. 'अयमस्याऽऽगम-वृत्तान्तः'—R. V. M. 'इयमस्याऽऽगतिः'—S. 'एतावान् तावदेतस्य आगमः'—B. Hs. 'जालुक' is the reading of B for 'जानुक'। 'गोधादी'—B. R. V.' गोघाती—M. 'गोखादी'—S. S omits 'दर्शनम्' after 'अङ्गुलीयक'। 'तद् एत'—B, Omitted by others. 'ग्रन्थि-भेदक'—V.M. 'ग्रन्थि-च्छेदक'—B. 'गण्ड-भेदक'—R. 'गाण्ड-भेदिक'—S.

पुरुष इति। 'रोहित-मत्स्यः' मत्स्य-भेदः ('रोहितः शक्र-कोदण्डं, रोहितो मत्स्य-पुङ्गव' इति गदसिंहः) खण्डं खण्डमिति 'खण्डशः' (वीप्सायां शस्-५।४।४७)। 'कल्पितः' खण्डितः ('कल्पं कर्तनं क्लृप्तौ' इति विश्वप्रकाशः)। 'पश्चात्' रत्नावलोकनानन्तरम्। 'अस्य' अङ्गुरीयकस्य 'दर्शयन्' गुणान् दर्शयन्। मूल्याधिकलाभार्थं रत्न-वणिग्भ्यः रत्न-गुणादिकं सविस्तरं वर्णयन् इत्याशयः। 'कुट्टयत' खण्डशः कुरुत। ('कुट्ट छेदन-भर्तसनयोः'—२५९७)। **श्याल इति।** 'जानुक' इति द्वितीय-पुरुष नाम। 'विस्रस्य' आमगन्धिनः ('विस्रं स्याद् आमगन्धि यत्' इत्यमरः) 'गन्धः' अस्ति यस्य तादृशः 'गोधादी' निहाका-भक्षण-शीलः। (अत्र गोधा इत्यस्य **जातिवाचकत्वेऽपि** सुबन्तोपपदे णिनिः–(३।२।७८)-**कर्त्रविवक्षावशात्**। मत्स्यान् बध्नाति इति 'मत्स्य-बन्धः' ('कर्मण्यण्'–३।२।१) धीवर इत्यर्थः 'एवं' इत्यवधारणे। 'अङ्गुलीयक-दर्शनम्' अङ्गुलीयक-प्राप्ति-सम्बन्धो योऽयम् उदन्तः अनेन सम्प्रति वर्णितः स इत्याशयः। 'विम्रष्टव्यम्' एतत् सत्यं मिथ्या वा इति निर्णेतव्यम्। 'तत्' तेन हेतुना 'एत' आगच्छत। **रक्षिणाविति।** 'ग्रन्थि-' वस्त्रादिना धनस्य यत् बन्धनं तस्य 'भेदकः' छेदकः (भिदेः कर्तरि ण्वुल् (३।१।१३३); "पट-प्रान्तादि-स्थितं सुवर्णादिकं ग्रन्थि-मोक्षणेन य श्चोरयति स ग्रन्थि-भेदः" इति कुल्लुकभट्टः)।

186n.—1. ततस्ततः—(119n. 5). एकस्मिन् दिवसे— Proves that the fish was caught **not on that very day** (अद्य)—Vide (188n. 3). **2. रोहित**—A variety of voracious carp (*Cyprinus Rohitas*) abounding in the rivers of Bengal. "कृष्ण-शल्की श्वेत-कुक्षिस्तु मत्स्यो यः श्रेष्ठोऽसौ लोहितो वृत्तवक्त्रः। कोष्णं वल्यं रोहितस्यापि मांसं वातं हन्ति स्निग्धमृध्नाति वीर्यम्"—*RN*; Again. 'रोहितः सर्वमत्स्यानां वरो वृष्योऽर्दितार्तिजित्। कषाया-नुरसः स्वादु र्वातघ्नो नातिपित्तकृत्।। ऊर्ध्वजत्रुगतान् रोगान् हन्याद्रोहित-मुण्डकम्" ।।—*BhP*. **3. विस्र-गन्धी**—विस्र is a synonym of 'आम-गन्धि'—(*AK*). *i.e.* any thing having the smell of आम। Now what is 'आमः? 'आमः अपक्वः मलः'—*BhD*. 'इदं चिता-धूमादि-गन्धे अपक्व-मांस-गन्धेऽपि'—*Bharata*. 'विस्रम्' itself means 'आमगन्धि', hence

'विस्रगन्धी' requires justification. 'विस्रस्य' आमगन्धिनः 'गन्धः'=विस्रगन्धः *i. e. the smell of a thing which has the smell of* आम or in other words the smell of 'आम' । Next मत्वर्थे इनि–(5. 2. 115). On account of this cumbrous process its genuineness is doubted Cf. the following reading which is found in (B)- (अङ्गुलीयकमाघ्राय) जालुक, मत्स्यो-दराभ्यन्तर-गतम् इति नास्ति सन्देहो, यतोऽयम् आमिष-गन्धो वाति । **4. गोधादी**—'गोधा' or 'निहाका' is an 'iguana' *i. e.* a kind of big lizard. Cf. 'निहाका गोधिका समें'—*AK.* 'गो-साप इति भाषा । सातु स्थलज-जलज-भेदात् द्विविधा'—*Kalpa.* This is another instance of our *poet's* **deviation** *from Pāṇini's rule,* for **णिनि is not available after 'गोधा'** which is **indicative of genus.** Read 'अजातौ इति किम्? ब्राह्मणानां मन्त्रयित्वा'—*VM.* (3. 2. 78). *M,* however, prefers the reading **गोघाती** and notes **'गोघातिन्'** (**cow-killer**) is applied as a reproachful epithet to **any rogue or low person.** Thus in *(MK. X)*, the 'Candāla' is called **'गोह्'** or **'गोघ्न'** । **5. विम्रष्टव्यम्**- Deserves to be investigated; optionally **विमर्ष्टव्यम्** by 'अनुदात्तस्य च-र्दुपधस्याऽन्यतरस्याम्'—(6. 1. 59); "अनुदात्तोपदेश-ऋकारोपध-धातवो हि षट् । यथा सृप-तृप-दृप,-स्पृश-मृष-कृषः । तृप्—तर्पिष्यति तर्प्स्यति । मृष् लट् मर्क्ष्यति म्रक्ष्यति । लुङ अम्राक्षीत् अमार्क्षीत् अमृक्षत्"—**Prabhā.** **6. राजकुलम् &c.**—For the ring belongs to the king and if the finding of the ring be reported to him, new things may turn up, which possibly will corroborate the statement of the fisher-man. ('तद्यावदेतद्वृत्तं राज्ञे निवेदयावः'—MK. X) **7. ग्रन्थि-भेदक**— A cut-purse. Read 'अङ्गुलीः ग्रन्थि-भेदस्य छेदयेत् प्रथमे ग्रहे । द्वितीये हस्त-चरणौ, तृतीये वधमर्हति ॥—*MS.* IX. 277; 'उत्क्षेपक-ग्रन्थिभेदौ करसंदंश-हीनकौ'—*Y. Qtd KB.* This epithet shows that the consta- -bles have disbelieved his story. According to them he must have had it from some other's pocket.

Text:—श्यालः—सूअअ, इध गोपुर-दुआरे अप्पमत्ता पडिवालह मं, जाव इमं अंगुलीअअं जहा-गमणं भट्टिणो णिवेदिअ तदो सासणं पडिच्छिअ णिक्कमामि (सूचक, इह गोपुर-द्वारे[1] अप्रमत्तौ प्रतिपालयतं[2] मां, यावदिदम् अङ्गुलीयकं यथागमनं भर्त्रे निवेद्य ततः शासनं[3] प्रतीष्य निष्क्रमामि) ।

Superintendent—Sūcaka, here at the wicket[1] of the city-gate, you two await[2] me without heedlessness until having informed His

Majesty of this ring exactly as it turned up and having received (*His*) orders,[3] (*I*) return.

उभौ—पविशदु आवुत्ते शामि-पशादश्श

(प्रविशतु आवृत्तः स्वामि-प्रसादाय) (निष्क्रान्तः श्यालः)।

Both—Go in, Your Honour[4], to get our Lord's pleasure.

[*Exit Superintendent*]

सूचकः—जाणुअ, चिलअदि क्खु आवुत्ते (जानुक, चिरयति[5] खलु आवुत्तः)।

Sūcaka—Jānuka, our master in indeed delaying[5].

जानुकः—णं अवशलो-वशप्पणीया लाआणो

(ननु अवसरोपसर्पणीया[6] राजानः)।

Jānuka—Why, kings are to be approached[6] at (*their*) leisure[6].

सूचकः—जाणुअ फुल्लन्ति मे अग्ग-हत्था इमश्श वहश्श शुमणा पिणद्धुं

(जानुक, स्फुरतो[7] मे अग्र-हस्तौ[8] अस्य वधस्य सुमनसः[9] पिनद्धुम्[10])।

। (इति पुरुषं निर्दिशति)।

Sūcaka—Jānuka, the fore-part[8] of my hands[8] tingles[7] to fasten[10] the (*garland of*) flowers[9] for his execution.

(*This said, points to the man*).

पुरुषः—ण अलुहदि भावे अ-आलण-मालणे भविदुं

(नार्हति भावः अकारण-मारणो[11] भवितुम्)।

Man—It does not behove Your Honour to be a murderer[11] without (*any*) cause.

V. L.—'इह'—B. 'इमं'—R.S.M. 'पुरद्वारे'—V.M. 'गोपुरद्वारे'—B.R.S. 'मां'—B ; Omitted by others' प्रतीष्य'—B.V.M. 'प्रतीक्ष्य'—R. 'प्रतिगृह्य'—S. 'चिरायते'—R.V.S. 'चिरायति'—M 'चिरयति'—B.. HS. 'वधस्य सुमनसः &c".—R.V.M. 'वध्यसुमनसं &c'—S. 'व्यापादयितुम्'—B ; B reads 'अग्रहस्तौ for 'हस्तौ'। 'अकारण-मारणः'—B. V. M. S.. 'अकारण-मारणं भावयितुम्'—R. 'अकारण-मारकः'—B. HS.

श्याल इति। 'गोपुर-द्वारे' पुरद्वारे ("**पुरमात्रेऽपि गोपुरम्**" इति रत्नकोषः) 'अप्रमत्तौ'-(३।२।५७) अवहितौ सावधानौ इति यावत्,अन्यथा पलायेताम् इत्याशयः। मां 'प्रतिपालयतम्' युवाम् अपेक्षेथाम्। 'आगमनं' लक्षणया आगमन-वृत्तान्तम् अनतिक्रम्य 'यथागमनम्'। ततः मत्वर्थीयः अच् (अर्श आदिः। विस्तरस्तु कौमुद्यां द्रष्टव्यः-६७६) येन उपायेन अङ्गुरी धीवर-हस्त-गता, पश्चात् अस्माभिः प्राप्ता, तत् सर्वम् आमूलं'भर्त्रे' दुष्यन्ताय 'निवेद्य ततः' दुष्यन्तात् 'शासनम्' आदेशं 'प्रतीष्य' लब्ध्वा प्रत्यागच्छामि। **सूचक इति। चिरं करोति इति 'चिरयति'**

('तत्करोति तदाचष्टे'–इति गणसूत्रात् णिच्) विलम्बते (सविरागोक्तिरियम्)। [चिरायति' इति पाठस्तु चिन्त्यः]। **जानुक इति।** 'ननु' इति परमताऽऽक्षेपे। 'अवसरे' योग्ये काले, न तु यथेच्छया सर्वदैव, तेषाम् विविध-कार्य-व्यासक्तत्वात्। 'उपसर्पणीयाः' उपगम्याः। **सूचक इति।** 'वधस्य सुमनसः' वधकाले यानि करवीरादीनि पुष्पाणि वध्यस्य कण्ठे दीयन्ते ताः 'पिनद्धुं' परिधापयितुम् ('आमुक्तः प्रतिमुक्तश्च पिनद्धश्चापिनद्धवत्' इत्यमरः)। 'मम अग्रहस्तौ' हस्तयो रग्रभागौ **अङ्गुल्य इत्यर्थः।** ('हस्ताग्राऽग्रहस्तादयः गुण-गुणिनो र्भेदाऽभेदाभ्याम्' इति वामनः। चतुर्थाङ्के विस्तरेण व्याख्यातः) 'स्फुरतः' इत्यनेन त्वरा व्यज्यते। **पुरुष इति।** मारयति यः स **'मारणः'** हन्ता ('ण्यन्तात् मृ-धातोः **कर्तरि ल्युट् बाहुलकात्**) 'अकारणे' कारणं विना 'मारणः' (बाहुलकात् कर्तरि ल्युट्) हन्ता। ('ततः प्रविशति' इत्याद्येतदन्तेन **विद्रवण**-नामकमङ्गमुपक्षिप्तम्। **"विद्रवः** वध-बन्धादिः" इति दशरूपक-लक्षणात्)।

187n.—1. गोपुर-द्वारे—According to रत्नकोष, 'गोपुर' is a synonym of 'पुर' (Com.), while AK has 'पुरद्वारन्तु गोपुरम्' (*i.e.* city-gate); 'गोपुराणि प्रमथ्य च"—Rām. VI. 42. 18; 75.6; 38; Ki. V. 35. **2. अप्रमत्त**–प्रमत्त = (प्र + मद् + क्त)—'Heedless, 'negligent' Cf. 'मत्तं प्रमत्तमुन्मत्तं सुप्तं वालं स्त्रियं जडम्। प्रपन्नं विवशं भीतं न रिपुं हन्ति **धर्म**वित्'—*Bhāgabata*. 1. 7, where *Śrīdhara Svāmī remarks*—'**प्रमत्तम्** अनवहितम्', hence 'अप्रमत्त' is careful. **'द' is not changed into** 'न'–(Vide 116n. 8); Cf. 'स्वेषु स्थानेषु अप्रमत्तैः भवद्भिः र्भक्तिव्यम्'–MK. IV; 'अप्रमत्ताः स्वेषु गुल्म-स्थानेषु भवत'—VI; 'अप्रमत्तैः प्रवेष्टव्यम्'—Rām. IV. 43. 25; **3. यथागमनम्**—Exactly as it turned up to us. **4. मां प्रतिपालयतम्—प्रति + पा (णिच्)** means to **'to await'.** Cf. 'यावदेन मवलोकनमार्गे स्थितः **प्रतिपालयामि'**—*Vik. III.* 'छायामाश्रित्य **प्रतिपालयामि"**—Act **I**; * 'भवन्तं * **प्रतिपालयति** मधुकरी'—VI. 19; 'क्व पुर्नमां भवतः **प्रतिपालयिष्यन्ति'**—Vik. I; 'त्वमिह आस्थिता **प्रतिपालयिष्यति** Rat. III. 'तत्युक्तं कालं **प्रतिपालयितुम्'**—Śak. VII; (53n.4). प्रति + पालि' meanig '*to guard*' is Un-Kālidāsian. **5. प्रतीष्य**—प्रति + इष् + ल्यप्—Having taken or received (128n. 1); Read—"**इच्छति** ब्राह्मणैः" मङ्गम्, **अन्विष्यति** सतां गतिम्। **इष्णाति** धर्मकार्येषु यः सदोन्नतिमीषते" ।। —*KR*. 36. **प्रसादाय**—Because Śyāla is expected to get reward from the King for the recovery of the Royal ring. **6. चिरयति**—(To dealy), is preferable. Cf.

'कथं **चिरयति** पाञ्चाली'—VS.; I; 'मया त्वं **चिरयसि**'—Māla. III. 'सङ्केतके **चिरयति** प्रवरो विनोद:'—MK. III; 'कथं **चिरयति** वसन्तक:'—Rat III. **7.** **ननु**—Implies disapproval 'नन्विति परमताक्षेपानुशेषणा-पृष्ट-प्रतिवचनेषु'—*Dandanātha.* 'Don't you know that the kings cannot be approached whenever you like' ? One must bide the proper opportunity. Cf. 'प्रतिपाल्यावसर:'—(240n. 4) "त्वदीय-सेवाऽवसर-प्रतीक्षै:—Ku. IX, 9 ; "प्रणामावसरं प्रतीच्छन्"—Ibid XII. 26. **8. फुल्लन्ति मे अग्रहस्तौ वधस्य सुमनसः** &c.—अग्रहस्तौ = (*Fingers*). (118n. 3; 212n.*4*.). At the time of Kāli. the **penalty for stealing gems was an extreme one.** Cf. 'आत्मनो **वधमर्हता** क्वासौ विहग-तस्कर:'–*Vik V.* 1. This sort of Capital punishment was in vogue at the time of **मनु** and **आपस्तम्ब । याज्ञवल्क्य** does not prescribe any rigid rules and opines that death sentence may be inflicted, but in awarding such punishment, due consideration must always be given apropos of **time** and **place** of theft, and **age** and **health** of the culprit. **बृहस्पति**(1st. century A.D.) recommends that a fine shall be imposed either equal to or double the value of the property stolen, or the offender may be executed for the prevention of recurrent offence. Thus with the progress of time and civilization there is a gradual **tendency** towards the reducement of punishment from **death** to **fine.**

This certainly proves the antiquity of our poet. It may be noted that Dr. Keith and his supporters could not produce a **single instance to** show that a **thief was stentenced to death** in the **Gupta Period** for mere stealing a jewelled ring. Read also the statement of **FA Hsien.** (Introduction). Read. "पुरुषाणां कुलीनानां नारीणां च विशेषत: । मुख्यानां चैव रत्नानां हरणे **वधमर्हति**" ।।—*MS. VIII* 323; *IX*, 235-7; *XI*. 58. 'चौरं प्रदाप्यापहृतं घातयेत् विविधैर्वधै:—*Y. II* 270; 'एतच्च **उत्तम-साहस-दण्ड-प्राप्ति-योग्यो-त्तम-द्रव्य-विषयकम्**'—**विज्ञानेश्वर:** । Also (**188n. 1.**) Note also that in ancient times a person about to be executed was **garlanded** with flowers. Read 'तस्येयं मम मृत्युलोक-पदवी **वध्य-स्रग्** आवध्यताम्'—*MR. VII.* 4; '**रक्त-करवीरमाला** गृहीत आवाभ्यां वध्यपुरुषाभ्याम्'—*MK. X.* 2; '**पितृवन-सुमनोभिर्वेष्टितं** मे शरीरम्'—*X.* 3; *X.* 21; 'न्यस्तालक्तक-**रक्तमाल्य**-वसना **पाषण्ड-चाण्डालयो:**'—*MM. V.* 24. **9. अकारण &c.**—'मारण:' with ल्युट्

in the **active voice** (Cf. लोभनीय) means **'a killer'**. 'अकारणे मारण:'—(सहसुपेति समास:)—A killer without any cause.

Text:—जानुक: (विलोक्य) एशे अम्हाणं इश्शले पत्तहत्थे लाअ-शाशनं पड़िच्छिअ इदोमुहो देक्खीअदि। गिद्ध-बली भविश्शशि, शुनो मुहं वा देक्खिश्शशि (एष: अस्माकमीश्वर: पत्रहस्त: राज-शासनं प्रतीष्य इतोमुखो दृश्यते। गृध्र-बलि[1]र्भविष्यसि, शूनोमुखं[2] वा द्रक्ष्यसि)।

Jānuka (*Looking*)—Here our master, with a paper in hand, having received the royal mandate, is seen turning this way. (*Now*) you will be an oblation[1] to the vultures[1], or see the mouth[2] of a (*hungry*) cur[2].

(प्रविश्य) **श्याल:—सिग्घं, सिग्घं एदं** (शीघ्रं, शीघ्रम् एतम्) (इत्यर्धोक्ते)।
(*Entering*). Superintendent—Quickly, quickly, let this —(*This being half-uttered*).

पुरुष:—हा हदोम्हि (हा हतोऽस्मि) (इति विषादं नाटयति)।
Man—Ah ! I am done for. (*This said, acts sadness*).

श्याल:—सुअअ, मुञ्चेदु एसो जालोअजीवी। उववण्णो क्खु से अंगुलीअअस्स आअमो। (सूचक, मुच्यतामेष जालोपजीवी[3]। उपपन्नं[4]खलु अस्य अङ्गुरीयकस्य आगम:)। Superintendent—Sūcaka, let go (*this*) liver-by-nets[3] His finding of the ring is quite consistent[4].

सूचक:—जह आवुत्ते भणादि (यथावुत्तोभणति)।
Sūcaka—As Your Honour commands.

जानुक—जम-शदनं पविशिअ पडिणिउत्ते क्खु एशे (यम-सदनं प्रविश्य प्रति-निवृत्त: खल्वेष:)। (इति पुरुषं मुक्त-बन्धनं करोति)।
Jānuka—This (*feller*) getting into the house[5] of Yama[5] is come back (*This said, unlooses the fetters of the man*).

पुरुष:—भट्टा ! अह कोलिशे मे आजीवे (भर्त:, अथ कीदृशो मे आजीव:)। (इति पादयो: पतति)। Man—Now, My Liege, what is the means of my livelihood (*to-day*) ? (*This said, falls on his feet*).

श्याल:—उट्ठेहि, एसो भट्टिणा अंगुलीअअ-मुल्ल-सम्मिदो पालिदोशिओ दे प्पशादीकिदो। ता गेह्ण एदं [उत्तिष्ठ, एष भर्त्रा अङ्गुलीयक-मूल्य-संमितं[7] पारितोषिकन्ते प्रसादीकृतं, तत् गृहाण इदम्]। (इति पुरुषाय अर्थं प्रयच्छति)।
Superintendent—Get up, (*get up*). Here is a token of pleasure (*i. e.* a present), equal[7] to the value of the ring[7], has been kindly given to you by His Majesty. So take it.

(*This said, gives money to the man*).

पुरुषः (सहर्षं सप्रणामञ्च प्रतिगृह्य)—भट्टा! अणुग्गहिद म्हि (भर्तः अनुगृहीतोऽस्मि)।

Man—(*Gladly accepting with a bow*)-I am favoured, My Liege.

सूचकः—एशे णाम अणुग्गहे जे शूलादो अवदालिअ हत्थि-क्कन्धे पदिट्ठाविदे (एष नाम अनुग्रहः यत् शूलादवतार्य[८] हस्तिकन्धे प्रतिष्ठापितः[९])।

Sūcaka—This surely is a favour, that taken[8] down from the death-stake[8], you are put[9] on the shoulders of an elephant.

जानुकः—आवुत्त, पालिदोशिए कहेदि महालिह-लदणेण तेण अङ्गुलीअएण शामिणो बहुमदेण होदव्वं त्ति (आवुत्त, पारितोषिकं कथयति महार्ह-रत्नेन तेन अङ्गुलीयकेन स्वामिनो बहुमतेन भवितव्यमिति)।

Jānuka—Your Honour, the reward shows that the ring with its precious jewel must have been highly valued by our Lord.

V. L.—B reads—'ईश्वरः' for 'स्वामी'। 'पत्रहस्ते राजशासनं प्रतीष्य'—R. B. V. M. 'पत्रे गृहीत्वा' &c.—B. 'लेखपत्रे गृहीत्वा'&c.—S. 'प्रतीष्य'—R.V.M.S. 'प्रतीक्ष्य'—R. 'श्यालः—शीघ्रमेतम्' &c. and the following speech of पुरुष occur only in B.P. Dr. 'कीदृशो मे आजीवः'—R. B. V. M. 'साम्प्रतं तव क्रीतकं मे जीवितम्'—B. S. Ryder. 'उत्तिष्ठ'—B; Omitted by others. 'पारितोषिकन्ते प्रसादीकृतं'—B. 'प्रसादोऽपि दापितः'—R. V. M. '०दत्तः'—S. 'भर्त्तः'—R. B. V. S. 'भर्त्ता'—M 'पारितोषिकं कथयति'—B. V. M. 'परितोषं कथय'—R. 'राज्ञः परितोषं कथय'—S. 'महार्हरत्नेन'—B. Omitted by others.—'बहुमतेन'—B.V. 'संमतेन'—R. M.—'शर्मदेन'—S. 'भवितव्यम् इति'—B. Others—'इति'।

जानुक इति। 'राज्ञः शासनम्' आदेशं 'प्रतीष्य' गृहीत्वा 'इतः' अस्यां दिशि 'मुखं' यस्य तादृशः, अत्रागमने-प्रवृत्त इत्यर्थः। 'गृध्रेभ्यः बलिः' उपहारः ('बलि-दैत्यो-पहारयोः' इति हैमः। 'चतुर्थी तदर्थार्थ-बलि:—' (२।१।३६,६९७)-इति ४र्थी समासः) 'भविष्यसि' जीवन्नेव त्वं बद्ध-हस्त-पादः सन् गृध्रैः खाद्यसे। 'वा' इति पक्षान्तरे। 'शुनः' अलर्कस्य वात्तं 'मुखं' द्रक्ष्यसि। बद्ध-हस्त-पादः सन् कुक्कुरैः खाद्यसे इति गूढार्थः। **श्याल इति**। 'शीघ्रम्' इति त्वरायां द्विरुक्तिः। 'अस्य धीवरस्य (कर्तरि षष्ठी) अङ्गुलीयकस्य' (कर्मणि षष्ठी। **क्वचित् कर्तरि कर्मणि च युगपत् षष्ठी स्यात्**) 'आगमः' प्राप्तिः 'उपपन्नः' युक्तः। **पुरुष इति**। 'अथ' इति प्रश्ने। 'मे आजीवः' जीविका (**'आजीवो जीविका** वार्ता वृत्ति वर्तन-**जीवने' इत्यमरः**) 'कीदृशः' 'पूर्वं गतो मत्स्यो, गतश्चाऽङ्गुरीयकं, तदद्य केनोपायेन जीविकां करोमि' इति विद्यासागरचरणाः। नैतत् सोल्लुण्ठन-वाक्यम्)।

श्याल इति । 'अङ्गुलीयकस्य मूल्येन 'संमितं' तुल्यम् । 'प्रसादीकृतं' प्रसन्नतया दत्तम् । सूचक इति । 'प्रतिष्ठापित:' आरोपित: ['उपसर्गात् सुनोति—' (८।३।६५) इति षत्वम्] ।

188n.—1. गृध्रबलि &c.—In old times a culprit condemned to death, was impaled and his body was allowed to stand on the stake, until it was devoured by vulture and other birds. Some times the body of the culprit was cut to pieces and offered to the vultures. Cf. "अयं बालघाती पुन: स्वर्णस्तेयी च, **अमुं शतखण्डं कृत्वा अस्य मांसेन गृध्राणां बलि: दातव्य:**"—*DP*, *story IV*. 'अर्धं कलेवरं प्रतिवृत्तं कर्षन्ति दीर्घ-गोमायव: । अर्धमपि शूल-लग्नं वेश इवाट्ट-हासस्य— MK. X. 35. Sometimes the criminal was buried in the ground up to the shoulder and the upper-half was allowed to be eaten by hungry dogs. **शुन: मुखम् &c.**—"आकर्षन्तु सुबद्धं नं श्वभि: संखाद्यतामथ । शूले वा तिष्ठतामेष पाठ्यतां क्रकचेन वा ।।"—*MK. X.* 53; "तर्हि श्वभि: खाद्यताम्"—*MK. X;* Cf. "Let **vulture** gripe thy grotto"—**Merry Wives of Windsor.**—*I.* 3. "Let **vultures** vile seize in his lungs also"—**Henry** *IV. part* 2; *V.* 3. "I will rend an oak And peg thee in his knotty entrails"—**Tempest.** 1. 2; "I will have thee hanged **to feed the crow"—Lay of the Last Ministrel.** *III. l* 249. "*Dr. Boehtlingk* has adopted an amendation **'शिशुनो मुहम्'** *i.e.* (**शिशोर्मुखम्**) and translated—'*or thou will see the face of* (*thy*) *child* (*once more*)'. He has supported the interpretation by a reference to two other passages, one in Act VII of this play (पुत्र-मुख-दर्शनेन), another in *MK* (*P.* 303, 1. 4. *Cu. Ed.*). Doubtless 'पुत्रमुख दृश्' is a common phrase, but the whole point of this passage seems to me to lie in the **ludicrous substitution** of 'शुन:' for **'पुत्रस्य'—M. 2. अस्य अङ्गुलीयकस्य आगम:**–(अस्य) has 'कर्तरि षष्ठी', while ('अङ्गुलीयकस्य') has 'कर्मणि 'षष्ठी in connection with the कृत् in 'आगम:', in spite of ('उभय-प्राप्तौ, कर्मणि'-2.3.66.). Read 'विचित्रा **जगत: कृति: हरे: हरिणा वा"** । "केचिद् (*VM*) **अविशेषेण विभाषाम्** इच्छन्ति । **शब्दानाम्** अनुशासनम् **आचार्येण आचार्यस्य वा**"—SK. 624. **यम-सदनं**—The house of Hindu Pluto, or Minos. **3. कीदृशी मे आजीव:**—The idea is:—I am but a poor fisherman living from hand to mouth by catching and selling fish. The **other** day (186*n.* 1) I had caught a big carp

and got a ring in its maw. The fish I sold in the market and with its price I lived for some days. Then with the valuable ring in possession I did not want to go to fish for a few days, as it would bring me a large sum in exchange. Now that the ring is taken by the king, I am at a loss for the maintenance of my family *today*—(V). M and his followers take it as a **return-taunt** of the fisherman to 'श्याल' for his remark—'विशुद्ध इदानीमाजीवः' । But this does not **harmonize** with the previous and the following speeches of the fisherman and 'श्याल' । With the other reading (B), translate "You've ransomed me life"—*Robi Datta*. **4. अङ्गुलीयक-मूल्य** &c.—Equal to the value of the ring. **सम्मित**—Similar, equal. Cf. 'सद्यः परनिर्वृत्तये कान्ता-**सम्मिततयो**-पदेशयुजे"—*KPr.* 'कुमारजन्मामृत-**सम्मिताक्षर**म्'—*Ra. III.* 16. '**मूलेन आनाम्यम् इति मूल्यम्** । 'नौ-वयो-धर्म—(४।४।९१) इति यत्—*BhD.* 'आनाम्यम्' means 'अभिभवनीयम्'—What ought to be **overpowered,** hence' मूल्यम्' means 'the price, worth, cost', because articles like 'cloth's &c are produced by the outlay of stock or capital (**मूल**), '*price*' being a thing which, because it is capital plus profit, is **superior** to capital, and thus **by 'price'** or **'मूल्यम्'** the **'capital' or 'मूल' is overpowered'**—*S. C. Vasu (SK).*"**मूलं** नाम पटादीनामुत्पत्त्यर्थं वणिग्भि **विनियुक्तं द्रव्यं** । तेन **स्वस्मादतिरिक्तं लाभाख्यं** यद्द्रव्यम् आत्मान प्रति शेषीक्रियते, आत्मन उपकारकं क्रियते तत् **आनाम्यम्** । * * तथा **चानाम्यम् अभिभवनीयम्** आत्मानं प्रति शेषीकर्तव्य स च **लाभाख्यो भाग** एव । लोकेषु यावता द्रव्येण पटादिकं विक्रीयते तत्रैव समुदाये **मूल्यशब्दः** प्रसिद्धः, न तु **मूलातिरिक्त-भागमात्रे व्युत्पादितः** ।"—*T.* **5. हस्तिस्कन्धे**—Mounting on an 'elephant' (also on horse, Cf. 'गज-स्कन्धेऽश्वपृष्ठे च—*Rām.*) denotes elevation to high dignity, elephants being used in triumphal processions—*M.* **6. पारितोषिकम्**—(*Masculine* and *Neuter*). परितोष+ठञ् by 'प्रयोजनम्'—(5. 1. 109). Cf. 'गृह्यता **पारितोषिकमिदमङ्गु**लीयकम्'—*MK.* V. 'अहमपि चन्द्रशेखर-शरासनारोपण-प्रथमवादिनः **पारितोषिकं** धारयामि'—*Murāri*

Text :—श्यालः—ण तस्सिं महारुहं रअणं भट्टिणो बहुमदं त्ति तक्केमि । तस्स दंसणेण भट्टिणो कोवि अभिमदो जणो सुमराविदो । जदो मुहुत्तअं पकिदि-गम्भीरो वि पज्जस्सु-णअणो आसि (न तस्मिन् महार्हं रत्नं भर्तुः बहुमतमिति'

तर्कयामि । तस्य दर्शनेन भर्त्तुः कोऽपि अभिमतो[1] जनः स्मारितः[1] । यतो मुहूर्तं प्रकृति-गम्भीरोऽपि[4] पर्यश्रु-नयन[5] आसीत्) ।

Superintendent—Methinks (*it is*) not the precious jewel there on, that was much[1] valued[2] by His Majesty. At the sight of it, our Lord was reminded[3] of some beloved[3] person. Since though[4] naturally grave[4], for a time his eyes were flowing with tears[5].

सूचकः—शेविदं णाम आवत्तेण (सेवितं नाम आवुत्तेन) ।

Sūcaka—Surely (*great*) service has been done (*to His Majesty*) by Your Honour.

जानुकः—णं भणाहि । इमस्स कए मच्छ-सत्तुणो त्ति ।

(ननु भण । अस्य कृते मत्स्य-शत्रोरिति) ।—(इति पुरुषमसूयया पश्यति) ।

Jānuka—Better say, to this fish-killer

(*This said, sees the man with spite*).

पुरुषः—भट्टालक ! इवो अद्धं तुम्हाणं शुमणो-मुल्लं होदु ।

(भट्टारक, इतः अर्धं युष्माकं सुमनो-मूल्यं भवतु) ।

Man—Sir, let half from this be the price of flowers for you.

जानुकः—एत्तके जुज्जइ (एतावद् युज्यते) ।

Jānuka—That's what should be.

श्यालः—धीवर, महत्तरो तुमं पिअ-वअस्सओ दाणिं मे संवुत्तो । कादम्बरी-सक्खियं अम्हाणं पढ़म-सोहिदं इच्छीअदि । ता सोण्डिआवणं एव्व गच्छामो ।

(धीवर, महत्तरस्त्वं प्रियवयस्यक इदानीं मे संवृत्तः । कादम्बरी[6] साक्षिकमस्माकं [8]प्रथम-सौहृदमिष्यते । तत् [9]शौण्डिकाऽऽपणमेव गच्छामः) ।

Superintendent—Fisher-man, noble as you are, you have become a beloved friend of mine. Let us seal our first[8] friendship[8] over (*a peg*) of brandy[7]. So let's go along to a vintner's shop.

सर्वे—तह (तथा) । (निष्क्रान्ताः सर्वे) ।

All—Right ho ! (*Exeunt Omnes*)

॥ प्रवेशकः ॥

(*End of the Induction*)

V. L.—'भर्तुरभिमतः जनः स्मारितः'—R. B. V. 'स्मृतः'—M. 'किमपि अभिमतं भर्तुः स्मृतम्'—S. 'पर्यश्रुनयनः'—V.K. 'पर्युत्सुक-मनाः'—M.S.B. 'पर्युत्सुकनयनः'—R. 'मत्स्य-शत्रोः'—K.B.P. 'मातृसिक-भर्तुः'—R. 'मत्सिका-भर्तुः'—M. 'सुमनोमूल्यम्'—R.V.M.S. 'सुरामूल्यम्'—B.P.HS. 'कादम्बरी-साक्षिकम्'—B. V. M. S. 'कादम्री-सखित्वम्'—R. 'सौहृदम्'—B. V. M. S. 'शोभितम्'—R. 'शौण्डिका-पणम्'—R. M. V. 'शौण्डिका-लयम्'—B.

'शुण्डिका-भवनम्'—S 'सर्वे—तथा'—only M., 'अङ्कावतारः' for 'प्रवेशकः—B. SD. HS. 'तृतीयः प्रवेशकः'—R's. Com.

श्याल इति। 'अभिमतः जनः' प्रियो व्यक्तिः। 'प्रकृत्या' स्वभावेन 'गम्भीरोऽपि' परिगतानि अश्रूणि' ययोः ते 'पर्यश्रुणी' बाष्पाकुलिते इत्यर्थः, 'नयने' यस्य तथाभूतः। प्रकृति-गम्भीरस्य सबाष्पत्वात् शोकातिशयो व्यज्यते। **सूचक इति।** 'नाम' इति अभ्युपगमे। 'सेवितं' प्रियजनस्य स्मरणं विधाय सन्तोषितः। **जानुक इति।** 'ननु' इति परमताक्षेपे।('**नन्विति परमताक्षे**पाऽनुज्ञैषणापृष्ट-प्रतिवचनेषु' इति दण्डनाथः)। 'मत्स्य-शत्रोः' धीवरस्य 'कृते' निमित्ते। तस्य उपकाराय च आवृत्तेन सेवितम्। धन-लाभस्तु एतन्निष्ठ इति, सेवनञ्च एतदर्थमेव जातम् इत्याशयः। इदानीं पारितोषिकस्य किञ्चिदंशं दत्त्वा अस्मान् परितोषय इति बोधयितुम् 'असूयया पश्यति'। **पुरुष इति।** 'सुमनो-मूल्यं' इति **विनयोक्तिः** (अद्य भवान् एव मे प्राणरक्षक अतएव पूज्यः। पुष्पाणि च पूजनीयस्य मुख्योपकरण-साधनानि। तेषां च इह समवायो न विद्यते। अतः राज-प्रसाद-लब्ध-धनस्य युष्मत्-पूजार्थानां पुष्पाणां मूल्यं भवतु। पूजादिकाले हि पूजोपकरणेषु यस्य कस्यचिद् असद्भावो भवति रजत-काञ्चनादिकं तन्मूल्यतया परिकल्प्यते। यथा गोमूल्यं काञ्चनम् इति विद्यासागरचरणाः)। **श्याल इति।** 'प्रियवयस्यक' इत्यत्र स्वार्थे कन्। 'प्रथमं सौहृदं' सख्य-स्थापनं (**सौहृद**मिति एतत्तु विस्तरेण व्याख्यानं प्राक्)। 'कादम्बरी' मद्य-विशेषः 'साक्षि' ('सामान्ये नपुंसकम्', वाः—८२१) यस्मिन् तादृशं (ततः स्वार्थे कन्)। '**मैत्रादि अग्नि-साक्षिकं क्रियते इति प्रसिद्धिः। पाना-सक्तानां तु मदिरा-साक्षिकम्**' इति विद्याम्बुधिपादाः। 'शुण्डा' सुरा पण्यमस्येति "शौण्डिकः" ('तदस्य पण्यमि'ति ठक्—४।४।५१, "शुण्डा पान-गृहे मता। अम्बु-हस्तिनि वेश्यामु हस्ति-हस्त-सुरासु च" इति मेदिनी।। 'शौण्डिकाऽऽपणं' मद्यपान-गृहम्। **प्रवेशक इति।** प्रवेशक-लक्षणं यथा—'तद्वदेवाऽनुदात्तोक्त्या नीच-पात्र-प्रयोजितः। **प्रवेशकोऽङ्कद्वयान्तः** शेषार्थस्योपसूचकः। हीनाभ्यामेव पात्राभ्याम् अङ्कादौ यः प्रवर्तते। **प्रवेशकः** स विज्ञेयः शौरसेन्यादि भाषया"। अङ्क-द्वयान्त इति **प्रथमाङ्कस्य आदौ अन्तिमाङ्कस्य अन्ते** च अस्य प्रनिषेधः।

189n.—1. **न तस्मिन् महार्हे** &c.—Cf. 'रत्नमिति न मे तस्मिन् मणौ प्रयामो विद्म क्रमाक्षिप्ते। प्रियया तेनास्मि मखे सङ्गमनीयेन सङ्गमितः'—*Vik.V.*3. **पर्यश्रु**—A very common expression. Cf. 'पर्यश्रुनयनो दुःखात्'—*Rām. II.* 90. 14; *Ki. III.* 37. *Mahā. Śānti.* 6; *Vana.* 151. **2.** **असूयया** &c.—The envious eying of the police officer, suggests that as their master has done good to the fisherman, so he also in his turn should please them by giving a portion from the king's gift. This practice amongst the

policemen is seen even in these days. The **man understands the insinuation of Jānuka,** and at once proposes to give something *out of fear*. **3. मत्स्य-शत्रो:**—Most of the Devanāgara Mss. read मत्सिका-(भर्तु:) which does not occur in any lexicon. R's 'मात्स्यिका भर्तु:' means 'for the sake of the chief of the fisherman'. 'ठक्' comes in by 'पक्षि-मत्स्य-मृगान् हन्ति' (4. 4. 35). **4. सुमनोमूल्यम्**—(97n. 3). The idea is—You have saved my life. I ought to worship you with flowers ("पुष्पफलेन चान्ये प्रानर्चु:"–*BK. II.* 20). But these being not at hand, let me give you something as the price of flowers (*Com*). *M* takes this speech **ironically** alluding to the **flowers of death** which the constables wanted to tie round his neck before taking him to the gallows. This seems to be absurd in this situation. N's **'सुरा-मूल्यम्'** is also **equally good,** as almost immediately after this they all went to a grog shop. "*Take half of it, masters, to pay for something to drink*"—*Ryder*. **5. महत्तर** &c. —Mark the *change of tone* of the Police-Superintendent who is now actuated by self-interest. This is the peculiar trait of police officers almost everywhere. **6. कादम्बरी** &c.—'कादम्बर' or 'कादम्बरी' is a spirituous liquor distilled from *Kadamba flowers*. 'कादम्बरं **कदम्ब-पुष्पोद्भव**-मद्यम्—*Kalpa*. Here it means wine in general Read 'कादम्बरी-शर्कराजादि-मद्यं सुशीतलं वृष्यकरं मदाढ्यम्'—*RN*. कुत्सितम् अम्बरम् [2. 2. 18.]=कादम्बरम् [कु=कद् (6. 3. 101)]. कदम्बरं (नीलाम्बरम्) अस्य अस्ति इति कदम्बर+अच् ('अर्श आदिभ्योऽच्'—(5.2. 127).]=**कदम्बर:** *i.e. Bala-Rāma* who wore blue robes. कदम्बरस्य इयम् इति कदम्बर+अण्" [4. 3. 120]=कादम्बरी—[ङीप् 4. 1. 15].– Or, **कदम्बे जात: रस:** । 'तत्र जात:' [4. 3. 25] इति अण् । कदम्बं राति इति क:—[3. 2. 3.] । गौरादित्वात् ङीष् [4. 1. 53]—*BhD*. साक्षात्+इनि निपातने=**साक्षिन्** ['साक्षात् द्रष्टरि संज्ञायाम्'—5. 2. 91] —a witness, as in 'फलं **तप: साक्षिषु**'—*Ku. V.* 60; *VIII.* 83, (Now Com.). Cf. **'अग्नि-साक्षिक** इवातिसृष्टवान्'—*Ra. XI.* 48. 'पञ्चवाणाग्नि-**साक्षिकम्**'—*Māla. IV.* 12. **7. शौण्डिका-पणम्—**शुण्डा मदिरा (*Medini*) अस्य पण्यम् इति शुण्डा+ठक्=शौण्डिक: ['तदस्य पण्यम्'— 4.4.51]—a vintner('शुड़ी' इति भाषा)—*Kalpa*). **"ततो गान्धिक-कन्यायां**

कैवर्ताद् एव शौण्डिकः । कैवर्तस्य च कन्याया शौण्डिकादेव शौचिकः" ॥ —*Parāśara-padhati.* आ समन्तात् पणायन्ते अत्र, पणन्ते अत्र वा । पण् व्यवहारे । आ+पण्+घ=आपण: by ['गोचर-संचर'—&c. (3. 3. 119)]— A shop—*BhD.* **8. प्रवेशकः**—According to Ś and K, there is **no difference between 'प्रवेशक' and 'विष्कम्भक'** (82*n.* 11). Cf. 'विष्कम्भक इति सुव्यक्तः प्रवेशक इति स्मृतः"—*K.* 'प्रवेशक एव विष्कम्भकः'—Ś. But the authorities on Dramaturgy make प्रवेशक always an **interlude** and never a **prelude,** and thus it cannot come in the beginning of the 1st Act or at the end of the last Act. Besides प्रवेशक must have one or more **नीच** characters, while विष्कम्भक has **मध्यम** characters only.

Remark—The above dialogue has been termed **'अङ्कावतार'** (Descent of an Act) by (B), supported **by an authority like VK.** Read "अथ **अङ्कावतारः** ॥ अङ्कान्ते सूचितः पात्रैः स्तदङ्कस्याविभागतः। यत्राङ्कोऽवतरत्येषोऽङ्कावतार इति स्मृतः ॥ यथा **अभिज्ञाने पञ्चमाङ्के पात्रैः सूचितः । षष्ठाङ्कस्तदङ्कस्याङ्ग-विशेष इवावतीर्णः**"—SD. VI.—"When an Act, hinted by persons at the end of the preceding Act, is brought in continuity with the latter is called **Descent of an Act**"—Ballan--tyne. Also DR of *Dr. Haas*. The present dialogue gives an insight into the social condition of the days of Kāli. The then police, ***the high officers*** even not being exempted, were mostly uneducated and they generally used to belabour the accused, exactly as is done by **the present-day police, for extracting** the required confession. Bribe was frequently offered to hush up the police. Men of low classes were **addicted to drink** and they frequented the **dram-shops.** The penalty for **theft was an extreme** one, and the condemned man was impaled or eaten up by vultures or hungry curs. Buddhism was slowly progressing in the country denouncing the animal sacrifices performed by the followers of Vedic religion. (Now cf. **Fa Hsien's** account of the Gupta period—Introduction p. XXXV).

Text:—(ततः **प्रविशत्याकाश-यानेन** सानुमती नामाप्सराः) ।

सानुमती—णिव्वत्तिदं मए पज्जाअ-णिव्वत्तणिज्जं अच्छरा-तित्थ-सण्णिज्झम् जाव साहु-जणस्स अभिसेअ-कालो, त्ति संपदं इमस्स राएसिणो उदन्तं पच्चक्खीकरिस्सं (निर्वर्तितं[1] मया पर्याय-निर्वर्तनीयम्[2] अप्सर-स्तीर्थ-सान्निध्यं[3] यावत् साधु-जनस्याऽभिषेक-काल, इति साम्प्रतमस्य राजर्षेः उदन्तं[4] प्रत्यक्षीकरिष्यामि) । **मेणआ-**

संबन्धेण सरीर-भूदा दाणीं मे सउन्दला। ताए अ दुहिदु-णिमित्तं सन्दिट्ठ-पुव्व-म्हि (मेनका सम्बन्धेन शरीर-भूता[5] इदानीं मे शकुन्तला, तया च दुहितृ-निमित्तम्, सन्दिष्ट-पूर्वास्मि)। (समन्तादवलोक्य) **किं णु क्खु उदुच्छवे वि णिरुच्छवा-रम्भं विअ राअ-उलं दीसइ। अत्थि मे विहवो पणिधाणेण सव्वं परिण्णादुं। किंदु सहीए आदरो मए माणइदव्वो** (किं नु खलु ऋतूत्सवेऽपि निरुत्सवाऽऽरम्भमिव[6] राज-कुलं दृश्यते। अस्ति मे विभवः[7] प्रणिधानेन[8] सर्वं परिज्ञातुम्। किन्तु सख्या आदरो[9] मया मानयितव्यः[10])। **होदु। इमाणं एव्व उज्जाण-पालिआणं तिरक्खरिणी-पडिच्छण्णा पस्स-परिवत्तिणी भविअ उवलहिस्सं** (भवतु। अनयोरेव उद्यान-पालिकयोः तिरस्करिणी-प्रतिच्छन्ना[11] पार्श्व-परिवर्तिनी भूत्वा उपलप्स्ये[12])।

।[1] (इति नाट्येनाऽवतीर्य स्थिता)॥

(*Enter a nymph named Sānumatī in an aerial car.*)

Sānumatī—(*Close*)-attendance[3] at the *Nymphs' shrine*, which has[2] to be observed in regular rotation[2], while holy-men's ablution-time lasts, has been performed[1] by me. So at present, this Royal-sage's action[4], (*I*) will ascertain with (*my*) own eyes. Owing to her relations with Menakā, now one[5] with my (*own*) body[5] (*is*) Śakuntalā. (*I*) have already been asked by her (*to do someting*) for her daughter's sake. (*Looking around*) Why indeed is it that even in the (*vernal*) festival, [6]no preparation (*for celebrating the*) festivities[6] appear in the royal mansion ? I have the (*mystic*) power[7] to ascertain all by means of meditation[8]. But my friend's (*earnest*) request[9] has to be honoured[10] by me. Well, even out of these garden-tending-maids, myself concealed[11] by the veil of invisibility[11], (*constantly*) keeping near them, I'll know[12] (*everything*).

(*Having acted descent, stands*).

V. L.—'शरीरभूता'—R. B. V. शरीरभूतेदानीम्'—M. S. 'उपस्थितोत्सवे'—B. 'ऋतूत्सवे'—R. V. M. 'उत्सवे'—S ; Sir Jones, P, Ryder following (B), read 'मिश्रकेशी' for 'सानुमती'। 'अक्षमाला'—Dr.

सानुमतीति। 'पर्यायेण' वार-क्रमेण परिपाट्या इति यावत्। ['पर्यायस्तु प्रकारे स्यात् निर्माणेऽवसरे क्रमे' इति विश्वः] 'अप्सर-स्तीर्थस्य' तन्नामक-प्रसिद्धस्य-तीर्थस्य 'सान्निध्यं' तत्रोपस्थितिः 'निर्वर्त्तनीयम्' सम्पादनीयम्। तत्र साधूनां स्नान-समये एकैकस्मिन् दिवसे एकेकया अप्सरसा स्थातव्यम् इति नियमः अस्ति। स त्वद्य मया सम्पादितः अर्थात् मत्पर्यायः समाप्तः। 'इति' अस्माद् हेतोः 'साम्प्रतम्' इदानीं 'राजर्षेः दुष्यन्तस्य 'उदन्तं' वार्ता ('उदन्तः साधु-वार्तयोः' इति भानुजि-धृत-कोषः) 'प्रत्यक्षीकरिष्यामि' स्वाक्षिभ्यां द्रक्ष्यामि। 'मेनका-सम्बन्धेन' मेनकायाः

दुहितृत्वात् इत्यर्थः। 'शकुन्तला मे' मम अशरीरं शरीरं भूता इति 'शरीर-भूता' ['श्रेण्यादयः कृतादिभिः' (२।१।५९ ; ७३८) इति समासः। **श्रेण्यादिषु च्व्यर्थ-वचनं कर्त्तव्यम्'** इति कात्यायनः। **'श्रेण्यादि राकृतिगणः" इति शाकटायनः।** विस्तरस्तु चतुर्थाङ्के द्रष्टव्यः) 'दुहितृ-निमित्तं' शकुन्तलार्थं, पूर्वम् सन्दिष्टा 'संदिष्ट-पूर्वा' (इति सहसुपेति समासः। **'भूतपूर्वे चरट्'** (५।३।५३) इति निर्देशात् पूर्व-शब्दस्य पर-निपातः पाक्षिकः। 'किं नु' इति वितर्क-गर्भः प्रश्नः। 'खलु' इति निश्चये। 'ऋतौ' प्रकरणात् वसन्त-काले य 'उत्सवः' काम-देवमुद्दिश्य स 'ऋतूत्सवः' मदनोत्सवः तस्मिन् आगते अपि (६६४) 'निर्गतः 'उत्सवस्य आरम्भः' यस्मात् तथाभूतम् उत्सव-शून्यं 'राजकुलं' नृपभवनं [**"कुलं** जनपदे गोत्रे सजातीय-गणेऽपि ज। **भवने** च तनौ क्लीबम्" इति मेदिनी]। 'प्रणिधानेन' चित्तैकाग्र्येण [इति रघुटीकायां (१।७४ ; ८।१५) मल्लिनाथपादाः। 'प्रणिधानं प्रयत्ने स्यात् समाधौ च प्रवेशने' इति मेदिनी]' 'विभवः' सामर्थ्यम्। 'सख्याः' शकुन्तलायाः (कर्तरि षष्ठी) 'आदरः' प्रणयेन कृतः अनुरोधः 'मया मानयितव्यः' रक्षणीयः। तस्याः अनुरोधेन एवाहं राज्ञःवृत्तान्तं स्वयं गत्वा **प्रत्यक्षतः न तु प्रणिधानेन** ज्ञास्यामि इत्याशयः। 'तिरस्करिण्या विद्यया' यत्-प्रभावेण अपरैः अलक्षित-विग्रहः सन् सर्वम् अवेक्षितुं शक्तो भवति जनः, तादृश्या अदृश्यता-जनिकया विद्यया 'प्रतिच्छन्ना' अलक्षित-देहा सती। 'पार्श्व-परिवर्तिनी' निकटस्था भूत्वा 'उपलप्स्ये' राजवृत्तान्तं ज्ञास्यामि। **नाट्येनेति**। 'अवतीर्य' अर्थात् गङ्गावतरणेन। तल्लक्षणं यथा— "अङ्ग्रुत्क्षेप-निक्षेपावनुप्रोन्नत-सन्नतौ। भजेतां विपताकौ चेदवमेव शिरस्तदा॥ **गङ्गावतरण**मिति'। ('निर्वर्तितम्' इत्यादिना एतदन्तेन सानुमत्याऽऽत्मश्लाघायाः कृतत्वात् **'विचलन'**-नामाङ्ग-मुपक्षिप्तम्। तल्लक्षणमुक्तं धनञ्जयेन **यथा**— 'विकत्थनं **विचलनम्'** इति)।

190n.—1. आकाश-यानेन—याति अनेन या+ल्युट् करणे=यानम्—**A passage or a vehicle**; 'यानं स्याद् वाहने गतौ'—Medinī; Cf. 'देवयान'' 'पितृयान'। आकाशस्य आकाशे वा यानम्—A heavenly path or a passage through the celestial region. The nymphs had the power of flying though the sky. Cf. 'ततः प्रविशति आकाश-यानेन उर्वशी चित्रलेखा च'; 'सिद्धमार्गम् अवगाह्' &c.—*Vik*. 1. **2. पर्याय** &c.—परि+इ+घञ्= **पर्याय**—Regular order, succession.——'परौ अनुपात्यय इणः'–(3.3.38) इति घञ् 'पर्यायेण प्रसुप्तश्च ममाङ्के भरताग्रज'—Rām. V.38.21. **'व्यतिक्रमार्थे'** जय-**विपर्ययः**। 'काल-**विपर्ययः'**—*Prabhā*. The celestial nymphs who were the Guardian Deities of the *Nymphs' shrine*, had to be here by rotation so long as it was the bathing time for the

sages, or (for **Kuvera**—'साधु-जनस्य देवलोके वार्धुषिक-रुपस्य **कुबेरस्य**'—**HS**). **यावत्**—is indicative of limit inclusive. **सान्निध्यम्**—Here denotes 'presence', 'close attendance' Cf. 'अनुजीविना **सान्निध्यम्** अवश्यम् करणीयम्'—*Hit.* 'परिकल्पित-**सान्निध्या**'—*Ra. IV.* 6; *VII.* 3. *Ku. VII.* 33. In *Vik.* the word **'उपस्थान'** occurs exactly in the same sense. Cf. 'चित्रलेखा—सखि, अप्सरो-**वार-पर्यायेण** इह भगवतः सूर्यस्य **पाद-मूलोपस्थाने** वर्तमाना' &c.—*Vik. IV.* **3. इति**=अस्माद् हेतोः । Now that I have observed my duty and am free from occupation. **4. मेनका-सम्बन्धेन**—Either because `Śak. is **related to** Menakā, an अप्सरा, or because of my *friendhship* with मेनका । **सम्बन्ध**—Either **relation** or **friendship.** For the *latter sense,* Cf. 'संबन्ध-माभाषण-पूर्वमाहुर्वृत्तः स नौ सङ्गतयोर्वनान्ते'—*Ra. II.* 58; 'संबन्धं सख्यम्'—*MN* **5. शरीर-भूता**—Cf. 'शरीरमस्ति मे'—; Māla; (66n. 6; 141n. 3; 82n. 9). **6. किं नु** &c.—As to the preparation of **ऋतूत्सव** (= **मधूत्सव**—Vide 193n. 2), I am sure (**खलु**) there in none, but what may be the cause of it (**किं नु**)—(45*n* 1). **7. अस्ति मे** &c.—By प्रणिधान (Deep Concentration) the sages can know the past or the future—'सोऽपश्यत् प्रणिधानेन सन्ततेः स्तम्भ-कारणम्'—*Ra.* 1.74; "**प्रणिधानात्** * * विजज्ञिवान्"—*VIII.* 75. *Rām. III.* 13. 12; *Patañjali's Yoga-Sūtra, Ch. III* 50. The celestial nymphs were also endowed with that power. Read 'मया **प्रणिधान**-स्थितया अत्याहितम् उपलब्ध सख्याः'— *Vik. IV*; 'जाने **प्रणिधानत स्त्वां**'—Ra. XIV. 72. **8. सख्याः** &c.—Refers to the request of **शकुन्तला—(HS), and not of मेनका**—(R); for throughout Act VI, **Sānumatī refers to Śak. as सखी** । Cf. 'असशयम् प्रिय**सखीमेव**'; यो यो प्रदेशः प्रिय**सख्याः**' &c.—infra. **9. तिरस्करिणी** &c.—तिरस्करोति इति तिरस +कृ+णिनि कर्तरि स्त्रियाम् [by 'नन्दि-ग्रहि-पचादिभ्यः&c.' (३।१।१३४) =तिरस्करिणी । The वृद्धि (7.3.115) is barred by 'संज्ञापूर्वको विधिः अनित्यः'-(2547)—BhD. निपातनाद्वा ।। "तिरस्क्रियतेऽनया इति करणे ल्युट्—(३।१।११७)—'तिरसोऽन्यतरस्याम्' (८।३।४२ ; १५६) इति सत्वम्—*MN*]. Ordinarily **'तिरस्करिणी'** means a veil or curtain. Also "तिरस्कारिणी"—SK. Cf. 'दरी-गृह-द्वार-बिलम्बि-बिम्बाः **तिरस्करिण्यो** जलदा भवन्ति'—*Ku,* 1. 14. 'व्यवसितमिव मे **तिरस्करिणीम्**—*Māla. II.*

1. According to M 'तिरस्करिणी' means a sort of **magic veil** by wearing which one can be invisible. Cf. 'तथेति तिरस्करिणीम् अपनीय राजानम् उपेत्य'—*Vik.; KM.* 910; or it means a **secret science** by which one can make oneself invisible. Cf. '**भोस्तिरस्करिणी-गर्वित** मदीयमस्त्रं तां द्रक्ष्यति'—*Śak. VI.* '**तिरस्करिणीप्रतिच्छन्ना** पार्श्ववर्तिनी भूत्वा—श्रोष्ये तावत् पार्श्ववर्तिना वयस्येन सह विजने किं मन्त्रयन् तिष्ठति ?—*Vik. II (see next)*. **10. उपलप्स्ये**—Cf. 'तत्त्वत एनाम् उपलप्स्ये'—Act. I. pp. 78. **प्रतिच्छन्ना**—Hidden, concealed *i.e.* Sānumatī though invisible, will of course, be **visible to the audience.** Cf. 'अनया च समालब्धं न मां द्रक्ष्यन्ति रक्षिणः'—MK. III. [Read—"Being **visible** to the audience, and **invisible** to the individuals on the stage is a contrivance familiar to the plays of various peoples especially our own, as the **Ghost of Hamlet,** that of **Banquo, Ariel** *in the Tempest* and **Angino** *in the Virgin Martyr*, who repeatedly enter **invisible.** The wardrobe of some of our old comedians comprised a robe to walk invisible which *Gifford* supposes was a dress of light, gauzy texture. Something of this kind is used here apparently, as the stage directions are "**covered with a veil**", and "**throwing aside the veil**"—**Dr. Willson.**

Text:—(ततः प्रविशति चूताङ्कुरमवलोकयन्ती चेटी । अपरा च पृष्ठतस्तस्याः) । **प्रथमा**—

आअम्ब-हरिअ-पण्डुर ! वसन्त-मासस्य जीअ-सव्वस्स !
आर्या **दिट्ठोसि चूअ-कोरअ ! उदु-मङ्गल ! तुमं पसाएमि ॥२॥**
[12, 18
12, 15] [आताम्र-हरित-पाण्डुर ! वसन्त-मासस्य जीव-सर्वस्व[1] !
दृष्टोऽसि चूत-कोरक ![2] ऋतु-मङ्गल ! त्वां प्रसादयामि[3] ॥)

(*Enter, a maid-servant gazing at the mango-sprout, and behind her, a second*).

First—O lightly-coppered, pale green mango-blossom[2], the[1] be all of the life[1] of the vernal month, thou art seen (*by me*). O auspicious herbinger of the season, (*I*) propitiate[3] thee. (2)

द्वितीया—परहुदिए ! किं एआइणी मन्तेसि

[परभृतिके, किमेकाकिनी मन्त्रयसे ।]

Second—**Parabhṛtikā,** what art thou chirping about to thyself ?

प्रथमा—महुअरिए ! चूद-कलिअं पेक्खिअ, उम्मत्तिआ परहुदिआ होदि [मधुकरिके ! चूत-कलिकां प्रेक्ष्य उन्मत्ता खलु परभृतिका* भवति] ।

First—Madhukarikā, Parabhṛtikā (*the cuckoo*[4]) indeed **goes** crazy (*with delight*) at the sight of the mango-blossom.

द्वितीया—(सहर्षं त्वरया उपगम्य)—**कहं उवट्ठिदो महु-मासो** (कथमुपस्थितो मधुमासः) ?

Second (*Hastily approaching with transport*)—What ! **has the** spring month (*really*) arrived?

प्रथमा—महु-अरिए ! तव दाणिं कालो एसो मद-विब्भम-गीदाणं (मधु-करिके ! तव इदानीं काल एष मद-विभ्रम-गीतानाम्) ।

First—Madhukarik*ā* (*O bee*), now this is time **for your** amorous ditties through intoxication

द्वितीया—सहि ! अवलम्ब मं जाव अग्ग-पादट्ठिआ भविअ चूअ-कलिअं गेण्हिय सम्पादेमि काम-देवस्स अच्चणं [सखि ! अवलम्बस्व[5] मां यावदग्र-पाद-स्थिता भूत्वा चूत-कलिकां गृहीत्वा सम्पादयामि कामदेवस्य अर्चनम्) ।

Secondd—Hold[6] me, dear, while standing on tip-toe, (*I*) cull the mango-blossom and perform the worship unto the **God of** Love.

V. L.—'उच्छ्वसितमिव वसन्तमासस्य'—B. 'जीवसर्वस्व'—V. M. R's Com. 'जीवितसर्वम्—S. R's Com. 'जीवितसत्यं वसन्तमासयोः'—R. 'दृष्टः'—R.V.M. 'दृष्टं'—B. 'दिष्टया'—S; B reads'क्षणमङ्गलम्' for 'ऋतुमङ्गलम्' । 'चूतकोरक'—R. V. M. 'चूताङ्कुर'—S. B. प्रसादयामि'—R. V. M. 'खलु पश्यामि'—'S. नियच्छामि'—B. 'मद-विभ्रम-गीतानाम्'—R. V. M. 'विभ्रमोद्गीतानाम्'—S. B.

तत इति । 'चेटी' दासी (इति हेमचन्द्रः) । **आताम्रेति** । 'ताम्रः लोहितः, 'हरितः' हरिद्वर्णः 'पाण्डुरः' शुक्ल-पीतकः ('पाण्डुरः शुक्ल-पीतक' इति शाब्दिक-नरसिंहः) इति 'ताम्र-हरित-पाण्डुरः' वर्ण-त्रय-युत इत्यर्थः ('वर्णो वर्णेन' (२।१।६९) इति समासः] 'आ' ईषत् 'ताम्र-हरित-पाण्डुरः' [इति सहसुपेति समासः । तत् सम्बुद्धौ] 'वसन्त-मासस्य' प्रथमस्य मधुमासस्य चैत्रस्य इत्यर्थः, नतु फाल्गुनस्य [**'मधुः माधवश्च वासन्तिकावृतू'** इति मलमास-तत्त्व-धृत-श्रुतिः] जीवस्य' प्राणानां 'सर्वस्व' सारभूत ! सत्सु अपि अन्येषु विविधेषु पुष्पेषु तदङ्कुरेण एव ऋतोः उच्छ्वसित मेव गम्यते । 'ऋतोः' वसन्तस्य 'मङ्गल'! प्रथमं परिजृम्भ-माणत्वात् सर्वेषु ऋतुषु वसन्तस्य उत्कृष्टत्वं त्वयैव-कृतम् इत्याशयः । हे 'चूत-कोरक' आम्रकलिके ['कलिका कोरकः पुमान्' इत्यमरः) 'मया त्वं दृष्टोऽसि'

अस्मादेव हेतोः 'त्वां प्रसादयामि' प्रसन्नं करिष्यामि। कामदेवाय समर्प्यं इत्याशयः। **आर्या** जातिः] ॥२॥ **द्वितीयेति**। 'परभृतिका' इति प्रथम-चेटी-नाम। 'एकाकिनी' मया विरहिता। **प्रथमेति**। 'मधुरिका' इति द्वितीय-चेटीनाम। आम्रकलिकां दृष्ट्वा परभृतिका (**कोकिला**) उन्मत्ता भवति। **ममापि परभृतिका**। अतः ममापि स्वयं जल्पनं न विचित्रम्। **द्वितीयेति**। 'मधु-नामधेयः मासः 'मधुमासः' चैत्र इत्यर्थः ('मधुश्चैत्रे च दैत्ये च, मद्ये पुष्परसे मधु' इति हट्टचन्द्रः)। 'कथमिति हर्षे [इति मेदिनी]। **प्रथमेति**। हे 'मधुकरिके' छलात् भ्रमरि इत्यर्थः। 'मदेन' 'पुष्पमधु-पानेन जनितया मत्ततया यानि 'विभ्रम'-युक्तानि 'गीतानि, यद्वा 'मदः' हर्षः च, 'विभ्रमः' इतस्ततः परिभ्रमणं च, 'गीतं' गानं च, तेषां 'कालः' वेला समायातः। **द्वितीयेति**। 'अवलम्बस्व' अन्यथा भूमौ पतिष्यामि। 'अग्रौ' च तौ 'पादौ' च इति 'अग्रपादौ' तयोः 'स्थिता' [अत्र **अवयवाऽवयविनोः अभेद-विवक्षया अङ्गुलीषु पादत्वारोपः**। तथाचोक्तम् वामनेन——"**हस्ताग्राऽहस्तादयो** गुण-गुणिनोर्भेदा-ऽभेदाभ्याम्" (५।१।६०) इति विस्तरस्तु चतुर्थाङ्के द्रष्टव्यः]।

191n.—1. आताम्र &c.—ताम्यतीति तम्+रक्=ताम्रम्; 'दीर्घ' by 'अमि-तम्योः दीर्घश्च' (उः-183). ताम्रः गुणः अस्ति अस्य इति ताम्र+मतुप्= ताम्रः—Having the colour of copper. **मतुप् is elided** by the Vārt. 'गुण-वचनेभ्यो मतुप् लुगिष्टः'—1896. (10*n*, 7). Similarly in the case with हरित। *AK*, however, **does not seem to like** this sort of convention. He says 'गुणे' शुक्लादयः 'पुंसि, गुणलिङ्गास्तु तद्वति त्रिषु *i. e.* when शुक्ल, ताम्र &c. mean **'one possessing that colour'** they assume the gender of the noun they qualify. **'आ'** means **ईषत्** and goes with all the three colours. Cf. Ra. VI. (17-18). **2. चूत**&c.—**कोरकः** (m) means 'bud'—*AK*. But 'कोरकोऽस्त्री कुड्मलेऽपि—*Medinī*. Also 'समुपहरन् विचकार **कोरकाणि'**—ŚPB–(RM) **3. परभृतिका & मधुकरिका**—Are the names of two friends very happlily chosen, as the cuckoo and the bee are closely associated with spring. These also occur in *Cārudatta of Bhāsa* (*speech of* गणिका)। The first is vivacious and jolly while the latter is of simple nature. Kāli is fond of **contrastive characters** (24n, *Remark*). **4. उन्मत्त** &c. —The second maid asks the first one (परभृतिका) as to the reason of her muttering alone. Then परभृतिका using **pun** says that the cuckoo (परभृतिका) is intoxicated at the sight of the mango-buds and so also she (परभृतिका) is, and hence it is but quite natural for

her, maddened as she is, to talk to herself. **5. मधुकरिके**—Here is another play on words. It means also '*O bee*'—(*Com.*). [Cf. Skt. मधु–(Greek. Methu–Lithunian Medus—Eng. Mead]. **6. मद-विभ्रम** &c. (*i*) मद = Intoxication, hilarity; विभ्रम-गीत = Amorous ditty. Or (*ii*) विभ्रम = Wandering about. "This is the time for your (*applied to the maid*) amorous song through intoxication", or "This is the time for your (*applied to the bee*) hilarity, wandering and humming". (*Now this is the time for mirth, gaiety and song'—Roby Datta*). **7. अग्रपाद** &c.—(118n. 3)—Standing on tip-toe.

Text:—प्रथमा—अइ मम वि क्खु अद्धं अच्चण-फलस्स

[यदि ममापि खलु अर्धम् अर्चन-फलस्य] ।

First—Provided mine too would be half the merit of the worship.

द्वितीया—सहि ! अभणिदे वि एदं सम्पज्जइ । जदो एक्कं एव्व णो जीविदं दुधा-ट्ठिदं सरीरं [अभणितेऽपि[1] एतत् संपद्यते । यत् एकमेव नौ जीवितं द्विधा-स्थितं शरीरम्] । (सखीमवलम्ब्य चूत-प्रसवं गृहीत्वा) **अये, अप्पबुद्धोऽवि चूद-प्पसवो बन्धण-भङ्ग-सुरभी होदि** (अये, अप्रबुद्धोऽपि[2] चुत-प्रसवो वन्धन-भङ्ग-सुरभि[3]र्भवति) ।। (इति कपोत-हस्तकं कृत्वा) ।।

Second—So it will be, my friend, even[1] though unsaid[1]. For, one only is our life, (*though*) divided in body. (*Leaning on her friend and plucking the mango-sprout.*) Lo, though[2] not (*yet*) full-blown[2] the mango-sprout gets[3] fragrant at the breaking of the stalk[3]. (*Folding the hands so as to form a hollow*).

तुंसि मए चूदंकुर ! दिण्णो कामस्स गहीद-धणुअस्स ।

आर्या **पहिअ-जण जुवइ-लक्खो पञ्चब्भहिओ सरो होहि ।।३।।**

(12, 18

12, 15) (त्वमसि मया चूताङ्कुर ! दत्तः कामाय गृहीत-धनुषे ।

पथिक - जन-युवति-लक्ष्यः[4] पञ्चा-भ्यधिक[5] शरो भव ।।)

।। (इति चुताङ्कुरं क्षिपति) ।।

O mango-sprout ! thou hast been offered by me, unto Cupid, who has taken up his bow. Be thou the most[2] splendid arrow of his five[5], having[4] for thy mark, the young wives of men journeying (*abroad*)[4]. (3) (*This said, throws the mango-sprout*).

V. L.—'कपोत-हस्तकम्'—R. B. V. M. 'कपोतम्'—S; B has 'अर्हसि मे', for 'त्वमसि मया' ; 'कामस्य गृहीत-चापस्य' for 'कामाय गृहीत-धनुषे' and 'भवितुं' for 'भव' । 'अभ्यधिकः'—K. R. S. M. 'अन्तग्तिः'—B. P.

द्वितीयेति । 'अभणितेऽपि' मया अनिवेदितेऽपि त्वम् अर्घं पुण्यं प्राप्स्यसि इति भावः । 'अप्रबुद्धोऽपि' न सम्यक् प्रकटितोऽपि 'चूतस्य' आम्रस्य 'प्रसवः' मुकुलः ['स्यादुत्पादे **फले पुष्पे प्रसवो** गर्भमोचने' इत्यमरः) 'बन्धनस्य' वृन्तस्य 'भङ्गेन' छेदेन ('संदाने च तथा वृन्ते मायायां बन्धनं स्मृतम्'' इति रुद्रः), 'सुरभिः' सुगन्धिः । **कपोत-हस्तकमिति** । हस्तयोः कपोताऽकारमञ्जलिं कृत्वा । (अस्य लक्षणं यथा सङ्गीत-रत्नाकरे—'कपोतोऽसौ करो यत्र श्लिष्ट-मूलाग्र-पार्श्वकौ,प्रणामे गुरु-संभाषे''] ।। **'त्वमिति** । 'गृहीतं धनुः' येन तस्मै 'कामाय' । (समासान्तविधेः अनित्यत्वात्, 'धनुषश्च' (५।४।१३२)इति न अनङ् । अनेन सर्वदा सज्जत्वं ध्वनितम्) । 'पथिक-जनानां' प्रोषितानां पान्थानां या 'युवतयः' कान्ताः ता एव 'लक्ष्यं शरव्यं यस्य तादृशः सन् 'पञ्चानाम्' अरविन्दादीनां 'शराणाम्' 'अभ्यधिकः' श्रेष्ठः ['यस्मात् निर्धार्यते , यश्च एकदेशो निर्धार्यते, यश्च निर्धारण-हेतुः एतन् वितय-सन्निधाने एवाऽयं निषेध' इति कैयटोक्तेः निर्धारणस्य अप्राप्तत्वात् अत्र षष्ठीसमासः । पञ्चाभ्यधिकत्वे शरस्याऽसम्बन्धे संबन्धलक्षणा **अतिशयोक्तिः । इयमार्या**) ।।३

192n.—1. एकमेव&c.—Cf. 'अव्यतिरिक्तेयम् अस्मत् शरीरात्'—Kād. pp. 577. **अप्रबुद्ध**—'प्र + बुध् means 'to awake from sleep' (198n. 6), here 'not fully developed'. **2. बन्धन** &c.—बन्धन = Stalk. (*Com*). 'बन्धन-कोषा'—*Śak. III*. 4. **3. कपोत-हस्तकम्**—'क.' वायुः 'पोतः' नौका इव यस्य इति 'कपोतः'–A pigeon. The phrase technically means 'the folding of the palms from the wrists to the finger-end'', so as to form a hollow inside and resemble a pigeon. This is used in supplication, fear, respect, saluting a deity, or in addressing a superior (*Com*). 'सर्वपार्श्व-समाश्लेषात् **कपोतः** सर्वशीर्षकः । भीतौ विज्ञापने चैव विनये च प्रयुज्यते ।।''–C. Ś reads **'सर्प-शीर्षकः'**' । Also 'उभाभ्यामपि हस्ताभ्यामन्योन्यं पार्श्वसंग्रहात् । हस्तः **कपोतको** नाम कर्म चास्य-निबोधत ।। विनयोपगमे चैव प्रणाम-करणे तथा, गुरु-सम्भाषणे चैव **कपोतः** परिकीर्तितः' ।।—Bharata. **4. गृहीत-धनुषे**—'धनुः' at the final in a बहुव्रीहि *always* takes **'अनङ्'** (Com.) unless it is a **'संज्ञाशब्द'** (5.4.132). Thus the form expected is **'गृहीत-धन्वने'** but 'समासान्त-विधि' is **अनित्य** *i.e.* not always *obligatory*. Read 'कथं तर्हि ''स्व-लावण्याशंसा **धृतधनुषमह्नाय** तृणवत्'' इति पुष्पदन्त-प्रयोग, इति चेत् । अत्राहुः ।। समासान्त-विधेः **अनित्यत्वात्** न अत्रानुपपत्तिः । **अनित्यत्वे प्रमाणम् अश्वादि-गणे** (1.2.196) **राजन्-शब्दपाठः'**—*T*. 870. **''प्रतिराजा''** । **समासान्तस्य** अनित्यत्वात् न टच्–*BD* on 6.2.196;

"इदं राजन्-शब्दस्य पाठ एव ज्ञापयति। समासान्ता अनित्या इति। अन्यथा 'राजाह-सखिभ्यः टच्' इति टचः चित्त्वादेव सिद्धं' स्यात्"—JK on 3927. Also Vide Kāśikā. Cf. "अश्वत्थामा कर-धृत-धनुः"—*VS.* III. 23. 'धृत-धनुषं रघुनन्दनं स्मरामि'—*UC.V.*4. 'धनुः is also उ-कारान्त–(Masculine–"धनुषा च धनुं विदुः";–Bh.D. **5. पथिक—**&c.—पन्थानं गच्छति इति पथिन्+ष्कन् ('पथः ष्कन्'—5.1. 75)='पथिकः–A traveller. It is very curious that both MN and Jaymangalā remark on *BK. II* 43. 'पथि कुशलान्' पथिकान्। "तत्र कुशलः पथः"(5.2. 63) इति ठक्। But the Sūtra quoted gives वुन् (अक्) and not ठक्, and consequently the form is **पथकः** and not **'पथिकः'** **6. पञ्चाभ्यधिकः—**"पञ्चानाम् अभ्यधिकः"—(33n, 2). According to *Ś* this epithet means "a **sixth arrow** in addition to the five." Cf. "किमुत उपवन-सहकारः &c."—*Vik. II.* He does not seem to include **mango** in the list, but this is **inaccurate,** as चूत is included in the list (Vide 84n 2); SV. IV. 1. It will be interesting to note that in the **Mandasor inscription** of Kumāra-Gupta, Cupid's flowery-arrows consist of **different** stuffs:—"स्पष्टः अशोक-तरु-केतक-सिन्धुवार-लोलातिमुक्तक-लतामदयन्तिकानाम्। पुष्पोद्गमरभिनवैरधिगम्य नूनमैक्य विजृम्भितशरे हरधूत-देहे"॥ **अभ्यधिकः—**However may be safely explained as '*the most excellent*', "*the best*", 'of five most splendid'—*Roby Datta.* **पथिकजन** &c.—Cf. 'प्रेक्षिष्यन्ते पथिक-वनिताः प्रत्ययादाश्वसत्यः'—*PA* & *MD.* 1. 8.

Text:— (प्रविश्यापटीक्षेपेण कुपितः) **कञ्चुकी—मा तावदनात्मज्ञे[1]! देवेन प्रतिषिद्धेऽपि[2] मधूत्सवे चूत-कलिका-भङ्गमारभसे[3]।**

(*Entering in anger with a toss of the curtain*)

Chamberlain—Not like that, self-forgetting[1] woman ? (*Do you dare*) begin[3] plucking the mango-bloom,[3] even though the Spiring-festival is fobidden[2] by His Majesty ?

उभे (भीते)**—पसीददु, पसीददु, अज्जो। अगहीदत्थाओ वअं**
(प्रसीदतु, प्रसीदतु, आर्यः। अगृहीतार्थे[1] आवाम्)।

Both (*Afraid*)—Pleased be Your Honour. We are ignorant[1] of the matter.[1]

कञ्चुकी—न किल श्रुतं भवतीभ्यां यद्वासन्तिकैः[2] स्तरुभिरपि देवस्य शासनं[3] प्रमाणीकृतं तदाश्रयिभिः[4] पत्रिभिश्च[5]। तथाहि—

चूतानां चिर-निर्गताऽपि[७] कलिका बध्नाति न स्वं रजः[८]
शार्दूल- 'सन्नद्धं यदपि स्थितं कुरवकं तत् कोरकावस्थया[९]'।
विक्रीड़ित कण्ठेषु[१०]'स्खलितं गतेऽपि शिशिरे पुंस्कोकिलानां रुतं
(मसजसततग) '[११]शङ्के संहरति[११] स्मरोऽपि चकित[१२] स्तूणाऽर्धं-कृष्टं शरम् ॥४॥

Chamberlain—Was it not heard by you two, that even by the vernal[1] trees His Majestry's fiat[3] is observed[4], as also by their sheltered[5] feathery[6] creatures[6] (*i. e. birds*)? For,—

The blossom of the mangoes, though[7] burst forth long since[7], does gather no "down"[8] upon its (*tender*) crest, the *Amarnath* even though[9] protruded remains in its budding[10] state[10]; though the cold (*season*) is overpast, the note of the male-cuckoos falteringly[11] slips in (*their*) throats. (*I*) dread[12] (*that*) even Cupid being dismayed[14], [15]arrests his shaft half-drawn from (*his*) quiver (4)

V. L.—"प्रसीदतु प्रसीदतु'—B; the reduplication—Omitted by others. 'यदा'—S. 'यत्'—R. B. V. M. 'कुरवकम्'—R. S. 'कुरुवकम्'—B. V. M. K; B omits 'पत्रिभिश्च'।

प्रविश्येति। 'नासूचितस्य.पात्रस्य प्रवेशो निर्गमोऽपि च' इत्युक्तेः अत्र कञ्चु--किनः सूचनाभावात् 'पटचाः क्षेपणम्' उत्तोलनं विनैव प्रवेशः। तत्र कुपितत्वं हेतुः। एतत्तु विस्तरेण व्याख्यातं प्राक् (चतुर्थाङ्के)। 'मा तावन् एवं कुरुष्व' इति **वाक्यशेषः**। 'आत्मानं' स्वकीय-स्वभावं पराधीनत्वमित्यर्थः, न जानाति या सा 'अनात्मज्ञा' तत्संबुद्धौ। 'देवेन' प्रकरणात् राज्ञः दुष्यन्तेन। 'मधूत्सवः' चैत्र-पूर्णिमा [इति जटाधरः]। अर्थात् तस्या तिथौ य उत्सवो विधीयते स.। **उभे इति**। 'अगृहीतः' अपरिज्ञातः 'अर्थः मधूत्सव-प्रतिषेध-रूपः विषयः याभ्यां तथाभूते 'आवा' भवावः। **कञ्चुकीति**। 'किल' इत्यरुचौ ['वार्तायाम् अरुचौ किल' इति त्रिकाण्डशेषः] 'गृहीतार्थे आवाम्' इति यदुक्तं तत् न विश्वसनीयम् इत्यर्थः। 'वासन्तिकैः' वसन्तकाल-संजात-पुष्पैः [**छान्दसोऽयं प्रयोगः**। 'वसन्ताच्च' (४।३।२० ; ३४५१) इति ठञ्] अचेतनैः 'तरुभिः अपि' राजशासन 'प्रमाणीकृतं' पालितं का कथा चेतनानाम् इति अपि-शब्दार्थः [प्रमाणीकृतम् इति **गम्योत्प्रेक्षा**। अथवा असंबन्धे संबन्धरूपा **अतिशयोक्तिश्च**। राजाज्ञायाः तत्त्वतोऽसंबन्धात्]। **'तथाहि' तमेवार्थं जानीहि। [लोटि रूपम् इति गोपीनाथपादाः]। चूतानामिति**। 'चूतानाम्' आम्राणां 'कलिका' मञ्जरि [जात्यऽभिप्रायेण एकवचनम्] 'चिरं बहुकालात् विकसिता सत्यपि 'स्वं' स्वीयं 'रजः' परागं 'न बध्नाति' न दृष्टं करोति इत्यर्थः। (यथा काचन बालाप्रौढ़तया रजोदर्शनं न याति इति **समासोक्तिः**)। 'कुरवकं' पुष्पभेदे (जातावेकवचनम्) 'यद्यपि सन्नद्धं' प्रस्फुटनाय सज्जीभूतं विकासो-

न्मुखम् इत्यर्थः। 'तत् कोरका-वस्थायां' कुड्मल-रूपेण स्थितं परन्तु राजशासनात् न विकसितं, 'पुमांसः कोकिलाः पिकाः तेषां (अनेन मदाति-रेकः द्योत्यते) 'रुतं कूजितं ['तिरश्चां वासितं रुतम्' इत्यमरः] 'शिशिरे गतेऽपि' वसन्तारम्भे अपि 'कण्ठेषु स्खलितं' प्रतिरुद्धं, न तु कण्ठेभ्यो बहिर्गतम् इति भावः। 'शङ्के' मन्ये (इति **क्रियोत्प्रेक्षा**, तथा च दर्पणोक्तं 'मन्ये शङ्के ध्रुवं प्रायो नूनमित्येव-मादयः, "**उत्प्रेक्षा-वाचकाः**' इति। 'स्मरोऽपि' भगवान् कामदेवोऽपि ['कर्पूर इव दग्धोऽपि शक्तिमान् यो जने जने। हरतापि तनुं यस्य शम्भुना न बलं हृतम्,', एवं-विधः शक्तिधरो मदनोऽपि इति अपि-शब्दार्थः] राजाज्ञया 'चकितः' भीतः ["चकितः शङ्कितो भीत" इति त्रिकाण्डशेषः] 'तूणात्" तूणीरात्' अर्धकृष्टं' अंशतः निष्कासितं 'शरं संहरति' पुनरपि तूणीरे स्थापयति [प्रथम-पाद-त्रये चिरनिर्गनादेः कारणस्योक्तेः कार्यस्य परागादेर्निषेधात् **माला-विशेषोक्तिः, स्वभावोक्तिः, काव्यलिङ्गञ्च**। स्थिस्थेति कुरकोरेति रेपुंरोपीति **छेक-श्रुति-वृत्त्यनुप्रासाः**। **शार्दूलविक्रीडितं छन्दः**] ॥४॥

193n.—1. अनात्मज्ञे—Cf. 'मयि व्यवहरत्यनात्मज्ञः'—*Māla.* 1. Have you fogotten that you are but servants ? You must be silly enough to make preparations for vernal festivities which have been prohibited by the king. **2. उत्सव**—Etymologically means **'merry-making'** celebrated at the birth of a son, later on the meaning was extended to any festivity. 'उत्सूते हर्षमित्येष उत्सवः परिकीर्तित."-(194n. 5). **मधूत्सवे**—मधूत्सव of the Hindus may be identified with the **Saturnalia** or rather the **Carnival** of the Romans. It was in old times performed in celebration of the *return of spring* and in honour of Kāmadeva (*in modern times, in honour of his progenitor, Kṛṣṇa*) with great pomp ad eclat. Citizens both men and women, decorated with fine robes and oranaments, used to roam in the streets, dancing, singing and beating drums, scattering red powders and coloured water with the help of syringe upon the persons of their companions, Cf. 'मधु-मत्त-कामिनी-जन-स्वयंग्रह-गृहीत-**शृङ्गक-जलप्रहार-नृत्यन्-नागरजन**-जनित-कौतूहलस्य समन्ततः स्वच्छन्दमर्दलो-द्दामं-चर्चरी-शब्दमुखर-रथ्या-मुख-शोभिनः प्रकीर्ण-पटवास-**पुञ्ज-पिञ्जरित**-दश-दिशामुखस्य सश्रीकतां **मदन महोत्सवस्य**' —*Rat* 1; *Ibid. I.* 9 & 10. Some identify it with the **Holi-festival called** '*Nu-roz*' by the Mahomedans (*Vide Asiatic*

Researches, Vol. II. P. 385.), **Dola-yātrā** in Bengal, **'Hutas'ani** or **'Shimga'** in the Deccan, **'Kammannana Habba'** in the Canarese province, and **Faguā** by the Munḍās. Cf. The des--cription of मदनोत्सव—quoted above with that of **दोलोत्सव**—'विशेषत: कलियोगे **दोलोत्सवो** विधीयते ।**पूजयेत् विधिवद् भक्त्या **फल्गुचूर्णैः** चतुर्विधैः ।। सित-रक्तैः गौर-पीतैः कर्पूरादि-विमिश्रितैः—&c.—PP; KM. 882-889. **3. वासन्तिकैः**—With **काल-वाचक** words the usual affix is (ठञ्)—(38n, 3, end) but in the case of **ऋतु-वाचक** words, a Special Sūtra (viz. 'सन्धिवेलाद्य् ऋतु-नक्षत्रेभ्योऽण्'—4. 3. 16) **bars** the application of **'ठञ्'** । ("ठञ्-प्रत्ययस्य बाधा"—Prabhā). Hence for 'वसन्ते जात. we expect 'अण्' giving the form **'वासन्तः'**—(Cf. **'वासन्ती** शीतला लक्ष्मी निक्ता दोषत्रयास्त्रजित्'—BhP. **'वासन्ती** ज्योत्स्ना'—Act. III; **'वासन्ती** माधवी-लता'—AK, and BhD there on. **वासन्ती** 'दुर्गा-पूजा) । Yet Kāli. uses the form **'वासन्तिक'** with 'ठञ् which is used only in the **Vedic Literature** and is formed by the **Vedic Sūtra 'वसन्ताच्च'** (4. 3. 20) 'ठञ् स्यात् **छन्दसि** । वासन्तिकम्'—*BD.* 'ऋत्वणोऽ**पवादः** । 'मधुश्च माधवश्च् **वासन्तिकौ** ऋतू'—*Śruti qtd. VM.* **The frequent use of Vedic words by our poet has already been noticed** by us. Note also that वासन्तिक sometimes means विदूषक । Cf. 'वासन्तिकः केलिकिलो वैहासिकः विदूषकः'—*H.* **4. प्रमाणीकृतं**—(Held authoritative, obeyed; 'प्रमाणीकृतः पाणिः'—*UC.* III. 7. The kings are supposed to be endowed with supernatural power over the advent or cessation of season, also over other objects of nature. Read 'जलधर । संहर अत्र कोपम् **मया आज्ञप्तः** ** पृथ्वी भ्रमन् यदि प्रियां प्रेक्षिष्ये तदा यत् यत् करिष्ये तत् सहिष्ये'—*Vik. IV. II.* 'यत्' मुनयोऽप्येवं व्याहरन्ति **"राजा' कालस्य कारणमिति" तत् किमहमेनं जलधरसमयं न प्रत्याविशामि"**—*Ibid. IV.* 12. **5. चूतानां**—&c.—Cf.'ईषद्बद्ध-रजः कणाग्र-कपिशा चूते नवा मञ्जरी'—*Vik. II.* 7. Read the whole śloka, also (53*n.* 3); **रजस्** is also **अकारान्त** । Cf.'पुष्पे वेशे गुणे चैव **रजोऽयं रजसा** सह'—*Utpalinī.* **बध्नाति**—(forms)—मन्-विभन्त्सति, यङ बाबध्यते; —*Ra.* I. 80; XII. 69; *Ku.*V. 60. **6. पुंस्कोकिलानां**—पुमान् कोकिलः—पुंस्कोकिलः । Also **(पुंस्कोकिलः)**—'पुंग्रहणं प्रागल्भ्य-द्योतनार्थम्'—*MN in Ku. III.* 32; hence **no अपुष्टार्थत्व-दोषः** । **'म'** becomes **'रु'** by 'कुमः खयि अम्परे'

(8. 3. 6; 139). Next apply the Vārt.—'संपुकानां सो वक्तव्यः',- (138); शङ्के-(Methinks)-Cf. *Rām. IV.* 2. 21; *V.* 20. 26. 7. **चकितः**- Frightened, Cf. 'प्रियाग्रे **चकितं** भीतेरस्थानेऽपि भयं महत्'—*Ujjvala-nīlamaṇi* 'पौलस्त्य-चकिते-श्वराः'-*Ra. X.*73; 'व्याधानुसार-**चकिता** हरिणीव यासि'—*MK.* 1. 17. '**चकित**-विलोकित-सकलदिशा'—*GG.* 2. **संहरति**— (14 n. 8); 'प्रतिसंहरन् इषुं'—*Ra. III.* 64; **स्मरः**—(स्मरयति) उत्कण्ठयति इति 'स्मृ आध्याने'। पचाद्यच् (3.1.134)) or स्मर्यते अनेन इति वा' पुंसि संज्ञायां'—इति घः [3. 3. 111]—*BhD.* Contrast this with 'कुसुमजन्म ततो नवपल्लवाः' &c.—*Ra. IX.*26. **तूण**—also **तूणीर** (m), **तूणी** (F), mean quiver. "**तूणी** नीलया निषङ्गे वा ना"—Medinī. "तूणा" च ॥ 'स्त्रियां; तूणे-षुधी उपासङ्गः"—Ratnakoṣa Qtd. BhD.

Text:—सानुमती—णत्थि एत्थ सन्देहो। महाप्पहाओ क्खु राएसी [नास्त्यत्र संदेहः। महाप्रभावः खलु राजर्षिः]।

Sānumatī—There is no doubt (*of it*). The royal sage (*is*) of great power.

प्रथमा—अज्ज, कति दिअहाइं अम्हाणं मित्तावसुणा रट्ठिएण भट्टिणो पाअमूलं-पेसिदाणं [आर्य, कति दिवसानि आवयोर्मित्रावसुना राष्ट्रियेण भर्तुः पाद-मूलं प्रेषितयोः] **एत्थ अ णो पमद-वणस्स पालण-कम्म समप्पिदं। ता आअन्तुअदाए अस्सुव-पुव्वो अम्हेहिं एसो वुत्तन्तो** (अत्र च नौ प्रमद-वनस्य[1] पालन-कर्म समर्पितम्। तदागन्तुकतया[2] अश्रुतपूर्व आवाभ्या मेष वृत्तान्तः)।

First—Revered Sir, (*it is only*) a few days since we were sent to the feet of His Majesty by Mitrāvasu, the king's brother-in-law. And here the duty of tending the pleasure-garden[1] was entrusted to us. Thus owing to our being[2] strangers[2], the incident was not heard by two of us before,

कञ्चुकी—भवतु। नहि पुनरेवं प्रवर्तितव्यम्।

Chamberlain—All right, never again should you do this.

उभे—अज्ज! कोदूहलं णो। जइ इमिणा जनेण सोदव्वं, कहेदु भअं, किं णिमित्तं भट्टिणा वसन्तुस्सवो पडिसिद्धो त्ति [आर्य, कौतूहलं नौ। यदि अनेन जनेन श्रोतव्यं कथयतु भवान् किं निमित्तं भर्त्रा वसन्तोत्सवः प्रतिषिद्ध इति]।

Both—Revered Sir, we have a curiosity. If it may be heard by these persons, let Your Honour tell us why the (*usual*) spring-festival is interdicted by His Majesty.

सानुमती—उस्सव-पिआ क्खु मणुस्सा। ता एत्थ गुरुणा कारणेण होदव्वं [उत्सव-प्रियाः खलु मनुष्याः। तदत्र गुरुणा कारणेन भवितव्यम्]।

Sānumatī—Men are (*naturally*) fond of festive entertainments. There must be a grave cause here. (i.e. *for the prohibition*).

कञ्चुकी—बहुली-भूतमेतत् किं न कथ्यते । किमत्रभवत्योः कर्ण-पथं नायातं शकुन्तला-प्रत्यादेश-कौलीनम्[5] ।

Chamberlain—This has been thoroughly[4] public[4]; why (*should it be*) not told ? Has not the scandal[5] (gossip—M) of Śakuntalā's repudiation reached the range of your ears here ?

V. L.—'मानुमती'—B.S. 'उभे'—R.V.M. 'भर्त्तुःपादमूलम्'—B.M. S. 'भट्टिनी-पादमूलम्'—R. V. 'अत्र'—B. S. 'इत्थं'—M.R.V. 'पालनकर्म' —R. V. M. 'सकलं प्रतिकर्म'—S. 'चित्रकर्म'—B. HS.

प्रथमेति । राष्ट्रे अधिकृत इति 'राष्ट्रियः' तेन ('राष्ट्राऽवार-पारात् घ-खौ'—४।२।९३; १३१३ इति घः) नागरिकेन श्यालेन । 'मित्रावसु' इति नागरिक-नाम । 'कति दिवसानि' स्वल्पा दिवसाः ('वा तु क्लीवे दिवस-वासरौ' इत्यमरः) 'प्रमद-वनस्य' 'अन्तःपुर-विहारोचित-वनस्य' (इति रामायण-टीकायां रामपादाः) । 'आगन्तुकतया' आहार्यतया नवागततया इत्यर्थः ('स्यात् आगन्तुकम्, आहार्यम्' इति त्रिकाण्डशेषः) 'एषः वृत्तान्तः' वसन्तोत्सव-प्रतिषेध-वार्ता । 'अश्रुतपूर्वः इत पूर्वम् अनाकर्णितः । **कञ्चुकीति** । 'भवतु' यज्जातम् तज्जातम् इत्यर्थः । **उभे इति** । 'श्रोतव्यं' श्रवणयोग्यम्, अस्मादृशः हीनस्य जनस्य श्रवणे यदि दोषो न स्यादित्यर्थः । **सानुमतीति** । 'उत्सव-प्रियाः' ('वा प्रियस्य', वाः—८९८ इति प्रिय-शब्दस्य पर-निपातः पाक्षिकः) । **कञ्चुकीति** । 'बहुलीभूतं' सर्वत्र प्रसिद्धि प्राप्तम् । 'शकुन्तलायाः प्रत्यादेशः' निराकृतिः, प्रत्याख्यानम् इति यावत् । तल्लक्षणं यत् 'कौलीनम्' अपवादः (**'कौलीनं** पशुभिर्युद्धे **कुलीनत्वापवादयोः'** इति धरणिः) 'कर्ण-पथं' श्रवण-विषयम् । ('ऋक्पूरब्धुःपथामानक्षे'–(५।४।७४– इति समासान्तः अः) 'नायातं' नागतम् ॥

194n.—1. नास्त्यत्र &c.—**should be assigned to Sānumatī** and **not to the two maids,** as has been done by M. For the usual way of naming the king by the servants is 'भट्टा' or 'देव' (62n, 3), and not **'राजर्षि'** as has been used by सानुमती (Cf. 'साम्प्रतमस्य **राजर्षेः** उदन्तं प्रत्यक्षीकरिष्यामि' (*supra*), also "राष्ट्रियेण **भर्तुः** पादमूलम्"; "किं निमित्तं **भर्त्रा** वसन्तोत्सवः प्रतिषिद्धः" (speeches of the maids). **2. कति दिवसानि** &c.—**पादमूलं** is indicative of *humble servitude.* 'मूल' here means 'अन्तिक', "**मूलमाद्य** शिफायां स्यात् **भे** निकुञ्जेऽ**न्तिकेऽपि** च"—*Vis'va.* 'षष्ठी" after **'गतानि'** &c. expressing the *lapse of time,* is very common in

Sanskrit. Cf. 'मासो यातस्य यस्य'—*SK.* 716. "अद्य दशमो मासस्तस्य उपरतस्य"—*MR.* "अष्टपञ्चाशतं रात्र्यः शयानस्याद्य मे गताः—*Mahā. XIII.* 7732. **'भट्टिनी-पादमूलम्" (R)—is rejected** as our poet elsewhere mentions maids being **presented to the King, and not to the Queen.** Read 'देव, अमात्यो विज्ञापयति। तस्मिन् विदर्भविषयोपायने द्वे शिल्पदारिके मार्गपरिश्रमाद् अलघुशरीरे इति पूर्वं न प्रवेशिते। संप्रति **देवोपस्थान**-योग्ये संवृत्ते —*Māla. V.* 'शिल्प**दारिकाभू**यिष्ठं परिजनं च उपायनीकृत्य भर्तुः **सकाशं** प्रेषितः'—Ibid. V. In *Kād.* चित्रलेखा also was presented to the **king. 3. राष्ट्रियेण**—By the City-superintendent, the **king's brother-in-law** (श्यालः) mentioned in the Induction. Cf. 'राज-श्यालस्तु राष्ट्रियः'—AK. Or, Mitrāvasu is a person **different from** श्याल and probably acted as a kind of "*Viceroy*". Sometimes राष्ट्रिय means a *king*. Cf. 'राष्ट्रिय-श्यालः"—*MK. IX.* Also 'राष्ट्रीय'-(H). **4. प्रमद-वनस्य**–प्रमदानां वनम् इति **'प्रमद-वनम्'**। 'ङ्यापोः, संज्ञा-च्छन्दसो र्बहुलम्' (6. 3. 63) 'इति ह्रस्वः'—*BhD.* A pleasure-garden attached to the seraglio where the king takes his promenade with *Vidūṣaka* or with the inmates of the harem. Cf. 'स्यादेतदेव **प्रमद-वनम्** अन्तः-पुरोचितम्"—*AK.* **Sometimes** 'आ' **or** 'ई' **is not shortened–(3n.4).** Cf. "ह्रस्वाभावोऽपि। 'जहार प्रमदा-वनम्'- Bh. XX. 10.—(RM) 'बभञ्ज **प्रमदा-वनम्'**– Rām. V. 41 15; 20 **5. किं निमित्तं**—(36n. **3**) 'निमित्त-पर्याय-प्रयोगे सर्वासां प्रायदर्शनम्'—इति प्रथमा —SK. 608. **उत्सव-प्रियाः**—Cf. 'प्रिय-मण्डना'—IV. 9.**उत्सव**—Is to be derived from 'सू' "to give birth to" (षू प्रसवैश्वर्ययो.) Lit, the word means "the birth of a son", which of course is the greatest occasion for joy, hence any festival. (193n. 2). Note that our poet is a **close observer** of human nature. **6. बहुली-भूतम्** &c.—Is 'स्वगतम्'—according' to HS. Owing to its wide publicity the incident is almost known to all. Hence I don't think there will be any harm, if it is disclosed to these persons. 'बहुली भू'—Means 'to increase','spread'. Cf. 'बहुलीभूते कौलीने'—Rām. VI. 64. 30; 'पौरेषु सोऽहं बहुलीभवन्ति'—*Ra. XIV.* 38; (198*n*, 2, *middle*). **7. शकुन्तला** &c.—**प्रत्यादेश**— =Repudiation. कुल+ख=कुलीनः–['कुलात् खः'—(4. 1. 139). ख= ईन–(7. 1. 2.) कुलीनस्य कर्म भावो वा युवाद्यण् (5. 1. 130) इति **कौलीनम्**]—

BhD.. Primarily the word means '*nobility of birth*'. Next it comes to mean '*something related to a big family which is to be kept secret*', hence a **family-scandal.** Or, कुले जनसमूहे भवम् इति कुलीनम् *i. e.* arising from a '*crowd of men*' hence a scandal; for people gathering together in a place **generally speak ill of others.** Or, 'कौ' पृथिव्यां लीनम् इति कौलीनम् *i. e. which falls to the ground i. e.* a scandal which generally has got no foundation, or what is fit to be buried under earth i.e. not to be given out. Read '**कौलीन** मात्माश्रयमाचचक्ष'—*Ra. XIV.* 36; '**कौलीन**-भीतेन'—*XIV.* 84 'मालविकागतं किमपि **कौलीनं** श्रूयते'—*Māla. III.* 'तदेव कौलीनमिव प्रतिभाति'—*Vik. II; MD. II.* 51. 'जन्म कौलीनम्'–*VS. II.* 11.

Text:—उभे—अज्ज ! सुदं रट्ठिअ-मुहादो अंगुलीअ-दंसणं जाव
(श्रुतं राष्ट्रिय-मुखात् अङ्गुलीयक-दर्शनं यावत्) ।

Both —(*We*) have heard from the mouth of the king's brother-in-law as far as the finding of the ring.

कञ्चुकी—तेन हि स्वल्पं कथयितव्यम् । यदैव खलु स्वाङ्गुलीयक-दर्शनादनुस्मृतं देवेन सत्यमूढ-पूर्वा[१] रहसि मे तत्रभवती शकुन्तला मोहात् प्रत्याविष्टेति तदा-प्रभृत्येव [२]पश्चात्तापमुपगतो देवः । तथाहि—

रम्यं द्वेष्टि,[३] यथा पुरा प्रकृतिभि[४]र्न प्रत्यहं सेव्यते,
शार्दूलविक्रीडित **[५]शय्या-प्रान्त-विवर्तनै विगमयत्युन्निद्र[६] एव क्षपाः ।**
(मसजसततग) **[७]दाक्षिण्येन ददाति वाचमुचिता मन्तःपुरेभ्यो[८] यदा**
[९]गोत्रेषु [१०]स्खलितस्तदा भवति च [११]व्रीडा-विलक्षश्चिरम् ॥५॥

Chamberlain—Then indeed very little remains to be told. When at the sight of his own ring, it was recollected by His Majesty, that Her Ladyship Śakuntalā was, in sooth previously[1] [1]wedded by him in private, and was rejected through infatuation—even thence-forward His Majestry is struck[2] with remorse[2]. For—He loathes[3] (*everything*) delightful; as before, he is not daily waited upon by his ministers[4]; he spends sleep-less[5] nights in rolling about on the edge of (*his*) couch[6]. And when [7]out of courtesy[7], he gives the wonted (*or suitable*) reply to the [8]inmates of the seraglio, then blundering[10] in (*their*) names[9], he remains disconcerted[11] with shame for a long time (5)

V. L.—B reads 'स्वल्पं' for 'अल्पं' । 'ऊढपूर्वा मे'—R. V. 'ऊढपूर्वा मया'—M. S. B. 'यथापुरा'—R. B. V. M. 'यथापुरम्'—S. 'शय्याप्रान्तं'—

R.V.M.S. 'शय्योपान्ते'—B. 'व्रीडाविलक्षः'—R. V. M. 'व्रीडावनम्रः'—B. S.

कञ्चुकीति । 'शकुन्तला सत्यं' न तु भ्रान्ति-कल्पितं **'मे' मया** (तथा चोक्तं वामनेन—'ते-मे शब्दौ निपातेषु" इति) 'पुर्वम् ऊढ़ा' परिणीता (सहसुपेति समासः) । 'मोहात्' मति-भ्रमात् । (अनेन प्रत्याख्यान-जनिता-ऽपराधः निजस्य इत्युक्तम्) 'पश्चात्तापम्' अनुतापम् ('**पश्चात्तापोऽनुतापश्च** विप्रतीसार इत्यपि' इत्यमरः) । 'उपगतः' प्राप्तः । 'तथाहि' तमेवार्थं जानीहि । **रम्यमिति** । 'देव इति गद्यस्थं कर्तृपदमत्र संबध्यते । रमयतीति 'रम्यं' रमणीयं स्रक्-चन्दन-वनितादि-वस्तु 'द्वेष्टि' न अभिनन्दति । चक्षुषाऽपि न पश्यति इति भावः । 'यथा पुरा' यथा पूर्ववत् 'प्रकृतिभिः' अमात्यादिभिः 'प्रत्यहं न सेव्यते' स्वेच्छया कदाचित् पूर्ववत् प्रतिदिनम् अमात्यैर्मिलितः सन् राजकार्यम् अवलोकयति इति भावः । 'उद्‌गता निद्रा' यस्य स 'उन्निद्रः' जागरितः 'एव शय्यानां' (शय्यते अत्र इति 'संज्ञायां समज—'(३।३।९९)इति अधिकरणवाच्ये क्यप् । ततः "अयङ यि क्-ङति" (७।४।२२) इति अयङ) 'प्रान्तयोः' न तु मध्ये, यानि 'विवर्तनानि' न तु स्वापः, परन्तु इतस्ततः परिलुण्ठनानि, क्षणं वामे, क्षणं दक्षिणे, क्षणं पृष्ठत इत्याशयः । 'क्षपाः' निशाः न तु एकां निशाम् । 'विगमयति' यापयति, विरूद्धं यथा स्यात् तथा अतिवाहयति, ताः तु न स्वयं गच्छन्ति । 'यदा दाक्षिण्येन' सर्वासु पूर्व-परिग्रहेषु समरागितया ('एषु त्वनेक-महिलासु **सम-रागो दक्षिणः** कथित' इति दर्पणः) 'अन्तःपुरेभ्यः' लक्षणया अन्तःपुर-स्थित-महिषीभ्यः 'उचितां' तत्काल-योग्यां न तु अधिकां प्रश्नातिरिक्तां 'वाच ददाति, तदा गोत्रेषु' नामसु ('गोत्रं नाम्नि अन्वये गोत्रं, गोत्रश्च धरणीधर' इति गदसिंहः) 'स्खलितः' भ्रष्टः, तन्नाम अगृहीत्वा अर्थात् वसुमती-नाम्नि उच्चारयितव्ये शकुन्तला-नाम उच्चारितवान् इत्यर्थः, 'चिरं' दीर्घकालं 'व्रीड़या' लज्जया 'विलक्षः' विस्मयान्वितः ।। ('इति--कर्तव्यता-शून्य' इति काटयवेमाः ।। 'दैन्यमापन्न' इति विद्याम्बुधिः) ।। ('विलक्षो विस्मयान्वित' इत्यमरः । अपिच, 'आत्मनश्चरिते सम्यग् ज्ञातेऽन्यै र्यस्य जायते । अपत्रपाऽतिमहती स **विलक्ष** इति स्मृतः') ।। 'भवति च' अर्थात् दक्षिणत्वात् वैमुख्यं न गच्छति । अत्र पश्चात्तापादिके कारणे वक्तव्ये यत् कार्यस्य रम्य-द्वेषादेर्वर्णनं तत् **पर्यायोक्तम्** । **काव्यलिङ्गञ्च** । अनेकासु क्रियासु एक-कर्तृकत्वात् **दीपकभेदश्च** । 'अनुताप-प्रतिपादन-कार्यं प्रति बहुतर-कारणो-पन्यासात् **समुच्चयालङ्कारः** । "प्रकृतिभिः न सेव्यते" इत्यत्र कर्मवाच्यात्मनेपदान्त--क्रियो-पन्यासात् **भग्न-प्रक्रमता-दोषः** । रूढ़ि-प्रयोजनाभावेऽपि अन्तःपुर-शब्देन तत्स्थ-स्त्रीषु लक्षणा-करणात् **नेयार्थत्वदोषः** । **"रम्यं द्वेष्टि, यथा पुरा स्वविषयान् नो पश्यति प्रत्यहम्"**—इति प्रथम-चरण-पाठेन, **"अन्तःपुरेभ्य"**इत्यत्र **'सीमन्तिनीभ्यः"**

नीभ्यः" इति पाठेन च नयोः समाधानं विधेयम्—इति सिद्धान्तवागीशपादाः ।। पुराप्रेति प्रप्रेति क्षक्षीति **छेकवृत्त्यनुप्रासौ च। शार्दूलविक्रीडितं** छन्दः) ।।२।।

195n.—1. ऊढ़-पूर्वा—&c.—**मे**='मया',—(10n .2). Cf. 'परिणीत-पूर्वा'—Śak. V. **पश्चात्ताप**—Cf. "Dire was the tossing, deep the groans"—**Milton. 2. रम्यं** &c.—Refers to the usual delightful objects such as garlands, annointing of the body with sandal and various other cosmetics, moon-beams, and the Malaya-wind &c. In विरहावस्था delightful objects are considered to be undelightful. Cf. "तदा रम्य मरम्याणि, प्रियाः शल्यं तदासवः। तदैकाकी सबन्धुः सन्निष्टेन रहितो यदा"—Ki. XI. 28; Śak. III. 3; (84n. 5); पुष्पवाण-विलास—13; Vik. III. 9; Ra. XIII. 27. **3. प्रकृतिभिः** &c.—Mark the क्रम-भङ्ग-दोष in 'सेव्यते'। Cf. Kāmandaka. XV. 1; **उन्निद्रः**—Cf. 'इतरा तु मुहुर्मुहुरङ्गवलनैः विलुलित-किसलय-शयन-तला निमिलित-लोचनापि नाभजत निद्राम्"—HC. I. 16; Also vide 'रतिरहस्य' Qtd. MN on MD. I. 30. **4. दाक्षिण्येन**—In spite of his earnest love for Śak, he was courteous to his other wives. A **दक्षिण** hero is one who is kind to his previous lovers. Read "एकाऽऽश्रितोऽनुकूलः, **समरागो दक्षिणस्तु** सर्वासु, शठ एकत्रैव रतो बहिरन्यत्र प्रियोऽप्रियो मनसि" ।। Also 'दक्षिणोऽस्यां सहृदयः'—*DR;* 'दाक्षिण्यं नाम विम्बोष्ठी वैम्बिकानां कुलव्रतम्—*Māla. IV.* 13; *KS. IV.* 2. 85; (81*n.* 7-*End*). **5. गोत्रेषु स्खलितः**—Erring in names due to latent attachment to another lady-love is **very common** with the poets of all countries in the world. Cf.—"**गोत्र-स्खलन मनिशं** गोपि ते गोपयिष्यन्। राधानाम्नीमकरवहं सारिकाम-न्तिकस्थाम्"—*Uddhava-Dūta*; 'स्वप्नगतं ददर्श तं जगाद गोत्र-स्खलित' &c.—NC. I. 30; '**गोत्र स्खलितेषु** बन्धनम्"—Ku. VI. 8; Ra. XIX. 22; 24;—'**गोत्र-स्खलना**पराधिनस्तस्य। सख्यः स्मराभि सहसा विलक्षतां क्लिष्टं हसितस्य' ।।–KM.689. 'On one occasion while soliloquizing thus he **called her "Sue" unconsciously'—Jude The Obscure, (Thomas Hardy)**. 'पुरुषोत्तमेति भणितव्ये पुरुरवा इति निर्गता वाणी'—*Vik. III.* 'आर्य, यन्निमित्तं भर्ता अद्य उत्कण्ठितं तस्याः स्त्रियाः नामधेयेन भर्ता देवी आलपिता'—*Ibid.* 11.—(प्रवेशक)। "ऋतव्रत धीरे धीरे ओर माथाय हात बुलाते थाके। चोख दुटि बुँजे याय आवार। अस्फुटे बिड़ बिड़ करे बले—'कमल, आमार कमलमणि आमि जानि से तोमार अपराध नय'। चमके ओठे रेखा. ..

रेखा मिस्तिरेर सङ्गे नय, कोन एक कमलमणिर सङ्गे कथा बलछिल एतक्षण विकार-ग्रस्त रोगी"—नैमिषारण्य, p. 55.

Text :—सानुमती—पिअं मे पिअं (प्रियं मे प्रियम्) ।

Sākuntalā—Sweet (*news*) to me.

कञ्चुकी—अस्मात् प्रभवतो[1] वैमनस्या[2]दुत्सवः प्रत्याख्यातः ।

Chamberlain—Owing to this over-whelming[1] mental[2] depression[2], the festival has been prohibited.

उभे—जुज्जइ (युज्यते) । Both—That's right.

नेपथ्ये—एदु एदु भवं—(एतु एतु भवान्) ।

(*In the tiring room*)—Let Your Majesty advance.

कञ्चुकी (कर्णं दत्त्वा)—अये । इत एवाभिवर्तते देवः । स्व-कर्माऽनुष्ठीयताम् ।

Chamberlain (*Leaning his ear*)—Hark !' even hither tends His Majesty. Let your own duty be attended to (*by you*).

उभे—तह (तथा) । (निष्क्रान्ते) ।

Both—As you command (*Exeunt ambo*).

॥(ततः प्रविशति पश्चात्ताप-सदृश-वेषो[1] राजा विदूषकः प्रतीहारी च) ॥

कञ्चुकी—(राजानमवलोक्य)—अहो ! सर्वास्ववस्थासु[2] [3]रामणीयकमाकृतिविशेषाणाम्[4] । एवमुत्सुकोऽपि प्रियदर्शनो देवः । तथाहि—

प्रत्यादिष्ट-विशेष-मण्डन-विधि र्वाम-प्रकोष्ठार्पितं[5]
शार्दूलविक्रीडित विभ्रत् काञ्चनमेकमेव वलयं, श्वासोपरक्ता-धरः[6] ।
(मसजसततग) चिन्ता-जागरण-प्रताम्र-नयन स्तेजो-गुणादात्मनः
[7]संस्कारो-ल्लिखितो महामणिरिव क्षीणोऽपि नालक्ष्यते ॥६॥

(*Enter the king dressed in an attire indicative of remorse*[1], *the Vidūṣaka and portress*).

Chamberlain (*Looking at the king*)—Oh ! the [3]loveliness of the beautiful[4] forms[1] under[2] all (*outward*) circumstances[2].

Though so anxious, His Majestry (*is*) of charming appearance. For,—Discarding (*all*) forms of special embellishment, wearing but one bracelet of gold, fastened[5]on his left fore-arm,[5] with[6] (*his*) lower-lip distressed by (*hot*) sighs[6], and with eyes very red through wakefulness, (*caused by*) carking thoughts.—he though attenuated, is not noticed as such, by virtue of his own (*inherent*) lustre, like a precious jewel polished[7] by the whet-stone[7].(6)

** *.—**B** reads 'वैमनस्य-परीतः' for 'उत्सुकः' । 'रामणीयकम्'—B.P. 'रमणीयत्वम्'—R. M. V. S. 'प्रकोष्ठार्पितम्'—R. B. M. S. 'प्रकोष्ठे

श्लथम्'—B. 'श्वासोपरक्त'—R. B. S. 'श्वासापरक्त'—M. V. 'प्रतान्त'—R. V. 'प्रताम्र'—B. M. S. 'तेजोगुणात्'—R. V. S. M. 'तेजोगुणैः'—B,

कञ्चुकी। 'प्रभवति' सातिशयां शक्ति धत्ते यत् तत् 'प्रभवत्' प्रबलं, तस्मात् 'वैमनस्यात्' उद्वेगात् ['प्रविश्याऽपटीक्षेपेण' इत्याद्येतदन्तेन **द्युति-नामक**-मङ्गमुपक्षिप्तम्। 'तर्जनोद्वेजने प्रोक्ता **द्युतिः**' इति दर्पण-लक्षणात्] । **कञ्चुकीति।** 'अहो' इति विस्मये। रमणीयत्व-कारणेषु वेषादिषु असत्सु अपि तत्सत्त्वम् इति विस्मय-हेतुः। 'आकृति-विशेषाणाम्' उत्तमाकृतीनाम् ["विशेषोऽवयवे द्रव्ये द्रष्टव्ये उत्तम-वस्तूनि' इति शब्दार्णवः] 'रामणीयकं' मनोहारित्वम् 'उत्सुकः' इष्ट-वियोगात् उत्कण्ठितः ['औत्सुक्य-लक्षणं तु प्रागुक्तम्] । **प्रत्यादिष्टेति।** 'प्रत्यादिष्टः' निराकृतः परित्यक्तः इति यावत् 'विशेषेण' अर्थात् उत्सव-कालोचित-हार-केयूरादिना 'मण्डनस्य अलङ्करणस्य 'विधिः' व्यापारः अनुष्ठानमिति यावत्, येन तथाभूतः [अनेन "अङ्गानि अभूषितान्येव प्रक्षेपाद्यैः विभूषणैः। येन भूषितवत् भान्ति **तद्रूप**मिति कथ्यते" ।। इति **रूपं** ध्वनितम्] । 'वामे प्रकोष्ठे अर्थात् मणिबन्धात् ईषदूर्ध्वभागे 'अर्पितं'' न्यस्तम् 'एकमेव [**अनेन द्वितीयस्य वहनाऽसामर्थ्यं द्योत्यते**] 'काञ्चनं' हैमं 'वलयं' **बिभ्रत् धारयन्** ('नाऽभ्यस्तात् शतुः' ७।१।७९—इति नुमभावः) ।] "अत्र वाम-हस्त-धारणं शकुन्तला-विरह-संभ्रान्त-चित्तत्वेन" इति शङ्करपादाः) 'श्वासैः' निश्वास-मारुतैः 'उपरक्तः' व्यसनार्तः, पीड़ांगतः इति यावत् ('इति न्यायपञ्चाननचरणाः। एनेन श्वासानां दीर्घत्वम् उष्णत्वम् च व्यञ्जितम्। **'उपरक्तः व्यसनार्ते** राहुग्रस्तेन्दु-सूर्ययोः' इति मेदिनी) 'अधरः' यस्य तादृशः। 'चिन्तया' शकुन्तला-विषयिण्या उत्कण्ठया यत् 'जागरणम्' अनिद्रा, तेन प्रताम्रे' प्रकर्षेण ताम्रवर्णे 'नयने' यस्य तादृशः महाराजः (एषु **स्वभावोक्तिः परिकराऽलङ्कारश्च**) **'क्षीणोऽपि'** अनुतापात् **कृशः अपि ;** मणि-पक्षे घर्षणात् क्षयं गतोऽपि ['क्षियो दीर्घात्'-(८।१।४६) इतिणत्वम्] 'संस्कारेण' शाणादिना 'उल्लिखितः' तनूकृतः घृष्ट इति यावत् ('स्यादुल्लिखितमुत्-कीर्णे तनूकृते च वाच्यवत्' इति मेदिनी] यद्वा 'संस्कारार्थम्' अङ्ग-रागार्थम् 'उल्लिखितः' शाणादिना घृष्टः 'महामणिः इव' हीरकादिरिव ['महा-शब्देन जात्यत्वं सर्व-गुणविशिष्टत्वं महत्वं च ध्वनितम्] यथा शाणो-ल्लिखितः महामणिः 'आत्मनः' स्वस्य 'तेजो-गुणात्' प्रभावाऽऽधिक्येन 'न आलक्ष्यते' कृशत्वेन न परि-दृश्यते तद्वत् [इत्युप**मालङ्कारः।** प्रपेति पृष्ठेति क्षीक्ष्येति **छेक-वृत्ति-श्रुत्यनुप्रासाः।** अथ चिन्तेति 'संकल्पः' ।। जागरेति 'निद्राच्छेदः' क्षीण इति तनुता। प्रत्या-दिष्टेति 'विषय-निवृत्तिः ।। इति कामावस्था अपि सूचिताः। अत्र **माधुर्यं नाम अयत्नजोऽलङ्कार उक्तः।** "सर्वावस्था-विशेषेषु **माधुर्यं** रमणीयता"—इति दर्पण-लक्षणात्। **शार्दूलविक्रीड़ितं छन्दः**] ।।६।।

196n.—1. **प्रभवत्**—(Over-whelming). **वैमनस्यं**—(Distraction of mind). But K & M supported by *Che'zy* explain 'प्रभवत:' by "**of the king** *i.e.* of one who rules". Cf. 'नाति प्रभवत: अपराध:' —*Vik. II.* (end). (Now vide 107n. 4). **2.** **पश्चात्ताप** &c.—Refers to the robes which one in those days was **to wear in love-lorn condition,** so that the audience might know one to be as such. Cf. '**विहित-नियम-वेषा** राजमहिषी'—*Vik. III.* "कुशल-विरचिता-नुकूल-वेष:'—*Ra. V.* 76. **3.** **सर्वास्व-वस्थासु &c.**—The idea is differently expressed by our poet else-where. Cf. 'किमिव हि मधुरं मण्डनं नाकृतीनाम्'—(25n. 8). 'राजा—(आत्मगतम्) अहो **सर्वास्ववस्थासु** अनवद्यता रूपस्य'—*Māla. II.* रमणीय + वुञ् = रामणीयकम्—Loveliness. Cf. 'सा **रामणीयक**-निधे रधिदेवता'—*MM.* 'तरुणी-स्तन एवं शोभते मणि-हारावलि-**रामणीयकम्**"—*NC. II.* 44. *ŚPB. I.* 39. **एवमुत्सुकोऽपि** &c.—Cf. 'निर्भरोत्कण्ठा-परीक्षाममपि श्लाघनीय-लावण्यां तनुं समुद्वहन्'—*Rat. IV.* **4.** **प्रत्यादिष्ट** &c—मण्डन-विधि = The act of donning. Cf. 'आभरणस्याभरण प्रसाधनविधे· प्रसाधन-विशेष:— *Vik. II.* 3. **5.** **वाम-प्रकोष्ठ** &c.—Vide (96n. 3.). **6.** **श्वासोपरक्त** &c.—'उपरक्त' sometimes mans '**tinged**'. Cf. 'द्विप-**द्वेषो-परक्ताऽङ्ग**-सङ्गिनी: स्वेद-विप्रुष:'—*ŚPB. II.* 18, but here it may mean '**distressed', parched'.** (Com). Cf. 'निश्वासाना-मशिशिरतया भिन्न-वर्णाधरोष्ठम्'—PA & MD.83. 'निश्वासेनाधर-किशलय-क्लेशिना'—*Ibid.* 89. **अपरक्त** means 'रक्त-हीन:—Bloodless"—*M*, but "**रक्त**" in the sense of **blood** is **un-Kālidāsian.** Besides blood-less or pale lip cannot be stated to be beautiful by Kañcukī, who is referring to the beauty of the king. *Vide. Ra.* IV. 60; *XII.* 64; PA&MD. 36; **7.** **प्रताम्र** &c.—"धूमाभि ताम्राक्षं"—*Ra XV.* 49—The king's eyes have become '**deep red"**, owing to sleeplessness caused by anxiety about Śak. **प्रतान्त** (R)—means 'distressed', from तम् (=to be distressed *in body or mind*). Cf. 'प्रविशति मुहु: कुञ्जं गुञ्जन् मुहु र्बहु ताम्यति'—' *GG.* 5. गाढोत्कण्ठा-ललित-लुलितैरङ्गकं स्ताम्यतीति'—*MM. I.* 15. **8.** **संस्कारो** &c.—संस्कार= A polishing stone'. 'उल्लिखितं'—Polished. Or, 'संस्कार—(VI. I. 137) = Decoration'. 'स्वभाव-सुन्दरं वस्तु न **संस्कारमपक्षते'**—*Dṛṣṭānta Śataka*, 49. 'यत्ते दृष्टम-संस्कार-पाटलोष्ठ-पुटं मुखम्'—*Śak. VII.* 23. ***MK.***

II. 10; also 'मणि श्शाणोल्लिढ, स्समर-विजयी हेति-दलितो, मद-क्षीणोनाग, श्शरदि सरिदाश्यान पुलिना । कलाशेष श्चन्द्र, स्सुरत-मृदिता वाल-वनिता तनिम्ना शोभन्ते, गलित-विभवा श्चार्ऽथिषु जना:" ।।—NŚ. 60 "पर्याय-पीतस्य सुरैर्हिमांशो कलाक्षय: श्लाघ्यतरो हि वृद्धे:"—*Ra. V.* 16. Kāli. elsewhere uses संस्कार simply in the sense of '*polishing*'. Cf. 'प्रयुक्त-संस्कार इवाधिकं बभौ'—*Ra III.* 18. and *MN* thereon. The word has been used in various other senses by our poet. *Vide* (*a*) *Ku. I.* 28; *Ra. XV*.. 76—(**refinement', 'grammatical purity'**); (*b*) *Ku. VII.* 2. *Ra. III.* 35—(**'education 'training of the mind'**); (*c*) *Ra.* 20—(**merit of action'**); (*d*) *Ra. X.* 79.—(**'purificatory ceremony'**). **9. न आलक्ष्यते** &c.—Notwithstanding the fact that a stone when smartened or polished in a machine, becomes thinner by losing its weight, still its brilliance is doubly enhanced due to its intrinsic lustre. Exactly similar is the case with Duṣyanta. Mental throe has, told upon his physique, but not upon his inherent magestic lustre. Cf. 'अपचितमपि गात्रं व्यायतत्वाद् अलक्ष्यम्'——*Śak. II.* 4; VII. 10 (last line).

Remark—Here the various stages of **love-lorn condition** (**अनङ्ग-दशा**) have been described (*Com.*). Read "नयनप्रीति: प्रथमं चिन्तासङ्गस्ततोऽथ संकल्प: । निद्रा-च्छेद स्तनुता विषय-निवृत्ति स्त्रपा-नाश: । उन्मादो मूर्च्छा इत्येता: स्मर-दशा दशैव स्यु रित्याचक्षते"—*Ujjvala-nīlamaṇi;* also *KSV. I.* 5.

Text :—**सानुमती** (राजानं विलोक्य)—**ठाणे क्खु पच्चादेस-विमाणिदा वि इमस्स किदे सउन्दला किलिस्सदि ।**

[**स्थाने** खलु प्रत्यादेश-विमानिताऽपि अस्य कृते शकुन्तला क्लिश्यति] ।

Sānumatī—(*Looking at the king*)—Rightly, indeed, although disdainfully rejected does Śakuntalā pine, after (*such a man*).

राजा—(ध्यान-मन्दं परिक्रम्य)—

आर्या **प्रथमं सारङ्गाक्ष्या प्रियया'प्रतिबोध्यमानमपि सुप्तम् ।**
(12, 18 **'अनुशय-दु:खायेदं हत-हृदयं' सम्प्रति विबुद्धम्'** ।।७।।
12, 15)

King—(*Walks about slowly, sunk in thought*)—

This accursed[5] heart[6] (*of mine*) previously asleep though roused[2] by my fawn-eyed beloved, is now[4]broad-awake (*but to*[3] *feel*) the throe of remorse[3] (7)

V. L.—'क्लिश्यति'—B. 'क्लाम्यति'—V. M. 'क्लाम्यतीति'—R.

सानुमतीति। 'प्रत्यादेशेन' निराकृत्या 'विमानिता' अवज्ञाता। 'कृते' इति निमित्तार्थ-सूचको निपातः [**अर्थे कृते** अव्यय तावत् **तादर्थ्ये** वर्तते द्वयम्' इति कोषसारः] 'स्थाने' युक्तं ('**स्थाने** तु कारणार्थे स्यात् **युक्त**-सादृश्ययोरपि' इति मेदिनी) 'खलु' इत्यवधारणे। **प्रथममिति**। 'प्रथमं' प्रत्याख्यान-समये 'सारङ्गस्य' मृगस्य अक्षिणी 'सारङ्गाक्षिणी' इव 'अक्षिणी' यस्याः तादृश्या [**उत्तरपद-लोपी बहुव्रीहिः**। षच्-(५।४।११३) ; ङीष्-(४।१।४१) ; अनेन तद्दृष्टि-मात्रेण प्रतिबोध उचित इति ध्वन्यते] तत्रापि '**प्रियया**' शकुन्तलया '**प्रतिबोध्यमानमपि**' **स्मर्यमाणमपि** (**स्वत एव प्रतिबोध उचितः, स नास्ति। तत्रापि नान्यस्य कस्यचित् किन्तु प्रियाया प्रयत्नेनापि अपेरर्थः**) 'सुप्तं' (६।१।१५) निद्रितम् अतएव 'इदं' मम 'हत-हृदयं' दुष्ट-हृदयं सम्प्रति अनुशयः' पश्चात्तापः' ('**भवेदनुशयो द्वेषे पश्चात्तापा**ऽनुबन्धयोः' इति विश्वः) तेन यत् 'दुःखं' तस्मै, तदनुभवितुमित्यर्थः (कर्मणि ४र्थी २।३।१४) '**विबुद्धं**' जागरितम् (अत्र पूर्वार्धे **विशेषोक्तिः**। अत्र प्रतिबोधाऽभावः तद्विरुद्धेन सुप्त-पदेनोक्तः। उत्तरार्धे **विभावनाऽनुप्रासौ च**)। 'साराङ्गाक्ष्या' इत्यत्र **लुप्तोपमा**। **आर्या** जातिः) ॥७॥

197n.—1. स्थाने—Justly. [Vide 161n. 1; 99n. 1.] It is but quite meet that though insulted, she should be thinking of such a loving husband, as is now clearly corroborated by his present state of mind. For similar idea, Cf. '**स्थाने** तपो दुश्चरमेतदर्थमपणया पेलवयापि तप्तम्। या दास्य मप्यग्य लभेत नारी, सा स्यात् कृतार्था किमुताङ्क-शय्याम्'—*Ku. VII.* 65. **2. सारङ्गाक्ष्या** &c.—It is quite unnatural on the part of the king to be asleep *i. e.*, to forget the fawn-eyed guile-less Śak. at all. Not to speak of his awakening out of his own accord, he was **not roused** even when her beloved came before him and tried to rouse him by reviving his memory by sundry ways (Act. V. Śak's speech. P. 472.) Cf. "मे ये पाशे एसे वसेछिल नबु जागिनि। कि घुम तोरे पेयेछिल हतभागिनी"—**Ravindra-Nātha, Gītāñjali. 3. हत-हृदयं**—(Cf. 30n.6) is often used as a **first** member of the compound in the sense of '*wretched*'. '*miserable*', *worthless*'—*AD.* The king accuses his heart, because it was dormant when it was necessary to be awake, and it awoke when there was no necessity. For this sense of 'हत', Cf. 'कुर्यामुपेक्षां **हत-जीवितेऽस्मिन्**'—*Ra. XIV.* 65; '**हत-जीविते** तुच्छ-जीविते'—*MN.* '**हत-**विधि-विलसितानां ह्री विचित्रो विपाकः'—*ŚPB. XI.* 64. '**हतविधि**-विलसितानां

दुष्ट-दैव-चेष्टितानाम्'—*MN*. Cf. the idea with "दयितां यदि तावदन्वगात् विनिवृत्तं किमिदं त्वया विना। सहतां हत-जीवितं मम प्रबलामात्मकृतेन वेदनाम्" ।।—*Ra. VIII*. 50; also 'सा लुप्तसञ्ज्ञा न विवेद दुःखम् प्रत्यागतासुः समतप्यतान्तः। तस्याः सुमित्राऽऽत्मज-यत्न-लब्धो मोहादभूत् कष्टतरः प्रबोधः"—Ra. *XIV*. 56. ।

Text :—सानुमती—णं ईदिसाणि तवस्सिणीए भाअहेआणि
[ननु ईदृशानि तपस्विन्या भागधेयानि] ।

Sānumatī—Oh, such is the lot of (*that*) poor (*creature*).

विदूषकः (अपवार्य)—**हुं, लङ्घिदो एसो भूओ वि सउन्दला-वाहिणा। ण आणे कहं चिकिच्छिदव्वो भविस्सदि त्ति** [हु, लङ्घित एष भूयोऽपि शकुन्तला-व्याधिना। न जाने कथं चिकित्सितव्यो भविष्यतीति] ।

Vidūṣaka (*Aside to the audience*)—Ah ! even again he is seized by "*Ś*akuntalā-malady". (*I*) don't know how (*he*) is to be doctored.

कञ्चुकी (उपसृत्य)—**जयतु जयतु देवः। देव, प्रत्यवेक्षिताः**[3] **प्रमद-वन-भूमयः। यथाकाम मध्यास्तां विनोद-स्थानानि**[4] **देवः।**

Chamberlain—(*Approaching*)—May Your Majesty be victorious. (*My*) Liege, the grounds of the peasure-grove have been (*thoroughly*)[3] examined. May Your Majesty resort to the seats[4] of amusement[4] just as it pleases you.

राजा—वेत्रवति, मद्वचनात् अमात्य मार्यपिशुनं ब्रूहि—चिर-प्रबोधात्[5] **न सम्भावित मस्माभि रद्य धर्मासन मध्यासितुम्। यत् प्रत्यवेक्षितं पौर-कार्य-मार्येण तत्**[6]**पत्रमारोप्य प्रस्थाप्यतामिति।**

King—Vetravati, speak to my minister, the noble Piśuna at my bidding thus :—"I cannot occupy the judgment-seat to-day owing to my waking[5] late[5]. Whatever civic affairs may have been examined by His Worship, let them (*all*) be committed[6] to paper[6] and forwarded (*to* me).

प्रतीहारी—जं देवो आणवदि (यत् देव आज्ञापयति)। (इति निष्क्रान्ता)।

Portress—As Your Majesty commands. (*This said, goes out*).

राजा—वातायन ! त्वमपि स्वं नियोग मशून्यं कुरु।

King—Vātāyana ! you also attend to your own task.

कञ्चुकी—यदाज्ञापयति देवः। (इति निष्क्रान्तः)।

Chamberlain—As Your Majesty commands. (*Exit*).

V. L.—'हुं'—B; HS. Omitted by others. 'चिर-प्रबोधात्'—

B. M. V. S. 'चिर-प्रबोधनात्'—R; B. reads 'प्रस्थाप्यताम्' for 'दीयताम्' । 'वातायन'—R. V. M. 'पार्वतायन'—B. P. HS.

सानुमतीति । 'तपस्विन्याः' अनुकम्प्यायाः ['तपस्वी तापसे चानुकम्प्ये त्रिषु इति मेदिनी) 'ईदृशानि' (कञ्–३।२।६० ; ईदम्=ईश–६।३।९०) अननुकूलानि । 'ननु' इत्यवधारणे । **विदूषक इति** । 'हुं' वितर्के प्रश्ने वा ('हुं वितर्के परिप्रश्ने' प्रत्यमरः] 'भूय' इत्यनेन मृगया-कालिकं वृत्तं प्रत्यभिज्ञापितम्', शकुन्तला एव व्याधिः उद्वेगदायित्वात् तेन लङ्घितः आक्रान्तः । केन उपायेन 'चिकित्सितव्यः' उपचरितव्यः, अस्य व्याधेः उपशमः 'भविष्यति' इत्यर्थः । **कञ्चुकीति** । 'प्रत्यवेक्षिता' इति नृपस्य निःशङ्क-भ्रमणार्थं कार्यम् इति नीतिः । **राजेति** । **'पिशुन' इति मन्त्रि-नाम** । 'चिर-प्रबोधात्' **विलम्बेन जागरणात्** । यद्वा रात्रौ **बहुकालं जागरणात्** । अतएव असुस्थ - देह-मानसत्वात् । 'अध्यासितुम् अध्यासनम् [अव्ययकृतो भावे भवन्ति इति वक्तव्यम्'— इति प्रभा—३।५।६७] 'न सम्भावितम्' असम्भवम् इत्याशयः । 'पौराणां कार्यं व्यवहार-रूपं यत् 'प्रत्यवेक्षितं' पर्यालोचितं तत् 'पत्रम् आरोग्य' लेख-रूपेण इत्यर्थः । 'प्रस्थाप्यताम्' प्रेर्यताम् इति ब्रूहि इत्याशयः ।

198n.—1. तपस्विन्याः—(125n. 6). **2. लङ्घितः**—Attacked, seized, Cf. 'आतप-लङ्घनात्, बलवदस्वथा शकुन्तला'—((82n. 7).) "कक्षाग्नि-लङ्घित-तरोरिव दृष्टिपातः"—*Ra. XI.* 92; (212*n.* 6). "Here the Vidusaka uses **medical** terms. * * The first treatment given to a patient (*generally one suffering from fever*) is fasting (**लङ्घन**) and then comes (चिकित्सा) diagnosis and cure. लङ्घन here correspond to the king's abstaining from pleasures"—*Kāle.* **3. चिकित्सितव्यः**—कित् (*to cure a disease*) takes 'सन्' in **स्वार्थे** and **not** in the sense of **desideratum** by 'गुप-तिज-किद्भ्यः सन्'–(3. 1. 5). चिकितसति-ते, (लिट्-चिकित्साञ्चकार), लुङ् अचिकित्सीत् । "मया न पठिता चण्डी, त्वया नापि चिकित्सितम्"-Gaṇa-darpaṇa. Now read 'एते गुप्तिजादयः **सप्त-धातवः** गुपेर्निन्दायाम् इत्यादि-निबन्धेषु अर्थेषु **नित्यं सन्नन्ताः** । * निन्दादिभ्यः अन्येषु * अर्थेषु अनुदात्तानुबन्ध-रहिताः सनन्ताः **चौरादिका** एव **भवन्ति, न तु भौवादिकाः**"—*BM.* 2395. **4. प्रत्यवेक्षिताः** &c.—प्रमदानां वनम् इति **प्रमद-वनं**—((194*n.* 4; 3*n.* 4.) **प्रत्यवेक्षिताः**— Examined carefully. Before the entrance of the king in the pleasure-garden or in all court-rooms, public or private, faithful officers are sent to inspect carefully the respective places,

to see if these are free from any spy or an assasin, who may be lurking there. Read 'विज्ञेयं प्रमद-वनं नृपस्तु यस्मिन् शुद्धान्तैः सह रमते पुरोपकण्ठम्'—*Hal.* **5. अमात्य** &c.—अमा सह समीपे वा भव इति अमा+त्यप् ['अव्ययात् त्यप्'—4. 2. 104.]=अमात्यः—Who sits near the king, *i.e.* a minister. **आर्य**—(3*n.* 1) *is significant, for only a noble minister* who is virtuous, learned and self-restrained should be entrusted with the civic affairs when the king is tired. Read 'अमात्यमुख्यं धर्मज्ञं प्राज्ञं दान्तं कुलोद्भवम् । स्थापयेदासने तस्मिन् खिन्नः, कार्येक्षणे नृणाम्' ।।—*MS. VII.* 141. **6. चिर-प्रबोधात्**—Either 'having got up late' or "having kept awake at night for a long time". **7. सम्भावितम्** &c.—सम्+भू (णिच्) signifies 'fitness', 'adequecy'. Cf. 'न यन्नियन्त समभावि भानुना'—*ŚPB. I.* 27; **संभावनां** भूतिमिवोद्धरिष्यन्'—*Ki. III.* 39, where *MN* has 'संभावनां योग्यताम्' । Hence सम्भावितं means 'fit'= (समर्थ= अलम्) । Thus तुमुन् (**अध्यासितुम्**) is by 'पर्याप्ति-वचनेषु **अलमर्थेषु'**—(3.4.66.)—**'पर्याप्ति-शब्द-योगे,** धातोः परः तुमुन्-प्रत्ययः स्यात्' —*Prabhā.* Or, **'अध्यासितुम्'** means 'अध्यासनम्'—(31n. 3). **प्रस्थाप्यताम्** —"प्र+स्था+णिच्" means 'to send.' Cf."तौ दंपती स्वां प्रति राजधानी प्रस्थापयामास वशी वशिष्ठः"—*Ra. II.* 70. **9. स्वं नियोगम्** &c.—(66*n.* 1).

Text:—विदूषकः—किदं भवदा णिम्मच्छिअं । सम्पदं सिसिरा-तव-च्छेअ-रमणीए इमस्सिं पमद-वणुद्देसे अत्ताणं विणोदेहि ।

[कृतं भवता निर्मक्षिकम् । साम्प्रतं[1] शिशिरातप-च्छेद-रमणीये[2] अस्मिन् प्रमद-वनो-द्देशे आत्मानं विनोदय] ।

Vidūṣaka—Even the (*last*) fly is driven by Your Majesty. Now[1] divert yourself in this part of the pleasure-garden,[2] delight--ful (*as it is*), [2]owing to the diminution of(*extreme*) cold and heat[2].

राजा (निश्वस्य)—**वयस्य ! यदुच्यते "रन्ध्रो-पनिपातिनोऽनर्थाः" इति तदव्यभिचारि[1] वचः । पश्य—**

मुनि-सुता-प्रणय-स्मृति-रोधिना
द्रुतविलम्बित **मम च मुक्तमिदं तमसा मनः ।**
(नभभर) **[4]मनसिजेन सखे ! प्रहरिष्यता**
धनुषि चूत-शरश्च निवेशितः ।।८।।

King (*Sighing*)—Friend "through[3] chinks in rush all mis-fortunes[3]"—this which is said, is an [1]unexceptionable saying[4].

Behold—My friend ! no sooner was the mind of mine freed from the gloom that obstructed the remembrance of (*my*) love for the ascetic's daughter, than the mango-(*bloossom*)-shaft was affixed to (*his*) bow by the mind-born[5] (*God*), wishing to strike me (8)

V. L.—'शिशिरातप-च्छेद'—R. V. M. 'शिशिरावच्छेद'—S. 'शिशिर-विच्छेद'—B. B reads 'पश्य' for 'कुत:'। 'यदुच्यते &c.,—'B.—'रन्ध्रोपनिपातिनोऽनर्था इति यद् उच्यते—R. V. M. All excepting B, P, Dr. add 'वच:' after 'अव्यभिचारि'।

विदूषक इति। 'शिशिरस्य' इति शीतस्य 'आतपस्य' उत्तापस्य 'छेदेन' लाघवेन 'रमणीये' सुख-सेव्ये, नाप्यत्यन्तं शिशिरं नाप्यातप इत्याशय:। यद्वा छाया-बाहुल्येन 'शिशिरा:' शीता ये 'आपत-च्छेदा:' तै: रमणीये। यद्वा 'शिशिर' श्च 'आतपश्च इति शिशिरातपौ' तयो: ऋत्वो र्य: 'छेद:' अवकाश:, वसन्त इत्यर्थ:।' तस्मिन् 'रमणीये' इति सहसुपेति समास:। 'आत्मानं' ['गतिबुद्धि—' (१।४।५२) इति प्रयोज्य-कर्तु: कर्मत्वम्]। **राजेति।** 'रन्ध्रे' छिद्रे दुस्समये इत्यर्थ: 'उपनिपतन्ति' सम्भूय आगच्छन्ति ये तथोक्ता: 'अनर्था': आपद: 'इति यत् उच्यते' लोकै: इति शेष:,'तत् वच:' सा उक्ति: न व्यभिचरति न स्खलति इति 'अव्यभिचारि' अनन्यथा-सिद्धम् अर्थात् सत्यम् [इति कुमारसम्भवे मल्लिनाथपादा:।। 'अवश्यम्भावि' इति शङ्करपादा:]। **मुनीति।** हे 'सखे' विदूषक, 'मुनि-सुताया' शकुन्तलाया य: 'प्रणय:' प्रेम 'तस्य स्मृतिं' स्मरणं 'रुणद्धि' आवृणोति यत् तादृशेन स्मृति-विलोपिना 'तमसा' तमोगुण-जनित-मोहेन 'मम इदं मन:' मानस 'मुक्तञ्च' स्मृत्या मोह-निरसनेन तस्या: स्मरणम् अधुना मे संवृत्तम् इति **प्रथमोऽनर्थ:।** किंतु यदैव मोह: निर्भिन्न: तदैव 'प्रहरिष्यता' प्रहर्तु-कामेन 'मनसिजेन' काम-देवेन [शृङ्गार-रूपेण मनसि जायते स्म। 'सप्तम्यां' जनेर्ड:'—(३।२।९७) ; तत्पुरुषे कृति—' (६।३।१४) इति सप्तम्या अलुक्। लुकि तु '**मनोज:**'—इति भानुजि:] 'धनुषि' चापे 'चूत-शर:' विरहि-जन-हृदय-विदारक-श्रेष्ठ इत्यर्थ: '**निवेशितश्च**' मां प्रति निक्षेपार्थं **स्थापितश्च**, कामानलेन दग्धुमेव वसन्त: समुपागत इति **द्वितीय अनर्थ:** [अत्र पूर्वार्ध-परार्धयो: चकार-द्वयं मोचन-निवेशन-क्रिययो: **यौगपद्यं** सूचयति। अथच काम-कर्तृक-चूत-शर-निवेशनम् प्रति तमसा मनोमोह-मोचनममेव कारणम्, यौगपद्येन च तयो: पौर्वापर्य-विपर्ययाद् **अतिशयोक्ति:।** तन्मूलश्चायं **क्रिया-समुच्चयालङ्कार:।** तथाचोक्तं दर्पणकारै:—"एते हि गुणक्रिया-यौगपद्ये समुच्चय-प्रकारा नियमेन कार्य-कारण-काल-नियम-विपर्यय-रूपा**ऽतिशयोक्ति-मूला:**" इति सिद्धान्तवागीशपादा:। भोज-राजेन तु "अदृष्टादपि स्मरणे **स्मरणा-लङ्कार:**" इत्युक्त्वा तदलङ्कार इदमुदाहृतम्। **अनुप्रासश्च। द्रुतविलम्बितं** वृत्तम्] ।।८।।

199n.—1. निर्मक्षिकम् &c.—(66n. 2). **2. रन्ध्रो** &c·–रमं क्रीड़ां धरति मूलविभुजादित्वात् कः = रन्ध्रम्—BhD. Most children are seen to play with fingers when any hole or crevice is seen, hence 'a weak or vulnerable point, assailable point'—*AD. Ra. XII.* 11; *XV.* 17; *XVII.* 61. **अनर्थाः**–न अर्थाः–Undesired occurrence, hence misfortune. *Dr. Boehtlingk* translates—"*The unfortunate fall into a hole* (*grave*)". which seems supportable by a reading "रन्ध्रोपरि-पातिनोऽनर्थाः' noticed by *K* although not adopted by him. For similar ideas Cf. "एकस्य दुःखस्य न यावदन्तं गच्छाम्यहं पारमिवार्णवस्य। तावद्-द्वितीयं समुपस्थितं मे **छिद्रेष्वनर्था बहुलीभवन्ति**"—Mahā Nātaka-IV. 43; 'यथा पुष्पस्य प्रथमे विकाशे समेत्य पान्ति मधुपाः पतन्ति। तथा मनुष्यस्य विपत्ति-काले **छिद्रेष्वनर्थाः बहुलीभवन्ति**' ।।—*MK.* 'क्षते प्रहरा निपतन्त्यभीक्ष्णं, धन-क्षये मूर्च्छति जठराग्निः। आपत्सु वैराणि समुद्भवन्ति, **छिद्रेष्वनर्था बहुली-भवन्ति**'–*PT.* 'प्रायो गच्छति यत्र भाग्य-रहितस्तत्रैव यान्त्यापदः'—*NS.* 86. "One woe doth tread upon another's heel, so fast they follow. When sorrows come, they **come not single spies, But in battalions'**—**Hamlet.** *Act. IV.* **'Tsai[3] Nan[3] Hsi[1] Erh[4] Ju[4]** -**Chinese** proverb exactly means the same thing. **'Nakittsu Ra Ni Hachi'**—**Japanese** proverb means—'Bees sting on crying face". **3. अव्यभिचारि–'व्यभिचार'** is a *Logical Term,* meaning 'a fallacious हेतु, the presence of the हेतु without the साध्य'—*AD. Cf.* 'हेतोः साध्याऽभाववद्वृत्तित्वं **व्यभिचारः'**—*Taraka-kaumudi.* Hence it but fails to lead to the right conclusion. Thus **'अव्यभिचारी'** means 'that which is found always to be true without exception.' Cf. 'न रूपम् इत्यव्यभिचारि तद्वचः'—(115n, 2. *middle*). **4. चूत-शरश्च** &c.—चूत-शर is put in the bow as it is the most effective of the five arrows of Cupid. Cf. **'पञ्चाभ्य-धिकः** शरो भवितुम्'—*VI.* 3. *Supra.* The two **च**s show **synchrony** of the two actions.–(182*n*, 5). **निवेशितः**–(149n. 5).

Text :—विदूषकः—भो वयस्स ! चिट्ठ दाव जाव इमिणा दण्ड-कट्ठेण कन्दप्प-बाणं णासेमि [भो वयस्य ! तिष्ठ तावत्। यावदनेन दण्ड-काष्ठेन कन्दर्प-बाणं नाशयामि]। (इति दण्ड-काष्ठमुद्यम्य चताङ्कुरं पातयितुमिच्छति)।

Vidūṣaka—Friend, tarry a bit, while (*I*) destroy the bow of cupid with (*a cut of*) this staff.

(*This said, raising his staff, wishes to fell down the mango-sprout*).

राजा—(सस्मितम्)—भवतु, दृष्टं ब्रह्म-वर्चसम्[1]। सखे, क्वेदानीमुपविष्टः प्रियायाः किञ्चिद-नुकारिणीषु लतासु दृष्टिं विनोदयामि[2]।

King—(*With a smile*)—Enough, (*your*) priestly[1] prowess[1] is seen. Friend, where seated shall I (*now*) feast[2] my sight amongst the vines that imitate (*my*) beloved ?

विदूषकः—णं आसण्ण-परिआरिआ चदुरिआ भवदा सन्दिट्ठा। माहवी-मण्डवे इमं वेलं अदिवाहिस्सं। तहिं मे चित्त-फलअ-गदं स-हत्थ-लिहिदं तत्तहोदीए सउन्दलाए पड़िकिदिं आणेहि त्ति [ननु आसन्न-परिचारिका[3]चतुरिका भवता [4]संदिष्टा। माधवी-मण्डपे इमां वेलाम् अतिवाहयिष्ये, तत्र मे चित्र-फलक-गतां स्व-हस्त-लिखितां[5]तत्रभवत्याः शकुन्तलायाः प्रतिकृतिम्[6] आनय इति]।

Vidūṣaka—Why, you have already ordered[4] (*your*) [3]side-waitress Caturikā thus:—I will spend this hour in the Jasamin-grove. Bring there the likeness[6] of Her Ladyship Śakuntalā which is sketched[5] with my own hand[5] on a picture-board.

राजा—ईदृशं हृदय-विनोद-स्थानम्। तत्तमेव मार्गमादेशय।

King—Such now are the means of relieving (*my*) heart. So direct me that very way.

विदूषकः—इदो इदो एदु भवं (इत इत एतु भवान्)।

Vidūṣaka—This way, this way, come Your Highness.

(उभौ परिक्रामतः—सानुमत्यनुगच्छति)—विदूषकः—एसो मणि-सिला-पट्टअ-सणाहो माहवी-मण्डवो उवआर-रमणिज्जदाए णिस्संसअं साअदेण विअ णो पड़िच्छदि। पविसिअ णिसीददु भवं [एष मणि-शिला-पट्ट-सनाथो[7] माधवी-मण्डप [8]उपकार-रमणीयतया च स्वागतेन इव नौ प्रतीच्छति[9]। तत् प्रविश्य निषीदतु[10] भवान्)। (उभौ प्रविश्योपविष्टौ)।

(*Both turn round. Sānumatī goes after*).

Vidūṣaka—Here furnished[7] with a jewelled marable-seat[7], the Jasamin-grove, pleasings[8] as it is with a bounty[8] of flowers, is beckoning[9] us, as it were, with a (*soundless*) welcome. Therefore entering, let Your Honour, sit[10] down. (*Both enter and sit down*).

V. L.—'कन्दर्प-व्याधम्'—K. '० बाणम्'—B. M. V. 'व्याधिम्'—R. S.; B.—'विनोदयामि' for 'विलोभयामि'। 'हृदय-विनोदन-स्थानम्'—R.V.M. S.'एव हृदयाश्वासनम्'—B. HS. 'विनोदस्थानम्'—HS Com. 'उपहार'—R.V.M. 'उपकार'—B.HS. 'उपचार'—S. 'त्वाम्'—B. 'नौ'—R.M.S.

राजेति। 'ब्रह्मणः ब्राह्मणस्य 'वर्चः' तेजः ['वर्चो नपुंसकं रूपे विष्ठायामपि तेजसि' इति मेदिनी] इति 'ब्रह्म-वर्चसम्' ['ब्रह्म-हस्तिभ्यां वर्चसः'-(५।४।७८)

इति समासान्तः अच्] 'किञ्चित्' न तु सम्यक् 'अणुकारिणीषु' सदृशीषु ['तस्य चानुकरोतीति शब्दाः सादृश्य-सूचकाः' इति काव्यादर्शः] 'विनोदयामि' (३।३।१३१) आश्वासयामि, परिदर्शन-सुखं लप्स्ये इत्यर्थः। **विदूषक इति।** 'ननु' इति परमताक्षेपे। 'आसन्ना' विश्वास-भाजनत्वात् समीपवर्तिनी 'परिचारिका' सेवका। 'चतुरिका' इति परिचारिका-नाम। 'सन्दिष्टा' आज्ञापिता। 'चित्रफलकं गताम्' आलेख्ये समर्पितां लिखितां' 'स्वहस्तेन चित्रितां 'प्रतिकृतिं' प्रतिमाम्। **राजेति।** साक्षात् प्रियायाःदुर्लभत्वात् 'ईदृशं' प्रियायाः आलेख्य-परिदर्शन-रूपम्। 'हृदयस्य-**विनोद-स्थानम्' काल-यापनोपाय** इति भावः। **विदूषक इति।** मणि-शिलायाः' रत्न-प्रस्तरस्य 'पट्टकेन' पीठेन आसनेन इति यावत् (**'पट्टः** पेषण-पाषाणे व्रणादीनाच बन्धने। चतुष्पथे च राजादि-शासनान्तर-**पीठयोः'** इति मेदिनी] 'सनाथः' युक्तः **'उपकारस्य' विकीर्ण-कुसुमादेः** 'रमणीयता' माधुर्यतया [**'प्रकर**श्चोपकारश्च विकीर्ण-कुसुमादिषु' इति विश्वः]। **'उपचार-रमणीयतया'** इति पाठे तु 'उपचारः' पुष्पो-पचार स्तेन 'रमणीयः', तस्य भावः, तया। 'स्वागतेन' कुशल-प्रश्नेन ['स्वागतं कुशल-प्रश्न' इति हारावली] 'प्रतीच्छति' सम्भावयति प्रत्युद्गच्छति इति यावत्।

200n.—1. कन्दर्प &c.—Cupid is called कन्दर्प, as he once deluded even *Brahmā*. Cf. 'अभिलाषमुदीरितेन्द्रियः स्व-सुतायाम् अकरोत् प्रजापतिः'—*Ku. IV.*41. Hence 'कम्' (ब्रह्माण) दृप्यति मोहयति इति क + दृप् + अच् (३।१।१३४)। पृषोदरादित्वात् साधुः। Or 'कं न दृप्यति' मोहयति इति कन्दर्पः। दृप् हर्ष-मोहनयोः। *M* is so **much biassed** to the Devanāgara-reading, that he wants to retain the reading 'कन्दर्प-व्याधिम्' by explaining 'व्याधिम्' as 'hunting', 'shooting', which is hardly to be met with in any Sanskrit work. He forgets that 'व्याध' and 'व्याधि' are not derived from the **same root** (*as he seems to take them*). 'व्याध' is from 'व्यध्' (2. 1 121); while 'व्याधि' from 'धा' (3. 3. 92). Besides one may parry a 'वाण' with a stick, but not a 'व्याधि'। Cf. 'तिष्ठ, तिष्ठ, यावदेतेन दण्ड-काष्ठेन पातयिष्यामि'—*MK. V.* B's **कन्दर्प-वाण** refers to Mango-sprout. Vidūṣaka wants to cure the disease of the king (चिकित्सितव्य) by destroying the **remote** cause. **2. ब्रह्म-वर्चसम्**—वर्च्चः (सान्त) means '*ordure*' and *power*.. In connection with ब्रह्म, हस्ती, पल्य, राजन् (*Vārt.* 946.), it becomes अकारान्त (*neuter*). Vide (*Com.*) 'हेतु स्त्वद्ब्रह्मवर्चसम्''—*Ra. I.* 63. **'ब्रह्मवर्च**-सकामस्य कार्यं

विप्रस्य पञ्चमे'—*MS.* 11. 37; *IV.* 94. **3. विनोदयामि**-(B). Others read '**विलोभयामि**' which is **rejected,** as 'वि+लुभ्+णिच् in Kāli. *ordinarily* means '**to allure**'. "**entice**", Cf. "स्मर यावत् न विलोभ्यसे दिवि" —*Ku. IV.* 20. "अङ्गनास्तमधिकं व्यलोभयन्" &c.—*Ra. XIX.* 10; *Māla. III.* (5. 'वि+नुद्+णिच्) however, means '**to spend** (*as time*),' '**to amuse**', '**entertain**', "केनात्मानं विनोदयामि"—*Vik. II.* "आत्मानं विनोदयामि"—Act. *III* p. 227. "विनोदयिष्यन्ति नवाभिषङ्गामुदारवाचो"—*Ra. XIV.* 77. "लक्ष्मीर्विनोदयति येन दिगन्त-लम्बी"—Ra. *V.* 67. Also, *UC* in *n.* 6. Note also that 'विदूषक' says to the king 'आत्मानं विनोदय', and the king **repeats** '**विनोद**' here and in his following speech. There **are four ways** by which a person in separation or one who is not yet united with his desired object, can while away his time and some what allay his anguish. These are enumerated thus by the आलङ्कारिकs:-(*i*) **Looking at things resembling the beloved**–(*MD. II.* 44; *Ra. VIII* 59-66). (*ii*) **Drawing a picture of the beloved**–(*MD. II.* 45; *Ra. XIX.* 19). (*iii*) **Obtaining a sight of the beloved** in dream-(*MD. II.* 45). (*iv*) **Touching things touched** by the beloved.–(*MD. II.* 46). Also "वियोगा-ऽवस्थासु प्रिय-जन-सदृक्षाऽनुभवनं, ततश्चित्रं कर्म, स्वप्न-समये दर्शनमपि। तदङ्ग-स्पृष्टानाम् उपगत-वता स्पर्शनमपि, प्रतीकारः काम-व्यथित-मनसां कोऽपि गदितः" ॥—*Guṇapatākā qtd. MN on Ra. VIII.* 92. (*q. v.*) Innumerable illustrations of these may be had in *Vaiṣṇava* literatures. Here the king will allay his grief by **seeing** the portrait of Śak. (*Infra*) and also by observing the slim **creepers** having the likeness of her. **4. परिचारिका**—"संवाहने च गन्धे च तथा चैव प्रसाधने। तथाऽऽभरण-संयोग-माल्य-संग्रथनेषु च। विज्ञेया नामतः सा तु नृपतेः परिचारिका"—*MG.* **5. माधवी** &c.—(*Goertnera racemosa*) is a gigantic and luxuriant climber (bearing white fragrant flowers) but when it meets with nothing to grasp, it assumes the form of a sturdy tree the highest branches of which display, however, in the air their natural flexibility and inclination to climb.'—*Sir William Jone's Works Vol. V.* (*P.* 124.)
6. ईदृशं &c.—**स्थानम्**=Means, **तत्**=Therefore, as Śak. is lost to me. so these (*viz. the picture and the sight of creepers slightly imitating slim Śak.*) will be my only **means** of relief. Cf. 'अर्ध-लिखितमेतद् विनोद-

स्थानम्'—*Śak. VI;* 'योऽपि विश्राम-**स्थानं** वसन्तकः सोऽपि देव्या संयतः'—*Rat. IV.* King Aja passed long eight years ('तेनाष्टौ परिगमिताः **समा** &c.—*Ra. VIII.* 92) by–'**सादृश्य-प्रतिकृतिदर्शनैः** &c.—Rāma also assuaged his grief by a **sight of the goldern image of Sītā.** 'रामः—"हिरण्मयी सीता-प्रतिकृतिः। * * तत्रापि तावत् वाष्पदिग्ध चक्षु-**र्विनोदयामि**"—*UC. III.* 'प्रायेणैते रमण-विरहेष्वङ्गनानां **विनोदाः**'—*MD. II.* 26. "एते पूर्वोक्ताः '**विनोदाः**' **काल-यापनोपायाः**'—*MN.* **7. उपकार** &c.—'**उपकार**' means 'बिकीर्ण-पुष्प' (*Com.*). The grove had a very fascinating appearance owing to flowers blossomed in all directions. With **उपहार**—(R), explain 'उपहार' as पुष्पोपहार–Ra. V. **74; उपहार** may also mean floral decoration (mosaic) on the floor. Cf. Rām. III. 74. 23. The grove appeared to receive the king with floral presents. **उपचार**–(102n. 2.) also suits the context well. "एष मणि-शिला-पट्ट-सनाथः अतिमुक्त-लता-मण्डपः भ्रमर-संघट्ट-पतितैः कुसुमैः स्वयमिव **कृतोपचारः** भवन्तं प्रतीच्छति"—*Vik. II.* **8. स्वागतेन** &c.—(129n. 1); 'प्रती+इष्'=To carry'—(187n 5), here '*to welcome*'. For similar idea, Cf. "मधुरिव वदन्ति **स्वागतं** भृङ्ग-शब्दैः' नतिमिव फलनम्रैः कुर्वतेऽमी शिरोभिः। मम दधत इवार्घं पुष्पवृष्टिं किरन्तः कथम् अतिथि-सपर्या शिक्षिताः शाखिनोऽपि"—*NN. I.* 11.

Text—सानुमतीः—लता-संस्सिदा वेक्खिस्सं दाव पिअ-सहीए पडिकिदिं। तदो से भत्तुणो बहुमुहं अणुराअं णिवेदइस्सं [लता-संश्रिता द्रक्ष्यामि तावत् प्रिय-सख्याः प्रतिकृतिम्। ततस्तस्यै भर्तुर्बहुमुख मनुरागं निवेदयिष्यामि]।

॥ [तथा कृत्वा स्थिता] ॥

Sānumatī—Resorting to (*this*) creeper, (*I*) will just see the picture of (*my*) dear friend. Then (*of her*) husband's all round affection, (*I*) will inform her. (*Stands having done the same*).

राजा (निश्वस्य)—सखे, सर्वमिदानीं स्मरामि शकुन्तलायाः प्रथम-वृत्तान्तम्। कथितवानस्मि भवते च। स भवान् प्रत्यादेश-वेलायां मत्समीपगतो नासीत्। किन्तु पूर्वमपि न त्वया कदाचित् सङ्कीर्तितं तत्रभवत्या नाम। कच्चिदहमिव विस्मृतवानसि त्वम्।

King (*Sighing*)—Friend ! now (*I vividly*) remember all the previous incidents (*in connection with*) Śakuntalā. And (*I*) had related (*the same*) to you. That self of yours was not by my side at

the time of her disavowal. But even before, you never breathed Her Ladyship's name (*to me*). Did you, like myself, forget it ?

विदूषकः—ण विसुमरामि। किंदु सव्वं कहिअ अवसाणे उण तुए भणिदं परिहास-विअप्पिओ एसो ण भूदत्थोत्ति। मए वि मिप्पिण्ड-बुद्धिणा तह एव्व गहिदं। अहवा भविदव्वदा क्खु एत्थ बलवदी [न विस्मरामि। किन्तु सर्वं कथयित्वा अवसाने पुनस्त्वया भणितं परिहास-विजल्पित एष न भूतार्थ इति। **मया** अपि मृत्पिण्ड-बुद्धिना तथा एव गृहीतम्। **अथवा भवितव्यता खल्वत्र बलवती**]।

Vidūṣaka—(*No*), I did not forget. But having told everything, you (*yourself*) added at the end, (*that*) it was a talk in jest and not a fact. Clod-witted as I was, I, too, took (*it*) like that. Or, destiny indeed (*is*) here potent.

सानुमती—एव्वं णेदं [एवं न इदम्) Sānumatī—Exactly so.

राजा—(क्षणं ध्यात्वा)**—सखे, परित्रायस्व माम्।**

King (*Musing for a while*)—Save me, (*my*) friend.

विदूषकः—भो, किं एदं। अणुववण्णं क्खु ईदिसं तुइ। कदावि सप्पुरिसा सोअ-वत्तव्वा ण होन्ति। णं पवादे वि णिक्कम्पा एव्व गिरीओ।

[**भोः** किमेतत्। अनुपपन्नं खलु ईदृशं त्वयि। **कदापि सत्पुरुषाः शोक-वास्तव्या न भवन्ति।** ननु प्रवातेऽपि निष्कम्पा एव गिरयः]।

Vidūṣaka—Ho (*friend*) ! what's this ? Unbecoming this is, indeed, of you, Never do good men ("**the heroes**"—**commenta--tor Rāma**) become the receptacle of grief. Even in a hurricane, the mountains are quite unshaken.

V. L.—'सश्रिता'—R. B. V. M. 'दर्शिता'—S; B reads 'बहुमतम्' for 'बहुमुखम'। 'किन्तु पूर्वम्'—B. 'पूर्वम्'—R. M. S. 'कच्चित्'—B. M. S. 'क्वचित्'—R. 'शोकवस्तव्याः'—B. V. Some of the B—Mss read 'शोकचिताः'। 'शोकवास्तव्याः'—R. 'शोकपात्रात्मनः'—M. 'शोकप्राप्तव्याः'—S. 'परिहास-विजल्पितः'—B. HS. P. 'विजल्पः'—Others.

सानुमतीति। 'तस्यै' शकुन्तलायै [तथाचोक्तं हरिणा—"व्याददाने चतुर्थी स्यात् दर्शने कथनेऽपि च। आदाय करणे योगे सप्तमी कैश्चिदिष्यते" इति]. 'बहुमुखम्' अनेक-प्रकारैः प्रकटीभूतम्। **राजेति।** 'प्रथम-वृत्तान्तं' कण्वाश्रमे शकुन्तलया सह यत् परिचयादिकं कृतं तत् सर्वमित्यर्थः। 'प्रत्यादेश-वेलायां' तस्याः निराकरण-समये 'मत्-समीपगतो नासीत्' यतो हंसपदिकायाः नागरक-वृत्त्या परितोषणार्थं त्वं मया प्रेरितः अभूः। 'पूर्वमपि' प्रत्याख्यानात् प्राक् अपि 'संकीर्तितं' प्रसङ्ग-क्रमेण उक्तम्। 'कच्चित्' इति वदितुमिच्छामि ("कच्चित् काम-प्रवेदने"

इत्यमरः। "काम-प्रवेदन मिष्ट-परिप्रश्नः—"कच्चित् जीवति मे माता" इति क्षीर-स्वामी। अनतिचिरेणैव अतिविस्मरणात् आत्मनः स्वल्प-मतित्व-दोष-निरोधनाय माधव्यस्यापि विस्मरणम् इष्टम् इत्याशयः)। **विदूषक इति**। 'अवसाने' नगरात् प्रत्यावर्तन-वेलायाम्। 'एष' शकुन्तला-वृत्तान्तः 'परिहासेन विजल्पितः' नर्मोक्तः, 'न भूतार्थः' सत्यार्थः ['युक्ते क्ष्मादौ ऋते भूतं प्राण्यतीते त्रिषु' इत्यमरः]। 'मृदां' मृत्तिकानां 'पिण्डः' निवहः इति 'मृत्पिण्डः'। तादृश इव स्थूला 'बुद्धिः' यस्य तथोक्तेन अर्थात् यथाश्रुत-ग्राहिणा मूढ़ेन मया। तथा एव' तव वाक्यं परिहास-जल्पन-रूपेण एव 'गृहीतम्' अवबुद्धम्। ननु तथापि कदाचित् तव तस्या नाम-सङ्कीर्तन मुचितम् आसीत् इत्याह 'अथवा' इति आक्षेपे। भवितुम् अर्हति इति 'भवितव्यम्' अवश्यम्भावि वस्तु [**बाहुलकात् कर्तरि तव्यः** —३।३।११३) तस्य भावः 'भवितव्यता बलवती खलु' इति निश्चये। न तव मम वा दोषः कश्चित्, परन्तु दैवमेव अत्रातिरिच्यते इत्याशयः। **विदूषक इति**। 'ईदृशं' शोकाभिभूतत्वम्, यद्वा "सखे परित्रायस्व मां" इत्याकारा कापुरुषोक्तिः 'अनुपपन्नम् अनुचितम्। वसति इति '**वास्तव्यः**' ['वसेः तव्यत् कर्तरि णिच्च', वा:—२८३४ इति **कर्तरि तव्यत्**] वस्ता इत्यर्थः। 'शोकः वास्तव्यः' वस्ता येषु ते 'शोक-वास्तव्याः" शोकपात्रं ("वाऽऽहिताग्न्यादिषु"–(२।२।३७, ९००) इति वास्तव्य-शब्दस्य परनिपातः। वाहिताग्न्यादिः **आकृति-गणः**]। [**दृष्टान्तालङ्कारः**। 'सत्-पुरुषा' इत्यत्र **अप्रस्तुत-प्रशंसा** च। **लेश**-नाम नाट्य-लक्षणमुपक्षिप्तञ्च। तल्लक्षणं यथा दर्पणे—"स **लेशो** भण्यते वाक्यं यत् सादृश्य-पुरःसरम्" इति)॥

201n.—1. बहुमुखम्–Displayed in various ways, manifold, excessive. Cf. "उपयन्तुः हि दारेषु प्रभुता सर्वतोमुखी"–*Śak. V.* 26. **2. कथितवान्** &c.—Refers to "परिहास-**विजल्पितं** सखे ! परमार्थेन न गृह्यतां वचः"–Act *II.* 18. Hence '**विजल्पित**' is preferable to 'विजल्पः'। **अस्मि** (=I)-7n. 1. **3. प्रत्यादेश-वेलायां**—Refers to the king's sending of Vidūṣaka to pacify *Haṁsapadikā*. Act V. p. 411. **4. सङ्कीर्तितं**—सम् + कृत् + क्त कर्मणि = सम् + किरत् + क्त [ऋ = इ by 'उपधायाश्च'—(7. 1. 101) and इ = इर् by 'उरण-र-परः' (1.1.51)] = संकीर्तितः ['उपधायाञ्च'-(8. 2.78.). इर् = ईर्] **5. कच्चिद्**—Implies कामप्रवेदन (*Com.* 265n. 1). It is a **vedic neuter** of interrogative कत् + चित्–(Cf. 'कत्', 'चित्' अनयोर-प्येवम्। इष्टप्रश्ने एकम्'—BhD) used in question expecting the answer "Yes" = I hope. Cf. Lat. Nonne'. Cf. 'कच्चित् दृष्टा त्वया राजन् दमयन्ती'—I hope, Oh king, you have seen दमयन्ती ? (Vide Dr. Macdonell's Śkt. Grammar, P. 150. In **rare** cases कच्चित् implies

the sense of contrary expectation, '(*I fear*), I hope not'; Cf. Lat. "Nun." 'कच्चित् नापराधं ते कृतवानस्मि'—I hope, I have not done you any wrong—Ibid). "**कच्चित्**" जीवति वैदेही"—*Rām. III*.53.6; '**कच्चित्ते** निर्जिता विघ्ना: **कच्चित्ते** वर्धते तप:। **कच्चित्ते** नियत: कोप: आहारश्च तपोधन ।। "**कच्चित्ते** नियमा: प्राप्ता: **कच्चित्ते** मनस: सुखम् । **भूतार्थ:** गुरु-शुश्रुषा सफला चारुभाषिणि"—*Rām. III.* 74. 8-9. **विस्मृतवान्**—Kāli. usually writes '**विस्मृत:**' । (Vide 152n. 8). **6. भूतार्थ:**—Cf. 'कथयामि ते **भूतार्थम्**'—(4n.4) 'भूतार्थशोभा-ह्रियमाण-नेत्रा:'—*Ku. VI.* 13. 'क: श्रद्धास्यति-**भूतार्थं** सर्वो मां तूलयिष्यति'—*MK. III.* 24. **मृत्पिण्ड** &c.—'Whose brain is like a lump of clay', 'whose understanding is dense as a cold of earth'; "addl -head, addle-pated". Cf. the expression '*cold plated*','*c lod-poll*', '*block-head*'–M. The Vidūṣaka often in Sanskrit drams poses himself as a veritable fool. Cf. 'मम पुन: ब्राह्मणस्य सर्वमेव विपरीतं परिणमति आदर्शमण्डल-गतेव च्छाया वामेषु दक्षिणा, दक्षिणेषु वामा भवति"—*Cārudatta & MK.* 1; "The bookful **blockhead** ignorantly read, With **load of lumber** in the head'—**Pope. 7. अथवा**—Implies आक्षेप। It modifies the previous statement. Vidūṣaka now attributes everything to fate (**भवितव्यता**) as otherwise the fault will lie on the king; for it was he who had told Vidūṣaka that all his sayings were uttered in jest, and not in earnest. **8. भवितव्यता** &c.—For similar idea Cf. "प्राय: शुभं च विदधाति अशुभं च जन्तो: । **सर्वंकषा** भगवती भवितव्यता एव"—*MM.I.*23. "भवितव्यं भवत्येव नारिकेल-फला-म्बुवत्"—*DP.* "नहि भवति यन्नभाव्यं भवति च भाव्यं विना यत्नेन"—*Ibid.* 21. **बलवती**—Another **adjectival use** of '**बलवत्**' । Now see (89n. 3.). **9. अनुपपन्नम्** &c.—This is one of the many wise and sensible speeches of Vidūṣaka which he utters in *Act VI*. **सत्पुरुषा:** &c.—Cf. "न तु सत्पुरुषा: राजन् विलपन्ति यथा भवान्"–*Rām.* 69. 2." न पृथग्जनवच्छुचो"–(Vide no. 11n below) "जहौ न धैर्यं कुपितोऽपि पाण्डव:"—*Ki. XIV.* 1. "विकार-हेतौ सति विक्रियन्ते । येषां न चेतांसि त एव धीरा:" ।—*Ki.* I . 59. **10. शोक-वास्तव्या**—Either (*i*) such **as** where sorrow is resident, or (*ii*) the receptacle of sorrow. '**वास्तव्य**' has (**कर्तरि**) '**तव्यत्**'—it means—"that which **is** residing". Next **बहुव्रीहि** । For **पूर्वनिपात** of 'वास्तव्य:', (*Vide Com*).

Or, attach 'तव्यत्' in the अधिकरण-वाच्य-(3.3. 113) when it means 'abode', 'receptacle'. Cf. 'पुरेऽस्य वास्तव्य-कुटुम्बितां ययु'—*ŚPB. I.* 66 and *MN* thereon. **11.** **प्रवातेऽपि** &c.—Cf. 'न पृथग्जनवच्छुचो वशं वशिनामुत्तम ! गन्तुमर्हसि । द्रुम-सानुमतां किमन्तरं यदि वायौ द्वितयेऽपि ते चलाः' ।।—*Ra. VIII.* 90.

Text:—राजा—वयस्य, निराकरण-विक्लवायाः[1] प्रियायाः समवस्थाम्[2] अनुस्मृत्य[3]बलवदशरणोऽस्मि । सा हि—

इतः प्रत्यादेशात्[4] स्व-जनमनुगन्तुं व्यवसिता[5]
शिखरिणी **स्थिता तिष्ठेत्युच्चैः वदति गुरु-शिष्ये गुरु-समे ।**
(यमनसभलग) **पुनर्दृष्टिं बाष्प-प्रकर[6]-कलुषा मर्पितवती**
मयि क्रूरे[7] यत्तत् स-विषमिव शल्यं[8] दहति माम् ।।९।।

King—Friend, calling to my mind the (*pitiable*)[2] demeanour[2] of (*my*), beloved, [1]agonised at (*my*) disavowal[1], I have become extremely helpless[3] (*forlorn*).

Owing to (*her*) disavowal[4] from here, she tried[5] to follow her own kinsmen (*but*) stopped, as (*her*) fatherlike father's disciple loudly shouted "Stay", —(*and*) again (*she*) cast on my cruel[7] (*self*) a (*pleading*)[6] glance bedimmed with the flood of tears[6].— –it is (*all*) this that torments me like an envenomed barb[8] (9)

सानुमती—अम्महे ! ईदिसी स-कज्ज-परदा । इमस्स संदावेण अहं रमामि ।
[अम्महे ! ईदृशी-स्व-कार्य-परता[9] । अस्य सन्तापेन अहं रमे] ।

Sānumatī—Dear me ! such is (*one's*) attention[9] for (*one's*) own interest[9]. *I* (*only*) rejoice at his anguish.

विदूषकः—भो, अत्थि मे तक्को । केण तत्तहोदी आआस-चारिणा णीदे त्ति
[भोः, अस्ति मे तर्कः । केनापि तत्रभवती आकाश-चारिणा[10] नीतेति] ।

Vidūṣaka—Ho ! I have a guess that by some sky-rover[10] Her Ladyship was carried away.

राजा—वयस्य, कः पति-देवतां तामन्यः परामर्ष्टु[11] मुत्सहेत ।[12] मेनका किल सख्यास्ते जन्म-प्रतिष्ठा[13] इति श्रुतवानस्मि । तत्सह-चारिणीभिः तया वा सखी ते हृतेति मे हृदयमाशङ्कते ।

King—Friend, who else may dare[12] to handle[11] her whose husband is her god. Menakā, I am told, is the source[13] of your friend's birth. It was she or her fellow-rovers by whom she was carried away, so my heart dreads.

सानुमती—सम्मोहो क्खु विम्हअणिज्जो ण पडिबोहो

[सम्मोहः[14] खलु विस्मयनीयः, न प्रतिबोधः[15]] ।

Sānumatī—Surely (*his*) infatuation[14] and not the recollec--tion[15] is to be wondered at.

विदूषकः—जइ एव्वं ता समस्सदु भवं । अत्थि क्खु समाअमो कालेन तत्तहोदीए
[यद्येवम् तत् समाश्वसतु भवान् । अस्ति खलु समागमः कालेन तत्रभवत्या] ।

Vidūṣaka—If (*it*) is so, do be reassured, Your Highness. There will, indeed, be a union with Her Ladyship in course of time.

राजा—कथमिव । King—How possibly ?

V. L.—'तामवस्थाम्'—B. 'समवस्थाम्'—R. M. S. 'प्रत्यादेशात्'—R. V. M. S. 'प्रत्यादिष्टां'—B. 'स्थिता'—B. S. 'मुहुः'—R. V. M. 'प्रकर' —B. M. S. Dr. 'परिमार्ष्टुम्'—M. K. 'परामर्ष्टुम्'—B. V. S. Dr. R. St. Petersburg Dictionary.

राजेति । 'निराकरणेन' प्रत्यादेशेन 'विक्लवा' कातरीभूता तस्याः । 'समव--स्थाम्' अवस्थां, दीनां दशामित्यर्थः । **इत इति** । 'इतः' मत्-सकाशात् 'प्रत्यादेशात्' प्रत्याख्यानात् हेतोः 'हि सा' शकुन्तला 'स्वजनं' गौतमी-प्रमुखम् 'अनुगन्तुम्' पति-परित्यक्तानाम् सतीनाम् उपायन्तराभावात् अनुसर्तु 'व्यवसिता' उद्यता आसीत् । तदन्तरं **'गुरुणा' पित्रा** कण्वेन 'समे' तुल्ये, तद्वत् माननीये इत्यर्थः ['गुरुः पिता, गुर्विप्रः * * गुरुः शिष्याधिकारक" इति गदसिंहः] 'गुरोः' **आचार्यस्य** कण्वस्य 'शिष्ये' शार्ङ्गरवे [शास्तेः क्यप्-(३।१।१०९); शिष्—(६।४।३४); षत्वम्—(८।३।६०)] 'तिष्ठ' मा गमः' इति उच्चैः' तारस्वरेण 'वदति' आज्ञाप--यति सति 'स्थिता' अनुगमनात् निवृत्ता । तदनन्तरं 'वाष्पाणाम्' अश्रूणां 'प्रकरेण' समूहेन आधिक्येन इति यावत् 'कलुषां' मलिनां कातराम् इत्यर्थः, 'दृष्टिं' नेत्रं 'पुनः क्रूरे' नृशंसे ['क्रूरा नृशंस-घोरोष्ण-कठिना' इति हैमः] 'मयि' प्रत्याखान-हेतुभूते दुष्यन्ते 'अर्पितवती' शरण-प्रार्थिनीति भावः—'इति यत् तत्' सर्वं 'सविषं' विष-लिप्तं 'शल्यं' शङ्कुः ["वा पुंसि शल्यं शङ्कुर्ना" इत्यमरः] ।। 'इव मां दहति' दुःसहां यन्त्रणां ददाति [अत्र दृष्टेः दाहकत्वाऽसंभवात् मुख्यार्थ-बाधे कार्य-कारण-संबन्धात् तापं लक्षयन् तदतिशयं व्यञ्जयतीति दहति-पदम् अत्यन्त-तिरस्कृत-वाच्यम् इति राघवपादाः । **उपमाऽनुप्रासौ** । तादृश-दृष्टेः एतादृशे राजनि अर्पणात् **समालङ्कारः** । 'गुरु-शिष्ये' 'गुरु-समे' इत्यत्र **कथित-पदत्वं न शङ्कनीयम्** । तात्पर्य-भेदेन लाटाऽनुप्रासार्थमेव तथा प्रयुक्तत्वात् । इयं **शिखरिणी**] ।।९।। **सानुमतीति** । 'अम्महे' इति विस्मये ['विस्मये **अम्महे अम्मो** नित्यं स्त्रीभिः प्रयुज्यते' इति भरतः] 'स्वकार्यपरता' स्वार्थपरता । 'अस्य' दुष्यन्तस्य 'सन्तापेन

अहं रमे' प्रीतिमनुभवामि ['संतापे सतोष' इति **विषमा-लङ्कारः**। एतद्वाक्य-समर्थकः पूर्वोक्तः **अर्थान्तरन्यासः**]। **राजेति**। 'पतिः देवता' अस्याः तां साध्वीम् इत्यर्थः। 'परामर्ष्टुम्' स्प्रष्टुम् का कथा नेतुमिति भावः, 'उत्सहेत' अध्यवस्येत्। ["उत्साहः अध्यवसायः स्यात्" इत्यमरः]। 'जन्म-प्रतिष्ठा' जन्म-स्थानम् ['**प्रतिष्ठा** गौरवे क्षितौ **स्थाने** च यागनिष्पत्तौ' इति मेदिनी] 'किल' इति ऐतिह्ये। **सानुमतीति**। एतादृशस्य प्रीतिमतः राज्ञः कुतः 'सम्मोहः' स्मृति-भ्रंश इत्येव विस्मयावहः अस्वभावत्वात्। 'न प्रतिबोधः' विस्मयावहः, स्वाभाव्यात् तस्य इत्यर्थः। [शकुन्तला-समागम-विषयेण तर्कणात् अत्र '**तुल्यतर्क**-नाम' नाटय-लक्षणञ्चोपक्षिप्तम्—"**तुल्यतर्को** यदर्थेन तर्कः प्रकृति-गामिना" इति दर्पण-लक्षणात्]।

202n.—1. समवस्थाम्—(89*n.* 6; 137 *n.* 3). **2. बलवद्**—Here an **अव्यय signifying 'intensity'** (AK). But its use as an **adjective** is also **very common.** Vide (89n 3; 201n. 8). **3. इतः प्रत्यादेशात्**—Repudiation from here (*i.e. me*). This furnishes the reason for her attempting (**व्यवसिता**) to follow her own party. **4. स्थिता**—Implies *instantaneous obedience* to the mandate of her superior (शार्ङ्गरव) who loudly bade her stay. Thus the word brings out clearly the deplorable condition. M prefers "मुहुः" and translates—"**Repeatedly** saying to her in a loud voice". This is not in consonance with the order "**तिष्ठ**" (See P. 5) which was uttred only **once.** Besides it will appear that Śak. did not refrain from following her kinsmen *at the first bidding* of Śārṅga-rava. Thus the epither **गुरु-समे** (अलङ्घ्यादेशतया—*Ś qtd M*) loses its significance. **5. बाष्प-प्रकर** &c—'प्रकर' means समूह—Cf. 'वातेरितोत्-पल-दल-**प्रकरैः**'—*Ra. IX.* 56, and *MN* thereon. 'मुक्ताफल-**प्रकर**—भाञ्जि गुहा-गृहाणि'—*ŚPB. V.* 12; also *Ku. V.* 68. '**प्रकर**' is **preferable to 'प्रसर'** as this is the reading of *SKn.* **मयि क्रूरे**—She stopped at the **first bidding** of Śārṅgarava, and being unable to ascertain what should be done, she once more cast a pitiable and helpless look on me, but I remained inexorable nevertheless. Thus my cruel nature was clearly manifested. जन्यं – (256n, 1). **6. अम्महे** (or **अम्मो**) —vide (118n, 1). **7. स्व-कार्य-परता**—Devotion to one's own business. Śānumatī's business here is to study the

mental condition of the king, after his rejection of Śak. Hence the more deeply the king is **aggrieved**, the more would **be** her joy, for pain on the part of the king promises welfare to her friend. **8. पति-देवतां**—पतिः देवता यस्याः ताम् पतिव्रताम् इत्यर्थः । देव एव इति 'देवता', **स्वार्थे** 'तल्' by **'देवात् तल्'**-(5, 4, 31.) Note that तल् generally signifies **समूह** or **भाव** । Cf. साधुता, मृदुता, **बन्धुता**—(*number of friends*) **'जनता'** (*crowd*); also **ग्रामता, गजता, सहायता** (number of helpers). A chaste woman (पतिदेवता=पतिव्रता) by dint of her पतिभक्ति is endowed with a power which is **dreaded by the malignants.** Read 'तस्या विभीमहे सर्वे ये तथान्ये तपोधन'—*VrP.* (पतिव्रता-चरित्रे यम-वाक्यम्) ।। 'सुराः सर्वे सुमुनयो **भीतास्ताभ्याश्च** सन्ततम् ।। * स्वतेजसा समर्था सा महापुण्यवती सदा । न हि **तस्या भयं किञ्चित्** यमादपि'—BrP. 83; ; इमामपि * रक्षितां स्वेन तेजसा * न च शक्तः सुदुष्टात्मा मनसापि हि मैथिलीम् । प्रधर्षयितुम्" &c.—*Rām. VI.* 118. 17; *PN. V.* 20; Nalodaya. III. 39-40. **परामर्ष्टुम्—'परा+ मृश्'** means 'to touch gently'. Cf. Ra. *II.* 68; *ŚPB. XVII.* 11; *MK. V.* 28. Next it means 'to assault', 'याज्ञसेन्याः, **परामर्श'**—*Mahā.* 'केशहस्ते **परामृष्टा** चाणक्येन द्रौपदी'—*MK.* 1.39. **9. सख्याः ते**—Note the use of सखी । The **wife of a friend** may be considered to be one's friend (सखी) । Cf. 'निर्विनोदां **सखीं** ते'—*MD. II.* 27. 'जाने **सख्यास्तव** मयि मनः'—*Ibid.* 33. 'तेन' हि **सख्यास्ते** मार्गमादेशय'—*Vik. II* 'राजा—उपलालयन्तमपि ते **सखी** न लक्षयिष्यति'—*Māla. III* 'शचीतीर्थं वन्दमानायाः **सख्यास्ते'**—*VI. Infra.* **10. सम्मोह** &c.—Gītā. II. 63. **'अस्ति खलु समागमः'**—&c.—Cf. 'तदवश्यं कोऽपि अनुग्रह-निमित्त-भूतः **समागमो**पायः भविष्यतीति तर्कयामि'—*Vik. IV.*

Text—विदूषकः—ण क्खु मादा-पिदरा भत्तु-विओअ-दुक्खिअं दुहिदरं चिरं देक्खिदुं पारेन्ति ।

[न खलु माता-पितरौ भर्तृ-वियोग-दुःखितां[1] चिरं द्रष्टुं पारयतः] ।

Vidūṣaka—Surely the parents cannot long endure to see (*their*) daughter[1] sorrowing for separaton from her husband[1].

राजा—वयस्य,—

स्वप्नो नु, माया नु, मति-भ्रमो[2] नु
उपजाति **[3]क्लिष्टं नु तावत्फलमेव पुण्यम् ।**
(जतजगग **[4]असन्निवृत्त्यै तदतीतमेते**
तनजगग) **[5]मनोरथा नाम तट-प्रपाताः[6] ।।१०।।**

King—Friend, was it a dream, or a (*magical*) illusion, or a (*mental*)[2] delusion, or merit[3] exhausted[3] with only that much of fruition ? That has gone away no[4] more to return. These (fondest) hopes[5] (*are*) like the crumblings[6] of river-banks (10).

V. L.—'चिरं द्रष्टुम्'–B. S. Others omit 'चिरम्'। 'क्लिष्टम्'—R. M. V. S. 'क्लृप्तम्'—B. 'पुण्यम्'—R.M.V.S. 'पुण्यैः'—B. 'तदतीतमेतं ०प्रपाताः'—R. V. S. 'तदतीव मन्ये ०प्रपातम्'—B. 'तदतीतमेव ०प्रपातः'—HS. M. Mackenzie Mass 'तदतीतमेव तटप्रपाताः'—K.

स्वप्न इति। 'असन्निवृत्त्यै' अपुनरावृत्तये [इति रघुटीकायां मल्लिनाथ-पादाः ८।४९] न पुनः आगमनाय इत्यर्थः। [अनेन उत्कण्ठातिशयो व्यज्यते। तादर्थ्ये ४र्थी] 'अतीतं' गतं 'तत्' अनुभूतपूर्वं शकुन्तला-सम्मेलन-लक्षणं वस्तु ['प्रकान्त-प्रसिद्धानुभूतार्थेषु यच्छब्दः तच्छब्दं नापेक्षते' इति मम्मटोक्तेः यच्छ-ब्दस्यानपेक्षा] 'स्वप्नो नु' ['नु स्यात् प्रश्ने विकल्पार्थेऽप्यतीतानुनयार्थयोः' इति विश्वप्रकाशः] तत् किं स्वप्नः नु वेति वितर्कः। **स्वप्न श्चेत्** जाग्रदवस्थायां तस्य **सुस्पष्टानुभूतिः** न स्यात्। **अत आह 'माया नु'** किं तर्हि, तत् कस्यापि मायिकस्य इन्द्रजाल-क्रिया, यया असतः शकुन्तलारूप-वस्तुनः प्रकटनम् आसीत्; किन्तु तदपि न सम्भवति, **इन्द्र-जाल-प्रक्रियायाः अल्प-क्षण-स्थायित्वात्।** अतः **आह 'मति-भ्रमो नु'** बुद्धि-भ्रंशो वा, अर्थात् शकुन्तलायाः असत्त्वेऽपि **रज्ज्वौ सर्प इव, शुक्तौ रजतमिव वा,** अन्याधिष्ठाने मम शकुन्तला-रूपा बुद्धिः जाता। किन्तु तदपि न सम्भवति। यतः पुरोहित-प्रतिहारी-प्रभृतीनाम् युगपत् मतिभ्रमः असम्भाव्य एव। अपि च भ्रमे पश्चात् सर्वम् अनुभूत-पूर्वम् भ्रमाधिष्ठानं शुक्ति-रज्ज्वादिकं मिथ्या इति प्रतिभासते, मम तु इदानीं भ्रम-रहितस्याऽपि शकुन्तला-समागम-रूप वस्तु मिथ्या इति न प्रतीयते। **अत्र आह—'तावत्'** कण्वाश्रमे शकुन्त--लया सह स्वल्पकाल-व्यापि यत् मेलनमभूत् तत् परिमाणम् इत्यर्थः, 'फलं' यस्य तत् 'तावत्फलम्' अतएव 'क्लिष्टं' प्रक्षीणं 'पुण्यं' सुकृतं 'नु'। किं मया पूर्व-जन्मनि तादृशम् अत्यल्पमेव सुकृतम् आचरितं, येन फल-स्वरूपं शकुन्तलारूप-वस्तु मयाऽधिगतम्, अधुना **क्षीणे पुण्ये तस्याः वियोग-दुःखम्** अहम् अनुभवामि। 'एते' [**"अस्ति खलु समागमः कालेन तत्रभवत्या", 'न खलु मातापितरौ भर्तृ-वियोग-दुःखितां चिरं द्रष्टुं पारयतः"**] इत्याकाराः त्वया उच्यमाना, मया वाशास्यमानाः च मनोरथाः' अभिलाषा 'नाम' इत्यलीके। अलीका मनोरथा इत्यर्थः। 'तटस्य प्रपातः' **इव प्रपातः'** येषां तादृशा (उत्तरपदलोपी बहुव्रीहिः)। यथा वर्षासु प्रवाहेण **पीड्यमाना गङ्गादि-नदीनां** तटाः पतन्ति। एकः पतति, तदुपरि अन्यः, तदुपरि इतरः। **तद्वत् मनोरथानाम् एके विलीयन्ते, अन्ये उत्पद्यन्ते पुनः विलीयन्ते इत्यर्थः॥**

'नाम' इति प्रसिद्धौ वा ।। यथा गङ्गा-तटस्य झटिति पतनं प्रसिद्धं तद्वत् । (अत्र पूर्वार्द्धे नु-शब्देन **सन्देहालङ्कारः** व्यज्यते । स च सन्देह-मात्र-पर्यवसितत्वात् **शुद्धः** । तृतीयपादे प्रपातस्त्वतटो भृगुः" इति कोशात् **पुनरुक्तवदाभासोऽलङ्कारः** । तट-प्रपातैः सह मनोरथानां तादात्म्येनावभाषणात् रूपकालङ्कारः । नुमानुमेति तमेमेतेति छेक-वृत्त्यनुप्रासौ । 'विदूषकः—यद्येवम्" इत्यादिना एतदन्तेन **'प्ररोचना'** नामाङ्ग-मुपक्षिप्तम् । तथाचोक्तं धनञ्जयेन—'सिद्धामन्त्रणतो भाविदर्शिका स्यात् **प्ररोचना'** इति । अपिच विदूषकस्योक्तौ निश्चयाभावात् **संशय-नाम** नाट्य-लक्षणञ्च । तस्यलक्षणं यथा दर्पणे—'संशयोऽज्ञात-तत्त्वस्य वाक्ये स्याद् यद-निश्चयः' ।। **उपजातिः** वृत्तम्) ।।१०।।

203n.—1. न खलु &c.—This is one of the many sentences to prove that Kāli. is a keen observer of the Hindu society. Mark how he rightly notices the psychological condition of a Hindu mother in such a juncture. माता च पिता च =**माता-पितरौ** (मातृ= माता) by 'आनङ् ऋतो द्वन्द्वे'-(6. 3. 25). Optionally **'पितरौ'** by **'पिता मात्रा'** (1. 2. 70,) [**and not by 'पुमान् स्त्रिया'**-(1. 2. 67).] For 'मातृ' is *an eternal* feminine form ('नित्यस्त्रीलिङ्गः शब्दः') and as such 'पितृ' is not its corresponding masculine form, for it is also a (नित्यपुंलिङ्गः शब्दः) । Besides **'पिता मात्रा'** which is a **special rule** becomes **redundant, if** पितरौ is obtained by (1. 3. 67). **'मातर-पितरौ'** is the **third** form ny 'मातरपितरौ उदीचाम्'–(6. 3. 22) and it is used by the people of the *Northern countries only*. Next **'पितरा-मातरा'** is the **fourth** form by 'पितरा-मातरा च्छन्दसि'–(6.3.32) and it is used in the **Vedas only** [निपातनस्य अकारान्तत्वात्, मातर-पितराभ्याम् इति केचित् मातर-पितृभ्याम् इत्यन्ये"–**Prabha**]. Also Cf. 'रुदमाना तु सा देवी क्रोशन्ती–**पितृमातरौ'**–*PP*. V. 16. **2 स्वप्नो नु** &c.—The king at present with the imprecation of Durvāsāh gone, remembers Śak. He married her and enjoyed ineffable joy in her company in the hermitage But all these have now become a talk of the past. Śak. escorted by several hermits and Gautamī approached him in presence of many persons such as the royal hierophant, portress and others, but how was it that he could not even recognise his darling what to speak of his marriage with her? Was then all this Sak.–affair a dream (स्वप्नः)? But now he distinctly remembers that he interviewed the party in broad day-light in the Fire-sanctuary in presence of the

afore-said persons hence surely he was not sleeping and thus he could not be thought of dreaming a dream (reverie) of Śak. Was it then **a sorcery** (**माया**) of any magician? But that is also not possible, as the effect of the spell lasts but for a very short time, whereas the king had not the slightest remembrance of Śak. for a long period until the recovery of the signet-ring. The third alternative is to consider it to be a case of **mental delusion** (**मति-भ्रम:**) But this also does not seem to be justifiable, as synchronous mental delusion of a host of person is not possible. Besides **delusion has its basis upon an unsubstantial thing.** For example people mistake '**रज्जु**' and '**शुक्ति**' for '**सर्प**' and '**रजत**' respectively, or in other words they consider such things as snake or silver which are really absent on the spot. This mistake is of course due to delusion. But later on they being free from nonknowledge, can understand their mistake and the unreality of the things superimposed Thus the king's is a quite different case. For he is now fully convinced that Śak., previously married by him, did *actually* come and converse with him. Then perhaps the king enjoyed Śak.'s company for a *very short* time as a result of the *scanty* merits (तावत् फलम्), that had accumulated in his previous birth. Those merits being now exhausted (**क्लिष्टं पुण्यम्**) that thing has also vanished. Hence he is deprived of any further association with Śak. But one fact is certain that in any case that pleasurable experience will not come to him again. Vidūṣaka, however, opines that the **king's union with Śak. is certain.** It is a question of time only. (Cf. 'यद्येवमस्ति खलु **समागम: कालेन तत्रभवत्या'** । 'न खलु मातापितरौ भर्तृवियोग-दुःखितां दुहितरं चिरं द्रष्टुं पारयतः)। But the king considers **these hopes to be false and delusive like** the erosions of river-banks. Just as the banks of the Ganges (पथा) quickly fall down, one after another, never to rise again, similarly the fondest hopes of reunion, as voiced forth by Vidusaka are also unstable. **तत्** =पूर्वानुभूतं शकुन्तला-समागम-लक्षणं वस्तु । *i. e.*, either Śak's presence before him, or the happiness which the king experienced in her company. The word 'यद्' is not necessary here–(*Com. In.*, 10) Cf. 'ते हि नो दिवसा गताः'—UC. I. **असन्निवृत्त्यै** = असन्निवृत्तये ='Never to come back', passed for good'... Cf. 'परलोक**मसन्निवृत्तये** यदना पृच्छ्य गतासि मामितः'—*Ra. VIII.* 49. 'गतित्वं वीतरागाणामभूयः **सन्निवृत्तये'**—X. 27. M **splits** up the fourth line as

'मनोरथानाम् अतट-प्रपाताः' । Again following the Mackenzie Mss. he reads 'एव' for 'एते' which according to *Prof. Patankar* is the *oldest* reading. This reading is also supported by *K.* But 'एव' here which is **mainly for emphasis,** following another 'एव' of *the same nature* in the third line, sounds **un-Kālidāsian.** Besides **अतट' and 'प्रपात' are synonymous.** (*Cf.* 'प्रपातस्तु अतटो भृगु:')–*AK.* Kāli. also uses 'प्रपात' in the sense of **'fall', and not to signify–'a precipice'.** M still argues—"but there is no reason why 'अतट' should not be used as an epithet of 'प्रपात' to denote **a** *very precipitious declivity*". In the reading **'एते'** for **'एव',** 'एते' will refer to 'स्वप्न', 'मया', 'मतिभ्रम:' and 'क्लिष्टं पुण्यम् । Besides the objections mentioned above, my attention is drawn by my colleague *Prof., Sureśa Candra Sen M. A. Vaidyaratna,* to the faulty nature of this explanation, as **'एते'** (*masculine*) cannot refer to words **two** of which are masculine (स्वप्न) and feminine (माया), while one **is neuter**(पुण्यं). The right word should be one in **neuter** by 'नपुंसकम् अ-नपुंसकेन एकवच्चास्यान्यतरस्याम्'-(1.2.69). Of course it may be **argued** that the violation of this rule is *often* noticed among the *old writers.* Cf. "आर्थिक: कुलमित्रञ्च गोपालदास-नापितौ । (एते) शूद्रेषु भोज्यान्ना यश्चात्मानं निवेदयेत्" ।।—*MS. IV.* 263. **एते तट-प्रपाता:**–The poet perhaps is thinking of the erosions of the banks of the river Ganges (*Padmā*). Cf. "मूर्ध्नि गङ्गा-प्रपातेन"–*Ku. VI.* r57. 'गङ्गा-प्रपातान्त-विरूढ़शष्पं"—Ra. *II.* 27. Ś explains the last half of the verse thus—"As a **man after** ascending the peak of a mountain falls headlong, so my **hopes** after ascending to the sight of Śak are precipitated'. He seems to prefer **splitting of "मनोरथा"** &c. For similar idea, Cf. 'किन्नु मेऽयं दिवा-स्वप्न श्चित्त-मोहोऽपि वा मम'—Rām. II. 12. 2; "किन्नु स्यात् चित्तमोहोऽयं भवेद्वातगतिस्त्वियं । उन्मादजो विकारो वा स्यादयं मृगतृष्णिका" —*Ibid. V.* 34.23; 'किन्तु सत्यमिदं स्वप्न: सा भूयो दृश्यते मया'—SV. VI. 17; **"Am I mad, or else this is a dream"—Twelfth Night.** *IV.* 1. **"This still a dream;** or else such stuff as mad men Tongue and brain not; either both, or nothing; Or senseless speaking, or a speaking such as sense cannot unite."—**Cymbeline** V. 4.

Text :—विदूषक:—भो ! मा एव्वं । ण गुलीमअं एव्व एत्थ णिवंसणं

अवस्सम्भावी अचिन्तणिज्ज-समाअमो होदि त्ति [मैवम् । ननु अङ्गुलीयकमेवात्र [1]निदर्शनम् । अवश्यम्भावी अचिन्तनीय-समागमो भवतीति] ।

Vidūṣaka—(*Say*) not so. The ring itself (*is*) an indication[1] that what is necessary to take place, happens unexpectedly.

राजा (अङ्गुलीयकं विलोक्य)—**अये, इदं तावदसुलभ-स्थान-भ्रंशि**[2] **शोचनीयम् ।**

पुष्पिताग्रा (ननरज नजजरग) **तव [3]सुचरितमङ्गुलीय ! नूनं प्रतनु[4] ममेव विभाव्यते[5]फलेन ।**
[6]अरुण-नख-मनोरमासु तस्याश्च्युत[7]मसि लब्ध-पदं यदङ्गुलीषु ॥११॥

King (*Looking at the ring*)—Ah ! that this (*ring*) slipped [2]away from a not[2] easily obtainable place[2], is regrettable. Verily, O ring, your merit[3] (*is*) but too meagre[4] like mine, as is judged[5] by the consequence. For, you (*too*) have slipped[7] down, after having obtained a station on her[6] charming pink-nailed fingers[6]. (11)

V. L.—'अवश्यम्भावी'—R.B.V. 'अवश्यम्भाविनः'—M. S. 'अचिन्त-नीय-समागमः'—B. 'अचिन्तनीयः समागमः'—R. V. M. S; B reads 'कृशेन' for 'ममेव''—V. M. 'मनोहरासु'—R. S. B. 'मनोरमासु'—V. M.

विदूषक इति । 'मा एवं' वद [**मा-शब्दोऽयं, न माङ्, अतो लोट्**] । ननु इत्याक्षेपे । यः खलु पदार्थः अवश्यमेव भविष्यति इति दैवेन निरूपितः स 'अव-श्यम्भावी' पदार्थः 'अचिन्यनीयः' अतर्कितः 'समागमः' प्राप्तिः यस्य तथाविधः भवति । बुद्धि-पथातीतेन तस्य प्राप्तिः सम्पद्यते । 'इति' एतद्विषये 'अङ्गुलीयकम् निदर्शनम्' उदाहरणम् [इति भरतः] । यथा सरसि निपतितम् अङ्गुलीयकमेव मत्स्योदर-गतमपि त्वया समासादितम्, तथा शकुन्तलया तव सम्मेलनं नूनमचिन्त-नीय-रूपेण भविष्यति इति मे धारणा] । अत्र **उपपत्तिर्नाम** नाट्यालङ्कार उप-क्षिप्तः—"**उपपत्तिर्मता** हेतोरुपोन्यासोऽर्थसिद्धये" इति दर्पण-लक्षणात्] । **राजेति** । 'अये' इति स्मरणे ["**अये** कोपे विषादे च संभ्रमे **स्मरणेऽपि** च' इत्यमरः] । 'असुलभं' न सुखेन लब्धुं शक्यम् यत् 'स्थानं' शकुन्तलाऽङ्गुलि-रूपं, तस्मात् 'भ्रश्यति' पतति यत् तथाविधम् [इति ताच्छील्ये णिनिः] । **तवेति** । हे 'अङ्गुलीय, तव सुचरितं' पुण्यं 'ममेव' मम पुण्यमिव 'नूनं' निश्चितं 'प्र'-कर्षेण तनु' अल्पं' ['**तनुः** काये त्वचि स्त्री स्यात् त्रिष्वल्पे विरले **कृशे**' इति मेदिनी) । अतीन्द्रियस्य सुचरितस्य प्रतनुत्वं कथं ज्ञायते, इत्यत आह—'फलेन' अत्यल्प-फलत्वेन हेतुना इत्यर्थः, 'विभाव्यते' अनुमीयते । अस्याल्प-पुण्यत्वे हेतुमाह । 'यत्' यस्मात् हेतोः 'अरुणैः' आलोहितैः ['अव्यक्त-रागस्त्वरुण' इत्यमरः] 'नखै. मनोरमा' नातिस्थूला, नातिकृशा, नाति-ह्रस्वा नातिदीर्घा न वक्रा सरला इत्यर्थः [एतेन सौभाग्यत्वं ध्वनितम्] तासु

मनोज्ञ-दर्शनासु, 'तस्याः' शकुन्तलायाः 'अङ्गुलीषु लब्धं' प्राप्तं 'पदं' स्थानं येन तादृशं, महता भाग्येन यथा कथञ्चित् प्राप्त-स्थिति अपि सत् 'च्युतं' विगलितम् 'असि'। **यावत् ते पुण्यं तावत् तदङ्गुली-समागम-सुखं**, ततः **क्षीणे पुण्ये तस्याः च्युतिरासीत्**। अतः स्वल्पं ते पुण्यमिति तर्कयामि। **[उपमाना-नुमान-काव्यलिङ्ग-समासोक्त्यनुप्रासाः। पुष्पिताग्रा** वृत्तम्] ॥११॥

204n.—1. 'ननु' &c.—**निदर्शनम्**=दृष्टान्तः—Proof. Cf. 'व्यक्तप्राज्ञेऽपि दृष्टान्तौ उभे शास्त्र-निदर्शने' इति नानार्थटीकायां भरतः। **ननु**—Often =Latin, '*none*'. The gist is:—Don't despair of Śak. Admitted that at present there is no visible chance of your reunion with her, still the unexpected finding of the ring which had fallen into a distant pond and was devoured by a carp, suggests that you will also get her in an unexpected manner not known to us at present. Cf. "दुरवगाह्या गतिर्दैवस्य। वाहन-भङ्ग-पतितो-त्थितौ नन्वेतावेव निदर्शनम्"—*Rat. IV.* "भवितव्यं भवत्येव नारिकेल-फलाम्बुवत्। गन्तव्यं गतमित्याहुः गजभुक्त-कपित्थवत्"—*DP.* (201*n* 8.) **2. विभाव्यते फलेन**—Cf. "एक-भूरुभयोरेक-दलयोरेक-काण्डयोः। शालि-श्यामाकयो र्भेदः **फलेन परिचीयते**" ॥ **3. अरुण-नख** &c.—Red nail is a good sign. Cf. "नातिह्रस्वा नातिदीर्घा न स्थूला न कृशा अपि। अवक्राः सरला **रक्त-नखाः** रक्त-तला अपि॥ कोमला सितविन्द्रा-ढ्या भङ्गुरा दीप्तिमन्नखाः। तादृगङ्गुलयोः यस्याः सा भवेत् राज-वल्लभा"—R; (206*n*, 3) **5. अङ्गुलीषु**—*R* accounts for the *plural number* thus :—(1) Śak.'s hands, and fingers were thinner than those of Duṣyanta. Hence she had to change the ring from one finger to another, before it was well suited to one of her fingers. (2) The ring was a souvenir of love, and out of ardent affection, she had the ring placed round all her fingers with a view to making it touch the enitre hand. (3) Or, perhaps the ring was changed from one finger to another, as she grew leaner and thinner, day by day, owing to extreme pangs of separation from the king—*R.*

Text :—सानुमती—जइ अण्ण-हत्य-गदं भवे, सच्चं एव्व सोअणिज्जं भवे।
[यदि अन्य-हस्त-गतं भवेत् सत्यमेव शोचनीयं भवेत्]।

Sānumatī—If it had gone to some one else's hand, surely it would have been deplorable.

विदूषकः—भो, इअं णाम-मुद्दा केण उद्देसेण भअवा तत्तहोदीए हत्थाब्भासं पाविदा (भोः, इयं नाम-मुद्रा केन उद्देशेन भवता तत्रभवत्या हस्ताभ्यासं प्रापिता)।

Vidūṣaka—Ho ! this signet-ring, with what object,[1] was placed by Your Honour into Her Ladyship's hand ?

सानुमती—मम वि कोदूहलेण आआरिदो एसो

[ममापि कौतूहलेन [2]आकारित एषः] ।

Sānumatī—This (*person*), too, has been impelled[2] by my curiosity.

राजा—वयस्य, श्रूयताम् । स्व-नगराय प्रस्थितं मां प्रिया सबाष्पमाह कियच्चिरेणार्य-पुत्रः प्रतिपत्तिं[3] दास्यतीति ।

King—Listen. To me, about to start for (*my*) own city, my darling said tearfully—"(*But*) how long (*will it be ere my*) husband sends (*me*) news"[3] ?

विदूषकः—तदो ततो (ततस्ततः)? Vidūṣaka—Then, (*what*) next ?

राजा—अथैनां मुद्रां तदाङ्गुलौ निवेशयता मया प्रत्यभिहिता—

एकैकमत्र दिवसे दिवसे मदीयं

वसन्ततिलका **नामाक्षरं गणय गच्छसि यावदन्तम् ।**

(तभजजगग) **तावत् प्रिये ! मदवरोध-गृह-प्रवेशं[4]**

नेता[5] जन स्तव समीप मुपैष्यतीति ॥१२॥

तच्च दारुणाऽऽत्मना मया मोहान्नाऽनुष्ठितम् ॥

King—Afterwards this signet-ring was put on her finger by me replying—'Beloved, count one letter of my name here, one at a time day by day, (*and*) ere-long (*you*) reach the end, (*i.e. tale of syllables*), the person[5] that will escort[5] (*you*) to[4] the entrance of my seraglio[4], shall come to your presence'. (12)

And that (*thing*) was not done through infatuation by me, dire-souled (*as I was*).

V. L.—'केन उद्देशेन'—B. M. 'केनोद्घातेन'—R. V. 'केन उपायेन'—S.' आकारितः'—R. V. M. K. S. 'वादितः'—S. 'व्यापारितः'—B. B reads 'पुनरस्माकं स्मरिष्यतीति' for 'प्रतिपत्तिं दास्यतीति' and 'अथैनाम्' for 'पश्चादिमाम्' । 'गच्छसि'—B. V. M. P. Taylor Mss. 'गच्छति'—R.K. S. 'गृहप्रवेशम्'—R. V. M. S. 'निदेशवर्ती'—B. HS.

विदूषक इति । 'केन उद्देशेन' किं फलमुद्दिश्य [इति हेतौ तृतीया] 'हस्तस्य **अभ्यासः' अन्तिकः** [इति कुमारसम्भव-टीकायां (६।२) मल्लिनाथपादाः] तं **'प्रापिता'** नीता दत्ता इत्यर्थः । **सानुमतीति ।** 'एष' विदूषकः 'अपि मम कौतूहलेन आकारितः' प्रेरित इव (इति **गम्योत्प्रेक्षा**) नियुक्त इव । मन्ये मम एतच्छ्रवण-

कौतूहलं विदूषकं एवंविध-प्रश्न-करणे नियुक्तवत्। (भिन्नाधिकरणयोः कौतूहलाकारितयोः कारण-कार्यभावात् **असङ्गतिरलङ्कारः**)। **राजेति**। 'स्व-नगराय' (२।३।१२) हस्तिनापुरमित्यर्थः। 'कियच्चिरेण' कियता विलम्बेन (अपवर्गे तृतीया) 'प्रतिपत्तिं' प्रवृत्तिं संदेशमिति यावत्। ('प्रतिपत्तिः प्रवृतौ स्यात्' इति धरणिः)। **राजेति**। 'अथ' शकुन्तलायाः तादृश-प्रस्थानान्तरम्। 'एनां' नाम-मुद्राम् ["द्वितीया टौस्स्वेनः"-(२।४।३४)–इति इदं-शब्द-स्थाने एनादेशः]। **राजेति**। 'अत्र' अस्यां नाममुद्रायां 'दिवसे दिवसे' ['नित्यवीप्सयोः' (८।१।४) इति द्वित्वं] एकम् एकम् इति 'एकैकम्' न तु अधिकम् (अत्रापि वीप्सायां द्वित्वम् इति केचित्॥ **तच्चिन्त्यम्**॥ वीप्सायाः असत्त्वात्। वस्तुतस्तु "स्वार्थे अवधार्यमाण एकस्मिन् द्वे भवत इति वक्तव्यम्" इति द्वित्वम्। 'एकं बहुव्रीहिवत्' (८।१।९), अर्थात् 'द्विरुक्त एक-शब्दो बहुव्रीहिवत् स्यात्। तेन सुब्लोप-पुंवद्भावौ। **एकैकमक्षरम्**'-इति भट्टोजिः-२१४४) 'नाम्नः अक्षरं गणय' एकस्मिन् दिने केवलम् एकं वर्णं संख्यातं कुरु। अनेन क्रमेण 'यावत्' यत्कालम् 'अन्तम्' वर्ण-गणन-समाप्तिं' 'गच्छसि' गमिष्यसि (३।३।४) मन्नाम्नः इति शेषः। 'तावत्' तत्कालं **त्रि-दिवसैः** इत्यर्थः, हे 'प्रिये, मम अवरोध-गृहं' राजान्तःपुरं, तस्य 'प्रवेशं' [करणे घञ्] द्वारं (६२३) 'नेता' प्रापयिता कश्चित् जनः मदीयानुचरः 'तव समीपम् उपैष्यति 'इति' मया सा प्रत्यभिहिता इति पूर्वेण संबन्धः। (अत्र नामाक्षर-गणनो-पदेश-भङ्ग्या '**अद्यावधि-तृतीय-दिवसे**' त्वां नेतुं ममान्तः-पुरस्थो लोक आगमिष्यति 'इति गम्यार्थस्य स्पष्ट-सूचनात् **पर्यायोक्तमलङ्कारः**। तथा च दर्पणे "**पर्यायोक्तं** यदा भङ्ग्या गम्यमेवाभिधीयते"—इति सिद्धान्त-वागीशपादाः)। **छेक-वृत्त्य-नुप्रासौ**। **काव्यलिङ्गञ्च**। **वसन्ततिलका** वृत्तम्॥१२॥

205n.—1. नाममुद्रा—(48n. 7);—R's '**उद्घातेन**' means 'on what occasion'. "उद्घातः कथ्यते धीरैः स्खलिते समुपक्रमे"—*Dharaṇi*. **हस्ताभ्यासं**—**अभ्यासः**='Proximity". '**अभ्यासो** ऽभ्यसनेऽन्तिके' इति विश्व-मेदिन्यौ—*Qtd.* RM; BhD & RM read '**अभ्याशं**'। Cf. चूत-यष्टिरिवाभ्यासे मधौ परभृतोन्मुखी'—*Ku VI.* 2. 'अर्पितेयं तवाभ्यासे सीता पुण्यव्रता वधूः'—*UC. VIII.* 17. **2. ममापि** &c.—**एषः**—Refers to Vidūṣaka, and 'अपि' may be construed either with (*i*) मम or एष (*ii*), *i. e.* (*i*) Vidūṣaka is inspired by my curiosity as well as by his own curiosity; or (*ii*) Even Vidūṣaka is impelled or made to ask the question by my (*Sānumatī's*) curiosity. M, however, explains एषः *as* referring to the king. "By my curiosity also he (the king) would be incited (to tell the reasons) *i. e.*, I too wished to put the same

question to the king. **आकारितः**='प्रेरितः'-(K). Cf. 'तम् वर-दानाय आकारयामास'—*Rām. II* 12. 2. **निवेशयता**—(149n. 5). **3. आह**= ब्रू |-लट् ति by 'ब्रुवः पञ्चानाम् आदितः आहो ब्रुवः' (३।४।८४)। But hcre the use of **लट् is difficult to be justified.** 'अत्र आह इति लट्-प्रयोग श्चिन्त्यः। नात्र वर्तमान-सामीप्ये वर्तमानावद्वा' इति **सूत्रस्यावसरः, 'वर्तमान-सामीप्यस्याऽभावात्'**—G. However, **आह** may be taken as a **निपात** having the sense of 'उवाच', or it is another instance of a **Vedic use**—(68n. 1). **4. कियच्चिरेण** &c.—Cf. 'कियच्चिरेण श्राम्यसि गौरी'—Ku. V. 50. **प्रतिपत्ति**'=News'. Cf. 'कर्मसिद्धावाशु प्रतिपत्तिमानय'-*MR. IV.* **5. अथैनां**—Is better than 'पश्चादिमाम्', *as already* mention (अन्वादेश) has been made of the signet-ring (इयं नाममुद्रा &c.); therefoe **'इदम्'** should be replaced by **'एन'** (*Com.*)-(6*n.* 6.). **6. नामाक्षरं**—अक्षर in the name (दुष्यन्त) may mean only **'Vowels'** ('नामाक्षरं' दुष्यन्त इति मद्वाचकस्य शब्दस्य **स्वरात्मकं** वर्णम्—HS). So says *Durga-singha* in *Kātantra* Vṛtti—"न क्षरति न चलतीति प्रधानत्वादक्षरं **स्वर** उच्यते"। Then तावत् =**three days.** But if it means **any letter, vowel or consonant.** ('अकारादि-क्षकारान्तं-क-पञ्चाशद् वर्णः'—*Medinī*. 'अक्षराणा मकारोऽस्मि'——*Gītā*), then तावत्=**Eight days.** If we take into account the Consonants only (which cannot be pronounced without the vowels) then the time will be **five** days. R remarks—**'त्रि-चतुर-दिनैः** इति भावः' but his **'चतुर्' is not clear.** It is doubtful whether the king was **at all definite** about his time. **एकैकम्**—Daily once only. **7. गच्छसि**=गमिष्यसि। By 'यावत्-पुरा निपातयोर्लट्' 2783.—"**निपातौ एतौ निश्चयं द्योतयतः** इति दीक्षितपादाः। 'यावत्तावदेतौ साकल्येऽ**वधि**-मानाव**धारणेषु**'—*T.* "यावत् भुङ्क्ते-निश्चितं भोक्ष्यते इत्यर्थः" "स यावदागच्छति, तावदहं गमिष्यामि। स यावता कालेन आगमिष्यति तावताकालेन अहं तत्र गमिष्यामि इत्यर्थः। **निपातयोःकिम्**। विशेष्ययो र्मभूत्। यावद्दास्यसि तावत् भोक्ष्ये, यत् परिमाणं दास्यसि तत् परिमाणं भोक्ष्ये इत्यर्थः"—*Prabhā*. **8. ०गृह-प्रवेशं नेता**—Here तृच् (३।१।१३३) has the sense of **future participle.** The *indirect* object optionally takes षष्ठी or २या by the *Vārt.* "गुण-कर्मणि वेष्यते। नेता अश्वस्य **श्रुघ्नस्य श्रुघ्नं** वा"—*SK.* 623. Also Cf. 'नेता चमूनामिव'—*Ra. XIV.* 22; **'When every morn my bosom glowed, To watch the convoy on the road'—Emerson.**

Remark:—It will be interesting to note that a "Ring Episode" somewhat similar to this, occurs in **Kaṭṭhahari Jātaka,** where Brahmadatta, king of Benares, while out a-hunting married a sylvan girl and **gave her a ring as a memento.** But when the lady later on went to the king with her son, who was no other than बोधिसत्व, the latter, like Duṣyanta of the Mahā. **wittingly** disowned her. This, however, does not establish Kāli.'s **indebtedness** to this Jātaka for the ring-eposode, as **the dates of various Jātakas are not yet ascertained.** It must also be noted that the ring in the Jātaka, has not the **potency of restoring** King's memory which is the essential virtue of it. **Far from getting recognition,** the king in the जातक **denied the ownership of the ring**, when it was presented to him by the lady whom he betrayed, saying "Nor is this my signet ring." Thus the जातक has nothing to do with the **mnemonic ring of Kāli.** Besides presentation of a **ring as souvenir is very common with the poets of all ages.** It is a universal and popular human convention. Read' 'ददौ तस्य ततः प्रीतः **स्वनामाङ्कोपशोभितम् । अङ्गुलीय मभिज्ञानं** राजपुत्र्याः परन्तपः*"–Rām. IV.*44.12;"**अभिज्ञानं** मया दत्तं **रामनामाङ्गुलीयकम्**"–*VI.* 127. 45; 'तस्यै भर्तुः **अभिज्ञानमङ्गु**-लीयकम् ददौ कपिः"–*Ra. XII.* 62. Again there is a **Greek** Story (Vide **Journal of Behar and Orissa Research Society.** Vol-VII, P. 97) in which a Greek King, Pelecritus by name, with a view to having a ken of what is ordained in his future, once threw the **Royal ring** into the ocean. Fortunately, however, the ring was recovered from the maw of a fish which was netted by a fisherman who presented the ring to the king. There is, no doubt, a bit of similarity between this story and the Ring. Episode of Śak. and so it has been argued that Kāli. is indebted to this story for his ring motif, as he has often mentioned **the term यवनी** in his works. But **there is not a single instance to show that the term यवन** has been used by Kāli to **mean the Greeks.** He has explicitly used the word **यवनी** for **Persian women** (Vide 55n. 23.). So this theory is summarily rejected.

Teet:—सानुमती—रमणीओ क्खु अवही विहिणा विसंवाविदो

[रमणीयः खलु अवधिः[1] विधिना विसंवादितः[2]] ।

Sānumatī—(*It*) was too charming an arrangement[1] to be [2]frustrated by fate.

विदूषकः—कहं धीवल-कप्पिअस्स लोहिअ-मच्छस्स उदलब्भन्तले आसि [कथं धीवर-कल्पितस्य[1] रोहित-मत्सस्य उदराभ्यन्तरे आसीत्] ।

Vidūṣaka—(*But*) how did it get inside the maw of the carp, [1]chopped by the fisher-man?

राजा—शचीतीर्थं वन्दमानायाः सख्यास्ते हस्ताद् गङ्गास्रोतसि परिभ्रष्टम् ।

King—While doing obeisance to the Śacī-tīrtha, (*it*) dropped into the stream of the Ganges from the hand of your friend.

विदूषकः—जुज्जइ [युज्यते] । Vidūṣaka—(*That's*) possible.

सानुमती—अदो क्खु तवस्सिणीए सउन्दलाए अधम्म-भीरुणा इमस्स-राएसिणो परिणए संदेहो आसि । अहवा ईदिसो अणुराओ अहिण्णाणं अवेक्खदि । कहं विअ एवं [अतएव तपस्विन्याः शकुन्तलाया अधर्म-भीरोरस्य राजर्षेः परिणये सन्देह आसीत् । अथवा ईदृशः अनुरागः अभिज्ञानम्[4] अपेक्षते । कथमिवैतत्] ।

Sānumatī—It was, indeed, for this that, as to poor Śakuntalā, this royal-sage, sin-fearing (*as he was*), had a doubt in (*his*) marriage. Or, how is it that affection of such a type (*i.e. so strong*) stands in need of a [4]souvenir ?

राजा—[5]उपालप्स्ये तावदीदमङ्गुलीयकम् ।

King—(*I*) will now reproach[5] this ring.

विदूषकः (आत्मगतम्)—गहीदो णेण पन्था उम्मत्तआणं ।

[गृहीतोऽनेन पन्था उन्मत्तानाम्] ।

Vidūṣaka —(*To himself*)—He has taken to the ways of a bedlamite.

राजा—"कथं नु बन्धुर-कोमलाङ्गुलि[6]
करं विहायासि निमग्न मम्भसि ।

वंशस्तनित (जतजर)

अथवा—
अचेतनं नाम गुणं न लक्षयेन्
मयैव कस्मादवधीरिता[6] प्रिया" ॥१३॥

King—How possibly could you, (*O ring*) ! get down into the water, having left that hand with[6] beautiful and tender fingers[6] ? Or, rather, a senseless (*thing*) possibly may not discern merit. (*But*) why did I myself disown[6] (*my*) beloved ? (13)

V. L.—'रमणीयः'—R. B. V. M. 'रमणीयम्'—S. 'अवधिः—R. B. V. M. 'व्यवधिः'—S. 'विसंवादितः'—R. B. V. M.'संपादितः'—S. 'अथवेदृशः'—R. B. V. M. 'अथवा नेदृशः'—S. 'बन्धुर-कोमल'—

R. B. V. M. 'कोमल-बन्धुर'—B. 'गुणम्'—R. V. M. B. 'गुणान्'—S. 'लक्षयेत्'—R. V. M. 'वीक्षते'—B. 'अपेक्षते'—S.

सानुमतीति। 'अवधिः' विरहस्य सीमा। यद्वा सुन्दर-दाम्पत्य-सुख-जननो-पयोगित्वात् रमणीयः कालः। ['अवधिः सीम-कालयोः' इति त्रिकाण्डशेषः) 'विधिना' विपरीतेन दैवेन 'विसंवादितः' **विसंवादः** प्रापितः। ('विप्रलम्भो विसंवादो विप्रलाभश्च कथ्यते' इति हलायुधः। "द्वयमङ्गीकृताऽसम्पादने" इति रघुनाथः। 'मिथ्याख्यान-वञ्चनायाम्' इति मुकुटः।। "प्रातिपदिकात् धात्वर्थे बहुलम् इष्ठवच्च' इति गणसूत्रात् (सि. कौ.'–२५७३ णिच्) अङ्गुरीयकस्य **अक्षर-गणानान्तेऽपि नेता तु नोपगतः इति विसंवादः। विदूषक इति।** 'धीवरेण कल्पितस्य' खण्डशः छेदितस्य [इति त्रिकाण्डशेषः]। **सानुमतीति।** 'अतएव' अङ्गुलीयकस्य अदर्शनादेव। तपस्विन्याः' अनुकम्पार्हायाः 'शकुन्तलायाः' ['परिणयतेः कर्मणि षष्ठी] 'परिणये' विवाहे 'राजर्षेः' [दिह-धातोः कर्तरि षष्ठी-२।३।६५] 'संदेहः' संशयः। 'अथवा' इति पक्षान्तरे। 'ईदृशः' अतिगभीरः 'अनुरागः' यो मया अधुना दृष्टः, सः "अभिज्ञानम्' अङ्गुलीयकादि स्मारक-द्रव्यम् 'अपेक्षते' अभिलषति इति मे विस्मयः। **राजेति।** 'उपालप्स्ये' भर्त्सनां करिष्ये ['यः सनिन्द उपालम्भ स्तत्र स्यात् परिभाषणम्' इत्यमरः]। **विदूषक इति।** 'उन्मत्तानाम्' उन्माद-युक्तानाम् ['उन्मत्तो मुचुकुन्दे स्यात् धत्तुरो-न्माद-युक्तयोः' इति हैमः। "न ध्या-ख्या-पृ-मूर्च्छि-मदाम्"–(८।२।५७)–इति निष्ठाया न नत्वं]। **कथमिति।** 'बन्धुराः' सुविभक्त-पर्वतया उन्नतानताः ['बन्धुरं तून्नतानतम्' इयमरः] यद्वा 'बन्धुरा' रम्या ['बन्धूर-बन्धुरौ रम्ये नम्रे, हंसे तु बन्धुरः' इति विश्वः] अथच 'कोमलाः', स्पर्श-सुभगाः 'अङ्गुलयः' यत्र, अतएव सर्वथा परित्यक्तुम् अयोग्यं 'तं करं' ['प्रकान्त-प्रसिद्धानुभूतार्थेषु यच्छब्दः तच्छब्दं नापेक्षते' इति प्रकाशोक्तेः यच्छब्दस्य अनपेक्षा] 'विहाय' त्यक्त्वा [अनेन **बुद्धि-पूर्वकस्त्याग उक्तः, न मोहात् भ्रंशः**] 'कथं' केन कारणेन 'अम्भसि' अतादृशस्पर्शे अचेतने जले 'नितरां मग्नम् असि' [अत्र चेतन-व्यवहार-समारोपात् **समासोक्तिः** अलङ्कारः]। 'अथवा [इति **वृत्ताक्षेपालङ्कारः**] पक्षान्तरे 'अचेतनं' जड़-वस्तुजातं कर्तृ, 'गुणम्' आश्रयस्य योग्यतादिकं 'नाम' इति सम्भावनायां 'न लक्षयेत्' न परिज्ञातुं शक्नुयात् [संभाव-नायां लिङ। **अर्थान्तरन्यासोऽलङ्कारः**]। त्वया तु अचेतनत्वात् इदं कृतं, 'मया एवं गुणाऽगुणादि-विवेका-भिमानवता सचेतनेन 'कस्मात्' अकारणम् इत्यर्थः 'प्रिया' न केवलं स्त्रीमात्रं किन्तु दयिता, 'अवधीरिता' अवज्ञाता प्रत्याख्याता इति यावत् [**'अवधीरः अवज्ञायां चुरादिः। 'आवधीरयत् साधुमसाधुः' इति दुर्गादासः**]। [अवधीरणा-कारणाऽभावे तदुत्पत्तेर्**विभावना**। अन्त्य-चरणेन नामाङ्गुरीयकाद् आत्मनः अधमत्वं व्यज्यते इति वस्तुना **व्यतिरेकालङ्कार-ध्वनिः। श्रुत्यनुप्रास-**

वृत्त्यनुप्रासयोः सङ्करः। तृतीय-पादे अर्थान्तरन्यासः। वंशस्तनित इत्यपर-नाम वंशस्थं वृत्तम्) ॥१३॥

206n.—1. विसंवादितः=वि+सम+वद्+णिच् क्त कर्मणि-Thwarted, caused to fail in keeping up the promise (Com.). 'फले विसंवदति'—*Vik. II.* अवधिः=Time (HS), or Arrangement (Com.). Cf. "पद्मावती—रमणीयः खलु कथायोगः नृशंसेन विसंवादितः'—SV. IV. 2. शचीतीर्थं &c.—The king here reiterates the utterance of Gautamī while accounting for the loss of the the ring(Page 471) उन्मत्तानाम् &c.—This is because of king's railing at a lifeless thing. Vidūṣaka here is referring to the ninth stage of love-sickness (196*n. Remark.*) known as उन्माद,—"चित्त-संमोह उन्मादः काम-शोक-भयादिभिः। अस्थान-हास-रोदित-गीत-प्रलपनादिकृत्"—SD. Cf. 'नैव पश्यति जात्यन्धः, कामान्धो नैव पश्यति। न पश्यति मदोन्मत्तस्त्वर्थी दोषं न पश्यति" ॥ 'कामार्ता हि प्रकृति-कृपणाश्चेतना-चेतनेषु"—*MD.* 5, and *MN thereon* 3. बन्धुरः &c.—बन्धुरः="Depressed in the joints and slightly raised inside". *i. e.* undulating, hence natural. This is a *good* sign. Read "दीर्घाङ्गुलीभिः कुलटा, कृशाभि रतिनिर्धना। ह्रस्वाभिः स्याञ्च ह्रस्वायुः, भग्नाभिः भुग्नवर्तिनी ॥ हस्तद्वयं मृगाक्षीणां बहुभोगाय जायते। मृदुमध्योन्नतं रक्तं तलं पाण्यो ररन्ध्रकम्" ॥—इति सामुद्रके। Or, बन्धुर=(रम्य)=Beautiful–(C). 4. नि-मग्नम्—Merged *deeply* into the water. Cf. "अयि जड़प्रकृते! परिच्युतस्तत्-कुच-कुम्भ-मध्यात् किं शोषमायासि मृणाल-हारः"—Rat. II. 15; SV. VI. 5. मयैव &c.—The action of the ring may be somewhat justified because it is **inanimate** and as such bereft of any power of discernment or appreciation of merits and demerits. But the king's case stands unjustifiable as he, a **rational** being, disavowed the person who had been extremely dear to him. Mark that his determination of railing at the ring ends but in self-reprimand. अवधीरिता—(97n. 5.) "अवधीर्य" (with ल्यप्), however, has been used by *Mahā* and *Śrīharṣa*-(NC. V. 72), *Śūdraka*, (*MK. II.*)—which can be justified by considering "अव" as an 'उपसर्ग', and "धीरि" as the root. Then लुङ्=अवादिधीरत्। Now See–(240n. 10).

Text:—विदूषक: (आत्मगतम्)—कहं बुभुक्खाए खादिदव्वो म्हि (कथं बुभुक्षया खादितव्योऽस्मि)। Vidūṣaka (*Aside*)—What! am I to be devoured by hunger (*when he is apostrophizing his ring*)?

राजा—अकारण-परित्यक्ते¹! अनुशय-तप्त-हृदय²स्तावत् अनुकम्प्यताम् अयं जनः पुनर्दर्शनेन।

King—O ¹cause-lessly forsaken (*one*)! let this person with (*his*) heart consumed (M) by remorse² be just pitied by (*your*) sight again.

(प्रविश्यापटी-क्षेपेण चित्र-फलक-हस्ता) **चतुरिका—भट्टा! इअं चित्त-गदा भट्टिणी** [भर्तः! इयं चित्र-गता भट्टिनी]। (इति चित्र-फलकं दर्शयति)।

(*Entering with a toss of the curtain, with a tablet in hand*)
Caturikā—Here (*is our*) queen painted in the picture.

(*This said, shows the tablet*).

विदूषक: (विलोक्य)—**साहु वअस्स! महुरा-वत्थाण-दंसणिज्जो भावा-णुप्पवेसो।। खलदि विअ मे दिट्ठी णिण्णुण्णअ-प्पदेसेसु। किं बहुणा, सत्ता-णुप्पवेस-सङ्काए आलवण-कोवूहलं मे जणअदि** [साधु वयस्य! मधुराऽवस्थान-दर्शनीयो¹ ²भावाऽनुप्रवेशः। स्खलति³ इव मे दृष्टिः निम्नोन्नत-प्रदेशेषु⁴, किं बहुना, '⁵सत्त्वाऽनु-प्रवेश-शङ्कया ⁶आलपन-कौतूहलं मे जनयति]।

Vidūṣaka—(*Looking at it*)—Well done (*my*) friend! The ⁴representation of the (*various*) sentiments⁴ has become delightful² owing to charming delineation (*of parts*). My vision stumbles⁵ as it were, amidst (*its*) ⁶elevations and depressions⁶. To be brief, (*it*) has roused in me a ⁸curiosity for a ⁸commune with the impression (*that it is*) instinct with life⁷.

सानुमती—अम्मो, एसा राएसिणो णिउणदा। जाणे पिअ-सही अग्गदो मे वट्टदि त्ति (अम्मो, एषा राजर्षेः निपुणता। जाने प्रिय-सखी अग्रतो मे वर्तते इति)। Sānumatī—Oh, such (*is*) the skill of the royal-sage. (*I*) fancy, my dear friend is standing before me.

V.L.—'अनुशय'—B.V.M. 'परित्यागानुशय'—R. S.'मधुरावस्थान'——R. V. M. 'मधुरसंस्थान'—S. B reads 'निभृत' for 'निम्नोन्नत'। 'किं बहुना'—&c.—B. HS. Omitted in other editions. 'निपुणता'——R. V. M. 'वर्तिका-निपुणता'—S. 'वर्तिका-लेखा-निपुणता'—B.HS.

विदूषक इति। 'बुभुक्षया' क्षुधया 'अस्मि' अहम् 'खादितव्यः'। असौ उन्मत्त अतएव विषयाऽन्तर-संचाराऽभावात् मया भोजनार्थं गन्तुमशक्यम् इत्याशयः। **राजेति।** 'अकारणं' निर्हेतुकं 'परित्यक्ता' प्रत्याख्याता तत्संबुद्धौ। ['अत्र

परित्यागश्चेत् कथं कारणाऽभावः। कारणाऽभावश्चेत् कथं परित्याग इति विरोधः नाऽऽशङ्कनीयः। अत्र कारण-शब्देन प्रसिद्धं नायिकापराध-गृहीतं तदेव त्यागे कारणं दृष्टचरम्' इति राघवपादाः]। 'अनुशयेन' पश्चात्तापेन 'तप्तं हृदयं' यस्य तथोक्तः अनेन राज्ञः क्षमा-योग्यत्वं दर्शितम् 'अयं' मल्लक्षणः 'जनः पुनः दर्शनेन' दर्शन-दानेन 'अनुकम्प्यताम्' [अनेन आक्रन्द-नामा नाटयालङ्कार उपक्षिप्तः। तल्लक्षणं यथा दर्पणे—"आक्रन्दः प्रलपितं शुचा"]। चतुरिकेति। [इयं चित्रगता भट्टिनी' इत्यनेन यद् राज्ञा पुनर्दर्शनं याचितं तदनया भङ्ग्या कविना संपादितम्। अतएव पश्चात् 'चित्रफलकं दर्शयति' इत्युक्तिः—इति राघवपादाः।] 'भट्टिनी' नाटयोक्तौ अकृताभिषेका राज-योषित्. ('देवी कृताभिषेकायाम्, इतरासु च भट्टिनी' इत्यमरः]। विदूषक इति। 'साधु' इति प्रशंसायाम् अव्ययम्। 'भावस्य' मनसः विकारस्य ['विकारो मानसो भाव' इत्यमरः] तस्य यः अनुप्रवेशः' प्रकटनम् अभिव्यञ्जनम् इति यावत् स 'मधुरेण' मनोहरेण 'अवस्थानेन' विन्यासेन 'दर्शनीयः' हृद्यः संजातः इति। 'निम्नेषु' नाभि-प्रमुखेषु अनुन्नतेषु, 'उन्नतेषु' स्तन-नासिका-प्रभृतिषु उच्चेषु 'प्रदेशेषु' शरीरावयवेषु 'मे दृष्टिः' 'स्खलतीव' भ्रंशमनुभवतीव। 'किं बहुना' समासेन ब्रवीमि; एतत् आलेख्यं 'सत्त्वस्य' प्राणानां ['द्रव्याऽसु-व्यवसायेषु सत्त्वमस्त्री तु जन्तुषु' इत्यमरः] यः 'अनुप्रवेशः' अभ्युदयः। प्राण-सन्निवेश इत्यर्थः तस्य या 'शङ्का' बुद्धिः तया, 'मे आलपनस्य' संलापस्य 'कौतूहलं' ("रम्यवस्तु समालोक्य लोलता स्यात् कुतूहलम्", "लोलता अपूर्व-वस्तु-दिदृक्षायामिति रघुनाथः") 'जनयति' उत्पादयति।

207n.—1. खादितव्योऽस्मि &c.—Vidūṣaka though extremely hungry, cannot go away leaving the king alone, who has been raving all the while. He expresses the keenness of his hunger by saying that hunger without getting anything as food, will surely devour him. Note that Vidūṣaka, as usual is **contemplating about food.** [222 *n.* 7 (*end*); 72n. 1]. Cf. 'दृढविपणिकन्दुरिव मे उदराभ्यन्तरं दह्यते'—*Māla. II.* **2. इयं चित्रगता** &c.—Hardly had the King uttered 'पुनर्दर्शनेन' when चतुरिका entering with the picture in hand said 'इयं चित्रगता भट्टिनी'। This is prognosticative of future event i.e. king's reunion with शकुन्तला। This is a **clever** trick with Sanskrit poets to foreshadow future events. Thus in UC, (Act. I) as soon as Rāma had uttered ' 'परमसह्यस्तु विरहः, the प्रतिहारी appeared and said 'देव उपस्थितः' meaning thereby the arrival of the spy (दुर्मुख); but the poet very cleverly insinuates the विरह of सीता due to her immineat banishment. In VS, (Act

II, 23), scarcely had दुर्योधन said 'ममोरु-युग्मम्", before कञ्चुकी entered and said "देव भग्नं, भग्नम्" । The chamberlain meant to say that the Chariot flag had been thrown down by strong gale. But the poet cleverly utilized it as a presage to the ऊरुभङ्ग of दुर्योधन । (Vide SD. 302 & 527) & (*Com.*) **3. साधु**—An exclamatory अव्यय, signifying joy. Cf. 'साधु गीतम्'—*Śak. I.* 'साधु रे पिङ्गलवानर ! साधु'–*Māla. IV.* **4. मधुरा-वस्थान** &c.–**मधुर**=Nice, proper; **अवस्थान** =Delineation, adjustment, posture of the parts (*R*). **भाव**=Various mental feelings (रति) । **अनुप्रवेश:**—Infusion. Cf. 'हरिदश्वदीधिते: अनुप्रवेशादिव् बालचन्द्रमा:'—*Ra. III.* 22. The picture has been wonderfully beautiful on account of the exquisite delineation of the various mental feelings (such as fear, curiosity &c.). "The presence of the prevailing sentiment (*love*) is delightful by its sweet abiding in very part"—*M.* **5. स्खलति** &c.—Show that the relief (*i.e.* appearance of *projection and depression*) was drawn with great care to utmost perfection and 'my eye is deceived and seems to follow the inequalities of the surface'—*M.* **6. अम्मो**—(118n.1) **7. जाने**—'अनुपसर्गात् ज्ञ:'–(1. 3. 76)–इति आत्मनेपदम् ।

Text :—राजा—"यद्यत् साधु न चित्रे स्यात् क्रियते तत्तदन्यथा ।
(पथ्यावक्त्र) **तथापि तस्या लावण्यं रेखया[1] किञ्चिदन्वितम्" ॥१४॥**

King—Whatever is not well executed in the picture is (*constantly*) portrayed otherwise (*for improvement*). (Yet her *angelic*) loveliness is but partially represented by delineation.[1] (14).

सानुमती—सरिसं एदं पच्छा-दाव-गरुणो सिणेहस्स अणवलेवस्स अ
[सदृशमेतत् पश्चात्ताप-गुरो:[2] स्नेहस्य अनवलेपस्य[3] च] ।

Sānumatī—This (*speech*) is worthy of (*his*) affection, heightened[2] through remorse and absence[3] of pride.[3]

विदूषक:—भो, दाणिं तिण्णि तत्तहोदीओ दीसन्ति । सव्वाओ अ दंसणीआओ । ता कदमा एत्थ तत्तहोदी सउन्दला [भो:, इदानीं तिस्र: तत्रभवत्यो दृश्यन्ते । सर्वाश्च दर्शनीया: । तत् कतमा अत्र तत्रभवती शकुन्तला] ।

Vidūṣaka—Ho ! now three ladies are (*here*). All are (*equally*) beautiful Which one here (*is*) Her Ladyship Śakuntalā ?

सानुमती—अणभिण्णो क्खु ईदिसस्स रूवस्स मोह-दिट्ठी अअं जणो
[अनभिज्ञ: खलु ईदृशस्य रूपस्य मोघदृष्टि[4] रयं जन:] ।

Sānumatī—Unaware, indeed, of such a beauty, this person has his sight[4] in vain[4].

राजा—त्वं तावत् कतमां तर्कयसि ।

King —Well, which one do you guess ?

· V. L.—'रेखया'—R. M. V. S. K. लेखया'—B. HS. P. 'मोघदृष्टि:'—R. B. M. V. 'मोहदृष्टि:'—S. Some B Mss read 'मोघचक्षुः' ।

यद्यदिति । 'चित्रे' मया लिखिते आलेख्ये 'यत्-यत्' अङ्गादिकं साधु अविकलं विन्यस्तं 'न स्यात्' [संभावनायां लिङ्] 'तत् तत्' सर्वेण चित्रकरेण 'अन्यथा' यथा दर्शनीयं स्यात् तथा क्रियते, स्वेच्छया प्रकारान्तरेण अङ्क्यते । सर्वेषामेव चित्र-कराणाम् इयमेव रीति: यत् अङ्कयितव्यस्य यो योऽंश: आलेख्ये अविकलं विन्यस्तुं न शक्यते स सोऽंश: यथाकामं प्रकारान्तरेण तै: अङ्क्यते । अनेन आलेख्यस्य असं-पूर्णत्वं प्रतिपद्यते । 'तथापि' चित्र-कर्मण: असंपूर्णत्वेऽपि 'तस्या:' शकुन्तलाया: 'लावण्यम्' अलौकिकं सौन्दर्यं 'रेखया' चित्रार्थं तुलिका-विहितया 'किञ्चित्' स्वल्पं न तु बाहुल्येन, 'अन्वितम्' अभिव्यञ्जितम् इत्यर्थ: । अत्र चित्रे तदलौ-किक-लावण्यस्य कथञ्चिद् उन्मेष: सम्पादित: । ('लावण्यं रेखया' इति विरोधाभास: । लावण्य-लक्षणं तूक्तं प्राक् । रेखा-लक्षणं यथा सङ्गीतरत्नाकरे—"शिरो-नेत्र-करादीनामङ्गानां मेलने सति । कार्यस्थितिर्यतो· नेत्र-हरा रेखा प्रकीर्तिता" ।। पथ्यावक्त्रं वृत्तम्) ।।१४।। सानुमतीति । 'अविद्यमान: अवलेप:' अहङ्कार (इति मेदिनी) यस्य तादृशस्य निरहङ्कारस्य । 'पश्चात्तापेन गुरो:' महत: 'च स्नेहस्य' अनुरागस्य 'एतत्' राजोक्तं 'सदृशं' योग्यम् । सानुम-तीति । 'मोघा' निरर्थका 'दृष्टि:' यस्य स: ('मोघा स्त्री पाटलावृक्षे, मोघं त्रिषु निरर्थके' इति रुद्र: । मुह्यन्ति अस्मिन् इति मुह्यते: हलश्च'-(३।३।१२१)-इति घञ् । 'न्यङ्क्वादीनाञ्च'-(७।३।५३)–इति साधु:) ।

208a.—1. यद्यत्—It is not possible to paint, in toto. all the human sentiments in a picture. Hence it is a common practice with the painters to print otherwise (अन्यथा) what cannot be executed perfectly (साधु) in a picture or what when painted as it is, will look other than fair. *Thus a picture always falls short of the beauty of the original.* Nevertheless the loveliness of Śak. has been partially delineated in the picture. Or, this *may be explained otherwise* thus:—The king did his best to improve upon those parts of the picture which fell short of Śak's beauty. But god-made loveliness of her was of nonpariel (स्त्री-रत्न-सृष्टि: अपरा &c. —Act II. 9) nature and in spite of constant retouches, the picture does but partially imitate that beauty,

i.e. it is inferior to the original made by the creator himself *For the difference between a human being and its portrait,* Read—"*What find here ? Fair Portia's counterfeit ! * * yet look, how far, The substance of my praise doth wrong this shadow. In underprizing it, so for this shadow.* Doth limp behind the substnce". The studesnt should read the whole speech of *Bassanio in* **Merchant of Venice.** *III.* 2; *Ra. XVIII,* 33; "चित्रगतायामस्यां कान्ति-विसंवाद-शङ्कि मे हृदयम् । सम्प्रति शिथिल समाधि मन्ये येनेयमालिखिता"—*Māla. II.* 2. **2. सदृशमेतत्** &c.—Like Vidūṣaka, Sānumatī also thinks that the picture is a *faithful representation* of the original. But the king is not satisfied with it. He opines that Śak. is far more beautiful. This exaggeration, however, according to Sānumatī is due to his ardent affection for Śak, which has again been intensified through remorse. **3. मोघदृष्टिः** &c.—**मोघा** = Useless, **दृष्टिः** = Eye, hence one who has his eyes in vain. Cf. 'माधव्य, अनवाप्त-चक्षुःफलोऽसि । येन त्वया दर्शनीयं न दृष्टम्'—(61n. 5). Also 'हरिम् अवलोक्य सफल नयने'—*Gīt. IX.* 6. Sānumatī abuses Vidūṣaka as he considers **all three equally beautiful.** (Cf. 'सर्वाश्च दर्शनीयाः)'—*Supra.*) Like the king, she also is speaking in this train, out of her ardent affection for Śak; for in sooth, Śak. and her friends are *equally* beautiful, and Vidūṣaka is *right to* call all of them 'दर्शनीयाः' । Note that *Duṣyanta also at the first sight considered* **all three to be qually beautiful.** Cf. '**सम-वयो-रूप-रमणीयं** भवतीनां सौहार्दम्'—Cf. also the idea in *BK. V.* 19. For **मोघ,** *Cf.* 'याञ्चा **मोघा** वरमधिगुणे, नाधमे लब्धकामा'—PA & *MD.* 6. '**मोघ**-वृत्तिफलमस्य वृथा चेष्टितम्'—*Ra. XI.* 39. 'अत्यन्तवियोग-मोघे'—*XIV.* 65. '**मोघाशा मोघ**-कर्माणो **मोघ**-ज्ञाना विचेतसः'—*Gītā. IX.* 12.

Text:—विदूषकः (निर्वर्ण्य)—**तक्केमि जा एसा सिढिल-बन्धणु-व्वन्त-कुसुमेण केस-हत्थेण उब्भिण्ण-स्सेअ-बिन्दुणा वअणेण विसेसदो ओसरिआहिं बाहाहिं, अवसेअ-सिणिद्ध-तरुण-पल्लवस्स चूअ-पाअवस्स पासे इसि परिस्सन्ता विअ आलिहिदा सा तत्तहोदी सउन्दला, इदराओ सहीओत्ति** (तर्कयामि या एषा शिथिल-बन्धनो-द्वान्त-कुसुमेन केश-हस्तेन उद्भिन्न-स्वेद-बिन्दुना वदनेन, विशेषतः अपसृताभ्यां बाहुभ्याम्, अवसेक-स्निग्ध-तरुण-पल्लवस्य चूत-पादपस्य पार्श्वे ईषत् परिश्रान्ता इव आलिखिता सा तत्रभवती शकुन्तला, इतरे सख्यौ इति)।

Viūṣdaka (*Surveying*)—Methinks that this one who is (*here*) painted, as it were, a little tired, at the side of the water-glistening young-tendrilled mango-tree, with locks[2] of hair[2] having the fillet slackened and the flowers falling[1], with a face having drops of sudor appearing[3] (*on it*), and with arms extremely drooping[4]—This one, (*I pressume, is*) Her Ladyship Śakuntalā; the other two (*are her*) companions.

राजा—निपुणो भवान्। अस्त्यत्र ममापि भाव-चिह्नम्[5]।

आर्या [12,18 12, 15]
स्विन्नाङ्गुलि-विनिवेशो[6] रेखा-प्रान्तेषु दृश्यते मलिनः।
अश्रु च कपोल-पतितं दृश्यमिदं वर्णकोच्छ्वासात्[7] ॥१५॥

(चेटीं प्रति) चतुरिके, अर्ध-लिखितमेतद्विनोद-स्थानम्[8]। तद्गच्छ। वर्तिका[9] स्तावदानय।

King—Clever you (*are*). Besides there (*is*) here a trace[5] of my passion.[5] The (*deep laid*) dint[6] [*impression*] of (*my*) sweating finger on the edges of the picture is seen (*all*) dark, and a (*drop of my*) tear fallen on (*her*) cheek is discernible from the puff[7] [*swelling*] of the paint.[7] (15).

(*To the maid-servant*)—Caturikā, half-sketched (*is*) this source[8] of (*my*) diversion[8]. So go (*and*) bring (*me*) the brushes[9].

V.L.—'शिथिल-बन्धनः'—B. 'शिथिल-केशबन्धन'—R. M. S. '०केशबन्ध'—V. B reads 'केश-हस्तेन' for 'केशान्तेन'। 'नमितांशकाभ्याम्' —B. 'अपसृताभ्याम्'—R.V.B.M. 'अवसृताभ्याम्'—S. 'भावचिह्नं'—B.R. M.V.S. 'तावच्चिह्नं'—R's Com. Some B Mss read 'विनिवेशात्' and 'मलिना' (रेखा) for 'विनिवेश' and 'मलिनः'। B reads 'लक्ष्यम्' for 'दृश्यम्'। 'वर्णक'—B. 'वर्णिका'—M.V.K. 'वर्तिका'—R. S. ; B reads 'वर्तिकाः' for 'वर्तिकाम्'। 'चेटीं प्रति'—B. Omitted by others.

विदूषक इति। 'अवसेकेन' जल-सिञ्चनेन 'स्निग्धा' मल-नाशात् मसृणाः 'तरुणाः' अभिनवाः 'पल्लवाः' किशलयानि यस्य तादृशस्य 'चूत-पादपस्य' आम्रवृक्षस्य 'पार्श्वे' समीपे। 'शिथिलं' विस्रस्तं 'बन्धनं' यस्य तादृशः, तेन हेतुना 'उद्वान्तानि' उद्गिराणि, परित्यक्तानि इत्यर्थः (गौणवृत्त्या अश्लीलता-परिहारः) 'कुसुमानि' न्यस्तपूर्वाणि पुष्पाणि यस्मात् तादृशेन 'केश-हस्तेन' कच-कलापेन इत्यर्थः ["पाशः पक्षश्च हस्तश्च कलापार्थाः कचात् परे" इत्यमरः। "इत्थं-भूत-लक्षणे"-(२।३।२१) इति ३या]। 'उद्भिन्नाः' आविर्भूताः 'स्वेद-विन्दवः' घर्म-विप्रुषः यस्मिन् तथा-भूतेन 'वदनेन' [पूर्ववत् ३या। अनेन कोमलत्वं श्रम-क्लेश-सहनाऽक्षमत्वं च व्यज्यते]। 'विशेषतः' आधिक्येन, बाहुल्येन, इति यावत् 'अपसृताभ्याम्'

[अकर्मकत्वात् कर्तरि क्तः—३०८६] शिथिल-मूलाभ्यां 'बाहुभ्याम्' [अत्राऽपि पूर्ववत् ३या] । राजेति । 'निपुणः' अनुमान-कुशल इत्यर्थः । 'भावेन' अनुरागेण कृतं 'चिह्नम्' (उत्तरपद-लोपी कर्मधारयः ।) यद्वा 'भावस्य' सात्त्विक-भावस्य अर्थात् स्वेदाश्रुणोः 'चिह्नम्' [इति षष्ठी-समास इति न्यायपञ्चानन-पादाः] । स्विन्नेति । 'रेखायाः' चित्रपटस्य 'प्रान्तेषु' प्रान्त-भागेषु 'मलिनः' कृष्णवर्णः 1 'मलिनं कृष्ण-दोषयोः' इति हैमः । 'ज्योत्स्ना-तमिस्रा'—(५।१। ११४) इति साधुः] 'स्विन्नानां' सात्त्विक-भावो-दयात् घर्माप्लुतानाम् (अङ्गुलीनां विनिवेशः' स्थापनं 'दृश्यते' । चित्र-निर्माण-वेलायां सात्त्विक-भावोदयात् अङ्गुलीनां घर्माऽऽप्लुतत्वात् तासां स्पर्शेन चित्रपटे कृष्णवर्ण-चिह्नम् समुत्पन्नम् । इदञ्च, 'कपोले' आलेख्यस्थ-शकुन्तलायाः गण्ड-प्रान्ते 'पतितम्' मदीय-नेत्र-प्रान्ताद्विगलितम् 'अश्रु वर्णकस्य' चित्र-साधनीभूत-विलेपनस्य [इति शिशुपाल-टीकायां (१६।६२)मल्लिनाथपादाः ।। "वर्णक श्चारणे स्मृतः । विलेपने चन्दने च वर्णकं स्यात्" इति विश्वः] 'उच्छ्वासः' उच्छूनता स्फीतता इति यावत् तस्माद् हेतोः 'दृश्यम्' अर्थात् अनुमानेन अवगन्तव्यम् । (दृशेः क्यप्—३।२।११०) । (अनुमानाऽनुप्रासौ । अनेन हेतुनाम भूषणमुपक्षिप्तम् । तल्लक्षणं यथा दर्पणे—"हेतुर्वाक्यं समासोक्तम् इष्टकृद्धेतुदर्शनात्" । आर्या जातिः) ।।१५।। 'विनोदस्य तप्त-हृदयाऽऽश्वासस्य 'स्थानम्' उपायभूतं 'चित्रम् अर्ध-लिखितम्' असम्पूर्णम् । 'वर्तिकाः' तूलिकाः ['पटलेपे पक्षिभेदे तूलिकायाञ्च वर्तिका' इति नानार्थ-संग्रहे अजयपालः । अनेन वर्णकादीनामपि आनयनं लक्ष्यते ।]

209n.—1. निर्वर्ण्य—It reflects great credit on the part of Vidūṣaka that he had at last found out correctly Śak. though she was not seen before. **2. शिथिल** &c.—Cf. 'आलोकमार्गं सहसा व्रजन्त्या कयाचिदुद्वेष्टन-वान्त-माल्यः । बन्धुं न सम्भावित एव तावत् करेण रुद्धोऽपि च केशपाशः"—*Ra. VII.* 6; (65n. 5). **3. केश-हस्तेन**—'हस्त', 'पाश' after 'केश', 'कच' &c. denote "Luxuriance; mass or abundance" [व्रात] of hair (n. 2) and (Com.). Cf. "एषोऽहं गृहीत्वा केशहस्ते दुःशासन-स्यानुकृतिं करोमि"—*MK. I* 30. 'करेण रुद्धोऽपि च केशपाशः—*Ku. VIII.* 57; 1. 48. **'केश-हस्तेन'** is preferred to 'केशान्तेन', as like many of his favourite words, Kāli, has already used this **very word elsewhere under almost similar circumstances.** Cf. "रति-विगलित-बन्धे केशहस्ते सुकेश्याः", &c.—*Vik. IV. 10.* **4 भाव-चिह्नम्**—भाव=सात्त्विक-भाव । —Indications of my passion. Cf. "स्तम्भ-स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः । वैवर्णम् अश्रुप्रलय इत्यष्टौ सात्त्विकाः स्मृताः"—*SD.* Here only two are alluded to, viz. **स्वेद**

(perspiration—(अङ्गुली-स्वेदेन लुप्यन्तेऽक्षराणि'—Vik. II)—as inferred from the impression of the finger on the edge of the canvas, and अश्रु which is responsible for the bulging of the colour. **5. स्विन्नाङ्गुलि** (Impression of the sweating fingers) &c.—Cf. "स्विन्नाङ्गुलिः पुङ्गव-केतुरासीत्"—*Ku. VIII.* 77 "**स्विन्नाङ्गुलि** संववृते कुमारी"—*Ra. VIII* 22. and *MN* thereon. "**अङ्गुली-स्वेदेन** च लुप्यन्ते अक्षराणि"—*Vik II.* 'कथञ्चिदालिखन्नङ्गुलीक्षरणसन्न वर्तिकः'—Ra. XIX. 19 **6. वर्णकोच्छ्वासात्—वर्णक**=A paint or any thing used as a pigment. **वर्णं करोति इति वर्ण+ण्वुल्**–(3.1.133) = **वर्णकः** or **वर्णकम्** । 'विलेपने चन्दने च वर्णकं पुंनपुंसकम्'—*Rabhasa.* 'नृप-मौलि-मरीचि-**वर्णकैः**'—*ŚPB. XVI.* 62. 'एतैः पिष्ट-तमाल वर्णक-निभैः'—*MK. V.* 46; also *BK. XIX. II.* **उच्छ्वास**=Puff. When a water-particle falls on a painting, the part wet, swells up. This swelling is 'उच्छ्वास' । *R's* 'वर्तिका' is **rejected,** as in the following sentence, it has been used in the sense of '*brush*' and not in the sense of '*painting*'. '**कपोल-पतितं**'—'Fallen from my cheek', or '*perhaps fallen on the cheek' of the protrait—M.* **7. विनोद-स्थानं—"means of relief"**—*Roby Dutta. i. e.* the picture drawn by the king to amuse himself. M wrongly translates—"**The garden in the background of the picture is only half painted"**—(200n. 6). **चेटीं प्रति** (*B*)—This stage-direction is *wrongly omitted* in other recensions.

Text :—चतुरिका—अज्ज माहव्व, अवलम्ब चित्त-फलअं जाव आअच्छामि [आर्य माधव्य, अवलम्बस्व चित्र-फलकं यावदागच्छामि] ।

Caturikā—Sir Mādhavya, hold the tablet until (*I*) return.

राजा—अहमेवैतदवलम्बे । (यथोक्तं करोति । निष्क्रान्ता चेटी) ।

King—(*Nay*), I myself will hold it. (*Does as said. Exit maid*)

राजा (निःश्वस्य)—**साक्षात् प्रियामुपगता मपहाय पूर्वं**

वसन्ततिलका (तभजजगग)

'चित्रार्पितामहमिमां बहु' मन्यमानः ।
'स्रोतो-वहां पथि निकाम'-जलामतीत्य
जातः सखे ! प्रणयवान् मृग-तृष्णिकायाम्' ॥१६॥

King (*Sighing*)—Having first disowned (*my*) beloved when she personally came to me, and (*now*) thinking[a] much[a] of her

'when placed on the picture[1], I have, O friend, become enamoured of a deer-drouth[6] [*mirage*] after having passed on (*my*) way, a (*gushing*) stream[2] of plentiful[4] water. (16)

V. L.—'राजा (निःश्वस्य)'–B. 'राजा अहं हि'–R. M. S. 'राजा'–V. 'अहमिमाम्'—B. V. 'पुनरिमाम्'—R. S. 'मुहुरिमाम्'—M

राजेति। 'अहमेव' इत्यादिना चित्रेऽपि **आदरातिशयो** व्यज्यते। **साक्षादिति**। 'हे सखे' वयस्य, 'पूर्वं' पुरा 'साक्षात्' प्रत्यक्षेण 'उप' समीपे 'गतां' प्राप्ताम् [अनेन शकुन्तलायाः **उपस्थितिः न भ्रान्ति-विजृम्भिता किन्तु मया स्वयं अनुभूतेति** परिज्ञायते] 'प्रियां' केवलं नारीमात्रं न, अपितु वल्लभाम् 'अपहाय' **अवज्ञाय** न तु **त्यक्त्वा**। [त्यक्तस्य पुनरुपादाने महापुरुषस्य अनौचित्य-प्रसङ्गात् इति राघव-चरणाः]। पश्चात् 'चित्रार्पिताम्' आलेख्याङ्किताम् 'इमां' पुरोदृश्यमानां शकुन्तला-प्रतिकृतिं 'बहु मन्यमानः' आदराधिक्येन अवलोकमानः 'अहं' निकामं पर्याप्तं 'जलं' यस्याः तादृशीं पिपासा-निवारणे सक्षमां भूरि-जलां 'स्रोतोवहां' नदीं 'पथि' मार्गे 'अतीत्य' प्रत्याख्याय, अतिक्रम्य 'मृगतृष्णिकायां ('मृगतृष्णा मरीचिका' इत्यमरः। "ग्रीष्मे मरुदेशे सिकतादौ अर्क-कराः प्रतिफलिता दूरस्थानां जलत्वेन आभान्ति, तद्वाचिका" इति शब्दकल्पद्रुमे, तस्याम्) 'प्रणयवान्' [**वैदिक-प्रयोगोऽयम्**। 'सुखादिभ्यश्च'-(५।२।१९) इति सूत्रेण चकारात् मतुप् वा इति केचित्] प्रीतियुक्तः 'जातः' संवृतः यथा नदीं काञ्चिदतिक्रम्य तद्वत् प्रतीयमानायां मरीचिकायां जलं प्रार्थयिता जल मलभमाना पिपासाधिक्येन सुतरां पीड्यते, तथाहमपि मत्समीप-मागतां शकुन्तलां प्रत्यादिश्य चित्रार्पितायां शान्तिमिच्छन् नितरां वेदना मनुभवा-मीति [असम्भवद्वस्तुसम्बन्धा **निदर्शना**। **श्रुति-वृत्त्यनुप्रासौ**। मुपमपेति मन्यमान इति **छेकानुप्रासोऽपि**। **वसन्त-तिलका**-वृत्तम्] ॥१६॥

210n.—1. बहु मन्यमानः—'बहु' is an *indeclinable* here, meaning 'exceedingly', 'in a high degree', or in other words 'बहु+मन्'=Esteem highly', 'rate high'. Cf. 'त्वत्संभावितमात्मानांबहु मन्यामहे वयम्'—*Ku. VI.* 20 'अरातिति **बहु** अमन्यत'—*Ra. XII.* 89. 'भर्तुः बहुमता भव'—(128n. 6). *Gītā. II.* 35; *BK. III.* 35; *V.* 84; *BK. VIII.* 12; **2. स्रोतोवहाम्**—वहतीति वह्+अच् (पचादि—3. 1.34) कर्तरि स्त्रियाम् =**वहा**—carrier. **स्रोतसां वहा**=स्रोतोवहा—A river. स्रोतः वहति या सा= **स्रोतोवाही** (with 'अण्' by **कमण्यण्**'–3.2.1); for detailed discussion, *Vide* 222n. 7.) **3. प्रणयवान्**—'प्रणय' is included in the **सुखादि** list, hence *ordinarily* 'इनि' comes in by 'सुखादिभ्यश्च'—(5.2.131) giving the form **'प्रणयी'**। Cf 'अङ्काश्रय-**प्रणयिन्**'—*Śak. VIII.* 17.

'**प्रणयिनी-जने**'-*PA& MD*, 3; *Ra. IX*. 31; 55; *XI*. 2. *Ku. V*. 11. *Vik. IV*. 15; 1. 2. In fact '**प्रणयवान् is a Vedic word with 'मतुप्'** and as such should not be used in Classical literature. But we have already noticed **Kāli's fancy** for **archaic** forms. Some, however, opine that 'मतुप्' may be *optionally* available after words of the सुखादि-list, as *is inferred* from '**चकार**' in the Sūtra. Read "अत्र चकारः मतुप्-प्रत्यय-समुच्चयार्थः। सुखी सुखवान्। दुःखी दुःखवान् * * **प्रणयी प्रणयवान्**"—*Prabhā*. Kāli. elsewhere also repeats this word. Cf. 'सा हि **प्रणयवत्यासीत्** सपत्न्यो -भयोरपि'—*Ra. XI*. 57. "एवं **प्रणयवती** सा शक्यमुपेक्षितुं"—*Māla. III*

4. **मृग-तृष्णिकायाम्**—मृगाणां तृष्णा मृगतृष्णा। सा अस्ति अस्याम् इति अर्शआदि अच्–(५।२।१२७) = मृगतृष्णा—(*BhD*) + 'कन्' (127n.1) = '**मृगतृष्णिका**' or '**मृग-तृष्णका**' in the feminine, by 'अभाषित-पुंस्काच्च'–(7.3.48) "उक्त-पुंस्क-भिन्न-शब्दात् परवर्ती आकार-स्थानीयः अकार इकारः भवति वा। आचार्य-मते आकार एव वर्तते–(7.3.40)–अभाषित-पुंस्कात् किम्? शुभ्रा शुभ्रिका"—*Prabhā*. A mirage is so called, as the phenomenon *i.e.* 'a vapour floating over waste places, and appearing at a distance like water, deceives men and animals.' Note the **use of ७मी with प्रणय।** For somewhat similar idea Cf. "पिपासार्तोऽनुधावामि क्षीणतोयां नदीमिव" *PN—III*. 10; *Rām. V*. 34. 23.

Text—विदूषकः (आत्मगतम्) —**एसो अत्तभवं णदिं अदिक्कमिअ मिअ-तिण्हिआए संकन्तो** [एषः अत्रभवान् नदीमतिक्रम्य मृगतृष्णिकया संक्रान्तः)। (प्रकाशम्) **भोः, अवरं किं लिहिदव्वं** [भोः, अपरं किमत्र लेखितव्यम्] ?

Vidūṣaka—(*Aside*)—Here His Highness, having crossed a river, has indeed fallen into a dear-drouth. (*Aloud*) Ho ! what-else is to be drawn here ?

सानुमती—जो जो पदेसो पिअ-सहीए मे अभिरूवो तं तं आलिहिदुकामो भवे [यो यः प्रदेशः प्रियसख्या मे [1]अभिरूप स्तं तमालेखितु-कामो भवेत्]।

Sānumatī—Perhaps (*he*) is desirous of delineating whatever spot is liked[1] by my dear friend.

राजा—सखे! श्रूयताम्।

[1]कार्या सैकत-लीन-हंस-मिथुना स्रोतोवहा मालिनी
शार्दूलविक्रीडितं **[2]पादास्तामभितो [3]निषण्ण-हरिणा गौरी-गुरोः[4] पावनाः।**
('ममजसततग) **शाखा-लम्बित-वल्कलस्य च तरोर्निमातुमिच्छाम्यधः**
[5]शृङ्गे कृष्ण-मृगस्य वाम-नयने कण्डूयमानां[6] मृगीम्॥१७॥

King—Hear my friend ! The river Mālinī is to be portrayed with pairs of swans [*flamingoes*] reposing on its sandy banks, (*and*) on both sides of it (*are to be drawn*) the holy spurs[2] [*foot-hills*] of the father[3] of Gaurī (*Himālaya*] with deer[4] reclining[4] on them. And under a tree with bough-swinging bark-garments, (*I*) wish to depict a doe, scratching[6] (*her*) left-eye on the antler of a black buck. (17)

V.L.—'० तृष्णिकया'—B. '० तृष्णिकाम्'—R.V. '० तृष्णया'—M. '० तृष्णिकायाम्'—S. 'लेखितव्यम्'—V.G. 'लिखितव्यम्'—R. M. S. 'आलिखितव्यम्—B. B reads 'इति तर्कयामि' for 'भवेत्'। 'निषण्ण-हरिणा:'—R. V. M. S. 'निषण्ण-चमरा:'—B. Pischel & Ryder.

सानुमतीति । 'अभिरूप:' रम्य: प्रीतिकर इति यावत् 'आलेखितुम्' आलेखने [भाव-विहित-कृत्-प्रत्ययस्य अव्ययत्वात् विभक्ति-लोप:] 'काम:' अभिलाष: यस्य स: [काम-शब्दे परे तु तुमुन: मकारस्य लोप:] । **कार्येति** । 'सैकते' सिकतामये पुलिने ['सैकतं सिकतामयम्' इत्यमर:] 'लीनं' सुखोपविष्टं 'हंसानां 'मिथुनं' स्त्री-पुरुष-युग्मकं [**'मिथुनं न द्वयो: राशिभेदे स्त्री-पुंस-युग्मके'** इति मेदिनी] यस्या: तादृशी मराल-युगलै: परिशोभित-तटा 'स्रोतोवहा' नदी [प्राक् व्याख्यात:] 'मालिनी कार्या' चित्रयितव्या 'तां' मालिनीम् 'अभित:' आसमन्तात् ['अभित: परित:'—(वा: ५४५) इति २या] 'निषण्णा:' निसर्ग-भीरव: अपि उपविष्टा: [सीदते क्त:। दकार-तकारयो: नत्वं—(८।२।४२); षत्वम्—(८।४।१]; 'हरिणा:' येषु तादृशा:। 'गौर्या:' पार्वत्या: 'गुरो:' पितु: ['गुरु: पिता, गुर्विप्र' इति गदसिंह:] हिमालयस्य इत्यर्थ:। [अनेन कन्या-पितृत्वेन तद्‌दु:खाऽनुभवात् तत्प्रदेशे अविच्छिन्न-सङ्कतत्वं द्योत्यते] पावना:' पवित्रा 'पादा' प्रत्यन्त-पर्वता: ['पादो बुघ्ने तुरीयांशे शैले प्रत्यन्त-पर्वते' इति मेदिनी) 'कार्या:' इति वचन-व्यत्ययेनान्वय:। तथा 'शाखासु' अवशोषणार्थं 'लम्बितानि वल्कलानि' यस्य तथाभूतस्य कस्यचित् 'तरो:' वृक्षस्य 'अध:' अधोदेश 'कृष्णमृगस्य' अर्थात् सहचरस्य हरिण-भेदस्य' शृङ्गे' विषाणें स्वकीयं 'वामं' सव्यं 'नयनम्' [इति स्त्री-स्वभावत्वात्] यद्वा 'वामं' अतिसुन्दरं 'नयनं' ["वामं सव्ये प्रतीपे च द्रविणे चातिसुन्दरे" इति विश्व:] 'कण्डूयमानां' घर्षयन्तीं 'मृगीं निर्मातुम्' अङ्कयितुम् 'इच्छामि'] अत्र कार्या इत्येकया क्रियया अप्रस्तुतयोरेव स्रोतोवहा-पाद-पदार्थयो: कर्मतया-भिसम्बन्धात् **तुल्ययोगिता-लङ्कार:**। **स्वभावोक्तिश्च** । लीनलिनीति गौरीगुरोरिति मृगमृगीमिति मनमाना-मिति **छेक-वृत्ति-श्रुत्यनुप्रासा:** । गौरीगुरोरिति प्रसङ्गोपादानात् **उदात्तालङ्कारश्च** । **शार्दूलविक्रीडितं छन्द:**] ॥१७॥

211n.—1. लेखितव्यम् —Excepting *V* & G all read **'लिखितव्यम्'** ।

Let us discuss which of these two is **correct.** Ordinarily 'लिख्+तव्य gives **'लेखितव्य with regular गुण। 'लिखितव्य'** will be the form if 'लिख्' is included in the **कुटादि** list. On this *Bopadeva* remarks—"अयं विभाषया कुटादिरिति केचित्। तेन **लिखितं** विश्वसृजोऽपि शक्तिहानिरिति **लिखितव्यं, लेखितव्यं, लिखनमित्यादि** सिद्धम्"—*Kavi-kalpa-druma*. This has been supported by the later grammarians—'अयं विभाषया कुटादि:'-Durgādāsa, "टनादौ बहुलं-Padmanâva.. 'कथं लिखित-मपि विश्वसृजोऽपि शक्तिहानि:, **लिखितव्यम्** लिखिनमिति कुटादित्वाऽभावात्? सत्यं, संज्ञापूर्वक विधिरनित्य: इति हर्घट-वृत्ति:।. . . लिखे: कुटादित्वम् इति केचित्। कथं तर्हि मसीप्रसूर्लेखनीति? सत्यं, निवासार्थिषु आलेखन इति निर्देशात्, रद विलेखन इति निर्देशाच्च, कूट: आदि: यस्येति समासाद्वा—Manoramā on गणप्रदीप of दुर्गसिंह। **'लिखन'** is sanctioned by 'सारसुन्दरी' of *Mathures'a*. Cf. also "यस्य **"लिखनं"**पूर्वं यत्रकाले निरूपितम्। तदेव खण्डितं राधे! क्षम्ये नाहञ्च को विधि:॥ विधातुश्च विधाताहं येषां तत् **लिखनं** कृतम्। ब्रह्मादीनाञ्च क्षुद्राणं न तत् खण्ड्यं कदाचन"—Br*P. V.* But hosts of *Pāṇinīan* grammarians consider such forms as **'लिखितव्यं', 'लिखनं', 'आलिलिखितुकाम:'** :—(R) &c. to be **erroneous,** for if लिख् be included in the कुटादि list then *Pāṇini's* **'आलेखन'** (6. 1. 142) becomes **unjustifiable.** Read—'लिख अक्षर-विन्यासे। **लिखितुं, लिखिष्यति, इति प्रयोग: प्रामादिक:।** यत्तु कैश्चित् कुटस्य आदि: कुटादि:। कुट: कुटादिर्येषां ते कुटादय:। कुटादिश्च कुटादयश्च कुटादय: इति एकशेषं स्वीकृत्य **'लिखितुम्'।** इत्यादि समर्थितम्॥ **तदसत्॥ लेखिता, लेखिष्यति,** इत्यादौ गुण-निषेधाऽऽपत्ते: न चेष्टापत्ति:॥ वृत्तिकार-हरदत्तादि-ग्रन्थ-विरोधात्। "गाङ् लिखादिभ्य: इत्येव सूत्रयितव्ये कुटादिभ्य: इति पठनस्य स्वारस्यभङ्गापत्तेश्च। किं च **'शकुनिषु आलेखने'** (२६८८) **इति सौत्र-प्रयोगोऽपि विरुध्यते** इति प्रागेवोक्तमित्यास्तांतावत्। **लिखापयति** इति प्रयोगस्तु मनोरमायाम् इत्थं समर्थित:। **अपनम् आप: प्राप्ति:। लिखस्य आप: लिखाप:। तं करोति"—T.** 2536. —"तच्च 'रलोव्युपधात् हलादे: संश्च'–(१।२।५६) इति सूत्रस्थेन 'लिखित्वा' 'लेखित्वा', 'लिलिखिषति' 'लिलेखिषति इति वृत्ति-ग्रन्थेन, 'शकुनिषु आलेखने (६।१।१४५) इति सौत्र-प्रयोगेण च विरुध्यते—Ibid 2461. "द्वे लेखनस्य"—BhD. **2. सैकत** &c. —सिकता: सन्ति अस्मिन् इति सिकता+अण् मत्वर्थे ['सिकता-शर्कराभ्यां च'—५।२।१०४]=**सैकतम्**—A sandy bank. लीङ् (श्लेषणे)+क्त:(3.4.47)=**लीन:,** त=न by *Vārt*

'स्वादय ओदितः' (8. 2. 45] = Seated at rest. हंस serves God ब्रह्मा as a vehicle, and hence the cry of this bird has a sacred character, like the cry of a Swan with the Greeks. This (also **निषण्ण** and the action of मृगी) show that the swan-couple and the deer here are enjoying perfect security (even in the presence of human beings) as is natural in a **hermitage.** *Cf. Ra. VII.* 75; *BK II.* 18. Also read "कैलास-वर्णना" of *Bhārata-candra.* According *to R* the prevailing sentiment is love. '(हंसमिथुना) इत्यनेन उद्दीपकत्वाऽतिशयो व्यज्यते। * * स्रोतोवहा इत्यनेन जलवाहित्वम्। तेन स्वभावा-परित्यागः, तेन रमणीयत्वं, तेन च उद्दीपकत्वं व्यज्यते। निषण्ण-हरिणा इत्यनेन अत्यन्त-विविक्तत्वम्, तेन भृशमुद्दीपकत्वं। तेन च सुरत-क्षमत्वं ध्वन्यते-- "पावना' इत्यनेन शुचित्वेन रम्यत्वेन पर्यवसानम्"–*R.* **3. पादाः**–Spurs, hills contiguous to a high mountain. **निषण्ण-हरिणाः**–(स=ष—8.3. 66); (55n.1). Cf. 'मृगाध्यासित-शाद्वलानि'—*Ra. II.* 17. **4. शाखा** &c.—Cf. "विटप-विषक्त-जलार्द्र-वल्कलेषु"—*Śak. I,* 29. **5. कृष्ण-मृगस्य**—(Black buck) suggests the *holiness* of the place. Read "कृष्णसारस्तु चरति मृगो यत्र स्वभावजः। स ज्ञेयो **यज्ञियो देशः** म्लेच्छदेश स्ततः परः"— *MS. II.* 23. **6. वाम-नयनं**—The females generally make use of the left limbs. (120*n*.1). **7. कण्डूयमानां**—कण्डूञ् गात्र-विघर्षणे। कण्डूयति कण्डूयते। स्वार्थे यक् by 'कण्ड्वादिभ्यः यक्'–(2678). सुख्-सुखयति, दुःख्यति महीयते, हृणीयते। Next शानच् and स्त्रियाम् टाप्। For similar ideas, Cf. 'शृङ्गेण च स्पर्श-निमीलिताक्षीं **मृगीमकण्डूयत** कृष्णसारः'—*Ku. III.* 36. 'अत्र कण्डूयनं शृङ्गाराऽनुभाव-सूचकम् घर्षण-मात्रम्। अनेनापि उद्दीपकत्वं ध्वनितम्'–*R.*

Text:—**विदूषकः** (आत्मगतम्)—**जह अहं पेक्खामि, पूरिदव्वं णेण चित्तफलअं लम्ब-कुच्चाणं तावसाणं कदम्बेहिं।** [यथा अहं पश्यामि, पूरयितव्य मनेन चित्र-फलकं लम्ब-कूर्चानां तापसानां कदम्बैः]।

Vidūśaka (*Aside*)—(*From the way in which he deliberates*) *I* think, the tablet with be filled up by him with a lot of grizzly[1] bearded[1] hermits.

राजा—वयस्य, अन्यच्च शकुन्तलायाः प्रसाधन मभिप्रेतमत्र विस्मृत-मस्माभिः।

King—My friend, another decoration of Śakuntalā which was loved (*by her*) [or which was intended (*to be sketched*)] here is forgotten by me.

विदूषकः—किं विअ [किमिव] । Vidūṣaka—What's that ?

सानुमती—वण-वासस्स सोउमारस्स अ जं सरिसं भविस्सदि

[वन-वासस्य सौकुमारस्य च यत् सदृशं भविष्यति] ।

Sānumatī—(*Perhaps something*) that will be like (*her*) sylvan abode and tenderness.

राजा—कृतं न कर्णा-र्पित-बन्धनं² सखे ।

वंशस्थ **शिरीषमागण्ड-विलम्बि-केशरम्³ ।**

(जतजर) **न वा शरच्चन्द्र-मरीचि-कोमलं⁴**

⁵मृणाल-सूत्रं रचितं स्तनान्तरे ॥१८॥

King—Friend ! a Śirīṣa, flower with its stem² placed on (*her*) ear (*and its*) stamens³ pending towards the cheeks,³ has not been drawn; nor has a necklace⁵ of lotus-shoot⁵, ⁴soft like the beam of the autumnal moon⁴, been traced between (*her*) busts. (18)

विदूषकः—भो, किण्णु तत्तहोदी रत्त-पल्लव-सोहिणा अग्ग-हत्थेण मुहं आवारिअ चइद-चइदा विअ ठिआ [भोः, किं नु तत्रभवती रक्त-पल्लव-शोभिना अग्र-हस्तेन मुखमावार्य चकित-चकिता इव स्थिता] । (सावधानं निरूप्य) **आ, एसो दासीए-पुत्तो कुसुम-रस-पाडच्चरो तत्तहोदीए वअण-कमलं अभिलङ्घदि महुअरो** [आः, एष दास्याःपुत्रः कुसुम-रस-पाटच्चरस्तत्रभवत्या वदन-कमलम् ²अभिलङ्घति मधुकरः] ।

Vidūṣaka—Ho ! why does Her Ladyship, covering her face with (*her*) fore-palm shining like a red-leaf, stand as though very much startled ? (*Observing closely*)—Ah ! this rascally bee, the purloiner of the floral mead is darting² upon Her Ladyship's lotus-like face.

V. L.—'अभिप्रेतमत्र विस्मृतमस्माभिः'—V.M.S. R omits 'विस्मृतम्' । 'अभिप्रेतं लेखितुम् &c'—B. For सौकुमारस्य' B reads 'कन्यकाभावस्य' after which R reads 'अविनयस्य', & S 'विनयस्य' । 'रक्त-कुवलय'—B. Pischel. 'रक्त-कुवलय-पल्लव'—R. V. M. 'रक्त-पल्लव'—S. 'आवार्य'—B. M. V. HS. 'अपवार्य'—R. 'आवृत्य'—S; R & M read 'दृष्ट्वा' after 'सावधानं निरूप्य' । 'कुसुमरसः'—R.B.V.M. 'कुसुमासव'—S. 'वदनकमलम्'—B. 'वदनम्' —R. M.S. 'अभिलङ्घते'—V. G. 'अभिलङ्घति'—R. M. S. 'अभिलषति'—B. HS.

विदूषक इति । 'यथा' इति निपातः अनुमान-द्योतकः । 'लम्बा' दीर्घाः 'कूर्चाः' श्मश्रूणि येषां ('कूर्चमस्त्री भ्रुवोर्मध्ये कत्थन-श्मश्रु-कैतवे' इति मेदिनी ।

अनेन तपस्विनां विश्रीकत्वं तदङ्कनस्याऽनावश्यकत्वञ्च सूचितम्' तेषां 'तापसानां कदम्बैः' निकुरम्बैः, समूहैः इति यावत् ('कदम्बं निकुरम्बे स्यात् नीप-सर्षपयोः पुमान्' इति मेदिनी)। **राजेति।** 'मया अभिप्रेतम्' अनुमतं 'प्रसाधनं' भूषणं, यद्वा 'शकुन्तलायाः अभिमतम्' अभीष्टं प्रियमिति यावत्। **कृतमिति।** हे 'सखे' शकुन्तलाया 'कर्णयोः' श्रवणयोः 'अर्पितम्' अवतंसार्थं संस्थापितं 'बन्धनं' प्रसव-बन्धनं वृन्तं (बध्यते अनेन इति बध्नातेः **करणे ल्युट्**) यस्य तादृशम्। अतः 'आगण्डं' गण्ड-पर्यन्तं ['आङ् मर्यादाऽभिविध्योः'—(२।१।१३) इति अव्ययी-भावः] 'विलम्बिनः' पतिताः 'केशराः' यस्य तादृशम् (अनेन केवलं कर्णं न भूषयति। अपि तु कपोलमपि इति व्यज्यते) 'शिरीषं' **शिरीषस्य पुष्पं** ["पुष्पमूलेषु बहुलम्'—(वाः १५४५)—इति विकारस्य प्रत्ययस्य लुप्। जातावेकत्वम्) 'न कृतम्' विस्मरणात्। 'स्तनयोः अन्तरे' मध्ये, मेघ-निर्मुक्तस्य 'शरच्चन्द्रस्य' मरीचिः' चन्द्रिका इव 'कोमलं' मृदु अथच शुभ्रं 'मृणालस्य सूत्रं' माला [इति कुमार-सम्भव-टीकायां (५।११) मल्लिनाथपादाः। 'अन्ते सूत्र-पदं मालाम् अभिधत्ते' इत्युक्तेः) 'न रचितं प्रदत्तं 'वा' इति समुच्चये। ('वा स्यात् विकल्पोपमयोः एवार्थे च समुच्चये' इति विश्वः)। [अत्र अन्योन्य-शोभा-हेतुत्वेन **अन्योन्यालङ्कारः** व्यङ्ग्यः। क्रिययोः समुच्चितत्वात् **समुच्चयालङ्कारः। लुप्तोपमा च। श्रुति-वृत्त्यनुप्रासयोःसङ्करः।** शिरी सरेति रीचि रचीति त्रंतरे इति **छेकानुप्रासोऽपि। वंशस्थविलं** वृत्तम्] ॥१८॥ **विदूषक इति।** 'किं नु' इति वितर्क-गर्भ-प्रश्नः। 'रक्तं' पल्लवं' किसलयं ('पल्लवोऽस्त्री किसलयम्' इत्यमरः। रक्त इत्यनेन नवीनत्वं सुकुमारत्वं च व्यज्यते) तद्वत् 'शोभिना'। 'अग्र-हस्तेन' हस्ताङ्गुलीभिः (अवयवावयविनोः अभेद-विवक्षया अङ्गुलिषु हस्तत्वारोपः। प्राग् व्याख्यातम्)। "आवार्य' ईषत् आच्छाद्य। 'चकितात्' भीतात् अपि 'चकिता' भीता, सातिशयं भीता इत्यर्थः। 'आ' इति कोपे। ('आः स्मरणेऽप्यकारणे कोप-संतापयोरपि' इति मेदिनी]। 'दास्याः पुत्रः'—(६।३।२२)—हीन इत्यर्थः:['षष्ठ्या आक्रोशे' (६।३।२१) इत्यलुक् षष्ठी]। 'कुसुमस्य रसः' द्रवः तस्य, मधुनः। 'पाटच्चरः' चौरः (प्रागेवायं व्याख्यातः] पद्म-भ्रमात् 'अभिलङ्घति' आक्रामति।

212n.—1. लम्ब-कूर्चानां—Long-bearded ascetics. Cf. 'आगत-मनध्याय-कारणं सविशेषभूतमद्य जीर्णकूर्चानाम्'—*UC.* Mādhavya does not seem to be well disposed to the hermits and so he uses the term '**कदम्ब**' which is generally used apropos of "trees or beasts". **2. अभिप्रेतम्**—Either favourite (to Śak.), or intended for Śak. by me (*Com.*). **3. मृणाल-सूत्रं**—'सूत्र'—Here means '*garland*', '*necklace*', and not fibre (*Com.*). Elsewhere Kāli. has used it in the

sense of a 'fibre'. Cf. 'तस्य मृणाल-सूत्रान्तरमप्यलभ्यम्'—*Ku.* 1. 40. Fulness of the bosom is a sign of great beauty. **4. रक्त-पल्लव** &c.—The reading with **'कुवलय'**, is rejected as **कुवलय** (= **इन्दीवर = इन्दीवार**) means a **blue water-lily,** and is a good epithet for **eye, but not for red fore-palm.** Read 'इन्दीवरं कुवलये शतावर्यां च योषिति'—*Qtd. BhD.* "कुवलयं स्यात् इन्दीवारम्'—*Vyādi* "श्यामं शिति कण्ठनीलं **कुवलयमिन्दीवरञ्च** नीलाब्जम्"—*Nāmā-mālā.* **A**'*s*—"**स्यादुत्पलं कुवलयम्**" also refers to **blue lily. Read** "नन्वेवं कथमुत्पलमित्युक्ते **नीलोत्पलादिष्वेव बुद्धिर्जायते, न पद्मादौ** इति चेत्। उच्यते। यथा सामान्येपि धान्यार्थे 'धान्यम्' इत्युक्ते कलमादिष्वेव बुद्धिर्भवति, न मुद्गादौ एवमिहापि अदोष इति सर्वधरादय:"—*RM.* 'इन्दीवराक्षीणाम्'—*PC. I.*1; **'उत्पलाक्षि'**–*Ku V.* 35; 'तस्याः सुजातोत्पला-प्रत्रकान्ते * * **नयने**'—*Ku. VII.* 20; '**कुवलयित-**गवाक्षां **लोचनै** रङ्गानाम्'-*Ra. XI.* 93; 'कुप्यसि **कुवलयनयने**'–*Māla. IV.* 10; *Ki. III.* 36; *Ram. IV.* 13. 14; *VI.* 115. 12; 'अपाङ्ग-विक्षेपैश्चलित-कुवलय-वनमयीम्'—*Kad. p.* 675. "**कुवलय**-दल-स्निग्धैरङ्गैः ददौ नयनोत्सवं"—*UC.III.*22. "कुवलय-दल-नीलः कोऽयम् आर्ये—Mahānāṭaka. 'नीलेन्दीवर-लोचनम् इति गोपालस्तव:'-Qtd. Raghunātha. **'उत्पले** तव दृशौ'–*Rat. III.* 11; 'रक्त-कुवलय' is hardly met with in literature as an epithia of 'हस्त'। Now Cf. **'करतलेन अभिनव-पल्लवेनेव'**—Kād p. 251; 'रक्तेन इति भाव:'—HS. 'पवनचालाभि: **पल्लवाङ्गुलिभि:**–*Māla.* II. Śak. IV. 5. **अग्र-हस्तेन**—(118n. 3). **5. चकित-चकिता**—Exceedingly afraid. G and others account for the reduplication by 'प्रकारे गुणवचनस्य' —(8. 1. 12), which is hardly applicable here, as the idea of **'प्रकार' i.e., similarity**. ['प्रकार—शब्दो भेदे सादृश्ये च वर्तते' * * * ब्राह्मण-प्रकारोयं माणवकः, ब्राह्मण-सदृश इत्यवगमाच्च'—*T*] has been implied by 'इव'। Hence the '*Natural* process', in such a case, is to take the first word as 'Neuter gender' '(सामान्ये नपुंसकम्'—*Vārt.* 822.) and then to compound it with the second word. (*Com.*). Read "कथं **भीत-भीत** इव शीतमयूख' इति भारविः। **इव-शब्देन सादृश्यस्य उक्ततया इह प्रकारे द्वित्वा—योगात्**॥ सत्यम्॥ **भीतेभ्यः भीत इति कथञ्चित् व्याख्येयम्** तेन **अतिभीत** इति फलितम्। 'आधिक्ये द्वे वाच्ये' इति वार्तिकेन भीत-भीतादौ द्वित्वमिति **बुधंटादिभि**· उक्तं समाधानं नाऽऽदर्तव्यम्। तादृशस्य वार्तिकस्य अप्रसिद्धत्वात्"—**T.** (2147). Cf.

'भीत-भीतः"—*Gitā. XI.* 35, "**भीतावपि भीतः**"—*Śrīdhara*. '**कथं स मम** सुश्रोणी **भीरु-भीरुः** सती'—Rām. V. 66.12; "**भीरुभीरुः** अत्यन्तं भीरुः' —Rāma. '**भीतभीत** इव तामवादीत्'—Kād p. 239. '**अच्छा-च्छम्**' (KA.I.48)—अति-स्वच्छम् इति तट्टीका । **6. दास्याःपुत्रः**—(44*n.* 15). **7. अभि-लङ्घति**—(198n. 2; 243n. 1). "पल्लवान् हरिणो लङ्घयितुमिच्छति'—*Māla*, or explain it in the sense of 'going'—"गतावप्यन्ये । अन्ये स्वर्लङ्घिषुः शैलान्' (भट्टि—१५।३२)—*Durgādāsa*, अभि=अभिलक्ष्य । "लङ्घनन्तूपवासे स्यात् क्रमणे प्लवनेऽपि च"—*Medinī* ।

Text :—राजा—ननु वार्यतामेष धृष्टः ।

King—Why, let this impertinent (*creature*) be stopped.

विदूषकः—भवं एव्व अविणीदाणं सासिदा इमस्स वारणे पहविस्सदि
[भवानव अविनीतानां शासिता अस्य वारणे प्रभविष्यति] ।

Vidūṣaka—You yourself (*alone*), overruling the undisciplined. will be able to drive him off.

राजा—युज्यते । अयि भोः ! कुसुम-लता-प्रियाऽतिथे ! किमत्र 'परिपतन-खेद मनुभवसि ?

आर्या [12, 18 12, 15] **एषा कुसुम-निषण्णा तृषिताऽपि सती भवन्तमनुरक्ता ।**
प्रतिपालयति मधुकरी न खलु मधु विना त्वया पिबति ॥१९॥

King—Quite right. Ho ! you the dear guest of the blossoming creepers ! why do you feel the fatigue [1]of hovering about[1] here ? Here the female bee (*devotedly*) attached to you, though thirsty is awaiting[2] (*you*), perched on a flower. Indeed she does not sip the mead without you. (19).

V. L.—B. reads 'त्वां विना' for विना त्वया ।'

राजेति । 'ननु' इत्यनुनये संबोधने वा । 'धृष्टः' [क्तः—३।४।७२ ; "धृषि-शसी वैयात्ये"—(७।२।१९)—इति इडभावः] ।' वार्यताम्' निःसार्यताम् । **राजेति ।** 'अयि' इति अनुनये ('अनुनये त्वयि' इत्यमरः) । कुसुम-शोभिता लता इति 'कुसुम-लता' (उत्तरपद-लोपी कर्मधारयः) तस्या अपि 'प्रियः' न तु यः कश्चित् सामान्यः 'अतिथिः' तत्संबुद्धौ। 'परिपतनस्य' उड्डीय परिभ्रमणस्य न तु उपवेशनस्य '**खेदं**' परिश्रमम् । नेयं खलु कुसुमलता, अत एतस्मिन् परिपतनेन मोघएव तव परिश्रम इति भावः । **एषेति ।** 'अनुरक्ता' त्वद्गत-प्राणा 'एषा' 'पुरोदृश्यमाना 'मधुकरी' तव दयिता 'तृषिता' जात-पिपासा अतएव 'कुसुमे निषण्णा' उपविष्टा ("सदिर् अप्रतेः'—(८।३।६६) इति षत्वम्) 'सत्यपि' (अनेन त्वयि अस्याः असाधारण-प्रीतिः अनुमीयते) ॥ यद्वा, 'कुसुमे निषण्णा एषा 'सती' पतिव्रता 'मधुकरी तृषिता

अपि' इत्यन्वयः ।। 'भवन्तं' प्रेमास्पदं त्वां 'प्रतिपालयति' अपेक्षते । कथमवगम्यते इत्याह नेति । 'त्वया 'प्रियतमेन विना' एकाकिनी 'न खलु मधु' पुष्पं-रसं ('मधुश्चैत्रे च दैत्ये च मद्ये **पुष्परसे मधु**' इति हट्टचन्द्रः) 'पिवति' त्वया सह मधु पास्यति इत्याकाङ्क्षया तृषातुरापि मधुकरी तवागमनम् अपेक्षते । अत्रालं परिपतन-खेदेन । झटिति प्रिया-सकाशं गत्वा पतिव्रतां तां परितोषय इति सरलार्थः । (चित्र-न्यस्तायाः स्वाभाविकस्य पानाऽभावस्य त्वया विना इति कृत्रिमस्य वा अभेदाध्यवसायद**तिशयोक्तिः** । नायिका-नायक-व्यवहारात् **समासोक्तिश्च** । परान्वये भिन्नरूपेण एकदेश-विवर्ति-**रूपकमपि** । मधुमध्विनि **छेक-वृत्यनुप्रासाः** । **आर्या** जातिः] ।।१९।।

213n—1. अविनीतानां शासिता—The chastiser of the undisciplined. (33n, 2; 165n. 1). **धृष्टः** = (प्रगल्भः), धर्षितः = (पराभूतः) –(31*n*, 1). **2. परिपतन** &c—(परि+पत्' means 'to fly round' 'to hover about'. Cf. 'विन्दूत्क्षेपात् पिपासुः **परिपतति** शिखी भ्रान्तिमत् वारियन्त्रम्'—*Mālā. II.* 12. 'परिपतति परितो भ्रमति'—*K; also AŚ.* 48. **3. भवन्तम् अनुरक्ता**—'भवन्तम्' may be construed with both 'अनुरक्तः' and 'प्रतिपालयति' । In the former case, **अनु** is a **कर्मप्रवचनीय** and "भवन्तम्" has २या by '**कर्मप्रवचनीय युक्ते** द्वितीया'-(१।३।८). Cf. 'अलभ्यम् **अनुरक्तवान्** कथय किन्नु नारीजनम्'—*MR. VI.* 16 ; 'अपि वृषलम**नुरक्ताः** प्रकृतयः'—*Ibid. I.* 'अपि **वसन्तसेना** आर्यचारुदत्त **मनुरक्ता**'–*MK. I.* If 'अनु' is not a **कर्मप्रवचनीय,** २या will not be available. Cf. "भ्रातुर्मृतस्य **भार्यायां** योऽ**नुरज्यते** कामतः । धर्मेणापि नियुक्तायां स ज्ञेयो दिधिषू-पतिः" ।। —*MS. III.* 173. 'अनु+रज्' has a different sense ("*to be red*") in *ŚPB. IX.* 7; **प्रतिपालयति**—Wait—(187n, 4). **4. विना त्वया** &c.—Cf. 'मधुद्विरेफः कुसुमकपात्रे, पपौ प्रियां स्वामनुवर्नमानः'—*Ku. III.* 36.

Text :—सानुमती—अज्ज, अभिजावं क्खु एसो वारिदो
(अद्य अभिजात' खल्वेप वारितः) ।

Sānumatī—Now for once he has been courteously[1] warded off.

विदूषकः—पड़िसिद्धा वि वामा एसा जादी (प्रतिसिद्धाऽपि वामा[2] एपा जातिः ।

Vidūṣaka—Though forbidden[2] perverse (*obstinate—M*] (*indeed is*) this class (*of creatures*).

राजा—एवं भोः, न मे शासने तिष्ठसि । श्रूयतां तर्हि संप्रति—

वसन्त-तिलका (तभजजगग) "अक्लिष्ट-बाल-तरुण-पल्लव-लोभनीयं
पीतं मया सदयमेव रतोत्सवेषु[4]।
बिम्बाधरं स्पृशसि चेद् भ्रमर ! प्रियाया—
स्त्वां कारयामि कमलो-दर-बन्धनस्थम्"[5] ॥२०॥

King—Thus, ho ! you don't confrom to (*my*) fiat. Then be it known (*to you*) now—"If, O drone ! you touch the coculle--like lip of (*my*) beloved, (*all*) alluring[1] as the unimpared young sprout of a tree[3] (*and*) sucked by me but tenderly in festivals[4] of love,[4] (*I*) will have you *confined*[5] *in the belly of a lotus.*[5] (20)

विदूषकः—एव्वं तिक्ख-दण्डस्स किं ण भाइस्सदि [एवं तीक्ष्ण-दण्डस्य किं न भेष्यति]। (प्रहस्य-आत्मगतम्) **एसो दाव उम्मत्तो। अहं वि एदस्स सङ्गेण ईदिस-वण्णो विअ संवुत्तो** [एष तावत् उन्मत्तः। अहमपि एतस्य सङ्गेन ईदृश-वर्ण[6] इव संवृत्तः]। (प्रकाशम्) **भो, चित्तं क्खु एदं** [भोः, चित्रं खल्वेतत्]।

Vidūṣaka—Why should (*he*) not fear one whose punishment is so severe ? (*Laughing—aside*) He (*is*) certainly crazy. I, too, by keeping him company, have become as though of similar[6] colour,[6] (*Aloud*) It (*is*) only a picture, man !

V. L.—'आर्य'—B. C. 'अद्य'—R. M. 'अद्यापि"—S. 'प्रतिषिद्धापि' —R. M. V. 'प्रतिषिद्धा वामा'—B. K. 'प्रतिसिद्धेऽपि'—S. B reads 'दशसि' for 'स्पृशसि'। 'ईदृशवर्णः—R. V. S. 'ईदृश-वचनः'—M. 'ईदृशः'—B. HS.

सानुमतीति। 'अभिजातं' न्याय्यं यथा तथा 'वारितः' प्रतिषिद्धः। (**'अभिजातः स्मृतो न्याय्ये'** इति विश्वः)। **विदूषक इति।** 'प्रतिषिद्धा' निवारिता 'अपि एषा जातिः' तिर्यग्जातिः 'वामा' प्रतीपा निषिद्ध-विषयाऽनुष्ठायिनी इत्यर्थः ['वामौ वल्गु-प्रतीपौ द्वौ इत्यमरः] अस्मादेव न अभिजातेन परन्तु कठोरतया वारयितव्या इत्याशयः। **राजेति।** 'शासने' आज्ञायां 'न तिष्ठसि' अतएव आज्ञा-भङ्गार्थः दण्डः श्रूयताम्। **अक्लिष्टेति।** हे 'भ्रमर' कामुक भृङ्ग ['भ्रमरः, कामुके भृङ्गे' इति मेदिनी) 'अक्लिष्टः' केनापि कर-स्पर्शादिना अदूषितः 'बालः' अभिनवः नूतनोत्पन्न इति यावत् यः 'तरु-पल्लवः' यद्वा बालः' यः 'तरुः' तस्य 'पल्लवः' तद्वत् **'लोभनीयं'** '[**बाहुलकात् कर्तरि अनीयर्**] चित्ताकर्षकम् [अनेन कोमलत्व-लौहित्यातिशयः व्यज्यते) 'रतोत्सवेषु' सुरतामोदेषु [बहुत्वात् बहु-वचनम्] 'मया' दुष्यन्तेन 'सदयमेव' न तु कठोरम् अतिकोमलत्वात् 'पीतम्' आदरेण चुम्बितं न तु निर्दयं दष्टम्, 'प्रियायाः' शकुन्तलायाः "बिम्बाकारः अधरः" [इति कातन्त्र-परिशिष्ट-टीकायां गोपीनाथ-पादाः] तं 'बिम्बाधरं' [शाक-पार्थिवादित्वात्

उत्तरपदलोपी कर्मधारयः। "मध्यम-पद-लोपी" समास इति यत् वामनेन उक्तम् तत् प्रमाद एव। तादृश-सूत्राभावात्]। त्वं "चेत् स्पृशसि" स्पर्शादिना दूषयसि तर्हि पर-स्त्री-स्पर्शिनं' त्वां कमलस्य' पद्मस्य उदररूपं' यत् 'बन्धनं' कारा-गृहम् 'कृत्य-ल्युटो बहुलम्'–(३।३।११३) इति अधिकरणे ल्युट्]। तत्र 'तिष्ठति यः तथाविधं कारयामि' सूर्येण सूर्यं वा इति शेषः। ('अनेन सूर्यस्य निजाज्ञाकारित्वं ध्वन्यते। स्पर्शमात्रे एव अयं दण्डः, पाने तु अतोऽपि कठोरतरः दण्डः भविष्यति इति हृदयम्। अत्र भ्रान्तिमान् अलङ्कारो व्यज्यते। प्रथमपादे बिम्बाधरम् इत्यत्र च समासगत-लुप्तोपमा-द्वयं कमलोदर-बन्धनेत्यत्र निरङ्गं केवलरूपकम्। अथच 'कमलोदरे' जलमध्ये बन्धनस्थम् इति श्लेषोऽपि। प्रतिनायक-व्यवहारात् समासोक्तिश्च। हेत्वनुप्रासौ॥ अत्र व्यवसायो नाम विमर्शसन्धेरङ्गम्। तल्लक्षणं यथा दर्पणे—"व्यवसायश्च विज्ञेयः प्रतिज्ञा-हेतु-संभवः'। वसन्ततिलकावृत्तम्] ॥२०॥ विदूषक इति। 'तीक्ष्णः' कठोरः 'दण्ड' शासनं यस्य यस्मात् वा तस्य। विवक्षया षष्ठी, 'तीक्ष्णदण्डात् इति सम्यक्' [इति विद्याम्बुधिः]। 'उन्मत्तः' प्रेमोन्मत्तः। दशसु स्मरदसासु उन्माद एकतमः? 'ईदृशा' उन्मत्ता इव 'वर्णा' अक्षराणि वाक्यानि इत्यर्थः यस्य तादृशः। उन्मत्तवत् प्रलापवाक् 'संवृत्तः'। ["राजा—युज्यते" इत्यादिना एतदन्तेन भ्रान्ति नाम सन्ध्यन्तराङ्गमुपक्षिप्तम्। तल्लक्षण तु—"भ्रान्तिः विपर्यय-ज्ञानं प्रसङ्गस्याऽविनिश्चयात्' इति)।

214.—1. अद्य &c.—This is the first time Sānumatī saw a bee warded off in such a courteous manner. Or 'अद्य' may be explained as an *expletive.* like the English word '*now*' With the reading 'अत्यर्थम्' (*B*) explain—"अत्यर्थं सातिशयं यथा स्यात् तथा वारितः। सोल्लुण्ठनोक्तिरियम्, तेन न किञ्चिद्वारितम् इति भावः"—*HS.* **2. अक्लिष्ट** &c.—Not defiled by handling, hence fresh—(69n. 6, end). Cf. 'अक्लिष्ट-बिम्ब-शोभाधरस्य'—*NN. II.* 8; *Śak. V.* 19. **3. बिम्बाधरं**—'बिम्ब (*Bryonia Grandis, Momordica Monadelpha,* तेलाकुच इति भाषा'—*Kalpa.*) is a kind of cucurbitacious fruit which when ripe becomes extermely scarlet. 'बिम्ब रक्तफलातुम्बी तुण्डी-केरी च बिम्बिका। ओष्ठोपम-फला प्रोक्ता पीलुपर्णी च कथ्यते'—*BhP.* The lips of young women are often compared to this fruit. Cf. 'पक्व-बिम्बा-धरोष्ठी'—*PA&MD.II.* 22. *Rām. V.* 15. 19;37. 39; 'बिम्बाधरा-लक्तकः'—*Māla. III.* 5; *Ra. XIII.* 16; *NC. II.* 24. 'बिम्बेन तुल्यः'= बिम्ब-तुल्यः। 'बिम्ब-तुल्यः अधरः'=बिम्बाधरः। *i.e.* तुल्यः (उत्तर-पद) is dropped. This is शाकपार्थिवादित्वात् उत्तर-पद-लोपी समासः। VM

cites this very word as an instance of **मध्यम-पद-लोपी समासः** (Cf. 'बिम्बाधर इति वृत्तौ **मध्यम-पद-लोपिन्याम्**'—*KSV. V.* 2. 15). This Vāmana was *a 'Rhetorician'* and *different from the* '**Grammarian**' **VM**—author of *Kāśika Vṛtti*, and **posterior** to him; for he **quotes from Bhavabhūti** ('दोर्दण्डाञ्चित चन्द्रशेखर' &c.),**from AŚ** 'दृष्टैकासन सङ्गते प्रियताम्'—&e) also **from VS, ŚPB,** (1. 8; 12, 25, 71,) **KS** and **छन्दोविचिति**। According to *Rājataraṅgiṇī* he was contemorary of *Jayāpiḍa, king of Kāśmir* (9th century A. D. '**बभूवुः कवयस्तस्य वामनाद्याश्च मन्त्रिणः**)। As far as grammar is concerned, this VM cannot be accepted as a *greater authority* than the reputed *grammarian VM,* (author of काशिका वृत्ति), Nāgeśa, Kātyāyana, JS and others. Hence his statement of **मध्य-पद-लोपी समासः is erroneous.** Read 'समानाधिकरणाधिकारे शाक-पार्थिवादीनाम् उपसंख्यानम् **उत्तर-पद-लोपश्च**'—*KV.* under *II.* 1.60; (73*n*, 6). Most of the Commentators and modern writers have been misguided by the fore-mentioned *erroneous line* of this *VM*, even **MN not being exempted.** Cf. "**शाकपार्थिवादित्वात् मध्यम-पद-लोपी** समासः"—*MN on MD. II.* 22—Most likely it is a **Scribal error,** the word **मध्यमपद-लोपी** having been inserted later on. **4. पीतं मया** &c.—Cf. '**इषदीषत्** चुम्बितानि भ्रमरैः'—*Śak.* 1. 4. कमलोदर &c.—The description of bees being confined in lotus is very common in Sanskrit literaturre. cf. "**कुशेशय-कोश-कोटर-कुटी शायिनीषट्चरण चक्रे**'—HC. I; "रात्रिर्गमिष्यति भविष्यति सुप्रभातं भास्वानुदेष्यति हसिष्यति चक्रवालम्। इथ्यं विचिन्तयति **कोशगते द्विरेफे** हा हन्त हन्त नलिनीम् गज उज्जहार॥ सुभाषित—पदावली-233. 78. Cf. '**वारिरूह्-बद्ध षट्पदम्**'—***Ku.*** *VIII.* 33; (152n. 7) **5. तीक्ष्ण-दण्डस्य भेष्यति**—Excepting M, all have Prākṛta equivalent of '**तीक्ष्ण**' as '**तिक्खण**' which is wrong. Vide—*Prākṛta Prakaśa, III.* 33. "६ष्ठी with **भी**", according to K, is peculiar to Prākṛta Idiom. Cf. '**दाक्षिण्य-पश्चात्तापस्य** बिभेमि'—*Vik. II.* (*end*). Note that it was Vidūṣaka first that had run mad by the exquisite delineation of the painting (Cf. 'आः ! एष दास्याःपुत्रः कुसुम-रस-पाटच्चरः **तत्रभवत्या वदन-कमलमभि-**

लङ्घयति: मधुकर:'—*Supra*) and he could not detect his mistake until his present speech was uttered, and then he laughed at his own stupidity. But now he says that through his association with the mad king he is just going to have an attack of insanity. There lies the humour, as we have seen that the reverse of it was true. Note that Vidūṣaka does not admit that he was mad at all, he was (**ईदृश-वर्ण:**—*Lit.* '*of the same shade*') *i. e.*, on the verge of being deprived of his power of judgment.

Text :—राजा—कथं चित्रम् । King—What a pictue ?

सानुमती—अहं बि दाणि अवगदत्था, किं उण जहा-लिहिदाणुभावी एसो
(अहमपि इदानीम् अवगतार्था, कि पुन र्यथालिखिताऽनुभावी एष:) ।

Sānumatī—Even I, (*only*) just now have come to perceive the fact . What of him who is experiencing what he has painted ?

राजा—वयस्य, किमिदमनुष्ठितं पौरोभाग्यम्[2] ।

आर्या [12, 18 12, 15]
दर्शन-सुखमनुभवतः साक्षादिव तन्मयेन हृदयेन ।
[3]स्मृति-कारिणा त्वया मे पुनरपि चित्रीकृता कान्ता ।।२१।।
।। (इति वाष्पं विहरति) ।।

King—Friend ! why is this mischief[2] perpetrated (*by you*) ? With my heart (*solely*) entranced in her, while I was experiencing the pleasure of beholding (*her*) , as though personally present (*before me*), you by raking[3] (*my*) recollection,[3] have again transformed (*my*) darling into a picture. (31)—(*This said, sheds tear*)

सानुमती—पूव्वा-बर-विरोही अपुव्व एसो विरह-मग्गो
(पूर्वा-पर-विरोधी[1] अपूर्व एप विरह–मार्ग:)

Sānumatī—Singular (*is*) this course of separation in as much as it is[1] contradictory to the antecedent and subsequent (*conducts*)[1].

V.L.—'कथं चित्रम्'—R. B. V. M. '०एतत्'—S. 'अवगतार्था'—R. V. B. 'अनवगतार्था'—K. M. S. 'अनुभावी'—R. M. S. 'अनुसारी'—B. 'विरहमार्ग:'—R. B. V. M. 'विधानमार्ग:—S. विरहिमार्ग:'—B. '०विरोधी'—R. V. M. S. '०विरुद्ध:'—B.

सानुमतीति । 'अवगतार्था' चित्रत्वेन ज्ञात-विषया । ममापि इत: पूर्वं भ्रमरस्य तात्त्विक-बुद्धिरासीत्, इदानीं चित्रमित्युक्ते: अस्य चित्रता मवगच्छामि । 'यथालिखितं' लिखिताऽनुरूपम् 'अनुभवति' य: स 'यथा-लिखिताऽनुभावी' । यदि ममापि ईदृशी विपरीता-बुद्धि:, तर्हि येनात्र यत् यत् लिखितं तत् सर्वमनुभूतं च,

स चेदेतत् परमार्थं भावयति तन्नाश्चर्यम् इति हृदयम्। **राजेति।** 'पुरोभागी' दोषैकदर्शी ('दोषैकदृक् पुरोभागी' इत्यमरः) तस्य कर्म "पौरोभाग्यम्' [इति काटयवेमपादाः। "गुण-वचन-ब्राह्मणादिभ्यः कर्मणि च" इति ष्यञ्। [**दर्शनेति।** 'तन्मयेन' शकुन्तलामयेन (इति शङ्करपादाः) केवल-शकुन्तला-विषयकेण इत्यर्थः। 'हृदयेन साक्षादिव' प्रत्यक्षमिव प्रियाया 'दर्शनेन' यत् 'सुखम्' आनन्दं तत् 'अनुभवतः' भुञ्जानस्य "मे स्मृतिकारिणा' चित्रमिति स्मरणं कारितवता त्वया, 'कान्ता' प्रियतमा 'चित्रीकृता' आलेख्य-रूपेण परिणमिता। **अथवा आश्चर्य-रूपा कृता ('आलेख्याऽऽश्चर्ययोः चित्रम्' इत्यमरः)।** (अत्र साम्य-वशात् चित्रे राज्ञः प्रकृत-शकुन्तला-भ्रमात् **भ्रान्तिमान्** अलङ्कारः। स्मृतिकारिणा चित्रीकृता इति शब्द-शक्ति-मूलो **विरोधाभासः** व्यङ्ग्यः। **उत्प्रेक्षा** च। वतवतेति येनयेनेति कृत-कान्तेति **छेक-श्रुत्यनुप्रासाः।** भोजराजेन तु "परप्रयत्नादपि स्मरणे **स्मरणा-लङ्कारः**" इत्युक्त्वा **तदलङ्कारे इदमुदाहृतम्।।** "प्रथमार्धे हर्षः, द्वितीयार्धे च विषाद, इत्युभयोर्भावयोः सन्धि-विप्रलम्भ-शृङ्गारस्याङ्गमिति **भाव-सन्धिनामालङ्कारश्च'** इति सिद्धान्तवागीशपादाः। **आर्या** जातिः) ।।२१।। **सानुमतीति।** 'एषः परिदृश्यमानः 'विरहस्य मार्गः' पन्था अवस्था इति भावः,' पूर्वा-परयोः अतीत-वर्तमानयोः यः 'विरोधः' परस्पर-प्रतिषेधः सोऽस्तीति मत्वर्थीय इनिः। अतएव 'अपूर्वः' आश्चर्यजनकः। तथा चादौ स्वच्छन्द-चारिणी-सम्भावनया प्रत्यादेशात् अस्यां शकुन्तलायां राज्ञः **नितरां विद्वेषः**, पुनस्तदर्थमेव भृशं पीड़ितस्य **तस्यैव रोदनम्** इत्यपूर्वं परस्पर-विपरीता-वस्था-द्वयम् इत्याशयः।

215n.—1. एषः—Certainly refers to the **King.** It is he who has painted the picture and therefore there is no wonder, if he experiences what he has painted. **R takes it to refer to the block-headed jester** who is not capable of being influenced by any sentiment. This does not seem to give good sense. **2. पौरोभाग्यम्**—Cf. "प्रियोपभोग-चिह्नेषु पौरोभाग्यमिवाचरन्"—*Ra. XII.* 22 and *MN* thereon. (Also 179*n.* 2.) **3. तन्मयेन** &c—For an instance of such तन्मयत्व, Cf. "पश्यामि इतः पुरतश्च पश्चादन्तर्बहिः परित इव विवर्तमानाम्। उद्बुद्ध-मुग्ध-कनकाब्ज-निभं वहन्तीमासक्ति-तिर्यग्-प्रवर्तित-दृष्टि-वक्त्रम्" ।।—*MM. I.* 40. For somewhat similar idea Cf. "रत्नावलीव कान्ता मम हस्ताद् भ्रंशिता भवता"—*Rat. II.* 18; **विहरति**—(139*n.* 4). **4. पूर्वापर-विरोधी** &c.–**'पूर्व'** means 'what was seen before' and 'अपर' what is seen later on'. **विरोधी** = Inconsistent. Sānumatī means to say that the course of love-sickness (*of the* (*king*) is *very peculiar*, as great deal of inconsistency prevails

between his former and later actions. The king *disavowed* Śak. when she had come to his palace out of her own accord, but when she was gone, he was overwhelmed with grief and actually wept for her. *R* explains differently thus—"पूर्वं चित्रस्य चित्रत्वेन ज्ञानं, पुन स्तस्योन्मादा-वस्थायां सत्यत्वेन ज्ञानं, पुनरपि चित्रत्वेन ज्ञानम् इति पूर्वापर-विरोधः। उन्मादा-वस्थानन्तरं मूर्च्छाद्यवस्थाया अभावात् इति भावः। अत-एव अपूर्वं आश्चर्यकारी"। The picture was considered to be a *picture* first, and then in उन्मादावस्था it was *mistaken for a real scene of life*, and lastly it was again recognized as *a picture*, so there is inconsistency in his prior and later actions. Again his 'विरहमार्ग' is *extra-ordinary* as he did not swoon (मूर्च्छा, 9th stage) immediately after his 'उन्मादावस्था' (8th stage). Vide [196n. Remark].

Remark:—This *Ś*loka has been quoted by *Bh.* in SKN.

Text:—राजा—वयस्य, कथमेवमविश्रान्तं दुःखमनुभवामि—

(श्लोक) [1]प्रजागरात् [2]खिलीभूतस्तस्याः स्वप्ने समागमः।
बाष्पस्तु न[3] ददात्येनां द्रष्टुं चित्रगतामपि ॥२२॥

King—Friends, how shall (*I*) brook this unceasing misery ? Union with her in dream is barred[2] by wakefulness[1], and tears on the other hand do not [3]suffer (*me*) to see her, even when drawn in a picture. (22).

सानुमती—सव्वहा पमज्जिदं तुए पच्चादेस-दुःक्खं सउन्दलाए (सर्वथा [4]प्रमार्जितं त्वया प्रत्यादेश-[5]दुःख शकुन्तलायाः)।

Sānumatī—You have made[4] ample amends[4] for Śakuntalā's [5]sorrows owing to repudiation[6].

चतुरिका (प्रविश्य)—**जेदु जेदु। वट्टिआ-करण्डअं गेण्हिअ इदोमुहं पत्थिदम्हि** (जयतु जयतु भर्ता। [1]वर्तिका-करण्डअं गृहीत्वा इतोमुखं प्रस्थितास्मि]।

(*Entering*) Caturikā—May My Liege be victorious. Taking the brush-box[1], I was coming this way-

राजा—किं च। King—And what ?

चतुरिका—सो मे हत्थादो अन्तरा तरलिया-दुदीआए देवीए वसुमदीए अहं एव्व अज्जउत्तस्स उवणइस्संति सबलक्कारं गहीदो (स मे हस्तादन्तरा तरलिका-द्वितीया[1] देव्या वसुमत्या अहमेव आर्यपुत्रस्योपनेष्यामि इति[2] सबलात्कारम् गृहीतः)।

Caturikā—Saying "I shall myself deliver (*it*) to my lord"—that (*thing*) was santched away forcibly[2] by queen Vasumatī, [1]Taralikā seconding her[1]

V. L.—'अविश्रान्तं दुःखम्'--V. 'अविश्रान्त-दुःखम्'—R. M. 'अविश्रामं दुःखम्'—B. 'अविश्राम-दुःखम्'—S. 'स्वप्ने समागमः'—R. V. M. S. 'स्वप्नसमागमः'—B. For 'तरलिका द्वितीयया' B has 'पिङ्गलिका-वेदितया'।

प्रजागराविति। 'प्रजागरः' प्रकर्षेण जागरणम् [इति हलायुधः] निद्राभावः इत्यर्थः तस्माद् हेतोः, 'तस्याः प्रियायाः शकुन्तलायाः [कर्तरि षष्ठी) 'स्वप्ने' निद्रावस्थायां 'समागमः' सम्मेलनं 'खिलीभूतः' शून्यतां प्राप्तः व्याहत इत्यर्थः। 'दुर्लभ इति शङ्करादाः'। ['खिलमप्रहते क्लीवं सार-संक्षिप्त-वेधसोः' इति मेदिनी]। यत् पुनः जाग्रदवस्थायां तच्चित्र-दर्शनेन क्लिष्टात्मानं विनोदयामि तदपि न सम्भवति इत्याह। 'तु' पुनः 'बाष्पः' उपचीयमानः अश्रु-प्रवाहः 'चित्रगताम्' आलेख्य-स्थिताम् 'अपि' [प्रत्यक्ष-दर्शनं पुनरनुपपन्नम् इत्यपि-शब्दार्थः] **'एनां' शकुन्तलां 'द्रष्टुं' न ददाति'** चित्रदर्शन-काले नयने मे अश्रु-प्रवाहेण आकुलिते, अतः चित्रेऽपि तां द्रष्टुमहं न पारयामि। [**हेत्वनुप्रासौ**। 'दर्शन-सुख' मित्यादिना एतदन्तेन सुखानुब-कार्यं प्रति विघ्नप्राप्तेः **विरोधन**-नामाङ्गम् उपक्षिप्तम्। "कार्यात्ययोपगमनं **विरोधन**मिति स्मृतम्" इति। **श्लोको** वृत्तम्] ॥२२॥ **सानुमतीति।** 'प्रत्यादेशात्' प्रत्याख्यानात् यत् 'दुःखं' तत् 'सर्वथा' (५।३।२३) सर्वेण 'प्रकारेण' 'प्रमार्जितम्' प्रक्षालितं दूरीकृतमित्यर्थः। **चतुरिकेति।** 'वर्तिकायाः' तूलिकायाः ('पटलेपे पक्षिभेदे **तूलिकायाञ्च वर्तिका**' इत्यजयः] 'करण्डकं' तूलिका-रक्षणोपयोगि-वंशादि रचितभाण्ड-विशेष'—इति शब्दकल्पद्रुमः। 'साजि', 'झाँपि' इत्यादि भाषा। **'करण्डो वंशादि-कृत-पेटके मधुकोषके"** इति शब्दार्णवः] ॥ **चतुरिकेति।** 'अन्तरा' मध्ये अर्धपथे इत्यर्थः। 'आर्यपुत्रस्य' (इति शेषे षष्ठी] यद्वा 'आर्यपुत्रस्य उप' समीपे 'नेष्यामि' प्रापयिष्यामि 'इति' एतदुक्त्वा 'बलात्कारेण' हठात् इत्यर्थः ['बलात् इति हठार्थे' इति गणकारः]।

216n.—1. खिलीभूतः—'खिल' means 'अप्रहत' (*Com.*) A piece of fallow-land where no corn exists, hence 'खिलीभूतः'—*Made empty like a barren land*, 'खिल' often in connection with 'भू' and 'कृ' implies 'to become impassable', 'to be blocked up.' *Cf.* 'खिलीभूते विमानानां तदापातभयात् पथि'—*Ku. II.* 45; *Ra. XI.* 14; 87. **2. स्वप्ने समागमः** &c.—'मम पुनः मन्द भागिन्याः **स्वप्ने-समागमोऽपि** भर्तुर्दुलंभ आसीत्'—*Māla. IV.* "In Hindu poetry, dreams and pictures are the regular standing artifices of lovers for tricking

themselves into *fictitious union* with their mistresses (*Cf.* 'सादृश्य-प्रतिकृति-दर्शनैः प्रियायाः स्वप्नेषु क्षणिक-समागमोत्सवैश्च'—*Ra. VIII.* 92) just as 'sleeplessness and tears' are the regular standing impediments to such devices"—*M.* For a similar idea, *Cf.* 'त्वामालिख्य प्रणयकुपितां धातुरागैः शिलायामात्मानं ते चरण-पतितं यावदिच्छामि कर्तुम् । अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे, क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः" —*PA&MD.II.* 44;' 'मत्संभोगः कथमुपनयेत् स्वप्नजोऽपीति निद्रामाकाङ्क्षन्ती नयन-सलिलोत्पीड़रुद्धावकाशाम्"—*II.* 30"** कथमुपलमे निद्रां स्वप्ने स्समागम-कारिणीं । न च सुवदनामालेख्येऽपि प्रियां समवाप्य तां, मम नयनयोरुद्धाष्पत्व सखे न भविष्यति"—*Vik. II* 10. **'बाष्पः एनां द्रष्टुं न ददाति'**—*Cf.* "दंसणं उण पिअसहीए वाप्फो-प्पीड़णेण पच्चक्खं ण लम्भीअदि"—*MM. Act. VI.* **Mark the construction of this line** which is considered **faulty** by some, as **'बाष्पः'** is the Nominative of **'ददाति'**, while **'अहम्'** (*understood*) is of **'द्रष्टुम्'** । According to them **'समान-कर्तृकत्व'** of 'तुमुन्' **and the principal verb must always be observed.** Others, however, opine that **समान-कर्तृकत्व** is **compulsory with तुमुन्** in connexion with *verbs having the sense of* **desire** *only*. The Sūtra **'समानकर्तृकेषु तुमुन्'** (*III*.3. 158; 3176) has no connection with the other Sūtra —**'तुमुन्-ण्वुलौ क्रियायां क्रियार्थायाम्'** (*III.* 3. 10)—sanctioning तुमुन् । Read :—एककर्तृकयाइच्छार्थक-क्रियाया योगे, धातोः परः तुमुन्-प्रत्ययः स्यात् । भोक्तुमिच्छति, पातुं व्यवस्यति" ** **"समानकर्तृकेषु किम् ? भिन्न-कर्तृकत्वे मा भूत् ।** देवदत्तः यज्ञदत्तं भुञ्जानमिच्छति । अन्न-भोजनाय विप्रं निमन्त्रयते", न तु 'अन्नं' भोक्तुं विप्रं निमन्त्रयते"—*Prabhā.* It is obvious that the **idea of 'इच्छा'** is found from the **previous Sūtra 'इच्छार्थेषु लिङ्-लोटौ'** (*III.* 3. 157). But here तुमुन् (in द्रष्टुं &c.) has been used by (*III.* 3. 10) which is separated from (*III.* 3. 158), *by* **147 intervening Sūtras** *and* **thus stands independently and has no connection with 'समानकर्तृकत्व' । Goyicandra,** including many other later grammarians is of the same tenor. Kāli., Bhavabhūti and others follow suit. *Cf.* "राज्ञः भोक्तुं मासमाहरति" *Sankṣipta-Sāra-Vyākaraṇa*; 'ब्रह्मकर्म कर्तुं भवन्तमहं वृणे'—*Aniruddha Bhaṭṭa.* 'हूणान् हन्तुं प्राहिणोत् तम्'—*HC.* "त्रातुं लोकान् इव परिणतः कायवानस्त्रवेदः"—(*UC. VI*) ; 'रेवां यदि प्रेक्षितुमस्ति कामः'—(*Ra. VI.* 43).

"प्रजानामधिप: वनाय (वनं गन्तुं—Mallinātha) धेनुं मुमोच'—(*Ra. II.* 1.) "यदर्थिता निर्हृत-वाच्य-शल्यान् प्राणान् मया धारयितुम् चिरं व:"—*Ra.* 14. 42. 'कर्तुं वा कश्चिदन्तर्ह्वयति वसुमती दक्षिणं सप्ततन्तुमित्यादि प्रयोगात् **कर्तृभेदेऽपि तुमो वाच्यत्वमिति निश्चीयते**—*Suṣeṇa Kavirāja's Com. of Kātantra Vyākaraṇa*, also Kavirāja on Kalāpa Sūtra no. 424; Gītā II. 5; V. 6; BK. VI. 4; IX. 44; XV. 105, Ki. I. 28; III 9; 40; Ra. II. 55. 'गोपितुं भुवनमिमं मरुत्वता शैलवासमनुनीय लम्भित:" —(*Ki. XII.* 67). The *antiparty mainly* consists of **Bhattoji Dīkṣita,** his grandson **Hari Dīkṣita** and disciple **Nāgeśa Bhaṭṭa.** Read—"तुमुन्-ण्वुलाविति विधिरपि **भिन्न-कर्तृकेषु नेष्यते** । पुत्रं भोजयितु-मागच्छति इति व्यक्तव्ये, पुत्रेण भोक्तुमित्यप्रयोगात् । **सेयं व्यवस्था शब्द-शक्ति-स्वाभाव्याद्बहुल-ग्रहणाद्वा सिद्धा**"—PM. 'समान-कर्तृकत्वादि द्योत-यितुमेषामिति स्थिति: ।'—इति वैयाकरणभूषणम्, also its Commentary. According to *Raghunandana*, the statement of *Aniruddha Bhaṭṭa* is **wrong** and should be changed into "**ब्रह्मकर्म-करणाय** भवन्तमहं वृणे" । Even if समान-कर्तृकत्व be held **absolutely binding** with तुमुन्, the above anomalous cases may be explained by considering such words as "**स्थित,**" "**उद्यत**" &c. understood after the infinite verb (तुमुन्) as is done in the cases of 'क्त्वा' and 'ल्यप्' । *Now Read* (68*n.* 6). **4. सबलात्कारं**—'बलात् करणम् इति बलात् + कृ - घञ् भावे (३।३।१८—*BhD*]=बलात् कार:—(241n. 5.), तेन सह, सबलात्-कारम्—By force. *Cf.* 'सिंहशिशु बलात्कारेण कर्षति'—*Śak.* (*VII.* 14). '**पिङ्गलिका-वेदितया देव्या**' (*B*)—also gives good sense, "Being informed (of the fact that the king was painting a portrait of a woman and that at the command of the king, Caturikā was bringing forth painting accessories) by Piṅgalikā (who might have been engaged for watching the movements of the king by queen वसुमती । (217*n*, 3).

Text:—विदूषक:—दिट्ठिआ तुमं मुक्का (दिष्टया[1] त्वं मुक्ता) ।

Vidūṣaka—Fortunately[1] you were (*some how*) let off.

चतुरिका—जाव देवीए विडप-लग्गं उत्तरीअं[2] तरलिआ, मोचेदि ताव मए णिव्वाहिदो अप्पा (यावत् देव्या विटप-लग्नम् उत्तरीयं तरलिका योचयति तावत् मया निर्वाहित[3] आत्मा) ।

Caturikā—While Taralikā was disentangling the queen's [1]upper-garment, caught in a bough (*of a tree*), I got[2] myself off.[3]

राजा—वयस्य ! उपस्थिता देवी बहु-मान-गर्विता च । तत् भवानिमां प्रतिकृतिं रक्षतु ।

King—Friend ! up comes Her Majesty, rendered insolent (*presumptuous—M*) by (*my*) great attention (*to her*). So you better take care of this likeness.

विदूषकः—अत्ताणं त्ति भणाहि (आत्मानमिति भण) । (चित्रफलक-मादायोत्थाय च) **जइ भवं अन्तेउर-कूड़-वागुरादो मुञ्चीस्सवि तदो मं मेहप्पड़िच्छन्दे पासादे सद्दावेहि । एदञ्च तहिं गोबाएमि, जहिं पारावदं उज्झिअ अण्णो कोबि ण पेक्खिस्सदि** (यदि भवान्[4] अन्तःपुर-कूट-वागुरातो मोक्ष्यते, तदा मां मेघ-प्रतिच्छन्दे प्रासादे शब्दाययतु[5] । इदञ्च, तत्र गोपायामि,[6] यत्र पारावत-मुज्झित्वा[7] अन्यः कोऽपि न प्रेक्षिष्यते) । (इति द्रुतपदं निष्क्रान्तः) ।

Vidūṣaka—"And (*save*) yourself" (*you might add*). [*Taking up the picture-board and rising*]. If Your Highness is freed from[4] the intrigue [lit. Snare of perfidy] of the seraglio,[4] then call[5] me at the *Cloud Balcony*. And this I'll hide[6] there where except[7] a pigeon, no one else may see it. [*This said, exit with hasty steps*].

सानुमती—अम्मो, अण्ण-संकन्त-हिअओ बि पढ़म-संभावणं अबेक्खदि सिढिल-सोहृदो दाणिं एसो (अम्मो ! अन्य-संक्रान्त-हृदयोऽपि प्रथम[8]-सम्भावना मपेक्षते[8] शिथिल-सौहृद इदानीमेषः) ।

Sānumatī—Oh ! this (*person*) with his affection slackened, [8]maintains (*his*) previous[7] respects (*i.e.* shows regard to his first love]', though his heart (*affection*] is transferred to another.

V. L.—'निर्वाहितः'—R. V. M. 'निर्वासितः'—K. 'निह्नुतः'—B. 'निर्गतः'—S. 'तत्भवान्'—B. Others omit तत् । '०कूट-वागुरातः'—B. '०कलहात्'—S. K. '०कालकूटात्'—R. V. M. '०कूटात्'—S. 'शब्दापय'—R. S. 'शब्दय'—M. 'शब्दायस्व'—V. 'शब्दायिष्यते'—B. 'इदञ्च तत्'—&c—'—B, Omitted by others. "शिथिल-सोहृदो'—V. 'अतिशिथिल-सोहृदो'—M. 'स्थिरसौहार्दे'—R. 'स्थिरसोहृद'—S. B.

चतुरिकेति । 'देव्याः' वसुमत्याः 'विटप-लग्नं' पथिपार्श्व-स्थित-वृक्षशाखायां संसक्तम् 'उत्तरीयं' प्रावारकम् ['गहादिभ्यश्च'–(४।२।१३८ ; १३६२) इति छः] 'यावत्' यत्कालं 'मोचयति' ['यावत्-पुरा-निपातयोःलट्'-३।३।४] 'आत्मा' स्व-कलेवरः ['आत्मा कलवरे यत्ने' इति धरणी ।] 'निर्वाहितः' तत्स्थानात् अन्यत्र नीतः, पलायितः । तरलिकायाः अपि मोचन-व्यापृतत्त्वेन द्वयोरेव अवसराभावात्

इत्याशयः। **राजेति**। 'उपस्थिता' अधुनैव उपस्थिता भविष्यति [**निष्ठाऽत्र भविष्यत्-द्योतिका**। "आदि-कर्म्मणि निष्ठा वक्तव्या", वाः–६०५२] '**बहुमानेन**' मत्प्रदर्शितेन प्रधान-महिषी-गौरवेण 'गर्विता' जातगर्वा। अहमेव आर्यपुत्रस्य प्रियतमा इति तस्या गर्वः। अत 'इमां प्रतिकृतिं' कुत्रचित् 'रक्षतु' गोपायतु, अन्यथा सा यदि इदमालेख्यं पश्येत् तदा नूनं मां प्रमदान्तरमासक्तं मन्येत, ईर्ष्यया आलेख्य-मपि विनाशयेच्च इति हृदयम्। (अनेन **प्ररोचना**-नामाङ्गमुपक्षिप्तम्। "**प्ररोचना** तु विज्ञेया संहारार्थ-प्रदर्शिनी" इति दर्पणलक्षणात्। अत्र चित्राङ्कन-व्यापारस्य उपसंहारः प्रदर्शितः]। **विदूषक इति**। सा न केवलम् आलेख्यं नाशयेत् अपि तु तदालेख्य-धारकं मामपि पीडयेत्। अत आह **आत्मानमिति**। राघवमते तु "अत्र-आत्म-शब्देन विदूषकः राजा च **उभयमपि** गृह्यते। तेन प्रतिकृति-रक्षणेन उभावपि रक्षणीयौ इति भावः") 'अन्तःपुरस्य' अन्तःपुरस्थाया देव्या इत्यर्थः। 'कूटं' माया कैतवं वा ["**माया**-निश्चल-यन्त्रेषु **कैतवा**ऽनृत-राशिषु। आयोघन शैल-शृङ्ग सीराङ्गे **कूट**-मस्त्रियाम्" इत्यमरः) तद्रूपा या 'वागुरा' लक्षणया अत्र जाल-मात्रं ['वागुरा मृग-बन्धिनी' इत्यमरः] तस्याः 'मेघप्रतिच्छन्दे' तन्नामके 'प्रासादे सौधे [प्रसीदन्ति अत्र इति 'हलश्च'–(३।३।१२१) इति घञ्। "उसपसर्गस्य घञि अमनुष्ये वहुलम्"–(६।३।१२२) इति दीर्घः] 'मां' विदूषकं 'शब्दाययतु' शब्द कारयतु। तच्छब्द माकर्ण्य शब्दयामि इति भावः ["शब्दायते र्न"-वाः—५४० इति निषेधसत्त्वादपि **कर्बोविवक्षावशाद् अणिकर्तुः कर्मसंज्ञा**)। 'तत्र' तादृशस्थाने। 'पारावतं' कपोतम् 'उज्झित्वा' विहाय। केवलं कपोता एव तद्द्रष्टु शक्ष्यति इत्याशयः। **सानुमतीति**। 'अम्मो' इति विस्मये। 'शिथिलं' वसुमत्यां मन्दीभूतं 'सौहृदं' प्रेम यस्य तादृशः। 'अन्यस्यां' नायिकायां शकुन्तलायां 'संक्रान्तम् आसक्तं 'हृदयं' यस्य ("सर्वनाम्नः वृत्तिमात्रे पुंवद्भावः"—७२८) तथोक्तः सन् अपि 'प्रथमां प्राक् वसुमत्यां दर्शितां 'संभावनां' प्रीतिम् 'अपेक्षते' अनुरुध्यते। न तस्याः अगौरवं कर्तुमिच्छति।

217n.— **1.** **दिष्टया** &c.—*Cf.* "दिष्टया मृगीव शार्दूलमुखात् श्रद्धा क्षेमेण जीविना प्रियसखी"—*PC. IV.* **निर्वाहित** &c. —Lit. 'by me my own person was carried off, *i.e.* I somehow made my escape. **उत्तरीय**–उत्तरस्मिन् देहभागे भवम् इति उत्तर+छ—१३६२ (*Com.*) = उत्त-रीयम्—Upper garment. **2.** **उपस्थिता देवी**—Before long *she will be present here.* Here क्त has **Future sense**—(77*n.* 5.). **3.** **बहु-मान-गर्विता**—मान सम्मान। For sometime past I have been showing her great honour, in consequence of which she has become very proud. Or, **'मान'** means—**resentment arising from jea-**

lousy. But jealous ladies do not like that their husbands should be enamoured of other women. *Cf.* "निरास भृङ्गं कुपितेव पद्मिनी । न मानिनीशं सहतेऽन्यसङ्गमम्" ॥—*BK. II.* 6. Hence 'self-pride' or 'vanity' will be naturally inherent in a 'मानिनी' । For मान read—"स्त्रीणाम् ईर्ष्याकृतः मानः कोपोऽन्यासङ्गिनि प्रिये । श्रुते वानुमिते दृष्टे—" *DR. IV.* 67. "The resentment arising in a (a state of) jealousy in anger on the part of women when their lover is heard, inferred, or seen (to be) devoted to another"—*Dr. Haas.* प्रतिकृति—Ra. VIII. 92; XIV. 87. **4.** अन्तःपुर &c.—कूट—means "deception, fraud", (*Com.*) Cf. 'पाशमपास्य कूटरचनां भङ्क्त्वा बलाद्वागुराम्'—*Abākara-Kaumudī.* Women are known as practising frauds for the attraction of their lovers and these may be well termed as 'वागुरा' or **noose'** in which men are generally enticed. [Cf. "राजा एवमादिभिःआत्म-कार्य-निर्वर्तिनीनां मधुराभिरनृत-वाग्भिराकृष्यन्ते विषयिणः"—*Śak. V-P.* 474] वागुरा—अवा गुरुते इति अव+आ+गुर् [हिंसायाम् तुदादिः]+क ['इगुपध—' ३।१।१३५]=अवागुरा । Next 'अ' of 'अव' is dropped by 'वष्टि भागुरि' &c.—(5*n*, 1). Hence "वागुरा"—*BhD. R's* ०कालकूलात्' also gives a very good idea as the virulent ire of women is generally compared to the deadly poison, 'कालकूट' or 'हलाहल', which was originated by the churning of the ocean. But **'मोक्ष्यते' does not seem to be in consonance with** '०कालकूट' । The readings of K, S and Ś also suit the context. So it is not easy to find out the original reading. **5.** मां शब्दाययतु (भवान्)—शब्दं करोति with क्यङ gives 'शब्दायते' and with णिच् 'शब्दयति'] । *Cf.* 'शब्दं करोति इत्यर्थे "शब्द-वैर'-(३।१।१७) इत्यादिना क्यङि, "अकृत्-सार्वधातुकयोः दीर्घः"-(७।४।२५) इति दीर्घः, "सनाद्यन्ता—" (३।१।३२) इति धातुत्वे निर्देशोऽयम्"—*BM.* In the Causative, the form is 'शब्दाययति' ["ततो हेतुमण्णिच्—*T.*]. Now the Nominative of 'शब्दाय' (अकर्मक), in the non-causal form (अणिकर्ता), does not become कर्म by 'गतिबुद्धि'—&c. (1. 4. 52) on account of the *Vārt.* "शब्दायते नं"-(540). Owing to fancy for **archaic forms** (210n, 3), Kāli, uses 'मां' intead of 'मया' । Read "शब्दायति क्यङन्त-धातोः अणौ कर्ता नौ कर्म नेति वक्तव्यमित्यर्थः ॥ शब्दाय-

यति देवदत्तेनेति। शब्दायते देवदत्तः, तं यज्ञदत्तः प्रेरयति इत्यर्थः। देवदत्तस्य कर्मत्वाभावात् प्रयोज्य-कर्तृत्वमादाय तृतीयैव * * * शब्दकर्मकमुत्पादनं शब्दायेति क्यङ्न्तस्य धातोरर्थः। एवञ्च शब्दात्मकं कर्म धात्वर्थे अन्तर्भूतम्। अत शब्दायति क्यङन्तधातोरकर्मकः। "धात्वर्थ-बहिर्भूत-कर्मकत्वमेव सकर्मकत्वम्" इति 'सुप आत्मनः' (३।१।८) इति सूत्रे प्रपञ्चितत्वात्"—*BM.* "एतेन शब्दाय**यति सैनिकैः रिपून्**" इति कर्म-प्रयुञ्जानाः परास्ताः—*T. &BM.* 'येषां देश-कालादि-भिन्नं कर्म न सम्भवति तेऽत्राऽकर्मकाः, न त्वविवक्षित-कर्मऽणोपि तेन मासमासयति देवदत्तम्' *&c-BD* **6. पारावतम्**—The pigeons can fly very high and generally live in holes in the highest part of a building. *Cf.* "तां कस्याञ्चिद्भवन-वल्लभे सुप्तपारावतायां नीत्वा रात्रिं चिरविलसनात् खिन्न-विद्युत्-कलत्रः'—*PA* & *MD.* 39. 'पारापतः' (*Ravasa*) is another form. **7. अन्य-संक्रान्तः** &c.—संक्रान्त=Transferred. 'अन्या' refers to शकुन्तला। Cf. '**पुत्र-संक्रान्त**-लक्ष्मीकैः यद् वृद्धेक्ष्वाकुभिः धृतम्'—*UC. I.* 22. '**अन्य-संक्रान्त**-प्रेमाणो नागरिका अधिकम् दक्षिणा भवन्ति'—*Vik. III.* 'राजा'—कथं **मामन्य-संक्रान्त**-हृदयमुपलायन्तमपि ते सखी लक्षयिष्यति"—*Māla. III.* 'यादृशः चित्रगतः, तादृशः **अन्य-संक्रान्त**-हृदयः आर्यपुत्रः'—*Ibid. IV.* **सम्भावना**=Respect—(26n, 2). **प्रथम०**—Respect for the queen maried first, or the queen-in-cheif. **शिथिल०**—This is of course due to his love for Śak. **सौहृद**—Read (35*n.* 3.)

Text:—(प्रविश्य पत्र-हस्ता) **प्रतीहारी—जेदु जेदु देवो**
[जयतु जयतु देवः]।

(*Entering paper in hand*)

Portress—Victory, victory to Your Majestry.

राजा—वेत्रवति! न खल्वन्तरा[1] दृष्टा त्वया देवी।

King—Vetravatī, did you not, indeed, on the mid-way[1] see Her Majesty (*Vasumati coming this way*) ?

प्रतीहारी—अह इं। पत्त-हत्थं मं पेक्खिअ पडिणिउत्ता
[अथकिम्। पत्र-हस्तां मां दृष्ट्वा प्रतिनिवृत्ता]।

Portress—Yes, (*My Lord*), but (*she*) turned back on seeing me with a despatch in hand.

राजा—कार्यज्ञा कार्योपरोधं[2] मे परिहरति।

King—Knowing business, (*she, my queen*) abstains from disturbing my (*state*)—affairs[2].

प्रतीहारी—देव, अमच्चो विण्णवेदि अज्ज अत्थ-जादस्स गणणा-बहुलदाए

एक्कं एव्व मए पोर-कज्जं पच्चवेक्खिदं। तं देवो पत्तारूढं पच्चक्खीकरेदु त्ति [देव, अमात्यो विज्ञापयति अद्य [1]अर्थ-जातस्य गणना-बहुलतया[2] एकमेव मया पौरकार्यं प्रत्यवेक्षितम्। तद्देवः[3]पत्रारूढं प्रत्यक्षीकरोतु इति]।

Portress—My Liege, the minister submits that by[4] reason of the length of calculation[4] of the various[3] (*items*) of revenue[3] today, only one (*important*) citizen's suit has been examined by him. May Your Majesty see it (*as*) committed[5] to paper.[5]

राजा—इतः पत्रं दर्शय। (प्रतीहारी उपनयति)। King—This way, show (*me*) the paper. (*The Portress brings it near*).

राजा (अनुवाच्य)—कथम्। [6]समुद्र-व्यवहारी सार्थ-वाहो[7] धनमित्रो नाम नौ-व्यसने विपन्नः। [8]अनपत्यश्च किल तपस्वी। राज-गामी तस्यार्थ-सञ्चयः इत्येतदमात्येन लिखितम्। (सविषादम्) कष्टं खल्वनपत्यता। वेत्रवति! बहु-धनत्वाद् बहु-पत्नीकेन तत्रभवता भवितव्यम्। विचार्यतां यदि काचिदापन्न-सत्त्वा[9] तस्य भार्यासु स्यात्।

King (*Having read*)—What ! the sea-faring[6] foreman[7] of a merchant-guild[7], Dhanamitra by name, has perished in shipwreck. And childless[8], they say, (*is*) the poor man. To the crown, reverts all his hoard of money, so writes the minister. (*Sorrowfully*) Miserable indeed (*is*) child-lessness. Vetravati, having had vast wealth, many-wived (*that*) gentleman must have been. Let it be inquired if some one, amongst his wives (*is*)[9] [9]enceinte.

V. L.—'अर्थजातस्य गणना०'—R. V. M. 'राजकार्यस्य०'—B. S & B read 'प्रत्यवेक्षितं' for 'अवेक्षितम्'—(M). 'अपेक्षितम्'—R. 'पत्रिकां'—R. M. S, 'पत्रं'—B. 'धनमित्रः'—R. V. M. 'धनवृद्धिः'—P. B. PP. '०व्यसने'—R. M. V. '०व्यसनेन'—B. 'तपस्वी'—R. M. V. 'सः'—S. Omitted by B. 'विचार्यताम्'—R. V. M. 'विचीयताम्'—S. 'अन्विष्यताम्'—B.

राजेति। 'खलु' इति प्रश्ने। 'अन्तरा' पथिमध्ये। 'देवी' अभिषिक्ता पत्नी वसुमती ('देवी कृताभिषेकायाम्' इत्यमरः)। **प्रतीहारीति।** 'अथकिम्' इति स्वीकारे। ('अङ्गीकारेऽपि चाथकिम्' इति हारावली)। 'पत्रं' हस्ते यस्याः' तां 'पत्रहस्तां' राजकार्यार्थं प्रस्थितां मामित्यर्थः (गड्वादित्वात् सप्तम्यन्तस्य पर-निपातः)। **राजेति।** 'कार्यं' कदा किं कर्तव्यं किं वाऽकर्तव्यम् इति या जानाति सा 'कार्यज्ञा' कर्तव्याऽकर्तव्य-विचार-कारिणी। प्रजानां 'कार्यस्य' निजागमनेनैव 'उपरोधं' कलहेन व्याघातं 'परिहरति' वर्जयति। अधुना राजकार्यं

स्यात्। ममोपस्थितौ तु तस्य उपरोध-सम्भावना स्यात् इति विचिन्त्य देवी प्रतिनिवृत्ता इति भावः। **प्रतीहारीति**। 'अर्थानां राजस्वाऽधिकारिकैः प्रेषितानां धनानां 'जातं' समूहं ["जातं जनि-समूहयोः" इति कोषः] तस्य 'गणनायाः बहुलतया' बाहुल्येन तस्य संख्याने प्रभूतस्य समयस्य अतिवाहितत्वात् इत्यर्थः। 'पत्रारूढं' लिखित्वा प्रेरितम्। **राजेति**। 'अनुवाच्य' पठित्वा। 'कथम्' इति संभ्रमे। 'समुद्रेण व्यवहरति' देशान्तरं गत्वा क्रय-विक्रय-व्यवहारं करोति यस्तादृक् पोतवणिक्। 'सार्थान्' वणिक्-समूहान् [**'सार्थः वणिक्समूहेऽपि** स्यात्' इति मेदिनी] 'वाहयति' चालयति यस्तादृक् श्रेष्ठिपतिः। 'नौ-व्यसने' पोत-भ्रंशे' पोत-निमज्जने इत्यर्थः [**'व्यसनं विपदि** भ्रंशे दोषे कामजे कोपजे' इत्यमरः] 'विपन्नः' मृतः। 'अनपत्यः' पुत्र-पौत्रादि-रहितः, ["न पतति वंशो येन जातेन तदपत्यम्" इति कलाप-टीकायां **दुर्गसिंहः**॥ "अपततं भवति पितुः सकाशादेत्य पृथक्ततं भवति। अनेन जातेन सता पिता नरके न पतति इति वा"॥ इति **यास्कः**]॥ 'तपस्वी' अनुकम्पार्हः। 'राजगामी' शास्त्रानुसारेण इदानीं राजा एव तद्धनस्य अधिकारी भवति इत्यर्थः। 'कष्टं' दुःखकरं 'खलु' इत्यवधारणे। बह्व्यः पत्न्यः' यस्य तेन ['नदृयतश्च'—(५।४।१५३) इति समासान्तः कप्] विचार्यताम्' अन्विष्यताम् 'आपन्नसत्त्वा' गर्भिणी [**'आपन्नसत्वा** स्यात् गुर्विण्यन्तर्वत्नी च **गर्भिणी'** इत्यमरः)।

218n.—1. देवः—Read (156n, Remark). **पत्रहस्तां** &c.—Unlike the meeting between the king *Agnimitra* and the queen *Irāvatī* in *Māla. III.* or that between *Pururavas* and the queen *Auśinarī* in *Vik. III* on similar occasion, our poet very skilfully avoids the introduction of वसुमती (an उपनायिका) in such a critical state, as her presence would surely have created a conjugal misunderstanding [perhaps followed by मान and मानभञ्जन] and thus made the whole situation quite unpleasant. Besides the scene would have taken a different shape and the poet's purpose of the *introduction of Sānumatī* would have been frustrated. For we have not as yet known from her mouth that *Śak. has given birth to a child* and that the *gods are anxious* for the speedy reunion of the pair [इति खलु दीपे व्यवधान-दोषेण एषः अन्धकार-दोषमनुभवति। * * * देवा एव तथा अनुष्ठास्यन्ति यथा अचिरेण धर्मपत्नीं भर्ता अभिनन्दिष्यति]—*Infra*. **2. अर्थ-जातस्य** &c.–Heaps of revenues have been received from various collectors-in-charge, and much time has been spent to-day in calculation and audit. So the minister has not been able to investigate all the cases. **प्रत्यवेक्षि-**

-सम् (B) is preferable to ('अपेक्षितम्'), as the king had already used this expression. *Cf.* 'वेत्रवति यत् * * * प्रत्यवेक्षितम् पौरकार्यमार्येण' &c.—*Supra*. Besides 'अप+ईक्ष्' generally means **'to need', 'wait'**. *Cf.* "पादेन नापैक्षत सुन्दरीणाम्"'—*Ku. III.* 26; 'अपेक्षते प्रत्ययमुत्तमं त्वां'—*III.* 18; 'न हि भावस्खलितानि अपेक्षते'—*Vik. IV.* 12; 'ईदृश: अनुराग: अभिज्ञानमपेक्षते'—*Supra* **3. सार्थवाहो**—The foreman of a guild that leads a carvan. The epithets **'समुद्र-व्यवहारी'** and **'नौ-व्यसने'** conclusively prove the existence of **ships in ancient India,** and also the prevailing practice of *trading in foreign lands with sea-going vessels.* In ṚV, भुज्यु, son of king तुग्र, was sent to fight against a certain king at a distant island (1. III. 3). The ship was broken to pieces by the waves. Then the God Aśvinas sent a **big ship with 100 oars** for their rescue. The island must be at a great distance. For the Divine Car of अश्विनs with **100 wheels,** took **3 days and 3 nights** to go there. (1. 4. 83). Also Vide 4. 55. 6; 7.88.2—(**Pleasure trip**). The curious are referred to *Dr. Mukherjee's "Shipping and maritime activities in ancient India"* and *Rao-Bahadur G. V. Joshi's* article on *'Shipping in Ancient India'*, published in the *Modern Review, February* 1908. **किल**—It is reported. **तपस्वी**—(126*n*, 6). **4. राज-गामी**—Note the *gradual development* of the Law of Inheritance. According to *Manu,* in case of failure of issue, the property of one other than a Brāhmaṇa will **revert to the State and not to the widow.** Read "अहार्यं ब्राह्मणद्रव्यं राज्ञा नित्यमिति स्थिति: । इतरेषांतु वर्णानां सर्वाभावे हरेन्नृप:"—*MS. IX.* 189. **'Āpasta-mba'** also does not recognize widow as heir. **'Nārada'** makes provision for her maintenance. **'Bṛhaspati'** (1st century A. D.) seems to admit her right for the *first time.* Now at the time of Kāli, **the widow of a deceased person could not inherit his estate. The prevalance of** this practice places Kāli. in a *very* **antique period** when this sort of 'law of inheritance' of *'Manu'*, *'Āpastamba'*, *'Bohhāyana'* were not **remodelled** by *'Viṣṇu'*, *'Śaṅkha'*, *'Likhita'*, *'Vṛhaspati'* (1st century A.D.) and other later Law-givers. Read :—"अपुत्र-धनं पत्न्यभिगामि" । तदभावे मातृ-गामि, तदभावे भ्रातृ-गामि, तदभावे भ्रातृ-पुत्र-गामि, तदभावे सकुल्य-गामि, तदभावे बन्धु-गामि, तदभावे शिष्य-गामि, तदभावे सहाध्यायि-गामि, तदभाव ब्राह्मण-धन-वर्जं राज-गामि"—इति दायभाग-ग्रन्थ-धृत विष्णु-वचनम् । "यस्य नोपरतस्

भार्या देहार्थं तस्य जीवति । जीवत्यर्धशरीरे तु **कथमन्यः स्वमाप्नुयात् ।।** सकुल्यै विद्यमानस्तु पितृ-मातृ-सनाभिभिः । अपुत्रस्य प्रमीतस्य **पत्नी तद्भागहारिणी"**—
—*Bṛhaspati.* "येऽपुत्राः क्षत्र-विट्-शूद्राः पत्नी-भ्रातृ-विवर्जिताः । तेषां धनं हरेद्राजा सर्वस्या-धिपतिर्हि सः"—*Ibid. Also KB on MS. IX.*187;*Kalpa. P.* 422. It will be interesting to note that Dr. Keith and his, supporters of the **Gupta Theory** could not produce even a solitary instance to prove that the property of a sonless person after his death, **reverts to the State** and that his **widow** while alive is **debarred from inheriting his property,** during the **Gupta period.** This is another very important point in fixing the *date of Kālidāsa.* **5. अर्थ-संचयः**—Plenty of wealth–सम् + चि + अच् भावे ['एरच्' ३।३।५६] = सञ्चयः—Abundance "चयः समूहे प्राकारमूलबन्धे समाहृतौ"—*Medinī.* As here the sense of **'उपसमाधान'** *i.e.* **'Making heaps'** [*Cf.*. "उपसमाधानम् उपर्यधोभागेन **राशी-करणम्"**— **Prabhā.**] is **absent,** so 'घञ्' by "निवास-चिति-शरीरो-पसमाधानेष्वादेश्च कः" (3. 3. 41), is barred and 'च' is also not changed into **'क'** । Read "राशीकरणम् उपसमाधानम् । एतेषु अर्थेषु चिनोतेः घञ् प्रत्ययो भवति । धातो रादेश्च **ककारः** आदेशः । एतेषु इति किम् ? चयः । इह कस्मान्नभवति महान् **काष्ठ-निचयः । बहुत्वमत्र विवक्षितम् । न उपसमाधानम्"—VM.** **6. आपन्न-सत्त्वा**==आपन्नः सत्त्वः (**जन्तुः**) अनया अस्यां वा (वहु)—*BhD.* Or say, 'आपन्ना सत्त्वम्' इति 'आपन्नसत्त्वा' by "प्राप्तापन्ने च द्वितीयया" —715. 'परवल्लिङ्गं द्वन्द्व-तत्पुरुषयोः"—(2. 4. 36) is barred by *Vārt.* "द्विगु-प्राप्ताऽऽपन्नाऽलम्पूर्व-गति-समासेषु प्रतिषेधो वाच्यः"—812. Read· "—प्राप्त, आपन्न, अलम्पूर्व, गतिसमास एतेषु परवल्लिङ्गस्य **प्रतिषेधो** वक्तव्य इत्यर्थः । * * "प्राप्त-जीविक इति । अत्र उत्तर-पदस्य **जीविका-शब्दस्य यल्लिङ्गं तत् समासस्य न भवति"—BM;** Also (124*n.* 7).

Remark :—It is obvious that the importance of the introduction of the story of Dhanamitra is only to put vividly to the notice of the king, the helplessness of a man, wanting in issue and also to make him keenly feel for his legally married wife who was pregnant but ruthlessly repudiated by him (*Śl.* 24 & & 25 *Infra*).

Text—प्रतीहारी—देव, दाणिं एव्व साकेदअस्स सेट्ठिणो दुहिआ णिव्वुत्त-पुंसवणा जाआ से सुणीअदि [देव, इदानीमेव साकेतकस्य श्रेष्ठिनो दुहिता निर्वृत्त-पुंसवना' जाया अस्य श्रूयते]

Portress—My Lord, it is reported that his wife, the daughter of a guild-merchant of Ayodhyā, has had her *'male-child-libation'* performed only recently.

राजा—स खलु [1]गर्भः पित्र्यं[3] रिक्थ[4]महंति । गच्छ । एवममात्यं ब्रूहि ।

King—Surely that unborn[1] child[2] (*Lit. fœtus*] is entitled to (*its*) paternal[3] assets[4]. Go (*and*) thus inform the minister.

प्रतीहारी—जं देवो आणवेदि [यद्देव आज्ञापयति] । (प्रस्थिता) ।

Portress—As My Liege commands. (*Starts to go*).

राजा—एहि तावत् । King—Just come back.

प्रतीहारी (प्रतिनिवृत्य)—इअम्हि [इयमस्मि] ।

Portress (*Turning back*)—Here am I.

राजा—किमनेन सन्ततिरस्ति नास्तीति ।

(श्लोक) येन येन वियुज्यन्ते प्रजाः स्निग्धेन बन्धुना ।
स स पापादृते तासां दुष्यन्त इति घुष्यताम्[5] ॥२३॥

King—Or, what matters whether there be issue or not.

Let it be publicly announced[5] that—of whatsoever loving kin the subjects are deprived, Duṣyanta will (*himself*) supply (*the place of*) that (*kin*), excepting the sinful. (23).

प्रतीहारी—एव्वं णाम घोसइदव्वं [एवं नाम घोषयितव्यम्] । (निष्क्रम्य । पुनः प्रविश्य) देव ! काले पवुट्टं विअ अहिणन्दिदं देवस्स सासणम् [काले प्रवृष्टमिव अभिनन्दितं देवस्य शासनम्[6]] ।

Portress—Thus, indeed shall it be proclaimed. (*Going out and entering again*)—Like timely shower, is hailed the royal proclamation[6] (*by the populace*).

राजा (दीर्घमुष्णञ्च निःश्वस्य)—एवं भोः सन्तति-विच्छेद-निरवलम्बना[7] [8]मूल-पुरुषा-वसाने सम्पदः परमुपतिष्ठन्ते । ममाप्यन्ते पुरुवंश-श्रिय एष वृत्तान्तः[9] ।

King (*Heaving a long and warm sigh*)—Alas ! thus do the fortunes of families, rendered[7] propless by the failure of progeny (lineal descendants)[7], pass over to a stranger, at the demise[8] of the representative of the original stock[8]. On my decease, too, the fortune of Puru's line will have (*quite*) a like[9] story.

V. L.—'साकेतकस्य'—M.V.S. 'साकेतस्य'—R. 'साकेतपुरस्य'—B.H. S. 'प्रतिनिवृत्य'—B. Omitted by others. After 'देवस्य शासनम्', B reads 'महाजनेन', while S has अमात्येन जनेन च' । '०विच्छेद-निरवलम्बना' —B. '०छेद-निरवलम्बानां कुलानां'—R. V. S. M.—'उपतिष्ठन्ते'—B.

Others have 'उपतिष्ठन्ति'। '०श्रिय एष वृत्तान्तः'—B.S. '०श्रीरकाले इवोप्तबीज भूरेवंवृत्ता'—R.V.M.

प्रतीहारीति। 'साकेते' **अयोध्यायां जात** इति 'साकेतकः' [**'साकेतः स्यादयोध्यायां कोसला-नन्दिनी च सा'** इति यादवः। 'धूमादित्वात्' (४।२।१२७) वुञ्] तस्य। 'श्रेष्ठिनः' कुलिकस्य **वणिज** इति यावत् ['कुलिकन्तु कुली श्रेष्ठी कुलश्रेष्ठिनि शिल्पिनाम्' इति जटाधरः। 'शेठ्' इति भाषा)। 'निर्वृत्तं' सम्पादितं 'पुंसवनं' गर्भोत्पत्त्यवधि - तृतीय - मास - **कर्तव्य-पुंसन्तान-सम्पादक-संस्कार-विशेषः** यस्याः तादृशी। **राजेति**। 'पित्र्यं' पितुरागतं पैत्रिक मित्यर्थः ['पितुः यच्च'–(४।३।७९) इति यत्।] 'रिच्यते' पुत्राद्यर्थं पित्रादिभिः त्यज्यते यत् तत् 'रिक्थम्' धनम् ["रिक्थम् ऋक्थं धनं वसु" इत्यमरः]। 'गर्भः' अर्थात् गर्भस्थः सन्तानः। अर्हति लब्धु योग्यः भवति, न तु नृपतिरित्यर्थः। **येनेति**।। 'प्रजाः' जनाः मदीयाः प्रकृतयः इत्यर्थः। [**"प्रजा तु जन-पुत्रयोः"** इति वैजयन्ती] 'येन येन स्निग्धेन' स्नेहवता 'बन्धूना' पुत्रादिना स्वजनेन (सगोत्र-बान्धव-ज्ञाति-बन्धु-स्व-स्वजना समा' इत्यमरः।। सहार्थे तृतीया। यद्वा अनुक्ते कर्तरि तृतीया, 'वियुज्यन्ते इत्यस्य कर्तृपदम्') 'वियुज्यन्ते' विच्छेद्यन्ते नियतिवशात् विरहिणो भवन्ति इत्यर्थः। **'पापात् ऋते' पापिनं विना** पाप-शब्दः विशेष्य-निघ्नः। [**'नृशंसः** धातुकः क्रूरः पाप' इत्यमरः। अर्श आदित्वात्-(५।२।१२७)-मत्वर्थे अच्]। ये ये बान्धवा दुराचारा म्रियन्ते तान् वर्जयित्वा इति भावः। 'दुष्यन्तः तासां' सद्बन्धु-विरहित-प्रजानाम् ("सर्वत्राघोपहतात् पितेवानुगृह्णीयात्" इत्युक्तेः) 'स स' तत्तद्बन्धु-स्थानीय. भविष्यति 'इति' पूर्वोक्तं वाक्यं 'घुष्यताम्' उच्चैः राज्यमध्ये प्रचार्यताम्। पुत्रादि-बान्धव-वियोगात् ये ये निराश्रया भवन्ति दुष्यन्तस्तेषां सर्वेषां तत्तत्बन्धु-स्थानीयो-भूत्वा तेषामाश्रय-स्वरूपः भविष्यति। किन्तु मृतः स बान्धवश्चेत् दुराचारः स्यात्, दुष्यन्तः तस्य पापिनः स्थानीयो न भविष्यति इति हृदयम्। (अनेन **'साहाय्य'**-नामा नाट्यालङ्कार उपक्षिप्तः। **"साहाय्यं** सङ्कटे यत् स्यात् आनुकूल्यं परस्य च" इति दर्पण-लक्षणात्। **छेक-वृत्त्यनुप्रासौ। श्लोकोवृत्तम्**) ।।२३।। **प्रतीहारीति**। 'नाम' इत्यभ्युपगमे। 'काले' योग्यवेलायाम्। 'प्रवृष्टं' शोभनं वर्षणम् (वर्षतेः भावे क्तः)। **राजेति**। 'उष्णम्' इति **विशेषणं प्रक्षिप्तं मन्यामहे**। एवंविधस्याऽभिनयस्य असंभाव्यत्वात्। 'भोः' इति विषादे ("**भोस्तु** संबोधन-**विषादयोः**" इति मेदिनी।। 'सन्तत्याः' अपत्यस्य 'विच्छेदेन' लोपेन 'निः' शेषितम् आश्रयः यस्याः तादृशः 'सम्पदः' धनसम्पत्तयः 'मूल-पुरुषस्य' वंशधरस्य चरम-पुरुषस्य 'अवसाने' मृत्यौ 'एवम्' अनया रीत्या धनमित्रवदित्यर्थः। 'परं' तत्-कुलाऽनुत्पन्नं परकीयं पुरुषम् 'उपतिष्ठन्ते' संगच्छन्ते ["उपाद्देवपूजा-सङ्गतिकरण-मित्रकरण-पथिषु इति वक्तव्यम्"—(२।३।२५)–इति वार्तिकोक्तेः **सङ्गति-**

करणार्थे तह। 'उपतिष्ठन्ति' इत्यपपाठः) । अनपत्यस्य 'ममापि' दुष्यन्तस्य 'अन्ते' मृत्यौ 'पुरुवंश-श्रियः' मत्कुल-संपदः 'एष वृत्तान्तः' ईदृश एव प्रकारो भविष्यति अर्थात् धनमित्रवत् ममापि सम्पत् अपरं कञ्चित् आश्रयिष्यति ["**वृत्ता-न्तस्तु** प्रकरणे कार्त्स्न्ये वार्ता-प्रकारयोः" इति हैमः] ।

219n.—1. साकेतकस्य—साकेते जातः इति साकेत+वुञ् ['धुमादिभ्यश्च (4. 2. 127); वु=अक (7. 1. 1.)]=साकेतकः–An inhabitant of साकेत । "**साकेते वसतीति साकेतकः**'–(A) is **चिन्त्यः** । 'साकेत' is included in the धूमादि–list.'साकेत' is the name of Ayodhyā, given by the **Buddhists** and it is often met with in the Buddhistic Literatures. The **absence of 'साकेत' in the Rām,** according to *Dr. Jacobi is* a **conclusive proof** of its priority to **Buddha.** It is **masculine** according to 'यादव' (*Com.*) but **neuter,** according to 'शब्दरत्नावली' । Kāli. elsewhere has used this word.' साकेतो-पवनमुदारमध्युवास'—*Ra. XIII.* 79; *XIV.* 13; *V.* 31; *XVIII.* 36. **श्रेष्ठी**—'The head of **a** guild or corporation practising the same trade'—*M.* **2. निर्वृत्त-पुंसवना**—पुंसवनम् is the **second** of the 12 purificatory ceremonies and is performed on a woman's *manifesting unmistakable* sign *of pregnancy,* for the birth of a male child. Read "मासि द्वितीये तृतीये वा पुंसवनं यदा पुंसा नक्षत्रेण चन्द्रमा युक्तः स्यात्"—**Parāśara.** 'व्यक्ते गर्भे तृतीये तु मासे पुंसवनं भवेत् । गर्भेऽव्यक्ते तृतीये चेच्चतुर्थमासि वा भवेत्"—**Śaunaka.** "तृतीयस्य गर्भमासस्य आदिम-देशे पुंसवनस्य कालः"—**Gobhila. 3. गर्भे** &c.—गर्भ=Foetus. **रिक्थम्**—Wealth. ['A child who is in the mother's womb at the time of the death of his father is, in contemplation of law, actually existing and will on his birth, divest the estate of any person, with a title inferior to his own, who has taken it in the meantime']–**Mayne's Hindu Law.** Read also "ये जाता येऽप्यजाता वा **ये च गर्भे व्यवस्थिताः ।** वृत्ति तेऽपि हि काङ्क्षन्ति वृत्तिलोपः विगर्हितः"—**Bhṛgu.** "उत्पत्त्यैवार्थं स्वामित्वात् लभेत इत्याचार्या मन्यन्ते"—*Gautama,* **4. पापावृते**—Here पाप' is an *adjective* (*Com.*) and is equivalent to a—'*Sinner*' (पापी)–'a wicked person'. The idea is :—(1) Duṣyanta will not fill up the place of that dead man who in his living time was a **sinner;** consequently when a man loses such a friend, naturally he does not deserve king's protection. (2) According to *M,* the king will

not be a loving friend to a person who is living and is **himself a sinner,** even if he undergoes any bereavement. (3) According to *R*, it means—'**Excepting sin**' (*i. e. sinful act*). Or, in other words the king will fill up that place of the deceased person, provided there is no sin in doing so, as there would be **in his becoming a husband to a widow.**—"**पापादृते । स्त्रीणांभर्तृत्वेन विना इत्यर्थः**"—*R*. But this explanation may be objected to, because of the specific use of the word '**बन्धुना**',—thus Duṣyanta will perform the **duties of** a **friend** only. *Cf.* "त्वयि तु परिसमाप्तं **बन्धुकृत्यं** प्रजानाम्"—Act. *V*. 8. Infra. *Cf.* 'द्वेष्योऽपि सम्मतश्शिष्ट स्तस्यार्तस्य यथौषधम् । त्याज्योऽदुष्टः प्रियोऽप्यासी दङ्गुलीवोरग-क्षता—Ra. I. 28; "अतनुषु विभवेषु * * त्वयि तु परिसमाप्तं **बन्धुकृत्यं** प्रजानाम्"—*V*. 8. Supra. **5. घुष्यताम्**—घुषिर्-विशब्दे इति कविकल्पद्रुमः—To cry or proclaim aloud, declare publicly. विशब्द इह कथनम् आविष्करणं नाना-शब्दकरणं वा । इति तट्टीका । It is' चुरादि' but **णिच्** is *optional*, hence it is 'भ्वादि' also. Read "घुषिर विशब्दने । **घोषयति** । 'घुषिर् अ-विशब्दने' (७।२।२३, २०६३) इति सूत्रे 'अ-विशब्दने' इति निषेधाल्लिङ्गाद् **अनित्योऽस्य** णिच् । **घोषति**"—*SK*. 2571. "घोपयतु मन्मथ-निदेशम्"—*GG* ["नावद्यं **घोषति** द्वारि यस्य कश्चिदुपद्रवम् । **घोषयन्ति** पुनः सर्वे दीर्घमायुर्यदाश्रिताः" ।।—KR. 141]. **6. मूल-पुरुषः**—"The man who represents the original progenitor from whom in a direct line the family is descended;" 'the oldest surviving son,' 'the stock-man'. **7. भोः**—Implies विषाद । '**उपतिष्ठन्ति** (R)—seems to be grammatically inaccurate (*Com.*). **एष वृत्तान्तः** = ईदृक् प्रकारः (*Com.*) *M's* "अकाल इवोप्तवीजा &c." is **rejected,** as the simile is quite **defective;** besides there is no reason why a land where seeds have been sown *untimely* should go to another's hand.

Text—प्रतीहारी—पडिहदं अमङ्गलं [प्रतिहतममङ्गलम्] ।
Portress—The misfortune be averted.

राजा—धिङ्‌ मामुपनत-श्रेयोऽवमानिनम् ।

King—Fie on me, who scorned a blessing arrived

सानुमती—असंसअं पिअसहिं एव्व हिअए करिअ णिन्दिदो णेण अप्पा [अशंसयं प्रियसखीमेव हृदये कृत्वा निन्दितः अनेन आत्मा] ।

Śānumatī—Undoubtedly having (*my*) dear friend alone in (*his*) mind, he censures himself.

राजा— संरोपितेऽप्यात्मनि धर्म-पत्नी
उपजाति त्यक्ता मया नाम कुल-प्रतिष्ठा[2]।
[ततजगग [1]कल्पिष्यमाणा महते फलाय
जतजगग वसुन्धरा काल इवोप्त-बीजा[4] ॥२४॥

King—Although (*my*) own self was implanted (*in her womb*), the lawful wife (*of mine*), the support[2] of (*my*) family, was foolishly [1]disavowed by me, like plot of a land, sown[4] with seed at the right [1]season (*and*) promising[3] a magnificent harvest. (24).

सानुमती—अपरिच्चत्ता दाणिं दे भविस्सदि [अपरित्यक्ता इदानी ते भविष्यति] ।

Sānumatī—(*She, the support of your family*) will not be (*long*) forsaken.

चतुरिका (जनान्तिकम्)—**अए, इमिणा सत्थ-वाह-वुत्तन्तेण विउणुव्वेओ भट्टा । णं अस्सासिदुं मेहप्पडिच्छन्दादो अज्जं माहव्वं गेण्हिअ आअच्छेहि**

[अये, अनेन स्वार्थ-वाह-वृत्तान्तेन द्विगुणोद्वेगो भर्ता । एनमाश्वासयितुं मेघप्रतिच्छन्दात् आर्यं माधव्यं गृहीत्वा आगच्छ] ।

Caturikā (*Aside to the Portress*)—Ah (*our*) lord has (*his*) remorse doubled by this story of the head of the merchant-guild. Go to the 'Cloud Balcony' (*and*) bring honourable Mādhavya to comfort him.

प्रतीहारी—सुट्ठु भणासि [सुष्ठु भणसि] । (निष्क्रान्ता) ।

Portress—Right well (*you*) say. (*Exit*).

V. L.—'उपनत'—B. उपस्थित'—R. M. S. 'अपरित्यक्ता'—B. P. HS. 'अपरिच्छिन्ना * * सन्तति'—R.V.M.S. 'द्विगुणोद्वेगो'—R. V. B. 'विगुणोद्वेगो—M. 'द्विगुणिता-नु शयो'—S. For 'आगच्छ'—S has 'आगच्छामि । इति निष्क्रान्ता चतुरिका' । 'आगच्छामि'—R.

प्रतीहारीति । 'अमङ्गलं' भवदाशङ्कितं स्वाऽपत्य-विच्छेद-रूपम् 'प्रतिहतं' दूरीकृतं भवतु इति शेषः । **राजेति** । 'उपनत' स्वयमेव आगतं 'श्रेयः' सगर्भ-द्वार-रूपम् । **संरोपित इति** । 'काले' योग्य-समये 'उप्तं' (६।१।१५) रोपितं 'बीजम्' एकत्र अङ्कुर-कारणम् (अन्यत्र शुक्रम् । 'बीजं तु **रेतसि** । स्यादाधाने च तत्त्वे च हेतावङ्कुरकारणे" इति हैमः) यस्यां तथोक्ता । अस्मादेव हेतोः 'महते' एकत्र भूरिणे [अन्यत्र पराक्रमशालिने] 'फलाय' एकत्र सस्याय [अन्यत्र पुत्र-रूप फलाय । "क्लृपि संपद्यमाने च"—इति ४र्थी] 'कल्पिष्यमाणा' प्रभविष्यन्ती 'वसुन्धरा' पृथिवी ['संज्ञायां भृतृवृजि—' (३।२।४६) इति खच् । 'खचि ह्रस्वः'

(६४।९४) इति णिजन्त-धातोः उपधाया ह्रस्वत्वम्। खित्वात् मुमागमः (६।३।६७)] 'इव कुलस्य' मद्वंशस्य 'प्रतिष्ठा' स्थितिहेतुः [एतत् तु तृतीयाङ्के सप्तदश-श्लोके उक्तम्। "प्रतिष्ठा गौरवे स्थितौ" इति हेमः] धर्मस्य पत्नी'—(४।१।३३) (**अश्व-घासादिवत् तादर्थ्ये षष्ठी-समासः**] वंश-रक्षक-सन्तान-धारणात् आश्रय-स्वरूपा शकुन्तला इत्यर्थः। 'आत्मनि संरोपितेऽपि' तस्यां गर्भरूपेण स्वात्मनि स्थापितेऽपि [तथाचोक्तं भारते—"आत्माऽऽत्मनैव जनितः पुत्र इत्युच्यते बुधैः" इति] 'मया त्यक्ता' अवधीरिता। 'नाम' इति कुत्सने। अतएव 'मां धिक्' इत्यभिप्रायः। [**उपमा। काव्यलिङ्ग** ञ्च। **श्रुत्यनुप्रासः। उपजातिर्वृत्तम्**) ।।२४।। **सानुमतीति।** 'इदानीं मेनका-प्रेषितया मया साक्षात् दुष्यन्ताऽवस्था-दर्शनात् अनन्तरं प्राक् प्रत्याख्याता कुल-प्रतिष्ठा शकुन्तला 'न परित्यक्ता' अर्थात् पुनः प्राप्ता भविष्यति। मया यज्ञ-भागोत्सुक-देवैश्च तथा अनुष्ठास्यते। पाठान्तरपक्षे 'अपरिच्छिन्ना' विनाश-रहिता इति यावत् 'ते' तव दुष्यन्तस्य 'सन्ततिः वंश-प्रवाहः 'भविष्यति' सर्वदमनस्य जातत्वात् इति व्याख्येयम्। **चतुरिकेति।** 'द्वौ गुणौ' आवृत्ती यस्य ['**गुणस्तु आवृत्ति**-शब्दादि-ज्ये-न्द्रियाऽमुख्य-तन्तुषु' इति वैजयन्ती] स 'द्विगुणः' निरतिशयः इत्यर्थः, तादृशः 'उद्वेगः' मानसी व्यथा यस्य तथाभूतः।

220n.—1. आत्मनि संरोपिते &c.—The Hindu notion is this that the son is nothing but the husband himself born in his consort, and hence a wife is called "**जाया**" (**जायते अस्याम्**'—*BhD.*) 'पतिर्जायां संप्रविश्य गर्भोभूत्वेह जायते। जायायास्तद्धि जायात्वं यदस्यां जायते पुनः"—*MS. IX.* 8 "आत्मा प्रविश्य जायायां पुत्ररूपेण जायते"—*Qtd. A.* "आत्मा वै पुत्रनामासि"—*Qtd. KB.* "अङ्गादङ्गात् संभवसि हृदयादधि-जायसे। आत्मा वै पुत्रनामासि स जीवः शरदः शतम्"—*Qtd.K.* (*Mahā. Ādi.*) The idea is:—I have not only disavowed (**त्यक्ता**) my legally married wife which was a heinous crime but that was again foolishly (**नाम**) aggravated on account of the fact that even then she was bearing my seed in her womb (**आत्मनि संरोपिते**) and as such was the only means of the continuity of my clan (**कुल-प्रतिष्ठा**)। Now see (*n.* 4). **2. कल्पिष्यमाणा**—The root क्लृप् (८।२।१८) has the sense of '*to be fit or adequate for*', '*result in*', '*tend to*'. Cf. '**कल्पसे** रक्षणाय'—*Śak. V.* 5. '**कल्पते** विश्रमाय'—*Vik. III.* 1. 'विभावरी यद्यरुणाय **कल्पते**'—*Ku. V.* 44; *V.* 79; *VI.* 29; 'फलाय **कल्पते**'—*Ra. VIII.* 40; *V.* 13; *PA& MD.* 55; *MS. II.* 151; *II.* 266; *BK. XXII.* 21.

[Read also "योऽर्थिनाम् ईप्सितप्राप्त्यै कल्पते कल्पवृक्षवत् । न कल्पयति मिथ्यार्थं शिरः कल्पति विद्विषाम्" ।।—*KR*.. 83] **3. महते फलाय** &c.—For somewhat similar idea Cf. "तेनोरुवीर्येण पिता प्रजायै कल्पिष्यमानेन ननन्द यूना । सुवृष्टियोगादिव जीवलोकः सस्येन संपत्ति-फलोन्मुखेन" ।।—*Ra. XVIII*. 2. "तं भावार्थं प्रसव-समयाऽऽकाङ्क्षिणीनां प्रजानाम् । अन्तर्गूढं क्षितिरिव नभोवीजमुष्टिं दधाना" ।।—*XIX*. 57. **कालोप्तबीजा**—Cf. **'काले वर्षं देव-मिवोप्तबीजम्'**-*Mahā*. (*Karṇa*. 67) **4. अपरित्यक्ता** &c.—The king is sad because he has forsaken (त्यक्ता) his कुलप्रतिष्ठा (III. 17). But Sānumatī is aware of the fact that the gods are making arrangements for the union of Śak. with Duṣyanta very soon. Hence she will not be long forsaken—(Ryder). With **अपरिच्छिन्ना** &c.—'Hence-forth your progeny will not be without a break', because Sānumatī is aware of the birth of सर्वदमन ।

Text :—राजा—अहो ! दुष्यन्तस्य 'संशयमाऽऽरूढाः पिण्ड-भाजः । कुतः—

अस्मात् परं बत यथाश्रुति[2] सम्भृतानि[3]
वसन्ततिलका   **को नः कुले निवपनानि[4] करिष्यतीति ।**
[तभजजगग]   **नूनं प्रसूति-विकलेन[5] मया प्रसिक्तं**
धौताऽश्रु-शेषमुदकं पितरः पिबन्ति ।।२५।।
।। (मोहमुपगतः) ।।

King—Oh ! Duṣyanta's oblation-eaters (*i.e. manes*) have [1]come to be under apprehension[1]. For—'Who, alas ! after this (*man*) in our family, will offer[4] (*us*) oblations[4] prepared[3] after [2]the Vedic[2] (*precept*)'?—Thus thinking assuredly (*my*) manes drink such of the waters offered by me, destitute[5] of progeny[5], as remains after washing (*their*) tears. (*This said, he swoons*). (25)

चतुरिका (ससम्भ्रममवलम्ब्य)—समस्ससदु, समस्ससदु भट्टा ।
(समाश्वसितु समाश्वसितु भर्ता)

Caturikā (*Hastily supporting him*)—Be reassured, My Liege, be reassured.

सानुमती—हद्धी ! हद्धी ! सदि क्खु दीवे ववधाण-दोसेण एसो अन्धआर-दोसं अणुहोदि । अहं दाणि एव्व णिव्वुदं करेमि । अहवा सुदं मए सउन्दलं समस्सासअन्तीए महेन्द-जणणीए मुहादो जण्ण-भाअ-समुस्सआ देवा एव्व तह अणुचिट्ठि--स्सन्ति जह अइरेण धम्म-पत्तिणिं भट्टा अहिणन्दिस्सदि त्ति । ता जुत्तं एदं कालं पडिपालिदुं । जाव इमिणा वुत्तन्तेण पिअसहीं समस्सासेमि (हा धिक् ! हा धिक् । सति खलु दीपे व्यवधान-दोषेण एषः अन्धकार-दोषम्

अनुभवति । अहमिदानीमेव निर्वृतं करोमि । अथवा श्रुतं मया शकुन्तलां समा- -श्वासयन्त्या महेन्द्र-जनन्या मुखात् यज्ञ-भाग-समुत्सुका देवा एव तथा अनुष्ठा- स्यन्ति यथा अचिरेण धर्मपत्नीं भर्ता अभिनन्दिष्यति इति । तत् युक्तम् एतं कालं प्रतिपालयितुम्[२] । यावदनेन वृत्तान्तेन प्रियसखीं समाश्वासयामि) ।

। (इति उद्भ्रान्तकेन निष्क्रान्ता) ।

Sānumatī—Ah fie ! ah fie ! though (*the bright*) lamp is there, this (*man*) experiences (*all the*) ill-effects of darkness, by reason of intervention. I'll forthwith make him happy. Or rather, I have heard from the mouth of Indra's mother while she was consoling Śakuntalā, that eagerly longing for (*thier*) portions of sacrifices, the gods themselves will so devise that before long the husband will welcome (*his*) lawful wife. Therefore it is proper[1] to wait[2] for this period. In the interim (*I*) shall cheer my dear friend with this (*happy*) news. [*Exit with Udbhrāntaka dance*].

(नेपथ्ये)—**अब्बम्हणं, अब्बम्हणं** (अब्रह्मण्यम्, अब्रह्मण्यम्) ।

(*In the post scenium*) A Brāhmaṇa in danger ! A Brāhmaṇa in danger ! (*Help ! Help ! to the rescue—M.*)

राजा (प्रत्यागत-चेतनः । कर्णं दत्त्वा)—

अये ! माधव्यस्येव आर्त-स्वरः । कः कोऽत्र भोः ?

King (*Coming to his senses and leaning his ear*)—Hark ! (*It is*) like Mādhavya's cry of distress. Who, who is here, ho ?

(प्रविश्य) **प्रतीहारी** (ससम्भ्रमम्)—**परित्ताअदु देवो संसअ-गदं वअस्सं** [परि- त्रायतां देवः संशयगतं वयस्यम्] । (*Entering*) Protress (*Distractedly*)— Let My Liege save your friend who is jeopardized.

V. L.—B has 'संहितानि' for 'संभृतानि' । 'नियच्छति'—R. V. M. Dr. 'करिष्यति'—S.B.K.Śr. Dr. '०शेषम्'—R. V. M. S. '०सेकम्'—B 'अवलम्ब्य'—V. S. 'अवलोक्य'—M. R. Omitted by B. 'युक्तमेतं'—K. M. S. 'न युक्तं'—R. V. B. 'कालं प्रतिपालयितुम्'—K. M. R. V. 'मे अत्र विलम्बितुम्'—B.. 'कालं क्षन्तुम्'—S. 'प्रत्यागत-चेतनः'—B. 'प्रत्यागतप्राणः'— M. 'प्रत्यागतः—R.V.S; B. K. Śr. read 'अन्धकारम्' for' ०दोषम्'—

राजेति । 'अहो' इति विषादे ।' पिण्डं भजन्ते' ये ते 'पिण्ड-भाजः' पूर्वपुरुषा इत्यर्थः ['भजो ण्विः'–(३।२।६२)-इति कर्तरि ण्विः'] । **अस्मानिति** । 'कुले नः' अस्माकं वंशे ["**कुलं वंशे** सजातीये गणे च स्यान्निकेतने" इति केशवः] 'अस्मात्' दुष्यन्तात् 'परम्' अनन्तरं ["**संप्रति देश-काल-वृत्तिना योगेऽपि भवति" इति दीक्षितोक्तेः**-(५९५) पञ्चमी] 'बत' इति खेदे ["**बत खेदे**ऽनुकम्पायाम्' इत्यजयः]

'यथाश्रुति' वेदोक्त-विधानाऽनुसारेण 'संभृतानि' संगृहीतानि 'निवपनानि' पिण्ड-श्राद्ध-तर्पणादीनि पितृदानानि ["मृतमुद्दिश्य यत् दानं निवापः स प्रकीर्तितः' इति भरतः] कः करिष्यति' विधास्यति, न कोऽपि इत्याशयः । 'इति' चिन्तयित्वा 'पितरः' मदीय-पूर्वपुरुषाः 'प्रसूत्या' तनयेन ['प्रसूतिस्तनयोत्पत्त्योः तथा दुहितरि स्मृता' इति विश्वः] 'विकलः' रहितः तादृशेन अपुत्रकेण 'मया कर्त्रा 'प्रसिक्तम्' अर्पितम् 'उदकं' तर्पण-सलिलं नूनं' निश्चितमेव' धौतानि' क्षालितानि [धावु मार्जने इत्यस्मात् क्तः–(६।४।१९)] 'अश्रूणि' येन करणभूतेण तत् 'धौताश्रु' च तत् 'शेषं' च 'धौताश्रुशेषः' यद्वा 'धौताश्रुणः' शेषम् अवशिष्टं यथा तथा 'पिबन्ति' [इति क्रियोत्प्रेक्षालङ्कारः । काव्यलिङ्गानुप्रासाः । "इति शब्दात् परं 'चिन्तयित्वा' इत्यनभिधानेऽपि न न्यून-पदता-दोषः, वक्तुर्विषाद-मग्नत्वात् । "उक्ता वानन्द-मग्नादेः स्यात् न्यून-पदता-गुणः" इति साहित्यदर्पणात्"—इति सिद्धान्त-वागीशपादाः । "राजा—दीर्घमुष्णञ्च निःश्वस्य" इत्यादिना एतदन्देन छलनं नामाङ्गमुपक्षिप्तम् । तल्लक्षणं यथा—"आत्मावसादनं यत्तु छलनं तदुदाहृतम्" इति । दर्पणकार-मते छादनमस्य नामान्तरम् । "राजा—संरोपिते" इत्यादिना "मोहमुपागतः" इत्यन्तेन 'मूर्च्छना' नाम कामदशा उक्ता । वसन्ततिलका वृत्तम्] । ।।२५।। सानुमतीति । 'दीपे' कुल-दीपके शकुन्तला-तनये 'सति अपि व्यव-धान-दोषेण' बहुभिः जनपदैः व्यवधानरूपः दोषः तेन । [इति हेतौ ३य ।] अज्ञान-वशात् निरपत्यता-जनितं दुःखम् अनुभवति । यथा कस्मिंश्चित् दीपे सत्यपि तस्य व्यवधान-दोषेण जनः अन्धकार-दोषमनुभवति तद्वत् तनये सर्वदमने सत्यपि देशान्तर-स्थितत्वेन अज्ञतावशात् अयं जनः अधुना निरपत्यता-जनितं महोद्वेगम् अनुभवति । ["सत्यामपि शकुन्तलायां तददर्शने प्रस्तुते साम्याद्दीप-कस्याऽप्रस्तुतस्य वचनाद् अप्रस्तुतप्रशंसा"—इति राघवपादाः । अन्ये तु असम्भव-द्वस्तुसम्बन्ध-निदर्शनालङ्कारः इत्याहुः) । 'निर्वृतं' सपुत्र-शकुन्तला-वृत्तान्त-ज्ञापनेन सुखिनम् । 'अथवा' इत्याक्षेपे । 'यज्ञानां' मत्प्रजा-विहितानां यागानां ये 'भागाः' तेषु समुत्सुकाः' भृशं व्यग्राः ।। अत्रायमेव आशयः ।। यानि यजनानि देवार्थानि प्रजाभिः सम्पादितानि तानि सर्वाणि ममानवधानतया कालनेमि-प्रभृतीनां दुर्जयेन दानवगणेन अपहृतानि । अनेन देवानां यज्ञभागग्रहणे असामर्थ्यम् । अतएव दानव-वधार्थं दुष्यन्तेन प्रयोजनम् । 'अभिनन्दिष्यति' । सादरं परिग्रहीष्यति । 'महेन्द्र-जनन्याः' कश्यप-दयितायाः अदितेः । 'एतं कालं' यावता अयं इन्द्रेण आहूतः सन् काश्यपाश्रमे शकुन्तलया मिलितः भवति तावत् 'प्रतिपाल-यितुम्' विलम्बं कर्तुम् । 'यावत्' इत्यवधौ । 'उद्भ्रान्तकेन' नृत्य-विशेषेण, बाहु-मुद्यम्य मण्डलाकार-खड्गभ्रमणेन (इति महाभारतम् । कल्पद्रुमे ११४ पृष्ठे) ।-['श्रुतमित्यादिना वक्ष्यमाण-मातलि-प्रवेशः सूचितः । अनेनाऽऽधान-नामाङ्ग-

मुपक्षिप्तम्। तल्लक्षणं तु—"बीजकार्योपगमनम् **आदानमिति संज्ञितम्**"। भर्ता शकुन्तलाम् अभिनन्दिष्यतीति बीजकार्योपगमनम्]। **नेपथ्य इति**। ['अब्रह्मण्यम् अवध्योक्तौ' इत्यमरः। तत्र भानुजिः—वधं नार्हति इत्युक्तौ। ब्रह्मणि साधु [ब्रह्मण्यम्]। "तत्र साधुः"-(४।४।९८)-इति यत्। "**ब्रह्मण्यं** स्याद् **ब्रह्मसाधु** ब्रह्मदारुशनैश्चरे"। ततो नञ् समासः-२।२।६) अवध्योऽपि ब्राह्मणोऽहं कैश्चित् हन्ये। शीघ्रं त्रायस्व इति आपन्नस्य आक्रोशः। संभ्रमे द्विरुक्तिः। अनेन **भय-नाम** संध्यन्तराङ्गमुपक्षिप्तम्। तल्लक्षणं तु—"**भयं** त्वाकस्मिक स्त्रासः"]।

221n.—1. संशयमारूढा &c.—My manes have become dubious regarding th^ir future food. **पिण्ड-भाजः**—Technically refers to **'पिता'**, **'पितामह'** and **'प्रपितामह'**, whereas the term **'लेप-भाजः'** means three more ancestors beginning from **'वृद्ध-प्रपितामह'**। Read- "**लेप-भाजश्चतुर्थाद्याः** पित्राद्याः **पिण्डभागिनः**। पिण्डदः सप्तमस्तेषां सापिण्ड्यं सप्तपौरुषम्" इति शुद्धितत्व-धृत-मत्स्य-पुराण-वचनम्—*Kalpa. P.* 664 & 1668. Also Cf. 'पिता-पितामहश्चैव तथैव प्रपितामहः। **लेप-भाजश्चतुर्थाद्याः** सापिण्ड्यं सप्तपौरुषम्"॥ *Qtd.*—हारलता। **2. निवपनानि**—Funeral obsequies, that is, offerings of water &c. offered for the satisfaction of the manes at the **श्राद्ध** ceremony. The word is from the root **'वप्'** ("**to shave**") referring to the **shaving of the hair before the commencement of the funeral** ceremonies to be performed by a descendant to his ancestors. "पित्र्युद्देशक-दानम्" —*Śabda-ratnāvali.* "**पितृ-दानं निवापः** स्यात्"—*AK; also* Com. Thus 'निवपनं नियच्छति' (M) with an **additional** "दा" Dhātu seems to be a **bit unidiomatic.** Cf. **'निर्वर्त्यते** यैः निवापाञ्जलयः पितृणाम्"—*Ra. V.* 8; "निर्वर्त्यते निष्पाद्यते"—*MN.* 'भर्तृ—लोक-प्रपन्नानां **निवापान् विदधः**'–*XV.* 91; 'विदधुः **चक्रुः**'–*MN.* **'अकरोत् स तदौर्ध्वदेहिकम्'**–*VIII.* 26. 'निवपन-क्रियां ** निर्वतस्यसि'—*PN.V.*5. But again observe **'गुरवे देयः निवापाञ्जलिः"**—*MR. IV.* 5; **'नियाप-वत्तिभिः'**—*Ra. VIII.* 87. **3. प्रसूति** &c.—प्र + सू + क्तिन् कर्मणि = प्रसूतिः—Son (*Com.*), तया विकलः। **'विकल'** at the end of a Compound means "**devoid** or **destitute of**".Cf. 'आरामाधिपतिः विवेक-**विकलः**'—*Bhāminī-vilāsa.* 1. 31; also *MK. V.* 41. For (सू.) read –("यस्य पृथ्वी **प्रसूतेऽर्थं,** धर्ममर्थः **प्रसूयते। प्रसौति** विजयं धर्मः स च **प्रसवति** श्रियम्"—*KR.* (26). **4. धौता-श्रु**

&c.—धाव् (गति-शुद्धयोः) + क्तः (3. I. 102) = धा + ऊट् + क्तः [By 'च्छ्वोः श्-ऊठ् अनुनासिके च'—(6. 4 19). 'व' = 'ऊ'] = धौतम्—Washed. Read "वकारस्य ऊठ् टकार इत् (१।३।३) ; "एतेधत्यू-ठ्सु" (६।१।८९ ; ७२) इति वृद्धिरिति भावः"—**BM.** Optionally "**धावित**" owing to **अनित्यत्व** of "यस्य विभाषा (7. 2. 15). Read"—नृती गात्रविक्षेपे इत्यत्र ईदित्करणं 'यस्य विभाषा' इत्यस्य **अनित्यत्व-ज्ञापनार्थम्।** तेन **धावितम्** इभराजधियेत्यादि सिध्यति"—*PM.* '**शेषम्**'—What is left after washing their tears (*Com.*) For a similar idea, Cf. "नूनं मत्तः परं वंश्याः पिण्ड-विच्छेद-दर्शिनः। न प्रकामभूजः श्राद्धे स्वधा-संग्रह-तत्पराः ॥" 'मत्परं दुर्लभं मत्वा नूनमावर्जितं मया। पयः पूर्वैः सनिश्वासैः कवोष्ण मुपभुज्यते'—*Ra. I.* 66, & 67. **5. पिबन्ति**—Cf. '**पिबन्ति** मधु पीयन्ते च प्रियाननम्। यत् प्रसादात् अविज्ञात-स्व-परोपद्रवाः प्रजाः ॥"—*KR.* 65. **6. मोहमुपगत** ·The king fell into a swoon as soon as he understood the real significance of Hindu-marriage. Before this (as will also be corroborated by Act. II.) he was all the while talking to Vidūṣaka about the physical beauty of his lady-love Śak. and all his pinings seemed to be only for material consideration. But a union of flesh cannot be permanent. In the wordings of *Rabindranāth it only adds to the number of Haṁsa-padikās* ('राजसभाय प्रवेश करिवा मात्र दुष्यन्त यदि तत्क्षणात् शकुन्तलाके ग्रहण करितेन, तबे शकुन्तला हंसपदीकार दलवृद्धि करिया ताहार अवरोधेर एक प्रान्ते स्थान पाइत"—*Saṅkalana. P.* 123.) This is why our poet by repentance and remorse thoroughly purges him of his earthly love and makes him conscious of the deeper meanings of विवाह, धर्मपत्नी and पुत्र। And he swooned aright as soon as he realized the fact that a Hindu wife was not merely for joy of this world, but it was a *sine qua non* for the clearance of his own paternal debts and also for the solace and happiness of his ancestors that had long departed to another world. He had never before viewed this in such a light; and consequently his ruthless repudiation of Śak. barring his ancestors from joys in the next world, aggravated but his mental throe and the shock thereof he was unable to bear. Thus his love for flesh is transformed, by the elimination of its sordid elements, into divine love and his purification is complete. And before long we shall be apprised of the entrance of Mātali with the celestial car of Indra for taking him to be united with Śak. in a

supramundane region—a fit place for blending of such souls. 7. **दीपे**—Light, also सर्वदमन । A son is compared to a light. 'सत्पुत्रः कुल-दीपकः'—*DP*. 'सुताभिधानं स ज्योतिः सद्यः शोकतमोपहम्'—*Ra. X.* 2. **व्यवधान**—By which intervention or obstruction to the view is caused, hence **secondarily 'distance or a screen or a cover'**–(*Ku. III.* 44]. A light covered by a screen or placed at a distance gives but darkness. Similarly the king, on account of his being at a very distant place, and also of his utter ignorance of his own son 'सर्वदमन', experiences despair only. "*Dr. Boethlink* proposes to interpret 'अन्धकार-दोषम्' by 'अन्धकार-दोषाम्'—*Dark night or the darkness of night*, but this seems hardly a legitimate compound, nor does the sense require it'—*M.* 8. **यज्ञ-भाग-समुत्सुकाः**—Owing to **slack administration** caused by the repentance of Śak.'s repudiation ['प्रकृतिभिर्न प्रत्यहं सेव्यते'—VI. 5; 'ममापि सत्त्वैरभिभूयन्ते गृहाः' । 'अहनि अहनि ज्ञातुं प्रमाद-स्खलितं न शक्यम्'—VI. 26], the oblations of the sacrifices performed by his subjects are **seized and carried** away by the vigilant demons, the offsprings of कालनेमि [अस्ति कालनेमि-प्रसूत-दानवगणः—*Infra*] so the gods were debarred from partaking of their shares. Hence they are anxious (उत्सुक) for the reunion of the king and Śak. For then and then only proper administration can be expected from the king. **For this practice of seizing 'यज्ञभाग' by the demons (even from heaven)**, has been already mentioned by our poet—'यज्वभिः सम्भृतं हव्यं विततेष्वध्वरेषु सः । जातवेदोमुखान्मायी मिषतामाच्छिनत्ति नः"—*KU. II.* 46. "यज्ञभागं स चाश्नाति विनिवर्त्य दिवौकसः—*Śiva Purāṇa*. 'दैवानां चैव यद्धव्यं पितृणां कव्यमेव च । त्रैलोक्यं चैव तत् सर्वं तारकाज्ञा-परायणम्'—*Ibid. Ch. IX.* "अचिरोत् यज्ज्वभिर्भागं कल्पितं विधिवत् पुनः । मायाविभिरनालीढमादास्यध्वे निशाचरैः" ।।—*Ra. X.* 45; *Ku. II.* 45. **मखांश-भाजाम्**—*Ra. III.* 44. 9. **उद्भ्रान्तकेन**—उद्भ्रान्त(क) is a particular kind of dance. 'पूर्वं दक्षिणमुत्थाप्य पश्चात् आकुञ्चयन् पदम् । वामं शीघ्रं भ्रमेत् वामावर्तकमुद्भ्रान्तकं विदुः'–*Sangita-sudhā-nidhi*. This dance is the outcome of **complete satisfaction** of सानुमती । 10. **अब्रह्मण्यम्**—A cry of rescue like Eng. "Help ! help !", "Murder ! murder ;" or "a horrible deed has been committed on a Brahmin whose life

is at stake". Cf. "अथैत्य योगनन्दस्य व्याड़िना क्रन्दितं पुर:। अब्रह्मण्य-मनुत्क्रान्तजीवो योगस्थितो द्विज:"—।। *Bṛhat Kathā.* 'अत्रान्तरे ब्राह्मणेन मृतपुत्रमारोप्य राजद्वारि अब्रह्मण्यम् उद्घोषितम्"—*UC. I.* **संशयगतं—** प्राण-सन्देहं प्राप्तम् i.e. Vidūṣaka's life is at risk (i.e. doubtful)— "विचिकित्सा तु संशय:"—A. Cf. 'अहमेव जीवित-संशय-निमित्तं जातास्मि ब्राह्मणस्य'—Māla. IV. 'जीवित-संशयात् मुक्त:'—Ibid. V.

Text :—राजा—केनाऽऽत्त-गन्धो[1] माणवक: ?

King—By whom that poor fellow (*has his*) pride humbled[1] (*i.e. placed in jeopardy*) ?

प्रतीहारी—अदिट्ठ-रूवेण केणवि सत्तेण अदिक्कमिअ मेह-प्पडिच्छन्दस्स पासादस्स अग्गभूमिं आरोविदो [अदृष्ट-रूपेण[2] केनापि [3]सत्त्वेनातिक्रम्य मेघ--प्रतिच्छन्दस्य प्रासादस्याग्रभूमिमारोपित:] ।

Portress—By some hobgoblin[3] of invisible[2] form[2],(*he*) has been seized (*and*) carried to the turrets of the **"Cloud-Balcony".**

राजा (सहसोत्थाय)—**मा तावत् । ममापि नाम सत्त्वैरभिभूयन्ते[4] गृहा:**
अथवा—

उपजाति [जतजगग ततजगग]

अहन्यहन्यात्मन एव तावत् ज्ञातुं प्रमाद-स्खलितं[5] न शक्यम् ।
प्रजासु क: केन पथा प्रयातीत्यशेषत:[6] वेदितुमस्ति शक्ति: ।।२६।।

King (*Rising up suddenly*)—That can't be. Even my house is, forsooth, invaded by goblins ! Or rather,

(*When my own*)[6] blunders (*proceeding from*) heedlessness,[5](*occurring*) day by day, cannot be altogether ascertained, is there (*then any*) power (*in me*) to know thoroughly[6] as to who among (*my*) subjects, proceeds by which path ? (26)

(नेपथ्ये)—**भो वयस्स, अविहा, अविहा ।** (भो वयस्य, अविहा, अविहा)

(*Behind the scene*)—Alas ! my friend, alas !

राजा (आकर्ण्य । गति-भेदं रूपयन्[7]) **सखे ! न भेतव्यं, न भेतव्यम् ।**

King (*Listening and representing*[7] *an altered gait*)—Fear not, my friend, fear not.

(नेपथ्ये । पुनस्तदेव पठित्वा)—**भो कहं ण भाइस्सं । एस मं कोवि पच्चवणद-सिरोहरं उच्छुं विअ तिण्ण-भङ्गं करेदि**

[कथं न भेष्यामि । एष मां कोऽपि [1]पश्चादवनत-शिरोधरमिक्षुमिव [1]त्रिभङ्गं करोति] ।

(*In the tiring room. reciting the same again*)—How shall (*I*)

not fear. Here is some one snapping[8] me into three parts[9], like a (*a piece of*) sugar—cane, with[8] (*my*) neck bent back-wards[8]

राजा (सदृष्टिक्षेपम्)—**धनुर्धनुः।**

King—(*Flinging a glance around*)—A bow ! A bow !

V. L.—'आत्तगन्धः'—R. V. M. 'आर्तकण्ठः'—S. M's Com. Omitted by B. 'ममापि'—R. V. M. 'आः ! ममापि'—B ; SD inserts 'नाम' after 'ममापि'। B adds 'अथवा बहुप्रत्यवायं नृपत्वम्'। For 'वेदितुमस्ति-शक्तिः' B has 'कस्य पुनः प्रभुत्वम्'। 'अविहा'—R. V. 'अविधा'—K. M. 'अविद्धो'—Mackenzie. 'अविदु'—M's Mss. 'अविध'—Patankar. 'अयि धाव'—Dr. 'अभिधाव'—B. 'प्रत्यवनत-शिरोधरम्०'—R. V. 'पश्चादवनत०'—K. M. S. Śr. 'प्रत्यामोड्य-शिरोधरां'—B. "पश्चात्मोटित०"—Dr. P. त्रिभङ्गं'—R. K. 'तिक्ष्ण-भङ्गं'—M. S. 'भग्नास्थि'—B. 'धनुस्तावत्—V. Śr. R. V. M. 'धनुर्धनुः'—B. HS.

राजेति। 'माणवकः' कुत्सितः मनुष्यः ('हारभेदे **माणवकः** वाले **कुपुरुषेऽपि च**' इति रभसः) 'केन' जनेन 'आत्तः' गृहीतः (७।४।४७; ३०७८) 'गन्धः' गर्वः यस्य (**'गन्धः गर्वः** लवोऽपि च' इति त्रिकाण्डशेषः) पराभूत इत्यर्थः ['आत्त-गन्धोऽभिभूतः स्यात्' इत्यमरः]। **प्रतीहारीति।** 'सत्त्वेन' पिशाचेन, भूत-योनिना (**'सत्त्वं** गुणे **पिशाचादौ** वले द्रव्य-स्वभावयोः' इति मेदिनी) 'अतिक्रम्य' आक्रम्य अभिभूय इत्यर्थः। **राजेति।** 'मा तावत्' एवं मा वादीः। "ममापि नाम" अतिधार्मिकस्य यथाश्रुति प्रजा-पालकस्य नाना-यज्ञादिकर्तुः 'गृहाः' ['गेहे कः'-(३।२। १४४), 'ग्रहिज्या'—(६।१।१६) इति **संप्रसारणम्। 'गृहं गृहाश्च** पुं भूम्नि कलत्रेऽपि च सद्मनि" इति मेदिनी] 'सत्त्वैः' पिशाचादिभिः 'अभिभूयन्ते' अत्याचार-विषयी-क्रियन्ते इति **काक्वा** पाठ्यम्। कदापि एतत् भवितुं न शक्यम्, अत एवं-विधम् असम्भाव्यं न वक्तव्यम्। 'अथवा' इति पक्षान्तरे, ममापि गृहे इदानीम् एतद्भवितुं शक्यम्। तदेव वक्ष्यमाण-श्लोकेन स्पष्टयति। **अहनीति।** 'अहनि-अहनि' प्रति-दिवसं ['नित्यवीप्सयोः'-(८।१।४) इति द्वित्वम्) 'आत्मनः एव' स्वस्यैव 'प्रमादेन' अनवधानतया [**प्रमादोऽनवधानता**" इत्यमरः] यत् "स्खलितं' शास्त्रविधेः विच्युतिः 'तावत्' साकल्येन (इति काटयवेमपादाः। 'यावत्ताव-देतौ साकल्याऽवधि-मानावधारणेषु" इति तत्त्वबोधिनी। 'आदौ' इति राघवाः] 'ज्ञातुम्' अवधारयितुं 'न शक्यम्' मया इति शेषः। यदि प्रत्यहम् अनुष्ठीयमानां स्वस्यापि दुष्कृतिम् अवधारयितुम् अहम् असमर्थः, तर्हि 'प्रजासु' अर्थात्, बहुषु मध्ये 'कः जनः केन' कीदृशेन सता असता वा 'पथा' मार्गेण प्रयाति' गच्छति, साधु असाधु

वा आचरतीत्यर्थः । इति 'अशेषतः' साकल्येन [इति काटयवेमपादाः] 'वेदितुं' ज्ञातुं मे 'शक्तिः' सामर्थ्यम् 'अस्ति' किम् । नास्तीत्येदपि काक्वा पाठ्यम् । ["ज्ञातुं', 'वेदितुम्' इत्यर्थालङ्कारः । **अर्थापत्तिश्च** । सामान्यात् विशेष-प्रतीति-रूपा **अप्रस्तुत-प्रशंसालङ्कारश्च** । **छेक-वृत्त्यनुप्रासौ** । **उपजातिः** वृत्तम्) । **नेपथ्य इति** । 'अविहा' इति खेदे निपातः ['अविहाविह निर्वेदे' इत्युक्तेः] । **राजेति** । 'गत्याः' स्वाभाविक-गमनस्य यो 'भेदः' पार्थक्यं तेन । [क्रोधोद्धत-गत्या इत्यर्थं इति राघवपादाः । 'त्वरित-गमनेन' इति काटयवेमचरणाः] । **नेपथ्य इति** । 'तदेव' अविहा इत्यर्थः । धरति इति 'धरा" [पचाद्यच्-(३।१।१२४)] । **शिरसः धरा 'शिरोधरा'** कन्धरा ग्रीवा [इति हेमचन्द्रः] । 'कण्ठः' [इति शिशुपालवध-टीकायां मल्लिनाथपादाः-४।५२] 'पश्चादवनता' पृष्ठभागे वक्रा 'शिरोधरा' ग्रीवा यस्य तथाविधम् अवाक्शिरसम् इत्यर्थः । माम् कुब्ज-पृष्ठं इक्षुम् अर्थात् इक्षु-दण्डम् "इव" [अनेन भूतस्य आस्वाद-लोभः व्यज्यते । **मृत्योरासन्नत्वेऽपि औदरिकेण विदूषकेण सुस्वादु-खाद्य-द्रव्यस्य** कथा न विस्मृता] 'त्रिषु अवयवेषु भङ्गः' कुटिलता यस्य तथाभूतम् ।

222n.—1. आत्तगन्धः–'आत्तः' = आ + दा + क्त । (158n.2). Similarly प्र + दा + क्त = प्रत्तः । Cf. "राम-**प्रत्तेषु** भोगेषु नाहमज्ञासिषं रतः"—*BK.* **'अवदत्त'** &c. are justified by the following Kārikā implying **आदि-कर्म (Commencement of action).** Cf. "अवदत्तं विदत्तञ्च **प्रदत्तञ्चादिकर्मणि । सुदत्तमनुदत्तञ्च** निदत्तमिति चेष्यते"—*Qtd MBh.* 'आत्त' = *Taken*', '*assumed*'. [Cf. 'आत्त-रतिः'—*Ra.XI.* 57.*Māla. VI*; 'आत्त-शस्त्रः–'*Infra*;"**आत्त-दण्डः**'–(158n. 2). '**आत्त-**ध्वन्वा'–*Śl.* 27. *Supra*; 'आत्त-सत्त्वया'–*Ra. VII.* 34; 'आत्त-साराम्'–*V.* 26; *XI.* 77. 'राज्यम् **'आत्त-लक्ष्मि'**—*Mahā.*]. **'गन्ध'**—Pride. Hence **'आत्त-गन्ध'**—'Having the pride taken', humbled, insulted Cf. 'पक्षच्छिदा' ***आत्त-**गन्धाः'—*Ra. XIII. 7.* **'आत्तगन्धमवधूय** शत्रुभिः'—*SPB. XIII.* 84. 2. **माणवकः**—To singnify अपत्यजाति, मनु with 'अञ्' and 'यत्' gives 'मानुषः' and 'मनुष्यः' (1186). But as प्रत्यय's used in the sense of 'तस्येदम्', may be affixed to signify 'तस्यापत्यम्', so 'अण्' [by **'तस्येदम्'**—(4. 3. 120)] may also be used after 'मनु' in the sense of **तस्यापत्यम्** । "तस्येदमिति विहितः अण् अपत्यार्थेऽपि भवति । इदमर्थे तस्यापि अन्तर्भावात्"—*BM* on Värt. 2081. Hence मनोः अपत्यम् (कुत्सितम्) इति मनु + अण् = **माणवः**–A deformed man. The cerebral '**ण**' is due to the कारिका "अपत्ये कुत्सिते चैव मनोरौत्सर्गिकः स्मृतः । **न-कारस्य च मूर्धन्यस्तेन** सिध्यति

माणवः"—*Qtd. KV.* 'उत्सर्ग-प्रत्यय' means the main affix as अण्। But *JS* observes:—"इदं च वचनं 'ब्राह्मण-माणव—वाड़वात् यत्'—(४।२।४२ ; १२५०) इति णत्व-निपातनात् लब्धम्"—*T.* 1186. Also **'ब्राह्मण-माणव'—इति निपातनात् णत्वम्**—*BhD.* Next 'कन्' अनुकम्पायाम्। Vidūṣaka is supposed to be deformed in body [55n. 1). **3. मा तावत्**—181n. 1). The idea is—The portress says that the jester is overpowered by the evil spirits. But the king contends that it is not possible for the ghosts to haunt his palace, *as he is virtuous* (I.20) and ever dutiful to his subjects. (*Note the force of* अपि). But simultaneously he changes his view **(अथवा)**, and thinks that all this may be possible. (*See next*). **गृहाः—(Masculine Plural)** means '*a house*'. Cf. इमे नो गृहाः'—*MK. I.* 'स्फटिको-पल-विग्रहा गृहाः'—*NC. II.* 74. 'धनपति-गृहान् उत्तरेण'—*PA & MD. II.* 14. **4. प्रमाद**—&c.—Sins due to carelessness. He is referring to the disavowal of his lawful wife through forgetfulness. **5. प्रजासु कः केन** &c.—. The king himself does not exactly know what faults are committed by him every day. Hence it is but quite natural that he will be more careless regarding the courses taken by his subjects. Or in other words, the king is not ruling his subjects properly. So he has become a **sinner.** Read 'सर्वतो धर्मषड्भागो' &c.—(72n. 7). Hence the presence of evil spirits. **6. अविहा**—A cry of distress—"Save me here from danger". [अव (save) + इह (*here*)]—Very frequent in *Māla.* **7. पश्चादवनत** &c.—**'शिरोधरा'** (*f*) means neck. Cf. 'गृह-कपोत-शिरोधराभिः'—*ŚPB. IV.* 52. Hence whose neck has been bent backwards. This is necessary for sucking blood. (*See next Śl.*). Words like **'पयोधरः'** (24n. 12), **'शिरोधरा', 'स्रोतोवहा'** (210n. 2) &c. present a **grammatical difficulty. For 'धरः'** (धरति यः सः')', **'पचः'** (पचति यः सः) &c. are formed by adding 'अच्' which is an **'अनुपपद'**—affix. Or in other words, the affixes अच्', 'क', 'श' are used after roots when **not preceded** by any **'उपपद'.** But 'अण्', is a **'कर्मोपपद—**affix' and will **invariably be used** after a root **preceded** by a word in the **accusative** (कर्म) as 'उपपद'। Now the *Vārt.*—"अकारानुपपदात्"—&c. enjoins that the 'विप्रतिषेध',

i. e. the subsequent Sūtra (**'कर्मण्यण्'**—3. 2. 1) will **bar** the application of the previous Sūtras (*i.e.*, पचाद्यच्—(3. 1. 134); इगुपध-कः'—(3. 1. 135); 'श'—(3. 1. 138)—"इह उभयम् '(अच् अण्) प्राप्नोति ।। ओदन-पाचः **कर्मोपपदो** भवति विप्रतिषेधेन । इह उभयं (क, अण्) प्राप्नोति ।। काष्ठ-भेदः । कर्मोपपदो भवति विप्रतिषेधेन"—*MBh.*, But with 'अण्' the forms become **'पयोधारः', 'स्रोतोवाही'** (fem.) **'शिरोधारः'**, and so on. The difficulty is, however, avoided by *BD and his followers* by **disregarding 'कर्मत्व'** and **attaching prominence** to **'शेषत्व'** । Read—'अथ कथं "न मह्यमत्र उत्तर-धारयस्य ते" इति श्रीहर्षः । परत्वाद्धि **सूत्रधाराविषु** इव **कर्मण्यणा** भाव्यम् । तथा च वार्तिकम् ।।"अकारात् अनुपपदात् कर्मोपपदो विप्रतिषेधेन" इति ।। सत्यम्।। कर्मणः **शेषत्व-विवक्षायाम्** अणः अप्राप्त्या शे कृते शेष-षष्ठ्यन्तेन समासो भविष्यति । एतेन **गङ्गाधर-भूधर-जलधरादयः व्याख्याताः'**—*T; KSV. V.* 2. 37; Similarly हन्तीति **'हन्'** वेत्तीति **'वित्'**, भिनत्तीति **भित्'** । Next by षष्ठीसमास we have **अरिहा रिपुहा, वृत्रभित्, ब्रह्मवित्** etc. Also *PM* on 2900. *HD*, however differs and accepts संज्ञात्व in such cases. **इक्षुमिव—**इष्यते इति इष्+क्सु ('इषेः क्सुः' – उ-३।१५७) Next by 'षढोः कः, सि" (ष becomes क)। It is interesting to note that the jester who is noted for his **greediness** (55n. 1; 61n. 3) does not forget to mention **something sweet, even in such a trying position.**

Text:—(प्रविश्य शार्ङ्गहस्ता) **यवनी—जअदु जअदु भट्टा । एवं ससरं सरासणं हत्थावारओ अ** [जयतु जयतु भर्ता । एतत् सशरं शरासनम् हस्तावारकश्च) । (राजा सशरं धनुरादत्ते) ।

(*Entering bow in hand*)—Yavanī—Let My Liege be victorious. Here (*is your*) bow with shafts and gauntlet. (*Lit. the finger-guard*).

[*The king takes the bow with arrows*]

(नेपथ्ये)— **एष त्वामभिनव-कण्ठ-शोणितार्थी[1]**
प्रहर्षिणी **शार्दूलः पशुमिव हन्मि चेष्टमानम्[2]** ।
(मनजरग) **आर्तानां भयमपनेतुमात्त-धन्वा**
दुष्यन्तस्तव शरणं[3] भवत्विदानीम् ।।२७।।

(*In the green room*)—Here thirsty[1] of the fresh-blood of (*thy*) throat[1], (*I*) will kill thee struggling[2], as does a tiger, a beast (*struggling for life*). Let Duṣyanta now, who wields (*his*) bow to remove the dread of the distressed, be thy refuge[3]. (27).

राजा (सरोषम्)—**कथं मामेवोद्दिशति**[1]। **आः, तिष्ठ तिष्ठ, कौणपाऽपसद**[2]! **त्वमिदानीं न भविष्यसि।** (शार्ङ्गमारोप्य)—**वेत्रवति! सोपान-मार्गं मादेशय**[3]।

King (*Wrathfully*)—What ! my (*ownself he*) challenges[4] ! Ah ! stay ! stay ! (*ye*) vile[5] carrion-eater[5] ! Thou shalt be no (*more*) now. (*Stringing his bow*). Vetravati, direct[6] the way to the stair-case.

प्रतीहारी—इदो इदो देवे [इत इतो देवः]। सर्वे सत्वरमुपसर्पन्ति)। Portress—This way, My, Liege, this way.

(*All advance in haste*)

V. L.—'जयतु &c.'—B. Omitted by others. 'सशरं शरासनं'—B. S. Others omit 'सशरम्'। 'हस्तावारकः'—B. HS. 'हस्तावाप-सहितम्'-R. S. M. K; S has 'वेष्टमानम्' for 'चेष्टमानम्'। 'आः ! तिष्ठ तिष्ठ कौणपापसद'—B. HS. S. 'तिष्ठ कुणपाशन'—R. V. M. A.

प्रविश्येति। शृङ्गस्य विकारः 'शार्ङ्गं' धनुः ['अनुदात्तेश्च'—(४।३।१४०) इति अञ्] 'हस्ते' यस्याः सा। हस्तम् आवृणोति ज्याऽऽघातादि-वारणाय आच्छादयति इति 'हस्तावारः' [कर्मण्यण्] चर्ममयं लौहमयं वा अङ्गुलित्रम् इत्यर्थः। स्वार्थे कन्। **'हस्तावाप'** इति पाठे तु हस्तम् आवपति रक्षति इति हस्तावाप' इति व्याख्येयम्। **एष इति**। 'अभिनवं' सद्योनिर्गमात् प्रत्यग्रम्, उष्णमित्यर्थः। यत् 'कण्ठ-शोणितं' गलस्थं रुधिरं तस्य 'अर्थी याचकः। (**'अर्थी** पुमान् **याचके** स्यात् सेवके च विवादिनि' इति मेदिनी; –५।५।१), 'शार्दूलः' व्याघ्रः (**"शार्दूलो** राक्षसान्तरे। **व्याघ्रे च** पशुभेदे च सत्तमे तूत्तरस्थितः" इति मेदिनी) 'पशु' हरिणादि-जन्तुम् 'इव चेष्टमानम्' आत्म-त्राणाय हस्त-पादादिकं विक्षिपन्तं 'त्वाम्' 'एषः' अ-भीतः अहम् अधुनैव 'हन्मि' हनिष्यामि ['वर्तमान-सामीप्ये वर्तमानवद्वा'-(३।३।१३१) इति **भविष्यदर्थे** लट्। 'अभिनवेत्यादि विशेषणम् एतदोऽपि योज्यम्]। 'आर्तानां' विपन्नानां 'भयम् अपनेतु' नाशयितुम् 'आत्तं'-(७।४।४७) गृहीतं 'धन्व' चापं ('धन्वा तु मरुदेशे ना, क्लीवं चापे स्थलेऽपि च' इति मेदिनी) येन सः। (यद्वा धनुःशब्देन सह समासः। तत्पक्षे 'धनुषश्च'—(५।४।१३२) इति अनङ्) गृहीत-चाप इत्यर्थः। तादृशः 'दुष्यन्तः' यदि शक्तिमान् स्यात् तर्हि 'इदानीम्' अधुना तव विपत्तौ (**'प्रहरणार्थेभ्यश्च परे निष्ठा-सप्तम्यौ भवतः'** इति वार्त्तिकेन शार्ङ्ग-शब्दस्य पूर्वनिपातः) इति भावः। 'तव शरणं' रक्षिता ('शरणं गृह-रक्षित्रोः' इति मेदिनी) 'भवतु'। दुष्यन्तं कोपयितुमुदीरितमेतत्। [**उपमा-वृत्ति-श्रुत्य-नुप्रासाः**, आत्त-धन्वेति विशेषणस्य साभिप्रायत्व-हेतोः **परिकरालङ्कारश्च**। प्रथमार्धे **बीभत्स-रसो** ध्वनितः। अत्र **'अहं हन्मि', 'शार्दूलस्तु हन्ति'** इति पुरुष-भेदात् **"लतेव**

राजसे तन्वि" ! इति दर्पणो-दाहरणवत् **भग्न-प्रक्रमता** दोषः । स च **'हन्तव्यःपशुरिव कण्ठरक्तमस्तुं व्याघ्रेण त्वमिह मया विचेष्टमानः'** इति पठित्वा समाधेय—इति सिद्धान्तवागीशपादाः । अत्र **ओजो** नाम संध्यन्तराङ्गमुपक्षिप्तम् । तल्लक्षणं तु—**"ओजस्तु** वागुपन्यासो निज-शक्ति-प्रकाशकः" । **प्रहर्षिणी** वृत्तम् ।।२७।।

राजेति । 'कथम्' इति विस्मये । 'माम्' जगति अप्रतिरथं निग्रहितारं दुष्यन्तम् 'एव उद्दिशति' लक्षीकृत्य वदति । 'कौणपानां' राक्षसानां ['राक्षसः कौणप' इत्यमरः] 'अपसदः' अधमः [**'निहीनोऽपसदः** जाल्मः क्षुल्लकश्चेतरश्च स' इत्यमरः) । 'त्वम् न भविष्यसि' एकस्मिन्नेव प्रहारे त्वन्मरणं विधाय त्वद्भावं सम्पादयामि अर्थात् त्वन्मरणं ध्रुवमेव । [अनेन **क्रोध**-नामकाङ्गम् उपक्षिप्तम् । तल्लक्षणं तु **"क्रोधस्तु** चेतसो दीप्तिः अपराधादि-दर्शनात्" इति । **सम्फेटः** अस्य नामान्तरम्] ।

223n.—1. सशरं—&c.—'सशरम्' (B) has been omitted by *R and others*, but this seems to be necessary, as it occurs in the following stage-direction here and also in the mouth of यवनी in *Vik. Act. V*, **on a similar occasion. हस्तावारक**—A kind of gauntlet *generally made of Iguana skin* to protect the fingers or the fore-arm. Read "बद्ध-गोधा-ङ्गुलि-त्राणौ खड्गवन्तौ महाद्युती'–*Rām. I.* 22. 9. **'आवाप'**—['आवापो भाण्डपचने परिक्षेपाऽऽलवालयोः] means a 'band' or bracelet, hence **'हस्तावाप'** almost means the same thing. ('ज्याघाताऽऽवारणः'—*K*) **2. एषः**—(15n. 1). Cf. 'राजा भोस्तिरस्करिणी-गर्वित ! * *एष तमिषुं सन्दधे'—*Infra*. ०**शोणितार्थी**—अर्थ+इनि ('अर्थाच्चाऽसन्निहिते' —1941) = अर्थी । "असन्निहितः अर्थः अस्येति विग्रहः । **अर्थो नास्तीति** यावत्—**BM.** 'अन्यथा **अर्थवान्** शब्दः'–*Prabhā*. Next ६ष्ठीतत् (*Com.*). But *Patañjali* has **rejected** this *Vārtika*. **"भाष्ये तु एतत् सूत्रं प्रत्याख्याय अर्थनम् अर्थः** (याच्ञा) । ततः अस्त्यर्थकम् इनि-प्रत्ययं [5. 2. 115)] कृत्वा **'अर्थी', 'अर्थिकः' 'प्रत्यर्थिक'** इति साधितम्'—**Prabhā. आत्त-धन्वा**—The समास is either with 'धनुस्' or with 'धन्वन्' (*Com.*)—(63*n.* 5). **'कथं धृतधनुषं** रघुनन्दनं, स्मरामि"—(*UC.* V. 4.)—Vide (192n. 4.) **3. कौणपाऽपसद—**कुणपं शवं भक्षयितुं शीलमस्य इति कुणप+अण् [by 'शीलम्'–(4. 4. 61)] = कौणपः—A carrion-eater. Or 'कोणम्' [अस्रम् = रक्तम्] पाति, इति कोण+पा+क ['आतः&—'3. 2. 3.] = कोणपः ।—*BhD.* कोणपस्य निर्ऋतेः अयम् इति कौणपः । ['तस्येदम्'–(4. 3. 129) इति अण्] । **अपसद**—Usually at the end of a compound has the

sense of 'wretch', 'accursed'. Lit. who is made to sit away from one's colleagues as a mark of degradation. 'कापालिकाऽपसद:'—*MM. V.* 'रे रे क्षत्रियाऽपसदा:"—*VS. III.* 'वृद्धाऽपसद'—*VS. II*; 'भरत-कुलाऽपसद'—Ibid. V; 'न भविष्यति'—Cf. "अरे काकोदर ***मयि स्थिते जिह्लेषि वलिं याचितुं ***प्रतिपद्यस्व शस्त्रम् । अयं न भवसि"—HC. III. 36. Hence कौणपाऽपसद = राक्षसाधम । Cf. 'राजा—मद्वचनात उच्यतां नागरिका: सायं निवासवृक्षाग्रे विचीयतां विहगाऽधम:—VIK.V.

Text:—राजा (समन्तादवलोक्य) अये ! शून्यं खल्विदम् ।

King (*Looking about*)—Lo ! vacant, indeed, this (*is*).

(नेपथ्ये)—**अविहा, अविहा । अहं तुमं पेक्खामि तुमं मं ण पेक्खसि । विड़ाल-ग्गहीदो मूसओ विअ णिरासो म्हि जीविदे संवुत्तो ।**

[अविहा, अविहा । अहं त्वां पश्यामि त्वं मां न पश्यसि । बिड़ाल-गृहीतो मूषक इव निराशोऽस्मि जीविते संवृत्त:] ।

(*Behind the scene*)—Alas! alas! I see you though you see me not. Like a cat-caught rat, (*I*) have got hopeless of (*my*) life.

राजा—भोस्तिरस्करिणी-गर्वित[1] ! मदीयमस्त्रं त्वां द्रक्ष्यति । एष तमिषुं[2] सन्दधे—

श्लोक

यो हनिष्यति वध्यं त्वां रक्ष्यं रक्षिष्यति द्विजम् ।
हंसो हि क्षीरमादत्ते[3] तन्मिश्रा वर्जयत्यप: ।।२८।।

।। (अस्त्रं संधत्ते) ।।

King—Oh ! Thou priding[1] (*thyself*) on the veil (*or magic*] of invisibility[1] ! my missile shall find thee out. Here do (*I*) fix my [2]shaft—That will slay thee worthy of death, (*and*) save the twice-born (Brahmin) worthy of preservation. The swan, indeed, takes milk (*and*) leaves the water mixed up with it. (28)

(*This said, aims the missile.*)

V. L.—B has 'अये' before 'शून्यम्' &c. 'विड़ाल'०—R. V. M. S. 'मार्जार०'—B. 'मूषक:'—R. V. M. S. 'उन्दुरु'—B. 'अस्त्रम्'—B. M. K. Dr. Śr. 'शस्त्रम'—R. V. S.; After 'त्वां द्रक्ष्यति', B has the following line—'स्थिरोभव, मा च ते वयस्य-सम्पर्कात् विश्वासो भूत्' । 'रक्षिष्यति'—HS. P. B. Dr. 'रक्षति'—R. V. M. S.

नेपथ्य इति । 'विड़ाल-गृहीत:' मार्जाराऽऽक्रान्त: । ['अनेनोपमानेन त्यागेऽपि जीविताऽभाव: सूचित:] । 'जीविते' जीवने (भावे क्त:) । **राजेति ।** 'तिरस्करिण्या' देहस्य अदृश्यत्व-विधायिकया विद्यया 'गर्वित:' सञ्जात-गर्व: दृप्त: ।

तत्संबुद्धौ। य इति। 'यः' मदीयोबाणः 'वध्यम्' अकारणं ब्रह्महत्या-प्रवृत्तत्वात् वधार्हं मपराधिनं 'त्वां' कौणपा-धमम् 'हनिष्यति'। अथच, 'रक्ष्यम्' अपराधाऽभावात् सर्वथा रक्षणार्हं 'द्विजम्' ब्राह्मणं विदूषकं ['दन्त-विप्राऽण्डजा द्विजा' इत्यमरः]। 'रक्षिष्यति' त्वत्तः त्रास्यते। 'स्वाम् इषुम् एषः' अहं 'सन्दधे' धनुषि योजयामि। एकस्यैव उभयकारित्वं स्पष्टयितुं दृष्टान्तमाह। 'हि' इत्यवधारणे। 'हंसः' [हन्ति गच्छति। 'हन हिंसा-गत्योः। पच्याद्यच्-(३।१।१३४)—"भवेत् वर्णागमात् हंसः, सिंहे वर्ण-विपर्ययः" इति सक्—इति भानुजिः] 'क्षीरं' पेयं दुग्धम् 'आदत्ते' जलमध्यात् गृह्णाति पिवति इत्यर्थः ['आङो दोऽनास्य-विहरणे" (२६८६) इति आत्मनेपदम्]। अथच तेन 'दुग्धेन मिश्राः (५९३) अपः' अपेयं जलं 'वर्जयति' पृथक्कृत्य परित्यजति। [अत्र दृष्टान्तालङ्कारः परिकरालङ्कारश्च। "राजा —कः कोत्र भोः" इत्यादिना एतदन्तेन व्यवसायो नामाङ्गमुपक्षिप्तम्। तल्लक्षणमुक्तं यथा धनञ्जयेन—"व्यवसायः स्व-शक्युक्तिः" इति दुष्यन्तस्य स्वशक्तेः आविष्करणात्। 'नेपथ्ये' इत्यारम्य एतदन्तेन रौद्ररसः ध्वनितः। श्लोको वृत्तम्] ॥२८॥

224n.—1. -विडालगृहीतो &c.—Cf. 'विडाल-गृहीतायाः परभृतिकायाः' (153n. 5)—*Māla. IV*; **वध्यम्**—वधम् अर्हति इति हन्+यत्। 'हन्' = 'वध' by "हनो वा यद्वधश्च वक्तव्यः"—*Vārt. on* 2843. "हन्धातो र्यद्वा स्यात्। प्रकृतेर्वधाऽऽदेशश्च इत्यर्थः"—**BM.** **G** and some others have "यद्वा वधम् अर्हति इति 'दण्डादिभ्यः **य**':–(5. 1. 66)." They evidently follow KV. But 'यः' is a **slip** for '**यत्**'। Read—'**दण्डादिभ्यः य' इति स्वपपाठः,** "अचो यत्" इति सूत्रभाष्ये तथैव दर्शनात्।—*BM &* **T**—1731. **2. तिरस्करिणी-गर्वित**—(190*n.* 9). **अस्त्रं**—Is preferable to **शस्त्रम्** (R),—for a little after we have '**अस्त्रं** संधत्ते, '**अस्त्र** मुपसंहरन्'। **3. हंसो हि** &c.—For swan's power of separating milk from water; Cf. 'अम्भोजिनी-वन-निवास-विलासमेव **हंसस्य** हन्ति नितरां कुपितो विधाता। न त्वस्य **दुग्ध-जल-भेद-विधौ** प्रसिद्धां वैदग्ध-कीर्तिमपहर्तुं समर्थः"—*NS.* 18. '**हंसैः** यथा **क्षीरमिवाम्बु-मध्यात्**'—*PT.* "प्राज्ञस्तु जल्पतां पुंसां श्रुत्वा वाचः शुभाशुभाः। गुणवद्वाक्यमादत्ते **हंसः क्षीरमिवाम्भसः**"—*Mahā; Ādi.* '**नीर-क्षीर-विवेके** हंसालस्यं त्वमेव तनुषे चेत्'—*Bhāminī-vilāsa.* 1. 13.

Text—(ततः प्रविशति मातलिर्विदूषकश्च) **मातलिः—आयुष्मन्!**

कृताः शरव्या[1] हरिणा[2] तवासुराः
वंशस्थविलं शरासनं तेषु [3]विकृष्यतामिदम् ।
(जतजर) [4]प्रसाद-सौम्यानि सतां सुहृज्जने
पतन्ति चक्षूंषि न दारुणाः शराः ॥२९॥

(*Enter Mātali and the Vidūṣaka.*)

Mātali—O Long-lived Sir ! The demons have been made (*your*) marks[1] by Indra[2]—"Let (*then*) this bow (*of yours*) be[3] drawn against them. Of the good, eyes softened[4] with affection, (*and*) not deadly arrows, fall on (*their*) friendly persons." (29)

राजा (ससंभ्रममस्त्रमुपसंहरन्)—अये, मातलिः । स्वागतं महेन्द्र-सारथे ।
King (*Distractedly, withdrawing his missile*)—
—Lo ! (*is it*) Mātali ? Welcome, charioteer of Indria.

विदूषकः—अहं जेण इट्टि-पशुमारं मारिदो सो इमिणा साअदेण अभिणन्दीअदि [अहं येन इष्टि-पशुमारं[5] मारितः, सोऽनेन स्वागतेनाऽभिनन्द्यते[6]) ।
Vidūṣaka—He, by whom I was (*very nearly*) butchered[5] like a sacrificial victim[5], is by him greeted[6] with a welcome.

मातलिः (सस्मितम्)—आयुष्मन् ! श्रूयतां यदर्थमस्मि हरिणा भवत्सकाशं प्रेषितः । Mātali—(*With a smile*)—O Long-lived Sir ! (*please*) hear on what errand (*I*) have been sent by Indra to Your Honour's presence.

राजा—अवहितोऽस्मि । King—(*I*) am all heed.

मातलिः—अस्ति कालनेमि-प्रसूतिः दुर्जयो नाम दानव-गणः ! Mātali—There is a host of demons called the "Invincible"—the brood of Kālanemi.

राजा—अस्ति । श्रुतपूर्वं मया नारदात् । King—There is. (*This*) was heard by me previously from Nārada.

V.L.—'मातलिः विदूषकश्च'—B.P.HS.'विदूषकमुत्सृज्य मातलिः'—R. V. M. S. K. 'शरव्यम्'—B. M. V. 'शरव्याः'—Patankar K. Śr. Ś. 'आयुष्मान्'—B. Dr. Omitted by others. B has 'ससम्भ्रमम्' before 'अस्त्रमुपसंहरन् । 'महेन्द्रसारथे'—R. M. V. B. "देवराज०"—B. 'देवेन्द्र-सारथये'—S. 'भो मनस्विन्'—B. Omitted by others 'भवान् * *अभि-नन्दति'—B. 'येन * अभिनन्द्यते'—Others.

कृता इति । 'हरिणा' इन्द्रेण ['हरिरिन्द्रो हरिर्भानुः' इति गदसिंहः] 'असुराः' दैत्याः 'तव शरव्याः बाण-क्षेप-लक्ष्याः ['लक्षं लक्ष्यं शरव्यं च' इत्यमरः ।

कर्मे विवक्षावशात् पुंस्त्वम्]। 'कृताः' विहिताः अर्थात् तवास्त्रादेव एते विनाशत्वं लभेरन् इति इन्द्रेण निर्धारितम्। अस्मादेव हेतोः 'तेषु' असुरेषु 'इदं' करे धृतं सज्जं 'सराशनं' धनुः 'विकृष्यताम्' शरक्षेपाय आकृष्यताम्। तदर्थमहमत्रागत इति सूचितम्। [अतएव सूक्ष्म-काव्यलिङ्गे अलङ्कारौ]। तथाहि 'सतां' सज्जनानां 'प्रसादेन' अनुग्रहेण 'सौम्यानि' (४।२।२०) मनोज्ञानि न तु रोष-रक्तानि ['सौम्यः बुधे मनोज्ञे स्याद् अनुग्रहे सौम-दैवते' इति विश्वः] 'चक्षूंषि' नयनान्येव 'सुहृज्जने' प्रियजने मयि मातलौ इत्यर्थः। 'पतन्ति', किन्तु 'दारुणाः' मर्म्मभेदिनः 'शराः न पतन्ति' अतएव मां प्रति प्रसाद-सौम्यं नयनं पातय इत्यर्थः। [उत्तरार्धेन प्रथमार्धस्य समर्थनात् अर्थान्तरन्यासः। न-शब्देनैव दारुण-शर-पात-व्यपोहनात् शाब्दी-परिसंख्या च। अनयोरेकाश्रयानुप्रवेश-रूप-सङ्करः। 'तव', मयि' इति विशेषे वक्तव्ये 'सतां, सुहृज्जने' इति सामान्योक्तेः अप्रस्तुत-प्रशंसा। सतां तादृश-चक्षुषा सुहृज्जन-संबन्ध-प्रतीतेः समालङ्कारो व्यङ्ग्यः। 'न दारुणा' इति व्यतिरेकः। वृत्त्यनुप्रासः। 'चक्षूंषि' इति नपुंसक-लिङ्गेन प्रक्रम्य 'शराः इति पुंलिङ्ग-प्रयोगात्-भग्न-प्रक्रमता दोषः। एवं 'चक्षूंषि' इत्यनन्तरं भेद-बोधक-शब्दः वक्तव्यः किन्तु नोक्तः। अतएव वाच्याऽनभिधान-दोषश्च। तत्-समाधानाय परार्धमेवं पठनीयम् "पतन्ति हर्षेण सतां सुहृज्जने सुदृष्टयो दारुण--हेतयस्तु न"—इति सिद्धान्तवागीशाः। वंशस्थविलं वृत्तम्] ॥२९॥ राजेति। 'अये' इति संबोधने [इति शब्दरत्नावली], विस्मये वा। विदूषक इति। 'येन' जनेन 'अहं' माधव्यः 'इष्टेः' 'यज्ञस्य यः 'पशुः' छागादिः स इव 'मारितः' 'इष्टि-पशुमारं मारितः' ['उपमाने कर्मणि च' –(३।४।४५)–इति मारयते र्णमुल्। "कषादिषु यथाविध्यनुप्रयोगः (३।४।४६) इति मारयतेः अनुप्रयोगश्च]। 'अभि-नन्द्यते' सत्क्रियते इत्यनुचितमेव। मातलिरिति। विदूषकोक्त्या कौतुकोदयात् 'स्मितम्' ['स्मित-लक्षणन्तु प्रागुक्तम्] 'हरिणा' इन्द्रेण। राजेति। 'अस्मि' इति 'अहम्' इत्यर्थे निपातः ['अत्रास्मि करोमि सख्यः' इत्यादि-प्रयोगात्]। मातलिरिति। 'कालनेमिः' दैत्यविशेषः [स तु हिरण्य-कशिपु-पुत्र इति हरिवंशः] तस्य 'प्रसूतिः' अपत्यम्।

225n.—1. शरव्याः—शृणाति हन्ति इति शृ+उ=शरुः–An arrow. तस्मै हितम् इति शरु+यत् (by "उ-गवादिभ्यः यत्"–5. 1. 2)=शरव्यम्—A target. Or, शरान् व्ययति (व्येञ् संवरणे भ्वादिः)। "क–विधौ सर्वत्र संप्रसा--रणिभ्यो डः"—(*Vārt*—3. 2. 3) इति डः [शर+व्येञ्+ड=शर+व्य +ड=शरव्य]—*BhD.* Or, 'आतः अनुपसर्गे कः'—(3. 2. 3) इति कः। Next 'संप्रसारण' (य=इ) by "वचि-स्वपि यजादीनां किति" (6. 1. 15) 'व्यञ्' is यजादि। Next by 'एर् अनेकाचोऽसंयोग-पूर्वस्य:'—(6. 4. 82)–'इ'

of वि is replaced by 'य' [शर+व्येञ्+क=शर+व्य+क=शर +वि+क=शरव्यम्–RM.—'शरव्या:'–is the **oldest** reading though **'शरव्यम्'** is usually *Neuter* as has already been used by Kāli. elsewhere' (Cf. 'फलिभि: शरव्यम्'—*Ra. VIII* 45; *XI.* 27; *ŚPB. VII.*) Kāli. here has used it in *Masculine Gender*. These sorts of *arbitrary breach* of grammatical rules (Cf. **"मन्वंमन्वं** for **'मन्वमन्वं'**, **'नागरिक'** for **"नागरक"**, **'त्रियम्बक'** for **"त्र्यम्बक"**, **"कामयान"** for **'कामयमान'**, **'आस'** for **'बभूव:**, **'बाडवान्'** for **वसवान्"**, **"गच्छती"** for **"गच्छन्ती** &c.) may be justified by the Vedic Grammar. (Vide 68n.—1; 70n. 2; 244n.—3). This is the trait of व्यास, वाल्मीकि, and other old poets and writers. These uses are *certainly anterior* to the Gupta Period. But Kieth and other Gupta—Theorists have very conveniently connived at these. Even **अश्वघोष** has also used 'शरव्य' in one place in 'पुंलिङ्ग'। Cf. "शरव्य: स तु दोषाणाम् यो हीन: स्मृति-वर्मणा"—SN. XIV. 38. **2.—असुरा:—**So called owing to their not partaking of 'सुरा' (wine).—(175n, 6). **3. इषम्**—The bow which is already fitted with an arrow and stiung. **4. सौम्यानि**—सोम: (moon) देवता अस्य इति सोम+ टयण् ['सोमाट्टयण्'—4.2.30;] or 'सोम इव सोम:'। Next by 'चतुवर्णादीनां स्वार्थं उपसख्यानम्—*Vārt.* 1789, सोम+ष्यञ्=सौम्य:—Beautiful. (*Com.*) RM attaches **'य'**, but read—"यत्तु शाखादित्वात् (५।३।१०३)-'य' इति मुकुट: ।। तन्न ।। वृद्धयप्रसङ्गात्"—*BhD*—In one place *BhD*, however, proceeds thus:—"सोमइव सोम्य:"। 'शाखा दिभ्य: य:'—(५।३।१०३)। तत: प्रज्ञाद्यण् (स्वार्थे—5. 4. 38)। 'प्रज्ञादि' is 'आकृतिगण'। Therefore सोम्य+अण्=सौम्य:। **5. अस्त्रमुपसंहरन्**—(14n, 8; end). Certain Mantras are recited at the time of **sending forth (प्रयोग)** missile to ensure its efficacy, and at the time of **retracting (संहार)**, counter-charms are recited which take off from the shaft the special virtue already imparted to it. Cf. "संमोहनं नाम सखे! ममास्त्रं प्रयोग-संहार-विभक्त-मन्त्रम्"—*Ra.* 5. 57. **स्वागतेन** &c.—This phrase occurs in Mahā. Karṇa. 33; **"सपद्युपस्थिते मित्रे कुशलेनागतं त्वया। इति यत् प्रश्न-वचनं तत् स्वागत मुदाहृतम्"** ।।— (*Cāritra-Bardhana*);

—(129*n*, 2). **6 इष्टि-पशुमारं मारितः**—इष्टि-पशु+ मृ+णिच्+णमुल् भावे=इष्टि-पशु-मारम् (*Com.*). [Read—"उपमान-कर्मकारक-पूर्वकात् उपमान-कर्तृकारक-पूर्वकाच्च निरर्थक-धातोः परः तुमर्थे णमुल्-प्रत्ययः स्यात्। **कर्मणि**—कृपणेन ताम्रादिकमपि **सुवर्ण-निधाय निहितम्** (सुवर्णमिव सुगुप्त-मित्यर्थ)। गुरुं **पितृ-वेदं** (पितरमिव) **वेत्ति। कर्त्तरि**—अविमृश्यकारी पुरुषः **शलभ-नाशं** (शलभ इव) **नश्यति। * *** अर्जुन-**ग्राहम् अग्रहीत्"—Prabhā**. 'समूल-घातमरीन् न्यवधीत्'—Bhaṭṭi I, 2] Note that the **same verb** after which 'णमुल्' is attached, is **repeated** as finite verb (3. 4. 46). **7. अस्मि**=अहम्—(7n, 2). **8. कालनेमि** &c.—The demon Kālanemi who had one hundred heads and arms, was slain by Viṣṇu. ('शत-प्रहरणोदग्रः शत-बाहुः शताननः &c'.—*MP.* (*Com.*) **9. नारदात्**—Nārada, [one of the ten—मानस-पुत्रs of Brahmā], was sprung from his lap. ['उत्सङ्गात् नारदो जज्ञे, दक्षोऽङ्गुष्ठात् स्वयम्भुवः,—*Bhāgabata*. He is very fond of promoting quarrel amongst men and gods. *Vide BRP.* (ब्रह्मखण्ड), *Ch.* 21-22. (*i*) नरस्य धर्म्यम्=नारम् [*Vārt.* 4. 4. 49] नारं ददाति इति नार+दा+क [3. 2. 3] =नारदः। (*ii*) "नारं" पानीयमित्युक्तं तत् पितृभ्यः सदा भवान्। ददाति तेन ते नाम **नारदेति** भविष्यति" इत्यागमः। (*iii*) **'नुः'** इदं **नारम्** (अज्ञानं) **द्यति (खण्डयति)** ज्ञानोपदेशेन। (*iv*) **नारं (नरसमूहं)** द्यति कलहेन इति वा। पूर्ववत् कः—BhD. Though reckoned as a प्रजापति, he was a celibate, and he dissuaded 'दक्ष's sons from procreation. He was consequently imprecated by Dakṣa to have *wandering habits*. Ch. "तांश्चापि नष्टान् विज्ञाय पुत्रान् दक्ष-प्रजापतिः। क्रोधं चक्रे महाभाग नारदं स शशाप च" ॥—*Bhāgabata; VP.* 1. *Ch.* 15. **10. अस्ति**—(40n. 5).

Text—मातलिः—सख्युस्ते स किल शतक्रतो रजय्य'
स्तस्य त्वं रण-शिरसि स्मृतो निहन्ता।
प्रहर्षिणी **'उच्छेत्तुं प्रभवति यन्न सप्त-सप्ति**
(मनजरग) **स्तन्नैशं तिमिर मपाकरोति'चन्द्रः ॥३०॥**

स भवानात्त-शस्त्र एव इदानीं तमैन्द्ररथमारुह्य विजयाय प्रतिष्ठताम्।

Mātali—That (*troop of demons is*) really not vanquishable by your friend, the performer of hundred-sacrifices, (*but*) you are declared to be its destroyer in the fore-front of battle. The

moon dispels the nocturnal gloom which the seven-rayed (*sun*) is unable to remove. (30) So commemorated let Your Highness even equipped with weapon, march for victory now, having ascended that (*famous*) chariot of Indra.

राजा—अनुगृहीतोऽस्मि अनया मघवतः सम्भावनया। अथ माधव्यं प्रति भवता किमेवं प्रयुक्तम्।

King—Favoured am I by this honour (*done to me*) by Indra. But what made you act thus towards Mādhavya?

V. L.—Dr. supported by B has 'अवध्यः' for 'अजय्यः'। 'देवरथम्' —B. 'ऐन्द्र०'—R. V. M.

सख्युरिति। 'स' दुर्जयः नाम प्रसिद्धः दानवगणः [प्रसिद्धत्वात् प्रक्रान्तार्थत्वात् वा यच्छब्दस्य अनपेक्षा] 'ते सख्युः' सुहृदः 'शतक्रतोः' इन्द्रस्य [इति धनञ्जयकोषः। "कृत्यानां कर्तरि वा"—(२।३।७१)—इति षष्ठी पाक्षिकी] 'अजय्यः' प्रयत्न-सहस्रैरपि जेतुम् अशक्यः ["**जय्यः** यः शक्यते जेतुम्, **जेयः** जेतव्य-मात्रके" इत्यमरः। "शकि लिङि च"—(३।३।१७२)—इति शक्तौ "अचो यत्"—(३।३।९७)—इति यत्। "**क्षय्य-जय्यौ शक्यार्थे**"—(६।१।८१)—इति निपातितः]। 'किल' इत्यवधारणे (इति अमरकोष-टीका **सारसुन्दरी**)। 'रणशिरसि' समराग्र-भागे 'त्वं तस्य' दाणवगणस्य 'निहन्ता' विनाशयिता 'स्मृतोऽसि' निर्धारित इत्यर्थः। यः खलु महेन्द्रेण अजय्यः, स कथं मया हनिष्यते इत्याशङ्काम् उच्छेतुमाह **'सप्त-सप्तिः'** सूर्य (इति हेमचन्द्रः)। [तस्य **विग्रहो** यथाः—(१) 'सप्तसंख्यकाः **सप्तयः' अश्वा** इति रामायण-भाष्ये **रामानुज-पादाः**॥ तथा च श्रुतिः॥ "सप्त त्वा हरितो रथे वहन्ति देव सूर्य" इति॥ यद्वा, (२) **'सप्त-नामा सप्तिः'** **अश्व** इति वा। तथाच श्रुतिः—"एकोऽपि अश्वः वहति सप्त-नामा" इति॥ यद्वा (३) 'सप्तानां' तत्संख्यक-**प्राणानां** 'सप्तिः' प्रवृत्तिः चालक इत्यर्थः। तथाच श्रुतिः—"सप्त-शीर्षण्याः प्राणा" इति॥ अपि च "अहोरात्रं रथेनाऽसावेक-चक्रेण वै भ्रमन्। सप्तद्वीप-समुद्रांश्च सप्तभिः सप्तभिर्वृतम्॥ छन्दोरूपैश्च तैरश्वै र्यतश्चक्रं ततः स्थितिः" इति मात्स्ये] 'यत्' निशाया इदम् इति 'नैशं' 'तिमिरम्' 'अन्धकारम् उच्छेत्तुं' दूरीकर्तुं 'न प्रभवति' न समर्थो भवति 'तत्' नैशमन्धकारं सूर्यापेक्षया न्यून-तेजाः अपि 'चन्द्रः अपाकरोति' ध्वंशयति विधिनियमात् इत्याशयः। तद्वत् त्वम् इन्द्रापेक्षया न्यून-बलोऽपि तदवध्यं दानवगणं व्यापादयितुं शक्ष्यसि [**दृष्टान्तालङ्कारः**। **स्तेसस्तस्येति** सप्तसप्तीति **छेक-वृत्त्यनुप्रासाः**। **प्रहर्षिणी** वृत्तम्] ॥३०॥ **स इति।** 'तम् ऐन्द्र-रथम्' सुप्रसिद्धम् इत्यर्थः (प्राग् व्याख्यातः) 'विजयाय' ['तुमर्थाच्च भाववचनात्'—(२।३।१५)-इति ४र्थी] प्रतिष्ठतां' गच्छतु ['सम-व-

प्र-वि-भ्य:स्थ:'—(१।३।२२)—इत्यात्मनेपदम्]। राजेति। 'मघवत:' इन्द्रस्य ('इन्द्र: मरुत्वान् मघवा' इत्यमर:। मह्यते पूज्यते इति कनि-प्रत्ययेन "श्वन्नुक्षन्-" (उ:-१६५), इत्यादिना 'मघवन्' इति निपातितम्। "मघवा बहुलम्"-(६।४।-१२८ ; ३६०) इति आदेश-पक्षे तु 'मघवान्' इत्यपि बोध्यम्। यत्तु "आदेशे दीर्घा-भावात् मघवान्" इति स्वामिनोक्तम्।। तन्न।। 'सर्वनामस्थाने चा-संबुद्धौ'-(६।४।८; २५०)—इति दीर्घ-संभवात्। विस्तरस्तु व्याख्यासुधायां द्रष्टव्य:)। 'सम्भावनया' गौरवेण। 'अथ' इति प्रश्ने। 'एवं' पश्चाद-वनत-शिरोधरम्।

226n.—1. **शतक्रतो:**—Indra (*Jove or Jupiter Pluvius of Classical mythology*) is called 'शतक्रतु' according to the *Purāṇas* for his performance of *hundred horse-sacrifices*. Hence he always views with jealousy and alarm any persistency by a human of severe penance or one-hundred horse-sacrifices which might raise him to a level with himself. (41*n*, 6.). Our poet also endorses this view. Read "जगत्-प्रकाशं तदशेषम् इज्यया, भवद्गुरु: लंघयितुं ममोद्यत:।। हरिर्यथैक: **'पुरुषोत्तम:'** स्मृत:, महेश्वर: **'त्र्यम्बक:'** एव नापर:। तथा विदुर्मां मुनय: **शतक्रतुं', द्वितीय-गामी न हि शब्द एष न:"** ।:—*Ra. III.* 48-49. According to the Western Vedic Scholars, क्रतुस् (*Gr. Karatos*) in the Vedic Literature **invariably** means **'power'** (**i.e. wisdom, insight strength** of mind or body. (**प्रज्ञा नाम**—Nirukta. III. 13) or *deeds* (**कर्मनाम**—Ibid II. 1.) Hence according to them the epithet means *one whose power or wisdom is hundred i. e. infinite.* **सख्युस्ते**—Cf. 'अयं स **वलभित्-सख:** दुष्यन्त:'—*Act. II. Supra* **अजय्य:**— Cf. 'तेन द्विपानामिव पुण्डरीको राज्ञामजय्योऽजनि पुण्डरीक:" —*Ra. XVIII.* 8; (72*n*, 8). **निहन्ता**—Is a very significant epithet of Duṣyanta. The demon whom Indra could not even **defeat,** will be **killed** by Duṣyanta. (Now read 75n. 5, 7). **2. सप्त-सप्ति:** —Either the sun who has **seven horses** [R. V. I. 50, 8; 115, 4] or who has a horse **named सप्त** (*Com.*) **3. चन्द्र: अपाकरोति**—"The appositeness of this comparison depends on the fact that Duṣyanta's pedigree was **traceable to the moon"** (चन्द्रवंश)——*M.* Cf. "न पुत्र-वान्मत्यम् अपाकरिष्यति"—*Ku. V.* 14. Elsewhere "अपा+कृ'has a **different sense** *i.e.* 'to give up'.Cf. 'शिवा

भुजच्छेदमपाचकार"—*Ra. VII.* 50. **4. मघवत:**—In Classical Sanskrit it is invariably an **epithet of Indra.** In the **Vedic literature** it refers **sometimes to the Sun god,** because he is the giver of rain ('आदित्याज्जायते वृष्टिः वृष्टेरन्नं ततः प्रजाः')) and thereby of wealth. मह् (wealth, present) + मतुप् (वत्)—361. According to Kṣīrasvāmī, "**मघवा**' and "**मघवान्**", and according to RM, '**मघवा**', '**मघवन्**', '**मघवान्**' are the forms in **Nom. Sing.** But *BhD* opines that the form '**मघवन्**' **is incorrect.** (*Com.*). **सम्भावनया**—(230n, 7)

Text:—मातलिः (सस्मितम्)—तदपि कथ्यते। किञ्चिन्निमित्तादपि मन स्सन्तापात् आयुष्मान् मया विक्लवो[1] दृष्टः। पश्चात् कोपयितुमायुष्मन्तं तथा कृतवानस्मि। कुतः—

आर्या [12, 18, 12, 15]

ज्वलति[2] चलितेन्धनोऽग्नि विप्रकृतः[3] पन्नग[4] फणं कुरुते।
प्रायः स्वं महिमानं कोपात्प्रतिपद्यते[5] जन्तुः ॥३१॥

Mātali (*With smile*)—That too will be (*just*) explained. Owing to some mental throe due to certain cause, Your Long-lived Highness was found by me utterly[1] dispirited.[1] (*And*) afterwards to rouse the anger of Your Long-lived Highness, I did like that. For—Fire with its fuel[2] stirred, blazes up; the adder[4] when irritated,[3] swells (*its*) hood; verily a man generally attains[5] (*his*) own high-spiritedness through (*some*) provocation (*only*) (31).

राजा (विदूषकं प्रति)—**वयस्य ! 'अनतिक्रमणीया दिवस्पते राज्ञा। तद्गच्छ परिगतार्थं कृत्वा मद्वचनादमात्य-पिशुनं ब्रूहि—**

श्लोक

त्वन्मतिः[9] केवला तावत्परिपालयतु प्रजाः।
अधिज्य मिदमन्यस्मिन् कर्मणि व्यापृतं धनुः ॥३२॥

King (*To Vidūṣaka*)—Friend ! the bidding of heaven's[7] king (*is*) not[6] to be transcended[6]. So apprising[8] him of the circumstance,[8] tell minister Piśuna in my wordings—

"Let you intelligence[9] alone protect (*my*) subjects, (*while*) this braced (*strung*) bow is employed in another (*sublime*) task". (32)

विदूषकः—जं भवं आणवेदि [यद्भवान् आज्ञापयति] । (निष्क्रान्तः) ।
Vidūṣaka—As Your Honour commands. (*Exit*).

मातलिः—आयुष्मान् रथमारोहतु ।
(राजा रथारोहणं नाटयति) ।
। (निष्क्रान्ताः सर्वे) ।

Mātali—Let Your Long-lived Highness ascend the chariot. (*The king represents mounting the chariot*). [*Exeunt Omnes*].

षष्ठोऽङ्कः

(*End of the Sixth Act*)

V. L.—'सस्मितम्'—B. Omitted by others. 'विकृतः'—B. Others read 'विक्लवः' । 'फणं'—M. V. K. S. 'फणां'—R. B. 'क्षोभात्'—R. V. M. 'कोपात्'—K. S.; B reads the last line thus—'तेजस्वी संक्षोभात् प्रायः प्रतिपद्यते तेजः' । 'हि जनः'—R. V. M. 'जन्तुः—M's Mss; Mackenzie Mss. B reads 'विदूषकं प्रति' for 'जनान्तिकम्' । 'प्रतिपालयतु' —B. P. 'परिपालयतु'—R. V. Śr. 'परिपालयितुम्'—K. M. Dr.

मातलिरिति । स्मित-लक्षणमुक्तं प्राक् । [अनेन विदूषक-पीड़न-घटनाया अकिञ्चित्-करत्वं सूच्यते] । 'किञ्चित्' ममाज्ञातं किमपि वस्तु 'निमित्तं' कारणं यस्य तस्मात् । 'विक्लवः' विह्वलः कातरः इति यावत् । **ज्वलतीति ।** 'अग्निः' निर्वाणोन्मुखः अनलः 'चलितानि' कम्पितानि [चल कम्पने । घटादित्वात् मित्वं, **"घटादयो** मितः" इत्युक्तेः । ततः **णिचि "मितां ह्रस्वः"**–(६।४।९२) इति ह्रस्वत्वम् । अन्यथा **'चालितम्'**] । 'इन्धनानि' काष्ठानि यस्य तथाभूतः सन् 'ज्वलति' पुनर्दीप्यते । 'पन्नगः' सर्पः [' 'पद्भ्यां न गच्छति यः सः **'पन्नगः' पृषोदरादित्वात् साधुः" इति प्रभा ।** यद्वा 'पन्नं पतितं गच्छति इति 'पन्नगः' । पन्नमिति पद्यते, क्तान्तं क्रिया-विशेषणम्" । "सर्वत्र-पन्नयोरुपसंख्यानम्", वा- २९६५—इति भट्टोजिदीक्षितः] । 'विप्रकृतः' निकृतः, केनापि दण्डादिना उद्वेजितः सन् इत्यर्थः ["निकृतिः स्याद् विप्रकृतः' इत्यमरः] 'फणं फटां ['फटायां तु फणा द्वयोः' इत्यमरः] । 'कुरुते' स्व-पराक्रम-प्रकाशार्थम् उत्तोलयति इत्यर्थः । 'हि' इत्यवधारणे 'प्रायः' बाहुल्येन ['प्रायो बाहुल्य-तुल्ययोः' इति विश्वः । अनेन ग्लानि-रुग्नादीनां व्यावृत्तिः बोद्धव्या] 'जन्तुः' प्राणिमात्रं 'कोपात्' उत्तेजनात् 'स्वं' स्वकीयं 'महिमानम्' आत्म-प्रभावं, तेज इत्यर्थः । 'प्रतिपद्यते' प्राप्नोति आविष्करोति इत्याशयः (अत्र **माला-दृष्टान्तालङ्कारः ।** 'भवान्' इति विशेषे प्रस्तुते 'जन्तुः' इति सामान्योक्तेः **अप्रस्तुत-प्रशंसा ।** एकस्य पराक्रम-प्रकाश-रूप-धर्मस्य वाक्य-भेदेन पृथङ्-निर्देशात् **प्रतिवस्तूपमा ।** पूर्वोक्तस्य चरण-द्वयस्य-

विशेषोक्तस्य परार्धोक्त-चरण-द्वयेन सामान्येन समर्थनात् **अर्थान्तरन्यासो** वा। एतेषां परस्पर-निरपेक्षतया **संसृष्टिः**। लतिलिते इति प्राप्रेति **छेक-वृत्त्यनुप्रासौ**। **आर्या** जातिः। ।।३१।। **राजेति**। 'अनतिक्रमणीया' अनुल्लङ्घनीया। 'दिवस्पतेः' इन्द्रस्य ('शतमन्युः दिवस्पति' रित्यमरः)। 'परिगतः' अवगतः 'अर्थः' एतद्वृत्तान्तः येन तथाभूतं कृत्वा। अर्थात् एतद्वृत्तान्तम् अभिधाय ("अथ माधव्यं प्रति भवता किमेवं प्रत्युक्तम्" इत्यादिना एतदन्तेन **शक्ति-नाम** अङ्गमुपक्षिप्तम् तल्लक्षणं यथा दर्पणे—"**शक्तिः** पुनर्भवेत्।। विरोधस्य प्रशमनम्" इति)। **त्वदिति**। 'केवला' अन्य-निरपेक्षा मम साहाय्यं विना इत्यर्थः। 'त्वन्मतिः' तव बुद्धिः ('बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः' इत्यमरः)। 'तावत्' मदागमन-पर्यन्तम् 'प्रजाः' राज्यवासिनः सर्वान् जनान् 'परिपालयतु' रक्षतु। ननु तव धनुषा इदानीं किं कार्यमिति आह, 'अधिज्यम्' आरोपित-मौर्वीकम् 'इदं' मदीयं 'धनुः अन्यस्मिन्' दानव-वध-रूपे 'कर्मणि' देवकार्ये (एतेन लोकद्वय-रक्षकत्वम् अस्य ध्वनितम्') 'व्यापृतम्' नियुक्तम् (**श्लोको** वृत्तम्) ।।३२।।

।। इति गौतम-श्रीरमेन्द्रमोहनवसु-विरचितायामभिज्ञान-शकुन्तल-टीकायां कुमार-सन्तोषिण्यां षष्ठोऽङ्कः ।।

227n.—1. ज्वलितेन्धनः—The root ञिइन्धी is रुधादि (६।४।६६), लट् इन्धे। ("**इन्धे** युद्धेषु यत्तेजः"–KR. 265] लिट् इन्धाञ्चक्रे, इन्धाम्बभूव, इन्धामास। 'आम्' after 'इन्ध' in लिट् is *optional* in the **Vedas,** but not in **भाषा।** Read "केचिदिन्धि भवतिभ्याञ्च" (1. 2. 6; 3393) इन्धे परस्य लिटः कित्व-विधान-सामर्थ्यात् आमः विकल्पमिच्छन्ति। तदिन्धेः **छन्दोविषयत्वात्** भुवो वुको (६।४।३३) नित्यत्वादित्यादि भाष्य-वार्तिक-विरोधादुपेक्ष्यम्"—*Jinedra-buddhi in his Nyāsa*. **2. विप्रकृतः**—Offended, insulted. Cf. "**सुप्त-सर्प दण्ड-घट्टनाद्** रोषितोऽस्मि तव विक्रम-श्रवात्"—*Ra. XI.* 71. (128n. 5.). **3. फणं कुरुते**—Our poet **usually writes 'फण'** (expanded hood of a snake). Cf. 'एते मणिभिः **फणस्थैः**' —*Ra. XIII.* 12; 'कराल-**फण**-मण्डलम्'—*XII.* 98; 'मृणाल-मृदुभिः **फणैः**'—*Ku. VI.* 68. But also Cf. 'तत् **फणा**-मण्डलोदर्चिः'—*Ra. X.* 7. **4. कोपात्** (*B*)—Supported by *K & Ś* seems to be **preferable** as just before this Śloka 'पश्चात् **'कोपयितुम्'** &c. occurs in Mātali's speech. Also Cf. "गां गतस्य तव धाम वैष्णवं **कोपितोऽसि** मया दिदृक्षुणा"—*Ra. XI.* 85. 'महाशीविषवत् प्रकुप्यति"—*SN. IX.* 14. **जन्तुः**—Cf. 'किन्तु रोषान्वितो **जन्तुः** हन्यादात्मानम् अच्युत'—*Mahā.* (*Droṇa.*

156, 95). "सर्वो विमृशते जन्तुः कृच्छ्रस्थो धर्मदर्शनम्। पदस्थः पिहितं द्वारं परलोकस्य पश्यति" ।—*Ibid.* (*Śalya.* 32, 59). **5. दिवस्पते:**—Involves grammatical difficulty. The word is evidently equal to 'दिवः (स्वर्गस्य) पतिः' but **why is it that षष्ठी is not elided (अलुक्) in the compound form**? Similar difficulty exists in **वाचस्पतिः**' **'वास्तोस्पतिः', 'भ्रातुष्पुत्र'** and so on. Considering that all these cases do not come under 'तत्पुरुषे कृति बहुलम्'—(6. 3. 14), *RM* says "तत्पुरुषे कृति बहुलम्, इत्यत्र बहुल-ग्रहणात् **अकृति अपि अलुक्**" । But "तन्न, पातेर्डतिः । (उः-५०६)" इति ऊणादि सूत्र-सत्त्वात् ।।—BhD. Next he continues—वस्तुतस्तु "षष्ठ्याः पति-पुत्र-पृष्ठ-पार-पद-पय-स्पोषेषु" (८।३।५३; ३६३८) इति सत्त्व-विधान-सामर्थ्यात् लोक-वेद-साधारण्येन—**"वृद्ध-कुमारी-वर"**-न्यायेन अलुक् ज्ञापितः । कस्कादित्वात्—(८।३।४८; १४४) सः । यत्तु "षष्ठ्याः पतिपुत्र—" इति सत्वम् इति मुकुटेनोक्तम् ।। तन्न ।। **तस्य छन्दोऽधिकारात्**' । *i.e.* अलुक् of षष्ठी विभक्ति of दिवः is to be **inferred** from the *Vedic Sūtra* (8. 3) 53) by the **"Maxim of the old virgin's boon" (वृद्ध-कुमारी-वर-न्याय)** which has been thus explained by *Patañjali:*—"वृद्ध-कुमारी इन्द्रेणोक्ता, 'वरं वृणीष्व' इति। सा वरम् अवृणीत—**'पुत्रा मे बहु-क्षीर-घृतमोदनं कांस्य-पात्र्यां** भुञ्जीरन्' इति। न च तावदस्याः पतिर्भवति। कुतः, पुत्राः। कुतो गावः। कुतो धान्यम्। **तत्राऽनया एकेन वाक्येन 'पतिः' 'पुत्राः', 'गावः', 'धान्यम्'** इति **सर्वं** संगृहीतं भवति इति"—*MBh* on "न मु, ने"—(8. 2. 3). In other words, the boon covers all that she wishers to have, such as **progeny, abundance of corn, cattle** and **Bell-metal.** Similarly because the *Vedic Sūtra* (8.3.53) enjoins that the षष्ठी-विसर्जनीय should be changed into 'स्' with such words as पुत्र &c., therefore the inference about *Pāṇini's* view is that the षष्ठी विभक्ति in such cases should be अलुक् in the समासवाक्य। Next कस्कादित्वात् सः। *BhD* follows *Vardhamāna* who has included **दिवस्पति** in the **कस्कादि** list which is **आकृतिगण** । *Kramadiśvara* has **simplified** all such anomalies by framing a Sūtra **"क्वचिदन्यत्रापि"** (*Also MN on Ku. III.* 30). **6. त्वन्मतिः केवला** &c.—The kingdom is well governed by the king if he is assisted by his ministers. Cf. 'सदानुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसंपदः'—*Ki.* 1. 5. Also *MS. VII.* 36-37. But in this

particular case the king is engaged elsewhere,, hence the minister has alone to carry on the work. 'परि+पा 'means **'to protect'** Cf. "क्लिश्नाति लब्ध-परिपालन-वृत्तिरेव"—*Śak. V.* 6; *NP. I.* 20; *MM X.* 25; *Y. I.* 334; *MS. IX.* 251; **प्रतिपालयतु**—(*B*) is not good, for Kāli. always uses 'प्रति+पा' to mean **'to await'**. Cf. **'प्रति-पा-**ल्यावसर: खलु प्रस्ताव:'—*Śak. VII*; *Also vide* (187*n.* 4).

Remark :—The students should note carefully that forms like **ह्रिय, अह्मेषु, अह्मे, विह्मरिवो, अब्बह्मण्णम्** etc. as found in many **printed books and commentaries** are **terribly erroneous,** for Sanskrit combinations like **ह्न ह्ल, ह्म when rendered into Prākṛta** न, ल, म will have the **upper or the First** position by the rule—"ह्न-ह्ल-ह्मां न-ल-मां **स्थितिरूर्ध्वम्**"—**Prākṛta Prakāśa,** III. 8. Read—"एषु संयोगेषु **अध:** **स्थितानां** न-ल-मामित्येतेषां वर्णनां **हकारस्य स्थितिरूर्ध्वं** भवति। संयोग-वर्णयो: परिवृत्तिर्भवतीत्यर्थ:" ।—Sañjivanī thereon; "एषु संयोगेषु हस्य अध:स्थितानां लादीनां **तदुपरि स्थिति:** स्यात् । जिम्हो जिह्म:"—Subodhinī; also 'Introduction to Prākṛta'—Woolner. pp. 22-47; 'ष्मादे म्हः'—'Sankṣipta-Sāra-Vyākaraṇa,' VIII. 94; 'Mārkaṇḍeya Prākṛta-Sarvasva', II. 43. 'Paia-Sadda-Mahannavo' (Introduction) pp. 41. 15. Saḍ-Bhāṣā-Candrikā of Lakṣmīdhara, 1/4/67; 'Prākṛta-rūpāvatāra' of Siṁha-Rāja, pp. 53. Now see (3n. 1.)—(**ह्रिय**)

Time-analysis of Act VI—A long interval of about **six years** or so separates the Sixth Act from the previous one. This we infer from the following considerations :—(*i*) The interval between Acts VI and VII is very short, and not more than a day. [(देवा एव तथा * * यथा **अचिरेण** धर्मपत्नीम्'—&c.—Act VI; also Time-analysis of Act VII.] (*ii*) From the childish pranks and talks of **सर्वदमन**, his age seems to be six years or so. (*iii*) According to the Mahā. also **'सर्वदमन'** is six years old· (**'षड्वर्ष** एव बाल: स कण्वाश्रमं प्रति) * * । The Induction begins in the morning. The fisherman was perhaps caught at 8 or 9 A.M. (*i.e. in the market-time*) in a suburban high street where he was wandering over the market-place for a buyer for the ring

(188n. 3). Later on he was dragged all the way up to the wicket of the city-gate. Several hours may be supposed to have passed between Śyāla's going to and returning from the palace with gift. ['जानुक, चिरयति खलु आवुत्तः' । 'ननु अवसरोपसर्पणीया राजानः'] । Most likely the scene ended in the evening when the party proceeded towards a vintner's shop. ['तत् शौण्डिकापणमेव गच्छामः'] । The Act proper begins in the morning, and Sānumatī after finishing her attendance to the *morning* ablution of the sages (perhaps worshipping the sun; Cf. 'अप्सरो-वार-पर्यायेण इह भगवतः सूर्यस्य पादमूलोपस्थाने वर्तमाना' &c—*Vik. Act. VI.*) met the maid-servants of the king not later than 10 A. M. The worshipping of Kāmadeva is also in keeping with this time. The king kept late hours on the previous night, and consequently having got up late (198*n*. 6) could not attend the *morning* court in time. [Cf. 'उत्थाय पश्चिमे यामे कृतशौचः समाहितः * * प्रविशेत् स शुभां सभाम्'—*MS. VII.* 145; 183*n*.—*Time Analysis*). Hence he informs the minister to send all the cases that have been investigated, on paper. The conversation of the king with Vidūṣaka continued for a long period when Viūdṣaka was pinched with hunger ('कथं बुभुक्षया खादितव्योऽस्मि'—VI. p. 74) Hence the Act perhaps closes not later than two in the afternoon The season is spring and about two weeks' time may be supposed to intervene between the Induction and the main Act before the pangs of love could have produced such a remarkable change in the king's mind and person (*Śl.* 6). Śak-affair has also by this time been thoroughly public ('बहुलीभूतमेतत् किं न कथ्यते'—VI. p. 35)

सप्तमोऽङ्कः

Text:—(ततः प्रविशत्याकाश-यानेन रथारूढो राजा मातलिश्च) ।

राजा—मातले ! 'अनुष्ठित-निदेशोऽपि मघवतः सत्क्रिया[2]-विशेषादनुपयुक्त-मिव[3]-आत्मानं समर्थये ।

(*Enter along the aerial path, the king seated on a chariot with Mātali*). King—Mātali, although (*I*) have executed[1] (*his*) commission[1], yet because[2] of his extraordinary [*or excessive*] honour[2] (*accorded to me, I*) consider myself (*quite*)[3] unworthy (*of it*)[3]

मातलिः (सस्मितम्)—आयुष्मन् ! उभयत्राप्यसन्तोषम् अवगच्छ । कुतः—

वियोगिनी
[ससजग १।३
सभरलग २।४]

प्रथमोपकृतं मरुत्वतः
प्रतिपस्या[4] लघु[5] मन्यते भवान् ।
गणयत्यवदान-विस्मितो[6]
भवतः सोऽपि न सत्क्रियामिमाम् ।।१।।

Mātali (*With a smile*)—My Long-lived King ! know (*that*) dissatisfaction (*lies*) in both of you. Your Honour underrates[5] the prior services (*rendered by you*) upon Indra by reason of the (*subsequent*) honour[4] (*shown to to you by him*). He, too, amazed[6] at your (*heroic*) deeds[6] takes no account of this honour (*bestowed on you*). (1).

V.L.—'०यानेन'—R. V. M. K. '०वर्त्मना'—B. P. 'रथयानेन'—Dr.; K. B. & Śr have 'रथारूढ़:' for अधिरूढ़:' । 'उभयमप्यपरितोषं समर्थये'—&c.—R. V. M. 'उभयत्राप्यसन्तोषम् अवगच्छ'—B. P.; S & K omit 'समर्थये' । 'कुतः'—B; Omitted by others. The first half is thus read in B & Dr.—"उपकृत्य हरेस्तथा भवान् लघु सत्कार-मवेक्ष्य मन्यते" । 'अवदान'—R. B. K. M. 'अपदान'—S. Dr. 'विस्मितः'—R. V. 'तोषितः'—M. Colebrooke Mss. 'सम्मितां'—B. ०'क्रियागुणान्' —R. K. S. M. V. ०'क्रियामिमाम्'—B. Dr. HS.

तत इति । [इतःप्रभृति ग्रन्थ-समाप्ति यावत् **निर्वहण-सन्धिः** । तल्लक्षणं यथा दशरूपके—'वीजवन्तो मुख्याद्यर्था विप्रकीर्णा यथायथम् । एकार्थम् उपनीयन्ते यत्र निर्वहणं हि तत्" । तथा चात्र **शकुन्तला-प्राप्ति-रूपं कार्यं** नाम अर्थ-प्रकृतिः । तल्लक्षणं मातृगुप्ताचार्यैरुक्तम्—"यदाधिकारिकं वस्तु सम्यक् प्राज्ञैः

प्रयुज्यते। तदर्थो यः समारम्भ स्तत् **कार्यं** कथ्यते इति"—दुष्यन्तस्य पुत्रेणापि सह **धर्मपत्नी-लाभात् फलयोगो** नाम कार्यावस्था सूचिता। तल्लक्षणं यथा दर्पणे—"सावस्था **फलयोगः**स्याद् यः समग्र-फलोदय" इति। अत्र दानव-युद्धं युद्धत्वेन साक्षात् निषिद्धमित्यङ्केनैव सूचितम्। प्रकृते प्रयोजनाभावात् अन्यद्वारा वाचिकाऽभिनयेनापि नोक्तम्। अनङ्गस्य अभिधानमिति रसदोषापत्तेः। अतः कृत-कार्ययोः सूत-रथिनोरेव प्रवेशः। तत् संवादेनैव कार्यमुन्नेयम्)। 'अनुष्ठितः' प्रतिपालितः 'निर्देशः' दानव-वध-रूपः आदेशः तथोक्तः अहम्। 'मघवतः' इन्द्रस्य अयं शब्दः **मध्य-मणि-न्यायेन** पूर्वपदेन परपदेन च सह अन्वेति। **सापेक्षत्वेऽपि गमकत्वात्** समासः]। **सती क्रिया इति 'सत्क्रिया' आदरः अभ्यर्थना** इति यावत् [तथाचोक्तं श्रीगीतायां "सद्भावे साधुभावे च सदित्येतत् प्रयुज्यते। प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते"॥ १७।२६] तस्याः 'विशेषः' अतिशयः तस्मात् सम्भावनाऽतिशय्यात् इत्यर्थः [हेतो ५मी] 'अनुपयुक्तं' सर्वथा अयोग्यम् 'समर्थये' मन्ये। [यन्मया कार्यं कृतं तदिन्द्र-संमाननायाः सहस्रांशेनापि तुलयितुं न क्षममिति **सूक्ष्मालङ्कारः**]। **मातलिरिति**। उभयोरपि असन्तोष-दर्शनेन कौतुकात् स्मितम्। 'उभयत्रापि' त्वयि दुष्यन्ते मघवति च ['तयप्'—प्रत्ययस्य (५।२।४२) स्थाने 'अयच्' (५।२।४४)। 'असन्तोषं' परितोषस्य अनुदयम्। इन्द्रस्तु त्वत्-कर्माधिकं मन्यते। त्वं तु इन्द्र-कृतं सत्कारम् अधिकम् मन्यसे इति भावः। तदेव वक्ष्यमाण-श्लोकेन स्पष्टयति। **प्रथमेति**। 'भवान् मरुत्वतः' इन्द्रस्य ['इन्द्रो मरुत्वान् मघवा' इत्यमरः] 'प्रतिपत्त्या' गौरवेण, पश्चात् कृतया सम्माननया ['**प्रतिपत्तिः** प्रवृत्तौ च प्रागल्भ्ये **गौरवेऽपि** च' इति मेदिनी] 'प्रथमम् उपकृतं' दानव-जय-रूप-पूर्वोपकारं 'लघु' तुच्छं 'मन्यते। अतएव भवतः असन्तोषं इति भावः। तथा 'सोऽपि' इन्द्रश्च 'भवतः' तव दुष्यन्तस्य 'अवदानेन' पराक्रमेण] इति रघु-टीकायां मल्लिनाथपादाः। **'पराक्रमः अवदानं स्यात्'** इति भागुरिः] दुर्जय-दानव-गण-वधात्मकाऽतीत-कर्मणा इत्यर्थः। 'विस्मितः' सञ्जाताश्चर्यः 'इमाम्' ['इदमस्तु सन्निकृष्टमि'त्युक्तेः] सम्प्रति आत्मना विहितां 'सत्क्रियां' सम्माननां 'न गणयति' न योग्यां मन्यते। अतस्तस्यापि असन्तोष इति भावः। [**हेतु-श्रुत्यनुप्रासौ**। **उपमेयोपमा व्यङ्ग्या**। परस्परं क्रिया-जननात् **अन्योन्या-लङ्कारः**। अत्र सत्क्रिया-लक्षणे कारणे सत्यपि यद्गणन-लक्षण कार्याऽनुत्पत्तिः सा किं **विशेषोक्ति** किंवा गणना-भाव-लक्षण-कार्योत्पत्तौ कारणाऽभावात् **विभावना** [कारणाऽभावस्तु तद्विरुद्धमुखेनोक्तः] इति **विशेषोक्ति-विभावनयोः** सन्देह-सङ्कर इत्युभयोः परस्पर-निरपेक्षतया **संसृष्टिः**। **सुन्दरी** इत्यपरनाम **वियोगिनी-वृत्तम्**। **अन्ये तु वैतालीयमेतत्** इत्याहुः) ॥१॥

228n.1. मघवतः—(226n. 4.) may be connected with

both 'अनुष्ठित-निदेश:' (अनुष्ठित-मघवन्निदेश:) and 'सत्क्रियाविशेषात्' by '**मध्य-मणि-न्याय**' [A brilliant gem placed in the middle of a necklace, enhances its beauty on both sides.] or by '**देहली-दीपक-न्याय**' [A lamp hanging over the thresh-hold ('देहली) of a house, by its peculiar position, serves to light the rooms on both sides of the thresh-hold], or by '**काकाक्षि-गोलक-न्याय** [A crow (एकाक्ष) serves its purpose by moving its 'one pupil', as occasion requires, from one socket to another]. Here one word serves two purposes. The construction is justified by the maxim '**सापेक्षत्वेऽपि गमकत्वात् समास:**' । Read 'संबन्धिशब्द: सापेक्ष: नित्यं सर्व:समस्यते । वाक्यवत् सा व्यपेक्षा हि वृत्तावपि न हीयते' ।। *Read* [9*n*. 7.]. **2. सत्क्रिया-विशेषाद्**—Owing to extraordinary or special mark of distinction. (33*n*. 2). **3. उभयत्र** &c.—This is the **best reading.** In the other reading ['उभयमप्यपरितोषं समर्थये' **unnecessarily repeated,** sounds *un-kālidāsian*. Note also that this word is not only omitted by *K* and *S* but also in some Devanāgara Mss. This raises great doubt about the authenticity of this reading. **4. मरुत्वत:**—मरुत्(मृ+उति) means 'Gods in general'. Cf. *Ra. XII.* 101; *VI. I* 'मरुताम् अमराणाम्'—*MN.* मरुत: सन्ति अस्य इति मरुत्+मतुप् [5. 2. 94.]=मरुत्+वत् [म=व by 'झय:' 8. 2. 10]=मरुत्वत् (*Indra*), and not 'मरुद्वान्', as तकारान्त-word followed by 'मतुप्', is a '**भम्**', and not a '**पद**' । "**तसौ मत्वर्थे**' (१।४।१९) इति **भत्वात्** जश्त्वा-भाव:"—*BhD.* "मत्वर्थीय-प्रत्यये परे **तकारान्त**-प्रकृति: सकारान्त-प्रकृतिश्च **भम्** उच्यते । (१।४।१८) मरुत्वान्—**Prabhā.** In the Vedice literature, however, 'मरुत्' means the '*Gods of Storm*' and **Indra is called** '**मरुत्वान्** as he accompanied by them, killed his foe *Vṛtra*. In *HV. I.* 3, 'मरुत्'s are spoken of as the **step-brothers** of इन्द्र । **5. प्रतिपत्त्या**—Honour, mark of distinction. Cf. *Śak. IV.* 17; *Ra. XIV.* 12; *XV.* 22. 'स्थान-प्रतिपत्ति'—*UC. VII*; (20*n*, 4). **6. अवदान** &c.—अव+दो (छेदने)—(लट् द्यति) । Or from, दैप् (शोधने । लट् दायति) । Or from, दाप् (छेदने । लट् दाति) with 'ल्युट्' which in all cases, is to be used in '**भावे**' or '**करणे**' । The word means a '*valorous act*', '*act of heroism*' (*Com.*)

'अवदानं पौरुषम्'—*K.* Cf. 'प्रवीणैः संगीयमानः त्रिपुरावदानः'—*Ku. VII.* 48. 'प्रापत् अस्त्रम् अवदान-तोषितात्'—*Ra. XI.* 21. 'वीर्यावदानेषु कृतावमर्षः'—*Ki. III* 43. 'अपदान'—Has the **weighty support** from (Rām. IV. 40; VI. 19). Indra has been stunned by your extraordinary power. Most probably there was **no serious fight at all.** The demons were perhaps vanquished very easily. *Vide Śak. III.* 1; *also Time-analysis. of Act. VII.* **7. सत्क्रियामिमाम्**—Refers to honour **recently shown** to Duṣyanta (*Com.*) 'सत्क्रिया-गुणान्' is the other reading which has been explained as 'सत्क्रिया-विशेषाम्' by *K* [as 'गुण' at the end of a compound has the sense of 'विशेष' । Cf. 'सम्भावना-गुणम्'—*Infra.* Śl. 4.], but there is no reason why all on a sudden, **Plural number** should be used, as the idea has already been expressed with **Singular number.** Cf. 'सत्क्रिया-विशेषात्'—*Supra*, and 'सम्भावना-गुणम् अवेहि तमीश्वराणाम्'—*VII.* 4. *Infra.*

Remark :—In the beginning of this Act, **Kāsmīrian Mss.** introduces a प्रवेशक with two dancing celestial nymphs, talking about the prowess of दुष्यन्त । But this being not supported by any other recension is rejected.

Text :—राजा—मातले ! मा मैवम् । स खलु मनोरथानामप्यभूमिः[1] विसर्जनावसर-सत्कारः[2] । मम हि दिवौकसां[3] समक्ष मर्धासनो-पवेशितस्य—

[उपजाति ततजगग जतजगग] [4]अन्तर्गत-प्रार्थनमन्तिकस्थं जयन्तमुद्वीक्ष्य कृत-स्मितेन ।
[5]आमृष्ट-वक्षो-हरिचन्दनाऽङ्का मन्दार-माला हरिणा पिनद्धा[6] ॥२॥

King—Nay, Mātali (*say*) not so. That[2] honorary distinction, at the time of (*my*) dismissal,[2] was certainly beyond[1] the compass of even the (*warmest*) expectations. For—Seating me on (*his*) half-throne, in presence of the denizens[3] of heaven[3], a garland of Mandāra (*flowers*)[5], tinged by the (*celestial*) yellow-sandal,[5] rubbed off from (*his*) breast[5], was fastened[6] (*round my neck*) by Hari himself, as he smiled looking up at Jayanta who was standing near by and [4]inwardly longing (*for the same distinction*)[4]. (2)

V. L.—'अभूमिः'—K. R. M. दूरवर्ती'—B. S has '० प्रार्थित ०'—for ० प्रार्थना ०' ।

राजेति । 'मां मैवं' ब्रूहीति शेषः । 'स' मयाऽनुभूतः ['प्रक्रान्त-प्रसिद्धाऽनुभूतार्थेषु यच्छब्दः तच्छब्दं नापेक्षते' इति मम्मटभट्टः] 'विसर्जनस्य अवसरे' स्व-

राज-धान्यां प्रत्यावर्तन-वेलायाम्। 'सत्कारः' संमाननम्। 'खलु' इत्यवधारणे। 'मनोरथानाम्' अभिलाषाणाम् 'अपि **अभूमिः' अविषयः** [इति शिशूपालवध-टीकायां मल्लिनाथपादाः-१।४२] एतावत् संमाननं स्यादिति कल्पनैव नासीत् इति भावः। 'हि' इति हेतौ। 'दिवौकसां' एकस्य न, अपितु सर्वेषां देवानाम् ['स्यात् **दिवौकाः दिवोकाश्च** देवे चापिह पक्षिणि' इति रन्तिदेवः]। श्रूयमाण--तया न, अपितु 'समक्षम्' अक्ष्णोः समीपे। आसनमात्रे न, अपितु स्वकीयस्य 'अर्धासने' [**' अर्धं नपुंसकम्'**—(२।२।२)–इति **समांशवाचिनः अर्ध-शब्दस्य पूर्व-निपातः**] उपविष्टस्य न, अपितु 'उपवेशितस्य' 'मम' मनुष्यमात्रस्य इत्यस्य वक्ष्यमाणेन श्लोकेन अन्वयः। **अन्तरिति**। 'अन्तः' हृदयं 'गता' इति 'अन्तर्गता' हृदयस्थिता, न पुन र्वाचा प्रकटिता इति भावः। 'प्रार्थना' मन्दार-माला-विषयिणी याच्ञा यस्य तादृशम्। जनक-सकाशात् प्रसाद-रूपेण मन्दार-विरचितां मालां लब्धुकामम् इत्यर्थः। न दूरस्थम् अपि तु 'अन्तिकस्थं 'जयन्तं' स्व-तनयं ['जयन्तावैन्द्रि-गिरिशौ जयन्त्यु-मा-पातकयोः' इति कोषः। अन्तिकस्थ-पदेन स्व-पुत्रस्य प्रेमास्पदत्वं व्यज्यते] 'उद्वीक्ष्य' लोचने उर्ध्वं कृत्यावलोक्य [अनेन **जयन्ताद्याः सर्वे नोपविष्टा** इति सूचितम्] 'कृतं स्मितम्' ईषद्धसनं ["स मनाक् स्मितम्" इत्यमरः। तल्लक्षणं तु प्रागुक्तम्]। येन तथोक्तेन [जयन्तस्य मालाऽभिलाषं ज्ञात्वा कौतुकोदयात् इन्द्रस्य हास्यं ज्ञेयम्। अनेन जयन्तादपि आत्मनः अधिक-स्नेह-पात्रता ध्वन्यते]। 'हरिणा' इन्द्रेण ['हरिरिन्द्रो हरिर्भानुः' इति गदसिंहः] 'आमृष्टं' घर्षणेन विलुप्तं 'वक्षःस्थं' यत् 'हरिचन्दनं "हरेः इन्द्रस्य चन्दनम्'। 'हरि' कपिल-वर्णम् चन्दनम्" वा [इति भानुजिदीक्षितः। 'गोशीर्षाख्यं चन्दनम्' इति रघुटीकायां मल्लिनाथः ६।६०, '**हरिचन्दनमस्त्री** स्यात् त्रिदशानां महीरुहे। नपुंसकं तु गोशीर्षे ज्योत्स्ना-कुङ्कुमयोरपि॥ इति मेदिनी] तदेव 'अङ्कः' चिह्नम्। यस्याः तादृशी 'मन्दारस्य' देवतरु-विशेषस्य पुष्पाणि इति 'मन्दाराणि' ["पुष्प-फल-मूलेषु बहुलम्"—इति कात्यायन-वचनात्—(४।३।१६५)-विकारार्थक- प्रत्ययस्य **अणो लुक् भवति वा**] 'तेषां माला' स्रक्, सहासनोपवेशितस्य 'मम' कण्ठे इति शेषः। 'पिनद्धा, न तु दत्ता, किन्तु स्वयं परिधापिता [अपि पूर्वात् नह्यतेः कर्मणि क्तः। 'वष्टि भागुरिः अल्लोपम्"—इति वचनात् **अकार-लोपः पाक्षिकः**। "आचार्य-ग्रहणे च विभाषा वक्तव्या" इति परिभाषोक्तेः]। [गौरवस्याधिक्यात् **उदात्तालङ्कारः**। न्तन्तेति न्दन्देति **छेक-वृत्त्यनुप्रासौ**। **उपजातिः** वृत्तम्] ॥२॥

229n.—1. अभूमिः—Lit. 'an unfit place or object;' 'not proper object for'—AD. Hence beyond the range of my highest expectation. Cf. 'अभुद् **अभूमिः** प्रतिपक्ष-जन्मनाम्'—*ŚPB. I.* 42. '**नाम्-बभूमिः** स्मर-सायकानाम्'—*NC.* '**अभूमिः** इयम् मालाविकायाः'—*Māla.. III.*

'अभूमिरियमविनयस्य'—*Śak. VII.* **2. दिवौकसां—द्यौः** ओकः येषां ते 'दिवौकसः' देवाः। (*Rām. VI.* 61; *Ki. XIII.* 37). **'पृषोदरादित्वात् साधुः** —*MN on Ra. III.* 19; *M* considers **दिवौकस् to be irregular** and puts in under **पृषोदरादि**–list, the regular from being **'दिवोकस्'** । Cf. **'दिवोकाश्च** पुंसि देवे च चातके'——*Medinī.* BhD gives **a better derivation** with "**अकारान्त दिव**' (*Neuter*). Cf. द्यो स्त्री स्वर्गे च गगने **दिवं** क्लीवं तयोः स्मृतम्"—*Medini,* supported by *Abhidhāna-Cintāmaṇi.* Next दिवम् ओकः येषां ते दिवौकसः । **मम—**Either 'षष्ठी शेषे' or *vide Com.* **3. अर्धा-सनो-पवेशितस्य**—When **'अर्धम्'** means **'half',** then in एकदेशी समास (अर्धम् आसनस्य), the form will be 'अर्धासनम्' (Vide Com.). [But this is **not a bar to षष्ठी तत्पुरुष, so आसनस्य अर्धम्**='**आसनार्धम्**' meaning **being the same.** Read—न च **'सम-प्रविभागे' षष्ठी-समासं बाधितुमिदं** सूत्रमिति वाच्यम्। **षष्ठी-समासस्य इष्टत्वात्।** अतएव कालिदासः प्रायुङक्त—"**प्रेम्णा शरीरार्ध-हरा हरस्य**"–**T on 713**]. Duṣyanta was perhaps hesitating as to the propriety of his sitting on the same seat with Indra, while all the gods were standing (n, 5), but he was **made to sit by Indra himself.** This is the "**highest honour**" that one can aspire after. *Daśaratha* was also similarly honoured, when he had killed the demon 'सम्बर। Cf. **'सहासनं** गोत्रभिदाऽध्यवात्सीत्'—*BK. I.* 3; **'अध्यासयन् आसनमेक**मिन्द्रम्' &c—*Ibid. II.* 46.**4. अन्तर्गत** &c.—Indra could understand that Jayanta had been all the while *inwardly* longing for the garland, but considering his own inability, he smiled and offered the garland to the king. **5. उद्वीक्ष्य**—This suggests that Jayanta (*and perhaps all other gods*) were **standing** (*Com.*) **6. ०हरिचन्दनाऽङ्का**—For हरिचन्दन vide *Ku. V.* 69; *Ra. III.* 59; *VI.* 60 (*Com.*). This is a kind a "**Yellow sandal**" growing in the Malaya mountain 'मलयैकदेशजातं * * * **कपिल-वर्णत्वात्** हरि च तच्चन्दनञ्च इति हरिचन्दनम् उत्पलगन्धि अति-सुरभि शीतलतया सदैव सर्प-वेष्टितम्'—*Bharata.* It is exceedingly cool and soothing. 'Read **हरिचन्दनन्तु** दिव्यं हिमं तदिह दुर्वहं मनुजैः । पित्ताटोप-विलोपि-वमथु-भ्रम-शोष-मान्द्य-मेदोहृत्'॥–*RN.* Or, it may **technically** mean **a particular kind of ointment** *prepared by the combination of various fragrant things and it is used as unguent.*

Read "घृष्टञ्च तुलसीकाष्ठं कर्पूराऽगुरु-योगतः । अथवा केशरैर्योज्यं हरिचन्दन मुच्यते"—*PP. Ch. XII.* **7. मन्दार-माला**—Vik. 1. 6. **मन्दार**—(*Erythrina Subarosa*) is one of the five trees of Indra's Paradise. "पञ्चैते देवतरवः मन्दारः पारिजातकः । सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम्"—*AK.* Cf. PA &. *MD* 67; 75; *Vik. IV.* 35. **पिनद्धा**=अपिनद्धा—(24n. 10)

Text :—मातलिः—किमपि नामाऽऽयुष्मानमरेश्वरान्नार्हति । पश्य—

द्रुतविल -म्बित (नभभर) 'सुखपरस्य'हरे रुभयैः कृतं त्रिदिवमुद्धृत-दानव-कण्टकम्' ।
तव शरैरधुना-नत-पर्वभिः[४] पुरुष-केसरिणश्च पुरा नखैः ॥३॥

Mātali :—What forsooth does not Your Long-lived Highness deserve (*at the hands*) of the Lord of the immortals. Remember—The heaven of the [1]pleasure-loving[1] Indra[2] has been rendered[3] free from the plague [*Lit. thorn*] of demons by[3] (*these*) two things—by thy[4] flat-jointed arrows[1] now, and by the claws of the Man--lion in days of yore. (3)

राजा—अत्र खलु शतक्रतोरेव महिमा स्तुत्यः[५] ।

सिध्यन्ति कर्मसु महत्स्वपि यन्नियोज्याः[६]
वसन्ततिलका [७]सम्भावना-गुण मवेहि तमीश्वराणाम्[८] ।
(तभजजगग) किं वाऽभविष्यदरुण स्तमसां विभेत्ता[९]
तं चेत् सहस्र-किरणो धुरि[१०] नाकरिष्यत् ॥४॥

King—Herein the greatness of the performer of hundred sacrifices (*is*) really to be admired[5]. That delegates[6] succeed in mighty undertakings—know that (*to be the result of*) the condescending[7] grace[7] of (*their*) masters.[8] Could Aruṇa become the dispeller[9] of (*the nocturnal*) gloom, had not the thousand-rayed (*sun*) placed him in the van[10] (*i. e. yoke*) of his chariot ? (4)

V. L.—B & R omit 'नाम' after 'किमिव' । 'सुखपरस्य'—R. B. V. 'सुर-सखस्य'— M; B omits 'स्तुत्यः' and reads तत्र' for 'अत्र' । S has 'मा मैवम्" before 'अत्र' । The third line of Śl. 4 is thus found in B & Dr—'किं प्राभविष्यदरुण स्तमसां वधाय' ।

मातलिरिति । 'अमरेश्वरात्' देवराजात् [अनेन मनोरथा-तीत-वस्तु-दानेऽपि सामर्थ्यं ध्वनितम्] । 'किमिव नाम' वस्तु ['नाम' इति सम्भावनायां] 'नार्हति' प्राप्तुं न योग्यो भवति, अर्थात् 'यदतिप्रियम् अतिरम्यम् अत्युत्कृष्टं जीविताय-मानमपि तदपि अर्हति अन्यद् अर्हति इति किं वक्तव्यम्' इति राघवपादाः । **सुखेति** ।

'पुरा' कृतयुगे पुरुषश्चासौ केसरी च इति 'पुरुष-केसरी' तस्य, नृसिंह-रूपिणः विष्णोः 'नखैः' नखरैः (६।६।७५-इतिसूत्रेण सिद्धम्)। [एतेषां बहुत्वात् बहुवचनम्]। 'अधुना' सम्प्रति **'आनतानि'** ईषत् कुटिलानि 'पर्वाणि' ग्रन्थयः येषां तादृशैः। [मसृणत्वात् शराणां शीघ्र-गतित्वं व्यज्यते। नख-पक्षे **'नतानि** पर्वाणि' संधि-बन्धाः येषाम् तैः अर्थात् नम्रीभूत-सन्धिभिः नखरैः इति व्याख्येयम्]। 'तव' दुष्यन्तस्य 'शरैः च' इति 'उभयैः [**भाष्यकार-वचन-प्रामाण्यात् बहुत्वे प्रयोगः**]। 'सुखे परः' आसक्तः, यद्वा 'सुख' मेव 'परं' प्रधानं यस्य। केवलं विषय-सम्भोग-सुख-निरतस्य, न तु विग्रहा-दि-गुरुतरे व्यापारे प्रवर्तितुमभिलषतः 'हरेः' इन्द्रस्य 'त्रिदिवं' स्वर्गः [प्रायेणास्य पुंलिङ्ग-प्रयोगः दृश्यते। नपुंसक-निर्देशस्तु हेमचन्द्र-सम्मतः]। 'उद्धृताः उन्मूलिताः 'दानव-रूपाः कण्टकाः' यस्मात् तथाभूतं कृतम्। [अत्र प्रस्तुताऽप्रस्तुतयोः नृप-शर-पुरुषसिंह-नखयोः 'कृतम्' इत्येकया क्रियाऽभिसम्बन्धात् **दीपका-लङ्कारः**। राघवस्तु 'इन्द्रं प्रति उभयस्य अप्राकरणिकत्वे नत-पर्वत्व-साम्यात् **तुल्ययोगिता'** इत्याह। अतएव नखैः शराणां नृसिंह-पदेन चापस्य राज्ञ **औपम्यं** ध्वनितम्। 'प्रधानस्य दानव-कण्टको-द्धरणस्य **समासे गुणीभावात् विधेयाविमर्शदोषः**। स च "सुखपरस्य हरेरुभयैः किल त्रिदिव-दानव-कण्टकोद्धृतम्" इति पठित्वा समाधेयः"—इति सिद्धान्तवागीशपादाः।। **द्रुतविलम्बितं** वृत्तम्] ।।३।। **राजेति**। 'स्तुत्यः' प्रशंसनीयः। अत्र एव-शब्दः अन्योपयोग-व्यवच्छेदार्थकः। **सिध्यन्तीति**। **'नियोज्याः' सेवकाः** [**"नियोज्य**-किंकर-प्रैष्य-भूजिष्य-परिचारकाः" इत्यमरः। -७।३।६८] 'महत्सु' गुरुतरेषु 'अपि कर्मसु' कार्येषु 'सिध्यन्ति' कृतकार्याः भवन्ति इति 'यत्' 'तम्' [इत्यत्र **विधेय-प्राधान्यात् पुंनिर्देशः**] 'ईश्वराणाम्' अधीशानां स्वामिनाम् इति यावत् ["ईश्वरः शङ्करेऽधीशे तत्—पत्न्याम् **ईश्वरीश्वरा**" इति बोपालितः] 'संभावनायाः' तैः विहितस्य गौरवस्य ["संभावना वासनायां गौरवे ध्यान-कर्मणि" इति नानार्थ-संग्रहे अजयपालः]'गुणम् फलं सामर्थ्यमिति यावत् ('सम्भावना-गुणम्' सत्कार-विशेषम् इति काटयवेमपादाः] 'अवेहि' जानीहि। स्वामिनः महत्वेनैव कार्यनिष्पत्तिः, अत्र सेवकानां कोऽपि नास्ति सामर्थ्यम् इत्या-शयः। यद्वा **विद्यासागर-मते,** 'अस्मिन् व्यापारे अयं जनः सर्वथा योग्यः', इत्येवं-विधायाः स्वामिना विहितायाः 'संभावनायाः गुणम्' फलम् अवेहि ["सम्भावनम् अकृतासु अपि क्रियासु योग्यताया अध्यवसानम" इति 'संभावने अलम्—" (३।३। १५४) इति सूत्र-व्याख्यायां **प्रभा**]। तदेव वक्ष्यमाणोदाहरणेन समर्थयति। 'अरुणः' गरुडाग्रजः सूर्य-सारथिः 'तमसाम्' अन्धकाराणां 'विभेत्ता' नाशकः [ण्वुल् तृचौ'-(३।१।१३३)-इति कर्तरि तृच्। 'तृणा' तु **षष्ठी बाधिता** स्यात्(२।३।६९)] **'किंवा'** कथं ['किंवा' इति निपातसमुदायः कथमर्थे'—इति राघवपादाः] **'अभ-विष्यत्' कथमपि न** इत्यर्थः। **'चेत्'** यदि 'सहस्र-किरणः' सूर्यः (इति हलायुधः)

'तम्' अरुणं 'धूरि' रथस्य पुरोभागे 'न अकरिष्यत्' न न्ययोजयिष्यत् ["लिङ्-निमित्ते, लृङ् क्रियातिपत्तौ"—(३।३।१९९ ; २२२९)-इति लृङ् । **अतिपत्तिः असमाप्तिः**] । सूर्यानुग्रहेण एव यथा अरुणः तमो नाशयति, तद्वत् इन्द्रानुग्रहादेव मया दानवगणो निहत इति सरलार्थः । [अत्र इन्द्र आत्मनि च विशेषे प्रस्तुते अप्रस्तुत-प्रभु-भृत्य-वचनात् **अप्रस्तुत-प्रशंसा-लङ्कारः**] । अनया च स्वस्य भृत्यत्वं, तस्य प्रभुत्वं च सूचयत्या विनयाऽतिशय-द्योतनात् **उदात्तालङ्कारः** व्यज्यते । विशेषेण सामान्य-समर्थनात् **अर्थान्तरन्यासश्च**, अनयोः परस्तर-निरपेक्षतया **संसृष्टिः** । राघवमते **दृष्टान्तालङ्कारः** । **वसन्ततिलका** वृत्तम्) ॥४॥

230n.—1. सुख-परस्य &c—Indra being naturally addicted to enjoyments of pleasure, often in case of difficulty, takes the help of his friends. **2. उभयैः—** "उभौ अवयवौ यस्य उभयः । "उभाद् उदात्तो नित्यम्"–(५।२।४४)—इति तयपोऽयच् (उभ+अयच्)—*T*. It is both **singular** and **plural** (*Com*); **'उभये** मणयः—'*BM*. "ततश्चोभये भटाः"—*BK*. *XIV*. 30; (56*n*, 4). **3. त्रिदिवम्—**'तिसृषु अवस्थासु, ब्रह्म-विष्णु-रुद्रा वा, दिव्यन्ति अत्र इति त्रि+दिव्+क अधिकरणे (घञर्थे ३।३।५८)—*Kṣīra-svāmī;* also MN on Ku. I. 28. But this is **inaccurate,** as **दिव् Dhātu does not occur** in the list of roots mentioned in that *Vārtika*. (33*n*. 4). Same is the case with (मूलविभुजादित्वात्-3. 2. 5—कः)—which comes only in the **कर्तृवाच्य** । Hence *BhD* observes—"तस्मात्—'हलश्च' (३।३।१२१) इति घञ् । सञ्ज्ञापूर्वकत्वात् न गुणः इति व्याख्येयम्" । Next he suggests an alternative—"यद्वा ब्राह्म-वैष्णव-रौद्र-भेदेन सात्त्विक-राजस-तामस-भेदेन वा त्रिविधा दिव्यति व्यवहरति प्रकाशते वा (दिवु क्रीड़ा * * व्यवहार-द्युति * * गतिषु दिवादिः) इति (त्रि+दिव्+क) 'इगुपधत्वात्'–(३।१।१३५)–कः । *MN* has the following:—"तृतीया द्यौः लोकः इति त्रिदिवः स्वर्गः । **वृत्ति-विषये त्रि-शब्दस्य त्रि-भागवत् पुरणार्थत्वम्** । पृषोदरादित्वात् दिव्-शब्दात् अकारागमः । पुंस्त्वं लोकात्" ॥ In a compound, a **numeral** is generally used in the sense of an **ordinal** though in form it is **cardinal**—(72*n*., 7). This may do, but *MN* **unnecessarily includes it in the anomalous पृषोदरादिः–list.** For **'दिव' also exists as अकारान्त**; or proceed thus—'त्र्यवयवं दिवम्' इति त्रिदिवम् (उत्तर-पद-लोपी कर्मधारयः) । This is how *JS* explains **'त्रिलोक-नाथः'** । Read 'कथं तर्हि, **"त्रिलोक-नाथः** पितृसद्मगोचर"

इति कालिदासः। *** **त्र्यवयवो** लोकः त्रिलोकः। **शाकपार्थिवादित्वात् उत्तर-पद-लोपः**' :—*T*. 'त्रिदिव' is ordinarily **Masculine,** though its **Neuter-use** is not rare. Cf. 'त्रिदिवं तु खे स्वर्गे च त्रिदिवा नद्याम्' इति मेदिनी-दर्शनात् **क्लीबेऽपि**' ।।—*BhD*. Here **'मेदिनी'** is a **Slip'** for **'हैम'** । (229n, 2). **अधुना**—Either (*i*) इदम्+धुना=अ+धुना ('इदम्' changed to 'अ')=अधुना। Or, (*ii*) **इदम्+अधुना,** (इदम् is elided). Both to be regulated by **'अधुना''**—(5. 3. 12). Read ['अधुनेति किं निपात्यते ? (*i*) इदमः अश्भावः, **धुना च प्रत्ययः** ; (*ii*) इदमो वा लोपः **अधुना च प्रत्ययः** ; अस्मिन् काले अधुना"—*MBh*]. **4. पुरुष-केसरिणः** &c.—[6*n*., 2]. The reference here is to the *Fourth Incarnation of Viṣṇu* for the destruction of 'हिरण्यकशिपु'—father of प्रह्लाद'—HV. III. 46. 47; Vana 271. Cf. 'सटा-च्छटा-भिन्न-घनेन विभ्रता नृसिंह सैंहीमतनुं तनुं' &c.—ŚPB. 1. 4; I. 42; 'सिंहस्य वदनं कृत्वा मुरारिः सदा करालञ्च सुरक्तनेत्रम्। अर्धं वपु र्वै मनुजस्य कृत्वा ययौ सभां दैत्यपतेः पुरस्तात्"—*AP*. (आ)**नत-पर्वभिः शरैः**—By flat-jointed arrows. Cf. 'शरेण **आनत-**पर्वणा विभेद सप्ता-तालान्'—*Rām.III.* 27; *VII.* 69. Mahā. Dorṇa—159; Karṇa—59, 60; 50, 38; 13, 1; 9, 47; 54, 10. As applied to 'नखैः' it means **'curved',** 'bent'. (**नत-पर्वभिः नखैः**). **5. अत्र**—In the matter of my victory over the Dānavas. **6. नियोज्याः**—नि+युज्+ण्यत् कर्मणि ['ऋहलोर्ण्यत्'—3. 1. 24]=नियोज्याः=Servants. **'ज''** is not changed into 'ग' by "प्रयोज्य-नियोज्यौ शक्यार्थे"—(7.3.68); [Read—'प्रयोक्तुं शक्यः **प्रयोज्यः,** नियोक्तुं शक्यः **नियोज्यः** भृत्यः'—*SK* 2884. "अन्यथा प्रयोग्यः, **नियोग्यः"—Prabhā**]. **7. सम्भावना—गुणम्** &c.—The king means to say that he has no doubt been victorious in the battle, but this is **really the effect of the greatness of Indra.** *V* and *M* take 'संभावना' in the sense of **'योगताऽध्यवसाय'** *i.e. the word means supposition or expectation in the power or ability of another to perform any action—S. C. Vasu's* (*SK. pp.* 702). Cf. 'संभावनं क्रियासु योगताऽध्यवसायः"–T on 2811; also *MN* qtd.(198n. 7). "भवद्भिः संभावनायाः सदृशम्"&c.—*BK. XII.* 22. Indra had made a proper **estimation** of the king's ability and then **entrusted** him with the great enterprise. Thus according to them, if Indra had not condescended to entrust him with the aforesaid business, he would not have been able to show his prowess and valour. Hence *Indra's estimation or expectation* (**संभावना**) is the

real cause of the defeat of the demons. Like all great men Duṣyanta is extremely modest. Exactly for the same reason Cupid (कामदेव) was entrusted with the task of disturbing the meditation of Śiva. (Cf.) "अवैमि ते सारमत: खलु त्वां कार्ये गुरुण्यात्म-समं नियोक्ष्ये। व्यादिश्यते भूधरतामवेक्ष्य कृष्णेन देहोद्वहनाय शेष:"—*Ku. III.* 13. Kālidāsa has elsewhere *expressed the same idea* in **different** ways——"ननु वज्रिण एव वीर्यमेत द्विजयन्ते द्विषतो यदस्या: पक्ष्या:। वसुधा-धर-कन्दरात् विसर्पी प्रतिशब्दोऽहि हरेर्भिनत्ति नागान्"—*Vik. I.* 15. "त्रिलोकरक्षी महिमा हि वज्रिण:।"–*Ibid. I.* 5. "तव प्रसादात् कुसुमायुधोऽपि सहायमेकं मधुमेव" &c.—*Ku. III.* 10. Cf. also 'जनोऽतियोग्योऽपि न योग्यभोग्यभाक् न कर्तुमिष्ट क्षमते क्षमातले। प्रवर्तमानो-ऽन्तर पूर्वपर्वते विभाकरोऽप्राप्य नभो न भासते'—RH. III. 4. (of सिद्धान्तवागीश)। '**तवानुभाव: अयमवेदि यन्मया निगूढतत्त्वं** नयवर्त्म विद्विषाम्'—Ki. 1. 6. "संभावना ह्यधिकृतस्य तनोति तेज:"—*Ibid. qtd. A.* "**विजयी यदस्मि समरेषु** जित्वरा: **प्रभवन्ति तत्र तव पादपांशव:।** अरुणो यदन्धतमसं निषेधति स्फुरितं नराधिप तदर्क-तेजसाम्"—*Nava-Sāhasāṅka Caritam. X.* 40 *ŚPB. XI.* 25. According to some 'ईश्वर' derived with '**वरच्**' ('स्थे-श-भास-पिस-कसो वरच्'-3.2.175] means 'Lord','master' (*Feminine* -'**ईश्वरा**') but when derived with '**वरट्**' after '**अश्**' ['अश्नोते: आशुकर्मणि' –756] it means *Śiva.*' [*Feminine* **ईश्वरी**'। Cf. '**ईश्वरीके कहिलेन ईश्वरी पाटनी**'–*Annadā-Maṅgala of Bhārata-Candra. Also Com.*]. *For* **अरुण**– [121n, 4]. **8. धुरि**–Primarily means "on the van of the pole of a chariot," also covertly means "in a post of responsibility". Now read—"यावत् प्रताप-निधिराक्रमते न भानुरह्नाय तावदरुणेन तमो निरस्तम्"—Ra. V. 71. '**अभविष्यद्–नाऽकरिष्यत्**'—Signifies non-performance of action (**अतिपत्ति**)। [Read—"**भविष्यति** काले यथा—ज्ञानं चेत् **अभविष्यत्**, तदा सुखम**भविष्यत्**। अत्र ज्ञानस्य असम्भवात् सुखस्यापि असम्भव: भविष्यति इति क्रिययो: अनिष्पत्ति:। **अतीतकाले** यथा—यदि अन्नार्थी पथिक: अत्र दृष्ट: **अभविष्यत्**, तदा **अभोक्ष्यत**।। अनिष्पत्तौ किम्।। प्रवासी चेद आयास्यति, तदा गृहे स्थास्यति"; —**Prabhā.** on 3.3.199]

Text :—मातलि:—सदृशं तवैतत्। (स्तोकमन्तरमतीत्य) **आयुष्मन्!**

इत: पश्य 'नाक-पृष्ठ-प्रतिष्ठितस्य सौभाग्यमात्म-यशस:।

उपजाति [ननजगग जनजगग] '**विच्छित्ति-शेषै: सुर-सुन्दरीणां वर्णैरमी कल्प-लताऽशुकेषु**'।
संचिन्त्य गीति'-क्षममर्थ-बन्धं' दिवौकस' स्त्वच्चरितं लिखन्ति ।।५।।

Mātali—This (*is*) but worthy of you, (*Going down a little distance*)—My Long-lived King this way behold the sublimity of (*your*) own fame (*that is well*)—[1]established on the back of paradise. There the inhabitants of heaven, having thought out (*some*) song[4]-worthy theme[5], are tracing your (*glowing*) exploits on vestment (*obtained*) from the Kalpa-tree with[2] tints, remaining from the colour (*used in the toilet*)[2] of the heavenly beauties. (5)

V. L.—'तवैतत्'—B. 'एवैतत्'—R. V. M. 'एतदायुष्मतः'—S.' प्रतिष्ठितस्य'—B. R. S. V. '०गतस्य'—M. K. 'संचिन्त्य'—B. M. S. 'विचिन्त्य'—R. 'गीति'—B. K. M. S. 'गीत'—R. V. 'अर्थबन्धम्'—B. HS. M. S. K. '०जातम्'— R. V. '०तत्त्वम्'—R's Com.

मातलिरिति । 'एतत्' र विनयोक्तमित्यर्थः । "**कं** शिरो जलमाख्यातं, **कं** सुखं च प्रकीर्तितम्" इति एकाक्षर-कोषे पुरुषोत्तमदेवः । तद्विरुद्धम् 'अकं' दुःखम् । अविद्यमानम् अकम् अस्मिन् इति 'नाकः' स्वर्गः ["नभ्राड् नपात्—" (६।३।७६) इति नञ्-शब्दस्य न नकार-लोपः] । तस्य 'पृष्ठे' उपरि 'प्रतिष्ठितस्य' सर्वदा स्थिरत्वेन प्रतिष्ठां प्राप्तस्य 'आत्म-यशसः' दानव-विजय-रूपस्य, ["**दान-पुण्यकृता कीर्तिः, पराक्रम-कृतं यशः** । एक-दिग्व्यापिनी **कीर्तिः**, सर्व-दिग्वि-स्तृतं **यशः**" ।। इत्युक्तेः] । 'सौभाग्यं' सुदैवताम् (उभयपद-वृद्धिः—७।३।१९] । **विच्छित्तिरिति** । 'अमी' दूरे दृश्यमानाः ['**अवसस्तु विप्रकृष्टम्** 'इत्युक्तेः । अनेन तयोः नाक-पृष्ठात् अधोऽवतरणं व्यज्यते । 'दिवौकसः' स्वर्गवासिनः देवाः ("स्यात् **दिवौकाः दिवोकाश्च** देवे चापिह पक्षिणि" इति रन्तिदेवः) 'गीति-क्षमं' गान-योग्यम् (इति चन्द्रशेखरपादाः) अर्थः बध्यते इति 'अर्थ-बन्धः' पद-समूहः इति काटयवेमचरणाः) तं 'संचिन्त्य' मनसि सम्यक् विभाव्य, केवलं 'सुर-सुन्दरीणां', नतु सर्वेषां साधारणीनां योषितां ['रूप-यौवन-सम्पन्ना सुन्दरी परिकीर्तिता' इत्युक्तेः] कल्प-लतांशुकेषु' कल्प-लताभ्य उत्पन्नेषु वस्त्रेषु ['अशुकं श्लक्ष्ण-वस्त्रे स्याद् वस्तुमात्रो-त्तरीययोः" इति मेदिनी] 'विच्छित्तिः' अङ्गरागः ["वर्णकं चाथ विच्छित्तिः स्त्री कषायोऽङ्गरागके" इति रभसः) तस्याः 'शेषैः' अङ्गरागावशेषैः वर्णैः । सुर-सुन्दरीभिः स्वहस्तैः तासाम् अङ्ग-रागं विधाय अवशेषितैः सित-पीतादिभिः वर्णकैरित्यर्थः । अनेन त्वच्चरितानाम् अतिप्रियत्वमासूचितम्] । 'त्वच्चरितम्' परोपकारादिकं तव अवदानं 'लिखन्ति' (**समृद्धिमद्-वस्तु-वर्णनात् उदात्ता-लङ्कारः** । विच्छित्ति-शेषस्य वर्णकत्वेन निरूपणात् तस्य च प्रकृतोपयोगित्वाच्च **परिणामालङ्कारः** । **श्रुति-वृत्त्यनुप्रासौ** । **उपजातिवृत्तम्**) ।।५।।

231n.—1. नाक &c.—'**कम्**'=सुखम्, न कम्=अकम्=दुःखम्, न अकम् यत्र=नाकम्, 'न' is not changed into '**अन्**' (Com.). [Read '**सुवर्गो** वै

लोको नाकः। यस्यैता उपधीयन्ते नास्मा अकं भवति"—TS.V. 3.2.I-तद्यत्, तमाह् नाक इति। न हि तत्र गताय कस्मै च नाकं भवेति'—Śatapatha Brāhmaṇa. VIII. 4. 1. 4; "कमिति सुखं नाम्। तत प्रतिषिद्धं प्रतिषिद्धेत। 'नवा अमु लोकं जग्मुषे किञ्च-नाकम्'। न वा अमुं लोकं गतवते किञ्चनासुखम्" —Nirukta. II. 14]. **विच्छित्ति** &c.—'विच्छित्ति' ordinarily means "cutting off", "excision". Cf. *VS.* 11. Next colouring the body with paints and unguent; painting colur; rouge. [*Vide. ŚPB. XVI.* 48; "अङ्गरागावशेषैः **यक्ष-कर्दमादिभिः**"—R. "यक्षकर्दम" technically means a mixtu·e of agallochum, musk, camphor, kakkola (or according to others sandal & saffron). Read 'कर्पूरा-'गुरु-कस्तूरी-कक्कोल-घर्षणादि च। एकीकृतमिदं सर्वं यक्ष-कर्दम इष्यते"—*Bharata;* 'कुङ्कुमागुरु-कस्तूरी-कर्पुर' चन्दनं तथा। महासुगन्धमित्युक्तं नामतो **यक्षकर्दमः**" —*Dhanvantari*]. **2. कल्पलता** &c.—Cf. 'चन्दन-लता'—(146n, **4.**) 'कल्पस्य सङ्कल्पस्य दाता वृक्षः'—*Sāra-Sundarī.* A desire-yielding tree, from which the celestial women get their decorative unguents, ornaments &c. Read * * *पुष्पोद्भेदं सह किसलयैर्भूषणानां विकल्पान्। लाक्षारागं चरण-कमल-न्यासयोग्यञ्च यस्याम्॥ **एकः सूते सकलम् अबला-मण्डनं कल्पवृक्षः**"–PA & *MD.* II. 12. **अंशुक**–Generally means "*Silken cloth.*" 'अंशुकञ्चोत्तरीय ञ्च दुकूलं क्षौममस्त्रियाम्'—*Amara-Mālā,* here garments in general. *Vide Vik. III.* 12; *Ku.* 1. 14. Kāli. sometimes uses it to mean '*a white cloth*', *Vide* PA & *MD.* 62. **गीति-क्षमम्**—Cf. 'उपभोग-क्षमम्'—Act. 1. p. 18. **3. संचिन्त्य**—Thinking and thinking to find out the choicest expression. 'सम' is intensive (252n. 2; *Com.*). **अर्थ-बन्धं**—Lit. arrangement of words, hence 'a verse'. Cf. 'तुल्या-नुरागपिशुनं ललितार्थ-**बन्धम्** पत्रे निवसितम्' &c.—*Vik. II.* 14; 'चिन्तय ललितपद-**बन्धनम्**'—Śak. III. Note that these corroborate the **genuineness of the reading** adopted by us. **दिवौकसः** = (दिव + ओकस्)—(229n, 2).

Remark :—For a somewhat similar idea, Cf. "इक्षु-च्छाया-निषादिन्यः तस्य गोप्तुर्गुणोदयम्। आकुमार-कथोद्घातं शालिगोप्यः जगुर्यशः॥" —*Ra. IV.* 20.

Text:—राजा—मातले! 'असुर-संप्रहारोत्सुकेन पूर्वेद्युर्दिवमधिरोहता न लक्षितोऽयं प्रदेशो मया। तत् कतमस्मिन् मरुतां' पथि वर्तामहे ?

King—Mātali, intent on fighting with the demons[1], this region was not noticed by me[2] **yesterday** while ascending the sky. In which path of the (*seven*) winds[4] are we (*keeping at present*) ?

मातलिः— [5]त्रिस्रोतसं वहति यो गगन-प्रतिष्ठां[6]
[7]ज्योतींषि वर्त्तयति[8] च प्रविभक्त-रश्मि[9] ।
वसन्ततिलका (तभजजगग)
तस्य व्यपेत-रजसः[10] प्रवहस्य वायोर्
मार्गो द्वितीय-हरि-विक्रम-पूत[11] एषः ॥६॥

Mātali—This (*is*) the path of the wind *Pravaha*, sanctified[11] by the second stride of Hari[11], shorn of dust [5](*of passion, Lit. the quality of Rajas*), **bearing the triple-coursed** (*river*) located[6] in heaven , **which makes the luminaries[7] revolve[8]** with their beams duly distributed. (6)

V. L.—'०रश्मिः'—R. '०रश्मि'—V. M. S. K. The last half is thus read in other recensious excepting B, P, & Dr.—'तस्य द्वितीय-हरि-विक्रम-निस्त-मस्कं, वायोरियं परिवहस्य वदन्ति मार्गम्' ॥ P, Dr, and some B recensions read 'चक्र-विभक्त-रश्मिः' for 'च प्रविभक्त-रश्मिः' ।

राजेति । महापुरुषत्वाद् राज्ञः निज-स्तुति-श्रवणं लज्जाकरम्, मातलिरपि तत्स्तुतेः न विरमति । अस्मादेव तत्परिहारार्थं राजा विषयान्तर-सचारं करोति । 'पूर्वेद्युः' पूर्वस्मिन् अहनि स्वर्गाऽऽरोहण-वेलायामित्यर्थः । ('सद्यः-परुत् परार्य्-ऐषमः-परेद्यव्य्-अद्य-पूर्वेद्युर्–" (५।३।२२)-इत्यादिना निपातितः । 'पूर्वेद्युः पूर्व-वासरे' इति रुढ़ः) 'असुरैः' सह यः 'संप्रहारः' युद्धं ("**संप्रहारः** गतौ **रणे**" इति हैमः) तेन (तत्र वा) 'उत्सुकः' (२।३।४४) उत्कण्ठितः, तेन । 'मरुतां' **सप्तानाम्** आहवादीनां मध्ये कतमस्मिन्, 'पथि' वायुस्कन्धे वयं 'वर्तामहे' तिष्ठाम इति पृच्छा । **त्रिस्रोतसमिति ।** 'यः' प्रवहाख्यः वायुः 'गगनस्य' स्वर्गस्य 'प्रतिष्ठाम्' आधारम् । यद्वा 'गगने' आकाशे 'प्रतिष्ठा' स्थितिः यस्याः तादृशीं 'त्रिस्रोतसम्' गङ्गाम् (इति मेदिनी) अर्थात् मन्दाकिनीम् (तथाचोक्तं–"स्वर्गे **मन्दाकिनी** गङ्गा, मर्त्ये **भागिरथी** तथा । पाताले च **भोगवती**, मार्गा स्तस्यास् त्रयो मताः । अपि च "**क्षितौ** तारयते मर्त्यान्नागां स्तारयतेऽप्यधः । **दिवि** तारयते देवांस्तेन **त्रिपथगा** स्मृता" ॥ 'वहति' धारयति । यः प्रवहः **'ज्योतींषि' नक्षत्राणि** ("दीप्तौ दृष्टौ **तारासु च ज्योतिः** शब्दो निगद्यते" इत्यनेकार्थकोषः) **'प्रविभक्ताः** यथायोग्यं व्यवस्थाप्य, समन्तात् विसारिताः 'रश्मयः' किरणाः यथा स्यात् तथा 'वर्तयति' संचारयति 'च' (तथा चोक्तं—"ग्रह-र्क्ष-ताराधिष्ण्यानि ध्रुवे **बद्धान्यशेषतः ।**

भ्रमन्ति उचितचारेण मैत्रेयानिल-रश्मिभिः" ।।) 'तस्य व्यपेतानि' भू-वायोरुपरि स्तिनत्वात् दूरीभूतानि **'रजांसि' धूलयः** यस्मात् । अथच गङ्गा-सम्पर्कात् 'व्यपेतानि **रजोगुणाः** यस्मात् इत्यर्थोऽपि ('रजः क्लीवं गुणान्तरे । आर्तवे च परागे च रेणु-मात्रेऽपि दृश्यते' इति मेदिनी) तादृशस्य **'प्रवहस्य' प्रवह-नामकस्य** 'वायोः एषः, इदानीमेव अस्माभिः परिक्रम्यमाणः ('समीप-वर्ति-तरचैतदोरूपम्' इत्युक्तेः) 'हरेः' **वामन-रूपिणः** नारायणस्य 'विक्रमः' क्रान्तिमात्रं, पाद-न्यास इति यावत् ("विक्रमः शक्ति-संपत्तिः **क्रान्तिमात्रं च विक्रमः**" इति धरणिः) 'तेन पूतः' पवित्रः 'मार्गः पन्था': (**"मार्गो** मृगमदे मासे सौमक्ष्ये अन्वेषणे **पथि"** इति हैमः) विद्यते इति शेषः । (समृद्धिमत्-वस्तु-वर्णनात् **उदात्तालङ्कारः"** । **अनुप्रासश्च** । 'व्यपेत-रजस' इत्यनेन तद्वायोः मल-राहित्यं सूचितं, तेन नात्र (**अपुष्टार्थत्व-दोषः** । **वसन्ततिलका** वृत्तम्) ।।६।।

232n.—1. कतमस्मिन् मरुतां पथि—The king was much ashamed of the continued eulogy of Mātali; hence with a view to avoiding it, he takes up a quite different topic—R. The ethereal region is divided into '*seven paths*' (*Cf. Ra. XIII.* 19) each having a particular wind assigned to it. These have been classified by *Siddhānta Śiromaṇi* thus:—**'भू-वायुरावह इह प्रवहस्तदूर्ध्वं स्यात् उद्वह स्तदनु संवह-संज्ञकश्च । अन्यस्ततोऽपि सुवहः परिपूर्वकोऽस्माद् बाह्यः परावह इमे पवनाः प्रसिद्धाः'** ।। (**"परावह > परिवह > सुवह > संवह > उद्वह > प्रवह > आवह"**)—From Vāp. (*Ch.* 67. 110-120. *q. v.*) we find that the **First मार्ग** is identical with 'भूवर्लोकः' or **atmospheric** region extending from 'भूर्लोकः', or **terrestrial** region,(comprising the earth and the 'अधोलोकः' called 'पाताल')upwards to the sun. The **Second** is the **मार्ग** of the **Sun;** Third, that of the **Moon;** *Fourth*, that of the **Lunar constellations;** *Fifth*, that of the **Planets;** *Sixth*, that of the **Great Bear** (**सप्तर्षि**); *Seventh*, that of the **Pole-star.** But this *arrangement of the position of the wind is* **slightly different**,*in different Purāṇas.* The king wants to know in which of these paths (कतमस्मिन् पथि) they were then traversing. As the paths are '*many*', therefore **'कतमस्मिन्'** is better than **'कतर-स्मिन्' ।** But M, **biassed as he is towards the Devanāgara readings,** (Vide 22*n*, 1. middle) argues "*Sometimes* **'कतर'** *is used for* **'कतम'**, but this is decidedly **inaccurate, as far as the writings of Kāli. are concerned.** He is **precise** in the use of this word. Cf. 'मातले, **कतमोऽयं** पूर्वापर-समुद्रावगाढ़' &c.—*Infra;* 'मातले, **कतम-स्मिन्** प्रदेशे मारीचाश्रमः'—*Infra.* **'कतमो** राजर्षिवशः **कतमो** वा'—Act. I

'**कतमा** तत्रभवती शकुन्तला, **कतमां** तर्कयसि'—Act. VI. '**कतमत्** प्रकरणं'—[6n. 4], "**कतमः** सुरारिः'–*Ku. III.* 9; 'भागः **कतम** एषते'—Ibid. VI. 23; "**कतमेन** दिग्विभागेन गतः स जाल्मः'—*Vik. 1.* 'गृह्यतामनयोः अनयोः **अन्यतरा**" & '**कतरा ते** सङ्गीत-सहचारिणी रोचते"–Māl. V. **2. त्रिस्रोतसम्**—(Ra. XVI. 34; Ku. VII. 15). The Ganges is so called **as** it **has three** courses, viz. '**मन्दाकिनी** in heaven, 'गङ्गा' in the earth, and '**भोगवती**' in '**पाताल**' (*Com.*). Here it refers to the **first course.** Read "प्रधानधारा या स्वर्गे सा च मन्दाकिनी स्मृता। योजना-युत-विस्तीर्णा प्रस्थेन योजना स्मृता ॥ क्षीर-तुल्यजला शश्वद् अत्युत्तुङ्ग-तरङ्गिणी। वैकुण्ठाद् ब्रह्म-लोकञ्च ततः स्वर्गं समागता"—*BRP.* (जाह्नवी-जन्म-प्रस्तावे ३४ अध्यायः) ।' मन्दाकिनी', however, is identified with the **Galaxy** or **Milky-way. 3. प्रविभक्त-रश्मि—An adverbial** compound (*Com.*) 'रश्मि' means both '*rein*' and '*ray*'. Cf. '**रश्मिः** पुमान् **दीधितौ** स्यात् पक्ष-**प्रग्रहयो**रपि'—*Medinī.* The idea is:—Like a charioteer with reins in hand, the **प्रवह** with due distribution of rays to the various **luminaries, makes them revolve** (**ज्योतींषि वर्तयति**) । **4. व्यपेत-रजसः**—'रजस् also means both '**quality**' and '**dust**' (*Com.*). The path is free from 'रजोगुण' owing to the sacred touch of the foot of *Lord Hari* and to its connection with the Celestial Ganges. And it is also free from dusts as it is far *above* the dusty earth—(*Next*). **45. प्रवहस्य वायोः**—'प्रवह' is the **second** of the seven courses of winds in order of their distance from **the earth.** (*Note* 1.). **It makes the luminaries** (**ज्योतींषि वर्तयति**, and **not सप्तर्षि**), **revolve in due order.** 'भचक्रं ध्रुवयोर्नद्ध-माक्षिप्तं प्रवहानिलैः। पर्यत्यजस्रं सन्नद्धा **ग्रहकक्षा** यथाक्रमम्"—*Surya Siddhānta.* "भूमेर्बहि द्वादश-योजनानि भूवायुरत्रा-म्बुद-विद्युताद्यम्। तदूर्ध्वगो यः **प्रवहः** सनित्यं प्रत्यग्गति स्तस्य तु मध्यसंज्ञा ॥ **नक्षत्रकक्षाः** खचरैः समेता यस्मादतस्तेन समाहतोऽयम्। भ-पञ्जरः खेचर-चक्र-युक्तो भ्रमत्यजस्र **प्रवहा**ऽनिलेन" ॥ —*Sidhānta Śiromaṇi.* "अलातचक्रवद् यान्ति वातचक्रेरितास्तथा। यस्माद्वहति तान् वायुः प्रवहस्तेन संस्मृतः" ॥ —*KP. Ch.* 42. 3. 'अलातचक्रवदयान्ति वातचक्रेरितानि तु। यस्माद् **ज्योतींषि वहति** प्रवहस्तेन सम्मतः ॥—*VP. II.* 12, 28. 'यस्मात् **ज्योतींषि प्रकर्षेण वहति तेन वायुः प्रवहः** स्मृतः। **प्रवहस्य एव भेदाः सर्वे** वायुस्कन्धाः'—**इति** तट्टीका ॥ That the car is passing at the time through the course of '**प्रवह**' **wind** is also

corroborated by the fact that the king in his **following speech** remarks that they have reached the course of **आवह wind where clouds and lightning occur** (*Śl.* 7. *Infra*). Hence the region **above this path** must be that of **'प्रवह'** wind. But a **fresh difficutly** arises in this explanation, for 'प्रवह **though causes the revolution of the luminaries,** (*According VāP and Brahmāṇḍa Purāṇa,* प्रवह *makes the Sun revolve*) **it does not bear-celestial Ganges** (त्रिस्रोतस्) along its path. That is the business of the wind **'परिवह',** the reading adopted by *V. R. K.* & *M.* Read "श्रेष्ठ: **परिवहो** नाम तेषां वायुरपाश्रय: । योऽसौ **बिभर्ति भगवान् गङ्गामाकाशगोचराम्** ।। दिव्यामृतजलां पुण्यां त्रिधा स्वर्ग-पथे स्थितम्"—*VāP. Ch.* 51, 46-47. "सप्तर्षिचक्रं **स्वर्गङ्गां** षष्ठ: **परिवहस्**तथा"-*Brahmāṇḍa Purāṇa.* "तस्मात् प्रवृत्ता पुण्योदा नदी ह्याकाश-गामिनी । सप्तमेन अनिलपथा प्रयाता विमलोदका"—*VāP.* **But again though 'परिवह' bears the celestial Ganges, it causes the 'सप्तर्षि', and not ('ज्योतींषि')** to revolve. Thus none of the **reading is free from objection,** (and this fact *has not been noticed by any body before*); still on the whole we **prefer** the reading "प्रवहस्य वायो:" for in the following speech we see clearly that the chariot is moving in the 'आवह' wind or the **region of clouds (मेघ-पदवीमवतीर्णा: स्म:)** । Therefore naturally the king should speak of **'प्रवह' wind in his previous speech.** If the reading with **'परिवह'** be adopted, then from the **sixth (or seventh according** *Vāyu Purāṇa*) the transition would be all on a sudden to the **second wind,** (*which evidently is not very* **natural**). *M* observes:—"We have descended to the path of the clouds *i.e.* to the atmospheric region between the sun and the earth, the Mārga of the clouds and of the आवह wind. The chariot must, therefore, have *traversed with the speed of a lightning,* the four intervening मार्ग"'s of the Planets, Lunar-constellations, the Moon and the Sun. **If the Bengali reading 'प्रवहस्य' be adopted, the transition would merely be form one मार्ग to the next."** *K* accepts the reading **'परिवह'** but perhaps being conscious of its **inconsistency** with "**वर्तयति**", explains "ज्योतींषि' as "सप्तर्षीणाम् धिष्ण्यानि", but it is **hardly accurate.** *N* justifies the anomaly in 'त्रिस्रोतसं वहति' by the following quotation from **VāP**—"**विभज्यमान-सलिला तैजसेनाऽनिलेन सा**"—1.42. '**तैजसेन ज्योतिर्वहेण प्रवहेण इति यावत्**' ।। **In fact all the**

seven intervening winds must have some functions in bearing the Ganges as it comes down from heaven to this world. Perhaps our poet from this *popular consideration* connects 'प्रवह' with the bearing of the Ganges. (Cf.' ये द्वे कालं विधत्त:'–*In*, 5).Or, **it may be considered to be a case of "lapsus memorioe" on the part of our poet**. (107n. 6. *middle*). **6. द्वितीय-हरि**&c—Refers to the *Dwarf Incarnation* of Viṣṇu (वामनावतार) to humble the pride of Bali. *Viṣṇu*, with a view to succouring the oppressed gods, assumed the form of a **manakin,** went to Bali and begged, as a boon, **as much land as he could pace in three steps.** Bali, amused by his form unhesitatingly acceded to this apparently simple request. Bu,t the dwarf in the twinkling of an eye, assumed a gigantic form and covered the entire earth with his first step, and the heaven with the second and planting the third on Bali's head, sent him with all his legions to the Pātala but pleased with his devotion allowed him to be its ruler and himself remained as his door-keeper in the form of the dwarf. Cf. "सर्वेश्वरो विष्णुर्द्वितीयं पदमव्ययम्' &c.—PP. Ch. 40; 'क्रमाकान्त-लोकत्रय'—PC. IV. (end), 'वामन-रूपेणेव कृत-त्रिपद-विलासेन'—Kād. p. 338; Rām 1. 29. 19; IV. 37. 17; VI. 71. 64; *Vāmana Purāṇa, Ch.* 79; *Ra. XIII. I; XVI.* 28. **विक्रम**—Footstep. Cf. 'गतेषु लीलाञ्चित-विक्रमेषु'—*Ku. I.* 34. 'विक्रमा: पादन्यासा:'—MN. In the ṚV, the three steps of Viṣṇu (i.e. the Sun), symbolize its *rising, culmination* and *setting.*

Text:—राजा—मातले ! अत: खलु स-बाह्यान्त:करणो[1] ममान्तरात्मा प्रसीदति । (रथाङ्गमवलोक्य) शङ्के, मेघ-पदवीमवतीर्णौ[2] स्व: ।

King—Mātali, hence indeed, with[1] all organs internal and external[1], my inner soul is sated[2]. (*Looking at a wheel.*)—(*I*) dread,[2] (*we*) have got down to the region of clouds.

मातलि:—आयुष्मन् ! कथमवगम्यते ।

Mātali—My long-lived (*King*) how is (*this*) known ?

राजा— अयमर-विवरेभ्य[4] श्चातकै निष्पतद्भि[5]
'र्हरिभिरचिर-भासां[6] तेजसा चानुलिप्तै:[7] ।
मानिनी [ननमयय] **गतमुपरि[8] घनानां वारि-गर्भोदराणां**
"पिशुनयति रथस्ते शीकर-क्लिन्न-नेमि:" ॥७॥

King—This your car with its spray-besprinkled fellies, with the Cātakas gushing[5] forth through the interstices[4] of the spokes[4], with the[6] steeds laved[8] (*hence tinted*) with[7] the glow of lightning,[3] [10]betrays (*our*) [9]flight over the clouds[9], with (*their*)[11] bellies pregnant with water[11]. (7)

V. L.—'सवाह्यान्त:करण:'—B. M. V. K. 'सवाह्य:करण:'—R. S. 'शङ्के' & आयुष्मन्—B. Omitted by others. 'अर'—R. V. K. M. 'अग'—B. Mackenzie Mss. HS. 'सीकर'—R.

राजेति। 'अत:' मन्दाकिनी-वाहिन: सत्त्व-प्रधानस्य वायो: सम्पर्कात्। 'बहि:' भवानि' 'वाह्यानि' चक्षुरादीनि इन्द्रियाणि। 'बाह्यानि च अन्तश्च 'बाह्यान्त:' तादृशानि 'करणानि' तै: सह वर्तमान: 'अन्तरात्मा' जीवात्मा 'प्रसीदति' प्रसन्नो भवति। [तथाचोक्तं सांख्यकारिकायां—"अन्त:करणं त्रिविधं **दशधा बाह्यं त्रयस्य** विषयाख्यम्। साम्प्रतकालं **बाह्यं** त्रिकाल**माभ्यन्तरं** करणम्॥] 'मेघ-पदवीम्' अर्थात् आवहस्य मार्गम्। **अयमिति।** 'शीकरै: जल-कणै: ['शीकर: अम्बुकणा स्मृता' इत्यमर:। **'सीकर:** दन्त्यादिरयम्' इति धनपालादय:]। 'क्लिन्ना' आर्द्रीकृता 'नेमि:' (नयति रथम्, उ.—४।४३) इति चक्र-प्रान्त-भाग:['पुलिङ्ग: तिनिशे **नेमि:'** **चक्र-प्रान्ते स्त्रियामपि'** इति रुद्र:] यस्य तादृश: [हेतु-गर्भ-विशेषणमेतत्] 'अय ते त्वया परिचालित: 'रथ: अराणा' चक्राङ्गाणाम् ["**अरं** शीघ्रे च **चक्राङ्गे'** इति विश्व:) **'विवरेभ्य:'** मध्य-स्थित-रन्ध्रेभ्य: 'निष्पतद्भि:' बहिरागच्छद्भि: 'चातकै:' **मेघ-जीवनाख्य-पक्षिविशेषै:** (इति राजनिर्घण्ट:। 'पपीहा इति ख्यातै:' इति भानुजि:। 'पापिया इति' भाषा]। [चातक-सान्निध्यात मेघ-मार्गे अवतरणम् अनुमीयते इत्याशय:] 'अचिरा' क्षण-स्थायिनी 'भा:' दीप्ति: यासां तासाविद्युतामित्यर्थ:। 'तेजसा' कान्त्या 'अनुलिप्तै:' दिग्ध-कलेवरै 'हरिभिश्च' इन्द्राश्वैश्च [**"हरी इन्द्रस्य, हरित: आदित्यस्य"** ' इति निरुक्ते-१।१५] 'वारि-गर्भाणि' सलिल-पूर्णानि 'उदराणि' अभ्यन्तराणि येषां तथाभूतानाम् [इति त्रिभि: लिङ्गै:] 'घनानां' मेघानां [**घनो मेघो** घन: मान्द्र: कांस्य-ताल-ध्वनिर्घन:। घन: स्वर्गो, घनो नित्यो, घन: स्यात् लौहमुद्गर:"॥ इति गर्दसिह:] 'उपरि' ऊर्ध्वभागे 'गतं' गमनं [भावे क्त:] 'पिशुनयति' सूचयति [**पिशुनौ** खल-**सूचकौ'** इत्यमर:] अन्यथा नेमे: क्लिन्नत्वम् अश्वानां विद्युत्-प्रभा-रञ्जितत्वं, सलिल-पानार्थं चातक-निर्गमनञ्च न स्यात् इत्याशय:। [प्रथमार्धे घनानामुपरि गमन-सूचनं प्रति हेतु-द्वयोपन्यासात् **समुच्चयालङ्कार:।** वारि-गर्भोदराणाम् इत्यस्य हेतु-द्वयं प्रति आर्थं हेतुत्वं बोद्धव्यं। **तेन हेतु-काव्यलिङ्गयो: अङ्गाङ्गिभावेन सङ्कर:।** वारि-गर्भोदरत्वं प्रति रथ-विशेषणस्य **आर्थं हेतुत्वं बोध्यम्। अनुमानालङ्कारश्च।** रेभ्यरिभिरभेति **छेक-वृत्त्यनुप्रासौ। मालिनीत्यपरनाम मानिनी वृत्तम्**]॥७॥

233n.—1. स-बाह्या &c.—बहिः भवानि इति बहिस्+ञ्य ("बहिर्देव-पञ्चजनेभ्यश्च इति वक्तव्यम्"—*Vārt. KV. on* 4. 3. 58; *SK.* 1435). =बाह्यानि–External senses *i. e.* पञ्च-ज्ञानेन्द्रिय and पञ्च-कर्मेन्द्रिय। Internal senses (अन्तःकरणम्) according to *Sānkhya* philosophy are **three,** but according to *Vedānta,* **four** in number, viz, मनः (*The organ of thought,*' '**बुद्धि**' (*The reason or the organ of apprehension*), '**अहङ्कारः** (*Individuality or self-consciousness*), and '**चित्त**' (*The heart or the organ of feeling*). *Cf.* "अन्तकरणं **त्रिविधं** बुद्धि रहङ्कारो **मन** इति शरीरा-भ्यन्तर-वृत्तित्वात् **अन्तःकरणम्** । **दशधा** बाह्यमिन्द्रियम्"—*Tatwa-Kaumudī.* 'आशंससे करणैः **अबाह्यैः**"—*Ra. XIV.* 50; 'कि वयं **बाह्याः**'—*MK. V.* 2. **अन्तरात्मा प्रसीदति**—Cf. 'तद्दर्शनादेव प्रसन्न-**बाह्या**ऽन्तःकरणः अन्तरात्मा'—*Vik. IV.* 'उर्वशी-गात्र-स्पर्शात् इव निर्वृतं मे सहृदयं शरीरम्'—*Ibid. Also Ra. XIII.* 37. **3. मेघ-पदवीम्**—Refers to 'भू-वायु' (आवह) which **immediately follows** the course of wind named '**प्रवह**' । (232*n*, 1 & 5). **रथाङ्गम्**—A wheel, and not any part of a chariot. Cf. 'रथो रथाङ्ग-ध्वनिना विजज्ञे'—*Ra. VII.* 41. **4. चातकैः**—This bird (**Cuculus Melanolecucus**) is supposed to **live only on rain**-drops before they touch the earth. ['धरणि-पतितं तोयं चातकानां रुजाकरम्'—*MN on Ra. V.* 17. 'सर्वंसहा-पतिताम्बु न चातकस्य हितम् इति शास्त्रम्'—*Ibid on MD.* It has a shrill but not unpleasant note which much resemble the word for rain produced in the Vocative. 'सूक्ष्मा एव पतन्ति चातक-मुखे द्वित्राः पयोविन्दवः'—*NŚ.* चातक never flutters about clouds which do not possess water. 'निर्गलिताम्बुघनं शरद्घनं नार्दति चातकोऽपि'—*Ra. V.* 17. 'अम्बुगर्भो हि जीमूत-श्चातकैः अभिनन्द्यते'—*Ra XVII.* 60. 'तृषाकुलैश्चातकपक्षिणां कुलैः प्रयाचितास्तोय भरावलम्बिनः'–*RS.* 11. 3; *PA & MD.* 5. '**अग-विवरेभ्यः**'-(*B*)—means '*from the cavities of the mountains*'. **हरिभिः**—(12n. 2); *Ra. III.* 43. **5. गतम्**=गमनम् ('नपुंसके भावे क्तः'—3. 3. 114). For similar use, Cf. 'अवसितं हसितं प्रसितं मुदा विलसितं स्मर-भाषितम् । नसमदाः प्रमदा हृतसंमदाः पुरहितं विहितं न समीहितम्'—*BK. X.* 6. **6. पिशुनयति**—पिशुनं करोति इति पिशुन+णिच् ('तत्करोति तदाचष्टे') + तिप्=पिशुनयति—Indicates, Cf. 'शत्रूणामनिशं विनाश-पिशुनः'—*SPB.* 1. 75. 'तुल्यानुराग-**पिशुनम्**—*Vik. II.* 14; *Ra. I.* 53. Cf. 'अमात्यः **पिशुनः**' —Act VI.

Text:—मातलिः—अथकिम् । क्षणादायुष्मान् 'स्वाधिकार-भूमौ वर्तिष्यते ।

Mātali—Quite right. And in a moment, Your Long-lived (*Highness*) will be on the land [1]under his own sway[1].

Text:—राजा (अधोऽवलोक्य)—मातले ! वेगाऽवतरणात् आश्चर्य-दर्शनः संलक्ष्यते मनुष्य-लोकः तथाहि—

शार्दूल-विक्रीडितं (मसजसततग)

शैलानामवरोहतीव[1] शिखरादुन्मज्जतां[2] मेदिनी
'पर्णा-भ्यन्तर-लीनतां विजहति[4] स्कन्धोदयात्[5] पादपाः ।
'सन्तानात्तनु-भाव-नष्ट-सलिला' व्यक्तिं[8] भजन्त्यापगाः[9]
केनाप्युत्क्षिपतेव[10] पश्य भुवनं मत्पार्श्वमानीयते ॥८॥

King (*Looking down*)—Mātali, owing to our speedy descent, the region of human beings is observed to be of wonderful sight. For,–The earth, it seems, is climbing [1]down from the peaks of the emergent[2] mountains; the trees from the exhibition[5] of (*their*) stems[5], lose[4] (*their*)[3] state of being wrapped in the foliages[3]; the [9]rivers whereof waters[7] had disappeared through attenuation[7], acquire manifestation[8] through[8] expansion[8] (*of their waters*). Behold, the earth is being brought up to my side (*for a clearer view*), as if by someone[10] tossing (*it*) upwards. (8)

V. L.—'अथकिम्'—B. 'पर्णाभ्यन्तर'—B. S. V. M. Śr. 'पर्णस्वान्तर'–R. Colebrooke Mss. 'पर्णेष्वन्तर'—Taylor Mss. 'पर्णप्रस्तर'–Mackenzie Mss. 'पर्णान्तर'—K. 'वर्णस्वान्तर'—S. 'पर्णस्वान्तर'—A's Com. 'सन्तानात्—K. M. 'सन्तानैः'—R. V. 'सन्तानम्'—S. 'सन्धानम्'—B. P. The third line thus occurs in P. B & Dr.—'सन्धानं तनु-भाग-नष्ट-सलिल-व्यक्ता' &c.; S reads 'मर्त्यः' for 'पश्य ।

मातलिरिति । 'अथकिम्' इति स्वीकारे ["अङ्गीकारेऽपि चाथकिम्" इति हारावली] । 'क्षणात्' इति रथ-वेग-सूचनम् । क्षणकालमतिवाह्य इत्यर्थः । [ल्यब्लोपे पञ्चमी] । 'स्वाधिकार-भूमौ' निज-शासन-विषयीभूत-देशे, भूलोके इत्यर्थः । 'तथाहि' तमेवार्थम् जानीहि । **शैलानामिति ।** 'मेदिनी' पृथिवी ["मधु-कैटभयोर्मेदःसंयोगात् मेदिनी स्मृता । धारणाच्च धरा प्रोक्ता, पृथ्वी विस्तार-योगतः ।" ॥ इति देवीभागवतम्] 'उन्मज्जताम्' उद्गच्छताम्' क्रमशः प्रकटीभवताम् 'शैलानां' पर्वतानां 'शिखरात्' अग्रभागेभ्य इत्यर्थः [जातावेकवचनम्] 'अवरोहति' अधोगच्छति 'इव' [इति क्रियोत्प्रेक्षा] ॥ आदौ अतिदूरत्वात् शैलानां पृथगदर्शनात् सर्वं तावत् सम-देश-वर्तितया परस्परम् निमज्जितमिव प्रतीयते स्म । इदानीं तु वेगवतः रथस्य क्रमिक-सन्निहिततया शैला ऊर्ध्वमुत्पतन्त इव,

पृथिवी च तदृश्रृङ्गात् अधःपतन्ती इव प्रतीयन्ते इत्यर्थः। 'पादपाः वृक्षाः 'स्कन्धानां' तरु-प्रकाण्डानां ["स्कन्धः स्यात् नृपतावंसे सम्पराय-समूहयोः। काये तरु-प्रकाण्डे च भद्रादौ छन्दसो भिदि' इति मेदिनी] 'उदयात्' प्राकट्यात् [हेतौ ५मी] 'पर्णानां' पत्राणाम् 'अभ्यन्तरे' मध्ये 'लीनाः प्रच्छन्नाः, तेषां भावं 'पर्णाभ्यन्तर-लीनतां 'विजहति' परित्यजन्ति ॥ आदौ अतिदूरत्वात् तरु-मूलानाम् अदर्शनात् ये तरवः पत्र-राशि-मात्रा इव अज्ञायन्त इदानीं तु वेगवतः रथस्य क्रमिक-सन्निहिततया ते मूलादारभ्य सर्वैरवयवैः दर्शनीयतां गता इत्यर्थः। 'तनोर्भावः' क्षीणत्वं तेन हेतुना 'नष्टानि' अदृश्यानि 'सलिलानि' जलानि यासां तादृश्यः 'आपगाः' नद्यः [अपां समूहः इति आपः ॥ तेन गच्छति इति डः [वाः—३।२।४८] —इति भानुजिः] 'सन्तानात्, विस्तारात् ["सन्तानो विस्तृतौ देववृक्षे चापत्य-गोत्रयोः" इति धरणिः] 'व्यक्तिं' प्राकट्यं 'भजन्ति' लभन्ते ॥ प्रागतिदूरत्वात् या नद्यः सूत्रवत् सूक्ष्मत्वापन्नाः सत्यः अदृश्या आसन् अधुना तु ताः वेगवतः रथस्य सान्निध्येन स्वाभाविकीं विस्तृतिमापन्नाः सुस्पष्टं प्रतीयन्ते इत्यर्थः ॥ 'पश्य' इति वाक्यार्थस्य कर्मत्वम् ॥ 'भुवनम्' पृथिवीम् 'उत्क्षिपता' ऊर्ध्वीकुर्वता [इति क्रियोत्प्रेक्षा] 'मत्पार्श्वम्' [प्राग्व्याख्यातः] सन्निकटम् 'आनीयते इव' [इति गम्योत्प्रेक्षा] ॥ प्रागतिदूरत्वात् पृथिवी अचला इवादृश्यत, इदानीं तु महता वेगेन अधोऽवतरणात् सन्निहिततया पृथिवी-तलमुत्क्षिप्तमिव प्रतीयते इत्यर्थः [स्वभावोक्ति-काव्यलिङ्गो-त्प्रेक्षयोः संसृष्टिः। छेक-वृत्ति-श्रुत्यनुप्रासाः। अत्र 'कार्श्यानाकलिताऽम्भसः पृथुतया व्यक्तिम्" इति पठित्वाऽस्थानस्थ-पदलक्षणो दोषः परिहरणीयः। एतेन सन्तान-शब्दे अप्रयुक्तत्वं निहतार्थत्वं च वा नष्ट-शब्दे नाम-प्रकट-लक्षणार्थानभि-धानात् तत्रावाचकत्वं (?) परिहृतं भवति इति राघवचरणाः ॥ "उन्मज्जनात्" इति पठित्वा प्रथम-पादस्थ-प्रक्रमभङ्गः समाधेयः ॥ 'पश्य' इति वाक्यान्तर-पदस्य केनापीत्यादि-वाक्यान्तरे प्रवेशात् सङ्कीर्णता दोषः। स च 'उतक्षिप्येव ममान्तमानयति कोऽप्येतज्जगद् दृश्यताम्" इति पाठेन समाधेयः' इति सिद्धान्त-वागीशपादाः। अनेन वाच्य-क्रम-भङ्गोऽपि परिहृतः स्यात्। शार्दूलविक्रीडितं छन्दः) ॥३॥

234n.—1. शैलानाम् &c.—(80*n.* 3.)—'मेदस्' also occurs as **अदन्त,** hence मेदः अस्ति अस्याम् इति मेदः+इनि=मेदिनी। Read "मेदस्-समानार्थः **अदन्तः** मेद-शब्दोऽस्ति। तृष्णा कण्डू-कृमिहरो मलघ्नो मेद-कुष्टहा इति शालि-होत्रः" ।—*Bharata (Commentator)*. **पृथिवी** is so yclept as it was smeared with the *fat* of the demons '*Madhu*' and '*Kaitava*,' slaughtered by *Nārāyaṇa* 'मधु-कैटभयोरासीत् मेदसैव परिप्लुता। तेनेयं मेदिनी देवि! प्रोच्यते ब्रह्मवादिभिः'—*Qtd. Bharata; BRP. Ch. VII.* **तथाहि**—'तथा'

(अगण-पठित-धातु गंतौ) +लोट् हि—Gopinātha. *Vide* (12*n*. 4). **2. उन्मज्जतां** &c.—To a man soaring very high in an aeroplane or zappeline, moving with tremendous speed the mountains will appear exactly level with the ground and then they will be indistinguishable from the surface of the earth. But with the **gradual descent** of the aeroplane &c., the mountains also will **gradually** seem to uprear their lowering heads and the earth will appear to recede slowly from them. In the first line, हेतु **has not been exhibited in the ablative and hence प्रक्रम-भङ्गदोष: arises.** For *rectification vide Com.* **3. पर्णास्भ्यन्तर** &c.—Similarly the trees can hardly be distinguished from the leaves, but with the **gradual** exhibition of the stems, they become clearly discernible from the leaves. **4. सन्तानात्**—On account of expansion. *R's* **सन्तानै:** (*in the plural*) gives rise to **क्रम-भङ्ग-दोष: ।** *R* notices अस्थानस्थ-पद-लक्षण: दोष: here, as **'सन्तानात्'** has not been placed **immediately before** 'व्यक्ति भजन्ति' (*Vide Com.*). 'भज्' is usually *Atmp. Cf. Māla.* 1. 2; *ŚK. V.* 10; *Ra. XVII.* 28; *I.* 21. Note the **peculiar meaning of 'भज्' here in the sense of 'acquire'.** Cf. "अभितप्तमयोऽपि **मार्दवं भजते** कैव कथा शरीरिषु"—*Ra. VIII.* 44. **5. केनापि** &c.—The car was approaching the earth with an *intense velocity*; hence to the king, unconscious of his own motion, it appeared that somebody was flinging up the earth with trees, hills and rivers towards him.

Remark:—According to GPŚ, Kāli, is indebted (?) for this vivid description to the drama **'Avimāraka' of Bhāsa,** *Act. V*; where a similar downward aerial journey of the Vidyādhara *Meghanāda* and his consort *Saudāminī*, towards the sandal-wood in the Malaya Mountain is described. (Read Introduction p. *XXI*); also 'एषा विदूरीभवत: समुद्रात् सकानना निष्पततीव भूमि:' —*Ra. XIII.* 18.

Text :—मातलि:—आयुष्मन् । साधु दृष्टम् । (सबहुमानमालोक्य) **अहो, उदार-रमणीया पृथिवी ।**

Mātali—My Long-lived (*king*), well observed. (*Looking with admiration*) Oh ! how grand and lovely (*does the earth look*)

राजा—मातले ! कतमोऽयं पुर्वा-पर-समुद्रा-वगाढ: कनक-रस-निस्यन्दी सान्ध्य इव मेघ-परिघ: सानुमानालोक्यते ।

King—Mālati, what (*is*) this yonder mountain, that has plunged into the eastern and the other [*i. e. western*] oceans,

and that dripping golden fluid appears like a bar ['*gate*'—*M;* '*wall*'—*Roby Datta*] of evening clouds.

मातलिः—आयुष्मन् ! एष खलु हेमकूटो नाम किंपुरुष-पर्वतः' परं तपस्विनां क्षेत्रम् । पश्य—

श्लोक **स्वायम्भुवान्मरीचे र्यः प्रबभूव प्रजापतिः ।**
'सुरासुर-गुरुः सोऽत्र सपत्नीक स्तपस्यति ॥९॥

Mātali—My Long-lived (*King*) this is indeed "*Gold Peak*", by name, the mountain[2] of *Centaurs*,[3] the supreme field of success for the anchorites. Behold—

That *Prajāpati*, who sprang from Marīchi, the son of the self-born (*Brahmā*), and who (*himself*) is the father of gods and demons, practises austerities here along with (*his*) consort (*Aditi*). (9)

V. L.—'आलोक्य'—B. 'विलोक्य'—Others. K, Śr, Ś read "उदग्र"—for 'उदार' । "परं तपस्विनां क्षेत्रम्"—B. 'तपसां सिद्धिक्षेत्रम्'—M.. 'परं तपस्विनां सिद्धिक्षेत्रम्'—S. Mackenzie Mss. 'तपः संसिद्धिक्षेत्रम्'—R; M. V. R read "अत्र" for 'अस्मिन्' ।

मातलिरिति । 'अहो' इति विस्मये । 'उदारा' महती चासौ 'रमणीया चेति ('उदारो दातृ-महतोः' इत्यमरः) । **राजेति ।** 'पूर्वाऽपरयोः' पूर्व-पश्चिमयोः समुद्रयोः' मध्ये 'अवगाढ़ः'—(८।२।३१)—प्रविष्टः । पूर्व-सागरात् आरभ्य-पश्चिम-सागरं यावत् अवस्थितः इत्यर्थः । 'कनकस्य' सुवर्णस्य 'रसः' द्रवः ["रसो गन्धरसे स्वादे तिक्तादौ विष-रागयोः । शृङ्गारादौ द्रवे वीर्ये देह-धात्वम्बु-पारदे" इति विश्वः] तस्य 'निस्यदः' प्रवाहः ['अनु-वि-पर्यभि-निभ्यः स्यन्दतेरप्राणिषु'—(८।३।७२) इति षत्वं पाक्षिकम् । सः अस्ति अस्य इति मत्वर्थीयः इनिः-(५।२।११५)] अतएव सन्ध्यायां भव इति 'सान्ध्यः'—(४।३।१६)—सायंकालीनः 'मेघः परिघ' इव अर्गलवत् सुदीर्घ इत्यर्थः । ['परौ घः'—(३।३।८४) इति अप् । "परेश्च घाऽङ्कयोः"-(८।२।२२) इति पक्षे 'पलिघ'श्च ॥] 'सानुमान्' पर्वतः [इति हेमचन्द्रः) । **मातलिरिति ।** 'किंपुरुषाणाम्' अश्व-मुख-देवयोनि-विशेषाणां पर्वतः' । अयं हि किंपुरुष-वर्षस्य मर्यादा-पर्वतः [तथा चोक्तं भागवते—'दक्षिणेनेलावृतं निषधो हेमकूटो हिमालया इति त्रयो हरिवर्ष-किंपुरुष-भारतानां त्रयाणां मर्यादा-गिरय इति] । 'परं' श्रेष्ठं ['दूरानात्मोत्तमाः पराः' इत्यमरः] 'क्षेत्रं' सिद्ध-स्थानम् ['क्षेत्रं शरीरे केदारे सिद्ध-स्थान-कलत्रयोः' इति मेदिनी) । श्रेष्ठत्वे मानमाह । **स्वायम्भुवादिति ।** 'स्वयंभूः' ब्रह्मा ['स्वयंभूश्चतु-रानन:' इत्यमरः] अस्य अपत्यं पुमान् इति 'स्वायंभुवः'—(६।४।१४६) तस्मात्, अर्थात् ब्रह्मणः मानस-पुत्रात् 'मरीचेः' तदाख्यमुनेः [भुवः प्रभवः'-(१।४।३१)-

इति ५मी] यः प्रजापतिः' कश्यपः 'प्रबभूव' संजज्ञे सुराऽसुराणां देव-दैत्यादीनां [**नित्य-विरोधाऽभावात् न समाहार-द्वन्द्वः**–२।४।९) 'गुरुः' पिता ["गुरुः पिता गुरुर्विप्रः" इति गर्दसिंहः । कश्यप-पत्नी **अदितिः देवानां माता, कश्यपस्य** अन्यतमा पत्नी **दितिः दैत्यानां माता** । अतएव कश्यपः सुरासुराणां पिता । अनेन विशेषणेन अवश्यं नमस्कार-योग्यत्वं सूच्यते] 'सः' कश्यपः 'पत्न्या' अदित्या सह 'सपत्नीकः' ['नद्यृतश्च'—५।४।१५३)–इति समासान्त कप् । अनेन **तवापि अत्र पत्नी-योगः भविष्यतीति ध्वनितम्**] 'अत्र' हेमकूटे 'तपस्यति' तपः आचरति ["कर्मणो रोमन्थ-तपोभ्यां वर्तिचरोः"-(३।१।१५)-इति क्यङ । ततः "तपसः परस्मैपदञ्च", वाः—२६७१—इति परस्मैपदम्) । [**छेक-वृत्त्यनुप्रासौ । श्लोको** वृत्तम्) ॥९॥

235n.—1. कनक-रस-निस्यन्दी–*G's'* कनकरसं निष्यन्दते इति कनकरस--निष्यन्दी' is '**चिन्त्यः**', as 'स्यन्द्' is **ordinarily intransitive.** *HS's* "कनकरसं निस्यन्दयितुं स्रावयितुं शीलमस्य" may do [स्यन्द्—लट् स्यन्दते । सन्-सिस्यन्दिषते, सिष्यन्त्सति सिस्यन्तसते । यङ—सास्यद्यते] । (Vide 19n.3.) **परिघः**—(74*n*.4.) **पूर्वापर** &c.—*Cf.* '**पूर्वापरौ** तोयनिधी वगाह्य &c—*Ku. I.* 1. "**पूर्वापरौ** प्राच्य-पश्चिमौ"—*MN.* **2, हेमकूटः**—Onc of the sacred mountain-ranges that divide thc earth into nine वर्षs :—"हिमवान् हेमकुटश्च निषधश्चास्य दक्षिणे । नीलः श्वेतश्च शृङ्गी च उत्तरे वर्षपर्वताः ॥ लक्षप्रमाणौ द्वौ मध्ये दशहीना-स्तथापरे । सहस्र-द्वितयोच्छ्रायास्तावत् विस्तारिणश्च ते' ॥—*KP. Ch.* 44 ; 47. (हेमकूट-वर्णनम्) ; Kād. p. 527. **3. किंपुरुष** &c.—किञ्चित् कुत्सितः वा पुरुषः 'कि क्षेपे" (2. 1. 64) इति समासः ॥ A kind of demigods (*Eng.* **Centaurs, Gr. Kentauros; Sk. Kinnaras**) with **human head and equinal body,** (*variety of*) *which is also called* **तुरङ्ग-वक्त्र** *with* **human heads on bodies of horses.** *Vide. ŚPB. VI.* 38. 'किन्नरा नर-मुखा अश्व-शरीराः अश्व-मुखा नर-शरीराश्च"—Raghunātha; 'स्त्रीणामश्व-मुखीनाम्'–Rām. IV. 43. 31. *Dr. Wilson's VP. P.* 82, 87. **4. स्वायम्भुवात्**—स्वयम् आत्मना भवति इति स्वयम्+भू+क्विप् कर्तरि ('भुवः संज्ञाऽन्तरयोः'—३।२।१७९) =स्वयम्भूः–Self-born. The word is technically indicative of 'ब्रह्मा' (*Com.*). Cf. 'जग-द्योनिरयो निस्त्वं जगदन्तो निरन्तकः'—*Ku. III.* 9.स्वयम्भुवः अपत्यम् इति स्वयम्भू +अण्=स्वायम्भुवः । 'ऊ' of 'स्वयंभू' **does not take Guṇa** by '**ओर्गुणः**' (6. 4. 146), owing to the Maxim '**संज्ञापूर्वक विधिः अनित्यः** (33*n*., 4). Read "ओरोदिति वक्तव्ये गुणोक्तिः संज्ञापूर्वको विधिरनित्यः

इति ज्ञापयितुम् । तेन स्वायम्भुवम् इत्यादि सिद्धम्"—*SK*. "संज्ञापूर्वक-विधेः अनित्यत्वात् "**धाम स्वायम्भुवं ययुः**"—**Prabhā**; *MN on Ku. II.* 1.(भू= 'भुव' by 6. 4. 71.; SK. 27). 'सायम्भुव' refers to Marici, who was one of the **ten मानसपुत्र** of Brahmā—*Vap. Ch. VIII*;(117*n*, 5). **5. प्रजापतिः**:–Refers to **कश्यप** who is considered to be the **Father** of gods, demons, men, fish, reptiles and all other animals ("**कश्यपात् तु इमाः प्रजाः**" । He married 13 (**Seventeen**—*Bhāgabata and KP*; **eight** —*Rām.*) out of 50 daughters (60—*KP. & Rām*) of **Dakṣa**. Read '**षष्टिं**' दुहितरो: * * कश्यपः प्रतिजग्राह, तासामष्टौ सुमध्यमाः'—*Rām.* "ततः पञ्चाशतं कन्यां * * ददौ स दश धर्माय, कश्यपाय त्रयोदश &c." —*Ādi.* 75 Also "**षष्टिं** दक्षोऽसृजत् कन्यां वैरिण्यां वै प्रजापतिः–&c" —*KP*; "**Kāśyapa** is supposed by some to be a personification of the race who took refuge in the *Central Asiatic* chain, in which traces of his name may be found as **Koh-Kas** (**or Caucasus**), *the Caspian, Kasmira*"—*Dr Wison's Hindu Theatre, Vol. II. P.* 12. The term '**प्रजापति**' is applied to the *mind-born* sons of *Brahmā*, created by him to supply the universe with inhabitants. According to MS (1. 31-35) their number is **ten.** Read "**अहं प्रजाः** सिसृक्षुस्तु तपस्तप्त्वा सुदुश्चरम् । पतीन् प्रजानामसृजम् महर्षीणादितो दश ।। मरीचिमत्र्यङ्गिरसौ पुलस्त्यं पुलहं क्रतुम् । प्रचेतसं वसिष्ठं च भृगुं नारदमेव च" ।। In VP (I. Ch. VII, 4—6) and (*Ādi. Ch.* 66, 10 *and Śānti. Ch.* 206. 20) the above number is reduced to **nine** and **six** (**or seven**) respectively. But in **none of these the name of कश्यप is included.** The *Rām.*, however, specially **mentions** the name of कश्यप in the list of **17 प्रजापति**s, while the *VaP* includes him in the **additional list**. Read 'कर्दमः प्रथमस्तेषां विकृतस्तदन्तरम् । शेषश्च संश्रयश्चैव बहुपुत्रश्च वीर्यवान् ।। * * * **कश्यपश्च** महातेजा स्तेषामासीच्च पश्चिमः ।। —*Rām.* (*III. Ch. XIV.* 6-9). Also "अपरे प्रजानां पतयस्तान् शृणुध्वमतन्द्रिताः । कर्दमः **कश्यपः** शेषः विक्रान्तः सुश्रवास्तथा । * * इत्येवमादयः अन्येऽपि वहवश्च प्रजेश्वराः" ।।—*VaP. Ch.* 65, 52-54. In this connection note that **marriage between first cousins, was allowed** in old days and not considered **incestuous.** (Aditi and **Kāśyapa were the children of the two brothers दक्ष and मरीचि respectively; also 'सुभद्रा' was maternal sister of 'अर्जुन'**). **6. सपत्नीकः**:—

(145n, 3)-suggests that Duṣyanta also *will soon be united with his* धर्मपत्नी। To signify यज्ञफल-भागिनी, 'पत्नी" is the feminine form of 'पति'। "पत्युर् नो यज्ञसंयोगे"—*SK.* 490. "अन्यथा इयं ग्रामस्य पतिः" (Land-lady)—**Pravā.** [In case of शूद्र and other low castes, 'पत्नी' may be derived as **'पति+नी+क्विप् or explained by लक्षणा ।** In the 1st case it will be *declined differetnly.* **'वृषलस्य पत्नी'"** इति व्यस्ते कथमिति, चेन्न । पत्नीव पत्नी इत्युपचारात् ।। यद्वा आचारक्विबन्तात् कर्तरि क्विप्, अस्मिश्च पक्षे "पत्नियौ," "पत्नियः" इतीयङ-विषये विशेषः—*BD.*. "तस्यैव शुद्र-स्त्रियामपि * * गौणवृत्त्या प्रयोगः । यथा "गङ्गायाम्" इति स्त्रीलिङ्गस्य "तीरे" प्रयोगः । उक्तञ्च भाष्ये "तुषजकस्य पत्नीत्युपमानात् सिद्धम्"—*BM*].

Text:—राजा (सादरम्)— **तेन हि अनतिक्रमणीयानि[1] श्रेयांसि । प्रदक्षिणीकृत्य भगवन्तं गन्तुमिच्छामि ।**

King (*Reverently*)—Then surely (*a happy chance of obtaining*) blessings should not[1] be neglected. (*I*) like to proceed after having circumambulated (*thrice*) the revered (*sage*).

मातलिः—आयुष्मन् ! **प्रथमः कल्पः ।** (नाट्येनावतीर्णौ) ।

Mätali—My Long-lived (*king*) (*That's*) a capital idea. (*They gesticulate descent*).

राजा (सविस्मयम्)—मातले !

उपोढ़-शब्दा[1] न रथाङ्ग-नेमयः[2]
वंशस्थविल **[3]प्रवर्तमानं न च दृश्यते रजः ?।**
(जतजर) **[4]अ-भूतल-स्पर्शतया निरुद्धति[5]**
स्तवावतीर्णोऽपि रथो न लक्ष्यते ।।१०।।

King (*With astonishment*)—Mātali,—

By[4] reason of its not touching the ground[4], the fellies of the chariot-wheels[2] have produced[1] no sound[1]; nor too uprising[3] dust is seen (*in front of us*). Although your car [5]which is free from (*upward*) jolting[5], has descended (*to the earth*), (*it*) is not observed (*to have done so*). (10)

V. L.—'सादरम्'—B. Omitted by others. 'निरुन्घतः'—M. V. S. 'अनिरुद्धतः'—R. Śr. 'निरुद्धतिः—B. निरुद्धतः—Prof. G.

राजेति । 'तेन' हेतुना प्रजापतेरत्र स्थितत्वात् । 'अनतिक्रमणीयानि' अनुल्लङ्घनीयानि 'श्रेयांसि' मङ्गलानि कश्यप-दर्शन-नमस्कारादीनि इत्यर्थः 'भगवन्तं माहात्म्यवन्तं ["देवाश्च मुनयश्चैव लिङ्गिनः साधकाश्च ये । भगवन्निति ते

वाच्याः स्त्रीपुंनपुंसकैः" ।। इति भरतः] । मातलिरिति । 'प्रथमः' मुख्यः 'कल्पः' सङ्कल्पः । एषा ते भगवत्-प्रदक्षिणेच्छा प्रशस्यतमा इत्याशयः । उपोढेति । अविद्यमानः' भूतलस्य' पृथिव्याः 'स्पर्शः सम्पर्कः यस्य तस्य 'भावः' तथा इति हेतौ तृतीया) भूमि-स्पर्शाऽभावेन इत्यर्थः । 'रथाङ्गानां' चक्राणां [रथाङ्गेऽपि च चक्रं स्यात्, चक्रवाकेऽपि तत् स्मृतम्" इति गदसिंहः] 'नेमयः' प्रधयः प्रान्तभागा इति यावत् । 'उपोढाः'–(८२।३१)-समारब्धाः 'शब्दाः' भूमि-संघर्ष-जनित-स्वनाः यैः तथाभूताः 'न' असञ्जात-शब्दा इति हृदयम् । 'रजश्च' रेणवश्च [जात्यैकवचनम्] 'प्रवर्तमानम्' तुरग-खुरैः ऊर्ध्वमुद्गच्छत् 'न दृश्यते' । तथाच 'निरस्ता उद्धतिः' उद्घातः अर्थात् हठादेव भूमि-सम्पर्कात् संक्षोभः यस्मात् तादृशः । उद्घात-रहित इत्यर्थः । 'तव रथः अवतीर्णः'–(८।२।४२) भूतलमागतः 'अपि न लक्ष्यते' अवतीर्णतया न बुध्यते । [अतएव विरोधाभासालङ्कारः । अवतरण-ज्ञानाऽभावं प्रति पूर्ववाक्यार्थानां हेतुत्वात् वाक्यार्थ-हेतुकं काव्यलिङ्गम् । तथा च रथावतरणे-कारणे सति तत्कार्याणां नेमि-शब्दादीना मभावात् विशेषोक्तिः । श्रुत्यनुप्रासश्च । वंशस्थबिलं वृत्तम्] ।।१०।।

236n.—1. अनतिक्रमणीयानि &c.—Not to be transgressed. (For reasons *see* 117*n.* 2). **2. प्रदक्षिणीकृत्य** &c.—(132*n.* 7.)—Circu--mambulation is obligatory. Read—"मृदङ्गं गां दैवतं विप्रं घृतं मधु चतुष्पथम् । प्रदक्षिणानि कुर्वीत प्रज्ञातांश्च वनस्पतीन्" ।।—*MS. IV.* 39. *qtd. MN on Ra.* 1. 76; *IV.* 25; *VII.* 24. *Ku. XIII.* 44. **भगवन्तं**—Cf. "गुणैरतुल्यैः निखिलैः समागमादशेष-दोषापगमाच्च नो गुरुः । समग्र-माहात्म्य-विभूषितो यतः प्रकीर्त्यतेऽस्माद् भगवान् असाविति" इति बौद्धागमे ।।(119*n*, 2-3). **3. प्रथमः कल्पः**—'कल्प' means a 'suggestion', 'Proposal'. **Very common in Bhāsa-Dramas.** Also occurs in Māla. I.—(172*n*, 6). 'एष वै प्रथमः कल्पः'—*MS. IV.* 147. **प्रभुः** प्रथम-कल्पस्य'—*Ibid. XI.* 30; *Ra. I.* 94. **अ-भूतल-स्पर्श** &c.—(237n 1.) **4. रथाङ्ग-नेमयः**—'नेमि' *itself implies* "**रथ-प्रान्तः**" Cf. 'चक्रं रथाङ्गं तस्यान्ते नेमिः स्त्री स्यात् प्रधिः पुमान्'—*AK.* Hence further mention of 'रथाङ्ग' gives rise to '*Tautology*'. [The same difficulty arises also in '**धनु-र्ज्या**' (62*n.* 5, *also KSV. II.* 2. 13) '**कर्णावतंस**' '**पुष्प-माला**', '**मुक्ताहार**' (*Ibid.* 14—15). *VK* solves the difficulty thus :—"धनु-र्ज्यादिषु शब्देषु शब्दास्तु धनुरादयः । आरूढत्वादि-बोधाय, प्रयोक्तव्याः स्थिता अमी * * अत्र ज्या-शब्देनापि गतार्थत्वे धनुःशब्देन ज्याया धनुर्व्याततीकरणं बोध्यते ।। आदिशब्दात्—"भाति कर्णावतंसस्ते" । अत्र

कर्ण-स्थितत्व-बोधनाय कर्णशब्दः ॥ एवं 'श्रवण-कुण्डल-शिर-शेखर-प्रभृतिः" । एवं निरुपपदो माला-शब्दः पुष्प-स्रजमेवाभिधत्ते—इति स्थितावपि "**पुष्प-माला** विभाति ते" । अत्र पुष्पशब्द **उत्कृष्ट-पुष्प-बुद्धयै** । एवं "मुक्ताहार" इत्यत्र मुक्ता-शब्देन **अन्य-रत्नाऽमिश्रितत्वम्**—*SD. VII; KSV.* 2.13—16. Here the epithet should be taken to give the idea of उत्कृष्ट-नेमि ॥ **न लक्ष्यते**—Cf. 'क्षीणोऽपि न लक्ष्यते'—(196*n*, 9). **उपोढ़-शब्दाः**—Cf. 'उपोढ-रागः'—Vik. II.

Text :—मातलिः—एतावानेव शतक्रतो रायुष्मतश्च विशेषः[1] ।

Mātali—This much only (*is*) the difference[1] between the Performer of hundred sacrifices and Your Long-lived (*Highness*)

राजा—मातले ! कतमस्मिन् प्रदेशे मारीचाश्रमः ।

King—Mātali, in which part (*lies*) the hermitage of Mārica ?

मातलिः (हस्तेन दर्शयन्)—**पश्य,**

'वल्मीकाऽर्घ-निमग्न-मूर्तिरुरसा[2] **सन्दष्ट-सर्प-त्वचा**[3]
शार्दूल- **कण्ठे जीर्ण**[4]**-लता-प्रतान-वलयेनात्यर्थं संपीडितः ।**
विक्रीडित **'अंस-व्यापि**[5] **'शकुन्त-नीड़-निचितं**[6] **बिभ्रज्जटा-मण्डलं**[7]
(मसजततग) **यत्र 'स्थाणुरिवाऽचलो**[8] **मुनिरसावभ्यर्क-बिम्बं**[9] **स्थितः ॥११॥**

Mātali (*Showing with the hand*)—Behold—

(*There*) where quiescent[8] [*or immovable, stolid. 'Insensate'–Ryder*]. like the stem of a tree (pollard), stands yon sage, staring[9] at the solar orb[9], with[1] (*his*) frame half-sunk in an ant-hill[1], (*his*) breast[2] having[3] closely cleaved by a sanke-slough[3], with[4] (*his*) neck pressed hardly by the coil of worn-out creeper-tendrils[4] and bearing[7] a mass of matted hair[7] overspreading[5] (*his*) shoulders[5] and thickly[6] filled with birds' nests[6]. (11)

V. L.—R alone reads '०अग्र' for 'अर्घ' । उरसा' &c.—R.M. V. 'उरग-त्वग्-ब्रह्म-सूत्रान्तरः'—B. HS. P. Mackenzie Mss. read 'अभ्यर्क०' for 'अभ्यर्क'० ।

मातलिरिति । 'एतावान् एव' [इति **व्यतिरेकालङ्कारः**] 'विशेषः' प्रभेदः । **इन्द्रस्य रथः पृथिवीम् अस्पृष्टः** धावति किन्तु **भवतश्च रथः स्पृष्टः धावति** इत्याशयः । **वल्मीकेति** । 'यत्र' यत् स्थानं मया हस्तेन दर्शितं तस्मिन् । 'असौ' इत्यभिनये । **दूरवर्ती मुनिः** ['अदसस्तु विप्रकृष्टम्' इत्युक्तेः] 'वल्मीके' वामलूरे ['वामलूरश्च नाकुश्च वल्मीकं पुंनपुंसकम्' इत्यमरः । "त्रीणि पिपीलिकादि-निष्कासित-मृत्पुञ्जस्य" इति भानुजिः] 'अर्घं' यथा स्यात् तथा 'निमग्ना' आवृता 'मूर्तिः'

शरीरं ["मूर्तिः काठिन्य-काययोः" इत्यमरः] यस्य तादृशः। [एतेन सुदीर्घकाल-तपश्चरणमुक्तम्]। 'सन्दष्टा' संलग्ना 'सर्पस्य त्वक्' निर्मोकः यत्र तादृशेन उरसा' वक्षसा उपलक्षितः ['इत्थंभूत-लक्षणे' (२।३।२१) इति ३या। अनेन सर्वेषां जन्तूनाम् आश्रयत्वमुक्तम्)। 'जीर्णानां' शुष्काणाम् (अनेन स्थूलत्वं बहु-शाखात्वं च ध्वनितम्] 'लतानां प्रतानः' विस्तारः। स 'बलयः' कण्ठरोमाणि इव [इत्यु--पमित-समासः। संपीड़नस्य साधकत्वात् इति राघवपादाः। ['बलयः' कण्ठरोग्णि स्याद्, 'बलयं कङ्कणेऽपि च' इति विश्वः] तेन। 'कण्ठे' गलदेशे 'अत्यर्थं संपीड़ितः' दृढं निबद्धः [एनेनापि एकस्मिन्नेव स्थाने बहुकाल-पर्यन्तं स्थितिः, अथच अपकारिणि अपि उपकारकत्वमुक्तम्] 'अंसौ' स्कन्धद्वयं ["अंसः स्कन्धे विभागे स्यात्" इति हैमः] व्याप्नोति यत् तत् 'अंस-व्यापि' स्कन्ध-देशाच्छादकम् [अनेन महत्वं ज्ञायते] 'शकुन्तानां' पक्षिणां 'नीडैः' कुलायैः ['कुलायो नीड़मस्त्रियाम्' इत्यमरः] "निचितं" व्याप्तं ['पूरितम्' इति काटयवेमपादाः] 'जटानां मण्डलं' 'समूहं बिभ्रत्' धारयन् [अनेन पर-निमित्त-संपत्त्वं व्यज्यते] 'स्थाणुः' शाखादि-विहीनः वृक्षकाण्ड 'इव' ["स्थाणुः कीले हरे पुमान्। अस्त्री ध्रुवे" इति मेदिनी]। 'अचलः' स्थिरीभूतः 'मुनिः' कश्चित्तपस्वी 'अर्कस्य' सूर्यस्य 'बिम्बं' मण्डलं ['बिम्बं तु प्रतिबिम्बे स्यात् मण्डले बिम्बिका-फले' इति हैमः] 'अभि' लक्ष्यीकृत्य ['अभिरभागे'-(१।४।९१)-इति अभेः कर्मप्रवचनीयत्वं, तद्योगे (२।३।८) च २या॥ यद्वा 'लक्षणेन अभि-प्रती आभिमुख्ये'-(१।१।१४)-इति अव्ययीभावः समासः] 'स्थितः अवतिष्ठते [अनेन तदानीन्तनाऽवस्था वर्ण्यते इति बोद्धव्यं, यतोऽर्कबिम्बमभि सर्वदा दृष्टिनिक्षेपः असम्भाव्य एव, तस्य स्थाणुवत् निश्चलत्वात्, अर्कस्य गतिमत्त्वाच्च। 'मति-बुद्धि-पूजार्थेभ्यश्च' इत्यत्र 'च-कारस्य अनुक्त-समुच्चयार्थत्वात् क्वचित् अकर्मक-धातुभ्यः वर्तमाने कर्तरि क्तः स्यात् इत्यत्र वर्तमाने कर्तरि क्तः। यद्वा, 'यत्र स्थितः, स मारीचाश्रम' इति वाक्य-समाप्तिः]। स्थाणुपक्षेऽपि विशेषणानि योज्यानि—'उरसा' मध्येन। 'कण्ठे' उपकण्ठे समीपे इत्यर्थः। 'अंसः' स्कन्धः। 'जटा' प्ररोह-रूपा॥ (अत्र परिकर-श्लेषो-पमा-नुप्रासाः। शार्दूलविक्रीड़ितं वृत्तम्) ॥११॥

237n.—1. एतावानेव &c.—Unlike the feet of mortals, the gods' **feet,** (also their cars) **never touch** the ground. Besides their **eyes** like those of fish, **never 'wink';** their **bodies** never **'perspire'** and the flowers of their garlands never **'wither'.** Read—**'महीतल-स्पर्शन-मात्र-भिन्नं** ऋद्धं हि राज्यं पदमैन्द्रमाहुः'—*Ra.* 11. 50. **'देव-लिङ्गानि** दृष्टानि राम-लक्ष्मण-संनिधौ। तानि दर्शय देवेन्द्र यदि त्वं देवराट् स्वयम्॥ सीतायाः वचनं श्रुत्वा तथा चक्रे शचीपतिः। पृथिवीं नास्पृशत्

पद्भ्याम् **अनिमेषे-क्षणानि** च ।। अरजोऽम्बर-धारी च **न-म्लान-कुसुम** स्तथा &c.—*Rām. III.* Ch. 52, *Śl* 17—19. '**अम्लान-पङ्कजां** माला शिरस्युरसि चापराम्'—*Devī-Purāṇa.* "देवानां यानि लिङ्गानि स्थविरेभ्य: श्रुतानि मे ।।१४।। साऽपश्यत् विबुधान् सर्वान् **अस्वेदान् स्तब्ध-लोचनान्** । हृषितस्रगजो होमान् स्थितान् अस्पृशतः क्षितिम् ।।३४।। छाया-द्वितीय म्लान-स्रगज:स्वेद-समन्वितः । भूमिष्ठो **नैषधश्चैव निमेषेण च सूचितः**' ।।२५।। *Mahā, Vana.* 57. (नल-दमयन्ती-स्वयंवरे । And—*Nīlakaṇṭha* there on). 'आरुह्य तार्क्ष्यं नभसीव ययौ अनुद्घात-सुखेन मोऽध्वना'—*ŚPB. XII.* 2; 'अनुद्घात-स्तिमित'—*Infra.* "In *Vik I,* when the car of Pururavas **touches the ground,** the stage-direction is "**रथावतार-क्षोभं नाटयति**" i.e. *acting the concussion caused by the descent of the chariot*"—*M.* **22.** '**वल्मीक**' &c.— वल्मीक is the mound of earth thrown up by white ants. It is held sacred. *MS. IV.* 46, 238. **3. सन्दष्ट-सर्प**—(102*n,* 1)—Having a **snake slough** sticking to it'. Cf. 'स्तनोत्तरीयाणि भवन्ति सङ्गान्निर्मोक-पट्टा: फणिभिर्विमुक्ता"—*Ra. XVI.* 17. "**उरग-त्वग्ब्रह्म-सूत्रान्तरः**"—(B) also gives a **very good sense.** It may be explained thus—'उरग-त्वक्' सर्प-निर्मोकः 'ब्रह्मसूत्रान्तरम्' अन्यद् **यज्ञोपवीतं** यस्य तथा-भूतः । That is, on account of his motionlessness, a snake mis-taking him for a tree-trunk, left a **slough** on his shoulder which looked like a second Brāhmanical chord. ['The dead skin of a Serpent on his breast'—Ryder]. **4. लता-प्रतान** &c.—Cf.—"लता-प्रतानोद्ग्रथितैः **सकेशैः**"—*Ra. II.* 8. **5. शकुन्त-नीड़** &c.—नीड़म् =निश्चिन्ता इलन्ति अत्र इति "हलश्च"—(३।३।१२१)—इति घञ् । संज्ञापूर्वकत्वात् न गुणः, ड-लयोः एकत्वम्"—*BhD.* 'इल्' means "to sleep (स्वप्ने).' "Hence where the birds sleep without anxiety. For **जटा** &c.—*Vide. MM.* 1. 6; *MS. IV.* 6. **6. स्थाणुः**—सर्वदा एकत्र तिष्ठति इति स्था (गतिनिवृत्तौ)+णु (By "**स्थो णु**"—*Uṇādi.* 324) "**स्थाणु वा ना ध्रुवःशङ्कुः**'-AK; '**अयं छिन्न-शाख-तरु-प्रकाण्डस्य अधोभागे 'मुडा' इति ख्याते इति भरताद्यः**"—Raghunātha. '**वृक्षे छिन्नेपि तिष्ठति इति स्थाणुः**'-*Ibid.* (Masculine & Neuter)—*Ibid.* Hence a post, branch--less tree, pollard. Cf. "**स्थाणु-च्छेदस्य केदारमाहुः**' &c.—*MS. IX.* 44, It is *optionally neuter.* The God '**शिव**' is also called '**स्थाणु**' (Com.)

as he exists for all times without change. Cf. स 'स्थाणु स्थिर-भक्ति-योग-सुलभः' &c.—*Vik I.* 1. 'स स्थाणुर्कैलासधर'—*BK. XII.* 19. For a similar idea Cf. "ऊर्ध्वबाहुः त्वनिमेष स्तिष्ठन् स्थाणुरिवाचलः'—*Mahā. Ch.* 223, 29. **7. अभ्यर्क-बिम्ब—**अभि+ अर्क-बिम्बम्, where '**अभि**' is a **कर्मप्रवचनीय**, or take the whole as an instance of **अव्ययीभाव** (*Com.*). Cf. 'अभिसायम् उच्चकैः"—*ŚPB.* 1. 16. 'अभि-चैद्यं प्रतिष्ठासुः—*Ibid. II.* 1. and *MN*, thereon. For similar idea, Cf. 'दृष्टिं विमान-व्यवधान-मुक्तां पुनः सहस्रार्चिषि संनिधत्ते'—*Ra. XII.* 34. 'ललान्तप-सप्त-सप्तिः'—*Ibid. XIII.* 41. 'नेत्र-प्रतिघातिनीं प्रभामनन्यदृष्टिः सवितारमैक्षत'—*Ku.* V. 20. It is obvious that this **gazing at the** (**moving**) **sun would be possible for the sage only in some fixed hour of** the day and *not always*, as he is termed '**स्थाणुरिवाचलः**' । When the couple were passing, they chanced upon him with his eyes in that position (Com.). Cf. 'ऊर्ध्वमुखैरर्क-बिम्ब-निहितः'——Kād. pp. 182. 'सूर्य-निविष्ट-दृष्टिरूर्ध्वम्—' Ra. XIV. 66.

Remark:—Our poet gives here a vivid description of an Indian Yogi in his 'समाधि', in which state only such imp**assiveness** for several months is possible **as** will be evident from the life history of '**हरिदास साधु** of 'महाराष्ट्र' । The first authentic exhibition of his "**यौगिक**"–power too**k place in** '**जम्मु**', where he stayed **under-ground for four months,** locked in an wooden box under the surveillance of **ध्यानसिंह**,, minister of "Ranjit Singh". Next time directed by **Lord Bentinck** and **Lord Auckland, Mc. Noton,** the then Political Agent of Rajputana, **put** 'हरिदास' in a wooden box properly locked and kept **him in his own bedroom** at **Puṣkara,** and when after 13 days, the 'साधु' was brought out, he looked like a dry log of wood, but he, to the amazement of all, was, alive again after some time. The *3rd* **historical** exhibition took place in the year 1835. *Ranjit Singh* himself put the '**साधु**' in a wooden box securely locked and *sealed with his personal seal* and the box was buried deep underground, and to prevent any kind of trickery, seeds were sown over the ground. Besides the place was properly guarded day and night. After 40 days the plants had attained full growth and the place was undisturbed. The box was unearthed and opened in the presence of several hundreds of men including *Captain Wade*, Dr. *Mc. Gregor*, and Dr. Murray. The two doctors after meticulous examination

declared 'हरिदास' to be as dead as door nail, but the 'साधु' was alive after sometime—In no cases there was any sign of decomposition. The wonderful supernatural power of "श्री श्री लोकनाथ ब्रह्मचारी" of 'बारदी' (1137 BS—1297 BS) in the District of Dacca (now in Pakistan) had been witnessed by thousands of men, including the **parents and relatives of the anthor of this book.** Even now about one lac of people (including Muslims), every year on the 19th 'वैशाख' assemble on the hermitage of लोकनाथ in "बारदी" to observe his death anniversary.

Text:—राजा—(विलोक्य)—नमोऽस्मै कष्टतपसे ।

King—(*Gazing*)—A bow to that (*sage*) of austere penance.

मातलिः (संयत-प्रग्रहं रथं कृत्वा)—**एतावदिति-परिवर्धित-मन्दार-वृक्षं प्रजापतेराश्रमं प्रविष्टौ स्वः ।**

Mātali (*Drawing in the reins of the car*)—Here (*we*) have entered the hermitage of the Lord of creation, the Mandāra trees wherein have been grown by Aditi (*herself*).

राजा—अहो ! स्वर्गादिदमधिकतरं निर्वृति-स्थानम्[१] **। अमृत-ह्रदमिवाव-**[२]**गाढोऽस्मि ।**

King—Oh ! (*This is*) greater than heaven, a place[1] of content.[1] I am, as though, immersed[2] in a lake of ambrosia.

मातलिः (रथं स्थापयित्वा) **अवतरत्वायुष्मान् ।**

Mātali (*Stopping the car*)—Get down, My Long-lived (King).

राजा (अवतीर्य)**—मातले ! भवान् कथमिदानीम् ।**

King (*Descending*)—But how will you now fare, Mātali ?

मातलिः—[३]**समय-यन्त्रित एवायमास्ते रथः । तद्वयमप्यवतरामः ।** (तथा कृत्वा) **इत इत आयुष्मन् ।** (परिक्रम्य) **दृश्यन्ता मत्रभवतामृषीणां तपोवन-भूमयः ।**

Mātali—The chariot (*itself*) has stopped[3] here, *knowing the insinuation* (*of my command*)[3] I, too, will get down, (*He does so*). This way, My Long-lived (*King*), this way. (*Walking round*) Let the sites of the penance-grove of the revered anchorites be observed.

V. L.—'नमस्ते'—R. V. M. 'नमोऽस्मै'—B. K. S. P. 'एतावदिति &c.—B. 'महाराज ! एतावदिति' &c'—R. M. V. 'एतावति'—S. 'अहो ! स्वर्गादिदम्'—B. Others omit 'अहो' and 'इदम्' । M supported by some Devanāgara Mss. reads 'निर्वृत्ति' for "निर्वृति' ।

B has 'किम्' for 'कथम्' । 'समय-यन्त्रित—&c.'—B. Dr. P. HS. Others read "संयन्त्रित: मया रथ:" । All but B and M read 'आयुष्मान्' for 'आयुष्मन्' ।

राजेति । 'अस्मै' दुरवर्तिने ["अदसस्तु विप्रकृष्टमि" त्युक्ते:] 'कष्टम्' सुतरां कष्टकरं 'तप:' यस्य तस्मै [नम: शब्योगे ४र्थी—५८७] । **मातलिरिति ।** 'अदित्या' देवमात्रा 'परिवर्धिता' जल-दानादिना लालिता 'मन्दारवृक्षा' यत्र तादृशम् । 'प्रविष्टौ स्व:' भवाव: [अस् धातो:लटि उत्तम-पुरुष-द्विवचने रूपम्] 'एतौ' आवामिति शेष: । **राजेति ।** 'निर्वृते:' सौख्यस्य 'स्थानम्' ["**निर्वृति:** सुस्थतायां स्यात् **अस्तागमन-सौख्ययो:**" इति विश्वप्रकाश:) । अवगाढ:' -(८।२।३१)-मध्ये प्रविष्ट: । **राजेति ।** 'कथम्' इति प्रश्ने । 'इदानीम्' अधुना **'कथम्'** आत्मानं व्यापारयिष्यति इति शेष: । अर्थात् अधुना इहैव स्थास्यति उत कश्यपान् द्रष्टुं मदनुगामी भवेत् । **मातलिरिति ।** **'समयेन'** **सङ्केतेन** ("**समय:** शपथाचारे सिद्धान्तेषु तथा धियि । क्रियाकारे च निर्देशे **सङ्केत-कालभाषयो:**" इति मेदिनी) 'यन्त्रित:' स्थापित: । **अस्मादेव रथोऽयम् अन्यत्र न गच्छति ।** (**दैव-रथाणां संकेतज्ञत्वम् रथोस्त्रयोवशोऽपि कविना वर्णितम्**) । 'तत्' तस्मात् हेतो· 'वयम्' अहम् 'अपि' ['अस्मदो द्वयोश्च'—(१।२।५९)-इति **बहुत्वे प्रयोग:**] 'अवतराम:' ।

238n.—1. अदिति &c.—'अदिति', wife of Kaśyapa, is the mother of 'आदित्यs' (Gods)—(235n, 5). **2. स्वर्गादिदमधिकतरं**—&c.—Though there is no rule to sanction **ablative (५मी)** in connexion with **'अधिक'**, *HD* thinks that ५मी **and optionally** **७मी** too are available with **'अधिक' as** *Pāṇini himself* has used as such in two Sūtras of his अष्टाध्यायी । Read—"**यस्मादधिकं**"-(२।३।९), "**तदस्मिन्नधिकम्**"—(५।२।४५) इति च निर्देशात् **अधिक-शब्दयोगे** पर्यायेण **'सप्तमी-पञ्चम्यौ"** भवत:"—Pada-Mañjarī. Elsewhere he sanctions 'तृतीया विभक्ति' । Read—'अधिका खारी द्रोणेन' इति कर्तरि **'तृतीयापि** भवति'—*Ibid on* 5. 4. 45; BD, of course, follows suit. It seems, however, very strange to us that *HD* who is **profoundly read** in the 'महाभाष्य' should **overlook** the fact that सप्तमी in (5. 2. 45) is in **'अधिकरणे** and not due to **the presence of 'अधिक'** । Read "**यद्यपि** तावत् व्यापके **वैषयिके** वा अधिकरणत्वे सम्भवो नास्ति **औपश्लेषिकमधिकरणं** **विज्ञास्यते**"—MBh. "**औपश्लेषिकेऽधिकरणे सप्तमी" इति भाष्यम् ।** "सामीपिकमधिकरणम्' **इति** **कैयट:**—*BM*. **Hence HD's view is to be taken with a grain**

of salt, or we may call these **lines spurious.** In fact in such cases ५मी may be well explained by "पञ्चमी विभक्ते:" (2.3.42.) and ३या by "हेतौ" (2.3.23). Cf. राम: श्यामात् घनेन गरीयान् or (अधिक:) or (प्रकृष्टतर:) and so on. (103n, 3.). **3. भवान् कथम्** &c.—Are you going to stay in the chariot, or will you accompany me ? The king means to say that in the latter case the **steeds may run away with the chariot.** (*See next*). **4. समय-यन्त्रित:**—&c.—(Cf. **'समय-यन्त्रित:'**—Rām. IV. 46. 10; 'शाप-यन्त्रितं'-*Ra. X.* 47). Mātali tells the king that the chariot, **divine** as it is, will not move an inch from where it has stopped. This is because *Kāli.* like *Vālmiki*, believes that all the **Divine Cars** such as '*Puṣpaka* and the like, have **tutelary deities** (अधिदेवता) residing in them, and which *have the power to understand the will or the slightest insinuation of the charioteer or the occupant of the car.* Consequently they will **rise up** in heaven or **come down** on the earth and **stop automatically** according to needs. Hence these विमानs are termed **'काम-गति'** । Read "एतावदुक्तवति दाशरथौ तदीयामिच्छां विमानम् अधिदेवतया 'विदित्वा' । ज्योतिष्पथादवततार" &c.—*Ra. XIII.* 68. "अध्यास्ते काम-गति सावरजो विमानम्"—Ibid. 76; 'आत्म-चिन्ता-सुलभं विमानम्'—*XIV.* 20. 'स तं राजा समारुह्य कामगं वीर्यनिर्जितम् &c. ॥४०॥—*Rām* (*VI.* 15.) "*कामगं * * बभञ्ज च महारथम्"—*Ibid. II*;. 51. * मन: समाधान-विचार-चारिणम् । * मन: समाधाय तु शीघ्रगामिनं * स पुष्पकं तत्र विमानमुत्तमं ददर्श-* *—*Ibid. IV.* 9. 48, where the commentator *Rāma* remarks—'मन: समाधानेन यत्र विचार: गमनस्य तत्र संचरणशीलं मन:-संकल्पित-देश-गमन-शीलम् * * मन: समाधाय स्वामि-मनोऽनुरुध्य तु शीघ्रगामित्वादि धर्मकम्' &c. We have preferred this reading, because the **other one does not clearly state** why the car (हरि-*horses*) will not move elsewhere when both the king and Mātali will be away. Besides **'वयं'** (plural) **does not sound happy** after the singular (**'मया'**) ।

Text :—:—राजा—ननु विस्मयादवलोकयामि ।

शार्दूल-विक्रीडित (मसजसततग)

प्राणानामनिलेन 'वृत्ति' रुचिता सत्कल्प-वृक्षे' वने
तोये काञ्चन-पद्म-रेणु-कपिशे' पुण्याऽभिषेक-क्रिया ।
ध्यानं रत्न-शिला-गृहेषु, विबुध'-स्त्री-सन्निधौ संयमो
यद्वाञ्छन्ति तपोभिरन्य-मुनय स्तस्मिंस्तपस्यन्त्यमी ॥१२॥

King—Indeed with wonder do (*I*) behold—

In a wood abounding[8] in the desire-yielding trees,[8] the necessary maintenance[3] of life (*is obtained by the sages*) with air[1] (*alone; or the sages are wont to support life &c.*) The performance of ablution for (*acquiring*) merit (*alone is thought of*) in water tawny[4] with the dusts of golden lotuses.[4] In houses of jewelled stones, meditation (*is all that is practised*); restraint (*of passion is obsereved*) in the presence of celestial damsels; these (*sages*) paractise austerities in the midst of what other hermits aspire after by means of penance. (12).

V. L.—'सत्कल्प०'—B. K. R. M. 'संकल्प०'—Colebroke Mss. 'पुण्या-भिषेक'—Bh. B. S. HS. Dr. 'धर्मा-भिषेक'—R. M. K. '०गृहेषु'—B. Bh. Dr. HS. Others have '०तलेषु'। 'वाञ्छन्ति'—Bh. P. B. Dr. HS. 'काङ्क्षन्ति'—M. R. K. S.

राजेति । 'ननु' इति संबोधने अवधारणे वा । 'विस्मयाद्' विस्मयमाश्रित्य (इति ल्यप्लोपे ५मी) । वक्ष्यमाण-श्लोकेन विस्मयावहत्व मुपपादयति । **प्राणानामिति** । 'सन्तः' विद्यमानाः 'कल्पवृक्षाः' सर्वाऽभिलाष-पूरका देव-पादप-विशेषा यत्र तादृशे कल्पतरु-पूर्णे अरण्ये **'उचिता' अवश्य-कर्तव्या** 'प्राणानां वृत्तिः' जीवन-धारण-क्रिया 'अनिलेन' केवलं वायुना । न तु कल्पतरु-वितरितेन चर्व्य-चोष्य-लेह्य-पेयादि-द्रव्येण भवति इति शेषः ।। यद्वा ।। यस्मिन् 'वने प्राणानां वृत्तिः 'अनिलेन **उचिता' अभ्यस्ता** [**'अभ्यस्तेऽपि उचितं** न्याय्यम्' इति यादवः) । कल्पतरुः सर्वेभ्यः अभिकाङ्क्षितं वितरति । तस्मिन् सन्निहितेऽपि भोग-विमुखाः एते मुनयः केवलं वायु-भक्षणेन तपस्यन्ति इति विस्मय-जनकमेव । 'काञ्चन-पद्मानां' स्वर्ण-कमलानां 'रेणुभिः' परागैः 'कपिशे' पिङ्गले 'तोये' जले ['अनेन पद्मानां बाहुल्यं सर्वदा प्रस्फुटितत्वं' च व्यज्येते । अतः सुरभित्वमपि] 'पुण्यार्थम्' न तु सुन्दरीभिः सह केलि-करणार्थम् 'अभिषेक-क्रिया' **नैमित्तिक-स्नान-कर्म** क्रियते इत्यपि विस्मयावहम् । 'रत्न'-मण्डिता याः 'शिलाः' ताभिः निर्मितेषु 'गृहेषु' [**उत्तर-पद-लोपी कर्मधारयः**] भवनेषु 'ध्यानं' परमार्थ-चिन्तनं ['आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यश्च' इति श्रुत्युक्तेः] न पुनः विलास-शय्या-शयनादिकम् इत्यपि अत्यद्भुतम् । 'विबुधानां' सुराणां ["**विबुधौ सुर-पण्डितौ**" इति विश्वः] 'स्त्रियः' तासाम् अर्थात् देव-भोग्यानाम् 'सन्निधौ' समीपे 'संयम' इन्द्रिय-निग्रहः । अन्य-सन्निधाने एव संयमो न सिध्यति, विशेषतः स्त्री-सन्निधाने । किन्तु ऐते स्वर्वेश्या-सन्निधौ अपि जितेन्द्रिया इति विस्मयावहम् । अतएव 'अन्यमुनयः, पृथिवीस्थाः शातकर्णि-प्रभृतयः साधारणाः तपस्विनः 'तपोभिः यत्' यादृशं कल्पवृक्षादि-भोगोपायाऽन्वितं स्थानं 'वाञ्छन्ति' प्राप्तुम् अभिलषन्ति

'तस्मिन्' तादृशे भोगोपाय-समन्विते स्थाने 'अमी' दूरे दृश्यमाना 'मुनयः' (राग-द्वेष-विवर्जिता इत्यर्थः–"दुःखेषु अनुद्विग्नमनाः सुखेषु विगत-स्पृहः। वीतराग-भय-क्रोधः स्थितधीर्मुनिरुच्यते" इति तल्लक्षणात्) 'तपस्यन्ति' (३।११५) अमृतत्व-लाभाय तपस्यां कुर्वन्ति। [अनेन तेषां मोक्षार्थित्वं गम्यते। अत्र कल्पवृक्षादीनां कारणानां सद्भावे सति तत् कार्याऽभावे वक्तव्ये तद्विरुद्धाऽनिल-प्राणवृत्तित्वाद्युक्तेः उक्तनिमित्ता **माला-विशेषोक्तिः**॥ चतुर्थ-चरणार्थं प्रति पूर्वचरण-त्रयगत-वाक्यार्थानां हेतुत्वात् वाक्यार्थ-हेतुकं **काव्यलिङ्गम्**। पाद-त्रये प्रतीयमानः **परिसंख्या-लङ्कारः**। अत्रस्थितानां समुत्कर्ष-वर्णनेन अन्यमुनिभ्यः **व्यतिरेकश्च** व्यज्यते। ततोतप इति न्यनयेति स्तस्तेति **छेक-श्रुति-वृत्त्यनुप्रासाः**। **शार्दूलविक्रीड़ितं** छन्दः) ॥१२॥

239n.—1 अनिलेन वृत्तिः—&c.—Cf. "मुनयः **सलिला**ऽ**हारा वायु-भक्षा**-स्तथापरे"—*Rām III.* 6.4; 'दश-वर्ष-सहस्राणि वायु-**भक्षयो** जलाशये'—*III.* 11. 12. "सप्तरात्रे **कृताहारा वायुना** अचलवासिनः"—*Ibid. IV.* 13.19. On this *M* remarks—"The Hindus imagine that supporting life upon air is a proof of the **highest degree of spirituality** to which a man can attain".—**This is totally inaccurate.** Read "आहार-संयम-क्लिष्टा यथेष्टाहार-तुन्दिलाः। **ब्रह्म-ज्ञान-विहीनाश्चेत्** निष्कृति ते व्रजन्ति किम्॥ **वायु-पर्ण-कणा-तोय-व्रतिनो मोक्ष-भागिणः**। सन्ति चेत् पन्नगा मुक्ताः **पशु-पक्षि-जले-चराः**॥—**Mahā-nirvāṇa-Tantra;**' 'नित नहान से हरि मिले तो जलजन्तु होइ। फलमूल खाके हरि मिले तो वादुर-वादराइ॥ तृण भखन से हरि मिले तो बहुत रहे अजा। श्री-छोड़नेसे हरि मिले तो बहुत है तो खोजा॥ दुध पिने से हरि मिले तो बहुत वत्सवाला। मीरा कहे विना प्रेमसे ना मिले नन्दलाला'॥—Dohā of Mirā Bāi. **उचिता**—Either (*i*) **'necessary', 'fit for'.** That is, that much of wind only is inhaled as is neccessary for the sustenance of life. Or, (*ii*) **'accustomed'** (*Com*). Cf. 'परिभ्रमँल्लोहित-चन्दनो-चितः'—*Ki. I.* 34. '**नीवार-**भागधेयो-**चितैः**—*Ra. I.* 50; *II.* 25; *III.* 54; 60; *XI.* 9. **2. सत्कल्प** &c.—'सत्' may mean 'existing', '**विद्यमाने कल्पद्रुमे**'—*K.* Or, it may mean 'fine, good'. Cf. '**सद्भावे साधुभावे च**' &c.—[156*n.* 3.] The sages could have easily obtained *delicious food, charming raiment* or any other object *of luxury* from the **कल्पतरु** (231*n.* 2.), if they simply so desired, but they didn't. **3. काञ्चन-पद्म** &c.—Cf. '**मन्दाकिनी तत्र पुण्या रम्या सुविमलोदका। * * * अन्याश्च: नद्यः शतशः**

स्वर्णपद्मैरलङ्कृता:—*KP.* 47-(हेमकूट-वर्णनम्) । 'सरश्च राजते पद्मैः ज्वलितैः हेम-केशरैः"—*Rām. IV.* 40; 45; 43; 38, 51, 7. '**चामीकरीयैः कमलैर्विनिद्रैः** च्युतैः परागैः परिपिङ्गतोयाम्'—*Ku. XIII.* 27. "निर्विष्टहेमाम्बुज-रेणु यस्याः' —*Ra. XIII.* 60. **पुण्याभिषेक:** &c.—They used to bathe in such waters only to acquire merit and not for making 'जल-केलि' । 4 **रत्न-शिला-गृहेषु**—'**०गृह**' (B) is **certainly better** than '**०तल**', for *Kāli.* elsewhere writes '**नागराणाम्** उद्दामानि प्रथयति **शिला-वेश्मभिः**'—*MD.*26 ; 'प्राविशत् **मणि-शिला-गृहं** हरः'—*Ku. VII*;. 81. "**स्फटिक-मणि-गृहैः**"—BK. X. 49. The presence of jewels suggests that *lamps were not necessary.*" "अत्र मणि-शब्देन नित्योज्ज्वलत्वं ध्वनितं, तेन च प्रदीप-निराकाङ्क्षत्वं, "रत्नाङ्कुरा यत्र रत्न-प्रदीपाः" इत्यादिवत्"—Nārāyaṇa. Read also the description of हेमकूट in *KP. Ch.* 47. The houses, artistically decorated with jewels, were fit for merry-making. But the sages there are of much higher type. Not only they are averse to enjoyments, but they have also extraordinary control over passion even in the company of bewitching celestial Nymphs. Setting at naught all such covetable things they practise austere penance. This is wonderful. **ध्यानं**—"तत्र प्रत्ययैकतानता ध्यानम्"—*Yoga-Sūtra of Patanjali,* 'प्रत्ययैकतानता' means 'अविच्छिन्न-चिन्ता-प्रवाहः'। 5. **यद्वाञ्छन्ति** &c.–'यत्' means such places as are fraught with all the objects of enjoyments (*Viz. celestial damsels, houses inlaid with jewels &c.*) which are desired **by men and ordinary sages like '**शातकर्णि**'** (*Ra. XIII.* 38), and not by **सुतीक्ष्ण**' (*Ibid.* 41-43) and the like.

Text :—मातलिः–उत्सर्पिणी[1] खलु महतां प्रार्थना । (परिक्रम्य । आकाशे) अये वृद्धशाकल्य ! किं-व्यापारः[2] सम्प्रति भगवान् मारीचः ? (आकर्ण्य)—किं ब्रवीषि, दाक्षायण्या पतिव्रता-धर्ममधिकृत्य पृष्ट स्तदस्यै महर्षि-पत्नी-गण-सहिताये कथयतीति ? Mātali–Verily upsoaring[1] (*is*) the ambition of the great. (*Turning round; in the air*)—Hearken, aged *Śā*kalya, what (*is*) His Reverence Mārica doing[2] now ? (*Gesticulating hearing*)—What do you say—"Being queried by the daughter of Dakṣa (*i. e. Aditi*) respecting the duties of a faithful wife, (*he*) is recounting them to her in company with the wives of (*other*) great sages ?"

राजा (कर्णंदत्वा)—अये, प्रतिपाल्याऽवसरः[3] खलु प्रस्तावः ।

King (*Leaning his ear*)—Oh ! verily the introduction of the subject is such as (*its*) time[2] must be awaited.[3] (*i. e. we must wait for a chance at the end of the discourse*).

मातलिः (राजानमवलोक्य)—**अस्मिन्नशोक-वृक्षे-मूले तावदास्ता मायुष्मान् यावस्त्वामिन्द्र-गुरवे निवेदयितुमन्तरान्वेषी[4] भवामि ।**

Mātali (*Looking at the king*)—(*My*) Long-lived (*king*) may sit at the foot of (*this*) Aśoka tree, while (*I*) shall engage myself in seeking[4] out a suitable opportunity[4] to announce you (i. e. your arrival) to the father of Indra.

राजा—यथा भवान् मन्यते (इति स्थितः । मातलिर्निष्क्रान्तः) ।

King —As Your Honour thinks (*proper*).

(*This said, stands. Exit Mātali.*)

राजा (निमित्तं सूचयित्वा)—

मनोरथाय नाशंसे किं बाहो ! स्पन्दसे मुधा[1] ।

श्लोक **पूर्वावधीरितं[2] श्रेयो दुःखं हि परिवर्तते[2] ॥१३॥**

King (*Indicating an omen*)—(*I*) hope not (*to obtain*) the desire (*of my heart*); why, O arm, throbbest (*thou thus*) in[1] vain[1] ? For bliss (*if*) scorned before turns[2] to misery, [*or, Bliss has been disowned before, misery alone encircles* (*me now*)]. (13).

V. L.—'अये'—R. M. 'किमनुतिष्ठति'—R. V. M. S. कि-व्यापारः संप्रति'—B. HS. P. '०धर्म'—R. V. M. K. '०पुण्य'—B. 'तदस्यै'—B. 'तत्तस्मै'—M; K, R & others omit तत् । पत्नीगण'—B. 'पत्नी'—R. M.S. 'मुनयः'—M.K. Mackenzie Mss. HS—'च्छायायां'—for—वृक्षमूले। HS. P. *B* and *Dr supported by the Tamil Mss.* (S) give no speech before the exit of Mātali. Others—'आयुष्मन्, साधयाम्यहम्' (निष्क्रान्तः) । K alone reads "विपरिवर्तते" for "हि परिवर्तते" । B, HS, P read 'मुधा' or 'वृथा' ।

मातलिरिति । 'उत्सर्पिणी' महीयसि पदे धावन्ती, उत्तरोत्तरं वर्धमाना 'महतां प्रार्थना' अभिलाषः [इति पूर्व-वाक्यस्य समर्थकत्वात् **अर्थान्तरन्यासः ।** अन्ये पृथिवीस्थाः साधारण-मुनयः तपोभिः एतादृशं सुखकरं स्थानमभिकाङ्क्षन्ति । किन्तु अत्रस्थाः तपस्विनः **ब्रह्म-निर्वाणम्** इच्छन्ति इति हृदयम्] 'अये' इति संबुद्धौ । 'वृद्धशाकल्य' इति कश्यप-शिष्य-नाम । 'कः व्यापारः' यस्य स इति 'किंव्यापारः' किम् अनुतिष्ठति इत्यर्थः । 'मारीचः' कश्यपः 'दाक्षायण्या' [अत्पत्यार्थे फिञ्" -४।१।१५७] दक्ष-कन्यया अदित्या । **राजेति ।** प्रतिपाल्यः' प्रतीक्षणीयः 'अवसरः' कालः यस्य तादृशः अयं 'प्रस्तावः' पतिव्रता-धर्म-कथन-लक्षण-प्रसङ्गः ।

अर्थात् यावदयं प्रस्तावः समाप्तिमेति तावत् बहिः प्रतीक्षितव्यम् । **मातलिरिति ।** 'अन्तरम' अवकाशं 'अन्विष्यति' यः सः साधुकारिणि णिनिः--(३।२।७८)] । 'आस्ताम्' उपविशतु । **राजेति ।** 'निमित्तं' **दक्षिण-भुज-स्पन्दनरूपं शुभ-लक्षणम् । मनोरथायेति ।** अहं 'मनोरथाय' [इति विषये विषय्युपचारः] अर्थात् मनोरथ-विषयीभूतां शकुन्तलां प्राप्तुमित्यर्थः [कर्मणि ४र्थी—[२।३।१४] 'न आशंसे ['आङ शसि इच्छायाम्' (गः-२३३४) इति आत्मनेपदम्] मम तु मनोरथाऽऽशंसापि नास्ति, प्राप्तिस्तु दूरतः अपास्ता इति भावः । हे 'बाहो, मद्दक्षिण-भुज ! 'मुधा' वृथा ['व्यर्थके तु वृथा मुधा' इत्यमरः] 'किं' किमर्थं त्वं 'स्पन्दसे' । 'पूर्वं' प्राक् 'अवधीरितं' मया अवज्ञातम् ('अवधीर' इति अवज्ञयां चुरादिः । **"भूतपूर्वे चरट्"** (५।३।५७) इति **पाणिनि-निर्देशात्** पूर्व-शब्दस्यात्र पर-निपाते कर्त्तव्ये **"ज्ञापक-सिद्धं न सर्वत्र"** इत्युक्तेः अस्य न पर-निपातः इति बोधव्यम्] 'श्रेयः' शकुन्तला-रूपं कल्याणं **'दुःखम्' अर्थात् दुःख-रूपेण** 'परिवर्तते' परिणतं भवति ।। यद्वा ।। 'श्रेयः मया पूर्वमवधीरितम्' ।। सम्प्रति 'दुःखं हि **परिवर्तते' परिभ्रमति** [इति कुल्लुक-भट्टपादाः -४।१६५] अर्थात् मां परितः तिष्ठति । [मनोरथाय इति विषयस्य निगरणात् **अतिशयोक्तिः । अर्थान्तरन्यासः । वृत्त्यनुप्रासश्च । श्लोको** वृत्तम्] ।।१३।।

240n.—1. उत्सर्पिणी—Gradually soaring high. *i. e.* aspiring after 'ब्रह्मनिर्वाण' । Cf. 'कुत इदानीं से दूराधिरोहिणी आशा'—*P.* 462. **2. आकाशे**—(82*n.* 6; 136*n.* 1.). **3. दाक्षायण्या**—The word 'दक्ष' is a **'वृद्धसंज्ञक'** word by the Vārt 'वा नामधेयस्य', (1. 1. 73). Hence **दक्षस्य** अपत्यं स्त्री इति दक्ष-+फिञ्=दाक्षायणी (ङीष् 4.1.41). Read **'दक्षस्य** अपत्यानि । 'वा नामधेयस्य' इति वृद्ध-संज्ञायाम् "उदीचां वृद्धादगोत्रात्"—(४।१।१५७) इति फिञ् । गौरादित्वात्-(४।१।४१) ङीष्"—*BhD. Mr. Kale, G* and others have **'फक्'** (*Kṣīrasvāmī's view*) which is **inaccurate.** Read (a)—यत्तु "आसुरेरुपसंख्यानम्" (वाः—४।१।१९) इत्यत्र केचिद् 'आसुरि-दाक्ष्योः' इति—इति मुकुट आह ।। **तन्न । भाष्ये दाक्षेरदर्शनात् ।** (b) यदपि गोत्रत्वमुपचर्य "गोत्रे कुञ्जादिभ्यः" **'च्फञ्'**—(४।१।८९) इति **च्फञि** "जातेरस्त्रीविषयादयोपधात्"—(४।१६३) इति 'ङीष्' इत्याह ।। **तदपि न ।। कुञ्जादि-गणे अस्य पाठाऽभावात् ।** उक्त-रीत्योपचारं विना निर्वाहाच्च।(c) यत्तु "अत इञ्" (४।१।९५)। अन्तरापत्येऽपि द्वैपायनवत् "यञिञोश्च"-(४।१।१०१) इति 'फक्' इति **स्वाम्याह ।। तदपि न ।। अन्तरापत्ये फकः अदर्शनात् ।** For a detailed discussion read 'व्याख्यासुधा' of *BhD.*. **4. पतिव्रता-धर्म**—"आर्त्तार्ते, मुदिता हृष्टा, प्रोषिते मलिना कृशा । मृते म्रियते या पत्यौ सा

स्त्री ज्ञेया पतिव्रता" ।। —*Śuddhi-tattvam.* For पतिव्रताधर्मं *vide BrP.* (कृष्ण-जन्मखण्ड)—*Ch.* 83.; Also *Skanda Purāṇa* where *Bṛhaspati* describes, the devotion of *Lopāmudrā* towards her husband, *Agastya.* Also read *Mahā., Anuśāsana,* (स्त्री-धर्म-कथने १४६ अध्याय), beginning from 'उमोवाच ।। स्त्रीधर्मो मां 'प्रति यथा प्रतिभाति यथाविधि । तमहं कीर्तयिष्यामि तथैव प्रश्रितो भव' &c. Such *lectures on Purānas* &c. **(पुराण-पाठः)** are generally begun in the **afternoon.** Cf. **'इतिहास-पुराणाभ्यां षष्ठञ्च सप्तमं नयेत्'**—*Dakṣa Saṁhitā.* **'आकर्णयन्तः प्रति-षष्ठ-वेलां** विनोदमानाः कथकैः कथाभिः'—RH. II. 3, **प्रतिपाल्या** &c.—We must wait and not disturb the lecture by our presence. –(187n. 4). **5. तस्यै**—'तां बोधयितुम्' इति कर्मणि चतुर्थी—(4n.2; 81n. 3. end). **महर्षिः**—(117n. 5.). **6. प्रस्तावः**—Refers to the subject-matter under discussion i.e. पतिव्रताधर्मं । **7. अशोक** &c.—The bark of Aśoka tree (*Jonesia Asoka*) is indispensable for female disease. "The vegetable world scarce exhibits a richer sight than an Aśoka tree in full bloom'. Its flowers are very large "and beautifully diversified with tints of **orange-scarlet,** of **pale-yellow,** of **bright orange,** which form a variety of shades according to the age of the blossom"– *Sir William Jones.* Mātali's suggestion to sit under the **'अशोक'** tree implies that the king will erelong be **freed from sorrow** (अ-शोक)—R. **8. अन्तरान्वेषी**—This is only a **pretext to leave the king alone thus providing him with a free scope of meeting Śakuntalā alone.** (*In this connexion vide* 16*n.* 1. *and* 105*n.* 3). **इन्द्र-गुरवे**—Refers to Kāśyapa, father of Indra and other gods. (Vide *Mahā.* Śānti. *Cf.* 207—208) **9. बाहो** &c.—**'बाहु'** here refers to the **right hand.** 'स्पन्दो भुजस्य इष्ट-समागमाय । स्पन्दः करस्य द्रविणाऽऽप्ति-हेतुः'—*BRŚ.* 'सुहृत्स्नेहश्च बाहुभ्याम्' —*MP. Ch.* 215; (21n. 3; 161n. 7). "अङ्ग-दक्षिण-भागे तु स्फुरणं भवेत् । अथाशस्तं तथा वामे पृष्ठस्य हृदयस्य च"—*MP.* **10. मुधा**—In vain, Cf. 'यत्किञ्चिदपि संवीक्ष्य कुरुते हसितं मुधा'—*SD.* Sometimes it means '*falsely*', '*wrongly*' Cf. 'रात्रिः सैव पुनः स एव दिवसो मत्वा मुधा जन्तवः'—*VŚ.* 78. **पूर्वावधीरितं**—[Also—'अवधीरित-पूर्वं' (Com)]—Either from the root **'अवधीर'** (According to **Vopadeva**

Com.) or from "अव+धीर्"—Cf. "कुत इदानीम् माम् अवधीर्य" &c.—*Rat.* "इतीव धारामवधीर्य मण्डली क्रिया" &c.—*NC.* "अवधीर्य धैर्यकलिता"—*SPB.* "अवधीर्य धैर्य्यं परिश्रमे"—*Ibid.* –(206n. 5; 97n. 5.). **11.** "**दुःखं** &c.—According to R, A & HS. 'दुःखम्: has been used **adverbially** meaning '**with great difficutly,**' '**rarely**'. Cf. "दुःखं ननु कुरुश्रेष्ठ चरिष्यामः महीमिमाम्"-*Maha.* (सौप्तिक-पर्व)–*Ch. IX.* 41. "दुःखं नूनं भविष्यामि विचरन् पृथिवीमिमाम्'—*Ibid.* (स्त्रीपर्व)–*Ch.* 1. 141. "**दुःखं यथा स्यात् तथा'—Nīlakaṇṭha;** "स्वादुभिस्तु विषयै र्हृतस्ततो दुःखमिन्द्रियगणो निवार्यते"–*Ra.XIX*, 49. *Gitā. V.* 6; *XII.* 5. **12.परिवर्तते**–Either (*i*) '**turns to misery**'- -*M*, Or, (*ii*) '(**scarcely**) **returns**'—*R.* Or, (*iii*) '**moves round** (*me*') KB. For the latter sense, Cf. 'शतं वर्षाणि तामिस्रं नरके परिवर्तते'—*MS. IV.* 165 and *KB* thereon. 'द्विगुणं' हृदये परिवर्तते'—*Rām. I.* 77. 28. "**परिवर्तते**" **प्रत्यागच्छति * * दुःख-रूपेण एव चित्ते उदेति**"–HS.

Remark:—*Bhavabhūti* had evidently this Śloka before him when he wrote "मनोरथस्य यद्बीजं तद्दैवेनोदिता हृतम्। लतायां पूर्वलूनायां कुसुमस्यागमः कुतः ॥"—*UC. V.* 20.

Text:—(नेपथ्ये) **मा क्खु, मा क्खु चाबलं करेहि। कहं गदो एव्व अत्तणो पकिदिं** [मा खलु, मा खलु, चापलं कुरु। कथं गत एव आत्मनः प्रकृतिम्।]
(*In the post scenium*)—(*You*) must not be so foolhardy. What you have (*already*) gone back to (*your*) own (*refractory*) nature ?

राजा (कर्णं दत्वा)—**अभूमिरियमविनयस्य,**[1] **तत् को नु खल्वेवं निषिध्यते** (शब्दानुसारेणावलोक्य। सविस्मयम्) **अये, को न खल्वयम् अनुबध्यमानस्तापसीभ्याम् अबाल-सत्त्वो**[2] **बालः।**

अर्ध-पीत-स्तनं मातुरामर्द-क्लिष्ट-केसरम्[3]**।**
प्रक्रीडितुं सिंह-शिशुं बलात्कारेण[4] **कर्षति ॥१४॥**

King (*Leaning his ear*)—This (*is*) no place for petulance;[1] who (*is*) this then, that is being thus forbidden? (*Looking in the direction of the sound—With wonder*) Lo ! who is this boy with unboyish[2] strength, colsely followed by two hermitesses,—(*Who*) for the purpose of playing (*with him*), is forcibly[4] dragging away from its dam a lion's whelp, that has (*but*) partially sucked (*its dam's*) dug and has[3]its manes dishevelled by rough handling[3] ? (14)

V. L.—B reads '**यस्मिन् तस्मिन्नेव आत्मनः प्रकृतिं दर्शयसि**' for "**कथं गतः**" &c. **तत्**—Only **B. M** reads '**सस्मितम्** for '**सविस्मयम्**'। '**एषः**—

R. V. M. S. 'एवं'—B. 'अवरुध्यमान:'—B. 'अनुबध्यमान:'—R. M. V. 'अनुगम्यमान:'—Mackenzie Mss. B reads "करेणैवाकर्षति" for 'बलात्कारेण &c. **'तापसीभ्याम्'**—B.S.HS. Dr. 'तपस्विनीभ्याम्'—Others. 'केशरम्'—M. G., केसरम्'—Others.

नेपथ्य इति। 'चापलम्' अनवस्थिति: (इति हेमचन्द्र:) औद्धत्यम् (इति रघुटीकायां मल्लिनाथा: ३।४२ ; तल्लक्षणं यथा दर्पणे—**मात्सर्य-द्वेष-रागादेः चापलं त्वनवस्थितिः**"] 'आत्मन: प्रकृतिं' स्वभावम् अर्थात् चाञ्चल्यम्। **राजेति।** 'अविनयस्य' अशिष्ट-व्यवहारस्य 'अभूमि:' अस्थानम्। 'निषिध्यते' निवार्यते। 'अये' इति विस्मये। 'अनुबध्यमान:' अनुगम्यमान:। 'अबालस्य अर्थात् यून: 'सत्त्वं' बलं [**"सत्त्वोऽस्त्री** तु जन्तुषु क्लीवं तु व्यवसाये **पराक्रमे"** इति केशव:) तद्वत् 'सत्त्वं' यस्य तथाभूत: (उत्तर-पद-लोपी बहुव्रीहि:)। 'को नु खल्वयं 'बाल:' शिशु: 'सिंह-शिशुं' बलात्कारेण कर्षति' इति, चूर्णिकया सहान्वय:। **अर्धेति।** 'प्रक्रीडितुं' सिंह-शिशुना सह 'खेलां' कर्तुम् 'आमर्दन' आकर्षणाऽऽवेगेन 'क्लिष्टा" विशृङ्खलीकृता: 'केसरा:' स्कन्ध-केशा: [**"सटायां केसरो दन्त्य" इति गर्वसिंह:**] यस्य तम्। 'अर्धम्' असंपूर्णं यथा स्यात् तथा पीत: 'स्तन:' (लक्षणया स्तन्यं दुग्धम् इत्यर्थ:) येन तादृशम् (स्तनन्धयत्वात् सिंह-शिशो: स्वेच्छया अनागमनं व्यज्यते) 'सिंहस्य शिशुं 'बलात्कारेण' हठात्कारेण (इति शब्दरत्नावली), बलाद् ग्रहणेन (इति रघुटीकायां मल्लिनाथपादा: १०।४७) कोऽयं बाल: 'मातु:' जनन्या: सिंहिकाया: सकाशात् इत्यर्थ: (अपादाने ५मी) 'कर्षति' दूरं नयति [**स्वभावोक्तिः उदात्तमनुप्रासश्च। श्लोको** वृत्तम्] ।।१४।।

241n.—1. अभूमि: &c.—Not a place (for ill-bred act) —Cf. 'अभूमिरेषा भुजङ्ग-भङ्गि भाषितानाम्'—Kād. p. 720 "अभूदभूमि: प्रति-पक्ष-जन्मनां भियाम्'—SPB "नाभूदभूमि: स्मर-शायकनाम्'—NC. **चापलं—** Any inconsiderate act, rashness. Cf. 'चित्त-वृत्तिरिव चापलेभ्य: निवारणीया'—*Kād.* पुन: पुन: सूत-निषिद्ध-चापलम्'—*Ra. III.* 41. 'मात्सर्य-द्वेष-रागादेश्चापलंत्वनवस्थिति:'—SD. **2. अनुबध्यमान स्तापसीभ्याम्**—'अनु+बन्ध्' Lit. means 'to bind', or 'fasten to.' Cf. 'सीमन्तं निजम् अनुबध्नती कराभ्याम्'–*ŚPB. VIII.*69, hence **'to follow closely'.** Cf. 'मधुकरकुलै: अनुबध्यमानम्'—*Kād.* The epithet "very focibly expresses the close attendance of a nurse upon a child"—*M.* **'अवरुध्यमान:'** (*B*) means 'ध्रियमाण:'—"Obstructed". All (except B, P. S & Dr) read **'तपस्विनीभ्याम्'** here and in the next stage direction. But this is to be **rejected** and replaced by **"तापसीभ्याम्"** (B), as this word

has been **repeated throughout** in the following passages. Cf. '**तापसी** विलोक्य हसति" ।। **तापसी**—भो, न मां गणयसि । **तापसी**—(उभौ निर्वर्ण्य)—आश्चर्यम् । (प्रविश्य मयूर-हस्ता) **तापसी** &c. **3. अबाल-सत्त्वः बालः**—A boy whose strength is like an un-boy (i.e. a youth) Cf. "बालोऽपि अबाल-प्रतिमो बभूव धृत्या च शौचेन धिया श्रिया च" —*BC. II.* 23. **4. मातुः कर्षति**—Drags away from its mother. *R* construes 'मातुः' with "अर्ध-पीतस्तनं सिंहशिशुम्"(Lion's cub which has but half-sucked its mother's dug, and hence dangerous to leave her dug—*M*) and remarks—"शिशुना अन्यकर्षणमेव दुष्करं, तत्रापि सिंह-शिशु-कर्षणं, तत्रापि अन्यस्मात्, तत्रापि मातुः क्रोड़ात्, तत्रापि स्तनन्धयन्तमिति सर्वोत्कर्षः व्यज्यते" ।। **5. बलात्कारेण**—'*Forcibly*', '*against one's will*'. 'बलात् इति निपातो हटार्थः'—*Kṣīrasvāmī.* Cf. '**बलात्** संदूषयेत् यस्तु परभार्यां नरः क्वचित् । वधदण्डो भवेत् तस्य नापराधो भवेत् स्त्रियः'—*MP. Ch.* 20. 'बलात्' यः 'कारः' करणं स '**बलात्कारः**' (कर्मधारयः), तेन—Using violence, employing force. (Vide 210n, 4). "Cf. 'शाप-यन्त्रित-पौलस्त्य-**बलात्कार**-कच-ग्रहैः'—*Ra. X.* 47. 'मत्ताभियुक्त-स्त्री-**बलात्कार**-कृतञ्च यत् तदप्रमाणं लिखितं भयोपाधिकृतं तथा'—*Nārada qtd. Mitākṣarā.*

Remark :—Similar ideas contained in this and some other Ślokas of this Act are met with in those Cantos of '**Ku**', which according to the occidental scholars are **interpolations made** by a **pseudo-Kālidāsa.** Cf. 'गृह्णन् विषाणे हरवाहनस्य स्पृशन् उमाकेसरिणः सटालीः । स भृङ्गिणः सूक्ष्मतरं शिखाग्रं कर्षन् बभूव प्रमदाय पित्रोः'—*Ku. XI.* 44.

Text :—(ततः प्रविशति यथा-निर्दिष्ट-कर्मा तापसीभ्यां सह बालः) ।

बालः—जिम्भ, ले सिङ्घ-सावअ ! जिम्भ । दन्ताइं दे गणइस्सं (जृम्भस्व, रे सिंह-शावकः, जृम्भस्व । दन्तान् ते गणयिष्यामि) ।

(*Enter a boy behaving as described with two hermitesses.*)

Boy—Gape, ye lion-whelp, gape. (*I*)'ll count thy teeth.

प्रथमा—अविणीद ! किं णो अपच्च-णिव्विसेसाइं सत्ताइं विप्पअरेसि । हन्त, वड्ढइ दे संरम्भो । ठाणे क्खु इसि-जणेण सव्वदमणो त्ति किद-णामहेओसि । (अविनीत[1] ! किं नः अपत्य-निर्विशेषाणि सत्वानि विप्रकरोषि[3] । हन्त, वर्धते ते संरम्भः[4] । स्थाने[5] ऋषि-जनेन सर्वदमन इति कृत-नामधेयोऽसि) ।

First—Naughty[2] (*boy*) ! why d'(*you*) torment[3] the animals (*looked* upon by us) with no difference from our (*own*) offsprings ? O dear ! your turbulence[4] but waxes ! Fitly[5] indeed, thou hast been yclept "*All-taming*" by the anchorites.

राजा—किं नु खलु बालेऽस्मिन् औरस[1] **इव पुत्रे स्निह्यति मे मनः।** (विचिन्त्य) **नूनमनपत्यता**[2] **मां वत्सलयति**[3]।

King—Why, indeed, does my mind yearn towards this boy as towards a begotten[1] child ? (*Reflecting*) Certainly (*my own*) [2]childlessness makes[3] (*me*) feel a fatherly affection[3].

V. L.—'तापसीभ्या'—B. HS. S. Dr.' तपस्विनीभ्याम्'—Others. B. P. HS. have 'सिंह-शावक' for 'सिंह'। 'वर्धते'—M. R. S. 'वर्धते इव'—B. 'मनः'—R. V. M. 'हृदयम्'—B. 'विचिन्त्य'—B. Omitted by others.

तत इति। 'यथा-निर्दिष्टं' सिंह-शावकाऽऽकर्षण-रूपं 'कर्म' यस्य तादृशः। **बालइति।** 'जृम्भस्व' मुखं व्यादेहि। 'गणयिष्यामि' संख्यास्यामि (शिक्षाऽभावात् राज-दारकस्यापि अस्य **शौरसेनी** भाषा)। **प्रथमेति।** तापसीति संबध्यते। 'अपत्येभ्यः' 'निर्गतः' 'विशेषः' प्रभेदः येभ्यः तानि पुत्र-तुल्यानि इत्यर्थः। 'सत्त्वानि' जन्तून् 'विप्रकरोषि' उत्पीड़यसि। 'हन्त' इति खेदे। 'संरम्भः' कोपः [**संरम्भः संभ्रमे कोपे**' इति विश्वः। "रभेः अशव् लिटोः"–(७।१।६३)-इति **नुमागमः**]। 'स्थाने' युक्तम् [इति तत्त्वबोधिनी—४७७]। **राजेति।** 'उरसा' वक्षसा निर्मितः ["उरो वक्षसि च श्रेष्ठे" इति मेदिनी] इति 'औरसः"-(४।४।९४)-अङ्गजः पुत्रः तस्मिन् [**'अङ्गादङ्गाद् सम्भवसि हृदयाद् अभिजायसे। आत्मा वै पुत्रनामासि स जीव शरदः शतम्'** ।।—इति महाभारते शकुन्तलोपाख्याने ७४ अध्यायः]। 'मे मनः स्निह्यति' स्नेहार्दं भवति। 'वत्सलं' स्नेहवन्तं ['सिग्धस्तु वत्सलः' इत्यमरः। "वत्सांसाभ्याम्"—(५।२:९८)-इति लच्] करोति इति ['तत्करोति नदाचष्टे'–(ग: २५७३) इति णिच्]।

242n.—1. सिंह-शावक (B)—is **preferable** to 'सिंह' for it was a **lion-cub** with which the boy was playing. Cf. सिंह-**शिशुं** बलात्कारेण कर्षति'—*VII.* 14. 'वत्स, एतं **बाल-मृगेन्द्रकं**' मुञ्च, 'भद्रमुख * मोचय * * * बाध्यमानं **बाल**-मृगेन्द्रकम्' 'सिंह-**शावकस्य** विमर्दात् परि-भ्रष्टम्'—*Infra.* The boy speaks **शौरसेनी** Prākṛta owing to the dictum—"बालानां षण्डकानाञ्च नीच-ग्रह-विचारिणां उन्मत्तानामातुराणां सैव स्यात्"—*SD. VI.* "**सैव शौरसेनी** "एव" इति तट्टीका" ।। **2. दन्तान् ते** &c.—In a similar way, *Child Kārttiāka* used to count the teeth of snakes and human sculls on the neck of *Śiva.* "**एको नवो द्वौ दश पञ्चसप्तेति** अजीगणत् आत्ममुखं प्रसार्य। महेश-कण्ठोरग-**दन्त**-पंक्ति तदङ्कगः शैशवमौग्ध्यमैशिः ।। कपर्दी-कण्ठात्म-कपाल-दाम्नोऽङ्गुलीं **प्रवेश्यानन-कोटरेषु। दन्तानुपात्तुं** रभसी बभूव मुक्ताफलः-भ्रान्तिकरः कुमारः ।।—*Ku.*

XI. 45-46. (*Vide* 241*n*, **Remark**). **3. अपत्य-निर्विशेषाणि**—Cf. 'त एव जात-**निर्विशेषः** मृगगक्षि-पादपाः'—*UC. III.* 'आधार-बन्ध-प्रमुखैः प्रयत्नैः संवर्धितानां सुतः-**निर्विशेषम्**—*Ra. V.* 6; *XIV.* 22. 'सुत-निर्विशेषः नकुलः'—*Hit.* **विप्रकरोषि**—Tease. [*Vide.* 129*n.* 4.] The hermitesses must be **educated** and of high pedigree and this is why they converse in **शौरसेनी** Prākṛta. 'सौरसेनी प्रयोक्तव्या तादृशीनाञ्च योषिताम्'—*SD.* **4. औरसः**—One of the **Twelve kinds of sons,** (*MS. IX.* 158—160). It is born of a legally wedded wife (धर्मपत्नी) । Cf. **'औरसो** धर्म-पत्नीजः'—Y. *II.* 128. 'स्वक्षेत्रे संस्कृतायान्तु स्वयमुत्पादयेत् हि यम् । **तमौरसं** विजानीयात् पुत्रं प्रथमकल्पितम्'—*MS. IX.* 166. 'सवर्णायां संस्कृतायाम् उत्पादितम् **औरस**-पुत्र विद्यात्'–*Bodhāyana.* ('स्वजाते त्वौरसो-रस्य'") **उरसा निर्मित'** इति उरस्+अण् ("उरसोऽण् च" 4. 4. 94]=औरसः ।। ['चात् यत् । **उरस्यः'**–BD]. Prof. G derives 'औरस' as 'उरसः जातः' (*with* पञ्चमी विभक्ति in उरस्) but this is ("चिन्त्यः") । Read—"**उरःशब्दात् तृतीया-समर्थात् निर्मित इत्येतस्मिन्नर्थे** अण्-प्रत्ययोभवति ।। उरसा निर्मितः' औरसः पुत्र"–*VM.* (4.4.94). *BD*–does the same (1646). "**तृतीयान्तात्** (निर्मित) इत्यर्थे इति शेषः । पुत्र इति संज्ञाधिकारात् लब्धम्"—BM. "संज्ञाधिकारात् **नेह, उरसा निर्मितं** सुखम्"—*T.* **5. स्निह्यति मे मनः**—*Cf.* "अभितस्तं पृथासूनुः स्नेहेन परितस्तरे । **अविज्ञातेऽपि बन्धौ** हि **बलात् प्रह्लादते मनः**"—*Ki. XI.* 8. Also Rāma's speech at the **sight of 'लव'**—'तत् किम् एकपदे एव मे दुःख-विश्रामं ददाति **उपस्नेहयति** च कुतोऽपि निमित्तात् अन्तरात्मानम् । अथवा स्नेहश्च निमित्त-सव्यपेक्ष इति विप्रतिसिद्धमेतत् ।।—*UC. VI.* Also "बाष्पायते निपतिता मम दृष्टिरस्मिन् वात्सल्यबन्धि हृदयं मनसः प्रसादः । सञ्जात-वेपथुभि रुज्झित-धैर्य-वृत्ति-रिच्छामि चैनमदयं परिरब्धुरङ्गैः"—*Vik.* 1. 9. **बालेऽस्मिन्**—A person or a thing to whom any feeling such as 'attachment', 'respect' (भक्ति), 'love' &c. is shown, is exhibited in the **Locative',** in connection with roots such as 'स्निह्', 'अभिलष्' &c. Cf. "सोदर-स्नेहोऽपि **एतेषु**"—Act. I; "**अस्याम्**" "अभिलाषि"—I. 20 "तापस**कन्यायां** ममाभिलाषः"—Act. II "**तस्यां** सोदर्यास्नेहम्"—Act. IV.

Text:—द्वितीया—एषा क्खु केसरिणी तुमं लंघइस्सदि, जइ से पुत्तअं ण मुञ्चिस्सदि [एषा खलु केसरिणी त्वां लङ्घयिष्यति यद्यस्याः पुत्रकं न मोक्ष्यसि] ।

Second—This lioness will (*surely*) attack you, if (*you*) don't let her baby go.

बालः (सस्मितम्)—**अम्महे। बलिअं क्खु भीदो म्हि** (**अम्महे, बलीयः खलु भीतोऽस्मि।** (इत्यधरं दर्शयति)।

राजा (सविस्मयम्)—

Boy (*With a smile*)—Oh ! I'm dreadfully scared, indeed. (*This said, pouts out his under lip*).

श्लोक **महतस्तेजसो बीजं बालोऽयं प्रतिभाति[1] मे।**
[2]स्फुलिङ्गावस्थया वह्निरेधोऽपेक्ष[3] इव स्थितः ॥१५॥

King (*With amazement*)—This boy, appears[1] to me (*to possess*) mighty energy, like fire remaining[2] in a state of scintillation (*i.e.*) *in a sparkling state*)[2] waiting[3] for fuel (*to display its blaze*). (15)

V. L.—All but B read 'लङ्घयति' and 'मुञ्चसि' for 'लङ्घयिष्यति' & 'मोक्ष्यसि'। 'सविस्मयम्'—B. Omitted by others. 'एधोपेक्षः'—B. Dr. Śr. HS. 'एधापेक्ष'—R. V. M. K. S. Some of the B Mss. read 'एधः क्षयः'।

द्वितीयेति। अत्रापि तापसीति संबध्यते। 'लङ्घयिष्यति' अभिभविष्यति तवोपद्रवं किंचित् करिष्यति। **बाल इति।** 'अम्महे' इत्याश्चर्ये। त्वद्वचनात् 'बलीयः' अत्यर्थं यथा स्यात् तथा 'अस्मि' अहं 'भीतः' इति सोल्लुण्ठम् [तस्मादेव "**उपकृतं बहु तत्र किमुच्यते**" इत्यादि-दर्पणोदाहरणवत् **विपरीत-लक्षणया** किञ्चि-न्मात्रमपि नाहं भीत इत्यर्थः गम्यते]। अधरं दर्शयति इति उपहासार्थम्। **महत इति।** 'एधांसि' इन्धनानि ['काष्ठं दार्विन्धनं त्वेधः' इत्यमरः] 'अपेक्षते' यः तथाभूतः ["ईक्षि-क्षमिभ्याञ्च"-(वाः-२९१३)-इति कर्मण्योपपदे णः] काष्ठ-प्राप्ति प्रतीक्षमाणः, 'स्फुलिङ्गस्य' अग्नि-कणस्य ['त्रिषु स्फुलिङ्गोऽग्नि-कण' इत्यमरः। 'फिन्की' इति भाषा] 'अवस्थया' अर्थात् विन्दु-रूपेण ['अवस्थायाम् असंज्ञायाम्'-(१।१।३४)-इति **ज्ञापकाद् अङ्**—['३।३।२०६], नतु क्तिन् [३।३ ९५] 'वह्निरिव' अयं बालः' शिशुः सर्वदमनः मे मम संबन्धे 'महतः" 'प्रखरस्य तेजसः' वीर्यस्य [अग्निपक्षे दीप्तेश्च] 'बीजम्' उतपत्ति-निदानम् ['हेतुर्ना कारणं बीजम्' इत्यमरः] 'प्रतिभाति' प्रतीयते इत्यर्थः। काष्ठापेक्षी अग्निस्फुपलिङ्ग इव विनय मपेक्षमाणः शिशुरयं जगद्दीपकत्वस्य कारणं स्यात्। [**उपमानुप्रासौ। श्लोको** वृत्तम्) ॥१५॥

243n.—**1. लङ्घयिष्यति**—Will hurt, attack, or injure. (212*n*, 7). -['**न लङ्घते** गुरोराज्ञां, न **लङ्घयति** यः स्थितिम्। यं व्याधिरतिदीप्ताग्नि **कदाचिच्च न लङ्घति**"-KR.67]. **2.अम्महे**–Rather *unusual* in the mouth of a **male member** (118*n*, 1.) May be the child had picked it up from the nurses. **3. अधरं दर्शयति**—The boy ironically **pouts out** his lower

lip. This is *extremely natural to the children.* (*Cf. Bengali* 'मुख भेंचान्") । (विनिष्क्रान्तो विसृष्टः स्यात् अधरोऽलक्तकादिना । रञ्जने बालकानाञ्च चेष्टाभेदे नियुज्यते । स्त्रीणां विलास विब्बोक-हर्षादिषु च कीर्तितः) ॥ —*Sangīta-Sudhā-Nidhi.* Cf. "All they that see me laugh me to scorn; they **shoot out the lip"—(Psalm.XXII.7)**. **4.स्फुलिङ्ग**&c. —In a state of scintillation, in a smouldering state. स्फु' is an onomatopoetic word, signifying the sound produced by blowing. (*Cf. Bergali* 'फु')—'स्फु' इति अनुकरण-शब्दः—*BhD.* 'स्फुना स्फुत्कारेण लिङ्गति गच्छति पचाद्यच् (३।१।१३४)—*Bharata.* (Now see 103n. 5). **5. एधोऽपेक्षः**—Waiting for fuels so that it may blaze up. Both 'एधस्'(n) (एधतेऽनेन इति असुन्-उ-४।१८९) and एधः (*m*) (इध्यते अनेन इति "अवेदैधौद्म- —(6.4.29) इति निपातनात् साधुः, यद्वा एधेः 'हलश्च'—(3.3.12) इति करणे घञ् —*BD*..)—mean (*fuel*),.**Both have been used by our poet.** Cf. 'अनलाय अगुरु-चन्दनैधसे'—*Ra. VIII.* 71. '**एधान्** हुताशनवतः (स मुनिर्ययाचे)'-*Ra.* (*IX.* 81) *qtd RM;* Also 'अग्निन् **एधान्** इवानिलः'— *ŚPB. II.* 99. *HS* notices **अधिक-पदता-दोष** in this *Ś*loka. Read उपमेये पूर्वार्धे "शिक्षां प्रतीक्षमाणः" इत्यनभिधानात् उपमाने परार्धे च 'एधोऽपेक्ष' इत्यभिधानात् **'अधिक-पदता-दोषः'**, **'नयन-ज्योतिषा भाति"** इत्यादि-दर्पणोदाहरण-वत् । 'शिक्षां प्राप्स्यन्नयं बालः महातेजाः भविष्यति" इति पूर्वार्ध-पाठेन स दोषः परिहरणीयः—*HS.*

Text:—प्रथमा—वच्छ, एदं मुञ्च बाल-मिइन्दअं । अबरं दे कीलणअं वाइस्सं (वत्स ! एनं मुञ्च बाल-मृगेन्द्रकम् । अपरं ते क्रीड़नकं[1] दास्यामि) ॥

First—My child ! release this poor lion's cub. (*I*) will give you another toy (*to play with*).

बालः—कहिं । देहि णं (कस्मिन् । देह्येनत्) । (इति हस्तं प्रसारयति) ।

Boy—Where (*is it*) ? Give it (*to me first*).

[*This said, stretches his hand*].

(बालस्य हस्तं दृष्ट्वा)—**राजा कथं[1] चक्रवर्ति-लक्षण मप्यनेन धार्यते ।**

तथाह्यस्य—प्रलोभ्य-वस्तु-प्रणय-प्रसारितो[2]
वंशस्थविल **विभाति जाल-ग्रथिताङ्गुलिः[3] करः ।**
(जतजर) **[4]अलक्ष्य-पत्रान्तर मिद्ध-रागया[5]**
नवोषसा भिन्नमिवैक-पङ्कजम्[6] ॥१६॥

King (*Looking at the hand of the boy*)—How now ? the imperial birth-marks[1] are also borne by him. For—

His hand,[2] outstretched in love (*to grasp*) the coveted object,[2] having[3] (*its*) fingers connected (*to another*) as in a web,[3] appeared like a solitary lotus-blossom opened (*tinted*) by the early dawn that[5] has increased (*its*) rufescence,[5] (*and*) the interstices[4] between whose petals (*are yet*) indiscernible.[4] (16)

V. L.—'बालस्य हस्तं दृष्ट्वा'—B. Omitted by others. S has 'संहताऽङ्गुलिः' for 'ग्रथिताङ्गुलिः' । 'अलक्ष्य'—R. V. M. S. K. 'आलक्ष्य' —B & M's Mss. 'नवोषसा'—K. R. V. S. M. 'नवोषया'—B. HS.

प्रयमेति । 'बाल-मृगेन्द्रकम्' इत्यत्र अनुकम्पायां कन् (२०३१) इति बोद्धव्यम् । क्रीड़ति अनेन इति 'क्रीड़नं' [करणे ल्युट्– (३।३।२२३)], ततःस्वार्थे कन् (२०७७) क्रीड़ा-द्रव्यम् इत्यर्थः ('खेलना' इति भाषा) । **राजेति** । 'कथम् इति हर्षे ('**कथं हर्षे च गर्हायां प्रकारार्थे च संभ्रमे**' इति मेदिनी) 'चक्रवर्तिनः' सार्वभौमस्य 'लक्षणं' चिह्नम् 'अपि' न केवलं महापुरुष-लक्षणम् इति अपि-शब्दार्थः । येन चिह्नेन अति-रक्त-करादिना भावि-चक्रवर्तित्वं ज्ञायते । (तथाचोक्तं सामुद्रके । "अङ्कुशं कुण्डलं चक्रं यस्य पाणितले भवेत् । **चक्रवर्ती भवेन्नित्यं** सामुद्रकवचो यथा" ॥ किंच—'यस्य पाणितलौ रक्तौ तस्य राज्यं विनिर्दिशेत्' इति) । **'तथाहि'** तमेवार्थं जानीहि । **प्रलोभ्येति** । प्रलोभ्यते अनेन इति 'प्रलोभ्यं' (बाहुलकात् **करणे यत्**-(३।३।११३)-लोभ-कारकं यत् 'वस्तु' क्रीड़नक-रूपं तत्र यः 'प्रणयः' याच्ञा प्रीति र्वा ('**प्रणयः** प्रसरे प्रेम्नि **याच्ञा**-विस्रम्भयोरपि' इति मेदिनी) तेन 'प्रसारितः' ग्रहणार्थं विस्तृतः (इति स्वभावाख्यानम्) । 'जालवत् ग्रथिता' अन्योन्यं संश्लिष्टा 'अङ्गुलयः' यत्र तथोक्तः 'अस्य' शिशोः 'करः' हस्तः 'इद्धः' (कर्मणि क्तः) **सन्दीपितः संवर्धितः** इति यावत् 'रागः' पङ्कजस्य लौहित्यम् अरुणिमा (इति कुमारे २।१० मल्लिनाथपादाः) यथा, तथाभूतया 'नवया' अचिरोद्गतया '**उषसा**' ['**उषाः प्रातरधिष्ठात्री देवता, इति उणादि-वृत्तौ भट्टोजिः** । "**अत्र** कालेन सह तदभिमानिन्या देवतया अभेद-विवक्षा" इति विद्याम्बुधिः ॥ अतएवोक्तं विश्वप्रकाशे "**उषा रात्रौ तदन्ते स्यादत्राऽनव्ययमप्युषा** ॥" 'नव' इत्यनेन विकास-सामर्थ्यं ध्वनितम्) अचिर-प्रवृत्तेन प्रभातकालेन इत्यर्थः । भिन्नं **केवलं भेदं प्राप्तं न तु सम्यक् विकसितम्**, अतएव 'न लक्ष्याणि' दृश्यानि 'पत्राणाम् अन्तराणि' परस्पराऽवकाश-देशाः विभागा इत्यर्थः यस्मिन् तथाभूतम् 'एकं' द्वितीय-रहितं ('एकं संख्यान्तरे श्रेष्ठे केवलेतरयो स्त्रिषु' इति मेदिनी) 'पङ्कजं' पद्मम् 'इव विभाति' शोभते '(**उपमालङ्कारः** । **काव्यलिङ्गञ्च** । प्रसारितस्यैव करस्य पूर्ण-साम्य-प्रदर्शनार्थम् एक-पदम् । प्रप्रेति त्रान्तरेति **छेक-श्रुति-वृत्त्यनु-प्रासाः** । **वंशस्थविलं वृत्तम्**) ॥१६॥

244n.—1. चक्रवर्ति &c.—(15n. 4; 133*n*. 4). As the boy stretched out his hand to take the toy, the king had a distinct view of his hand which was extremely rufescent. The hand also bore some marks which according to the *Science of Palmistry*, are some signs prognostic of 'Paramount Lordship, (Com.). **2. प्रलोभ्य**&c.–'**प्रणय**' means 'desire', 'longing'. Cf. 'करस्थ-दर्भ-प्रणयापहारिषु'—*Ku. V*. 35.—'प्रणयेन प्रार्थनया'–*MN*. **3.जाल-ग्रथिता-ङ्गुलिः**–Whose fingers (upraised) are sticking to one another like a web. This corresponds to 'अलक्ष्य-पत्रान्तरम्' as applied to **पङ्कज** । K dissolves differently–"जालेषु अन्तरेषु ग्रथिताः संहताः अङ्गुलयः यस्य सः" । Again "जालवत् गवाक्षवत् गवाक्ष-गत-सरल-दारुवत् इत्यर्थः परस्परं संश्लिष्टाः अङ्गुलयः यस्मिन् सः । 'जालं गवाक्षे' इति हेमचन्द्रः"—*HS*. This is a good **sign** and is indicative of 'महापुरुषत्व' । Read "**घनाङ्गुलिःश्च सघन स्त्रिस्रः रेखाश्च** यस्य वै । नृपतेः करतलगा मणिबन्धे समुत्थिता" &c.—*GP. Ch*. 66. 'चक्राङ्क-पादं स तथा महर्षिः **जालाऽवनद्धाङ्गुलि-पाणि-पादम्**"—*BC. I*. 65 '**सुजात-जालाऽवतताऽङ्गुली** मृदु निगूढ-गुल्फौ विष-पुष्प-कोमलौ—*Ibid. VIII*.55. "जालपाद-भूजाविति नर-नारायण-विशेषणमुक्तम्"–*Ś*. **3. नवोषसा** &c.—On this N remarks '**नवोषसा इति पाठःदुष्ट एव, उषः शब्दस्य नित्य-क्लीवत्वात्** । Cf. 'उष प्रत्युषसि क्लीवे'—*AK*. But 'उषम्' in the sense of "*deity presiding over dawn* [*Aurora*] is **feminine,** as is sanctioned by Pāṇini in his 'लिङ्गानुशासनम्' । Read—'प्रतिपद्-आपद्-विपद्-सम्पच्छरत्-संसत्-परिषद्-उपः-संवित्-क्षुत्-पुत्-मुत्-समिधः'—27. Hence Bhavabhūti writes—"जगद्वन्द्यां देवीम् उषसमिव"—(*Now see Com.*). Paṇḍita Tārānātha has included 'उषस् in the Feminine Gender' in his **famous 'वाचस्पत्य-कोष'** । Ś also takes 'उषस्' (*f*) in the sense of 'प्रभातकाल' and quotes from an *unknown lexicon*. M observes—"It is possible that the feminine noun 'उषा' may form its vowel base fr m 'उषस्,' as 'जरा' from "जरस्" । Cf. "आपञ्चापि हलन्तानां यथा **वाचा, निशा, दिशा**"—*Bhāguri*. In fact 'उषस्', though **usually Neuter in Classical Sanskrit,** is always used in the **Feminine in the Vedas,** and we have many a time noticed *our poet's fancy* for (*Archaic Forms*). "अवश्यमेव **चिन्वती** मघोनी **उषाः** याति स्वसरस्य पत्नी"—Ṛ*V. III*. 61. 4; '**अच्छ वः देवीम उसषम्**'—*III*. 61. 5; 6; 7;' 'वि उषा आवः'—*VII*. 7.51. where *Sāyana* observes

'इयम् उषाः दिविजाः' &c. "वाजिनी सूर्यस्य योषा उषाः"—*VII.* 75. The day was just dawning and hence the petals of the (red) lotus were a little and not fully opened and its interstices in the lower part were not visible(अलक्ष्य-पत्रान्तरम्). The boy also stretched out his (red) palm with fingers upraised, but as the fingers were joined at their roots by a sort of membrane, the (red) hand thus looked like a partially bloomed lotus. **एक-पङ्कजम्**-'एक' is added to adapt the simile to the 'single' hand. (*Com*) **4. इद्ध-रागया**—Suggests that the petals of the lotus, naturally red **were made** *extremely* rufescent, by the advent of dawn and hence the comparison with the extremely **red** hand of a **चक्रवर्ती** (Cf. "**अतिरक्तः करोयस्य**" &c. 15n. 4). इन्धी (दीप्तौ) +क्त कर्मणि=इद्धः (संदीपितः)—Kindled, hence *enhanced.* Cf. अग्नीन् इन्धे 'अग्नीत् ऋत्विग-विशेषः)। —*BhD*; Bharata, Kṣīrasvāmī. Read also *SK on* 1500, ['इन्धने तु अन्तर्भूतेनार्थात् ("युनज्मि कालेन") समिन्धानः अस्त्रैकौशलम् –(BK. VI. 37)-Qtd. **मनोरमा**। 'समिन्धानः वर्धयन्' इति '**गणदर्पणे**" **महामहोपाध्यायः रामतारण-शिरोमणिः**।। "समिन्धानः' **दीपयन्**"—MN. Cf. also "अकृत्वा भैक्षचरणम् (**असमिध्य**) **च पावकम्**—MS. I. 187]. For '**राग**' in the sense of **redness'**, Cf. 'अधरः किसलय-रागः'—I. 19; *Ku. III.*10 "**विरक्त**"—*Ra. XIII.* 64.

Remark:—Here the उपमा is not **defective** though two words of **different genders** (*i. e.* करः *and* पङ्कजम्) have been compared. Cf. "न **लिङ्ग-वचने** भिन्ने न होनाऽधिकतापि वा ।। **उपमा-दूषणायालं** यत्रोद्वेगः न धीमताम् ।। स्त्रीव गच्छति षण्डोऽयं, वक्त्येषा स्त्री पुमानिव । प्राणा इव प्रियोऽयं मे विद्याधनमिवार्जिता ।।" *KA. I*;. 51-52.

Text:—द्वितीया—सुव्वदे ! ण सक्को एसो वाआ-मेत्तेण विरमाइदुं । ता गच्छ । मम-केरए उडए मक्कण्डेअस्स इसि-कुमारस्स वण्ण-चित्तिदो मित्तिआ मोरओ चिट्ठ दि । तं से उवहर (सुव्रते[1] ! न शक्य एष वाचा-मात्रेण विरमयितुम् । तद्गच्छ । मदीये उटजे मार्कण्डेयस्य ऋषि-कुमारस्य वर्ण-चित्रितो मृत्तिका-मयूर स्तिष्ठति । तमस्योपहर) ।

Second—Suvratā ! it is not possible to stop him by[1] mere words[1]. Go (*you*), therfore, in my cottage (*where*) lies, belonging to the hermit-boy Mārkaṇḍeya, a parti-coloured earthen peacock. (*Please*) get it for him.

प्रथमा—तह [तथा] । (निष्क्रान्ता) । First—Well. (*Exit*).

बालः—दाव इमिणा एव्व कीलिस्सं (तावत् अनेनैव क्रीडिष्यामि) ।

।। (इति तापसीं विलोक्य हसति) ।।

Boy—(*I*)'ll meanwhile play with this same (*whelp*).
[*This said, laughs looking at the hermitess*].

राजा—स्पृहयामि खलु दुर्ललिताया[2]स्मै । (निश्वस्य)—

[3]आलक्ष्य-दन्त-मुकुलाननिमित्त-हासै-[4]
वसन्ततिलका रव्यक्त-वर्ण-रमणीय-वचः-प्रवृत्तीन्[5] ।
(तभजगग) [6]अङ्काऽऽश्रय-प्रणयिन स्तनयान् वहन्तो
[7]धन्या स्तदङ्ग-रजसाऽ[8]मलिनीभवन्ति ॥१७॥

King—Really I have (*a great*) fancy for this wayward[2] boy. (*Sighing*). The blessed[7] (*alone*) bearing (*on their persons their little*) sons,[6] fondly soliciting a refuge in (*their*)[6] lap, having budd--ing teeth slightly visible[3] by[4] groundless smiles[4], (*and*)[5] attempting prattles fascinating by indistinct syllables[5]—are dirtied[8] by the dust of (*their infantine*) limbs. (17).

V.L.—'विरमयितुम्'—R.V.M.K. 'शमयितुम्'—B.HS. 'विस्मारयितुम्'-S. 'मार्कण्डेयस्य'—R.V.M.K. 'सङ्कोचनस्य'—B. HS. 'मङ्कुणकस्य'—S. Ryder. 'दुर्ललिताय'—R. V. M. B. 'दुर्लसिताय'—K. Excepting P. B, Dr and some Devanāgara Mss. of **Patankar**, **'निश्वस्य' is omitted** by others. For 'मलिनी०' B reads 'परुषी'०. Some of the B Mss. have 'कलुषी०' ।

द्वितीयेति । 'सुव्रते' इति प्रथम-तापस्याः संबुद्धिः । 'विरमयितुम्' निवर्तयितुम् ['मितां ह्रस्वः'–(६।४।९२)–इति णिचि ह्रस्वः]। **वाचा** एव इति 'वाचामात्रम्', तेन [मयूर-व्यंसकादित्वात् **नित्यसमासः**–७५४ । "वष्टि भागुरिः"'–इत्यारभ्य "आपञ्चापि हलान्तानां यथा **वाचा निशा दिशा**" इत्युक्तेः" "**आचार्य-ग्रहणे च विभाषा वक्तव्या**" इति परिभाषोक्तेः, विभाषया 'टाप्' । अन्यथा "**वाङ्मात्रम्**") केवलम् "अपरं क्रीडनकं दास्यामि" इति वाक्येन इत्यर्थः । 'वर्णैः' रक्त-पीतादिभिः नानावर्णैः 'चित्रितः' रञ्जितः 'मृत्तिकया' ['मृदस् तिकन्'–(५।४।३९)-इति स्वार्थे तिकन्] निर्मितः । तादृशः 'मयूर' (उत्तर-पद-लोपी कर्मधारयः) । 'अस्य' इति सम्बन्धमात्रे षष्ठी '**शेषे-विज्ञानात्** सिद्धम् । शेष-लक्षणा अत्र षष्ठी भविष्यति'—इति महाभाष्यम् ॥ "सम्बन्धिमात्रं हि अत्र विवक्षितम्"—इति कैयटः) । **बाल इति** । 'तावत्' इत्यवधौ । मृत्तिका-मयूरा-नयन-पर्यन्तम् ; । **राजेति** ॥ 'दुः' दुष्टं 'ललितं' वाल्यलीला यस्य तस्मै दुर्निवार-शीलाय ("आब्दारे" इति भाषा) 'अस्मै' (१।४।३६) बालकाय 'स्पृहयामि खलु' इत्यवधारणे । **आलक्ष्येति** । 'धन्याः' पुण्यवन्तः ["धनगणं लब्धा"—(४।४।८४)—इति यत् । 'सुकृती पुण्यवान् धन्य' **इत्यमरः**] 'अनिमित्ता' निर्हेतुका 'हासाः' तैः हेतुभिः 'आ' ईषत् ('आङ् ईषदर्थे

अभिव्याप्तौ सीमार्थे धातुयोगे च' इत्यमरः) 'लक्ष्या' दृश्या 'दन्ता मुकुलाः' अर्थात् कुट्-मला 'इव' इति 'दन्त-मुकुलाः' (उपमित समासः—२।१।५६—येषां तादृशान्। 'अव्यक्त-वर्णाः' अस्पष्टाक्षराः अतएव 'रमणीयाः' श्रुति-सुखावहत्वात् मनोहराः—'**बाहुलकात् कर्तरि अनीयर्**-३।३।११३) 'वचः प्रवृत्तयः' वाग्व्यापाराः येषां तथोक्तान्। अर्थात् क्रोड़ाऽऽरोहणो-त्सुकान् 'तनयान् वहन्त' उत्सङ्गे धारयन्तः सन्तः 'तेषां' तनयानाम् 'अङ्गस्थेन रजसा' गात्रस्था-धूलिभिः (**जात्यैकत्वम्**) 'मलिनी-भवन्ति' कलुषीभवन्ति। अतो अघन्योऽहम् एवम्बिधं सन्तानं वहन् तदङ्गरजसा न मलिनीभवामि इत्याशयः। (अत्र वालकस्य यथा व्यापार-वर्णनात् **स्वभावोक्ति** रलङ्कारः। प्रथमचरणे **लुप्तोपमा**। एतद्बालेत्यादि विशेषे प्रस्तुते सामान्यवचनात् **अप्रस्तुतप्रशंसा**। तथा च मादृशा अघन्या इत्यन्य-व्यपोहनात् **आर्थी परिसंख्या** च। एतेषां सङ्करः। णीयणयीति, स्तस्तेति नयान्येति **छेक-वृत्ति-श्रुत्यनुप्रासाः। वसन्ततिलका** वृत्तम्) ॥१७॥

245n.—1. न शक्य एष विरमयितुम्—Here the 1st Case-ending (प्रथमा) in "एषः" involves knotty points of grammar. Let us explain. The grammarians unanimously opine that the predicate expressed by 'आख्यात' (तिङन्त) is *principal* (**प्रधान**), and it is subordinate (**गौण**) when it is incomplete and is expressed by 'कृदन्त' (*such as* क्त्वा, णमुल्, तुमुन् &c). But the incomplete verbs depend upon the principal verb to complete the predication. Consequently the syntax should be **regulated** by the '**Principal Verb'** and not by the '**subordinate one'.** So says *HD*—"आख्यान-पद-वाच्या क्रिया विशेषत्वात् **प्रधानम्। विशेषण-भूता तु अप्रधानम्**। तद्द्वारेण तद्विषययोः शक्त्योरपि गुण-प्रधान-भावः। तत्र प्रधानाऽनुवर्तित्वात् गुणानां तन्मुखप्रेक्षित्वात् तद्विरुद्ध-स्वकार्याऽऽरम्भाभावात् यथायथं विभक्तिरिति"—*PM.* Hence in the sentence "त्वम् एतम् विरमयितुम् न शक्नुयाः":—तिङ' in 'शक्' declares the *Nominative* (**कर्ता**), and 'तुम्' in 'विरम' declares the 'भाव' only. (Cf. "अव्ययकृतो भावे भवन्ति इति वक्तव्यम्"—**Prabhā** under 3. 4. 67). Hence if this sentence is changed into *Passive* voice,attaching 'यत्' after '**शक्**' (3.1. 99)., it is clear that the '**कर्ता**' becomes '**अनभिहित**' and takes third case-ending ('अनभिहिते **कर्तरि करणे च तृतीया** स्यात्'—*SK*. 561); 'एतम्' the object of "शक्नुयाः" should be 'अभिहित', but '**तिङ**' being more *powerful,* the case-ending of 'एतम् should be regulated by the '**प्रधान क्रिया** Hence

it takes 'प्रथमा'—('अभिहिते तु कर्मणि "प्रातिपदिकार्थमात्रे" इति प्रथमैव" *SK.* 537). Thus we have—(त्वया) एषः विरमयितुम् न शक्यः।" In a similar way the following uses may be justified—"यत् मूढेन मया * * (गृहीत्वा) विन्यस्तः त्वयि * * न तस्याः (करः)—*Rat. II*;. 1. [*Also* 86*n*.1. (*end*)]. But **sometimes 'गुण-क्रिया' may get 'प्राधान्य'**। This, of course, will **depend upon the sense.** In the sentence "पाचकः (ओदनं भोक्तु) पचति", if the sense is—'The cook cooks ओदन *with a view to eating*,' then **'गुणक्रिया' becomes 'प्रधान'** (*the root* पच् *being* अविवक्षित-कर्म)। Hence the Syntax being regulated by 'तुम्' in the Neuter Voice(भाववाच्य), we get पाचकेन पच्यते(**ओदनं भोक्तुम्**)। The **optional nature of the case is inferred** from *VM* using the word (**वा**) in the following statement—"तुमर्थाधिकाराच्च सर्वएते भावे प्रत्ययाः। यद्येवं स्वादुकारं भुङ्क्ते देवदत्त इति णमुला **कर्तुर नभिहितत्वात्** कर्तरि कस्मात् तृतीया न भवति। भुजि-प्रत्ययेन अभिहितः कर्ता। न चास्मिन् प्रकरणे शक्ति-शक्तिमतोर्भेदो विवक्ष्यते। समान-कर्तृकत्वं हि विरुध्यते। प्रधान-शक्त्यभिधाने (**वा**) गुण-शक्तिः अभिहितवत् प्रकाशते"—***KV* on** 3. 4. 36. ***KT*** clearly corroborates the same "शके· कर्म-सामान्ये लिङ्गसर्वनाम नपुंसकयुक्ते कृत्प्रत्ययः ([Cf. (शक्यं) (क्षुत्) प्रतिहन्तुम्"—*p.* 231, *l.*] **यदा तु पूर्वमेव विशेष-विवक्षा पदा "शक्या क्षुत्" इति भवत्येव। यदा तु प्रतिघातस्येव क्षुत्कर्म, शकेस्तु प्रतिघातः, तदा '(क्षुधं) प्रतिहन्तुम् (शक्यम्)' इति भवति"** —*Bhāṣya Pradīpa.* The gist of the above has been very nicely put in the following couplets—"**प्रधानेतरयो र्यत्र द्रव्यस्य क्रिययो पृथक्।** शक्तिर्गुणाश्रया तत्र प्रधानमनुरुध्यते॥ प्रधान-विषया शक्तिः प्रत्ययेनाभिधीयते। यदा गुणे तदा तद्वदनुक्तापि प्रतीयते॥"—**Vākyapadīya. वाचा-मात्रेण**-=वाङ्मात्रेण–[5n. 8 (end)]. **2. मम-केरए** &c.–According to **Lassen** 'केरए' is **pleonastic and is** derived from Sk. 'कृते' and hence equivalent to **Latin.** ***'Pertinens ad'***, the meaning being—"*in* ***the cottage belonging to me.***" **अस्य**—(20*n*. 4). **3. दुर्ललिताय**—*Spoilt* ***by fondling*'**, 'fondled to much'. Cf. दुर्योधन—हा मदङ्कदुर्ललित' —***VS. IV.*** Hence ***S*** has 'दुर्लभम् ईप्सितं यस्य' i.e. 'difficult to be coaxed or pleased', 'wayward'. 'दुःखेन लल्यते पाल्यते यः सः दुर्ललितः' —***HS.*** Hence ***'fastidious'*—*MM. IX. 1.*** Cf. 'चक्षु र्न वध्नाति धृतिं तद्रूपालोक-दुर्ललितम्'१—***Vik. II.*** **8, where the word has been used as**

an epithet of the eye. Also 'धिक् धिक् सूत, कृतवानसि वत्सस्य मे प्रकृति-दुर्ललितस्य'—*Mahā. qtd. SD.* Here the epithet should be taken as a term of "*endearment*" and not literally. The **dative** is to be explained by 'स्पृहेरीप्सितः' (1. 4. 36); but "ईप्तिमात्रे इयं संज्ञा । प्रकर्ष-विवक्षायां (**intensive desire**) तु परत्वात् **कर्म-संज्ञा ।। पुष्पाणि** स्पृहयति"—*BD.* **4. दन्त-मुकुलान्**—Cf "दशन-मुकुलैः मुग्धालोकं शिशु दधाति मुखम्'—*UC. I,* 20. **आलक्ष्य—**आ=ईषत्—(191n. 1.) **5. अनिमित्त-हासैः** &c.—Cf. "अहेतु-हास-च्छुरिताननेन्दुः गृहाङ्गन-क्रीड़न-धूलिधूम्रः । मुहुर्वदन् किञ्चिदलक्षितार्थं मुदं तयोरङ्कगत स्ततान"—*Ku. X.* 43. **अव्यक्त—** &c.—*Cf.* "Heu ubi sideri vultus ? Ubi verba ligatis, Imperfecta sonis ? Risusque et murmura soli Intellecta mihi ?"—**Statius. Theb, book V. line 613**—[Alas! where are your heavenly visages ? Where do you bind (i.e. express) by means of **sounds of your imperfect words** ? Your laughter and soft murmurs understood by me only]. For similar idea, Cf. "तमीक्ष्यमाणा क्षणमीक्षणानां सहस्रमाप्तुं विनिमेषमैच्छत् । सा नन्दना-लोकन-मङ्गलेषु क्षणं क्षणं तृप्यति कस्य चेतः"—*Ku. XI.* 20. (एवं च भाषते लोके चन्दनं किल शीतलं । **पुत्रगात्रस्य संस्पर्शः चन्दनात् अतिरिच्यते**" ।। "इदं तत् स्नेह-सर्वस्यं सममाढ्य-दरिद्रयोः । अचन्दनमनौशीरं हृदयस्यानु-लेपनम्"—*MK. X.* 23.—(247*n.* 2); 'आत्म-परिष्वङ्गा-मृत-स्वाद-सुखस्य"— —*Kād.-P.* 244. Now read "धन्यानि तेषां खलु जीवितानि ये कामिनीनां गृहमागतानाम् आर्द्राणि मेघोदक-**शीतलानिगात्राणि गात्रेषु** परिष्वजन्ति" —*MK.* V. 49. *Bhavabhūti* evidently had this beautiful Śloka before him when he wrote the following verse—"अनियत-रुदित-स्मितं विराजत् कतिपय-**कोमल-दन्त-कुट्मलाग्रम् । वदन-कमलकं शिशोः स्मरामि** स्खलदसमञ्जसं मञ्जु-जल्पितं ते"—*UC. IV.* 4; *VI.* 13. & 22. **०प्रणयिणः**—(210n. 3).

Remark:—**M. Chézy,** was enraptured by this verse which displays great farsightedness of our poet anent human psychology. He observes in his beautiful **French edition** of Śakuntalā (*Paris,* 1830)—"* * * strophe incomparable, que tout pére, ou plutôt toute mére, ne pourra lire sans sentir battre son coeur, tant le poete a suy rendre, avec les nuances les plous délicates, l'expression vivante de l'amour maternal." (* ***incomparable strophe** *which*

no father, or rather no mother *will be able to read without a* **beating of heart** *to such a degree has the poet suceeded in putting in it. with all its delicate shades, the living expréssion of maternal love).*

Text:—तापसी (साङ्गुली-तर्जनम्)—**भो ! ण मं गणेसि ।** [भो, न मां गणयसि] । (पार्श्वमवलोक्य) **को एत्थ इसि-कुमाराणं** (कोऽत्र ऋषिकुमाराणाम्) । (राजानमवलोक्य) **भद्दमुह । एहि दाव । मोआवेहि इमिणा दुम्मोअ-हत्थग्गहेण डिम्भ-लीलाए बाहीअमाणं बाल-मिइन्दअं** (भद्रमुख ! एहि तावत् । मोचय अनेन दुर्मोच-हस्त-ग्रहेण[1] डिम्भ-लीलया[2] बाध्यमानं बाल-मृगेन्द्रकम्) । Hermitess (*Chiding him with her finger*)–What! (*you*) heed me not. (*Looking sideways*)—Any one of the sages' boy here ? (*Seeing the king*)—Gentle sir ! (*please*) come (*and*) release this poor lion cub which is being drubbed in childish[2] play[2] by this brat of hardly-loosened[1] clutch[1].

राजा—तथा (इत्युपगम्य सस्मितम्)—**अयि भो महर्षि-पुत्रक !**

रथोद्धता **एवमाश्रम-विरुद्ध-वृत्तिना[1] संयमी[2] किमिति जन्मद[3] स्त्वया ।**
(रनरलग) **[4]सत्त्व-संश्रय-गुणोऽपि दूष्यते[4] कृष्ण-सर्प-शिशुनेव चन्दनः ।।१८।।**

King—Very well. (*This said, approaching—with a smile*)— Ho ! ye child of a great sage!—

Why is (*thy*) [3]self-controlled progenitor[3] (*who is endowed*) even with[4] the virtue of being the refuge of (*all*) creatures[4] is dishonoured [*or demoralized*] by thee whose behaviour is (*quite*) [1]contrary *to the peaceful character of*) a hermitage,[1] like a sandal tree (*defiled*) by the young cobra. (18)

तापसी—भद्दमुह ! ण क्खु एसो इसि-कुमारओ

[भद्रमुख ! न खल्वेष ऋषि-कुमारकः] ।

Hermitess.—But sir, he (*is*) not the son of a hermit.

V. L.—'साङ्गुली-तर्जनम्'—B. HS.Omitted by others.'अवलोक्य'—B. V. M. 'अवलोकयति'—R. M. 'अवलोकयन्ती'—S. 'दुर्मोच'—V. M. S. 'दुर्मोक'—R. Sr. 'दुर्मोक्ष'—B. 'ग्रहेण'—B. V. R. 'ग्राहेण'—M. B reads 'डिम्भेन' for 'डिम्भलीलया । 'तथा'—B. Omitted by others. '०पुत्रक' —B. Others have '०पुत्र' । 'संयमः'—K. R. V. M. 'संयमी'—B. HS. 'जन्मदः'—P. B. HS. 'जन्मनः'—K. M. S. 'जन्मतः'—V. R. 'गुणः'—B. K. Mackenzie Mss. 'सुखः'—R. V. M. S. 'चन्दनः'— —B. S. R's Com. 'चन्दनम्'—M. V. R.

तापसोति। 'साङ्गुली-तर्जनम्' अङ्गुल्या तर्जयित्वा इति भावः। 'भद्राणां' श्रेष्ठानां जनानां 'मुखं' प्रधानं तत्संबुद्धौ। ('मुखमाद्ये प्रधाने च' इत्यमरः)। 'ऋषिकुमाराणां' मध्ये कोऽत्र आस्ते इति शेषः। दुःखेन मुच्यते इति 'दुर्मोचः' (मुञ्चतेः मोचयतेर्वा कर्मणि खल्–(६।३।१९६)–**'दुर्मोकः'** इत्यपपाठः'–चकारस्य **ककारत्वाऽसिद्धेः**) तादृशः 'हस्तेन ग्रहः' धारणं यस्य तेन। 'डिम्भस्य' शिशोः ('डिम्भौ तु शिशु-बालिशौ' इत्यमरः) 'लीला' 'क्रीड़ा' तया 'बाध्यमानम्' आकर्षणादिना क्लिश्यमानम्। **राजेति।** "अयि" इत्यनुनये ('अनुनये त्वयि' इत्यमरः)। **एवमिति।** 'एवम्' अनेन प्रकारेण सत्त्वोपद्रवादिना इत्यर्थः। 'आश्रमस्य' तपोवनस्य 'विरुद्धा' प्रतिकूला 'वृत्तिः' हिंसा-रूपः व्यवहारः यस्य तथाभूतेन 'त्वया' (कर्त्रा) 'संयमी' मुनिः (इति धरणिः)अतएव महर्षि-पुत्रकः इति सबुद्धिः।। अथच ब्राह्मणोचित-हिंसादि-विवर्जितः [तथाचोक्त भारते—"अहिंसा परमो धर्मः सर्वप्राणहित परम्। तस्मात् प्राणभृतः **सर्वान्नहिंसेत् ब्राह्मणः क्वचित्**।। ब्राह्मणः सौम्य एवेह जायतेति पराश्रुतिः" इति। "यमः सम्-उप-निविषु च" (३।३।६३) इति अप्। ततः इन् (५।२।११५)। अस्मादेव 'सत्त्वाना जन्तूनां ('सत्त्वोऽस्त्री जन्तुषु वन्ही तु व्यवसाये पराक्रमे' इति केशवः) 'सश्रयः' सम्यग्रक्षण, तद्रूपः 'गुणो' यस्य तथाविधः 'अपि' (चन्दनपक्षे तु 'सत्त्वाना' छायादिना यः 'संश्रयः' तद्रूपः 'गुणः' धर्मः यस्य सः) तव 'जन्मदः' अहिंसकः पिता 'कृष्णसर्पस्य विषाक्तसर्प-भेदस्य (**अविग्रहः नित्यसमासः**) 'शिशुना चन्दनः' स्व-नाम-ख्यात-वृक्ष-विशेषः ('चन्दनोऽस्त्रियाम्' इत्यमरः) 'इव किमिति' किमर्थम् अकारण मित्याशयः 'दूष्यते' मलिनतामापाद्यते। (**अत्र श्रौती पूर्णोपमा। अनुप्रासश्च। रथोद्धता** वृत्तम्, न **"स्वागता"**) ।।१८।।

246n. –1. ऋषिकुमाराणाम्—The Genitive here has the sense of "*from amongst*" (*Com.*). **भद्रमुख**—Lit. 'O ye with auspicious countenance.' (Also Com). According to *VK* the epithet is to be—used only in addressing a *King's son by inferior characters*. Read "सौम्य भद्रमुख इत्येवम् **अधमैस्तु कुमारकः**"—*SD. VI.* Our poet here and elsewhere **violates** the rules of dramaturgy. This is because **he flourished at a time when many such rules were not in vogue.** (25*n*, 3). *K*, however, extends the application 'सौम्य' and **'भद्रमुख'** to *any honourable person, without citing any authority*. **दुर्मोच** &c. –R's **'दुर्मोकः** seems to be grammatically **indefensible.**(*Com*).**संयमी-** A sage(मुनि)who has controlled all his passions. **2. जन्मदः—'जन्म'** or **'जन्मं'** ददाति इति जन्मदः—[3. 2. 23] —**Father.** 'जन्म' is (नान्त,

Neuter) or (अकारान्त—*Masculine*) 'मकि' (ऊ—१५०) **जन्म-शब्दः अदन्तः पुलिङ्गः—***BhD.* "क्लीबोऽपि"--*Ujjvala-Datta.* **3. संयमी**—&c. Your father (**जन्मदः**) is self-contolled (संयमी) and he observes forbearance from hurting animals and has thus become the resort of all creatures (सत्त्व-संश्रयः), but how is it that, you—son of such a great sage (महर्षि-पुत्रक) have been quite opposite to him,—a wayward child, teasing the animals all the while. Thus you are going to disgrace your father just as a poisonous adder vitiates a sandal tree. 'सर्वभूतेषु य. मम्यक् ददाति अभय-दक्षिणा। हिंसाद्वेष-विमुक्तात्मा स वैधर्म्येण युज्यते' &c.--'*Mahā.* Cal. Ed. *pp.* 2001. With the reading 'सत्त्व-संश्रय-सुख.', translate--Delighting (सुखयति इति सुख) in the protection &c'. M reads '**जन्मनः**' for 'जन्मद.', and 'सयम:' for 'संयमी' and observes '**जन्मनः जन्महेतोः इति काटयवेमः।** "So प्रभवः-- जन्महेतु: (*Vide p.* 79 *l.* 27), the operative cause of being i.e., a **father;** otherwise I should translate "*from thy birth*"—*M.* Evidently he derives 'जन्म' with 'मनिन्' in the 'अपादान-वाच्य'। To us, however, 'जन्म' **signifying 'father',** appears to be quite **un-Kālidāsian.** The other reading **जन्मतः**' has been explained by V & R as 'जन्मत. आरभ्य'--*From the very birth.* But was he defiling it from his very birth. Besides the latent implication of this reading is not a happy one. **आश्रम-विरुद्ध** &c.—Cf. "**अद्य** पुष्पमभिदर्थम् ऋषिकुमारकैः सह गतेन **आश्रम-विरुद्धमाचरितम्**"—*Vik. Act. V.* **4. कृष्ण-सर्प**--&c. It must be noted that 'कृष्णसर्प:' is *any* **poisonous serpent of of any colur,** and not a '**black snake'.** This is a case of '**अविग्रह-नित्यसमासः**'। "**नित्यसमासःनित्यःसमासः यस्य विग्रहो नास्ति**"—*MBh.* 'बहुलग्रहणं व्यवस्थार्थम्। कचिन्नित्यसमास एव। कृष्णसर्पः—*KV.* In other words if by the **mere addition** of विभक्ति, a प्रातिपदिक **does not give its true meaning,** then it is a case of नित्यसमासः। The converse of this is अनित्य-समास। —"**विभक्ति-मात्र-प्रक्षेपात्** निजाऽन्तर्गत-नामसु। स्वार्थस्याऽबोध-बोधाभ्यां नित्याऽनित्यौ समासकौ॥'—*Jagadīśa Tarkālaṅkāra* in 'शब्द-शक्ति-प्रकाशिका'। **5. चन्दन**—Both *Masculine* and *Neuter.* (*Com.*) Hence for the sake of simile, Bengali reading should be preferred. Even R endorses

this view ? ** इति कोशात् चन्दन इति पठनीयम् । "This celebrated tree (**Sirium myrtifolium**) seems to have paid dearly for the fragrance of its wood". "The **root** is infested by **serpents,** the **blossoms,** by **bees;** the **branches,** by **monkeys;** the **summits,** by **bears.** In short there is not a part of the Sandal tree which is not occupied by the vilest impurities"—*Hit. II. Verse* 163.—*translated by M.* (14*n.* 4); *Ra. IV.* 48; *X.* 42.

Text:—राजा—[1]**आकार-सदृशं चेष्टितमेवास्य कथयति । स्थान-प्रत्ययात्तु**[2] **वयमेवं-तर्किनः ।** (यथाऽभ्यर्थितमनुष्ठिठन् बालकस्य स्पर्शमुपलभ्य । स्वगतम्)—

उपजाति (जतजगग ततजगग) **अनेन कस्यापि कुलाङ्कुरेण**[3] **स्पृष्टस्य गात्रेषु सुखं ममैवम् ।**
कां निर्वृतिं[4] **चेतसि तस्य कुर्याद् यस्यायमङ्गात् कृतिनः**[5] **प्रसूतः ॥१८॥**

King—His action itself befitting[1] (*his*) mien[1], betokens it. But [2]from the consideration of the place[2] (*he is now in*), I surmised that way. (*Doing as requested, feeling the touch of the boy.—Aside.* (*If*) such is (*the thrill of*) delight in my limbs, touched by[3] this sprout of the family[3] of someone (*unknown to me*), what rapture[4] then he must engender in the heart of that fortunate[5] person, from whose loins he has sprung. (19)

तापसी (उभौ निर्वर्ण्य)—**अच्छरिअं ! अच्छरिअं** [आश्चर्यम् ! आश्चर्यम् !

Hermitess (*Surveying both*)—Wonderful ! wonderful !

राजा—आर्ये । किमिव ।

King—What excites your surprise, madam ?

तापसी—इमस्स बालअस्स असम्बद्धे वि भद्दमुहे रूप-संवादिणी दे आकिदित्ति विम्हिद म्हि । अवि अ वाम-सीलो वि अवरिइदस्स वि दे अप्पडिलोमो संवुत्तो (अस्य बालकस्य असम्बन्धेऽपि भद्रमुखे रूप-संवादिनी[6] ते आकृतिरिति विस्मिताऽस्मि । अपि च वाम-शीलोऽपि[7] भूत्वा अपरिचितस्यापि ते अप्रतिलोमः[8] सवृत्तः) ।

Hermitess—Though unrelated, Gentle Sir, your person [6](*strikingly*) resembles the feature[6] of this boy, (*and*) so I'm astonished. Though (*naturally*) restless[7], even to you, a (*mere*) stranger he (*has*[8] *ceased*) to be cross-grained[8].

राजा (बालमुपलालयन्)—**आर्ये ! न चेत् मुनि-कुमारोऽयम्, तत् कोऽस्य व्यपदेशः**[9] ! King—(*Caressing the boy*)—Madam, if he (*is*) not the son of a hermit, what (*is*) his family[9] ?

तापसी—पुरुवंसो । Hermitess—The family of Puru.

V. L.—'गात्रेषु सुखम्'—R. V. M. 'गात्रे सुखिता'—B. P. For 'प्रसूतः'—R. V. M. S reads 'प्ररूढ़ः'। R has 'अङ्कात्' for 'अङ्गात्'॥ 'अस्य बालकस्य' &c. —B. '०रूपस्य तेऽपि संवादिन्याकृतिः'—M. ०'बालकस्य तेऽपि संवादिन्याकृतिः—R. 'अस्य तव संबन्ध-संवादिनी आकृतिः'—S. 'विस्मिता'—B. Others read 'विस्मापिता'। 'अपिच * * * भूत्वा', & 'आर्ये'—B. Omitted by others.

राजेति। 'आकारस्य' बहिराकृतेः ('इङ्गितो हृद्गत-भावः, **आकारः बहिराकृतिः**' इति कोषात्) 'सदृशं' तुल्यं 'चेष्टितं' सिंह-शिशु-कर्षणरूपः कायिक-व्यापारः ('चेष्टा कायिक-व्यापार' इति मुग्धबोध-टीकायां दुर्गादासः) 'एव कथयति' नायं महर्षि-पुत्र इति स्पष्ट सूचयति। अतएव पूर्व-वाक्यगत-विरोध-समाधानार्थमाह। **स्थानेति**॥ 'स्थानस्य प्रत्ययात्' अर्थात् अमानुषीयं मारीचाश्रम-भूमिः' नाऽस्यां मानुष-कुमारः सम्भवति इति विश्वासात् ('**प्रत्ययः** शपथे रन्ध्रे **विश्वासा**-चार-हेतुषु। प्रथितत्वे च सन्नादावधीनज्ञानयोरपि॥ इति विश्वः) 'वयम्' अहम् दुष्यन्तः 'एवम्' ईदृशं 'तर्कयन्ति' ये तादृशाः' एव-तर्किणः (३।५।७३) अर्थात् महर्षि-कुमारतया प्रत्ययिनः संवृत्ताः ("अस्मदो द्वयश्च'—१।२।५७)—इति सूत्रम् 'सविशेषणानाञ्च प्रतिषेधो वक्तव्यः"—इति बार्तिकेन बाध्यते॥ तथापि "**विधेय-स्यात् भवत्येव**" इति शब्दकौस्तुभस्थ-दीक्षित-वचनात् कथञ्चित् समाधेयम्। विस्तरस्तु चतुर्थाङ्के द्रष्टव्यः। 'यथाभ्यर्थितं' तापसी-प्रार्थनानुरूपं बाल-मृगेन्द्र-मोचनम 'अनुतिष्ठन्' कुर्वन्। **अनेनेति**। 'कस्यापि' अज्ञायमानस्य मद्व्यतिरिक्त-जनस्य 'कुलाङ्कुरेण' वंश-प्ररोहेण ('अल्पदिन-जातत्व-कोमलत्व-मनोहरत्वादिनाऽङ्कुर-रूपेण' इति राघवपादाः) 'अनेन' बालकेन (**कर्त्रा**), केवलं 'स्पृष्टस्य' न तु आलिङ्गितस्य "मम गात्रेषु' सर्वेषु अवयवेषु 'एवम्' अनिर्वचनीयम् अनुभूत्यैकगम्यं विगलित-वेद्यान्तरं 'सुखं' यदि सम्पद्यते, तदा 'अयं' बालकः 'कृतिनः' अर्थात् सुकृतिनः धन्यस्य 'यस्य' जनस्य 'अङ्गात्' देहात् 'प्रसूतः' संजातः 'चेतसि' हृदये 'तस्य' जनस्य 'कां' न जाने किदृशीम् अनिर्वाच्यामित्यर्थः। 'निर्वृतिं' सौख्यम्, आनन्द-सन्तानम् ("**निर्वृतिः** सुस्थतायां स्यात् अस्तगमन-**सौख्ययोः**" इति विश्वः) 'कुर्यात्' जनयेत् वितरेत् वा ('सर्व-धात्वर्थाऽनुवादः करोतिना भवति' इत्युक्तेः)। (अत्र **अर्थापत्तिरलङ्कारः रूपकञ्च**। तसितस्येति कात्कृतीति **छेक-वृत्ति-श्रुत्यनुप्रासाः'। उपजाति-वृत्तम्**) ॥१९॥ **तापसीति**। 'असम्बद्धेऽपि' सर्वविध-संपर्क-विरहितेऽपि—(भावे सप्तमी)। 'रूपस्य' अर्थात् बालक-रूपस्य 'संवादिनी' अनुकारिणी ['साधुकारिणि च',—(वाः-३।२।७८)-इति णिनिः] आकृति-सदृशी इत्यर्थः इत्येकमाश्चर्यम्। 'वाम-शीलोऽपि' शिष्ट-प्रतिकूल-स्वभावोऽपि। 'अप्रतिलोम'-(५।४।७५) अविरुद्धः। इति **द्वितीय माश्चर्यमित्यर्थः**।

राजेति। **'उपलालयन्'** हस्तादिना स्पृशन्। 'अथ' इति जिज्ञासायाम्। व्यपदिश्यते निर्दिश्यते अनेन इति 'व्यपदेश:' वंश:।

247n.—1. आकार-सदृशं &c.—(114*n.* 2). **स्थान-प्रत्ययम्**—The mount *Hemakuta* is full of great sages (परं तपस्विनां क्षेत्रम्), besides *ordinary mortal cannot come here out of their own will,* ('न पुनरात्म-गत्या मानुषाणामेष विषय:'—*Supra*), hence the forgoing conclusion. **2. अनेन स्पृष्टस्य मम गात्रेषु**—This is the best construction. I have simply touched (*and not embraced*) one or two parts of the boy's limb but still a thrilling rapture has been produced throughout my body. For similar ideas, Cf. यदि **पुत्रमिदं श्रुत्वा पिता ममायं सुतो-ऽहमस्येति।** उत्सङ्ग-वर्धितानां गुरुषु भवेत् कीदृशो स्नेह:"—*Vik. V.* 10. 'सर्वाङ्गीण: स्पर्श: सुतस्य किल तेन मामुपनतेन। प्रह्लादयस्व तावच्चन्द्रकर श्चन्द्रकान्तमिव"—*Ibid. V.* 11. "नन्दयति चन्द्र-चन्दन-निष्पन्दजडस्तव स्पर्श:"—*UC. VI.* 13; *VI* 22; *Ra. III.* 26 "मलयाच्चन्दनं जातमशीतं वदन्ति वै ।। * * शिशोरालिङ्गनं तस्माच्चन्दनादधिकं भवेत्"। 'न वाससां न रामाणां नापां स्पर्श स्तथाविध: ।। शिशोरालिङ्ग्यमानस्य स्पर्श: सूनोर्यथासुख: ।। * * * पुत्र-स्पर्शात् सुखतर: स्पर्शो लोके न विद्यते"—*Mahā.* 1.7.54-58; (245*n.* 4). **कृतिन:**—(30*n*, 6). **3. रूप-संवादिनी** &c.—Resembling closely the feature (*of this boy*). Cf. 'तथा बहुतरं भवन्तमनुकरोति'—*Vik. V.* 'अयमार्य: राम:। नन। रूप-सादृश्यम्'—PN. IV. **'सम्+वद्' means to "resemble"**—Cf. 'अस्य मुख सीताया मुखचन्द्रेण **संवदत्येव**"—*UC. IV* "षड्ज-**संवादिनी** केका:"—Ra. I. 40; "वाचिक-षड्कौ न **संवदेते**"—MBh. Also read "इव-वद्वा-यथा-शब्दा: समान-निभ-सन्निभा:। * *सदृक्-सदृश-**संवादि**-सजातीयानुवादिन:। * * तस्य चानुकरोतीति शब्दा: **सादृश्य-सूचका:**'—*KA. II.* 57-65.[For 'वद्' read 'सत्यं **वदति** सर्वत्र, सर्वस्य **वदते** हितं। यत्र सत्यं न च हितं न **वादयति** तद्वच:'—*KR.* 99]।। **4. अप्रतिलोम:**—'प्रतिगत: लोमानि इति 'प्रतिलोम'। ("अत्यादय: क्रान्ताद्यर्थे द्वितीया"—*SK. Vārt.* 780)—समासान्त 'अच्' by "अच् प्रत्य्-अन्व्-अवपूर्वात् साम-लोम्न:"-(5.7.75.)—"Against the hair or grain", hence Contrary to the natural order', 'reverse'—*AD.* Cf.'प्रतिलोम कथं देव शक्यो धर्म: निवर्तितुम्"—*Mahā.* 'न प्रतिलोम:' = अप्रतिलोम:—Not hostile, but willing to remain with you though unacquainted. **5. उपलालयन्**—'लल्' means to 'caress', 'fondle'—*Ku. V.* 15. Though included in the **'चुरादि'**

आत्मनेपदी list, it is **परस्मैपदी according to Vopadeva** 'लालने बहवो-दोषा स्ताड़ने बहवो गुणाः। तस्मात् पुत्रं च शिष्यं च ताड़येत् न तु **लालयेत्**"—*Subhāṣita.* "**लालयेत्** पञ्च वर्षाणि दश वर्षाणि ताड़येत्। प्राप्ते तु षोड़शे वर्षे पुत्रं मित्रवदाचरेत्"—*Kalpa. pp.* 664. "राजा—**उपलालयन्तमपि** ते सखी न लक्ष्ययिष्यति"——*Māla. III.* 'यस्तु **लालयते** बन्धून् **लालयत्यखिलाः** प्रजाः। उल्ललन्ति यमालोक्य ललनानां मनोरथाः" ॥—*KR.* 103. As regards Kāli, these must be considered *archaic*, he having flourished long before *Bopadeva.* **व्यपदेशः**—(118*n.* 1)—family race.

Text:—राजा (स्वगतम्) **—कथमेकाऽन्वयो[1] मम। अतः खलु मदनु-कारिण-मेनमत्र-भवती मन्यते।** (प्रकाशम्) **अस्त्येतत् पौरवाणा मन्त्यं[2] कुल-व्रतम्।**

कालभारिणी
(ससजगग १।३
सभरज २।४)

भवनेषु रसा-धिकेषु[3] पूर्वं
क्षिति-रक्षार्थं मुशन्ति[4] ये निवासम्।
नियतैक-यति-व्रतानि पश्चात्
तरु-मूलानि गृहीभवन्ति तेषाम् ॥२०॥

न पुनरात्म-गत्या[5] मानुषाणामेष विषयः[6]।

King (*Aside*)—How strange ! of[1] the same stock[1] as myself ! This is, indeed, why Her Ladyship considers him *to take after* me. (*Aloud*) There is this final[2] race-vow of the descendants of Puru—To them, who in their early life, for the sake of protecting the world, choose[4] a residence in mansions, [3]abounding in [*or delightful with all*] the pleasures of senses, the tree-roots become in old age, the (*sole*) dwelling place where the one vow of asceticism is rigidly maintained. (10)—But this (*sacred*) place is not accessible[6] to mortals by[5] their own power[6].

तापसी—जह भद्दमुहो भणादि। किन्दु अच्छरा-सम्बन्धेण उण इमस्स बालस्स जणणी इध एव्व देवगुरुणो तवोवणे पसूदा [यथा भद्रमुखो भणति। अप्सरःसम्बन्धेन पुनरस्य बालस्य जननी इहैव देवगुरोः तपोवने प्रसूता]।

Hermitess—(*It is*) just as Your Gentle Worship says. Through *relations* with sky-nymphs, however, the boy's mother gave birth to him even here in the penance-wood of the father of the gods.

राजा (स्वगतम्)**—हन्त, द्वितीयमिदमाशा-जननम्[7]।** (प्रकाशम्) **अथ सा तत्रभवती किमाख्यस्य[8] राजर्षेः पत्नी।**

King (*Aside*)—Ah ! a second source[7] of hope[7]. (*Aloud*)—What[8] is the name[8] of the royal-saint whose wife she was ?

तापसी—को तस्स धम्म-दार-परिच्चाइणो णामं सङ्कीत्तिदुं चिन्तिस्सदि (कस्तस्य धर्म-दार-परित्यागिनः[9] नाम सङ्कीर्तयितुं चिन्तयिष्यति)। Hermitess—Who'll think of uttering the name of that (*man*) who[9] had repudiated his lawful spouse[9] ?

राजा (स्वगतम्)—**इयं खलु कथा मामेव लक्ष्यीकरोति[10]—**(विचिन्त्य)—**यदि तावदस्य शिशोर्मातरं नामतः पृच्छामि। अथवा अनार्यः[11] खलु परदार-व्यवहारः[12]।**

King (*Aside*)—This story indeed points[10] just to myself. Suppose I ask the name of this child's mother. (*He reflects*). Or perhaps, it (*is*) ignoble[11] to make[12] enquiries about another's wife.[13]

V. L.—Excepting B. K. Śr, C. P. & Dr, others put the stage direction 'प्रकाशम्' after the following verse. 'रसाधिकेषु'—R. V M. 'सुधासितेषु'—B. K. S. Śr. Dr. 'नियतैकयति०'—B. V. M. K. 'निरतैकपति०'—S. 'नियतैकपति०'—R. Śr. Some Devanāgara Mss read—'०मुनि०'॥ 'न पुनः—R. V. M. 'कथं पुनः'—B. Mackenzie Mss. 'स्वगतम्'—B. 'आत्मगतम्'—S. 'अपवार्य'—R. V. M. 'सङ्कीर्तयितुं चिन्तयिष्यति'—R. V. M. 'कीर्तयिष्यति'—B. S. 'अनार्यः'—B. R. V. P. 'अन्यायः'—M. Mackenzie Mss. Dr. 'अनाय्यः'—*ŚR.*' न नाय्यः' —S. —'परदार-पृच्छा-व्यापारः'—B. M., Mackenzie. G. 'परदार-व्यवहारः'—R. V. S.

रजेति। 'कथमिति' हर्ष-सूचको निपातः। 'एकः' तुल्यः 'अन्वयः' वंशः यस्य अभिन्न-वंश इत्यर्थः। 'मम अनुकारिणं' सदृशम्। (प्राक् व्याखातः) अर्थात् मदाकृति-सदृशाकृतिकम्। अन्तेभव इति 'अन्त्यम्' ("दिगादिभ्यो यत्"—४।३।५४, "अन्त्यस्तु अन्तभवेऽधमे" इति हैमः)। 'कुलस्य' वंशस्य 'व्रतम्' आचारः। (क्षत्रियाणां वानप्रस्थाश्रमोऽन्त्यः। तथाचोक्तं—"मुखजानामयं धर्मो यद्विष्णो लिङ्ग-धारणम्। बाहु-जातोरु-जातानाम् अयं धर्मो न विद्यते)। **भवनेष्विति।** 'ये' पौरवाः 'क्षितेः' पृथिव्याः 'रक्षार्थं' परिपालनार्थं नतु इन्द्रिय-सुख-साधनार्थं 'पूर्वम्' वार्धकाद् अर्वाचीने अर्थात् यौवने वयसि 'रसैः' मधुरास्वादैः शृङ्गारादिभिश्च ("रसो गन्धरसे स्वादे तिक्तादौ विषरागयोः। शृङ्गारादौ द्रवे वीर्ये देहधात्वम्बु-पारदे" इति विश्वप्रकाशः) 'अधिकानि' आढ्यानि तथाविधेषु 'भवनेषु' अट्टालिकासु 'निवासम्' अवस्थानं गृहस्थाश्रमम् इति यावत् 'उशन्ति' इच्छन्ति ("वश कान्तौ। कान्तिरिच्छा" इति क्षीरतङ्गिणी-कारः। "अयं छान्दसः" इति गयदर्पणे महामहोपाध्यायः रामातारण-शिरोमणिः।) 'पश्चात्' वार्धके 'नियतम्' अवश्य-विहितम् 'एकं' केवलं ("एके मुख्यान्य-केवला" इत्यमरः, अपि च रघुवंशे "वार्धके मुनिवृत्तीनाम्" इति) 'यतेः व्रतम्' अर्थात् वानप्रस्थाऽऽश्रमाचारो येषु

('ये निर्जितेन्द्रिया यतिनो यतयश्च ते' इत्यमरः) तादृशानि 'तरुमूलानि' वृक्षतलानि 'तेषां' नृपादीनां गृहीभवन्ति' अर्थात् अगृहाण्यपि निवासत्वेन कल्पनात् गृहाणि सम्पद्यन्ते ["अस्य च्वौ"—(७।४।३२)—इति अवर्णस्य ईकारः]। (वृक्ष-मूलेषु भवनत्वारोपस्तु यतिव्रताऽऽचरणोपयोगी, अस्मादेवात्र **परिणामालङ्कारः। अनुप्रासश्च। कालभारिणी** वृत्तम्) ॥२०॥ 'आत्म-गत्या' स्वेच्छया इत्यर्थः। 'मानुषाणाम् एष' हेमकूटः 'न विषयः' अभूमिः, तत् कथमस्यात्र सङ्गतिरिति पृच्छा। **तापसीति**। 'यथा' यथार्थमेव 'भणति' कथयति। तस्य सङ्गति-माह—**अप्सर इति**। 'अप्सरसा अर्थात् मेनकया सह 'सम्बन्धेन' सम्पर्केण (हेतौ तृतीया)। 'पुनः' इति भेदे—(इति मेदिनी), 'देवानां गुरोः' पितुः अर्थात् कश्यपस्य। "तपोवने प्रसूता" ("**गुरुः** पिता, गुरुः विप्रः, **गुरुर्देव**-पुरोहितः। दुर्वहोऽपि '**गुरुः** प्रोक्तः, गुरुः शिष्याधिकारकः"—इति गदसिंहः)। **राजेति**॥ "हन्त" इति हर्षे। 'आशायाः' पुत्रोऽयं मे इत्येवं-विधायाः 'जननं' हेतुः। 'इदम्' तापस्योक्तम् अर्थात् **अस्य बालकस्य अप्सरः-सम्बन्धः द्वितीय-हेतुः। (आकृति-गत-सौसादृश्यत्वम् एक-वंशोत्पन्नत्वञ्च प्रथम-हेतुः)** 'का आख्या' नाम ("**आख्याऽऽह्वे** अभिधानं च नामधेयं च **नाम** च" इत्यमरः) यस्य तस्य किन्नामधेयस्य 'राजर्षेः पत्नी' (पौरवत्वेन राजर्षित्व-निश्चयात् राजर्षि रित्युक्तिः बोद्धव्या)। **ताप-सीति**॥ 'धर्मस्य दाराः' पत्नी (**अश्व-घासादिवत् तादर्थ्ये षष्ठीसमासः** ६।१८। "**दाराक्षत**-लाजाऽसूनां बहुत्वञ्च" इत्युक्तेः **बहुत्वे** अस्य प्रयोगः) तान् यः परित्यजति स 'धर्मदार-परित्यागी' ["संपृचाऽनुरुधा—" (३।२।१४२) इति घिनुण्-प्रत्ययः]। **तस्य** 'नाम कः' न कोऽपि इत्यर्थः। 'सङ्कीर्तयितुम् चिन्तयिष्यति'। (संकीर्तनार्थं हृदि **चिन्तनेऽपि दोषः। संकीर्तने पुनः किं वक्तव्यम्**' इत्याशयः)। (अनेन **परिभाषण**-नामाङ्गमुपक्षिप्तम्—"वदन्ति **परिभाषणम्**। परिवाद-कृतं वाक्यम्" **इति दर्पण-लक्षणात्**)। **राजेति**। 'इयं कथा' धर्मपत्नी-परित्याग-सम्बन्धिनी। '**लक्ष्मी-करोति**' विषयीकरोति। 'तावत्' इति वाक्यालङ्कारे। 'नामतः' नाम्ना ("**प्रयोगानुसारेण सर्वाभ्यः प्रकृतिभ्यः परः, सर्वासां विभक्तीनां स्थाने तसिल्-प्रत्ययो** भवति वा" इति **प्रभा**–(५।३।७)–यद्येषा पितुर्नाम न कथयति, तर्हि मातुर्नाम '**पृच्छामि**'। 'परस्य' अन्यस्य 'दाराणां पत्नीनां' 'व्यवहारः' तत्सम्बन्धिनी जिज्ञासा 'खलु' इत्यवधारणे 'अनार्यः' साधुजन-विगर्हितः ("अस्त्येतत् पौरवाणाम्" इत्यारभ्य एतदन्तेन **विबोध**-नामाङ्गमुपक्षिप्तम्। "कार्यस्यान्वेषणं युक्त्या **विबोधः** परिकीर्तितः" इति तल्लक्षणात्)।

248n.—1. अन्त्यं कुल-व्रतम्—Recourse to 'वानप्रस्थ' (*and not* 'सन्न्यास') in the latter part of their lives (*Com.*) was *invariably* the custom with the kings of the Ikṣvāku and other Dynasties. Cf

"मुनि-वन-तरु-च्छायां * * शिश्रिये गलित-वयसामिक्ष्वाकूणामिदं हि कुलव्रतम्"—*Ra. IV.* 70; *VII.* 71; **'वार्धके मुनि-वृत्तीनाम्** &c.'—*Ra. I.* 8. "वयः सुखानि भुक्त्वा पुरुषस्य **तपोवन-प्रवेशः** रमणीयः हि"—*BC. I.* 33. (**Also 149n. 6**). **2. भवनेषु**—The Indians even from very ancient times knew how to make **stupendous building.** Commenting on *R*V. V. 62. 6. [**सहस्रस्थूणम्**—अनेका-वष्टम्भकस्तम्भो--पेतं सौधादि-रूपम् गृहम्—Sāyana], *Dr. Wilson* observes "A house as a palace and the like possessing **many supporting pillars**—the expression is noticeable as indicating the **existence of stately edifices." रसाधिकेषु**—Abounding in pleasures and enjoyments (*Com.*) Our poet has used the word 'रस' in several other senses (*i*) "*Water*"—*Ra. I.* 19; (*ii*) "An object of taste"—*III.* 4. (*iii*) "Delight, happiness"—*III.* 26. (*iv*) "Liquid"—*Ku. I.* 7. 'A feeling of love'—*III.* 37; "Taste or inclination for a thing, 'liking'—'इष्टे वस्तुन्युपचित-रसा'—*MD.* 112. **'सुधा-सितेषु'**—[*White with stucco or chunam,*] supported by B, Dr. and S, is the **oldest reading,** and is further supported by the *frequent use* of **'सुधा'** and **'सुधाकार'** in Rām. (II. 80. 83) and also in PN—III. **'सुधा**-लिप्तानि'—MK. IV ; 'स्फुटित—**सुधा**—द्रवानु-लेपात्'—V. 50. **'सुधा**-सितेन प्राकार-मण्डलेन'—Kād. pp. 193. **3 क्षिति-रक्षार्थम्**—क्षीयतेऽस्यां इति क्षि (निवास-गत्याः। तुदादिः) + क्तिन् अधिकरणे—**क्षितिः**—Earth. ["**क्षिणाति** दूरितं दृष्ट्वा **क्षिणोत्यर्थं** च दुःखिनम्। भृत्यानां नित्यमज्ञानम् यः **क्षिणुते** सदुक्तिभिः। **क्षयति** प्रत्यहं पापं **क्षाययति** द्विषतां कुलम्। यशः **क्षियति** रोदस्यो र्यस्य धर्मरतात्मनः—*KR.* 110, 112]. Their residing in palaces, was only for the **protection** of the world and not for **pleasure** (*MS. VII*). **4. उशन्ति**—'वश्' (अदादि—'*to desire*', *long for*') is strictly a **Vedic-root (छान्दस)**. But its use in *Classical Literature* is sometimes seen. **Kāli. has used it twice.** Read—'वश कान्तौ। भाषायामस्य प्रयोगः दृश्यते। "**वष्टि** भागुरि"—(5*n.* 1), "जयाय सेनान्यम् **उशन्ति** देवाः" (*Ku III.* 15.) इति'—*T.* on 2488 Also "निःस्वो **वष्टि** शतं, शती **दश-शतम्**—*ŚŚ.* [वश्-लट् वष्टि, उष्टः, उशन्ति। वक्षि उष्ठः उष्ठ, वश्मि उश्वः उश्मः। लङ्-अवट्, लिङ्-उश्यात्। लुङ्-अवशीत् अवाशीत्, यङ् वावश्यते

-(६।१।२) **5. नियतैक-यति-**&c.—[Cf. 'नियमेन तनु-तर-मध्यम्'—*Rat. I.* 19.)—Vividly expresses the *contrast* between the **present and the past mode of living.** From this consideration this reading is to be preferred to "०पति-व्रतानि"। It **cannot be argued that this is necessary** *for the birth of a son,* for in 'वानप्रस्थाऽऽश्रम', a man may take his wife. ("गृहस्थस्तु यदा पश्येत् वलीपलितमात्मनः। अपत्यस्यैव चापत्यं तदारण्यं समाश्रयेत्॥ * * पुत्रेषु भार्यां निक्षिप्य वनं **गच्छेत् सहैव वा**"—*MS. IV.* 2, 3; "*दारान् निक्षिप्य &c."—*GP. Ch.* 102; *KP. Ch.* 27. 2) but **he must live as a typical** यती **(Com.) with full control over his passions**—'वने वसेत्तु नियतो यथावत् **विजितेन्द्रियः**' -*MS. VI.I.* "**विशेषेण जितेन्द्रियः**"—*KB.*"ग्रामादरण्यं निःसृत्य **निवसेन्नियतेन्द्रियः**"—*MS. VI.* 4. "अप्रयत्नः सुखार्थेषु **ब्रह्मचारी** धराशयः"—*IV.* 26; "**ब्रह्मचारी अस्त्री-संभोगी**"—*KB.* Cf. "असक्त स्सुख मन्वभूत्"—*Ra. I.* 2. The scriptures also unanimously enjoin that one **should not go to forest without giving birth to a son** "ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत्"—*MS. VI.* 53. "अनधीत्य द्विजो वेदान् **अनुत्पाद्य तथा सुतान्**, अनिष्ट्वा चैव यज्ञैश्च मोक्ष मिच्छन् व्रजत्यधः"—VI. 36. **6. तरु-मूलानि** &c.—Cf. "मुनिवन-तरु-च्छायां देव्या तया सह शिश्रिये। गलित-वयसामिक्ष्वाकूणामिद हि **कुलव्रतम्**" —*Ra. III.* 70. "शरणेष्व-ममश्चैव **वृक्षमूल-निकेतनः**"—*MS. VI.* 26. **आत्म-गत्या**—Without being helped by celestial or supernatural beings. **विषयः**—Realm. "Pradeş—*Chézy*" (*Vide* 1. 1.). For other sense *Vide Ra. I.* 8; *III.* 70; *VIII.* 10, 89; *VII.* 12; *Vik. I.* 9; *Ku. VI.* 17; *PA & MD.* 82. **7. द्वितीयमिदम्**—&c.—The boy's **same lineage** ('कथमेकान्वयो मम' &c.—*Supra*) is **First** (*direct*) source of hope. Of course besides this, there were **indirect and intuitive evidences also** ('कथ चक्रवर्ति-लक्षणमप्यनेन धार्य्यते'—*pp.* 189. In this connexion, see (13*n.*) on *IV.* 7; *I.* 12. 'एवमाश्रमविरुद्ध-वृत्तिना' &c.—*Act. VII.* 18. 'अस्य बालकस्य रूप-संवादिनी ते आकृतिः'—*VII. pp.*200. Also 'निमित्त सूचयित्वा' &c.—VII. 13. 'कि नु खलु बाले अस्मिन् औरस इव पुत्रे स्निह्यति मे मनः' —*pp.* 186. also Cf.—*pp.* 56, *line* 9. "स्पृहयामि खलु दुर्ललिताय &c."—*pp.* 193. "यथाभ्यर्थिन मनुतिष्ठन्"—*pp.* 200. The boy's relationship

with a nymph is the **second** source of hope. **8. यदि तावत्** —Also 'यदि किल' means '*if perchance.*', '*if suppose*' '*perhaps*'. Cf. 'पूर्वं स्पृष्टं यदि किल भवेदङ्गमेभिस्तवेति'—*PA & MD.* 103; *Y. III.* 104. 'पुरोहितः—यदि तावत्, एवं क्रियताम्'—(*Act V. pp.* 493) 'Perhaps you might do so'—*Ahte.* **9. धर्म-दार-परित्यागिनः**— &c.—The king was 'पतित', hence nobody will even think of utterring his name for fear of incurring sin. (Com.). "पतितातात्र्यपतितत्यागिनश्च पतिताः"—**Gautama.**. 'स्पर्शनाद्-भाषणाद्वापि परस्य स्तवनादपि। दशांशं पुण्य-पापानां नित्यं प्राप्नोति मानवः"—*GP.* **10. अनार्यः परदार-व्यवहारः**—Cf. "राजा—भवतु, **अनिवर्णनीयं परकलत्रम्**" —(114n. 2.) **व्यवहार**—Ordinarily means '*litigation*', 'dispute'. (*Cf.* "ददर्श संशयच्छेद्यान् व्यवहारान् अतन्द्रितः'—*Ra.* XVII. 39; here 'Enquiry or investigation', 'Indulge in gossip' about another's wife'. Read 'वि नानार्थेऽव सन्देहे, हरणं हार उच्यते। नाना-सन्देह-हरणात् व्यवहार इति स्मृतः'—*Kātyāyana qtd. BhD. pp.* 66. **दारा**—For **दारा** (**आकारान्त—Feminine**)—*Vide* 144*n.* 6.

Text :—(प्रविश्य मृन्मयूर-हस्ता)—**तापसी—सव्वदमण, पेक्ख सउन्त-लावण्णं** [सर्वदमन, प्रेक्षस्व शकुन्त-लावण्यम्]।

(*Entering, earthen peacock in hand*)—(*First*) Hermitess—Sarvadamana, behold the beauty of the *Śakunta* [*i.e. bird*].

बालः (मदृष्टि-क्षेपम्)—**कहिं वा मे अम्बा**

(कुत्र वा मे अम्बा)—(उभे प्रहसतः)।

Boy (*Looking about*)—Where's mammy ? (*Both laugh out*).

प्रथमा—णाम-सारिस्सेण वञ्चिदो[1] माउ-वच्छलो

(नाम-सादृश्येन[1] वञ्चितो मातृ-वत्सलः)।

First Hermitess—Fond as he is of (*his*) mother, (*he*) is cheated by the similarity[1] of names [*sound*[1]].

द्वितीया—वच्छ, इमस्स मित्तिआ-मोरअस्स रम्मत्तणं पेक्ख त्ति भणिदो सि

(वत्स, अस्य मृत्तिका-मयूरस्य [2]रम्यत्वं प्रेक्षस्व इति भणितोऽसि)।

Second Hermitess—Darling, you are asked to see the beauty[2] of the earthen-peacock.

राजा (स्वगतम्)—**किं शकुन्तलेति अस्य मातुराख्या। अथवा सन्ति पुन र्नामधेय-सादृश्यानि[3]। अपि नाम मृग-तृष्णिकेव[4] नामधेय-प्रस्तावो मे विषादाय कल्पते।**

King (*Aside*)—What ! is Śakuntalā his mother's name ? But there do exist resemblances[3] of names[3]. Can it be [*can I hope*] that this occasion here, like a deer-drouth[4] may not tend to my despondency ?

बालः—अत्तिए, रोअदि मे एसो भद्द-मोरओ

(अत्तिके, रोचते मे एषः भद्रमयूरः) । (क्रीड़नकमादत्ते) ।

Boy—Sister, this beautiful peacock pleases me.

(*This said, takes the plaything*).

V. L.—'मृन्मयूर'—'M. G. Patankar, HS.—'**मृण्मयूर०**'—R. B. S. V. 'मयूर'—A. 'अज्जू'—R. V. S. 'अम्बा'—K. B. Mackenzie Mss. 'उभे—प्रहसत:'—B. Omitted by others. "रम्यत्वं"—R. V. M. S. 'रमणीयतां'—B. 'नाम-मात्र-प्रस्तावो'—R. M. B. V.' नायमत्र प्रस्तावो'—S. 'कल्पेत'—S. 'अन्तिके'—B. S. C. 'आर्यके'—M. K.. 'मात (अज्जुए)'—R. V. S.

प्रविश्येति । 'मृदो मयूरः' मृन्मयूरः मृत्तिका-निर्मित-मयूर-रूप-क्रीड़नकम् इत्यर्थः । ['**मृण्मयूर**' इति पाठे तु '**मुडो मयूरः**' इति व्याख्येयम् । तथा चोक्तं दीक्षितेन '**मृद् क्षोदे । मृड् च**' । अयं सुखेऽपि । **मृड्णाति ।** ततः संपदादि क्विप् । (३।३।९४)] । **तापसीति ।** 'शकुन्तस्य' (सउन्दस्स) पक्षिणः 'लावण्यं' (लावण्णं) सौन्दर्यं 'प्रेक्षस्व' पश्य ।। एतत्-प्रेक्षणेन च एनं गृहीत्वा सिंहशावकं परित्यज इत्याशयः । बालकेन तु 'शकुन्तलायाः' (सउन्दलाए) 'वर्णं' (वण्णं) ("वर्णः स्तुतौ कुथायाञ्च वर्णः स्यात् रूप-भेदयोः" इति शाश्वतः) प्रेक्षस्व इति चावबुद्धं । तत आह कुत्र मे माता । (अतएव **श्लेष-वक्रोक्त्यलङ्कारः** । अत्र शकुन्तला-रूप-प्रधानार्थान्तराऽऽक्षेपात् दर्पणोक्तं चतुर्थ-पताका-स्थानमुपक्षिप्तम् । लक्षणन्तूक्तं तृतीयाङ्के) । **बाल इति ।** शकुन्तला आगता न वेति परीक्षार्थम् 'सदृष्टि-क्षेपम्' समन्तात् अवलोक्य आह । 'उभे' तापस्यौ 'प्रहसतः' नाम-सादृश्य-श्रवणमात्रेणैव मातुरन्वेषण-कुतूहलात् इति भावः । **प्रथमेति ।** 'नाम्नः सादृश्येन' शकुन्तलेति नामाक्षराणाम् तुल्यतया (कर्त्रा) 'वत्सलः' स्निग्धः प्रेमवान् इति यावत् ['वत्सांसाभ्यां—' (५।२।९८) इति लच्] अयं बालक इति शेषः । 'वञ्चितः' विप्रलब्धः । **राजेति ।** 'शकुन्तला' एव अस्य शिशोर्मातुर्नाम इति **तृतीयमाशास्थानं** मत्वा आह '**किमित्यादि**' । '**अथवा**' इति पक्षान्तरे 'नामधेयस्य सादृश्यानि' तुल्यता सन्ति । तस्मादेव तत्र न आशा-दाढ़र्यमित्याशयः । 'अपि नाम' इति सम्भावनायाम् । अहमिच्छामि इत्यर्थः । 'मृग-तृष्णिका इव' सलिल-पिपासोः मरीचिकेव 'अत्र' अस्मिन् आश्रमे 'अयं प्रस्तावः' अर्थात् शिशोः मतृसन्निधाने अ-चञ्चलतयाऽवस्थानं, तस्य

मत्सादृश्यं, अस्य मातुः स्वामिना परित्यागः इत्याद्यारम्भः अयं प्रसङ्गः 'न मे विषादाय' ('क्लृपि सम्पद्यमाने च', वा:—५४०) 'कल्पते' विषादं जनयितुं प्रवर्तते (अत्र शकुन्तलाऽनुराग-रूपस्य मुखसन्धि-सन्निवेशित-वीजस्य पुनरुपस्थितत्वात् **सन्धिर्नाम** अङ्गमुपक्षिप्तम्। "मुख-वीजोपगमनं सन्धिरित्यभिधीयते" इति तल्लक्षणात्। "राजा-यदि तावत् अस्य" इत्यादिना "मातुराख्या" इत्यन्तेन **"अक्षर-संघात-नाम"** भूषणमुपक्षिप्तम्। "वाक्य **मक्षरसंङ्घातः** भिन्नार्थ-श्लिष्ट-वर्णकम्" इति तल्लक्षणात्)। **बाल इति**। "अन्तिके" ज्येष्ठभगिनि! ("चूल्यां **ज्येष्ठ-भगिन्यां** च नाट्योक्तौ कीर्त्यते **अन्तिका**' इति विश्व-मेदिन्यौ)। 'भद्र:' रमणीय: 'मयूर:'। 'क्रीड़नकं' खेला-द्रव्यम्। 'आदत्ते' ("आङोदोऽ—नास्य-विहरणे"—(१।३।२०) इत्यात्मनेपदम्)।

249n.—**1. सउन्द-लावण्णं** &c.—"सउन्द-लावण्णं" may be discompounded as (*i*) **'सउन्द-लावण्णं** or **'सउन्दला-वण्णं** । Now the hermitess meant '*the* **loveliness'** (*Prākṛta* लावण्णं = *Skt.* लावण्यम्) *of the bird* (शकुन्त), but the boy understood—**the complexion** (*Prākṛta.* वण्णं = *Skt.* वर्णम्), of *Ś*akuntalā (सउन्दला). In the latter sense there is a clever insinuation to the audience about the **immensely altered complexion** of Śak. who is to meet them shortly after. There are two roots 'मृद्' and 'मृड्' having the **same meaning** (i. e. to powder). Now **मृद् + क्विप् = मृद्** (i) & **'मृड् + क्विप् = 'मृड्'** (ii)-(Com.). 'मृड् च। चात् क्षोदे'—Vide SK. 2559. क्षोद: चूर्णीकरणम् मर्दनम्'—**'मृद्नाति, मृड्णाति'**—Gaṇa-Darpaṇa. Next मृद् + मयूर: = **'मृन्मयूर:'** (i) ['न' is not changed into (**ण**) though preceded by **"ऋ"** by the Maxim 'स-पाद-सप्ताध्यायीं प्रति त्रि-पादी 'असिद्धा'—*BD* on (8. 4. 1.)—('पूर्वत्रा-सिद्धम्'), or by 'पदान्तस्य' (8. 4. 37.)]-(ii) मृड् + मयूर: = **'मृण्मयूर:** (8.4.45) by Sandhi. **Similarly both "मृन्मय" & 'मृण्मय' are correct. 'मृण्मय'**, however, is **extremely common in Skt. Mss. Read my article entitled ("मृन्मय वनाम मृण्मय") 'मृन्मय'** with dental (न) is a **"hapax legamenon"** in the Vedas. *MW* himself is **wrong** when he says that 'मृण्मय' is *incorrect.* Evidently he is *unaware* of the fact that **'मृद्'** is synoymous with **'मृड्'** to mean 'चूर्णीकरणम्'। Thus it is not easy to say which of the two readings 'मृण्मयूर' & 'मृन्मयूर' is the *genuine* one. **2. कुत्र वा मे अम्बा** &c.—**'अम्बा'** is preferred to **अज्जु** as the latter, *in theatrical language* (नाट्योक्तौ) is applied only to a **'गणिका'** (**prostitute**).

Read 'हञ्जे वेश्याऽज्जुका तथा'—*VK.* "नाट्योक्तौ गणिकाऽज्जुका"—AK. In later lexicon, of course, the word is found as a synonym of mother. "अज्ज अज्जूच मातरि"—*Deśikoṣa.* 'अम्बा" is also sometimes found in books other than **theatrical.** 'तातेन अम्ब विहीनोऽस्मि", 'बाल-भावेऽहमम्बया' इत्यादौ अ-नाटयोक्तावपि अम्बा-शब्द-प्रयोगः। 'तत्र मातः किमसदृशं करणं वचस्ते' इति वेणी-संहारादौ **नाट्योक्तावपि मात्रादीनां** प्रयोगः।—*RM.* The vocative Singular of 'अम्बा', (mother) is 'अम्ब' and for that of 'जगदम्बा'—Vide (78*n.* 7). **दृष्टि-क्षेपम्**—The boy glances this way and that way to see if his mother has actually come. **3. अपि नाम**—(Vide 28n. 1.) Cf. "**तदपि नाम** मनागवतीर्णोऽसि रति-रमण-बाण-गोचरम्"—*MM. I.* '**अपिनाम*** *प्राज्ञमानिन '—*BC. IV.* 42. **4.** 'अन्तिके– अन्तिका' is a Theatrical term for **'elder sister'.** ('भगिनी ज्येष्ठा'—*Ś*). Also (Com). This is preferred to 'अज्जुका' (*or* अज्ज), as an **unrelated woman** should be addressed as **'भगिनी'** (37n, 2). **भद्र-मयूर**—'भद्र' means '*beautiful*', '*lovely*'. Cf. *PT. I.* 181. *Kāli.* has used it elsewhere in the sense of '*foremost*', '*chief*'. *Cf.* "प्रपच्छ भद्र विजितारिभद्रः"—*Ra. XIV.* 51. **Kāli's boys seem to be very fond of peacock.** Read –'कुमारः(आयुः)—तेन हि, यः सुप्तवान् मदङ्के शिखण्ड-कण्डूयनो-पलब्ध-सुखः। त मे जातकलाप प्रेषय शितिकण्ठकं शिखि-नम्'—*Vik. V.* 15. **5. नायमत्र-प्रस्ताव** &c. प्रस्तावः—प्रसङ्ग. *An introduction, allusion, reference*—*Apte.* Hence the **various incidents direct, or indirect** that have occurred since the beginning of his entrance into this pennance-grove.—(*Vide* 24*n* 7.) **All those incidents have almost persuaded him to believe** the boy to be his son, still he is not free from anxiety and hence he fondly **hopes** (अपि नाम) that this his belief **may not be falsified** like waters seen in the desert (मृगतृष्णिकेव &c.). **नाम-मात्र-प्रस्ताव**—(R.) is **rejected** as 'अपि नाम' which implies **'inward longing'** (28*n*, *I*; 29*n*, 1) is not in consonance with 'मे विषादाय कल्पते', Besides he is aware of **many incidents** and not the mention of **name** only. **मृग-तृष्णिकेव**—(210**n,** 5).

Text :—प्रथमा (विलोक्य। सोद्वेगम्)—**अम्हहे, रक्खा-करण्डअं' से मणिबन्धे ण दीसदि,** (अम्महे, रक्षा-करण्डकम् अस्य मणिबन्धे न दृश्यते)।

First Hermitess (*Looking agitatedly*)—Dear me ! the [1]protecting amulet[1] on his wrist is not seen.

राजा—आर्ये ! अलमावेगेन । नन्विद मस्य सिंह-शाव-विमर्दात्[2] परि-भ्रष्टम् । (आदातुमिच्छति) ।

King—Don't be anxious, madam. It has fallen through his scuffle with the lion-cub. (*He wishes to pick it up*).

उभे—मा क्खु, मा क्खु, एवं अवलम्बिअ— । कहं गहिदं णेण । (मा खलु, मा खलु । एतदवलम्ब्य— । कथं गृहीतमनेन) !

।। (विस्मयादुरो-निहित-हस्ते परस्पर मवलोकयतः) ।।

Both—Don't, don't, (*if you*) touch it (*you shall die*). Why ! he has taken (*it*) up (*straight*) ? (*Astonished they lay their hands on their bosoms and look at each other*).

राजा—किमर्थं प्रतिषिद्धाः स्मः ।

King—Wherefore have (*I*) been forbidden ?

प्रथमा—सुणादु महाराओ । एसा महप्पहावा अबराजिदा णाम सुर-महोसही इमस्स दारअस्स जाद-कम्म-समए भअवदा मारीएण दिण्णा । एदं किल मादापिदरो अप्पाणं च वज्जिअ अवरो भूमि-पड़िदं ण गेह्लदि [श्रृणोतु महाराजः ! एषा महाप्रभावा अपराजिता नाम सुर-महौषधिः अस्य दारकस्य[3] जातकर्म-समये[4] भगवता मारीचेन दत्ता । एतां किल मातापितरौ आत्मानञ्च वर्जयित्वा अपरो भूमि-पतितां न गृह्णाति) ।

First Hermitess—Listen, Your Majesty. Of potent virtue, this divine-mighty—herb, named the "*invincible*", was given by the almighty Mārīca at the time of the natal ceremony of this boy. 'This', says he, 'none but his parents or himself, can take it up when dropped on the ground'.

राजा—अथ गृह्णाति ? King—But if (*any one*) takes it ?

प्रथमा—तदो तं सप्पो भविअ दंसइ (ततस्तं सर्पो भूत्वा दशति) । First Hermitess—Then transformed into a snake, (*it*) bites him.

V. L.—'रक्षाकरण्डकम्'—R. V. M. S. K. 'काण्डक'—B. '०गण्डो'—S. '०गण्डको'—C. 'आर्ये'—B. Omitted by others. 'महाभाग:'—B, 'महाराज:'—R. V. M. S. 'महाप्रभावा'—B. Omitted by others. 'सुर-महौषधि:'—B. HS. 'औषधि:'—R. V. M. S.

प्रथमेति । 'अम्महे' इति विस्मये । 'रक्षा-करण्डक' रक्षा-वीटिका [तथा-चोक्तम्—'**करण्डो** मधुकोशे स्यात् **वीटिका**-खड्गकोशयो:' इति । स्वार्थं कन् । 'क्वचित् **स्वार्थिकाः** प्रकृतेः **लिङ्ग-वचनान्यतिक्रामन्ति**' इति वामनोक्तेः नपुंसक-

त्वम्] । **उभे इति** । 'मा खलु' इति निषेधे 'अवलम्ब्य' इत्यन्वयः ["**अलं खल्वोः प्रतिषेधयोः प्राचां क्त्वा**"–(3.4.18) । द्विरुक्तिस्तु संभ्रमजा] । 'एतद्' करण्डकं भूम्या 'अवलम्ब्य' गृहीत्वा मरिष्यसि इति शेषः । राजा तु तस्याः वाक्य-समाप्तेः **प्रागेव करण्डकः गृहीतः परन्तु नाम्रियत,** अस्मादेव तयोर्विस्मयः । 'कथम्' इति विस्मय-द्योतकः निपातः । 'उरसि' वक्षसि 'निहितौ' न्यस्तौ याभ्यां ते । [अनेन विस्मयाऽभिनयः । एतदुक्तमादिभरते—'शिरोधूतं पताकश्च **वक्षस्थो विस्मये** भवेत्' इति । अनेन अद्भुतरसश्च व्यज्यते । लक्षणन्तूक्तं प्राक् । तथाचोक्तं आदिभरते—'**निर्वहणे** कर्तव्यो नित्यं हि **रसोऽद्भुतः** कविभिः' इति । अत्र **उपगहन**-नामाङ्गमुपक्षिप्तम्—'**तद्भवेदुपगूहनम्** । यत् स्यात् अद्भुत-संप्राप्तिः' इति दर्पणलक्षणात् । **प्रथमेति** । "सुर-महौषधिः' देव-लोक-जात-लता-विशेषः । 'दारकस्य' बालकस्य 'जातकर्म' शरीर-संस्कार विशेषः, तस्य 'समये' ।। 'किल' इति वार्तायाम् । मारीचेन एवेदमुक्तम् इत्यर्थः । **राजेति** । 'अथ' इति विकल्पे । गृह्णाति चेत् किं भविष्यतीत्यर्थः ।

250n.—1. रक्षा-करण्डकम्—'करण्ड' is *masculine* (*Com.*) and ordinarily means a '*little box*'. Hence the whole may mean 'a preservative casket; or a locket, or amulet' containing mystical herbs as was used by people of those days. Cf. "* * **मन्त्र-करण्ड-**कानुवाह । रक्षा-प्रतिसरोपेतान्यौषधि-सूत्राणि बबन्ध"—*Kād.* K explains it by "रक्षा-गुटिका—(A magical ball). **रक्षाकाण्डः**—(B)—रक्षणार्थमाबद्धः समूल-लता-विशेषः । 'काण्डो मूलं तरोरपि"—इत्यनेकार्थ-ध्वनि-मञ्जरी—HS. It is not easy to find out the original reading. **अपराजिता**—Some 8 different herbs have this name.—RN. pp. 432. **2. अलमावेगेन—**करणे तृतीया । "**न केवलं श्रूयमाणैव क्रिया कारक-विभक्तौ प्रयोजिका । अपि तु गम्यमानापि**"—*Nyāsoddyota.*—"अलं श्रमेण । साध्यं नास्ति इत्यर्थः । **साधन-क्रियां प्रति श्रमः करणम्**"—*SK.* 568; (29*n.* 3). **3. मणिबन्धे न दृश्यते**—As the boy stretched out his hand to take the clay-peacock the absence of the amulet was noticed by the hermitess. **4. मा खलु एतदवलम्ब्य**—['मा' & '**खलु**' *imply prohibition, hence* **ल्यप्** (Com.).**Prabhā**-P.182 Vide 43n. 4]; or, The hermitesses wanted to add some such word as '**मरिष्यसि**' but before they could say their say, the amulet was picked up by the king. They had seen many a time that the picker of the amulet, other than the boy's parent, was instantly bitten by a snake. But **no such thing**

happened that time, and hence they looked at each other in amazement. Thus they were fully convinced that the **stranger** was *no ther than the king Duṣyanta, the father of the boy.* This is corroborated by the hermitess' address to the king as "**महाराज**" । **उरो-निहित**—&c.—This is a **Peculiar trait** of women in amazed condition. (*Com.*). **5. जातकर्म-समये** &c—जातकर्म (*Natal ceremony*) is the **fourth** of the twelve purificatory rites (संस्कार) and the *first after the child's birth.* Before the navel-string is cut off, the father after distributing gold, should see the child's face; and then having offered oblation to the various gods, he should give the infant honey and ghee in equal part from a pot of bell-metal (कांस्य) with his right-hand *ring-finger—Mahā-Nirvāṇa-Tantra. Ch. IX.* 130—144. "प्राङ् नाभि-वर्धनात् पुंसो जातकर्म विधीयते । मन्त्रवत् प्राशनं चास्य हिरण्य-मधु-सर्पिषाम्"—*MS. II.* 29; *Y. I. II*; *Ra. III.* 18. **मातापितरौ**—(220n, I.). **6. अथ गृह्णाति**—**'अथ'** *implies* **'विकल्प'** *i.e. 'supposing that', 'but if', 'now in case'.* "अथाऽथो संशये स्याताम् अधिकारे च मङ्गले । विकल्पाऽनन्तर-प्रश्न-कार्त्स्न्याऽऽरम्भ-समुच्चये"—*—Medinī.* Cf. 'अथ कौतुकमावेदयामि'—*Kād.* "अथ मरण मवश्यमेव जन्तोः किमिति मुधा मलिनं यशः कुरुध्वे"—*VS. III.* 4.

Text:—राजा—भवतीभ्यां कदाचिदस्याः प्रत्यक्षीकृता[1] विक्रिया[2] ।

King—Has this change ever been witnessed by Your Lady-ships ?

उभे—अणेअसो (अनेकशः) । Both—More than once.

राजा (सहर्षमात्मगतम्)—**तत् किमिदानीं संपूर्णमपि आत्मनो मनोरथं नाभिनन्दामि ।** (इति बालं परिष्वजते) ।

King (*With joy—Aside*)—Why, quite fulfilled as it is, shall (*I*) not hail my wish ? (*This said, hugs the boy*).

द्वितीया—सुव्वदे ! एहि, इमं वुत्तन्तं णिअम-व्वावुडाए सउन्दलाए णिवेदम्ह (सुव्रते ! एहि । इमं वृत्तान्तं नियम-व्यापृतायै[1] शकुन्तलायै निवेदयावः)

॥ (निष्क्रान्ते) ॥

Second Hermitess--Suvrata ! come (*we*) shall impart this incident to penance-engaged Śakuntalā. (*Exeunt ambo*).

बालः—मुञ्च मं, मुञ्च मं । अम्बाए सआसं गमिस्सं । (मुञ्च मां, मुञ्च माम् । अम्बायाः सकाशं गमिष्यामि) ।

Boy—Release me, release me I'll go to (*my*) mammy.

राजा—पुत्रक ! मयैव सह मातर मभिनन्दिष्यसि । King—(*My*) son, even with me, (*you*) will felicitate (*your*) mother.

बाल :—मम क्खु तादो दुस्सन्दो । ण तुमं (मम खलु तातः दुष्यन्तः, न त्वम्) । Boy—My daddy (*is*), indeed, Duṣyanta, (and) not you.

राजा (सस्मितम्)—**एष विवाद[4] एव मां प्रत्याययति[5] ।** King (*With a smile*)—This contradiction[4] only itself convinces[5] me (*the more*).

(ततः प्रविशति **एक-वेणीधरा** शकुन्तला) । **शकुन्तला** (सवितर्कम्)—**विआर-काले वि पकिदित्थं सव्वदमणस्स ओसहिं सुणिअ ण मे आसा आसि अत्तणो भाअहेएसु । अहवा जह साणुमदीए आचक्खिदं तह सम्भावीअदि एदं** (विकार[1]-कालेऽपि प्रकृतिस्था[2] सर्वदमनस्य औषधिं श्रुत्वा न मे आशा आसीत् आत्मनो [3]भागधेयेषु । अथवा यथा सानुमत्या आख्यातं तथा सम्भाव्यते एतत्) । (परिक्रामति) ।

(*Enter Śakuntalā, having her braid of hair woven once for all. i. e.* **wearing the same braid** *that was last woven before the separation*) Śakuntalā (*Thoughtfully*)—Even hearing that Sarva-damana's herb remained in (*its*) natural form at the time of metamorphosis , I had (*still*) no hopes in my own fortune. Or perhaps, as Sānumati told (*me*), so it is possible. (*This said, walks round*).

V. L.—'कथमिव सम्पूर्णम्'—R. V. M. 'तत् किं खल्विदानीं पूर्णम्'—B. 'किमिव पूर्णम्'—S. 'कथमिव पूर्णम्'—*Patankar*. 'किम् * आत्मानं पूर्ण मनोरथं'—D. 'मे'—R. V. M. S. 'आत्मनः'—B. 'मुञ्च मां, मुञ्च मां'—B. S. 'मुञ्च मां यावत्'—R. V. M. 'अम्बायाः'—B. M. 'मातुः'—R. V. S. After 'सस्मितम्' only S has 'स्वगतम्' । 'आशा'—R. V. M. 'आशंसा'—S. B. 'आसंघः'—P. C. 'मां प्रत्याययति'—B. P. Dr. Others omit 'माम्' । 'परिक्रामति'—B. Dr. P. Omitted by others.

राजेति । 'विक्रिया' विकारः अर्थात् ओषधेः सर्प-भवनान्तरं दंशनम् । **उभे इति ।** 'अनेकशः' अनेकवारान् ["बह्वल्पार्थात् शस् कारकादन्यतरस्याम्"—(५।४।४२) इति शस्]; प्रत्यक्षीकृतेत्यन्वयः । ["प्रथमा—शृणोतु महाराज" इत्यादिना "अनेकश" इत्यन्तेन **'पूर्व-वाक्य'**—नामकमङ्ग मुपक्षिप्तम् । **"पूर्व-वाक्यन्तु विज्ञेयं** यथोक्तार्थोपदर्शनम्" इति दर्पण-लक्षणात्] । **राजेति ।** 'तत्' औषधि-विकाराऽभावात् मम **औरस एवायमिति** निश्चित्य सहर्षमाह 'सम्पूर्णम्' अनुरूप-सुत-लाभेन सफलत्वं प्राप्तम् 'मनोरथम्' अभिलषितम्, आलिङ्गनादिना एतत् 'न अभिनन्दामि' नाद्रिये [अनेन **आनन्द-नामाङ्ग** मुपक्षिप्तम् । **"आनन्दो** वाञ्छितागमः" इति दर्पण-लक्षणात् । **"प्रहर्ष-नाम-नाट्यालङ्कार** उपक्षिप्तश्च ।

तल्लक्षणं यथा तत्रैव—"**प्रहर्षः** प्रमदाधिक्यम्" । **दर्पणकारेणैव एतदुदाहृतम्** । **द्वितीयेति** । 'नियमे' ['यमः समुप-नि-विषु च'-(३।३।६३)-इति अप् **पाक्षिकः**] । प्रोषित-भर्तृकया आचरणीये व्रते । [अनेन अद्यापि तत्-प्राप्त्यर्थं नियम-कारित्व-मुक्तम्) 'व्यापृता' नियुक्ता तस्यै [क्रियायोगे ४र्थी] । 'इमं वृत्तान्तं' ओषधेः असर्पी-भवन-रूपां वार्ताम् । **राजेति** । 'एष विवादः' अर्थात् मम 'पुत्रक' इतिसम्बुद्धेः **"मम तातो" दुष्यन्तः—न त्वम्'** इत्यादि यः प्रतिवादः 'मां प्रत्याययति' निश्चायति' अर्थात् तव पितृत्वेन मयि विश्वासं जनयति, ममैव दुष्यन्तत्वात् इत्याशयः। [अतएव **'णौ गमिर् अवबोधने'**–(२।४।४६)–इति **सूत्रस्य नावसरः** । प्रत्याययति इत्यनेन एतावत् पर्यन्तं सम्यक् प्रत्ययो न उत्पन्न इत्यर्थः व्यज्यते] । **तत इति** । **धरति इति 'धरा' धारिका** इत्यर्थः (पचाद्यच्—३।१।१३४) 'एकस्याः' अर्थात् **प्रत्याख्यान-दिन-कृतैक-संस्कारवत्या** 'वेण्याः' कबर्या 'धरा' इति पति-वियोग-चिह्नम् । **शकुन्तलेति** । 'विकारस्य' स्वरूपात् अन्यथा-भावस्य अर्थात् पर-पुरुषेण भूम्या उद्धृतत्वात् असर्पी-भवनस्य [**'सतत्त्वतोऽन्यथा-प्रथा विकार इत्यु-दाहृत' इति वेदान्ते**] । 'काले अपि 'प्रकृतौ' स्वभावे स्वरूपे [**'प्रकृतिर्गुण** साम्ये स्याद् अमात्यादि-**स्वभावयोः**' इति मेदिनी] तिष्ठति या तां 'प्रकृतिस्थाम्' अप-राजिता-रूपेणैव स्थिताम् 'श्रुत्वा अपि अर्थात् एतादृश मसंशयितं प्रमाणं लब्ध्वा अपि' (**स्थितायाः**) 'मे' [**अनेन न समान-कर्तृकत्व-हानिः** । विस्तरस्तु द्वितीयाङ्के (२९) आलोचितः] । 'आत्मनः' स्वस्या 'भागधेयेषु'–(५।४।३४)–भाग्येषु अर्थात् स्वकीय-सौभाग्य-जन्य-स्वामि-प्राप्ति-विषये इत्यर्थः । 'अथवा' इति पक्षान्तरे मे आशा अस्ति । 'सानुमत्या यथा' येन प्रकारेण । [**यथा-शब्द अत्र अनुमान-द्योतकः** । **'यथा-शब्दस्तु** निर्दिष्ट-तुल्ययोगाऽ**नुमानयोः**' इति विश्वप्रकाशः] 'मे' मत्समीपे 'आख्यातं' राज्ञः पुनः स्मरणम् इत्याशयः । 'तथा' तेनैव राज्ञा पुनः स्मरणेन 'एतत्' अत्राश्रमे आर्यपुत्राऽऽगमनं 'सम्भाव्यते' ["विकार-कालेऽपि" इत्या-दिना **समयाख्यमङ्गमु**पक्षिप्तम् । "दुःखस्यापगमो यस्तु **समयः** स निगद्यते" इति तल्लक्षणात्] ।

251n.—1. विक्रिया—Metamorphosis (*into a snake*)—'परिणामो विकारः द्वे समे विकृति-विक्रिये'—*AK*. **2. सहर्षम्—**Because this is the **last** but the **most direct** evidence of the boy's recognition. [248*n*, 7.] **3. एष विवादः—**&c.—The contradiction that your father is Duṣyanta and not I. **प्रत्याययति—**(183*n*. 3). **4. एक-वेणीधरा—**'एक-वेणी may mean (*i*) the **uncombed mass of hair tied into a single knot** as opposed to modern **'त्रि-वेणी'** or **'पञ्च-वेणी'** dangling on the back. Or, (*ii*) hair woven into a braid once

for all *i.e.* **uncombed and unbraided from the day of separation.** This word occurs more than once in the Rām. and the **Commentator Rāma** is *at a loss* as to the real maning of it and consequently he gives both the senses. Read "**एकवेणीधरा** हि त्वा नगरी संप्रतीक्षते"—*Rām. II.* 108. 8. "नीलनागाभया **वेण्या** जघनं **गतयैकया**"—*Ibid. IV.* 15, 25. where *Rāma* remarks &c. "पृष्ठभागं गतया एकया **हरण-विन-कृतैक-संस्कारवत्या ।। यद्वा ।। पुरोभागीय-वेणीद्वय-राहित्येन पृष्ठ-लम्बयैकया वेण्या**" "केश-संस्काराऽभावात् अयत्नतः सिद्धया इति शेषः"—Rāma. But the following lines quite **clearly** corroborate the '**Second**' explanation. Read 'घृता**मेकां** बहून् मासान् **वेणीं** रामो महाबलः"—*Ibid. VI.* 33, 31. "**आद्ये बद्धा विरह-दिवसे या शिखा** दाम हित्वा, शापस्यान्ते विगलित-शुचा तां मयोद्वेष्टनीयाम् । स्पर्श-क्लिष्टा-मयमित नखेनासकृत् सारयन्तीं गण्डाभोगात् कठिन-विषमाम् **एकवेणीं** करेण'—*PA&MD. II.* 31 *and also the following* 3 *Ślokas. In the Ku.* we see that the celestial **ladies that were in bondage could not let loose their locks that were braided once.** Cf. '**मोक्ष्यते** सुरवन्दीनां **वेणीः** वीर्य-विभूतिभिः'-*Ku. II.* 61 ; "मोक्ष्यध्वे स्वर्गवन्दीनां **वेणीबन्धान**-दूषितान्"&c *Ra. XIV.* 47; *X.* 12; *PA&MD.* 98. A **विरहिणी** is forbidden to have any kind of decoration."**मण्डनं** वर्जयेत् नारी तथा प्रोषित-भर्तृका । देवता-राधनपरा तिष्टेत् भर्तृगृहेरता"—*Viṣṇu-dharmottara* "न प्रोषिते तु संस्कुर्यात् न **वेणीं** च प्रमोचयेत्—*Hārita.* "प्रवासी भिन्नदेशित्वं कार्यच्छापाच्च संभ्रमात् । तत्राङ्ग-चेलमालिन्यमेकवेणीधरं शिरः"—*VK.* "क्रीड़ा शरीर-संस्कारं समाजोत्सव-दर्शनम् । हास्यं परगृहे वासं त्यजेत् प्रोषित-भर्तृका"—*GP.* **5. विकार-काले** —At the time when it, being **handled by a stranger,** should have been **transformed** into a snake.—(168n. 9). **6. न मे आशा आसीत्**—Because unexpected good fortune is generally taken in this light by one who is ever and anon frowned at by misery. Cf. 'ण क्खु मे आसा आसि'—*Vik. I.* **7. अथवा**—On the contrary she might have hopes. **यथा** &c.—This proves that Sānumatī had already related to Śakuntalā the changed condition and after-remorse of the king.

Text:—राजा (शकुन्तलां विलोक्य सहर्ष-खेदम्)**—अये ! सेयमत्रभवती शकुन्तला । यैषा—**

मालभारिणी
(ससजगग १।३
सभरज २।४)

वसने परिधूसरे[1] वसाना[2]
[3]नियम-क्षाम-मुखी धृतैक-वेणिः ।
अति-निष्करुणस्य शुद्ध-शीला
मम दीर्घं विरह-व्रतं बिभर्ति[4] ॥२१॥

King (*Looking at Śakuntalā.—With plaintive joy*)—

Lo ! this (*is*) Her Ladyship Śakuntalā—She who, of pure character, [2]wearing a pair of dusty[1] garments, with (*her*) face[3] penance-impaired[3] (*and*) braid knotted once for all, observes[4] a long vow of separation from me who had been excessively unmerciful to her. (21)

शकुन्तला (पश्चात्ताप--विवर्णं राजानं दृष्ट्वा सवितर्कम्) **ण क्खु अज्जउत्तो विअ। ता को एसो दाणिं किद-रक्खा-मङ्गलं दारअं मे गत्त-संसग्गेण दूसेदि** (न खलु आर्यपुत्र इव। तत् क एष इदानीं कृत-रक्षा-मङ्गलं दारकं मे गात्र-संसर्गेण दूषयति) ।

Śakuntalā (*Seeing the king who had turned pale through remorse,—thoughtfully*)—(*He is*) not, indeed, like my good-man. Then who is here now contaminating my auspicious-amulet-protected child by the contact of (*his*) body ?

V. L.—'सहर्षखेदम्' & 'सवितर्कम्'—B. Omitted by others. 'विलोक्य' for 'दृष्ट्वा'—M. S omits 'यैषा' and reads 'वहति' for 'बिभर्ति' ।

राजेति। बहुकालानन्तरं प्रणयिनी-दर्शनात् 'हर्षः, पुनस्तस्या विकृत-वेष-दर्शनात् अवस्थान्तर-ज्ञानाच्च 'खेदः'। ताभ्यां सह यथा स्यात् तथा। 'अये' इति विषादे स्मरणे वा। **वसन इति।** 'परितः' सर्वतो 'धूसरे' ईषत् पाण्डु-वर्णे मलिने इति भावः [**'ईषत् पाण्डुस्तु धूसर'** इत्यमरः] 'वसने' उत्तरीयम् अन्तरीयकम् इति वस्त्र-युगलम् 'वसाना' धारयन्ती, 'नियमेन' उपवासादि-व्रतेन [**'नियमो** यन्त्रणायाञ्च प्रतिज्ञा-निश्चये **व्रते'** इति मेदिनी] 'क्षामं' कृशं 'मुखं' यस्याः तादृशी। ['स्वाङ्गाच्चोपसर्जनाद् असंयोगोपधात्'—(४।१।५४)-इति **ङीष्, पक्षे टाप्**]। 'धृता एका' अर्थात् **प्रत्याख्यान-दिन-कृतैक-संस्कारवती** 'वेणिः" यया सा तथा 'शुद्धशीला' पूत-स्वभावा पतिव्रता इत्याशयः ('शुद्धः शुक्ले च पूते च केवले च प्रयुज्यते' इति धरणिः)। 'या एषा' पुरोदृश्यमाना शकुन्तला अति-निष्करुणस्य' गर्भावस्थायामेव प्रत्याख्यानात् अतिनिष्ठुरस्य 'मम' मत्संबन्धिनं 'दीर्घं' बहुकालीनं 'विरहो'-'चितं 'व्रतम्' (शाकपार्थिवादिः) नियमम् 'बिभर्ति' आचरति। [**काव्यलिङ्ग-स्वभावोक्ती।** वसवसेति सनसानेति **छेकानुप्रास-**

बृस्यनुप्रासौ। कालभारिणी वृत्तम्] ॥५१॥ आकुललेति। 'पश्चात्तापः' प्रत्याख्यान-जनितः अनुतापः ['पश्चात्तापोऽनुतापश्चविप्रतीसार इत्यपि' इत्यमरः], तेन 'विवर्णं' परिवर्तित-रूपम्। अस्मादेव च 'वितर्क' इति ज्ञेयम्। पूर्वाकार-वैषम्याद् 'न खलु' इति अवधारणे 'आर्यपुत्र' दुष्यन्त 'इव' अयं जनः लक्ष्यते। 'कृतं' विहितं 'रक्षार्थं मङ्गलं' माङ्गलिकं कर्म यस्य तथोक्तं 'मे दारकं' पुत्रम्, दूषयति'।

252n.—1. वसने—Hindu ladies generally wear two garments, 'अन्तरीयक' (*Śāri*) and 'उत्तरीय' (*Bodice*). **2. परिधूसरे**—'परि' and 'सम्' give *force* and *intensity* like Greek, **'peri'** and **'sun'** and Latin. **'per'** and **'con'. 'परि'** is even **more intensive** than 'सम्'। Thus—समाप्ति—Completion, 'परि-समाप्ति'—Entire completion—*M.* **वसाना**—वस् (अदादिः—to put on) + शानच्। लट् वस्ते। लिट् ववसे। क्त-वसितः। Cf. "वासो वसाना तरुणार्क-रागम्"—*Ku. III.* 54. "वसानस्य च वल्कले"—*Ra. XII.* 8; *ŚPB.* IX. 75. **3. नियम-क्षाम** &c.—Cf.' 'नियमेन तनुतरं मध्यम्"—*Rat. I.* 20; (41*n.* 5.). For **क्षाम—** (91*n.* 1.) Optionally '**०क्षाम-मुखा'**—(*Com.*) **4. विरह-व्रतं**—This consists in forbearing the use of cosmetics, showy dresses, flowers or any other decoration either of the person or of the hair. It also enjoins certain vows to be observed. Read–'आर्तार्ते, मुदिते हृष्टा, वियोगे मलिना-कृशा। मृते म्रियेत या पत्यौ साध्वी ज्ञेया पतिव्रता॥—*Viṣṇu-Dharmottara.* "अमला अवधारणम् अलकानाञ्च कल्पनम् अनुलेपन-संस्कारम् न कुर्यात् पथिकाङ्गना"——*Bharata qtd. Ś;* (251*n*, 4.) "—व्यसन-कृशा परिपालयाम्बभूव। शशिन इव दिवातनस्य लेखा किरण-परि-क्षय-धूसरा प्रदोषम्'—Ku. IV. 46. **5. न खलु आर्यपुत्रः**—The king was so greatly changed by pining for Śak. that even she could not recognize him at the first sight. For **अलङ्कार**—Vide (22n, Remark).

Remark:—Bhavabhūti had this Śloka certainly in his mind while composing the following stanza for his UC—'परिपाण्डु दुर्बल-कपोल-सुन्दरं दधती विलोल-कवरीकमाननम्। करुणस्य मूर्तिरथवा शरीरिणी विरहव्यथैव वनमेति जानकी'॥—Act. II. 4.

Text:—बालः (मातरमुपेत्य)—**अम्ब! एसो को वि पुरिसो मं पुत्तकं त्ति ससिणेहं आलिङ्गदि** [अम्ब! एष कोऽपि पुरुषो मां पुत्रक इति सस्नेहमालिङ्गति)। Boy (*Going up to his mother*)—Mammy, here's some man, calls me (*his*) son (*and*) hugs (*me*) affectionately.

राजा—प्रिये ! क्रौर्यमपि[1] मे त्वयि प्रयुक्त मनुकूल-परिणामं[2] संवृत्तम् । तदहं मिदानीं त्वया प्रत्यभिज्ञातमा[3]त्मान मिच्छामि । King:—Darling, even my cruelty,[1] exercised (*by me*) on you, has turned[2] out to be of a favourable end. So now I want myself to be recognized[3] by you.

शकुन्तला (स्वगतम्)—हिअअ ! समस्सस, समस्सस पहरिअ परिच्चत्त-मच्छरेण अणुअम्पिअ म्हि देव्वेण । अज्जउत्त क्खु एसो । (हृदय ! समाश्वसिहि समाश्वसिहि । प्रहृत्य परित्यक्त-मत्सरेण[1] अनुकम्पिताऽस्मि दैवेन । आर्यपुत्र खल्वेषः) । Śakuntalā (*Aside*)—(*My*) heart be reassured, be reassured. I am commiserated by fate with[1] its spite renounced[1], after the stroke. This (*is*) certainly (*my*) husband.

राजा—प्रिये ।

आर्या [12, 18 12, 15]

[1]स्मृति-भिन्न-मोह-तमसो दिष्टया[2] प्रमुखे स्थितासि मे सुमुखि !
[4]उपरागान्ते शशिनः समुपगता रोहिणी योगम्[4] ॥२२॥

King:—Darling ! luckily[2] do you stand before me, whose[1] gloom of stupor is dispelled by remembrance,[1] (*Oh*) fair-faced one ! after eclipse, Rohiṇī [*the fourth mansion*] has approached [4]union with (*her beloved*) Moon. (22)

V. L.—'एष कोऽपि पुरुषः'—R. V. M. B omits 'पुरुषः' and S replaces it by 'परकेरकः' and 'आलिङ्गति' by 'आलपति' ॥ 'सस्नेहम्'—B. Omitted by others. 'समाश्वसिहि'—B. R. M. 'आश्वसिहि'—S. 'यदहम्'—R. V. M. S. 'तदहम्'—B. 'पश्यामि'—R. V. M. S. 'इच्छामि'—B. 'प्रहृत्य '०मत्सरेण'—B. HS. '०मत्सरेण'—R. V. M. '०मत्सरिणापि'—S.

राजेति । 'त्वयि' शकुन्तलायां ['मे' मया] दुष्यन्तेन [प्राक् व्याख्यातः] 'प्रयुक्तम्' आचरितम् 'क्रौर्यं' सगर्भाया धर्मपत्न्याः परित्यागरूप-निष्ठुरत्वं । [यद्वा 'मे' मम 'क्रौर्यं' मित्यन्वयः] 'अनुकूलः' मङ्गलकरः 'परिणामः' उदर्कः, शेष इति यावत्, यस्य तादृशम् । यतोऽहमिदानीं पुत्रवान् । सच पुत्रः सुरलोके जातत्वात् अपार्थिव-प्रभाव-सम्पन्नः । पुनः सुर-गुरु-मारीचेन रक्षौ-षधि-दत्तत्वात् अयं नूनं दीर्घजीवी भवेत् । अस्य पृथिव्यां जातत्वे तु एतादृश-शुभ-फलस्य असम्भाव्यत्वं स्यात् । 'तत्' तस्माद् हेतोः 'इदानीमहम् आत्मानं 'त्वया प्रत्यभिज्ञातम्' आर्यपुत्र स्वल्वेष, इतिरूपेण परिचितम् 'इच्छामि' येन आनन्दस्य परिपूर्णता भवेत् इति । शकुन्तलेति । 'प्रहृत्य' अर्थात् आदौ प्रहारं कृत्वा पश्चात्

तज्जनित-क्लेश-भोगेन अपराधस्य विलष्टत्वात् 'परित्यक्तः' परिहृतः 'मतसरः' क्रोधः ["क्वचित् **क्रोधोऽपि मत्सरः**" इति रत्नकोषः। यद्वा, माद्यति परकृच्छ्रे इति 'मत्सरः' (मद्+सर,–उ—३६०) अन्य-शुभ-द्वेषः ।। 'मत्सरोऽन्य-**शुभ-द्वेषः**। तद्वत्कृपणयोस्त्रिषु' इत्यमरः]। येन तादृशेन 'दैवेन'। एवमनुनीतामपि किमपि प्रत्युत्तरम् अददतीं शकुन्तलां पुनः अनुनेतुकामः वक्ष्यमाण-श्लोकमाह **प्रिये इति**। **स्मृतीति**। 'दिष्टया' भाग्येन [आनन्द-सूचक निपातोऽयम्] 'स्मृत्या' पूर्व-वृत्तान्तस्य स्मरणेन 'भिन्नं' दूरीकृतं 'मोह-रूपं तमः' अन्धकार इति 'मोह-तमः' यस्य तस्य 'मे' दुष्यन्तस्य 'प्रमुखे' पुरतः हे 'सुमुखि'—(४।१।५४) [**ङीष् पाक्षिकः**] 'असि' त्वम् [**सर्वनाम-प्रतिरूपकमव्ययम् इति केचित्**] स्थिता (सुमुखीति साभिप्रायम्। सुमुखस्यैव संमुखे स्थातुं योग्यत्वात्)। एतदेव उदाहरणेन स्पष्टीकरोति। 'उपरागस्य' ग्रह-संस्पर्शस्य ('उच्यते राहु-संस्पर्श उपराग उपप्लवः' इत्यभिधानरत्नमाला) 'अन्ते' अवसाने 'रोहिणी' (४।१।३९) दक्ष-कन्या चन्द्रस्य नक्षत्र-रूपा श्रेष्ठा भार्या 'शशिनः' चन्द्रस्य 'योगं' सम्मेलनम् 'समुपगता' प्राप्ता (अनेन परिग्रहबहुत्वेऽपि त्वमेव मे प्रेष्ठा भार्या इत्यर्थः आक्षिप्यते)। (अत्र **निदर्शनालङ्कारः** इति यत् राघव-न्याय-पञ्चानन-पादैरुक्तं तत् **चिन्त्यम्**। यतः अत्र वाक्य-द्वयस्य **भिन्नत्वं** तु **सुस्पष्टमेव**। अतएवात्र **दृष्टान्तालङ्कारः, न निदर्शनम्**। स च "मोहतम" इति **निरङ्ग-केवल-रूपकालङ्कारेण** सङ्कीर्यते। अन्ये तु साधक-बाधक प्रमाणाभावात् उभयोः **सन्देहसङ्करमाहुः** मुखे मुखीति सिम समु इति **छेकानुप्रासः**। बहूनां सकारदीनां दन्त्याक्षराणां मकारादीनाम् ओष्ठ्याक्षराणां सत्त्वात् **श्रुत्यनुप्रासः**। **कृति**-नामकमङ्गं चात्रोपक्षिप्तम्। "लब्धार्थ-शमनं **कृतिः**" इति दर्पण-लक्षणात्। **इयमार्या**) ।।२२।।

253n.—1. अनुकूलपरिणामं &c.—Cf. 'अनुकूल-गलहस्तः'—*77n.* 1. I had been no doubt extremely cruel at the time of your disavowal, still it seems to me that in the long run, this cruelty has effected a beneficial result. For in addition to my moral purification, I have now got a son who is delivered by you in the supramundane (*divine*) region and hence he is supposed to be endowed with divine power. Again this boy is sure to be a macrobiote as he has been protected with a Divine Herb (सुर-महौषधि) by *Mārica*. All these would not have been possible in the sordid world. **क्रौर्यमपि**—Refers to 'मयि क्रूरे'—VI. 9. Supra. **2. तत**—Form all these considerations. **3. प्रत्यभिज्ञातं** &c.—I wish that you should now *recognize* me as your husband, as then my felicity will be complete. **'प्रत्यभिज्ञा'**-

=[स्मृति+अनुभूति or प्रत्यक्ष—(148*n*, 1.)] is a philosophical term, as in 'एषोऽयम् आर्यपुत्रः', 'एषः' forms the **recollection,** and 'अयम्' the **direct perception.** The reading with 'आत्मानं पश्यामि' is **rejected,** as from her previous speech it is clear that she **could not** first recognize the king. **4.** सुमुखि=सुमुखा (*Com.*). The epithet has been very apt here as the fair-faced (सुमुखी) are worthy of being put (स्थिता) in the **van** (प्रमुखे) । Cf. "तेऽवस्थिताः प्रमुखे धार्तराष्ट्राः"—*Gītā. II.* 6. दिष्ट्या—(95n. 1). **5.** उपरागान्ते—उपरज्यते अनेन । रञ्ज् रागे—*to tinge.* 'हलश्च'–(३।३।१२१)–इति घञ् ॥ "घञि च भाव-करणयोः"-(६।४।२७)-इति न-लोपः । भावे वा घञ् ३।३।१८—*BhD.* उपरागः=Eclipse, as by it the sun and the moon are tinged. **6.** रोहिणी शशिनः योगम् &c.—This is the construction. The latent idea is this—Just as Rohiṇī, despite many a wife of the Moon, became his most favourite, similarly you are my most esteemed consort, though my harem is replete with other wives ('परिग्रह-बहुत्वेऽपि'—*II.* 18). Repudiation was due to a delusion which had caused my power of recollection to fall in slumber. But that is quite repelled now. योगः—Union, conjunction. Cf. "गुणमहतां महते गुणाय योगः"—*Ki. X.* 25. [For different meanings vide. *Ra. III.* 26; *X.* 86; 1.8; *Ku. VII.* 55; 1. 21; (74*n*, 5.)]

Text:—शकुन्तला—जेदु जेदु अज्जउत्तो [जयतु, जयत्वार्यपुत्रः] ।

॥ (इत्यर्धोक्ते वाष्पकण्ठी विरमति) ॥

Śakuntalā—Victory, victory (*to my lord*).

[*With this half-said stops with her throat choked with tears*].

राजा—सुन्दरि ! —"वाष्पेण प्रतिषिद्धेऽपि जय-शब्दे जितं मया ।

श्लोक **यत्ते दृष्ट मसंस्कार[1]-पाटलोष्ठ-पुटं मुखम् ॥२३॥"**

King—Lovely one ! I have been a victor, though the word of "victory" is withstood by tears, since your face with its lips rosy even [1]without decoration,[1] has been seen by me. (23)

बाल—अम्ब ! को एसो [अम्ब ! क एषः] ।

Boy—Who (*is*) he, mammy ?

शकुन्तला—वच्छ ! दे भाअहेआइं पुच्छेहि

[वत्स ! ते भागधेयानि[2] पृच्छ] (इति रोदिति) ।

Śakuntalā—Ask thy fate, my, child. (*This said, she weeps*).

V. L.—'असंस्कारं &c. (*as one word*)—R. B. S. "असंस्कारं ०पुटं"—
—Taylor Mss. M. "असंस्काराल्लोलाऽलकम् इदं मुखम्"—Ś. C. Bodelian B—Mss. "असंस्कारं पाटलोष्ठं मुखं प्रिये"—Mackenzie Mss. "ते भागधेयानि पृच्छ"—R. V. S. 'ते भागधेयानि'—R's Com. 'भागधेयानि पृच्छ"—B.

सुन्दरीति। 'सुन्दरी' इत्यनेन त्वं विशेष-दृश्यासि इत्यर्थः व्यज्यते। स्त्रीणां **किलिकिञ्चिताख्यो** भावो विशेष-दृश्यताम् आवहति। तथा चोक्तं—"क्रोधाऽश्रु-हर्ष-भीत्यादेः सङ्करः **किलिकिञ्चितम्**" इति। **वाष्पेणेति**। 'वाष्पेण' अश्रु-भारेण (अनेन चातिविरह-क्लान्तत्वं व्यज्यते) 'जय-शब्दे' जयतु जयतु इत्यादि शब्दे ('जयत्यर्थेन नमस्कार आक्षिप्यते" इति मम्मटभट्टः) 'प्रतिषिद्धे' कण्ठे एव विलीने सति। 'अपि मया जितम्' उत्कर्षं प्राप्तः इत्यर्थः ("**जय उत्कर्ष-प्राप्तिः। अकर्मकोऽयम्**" इति भट्टोजिः) कथं तदाह। 'यत्' यस्मात् 'असंस्कारात्' नियम-पूर्वकम् अलक्त-प्रदानादि-संस्कार-वर्जनेन अपि 'पाटलम्' गोलावाख्य-पुष्पवत् रक्तं, यद्वा 'असंस्कारेण' हेतुना 'पाटलम्' श्वेत-रक्तम् ('**श्वेत-रक्तस्तु पाटल**' इत्यमरः) 'ओष्ठ-पुटं' यस्य तादृशं ("औत्वो-ष्ठयो स्समासे वा" इति **वृद्धि-विकल्पः**) 'ते मुखं दृष्टम्'। पुनस्त्वन्मुख-दर्शनाशा-रहितस्य मे यत् त्वद्दर्शनम् जातं, तदेव मे जय इत्यवधेयम्। [जय-शब्दे प्रतिषिद्धेऽपि जितमिति **विरोधाभासः**। जितं प्रति उत्तर-वाक्यार्थस्य हेतुत्वेनोपन्यासात् **काव्यलिङ्गम्**। असंस्कार-पाठलोष्ठ-पुटम् इत्यत्र **विभावना**। "क्रियायाः प्रतिषेधेऽपि फल-व्यक्तिः **विभावना**" इति तल्लक्षणात्। **श्रुति-वृत्त्यनुप्रासौ**। **श्लोको** वृत्तम्] ॥२३॥ **शकुन्तलेति**। "आत्म-नाम गुरोर्नाम नामाऽति-कृपणस्य च। श्रेयस्कामो न गृह्णीयात् **जेष्ठ-पुत्र-कलत्रयोः**" इत्युक्तेः **वत्स इति सम्बुद्धिः**। 'भागधेयानि' भाग्यानि 'पृच्छ' (क्वचित् पुस्तके "पुच्छेहि" इति नास्ति। तस्मिन् पाठे **रूपकम्** इति राघवपादाः)। सार्वभौम-नृपात् ते जन्म, तेनैव तव प्रत्याख्यानं, पुनस्तेनैव सह तव आकस्मिक-समागमः। अतएव ते भाग्यानां त्रिरूपत्वात् भागधेयानि इति बहुवचनम्।

254n.—1. वाष्पकण्ठी—Cf. "वाष्पकण्ठः स इदं वचनं जगाद"—*BC*. 1. 29. Optionally '**वाष्पकण्ठा**' by "अङ्ग-गात्र-कण्ठेभ्यो वक्तव्यम्" —*Vārt.* 511.—गड्वादित्वात् सप्तम्यन्त-कण्ठ-शब्दस्य **परनिपातः**। *VM*, however, **includes "गड्वादि"** in the "**आहिताग्न्यादि**" list. "**आकृति-गणश्चायम्। तेन गडु-कण्ठ-प्रभृतयः इहैव द्रष्टव्याः**"—*KV*. The *lachrymal moisture* (*previous to its formation into tear*) entering into the throat (**कण्ठ**) embarasses the utterance. (142*n*. 1). **2. जितं मया**—The root '**जि**' means **"to prosper"** and **is intransitive.** (267*n*. 5; 57*n*.

8). Duṣyanta had given up all hopes of seeing Śak's face again (*Cf.* "असंनिवृत्त्यै तदतीतम्"—*Act. VI.* 10). Hence he considers himself to be a **victor** as he has not only been able to see her face but also finds her, though cruelly repudiated, solely devoted to him. **3. असंस्कार—**&c.—(Cf. 'असंस्कार-रमणीयम्'—MK. VII.). Unlike ordinary women accustomed to enhance the beauty of their cheeks with lacs or other dyes [*Cf.*'आ-पाण्डरी-भूत-मुख-च्छवीनाम्'—*Ku. II*;. 33. 'कुङ्कुम-परिहारात् इति भावः'—MN. 'रागेण बालारुण-कोमलेन चूत-प्रवालोष्ठ मलंचकार"—*Ibid. III.* 30. 'रागेण अरुणिम्ना तेनैव लाक्षा-रागेण'—*MN.*] Śak. was not under the necessity of such embellishments as her *lips were naturally red* like the बिम्ब-fruit or *new foliage*, ["अधरः किसलय-रागः"—*Act.* I; "अक्लिष्ट-बाल-तरुण-पल्लव-लोभनीयं बिम्बाधरम्"—*Act. VI.* 20. 'इदं किलाऽव्याज-मनोहरं वपुः"—*I.* 16.]. But on the eve of her departure to the king's place she used various things of decoration (Act. *IV.* 6; 'मङ्गल-समालम्भनम्'—&c *Act. IV.*). Since her repudiation, she *felt no necessity for ornamentations*, hence here lips have been shorn of their natural ruddiness and have turned pale. Or, her lips are turned pale owing to her austere vows (252*n*, 4.). In that case it is to be taken as a कर्मधारय समास । According to V, her lips were ruddy **even though** unadorned. M reads "असंस्कारं पाटलोष्ठ-पुटम्" and objects to the other reading which according to him, **violates the usual caesura.** "There is no doubt", says he, "that unpainted lips were a sign of mourning, but this is sufficiently implied in पाटलोष्ठ and it is a a question whether "संस्कार" can ever mean "*paint*"—(196*n*. 8.). For a somewhat similar idea, Cf. "सुन्दरी मया नाम जितं यस्य त्वया जय उदीर्यते । जय-शब्दः सहस्राक्षादागतः पुरुषान्तरम्"—*Vik. III.* 17; [also 'पाटलोष्ठ 112*n*. 3.]. पुटं (*m & n*)—A hollow-space, concavity. 'पल्लव-पुटः' —*Ra. IX.* 68; *XI.* 23; *XVII.* 12; 'किसलय-पुट'—*Māla. III.* 9.

4. भागधेयानि &c.—You had several vicissitudes in your life. Born of this man, a paramount emperor, you were abandoned by him when you had been in my womb. Again out of his own accord he has come here, who knows whether to take you back

or not. I know him but his nature is not explicable to me. The answer to your query can be best decided by your luck only. (*Com.*)

Text:—राजा—सुतनु ! हृदयात् 'प्रत्यादेश-व्यलीकमपैतु ते
किमपि मनसः संमोहो मे तदा बलवानभूत्
हरिणी　　**प्रबल-तमसामेवं-प्रायाः शुभेषु हि वृत्तयः**[2]
(नसमरसलग)　　**'स्रजमपि शिरस्यन्धः क्षिप्तां धुनोत्यहि-शङ्कया' ॥२४॥**
॥ (इति पादयोः पतति) ॥

King—(O) fair-framed ! let the throe[1] of rejection[1] go out of (*your*) heart. At that time some strange [*or unknown*] powerful infatuation of my mind took place. Such, indeed, are generally the attitudes[2] towards auspicious (*objects*) of those, (*lost*) in mighty gloom. The blind (*man*) shakes off even the garland[3] placed on (*his*) head, in dread of a serpent[4]. (24) (*This said, falls at her feet*).

शकुन्तला—उट्ठेदु उट्ठेदु अज्जउत्तो। णूणं मे सुअरिअ-पडिबन्धअं पुराकिदं तेसु दिअहेसु परिणाम-मुहं आसि। जेण साणुक्कोसो वि अज्जउत्तो मइ तहविहो संवुत्तो [उत्तिष्ठतु, उत्तिष्ठतु आर्यपुत्रः। नूनं मे सुचरित-प्रतिबन्धकं[1] पुराकृतं[2] तेषु दिवसेषु परिणाम-मुखम्[3] आसीत्। येन सानुक्रोशो[4]ऽपि आर्यपुत्रो मयि तथाविधः संवृत्तः]। (राजोत्तिष्ठति)।

Śakuntalā—Get up, get up, My Lord. Assuredly (*one of*) my merit-obstructing[1] deeds[1] in quondam[2] birth, was in those days drawing[3] towards fruition[3], so that though compassionate[4], My Lord, became so [i.e. *showed that sort of attitude*] towards me.

(*The king rises up*)

V. L.—'शकुन्तलायाः पादयोः प्रणिपत्य'-(**Before** the Śl.) by R.V. M. S.; B. HS & P have' पादयोः पतति' (**after** it). 'हि वृत्तयः'—B. M. S. K. Śr. 'प्रवृत्तयः'—R. 'सुचरित'—R. V. M. S. 'सुख०'—B. 'परिणाम-मुखम्'—R. V. M. 'परिणाम-सुखम्'—P. B. 'परिणामाभिमुखम्'—Śr. Ś. 'परिणताभिमुखम्'—K. For 'विरसः', Ś supported by Patankar reads 'तथाविधः'।

सुतन्विति। 'सुष्ठुः तनूः' मूर्तिः यस्याः सा 'सुतनूः [**समासान्त-विधेरनित्यत्वात्** 'नदृयतश्च"-(५।४।१५३; ८३३)-इति न कप् [अस्मादेव तत्संबुद्धौ "सुतनु"। [अनेन व्यलीकस्य बहिर्विकाराऽभावो व्यज्यते] 'प्रत्यादेशेन' प्रत्याख्यानेन [**"प्रत्याख्यानं निरसनं प्रत्यादेशः निराकृतिः' इत्यमरः**] सञ्जातं यत् 'व्यलीकं'

पीड़ा ['**पीड़ार्थेऽपि व्यलीकं** स्यात् इत्यमरः] तत्। 'ते हृदयात्" मानसात् (अनेन व्यलीकम् हृदये निगूढ़मस्तीति सूच्यते) 'अपैतु' दूरे गच्छतु। 'तदा' तस्मिन् निराकरण-काले 'मे किमपि' अनिर्वचनीय-रूपं यथा स्यात् तथा 'बलवान्' अतिप्रबलः 'मनसः' चेतसः 'संमोहः' अज्ञानम् 'अभूत्'। अज्ञानात् ननु कामतः मयैवं कृतम्, तस्मात् क्षन्तव्यम् इति वाक्याशयः। 'शुभेषु' मङ्गलेषु विषयेषु 'प्रबलं' बलवत्तरं 'तमः' तमोगुण-जनित-मोहः अन्धकारश्च येषां तथोक्तानां ['विशेषण-मात्रप्रयोगः विशेष्य-प्रतिपत्तौ" इति वामनः] मोहाच्छन्नानां जनानां 'वृत्तयः' प्रवृत्तयः व्यापारा इति यावत् "प्रायेण" बाहुल्येन 'एवम्' इत्थंभूताः अर्थात् शुभ-त्यागरूपाः [मयूरव्यंसकादित्वात् प्राय-शब्दस्य **पूर्वनिपातः। "अविहित-लक्षण स्तत्पुरुषो मयूर-व्यंसकादिषु द्रष्टव्यः"** इति वामनोक्तेः] 'हि' इत्यवधारणे॥ तत्र दृष्टान्तमाह॥ 'अन्धः' नेत्र-विहीनः जनः 'शिरसि' मूर्ध्नि 'क्षिप्ताम्' केनापि 'अर्पितां', 'स्रजमपि' पुष्पमालामपि [सृजतेः क्विन्(३।२।५९)] 'अहि-शङ्कया' सर्प-भ्रान्त्या। 'धुनोति' शिरश्चालनेन दूरे निक्षिपति, इत्युक्त्वा शकुन्तलायाः पादयोः पतति: प्रसादनार्थमिति भावः (तथा चोक्तं नाट्यशास्त्रे भरतेन "काकुभिः **प्रणिपातैश्च** भाग्य-निन्दादिभि स्तथा। एवं कृते च नारीणां पुरुषोऽतिप्रियो भवेत्" इति)॥ [अत्र प्रवल-तमसामित्यादिना **अर्थान्तरन्यासः**, स च स्रजमित्यादि-**दृष्टान्ताङ्गः**। प्रथम-चरणार्थं प्रति द्वितीय-चरणगत-वाक्यार्थो हेतुः इति **काव्यलिङ्गम्**। 'अहि-शङ्कया' इति **भ्रान्तिमान्। श्रुत्यनुप्रासश्च**। कमकिमेति मपैमपीति बलवलेति **छेकानुप्रासः**। "पादयोः पतति" इत्यादिना **अनुनय-नाम** भूषणमुपक्षिप्तम्। "अभ्यर्थना-परं वाक्यं विज्ञेयोऽ**नुनयो** बुधैः" इति तल्लक्षणात्। **हरिणी** वृत्तम्)॥२४॥ **शकुन्तलेति। विकस्वरालङ्कारश्चेति** केचित्, "यस्मिन् विशेष सामान्यविशेषा स्स विकस्वर" इति तल्लक्षणात्। [भर्त्रा **भार्यायाः पादयोः पतनम् अन्याय्यम् अमङ्गलकरञ्च** इति मन्यमाना शकुन्तला **त्वरया 'उत्तिष्ठतु' इति द्विरुक्तिमाह**। अतएव **राघव-भट्टादिभिर्धृता "राजा शकुन्तलायाः पादयोः प्रणिपत्य"** इत्यादिनाट्योक्तिः पूर्व-श्लोकस्य **आदौ असमीचीना** एवेति वयं मन्यामहे]। 'आर्यपुत्र' इति संबोधनेन न मे त्वयि कोपः अस्ति इत्यर्थः व्यज्यते। 'नूनम्' तर्कयामि इत्यर्थः ["नूनं तर्केऽर्थनिश्चये" इत्यमरः]। 'मे' मम 'पुरा-कृतं" पूर्व-जन्माऽनुष्ठितं किमपि मलिनात्मकं कर्म यत् 'सुचरितानां' पुण्यानां 'प्रतिबन्धकं' प्रतिकूलम् दुःखजनक मित्यर्थः। 'तेषु दिवसेषु' मन्निराकरण-वेलासु 'परिणाम-मुखं' फल-परिपाकोन्मुखम् अर्थात् दुःख-जनन-प्रवृत्तम् 'आसीत् तेन' हेतुना 'सानुक्रोशोऽपि' सकृपोऽपि' ['**कृपा दयानुकम्पा स्यादनुक्रोशोऽपि**' इत्यमरः)। 'आर्यपुत्रः मयि' शकुन्तलायां 'तथाविधः' अर्थात् वीतरागः, प्रेमरहितः 'संवृत्तः'।

255n.—1. **सुतनु**—Involves **knotty points of grammar.** For

the word **'तनु'** (*f*) exists in **three forms** viz. (*i*)**तनु** (*ii*) **तनुस्** (*iii*) **तनू**—[Read–"**स्यात् तनुः तनुषा सार्धं, धनुषा च धनुं विदुः**"–*Viśua.* "**तनुषेऽन-ङ्गम्**"—*Subandhu* "तनुषे तनुषे कम्"—*Vāsavadattā qtd. RM.* "**स्त्रियां मूर्त्ति स्तनु स्तनूः**"—*AK*]; hence in a **बहुव्रीहि** with (*i*) i.e. "तनु *as its final* member," the form should be "**सुतनो**" in the *Vocative Case* (7. 3. 108). With (*ii*), the form becomes "**सुतनुः**", and with (*iii*) 'तनू' which is a **नदी-संज्ञक** word [by "**यू-स्त्र्याख्यौ नदी**" (1.4. 3; 303);] the compound form with **कप्** (by "**नदृयतश्च**" (5. 4. 153) becomes "**सुतनूके**" in the Vocative Case (Com.). In this connexion it must be. remembered that with (*i*) i.e. 'सुतनु', we do not get the *Feminine affix* **'ऊङ' by 'ऊङ उतः'** as it is *not* expressive of **human genus.** "उकारान्त **मानव-जाति-वाचक-शब्दात्** परः स्त्रीलिङ्गे **ऊङ-प्रत्ययः** स्यात्" —**Prabhā.** *VM,* however, opines that the application of the Sūtras 'ऊङ उतः' (4. 1. 66 *i. e. addition of* 'ऊङ' *after* उकारान्त *words*] and "इतो मनुष्यजाते" (4. 1. 65 *i.e. addition of* ङीष् *after* इकारान्त *words*] **depends upon the option of the speaker**—which option is **ascertainable** by *actual* **usage**—whether or not a certain **nominal stem will be regarded as denoting the human genus'.** Hence 'सुतनु' (*i*) with 'ऊङ' becomes **'सुतनू'**, and "**सुतनु**" in the *Vocative* case, the *final vowel* being *shortened* by "**अम्बार्थ-नद्योः** ह्रस्वः"–(7. 3. 107). Read–'**मनुष्यजाते विवक्षाऽविवक्षे**" (५।२।४७)–"**इत्यत्र** मनुष्य-जाते":, 'ऊङ उतः" इत्यत्र **मनुष्यजाते विवक्षा अविवक्षा च लक्ष्याऽनु-सारतः** * * * "हृतोष्ठ-रागैः नयनोद-विन्दुभिः निमग्न–नाभेः—" । अत्र "**निमग्न-नाभेः**" इति **मनुष्यजाते अविवक्षा** इति ङीष् **न कृतः** ।। "**सुतनु** जहिहि' कोपः'—" इत्यत्र **मनुष्यजातेः विवक्षा इति** सुतनु-शब्दाद् '**ऊङुतः**" **इति ऊङि सति ह्रस्वत्वे** (७।३।१०७), "**सुतनु**" **इति सिध्यति** ।। "बरतनुः अथवासौ नैव दृष्टा त्वया मे"—(*Vik. IV.* 22.) इत्यत्र "**मनुष्य-जातेः अविवक्षा** इति **ऊङ** न कृतः"—*KSV.* "ननु इह तनु-शब्दस्य ह्रस्वान्तत्वे संबुद्धौ चेति गुणेन भाव्यम् । दीर्घान्तत्वेन नदी-लक्षणः"कप्" प्राप्नोति ।। सत्यम् ।। **तनुशब्दः स्त्री-जाति कविभिः प्रयुज्यते** । तस्मात् "**ऊङुतः" इति "ऊङि" कृते कर्मधार-योऽयम् इति हरदत्तः**"—*Śabada-Kaustubha.* For similar uses Cf. "एते ते **सुतनु** पुरीजनोपभोग्या दृश्यन्ते"—*BK. XXII.* 27; 26. "या तनुः **सुतनु** पूर्वम् उज्झिता"—*Ku. VI*;. 52; *PA & MD.* 117.*Ra. II.* 57. "एता **सुतनु** मुखं ते'

Vik I. 11. "अरुणकरोद्‌गम एष वर्तते वरतनु संप्रवदन्ति कुक्कुटा:"—*Kumāra-dāsa qtd. Keṣemendra in his* "औचित्यविचारचर्या"। Or, समास is with 'तनू' but समासान्त 'कप्' is **not added** as **समासान्तविधि is often** 'अनित्य'—(193 n. 4). **2. व्यलीक**—Grief. 'व्यलीक-नि:श्वासम्'—*Ku. III.* 25. 'शमित-पराजय-व्यलीकान्"—*Ra. IV.* 87. *Ki. III.* 19. **R explains** 'व्यलीक' as 'अप्रिय'। 'व्यलीकं त्वप्रियेऽनृते'—*AK. Cf.* 'इत्थं गिर: प्रियतमा इव सोऽव्यलीका: शुश्राव"—*ŚPB. V.* 1. **3. किमपि मनस:**—'किम्' and 'अपि' together mean **indescribable.** 'अनिर्वचनीय-रूपं यथा स्यात्'—*Ś.* "किमपि चेदमनङ्ग-विचेष्टितम्"—*Vik. II. 9.* "स्नेहानाहु: किमपि विरहे ध्वंसिन:'—*PA&MD. II.* 51.' 'व्यतिषजति पदार्थान्तर: कोऽपि हेतु:"—*UC. VI* 12. "किमपि अहिंस्यस्तव"—*Ra. II.* 57. Considering that 'संमोह" always belongs to the mind, *R* takes the *whole* as a compound word, as otherwise according to him, 'मनस्' being superflous, **tautology** will arise. Read—"किमर्थम् अप्रियं कृतम् ? "किमपि" ईषत् "मन:" यस्य असौ "किमपि-मना:"। तस्य 'किमपि-मनस: मे' मम बलवान् ' अधिक: 'संमोह:' अज्ञानम् अभूत् इति विशिष्टं विधेयम्। ** संमोहस्य मनो-धर्मत्वात् मनस: संमोह: जात: इति आर्थपौनरुक्त्यं निरस्तम्"—*R.* My mind being weak, was easily destroyed by infatuation. Thus it was not in me at that time, and conse--quently you were not recognized. **बलवान्**–(4n. 5; 89*n*, 3). **4. प्रबल-तमसाम्**—'तमस्' is darkness or foulness (*inertia*) whence proceed ignorance, infatuation, delusion, mentai blindness &c.—*Gitā XIV.* 8-17. "मद-मूढ-बुद्धिषु विवेकिता कुत:"—*ŚPB. XIII.* 6. **5. अहि**&c.—आहन्ति इति आ+हन् (हिंसागत्यो:)+इति इण् [उ-"५८७"—इति इण् ङि त् आङो ह्रस्व:] ='अहि–*BhD.* 'अहिर्वृत्राऽसुरे सर्पे'–*Viśva.* **6. पादयो: पतति**—This is only to propitiate Śak. (*Com*). Elseshere our poet makes his heroes '**पुरुरवा:**' and '**अग्निमित्र**' **fall at the feet of their consorts 'काशीराजपुत्री' and 'इरावती' respectively**. *R* and *S* supported by *M* place this stage-direction just **before this Śloka;** and the following speech is uttered by the king **lying prostrate for some time**—which fact however is neither in consonance with the **reduplication** in' उत्तिष्ठतु' implying **haste** (pp. 35, *L* 10), nor with the character of Śak. who adores her

husband as God (202n. 3). Our doubt is **doubly increased** by the fact that in both *Vik.* and *Māla.* this **very stage-direction** occurs **after, and not before the speeches of propitiation** made by 'पुरुरवा:' and 'अग्निमित्र'। Read "राजा—अपराधी नामाहं प्रसीद रम्भोरु &c. ॥२१॥ (**इति पादयोः पतति**)" ॥—*Vik. II.* "राजा—(संरशनं हस्तमवलम्बयति) अपराधिनि-मयि दण्डं संहरसि &c.—(**इति पादयोः पतति**)" ॥—*Māla. III;* Also * * (**इति पादयोः पतति**) वासवदत्ता ['हस्तेन वारयति]—"अज्जउत उट्ठेहि उट्ठेहि"—Rat. III. 14. This is in fact the trait of **every Hindu wife,** and consequently she will never allow **her husband to be prostrate on her feet until his speech is finished.** Now read MK (I. 44.) where विट **after his speedh** falls at the feet of Vidūṣaka. **7. आर्यपुत्र**—Shows sign of conciliation. Read-"**संशयिते परिणये न एष समुदाचार:**"—Act V. pp. 465. **8. सुचरित**&c.—I had performed some good deeds (सुचरित) in previous birth and the merit accrued thereof caused my union with you. But its further action was debarred by some of my bad deeds which were then drawing towards fruition. Thus I was disowned by **my bad luck and not by you.** Śak. has been represented as a **typical Hindu woman** who always attributes **her sorrows to evil deeds done in previous birth.** Cf.'यो मदर्थे पयोराशिं रुद्धवान् वानरैर्युतः ॥ स कथं मां महावीरो निष्पापां रजकोक्तितः। त्यजिष्यति ममैवात्र दैवन्तु **प्रतिकूलितम्** ॥"—*PP. Ch.* 32, 23-24; 'नित्यं तव पदे रक्तां त्वदुच्छिष्ट-भुजं हि माम् ॥ भवांस्तत्याज तत् सर्वं मम **दैवन्तु कारणम्**'—*Ibid.* 29. "कल्याण-बुद्धे रथवा **तवायं न कामचारो** मयि शङ्कनीयः। **ममैव जन्मान्तर-पातकानां विपाक**-विस्फूर्जथु रप्रसह्यः"—*Ra. XIV.* 62. 'किं नु **पापं कृतं पूर्वं** को वा दारैः वियोजितः। याहं शुद्ध-समाचारा त्यक्त्वा नृपतिना सती' ॥—*Rām. VII. Ch.* 48, 4. **तथाविधः**—The vague general nature of the expression is more suited to feminine nature. (255n, 8, end).

Text:—राजा (उत्तिष्ठति)—The king rises up.

शकुन्तला—अह कहं अज्जउत्तेण सुमरिदो दुक्ख-भाई अअं जणो

[**अथ कथमार्यपुत्रेण स्मृतो दुःखभागी अयं जनः।**] Śakuntalā—How then was this unhappy person remembered by (*my*) lord ?

राजा—उद्धृत-विषाद-शल्यः[1] कथयिष्यामि ।

मोहान्मया सुतनु ! पूर्वमुपेक्षित स्ते
वसन्ततिलका **यो बाष्प-बिन्दु रधरं परिबाधमानः[2]**
(तभजजगग) **तं तावदाकुटिल-पक्ष्म-विलग्न[3] मद्य**
कान्ते ! प्रमृज्य[4] विगतानुशयो[5] भवेयम् ।।२५।।

।। (यथोक्तमनुतिष्ठति) ।।

King:—When I have plucked[1] out the splinter of sorrow[1] (*I*) will tell you. Having first wiped[4] off to-day that tear-drop which weighing[2] upon (*your*) nether lip, was Oh fair-bodied one, formerly neglected by me through infatuation (*and*) which is (*now*) hanging[3] on (*your*) slightly-curved eye-lashes[3], I will, O my beloved, be rid of remorse[5], (25) (*This said, acts accordingly*).

V. L.—'बाष्प-विन्दुः'—B. R. M. Dr. 'बद्ध-विन्दुः—Śr. V. S. 'कान्ते'—B. HS—supported by one Devanāgara Mss. of Patankar. 'बाष्पं'—R. V. M. S. 'भवामि'—B. 'भवेयम्'—R. M. S.

राजेति । 'उद्धृतं' हृदयात् दूरीकृतं 'विषाद-रूपं शल्यं' शंकुः ['वा पुंसि शल्यं शंकुर्ना' इत्यमरः] येन तथाविधः भूत्वा । **मोहादिति ।** 'हे सुतनु' [प्राक् व्याख्यातः ७।१४] 'यः बाष्पस्य' अश्रुणः 'विन्दुः' कणः [जात्यैकवचनम्] 'पूर्वं' निराकरण-वेलायां 'ते' तव 'अधरं' निम्नोष्ठं 'परितः सर्वतः 'बाधमानः' उत्पीड़यमानो नेत्र-जलस्य उष्णत्वात् अधरस्य मलिनतां सम्पादयन् इत्यर्थः । 'मया' [परम-विवेकिना धर्म-भीरुणा परम-विदग्धेन दुष्यन्तेन इत्यर्थान्तर-संक्रान्तम्] 'मोहात्' अज्ञानात् 'उपेक्षितः' अगणितः न प्रमृष्ट इति यावत्, 'अद्य' बहु-दिवसानन्तरम् 'आ' ईषत् 'कुटिलं' वक्रं यत् 'पक्ष्म' नेत्र-लोम तेषु 'विलग्नं' ससक्तं 'तं' विषाद-शल्यरूपं बाष्पविन्दुं 'प्रमृज्य' विशोध्य दूरीकृत्य इत्याशयः । हे 'कान्ते' प्रिये 'विगतः' दूरीभूतः 'अनुशयः' अनुतापः यस्य तथाभूतः 'भवेयम् तावत्' इत्यवधारणे ['यावत्तावच्च साकल्येऽवधौ मानेऽवधारणे इत्यमरः] । [इदमेव उद्धृत-विषाद-शल्यत्वम् । यतोऽपराधादिनाऽनुशयो हि विषादः । तदुक्तं सुधाकरे—"अपराध-परिज्ञानात् अनुतापस्तु यो भवेत् । विषाद" इति । काव्यलिङ्ग-श्रुति-वृत्त्यनुप्रासाः । आकुटि-लेति व्यतिरेकः । बाष्प-मोचन-कार्यस्याऽन्वेषणात् 'विबोध'—नामक मङ्गमुपक्षिप्तम् । "विबोधः कार्य-मार्गणम्" इति दर्पण-लक्षणात् । यथोक्तमित्यादिना प्रसाद-नामक मङ्गञ्चोपक्षिप्तम् । तल्लक्षणंतु—'शुश्रुषाद्यु-पसम्पन्ना प्रसादस्तु प्रसन्नता' इति । बाष्प-मार्जनं तु त्रिपताक-वक्राऽनामिकया इति ज्ञेयम् । तथाचोक्तं सङ्गीत-रत्नाकरे—"तन्मार्जने च स्याद् अधो यान्तीमनामिकां नेत्रक्षेत्रगतां बिभ्रत्" इति । वसन्त-तिलका वृत्तम्] ।।२५।।

256n.—1. दुःखभागी—may be derived with **'घिनुण्'** (3. 2. 142; or with 'ण्वि' (3. 2. 62) after 'भज्'। **विषाद-शल्यः—**शल्य (*lance, dart*) if lodged in the body becomes the cause of continuous grief. Cf. 'अवगच्छति मूढचेतनः प्रियनाशं हृदि **शल्यमर्पितम्**। स्थिरधीस्तु तदेव मन्यते कुशल-द्वारतया समुद्धृतम्"—*Ra. VIII.* 88. **'शल्य—**प्रोतम्'—*IX.* 75; *IX.* 78; "शोक-शल्ये"—BC.IX.13. **'अलात-शल्यम्'**–UC. III.. 35. *Śak. VI.* 9. 'हृदयगत-**शल्यः**'–*BC. IV.* 103; *Vik. II.* 10. 'अहो **शल्यं** मे हृदयात् अपनीतमेव'—*Ibid. V.* 'उद्धरेत् नो **हृदय-शल्यम्**'—*Ibid. I.* **2. परिबाधमानः**—Suggests the continuity and tepidity of tears. **3. आकुटिल** &c.—Cf. **'Arched brow'—All's Well That Ends Well.** The king is vividly reminded of the past scene of Śak.'s rejection. Cf. 'भेदाद् भ्रुवो कुटिलयोरतिलोहिताक्ष्या &c.—*V.* 23; *VI.* 9. Hence he *identifies* the **present tear** (तम्) of Śak. with that which (**यः** पूर्वम्) had arisen **at the time of her repudiation,** (अत्र पुरातनाऽद्यतनयोः बाष्पयोः एकत्वम् अभेदाऽध्यवसायात्—*A.*), just as woes experienced long before are renovated at the sight of dear and near ones. This is how *R* has explained the *significance of the correlatives* (यद्-तद्) **4. कान्ते**—The king is doing his best to please Śak. **'कान्ते'**–is suggestive of the **undiminished love of the king** for Śak, while **'सुतनु'** (253n. 1) is suggestive of her **personal beauty.** 'बाष्पम्' (M) causes **unnecessary palillogy** and is well **rejected.** But *M* argues—"The repetition of बाष्प seems *at first* **unneccessary, but not** if it be borne in mind that **'बाष्प'** is properly the *moisture* in the eye (142n. 1) and **'बाष्प-बिन्दु'** *the tear-drop when it is has left the eye.* **प्रमृज्य**=मृज्-लट्-मार्ष्टि, (७।२।११४) मृष्टः, मृजन्ति मार्जन्ति। सन् मिमार्जिषति, मिमृक्षति, मिमार्क्षति।

Text :—शकुन्तला (प्रमृष्ट-बाष्पा अङ्गुलीयकं विलोक्य)—

अज्जउत्त! तं एदं अंगुलीअअं (आर्यपुत्र! तदेतत् अङ्गुलीयकम्)।

Śakuntalā—(*With tears wiped off, seeing the ring*)—

This, My Lord, (*is*) that ring !

राजा—अथकिम्। अस्याऽद्भुतोपलम्भा'न्मया स्मृति रुपलब्धा[२]।

King—Yes. From the wonderful acquisition[1] of this *ring*, *(my)* memory was restored[2].

शकुन्तला—विसमं किदं क्खु इमिणा, जं तदा अज्जउत्तस्स पच्चअ-काले दुल्लहं आसि (विषमं[3] कृतं खल्वेनेन, यत् तदा आर्यपुत्रस्य प्रत्यय-काले[4] दुर्लभम् आसीत्) ।

Śakuntalā—(*Great*) mischief[3] was, indeed, done by it, in as much as it was difficult to obtain, at the time[4] of convincing[4] my husband.

राजा—तेन हि ऋतु-समवाय[5]-चिह्नं प्रतिपद्यतां लता कुसुमम् ।

King—And so, let the vine receive (*her*) blossom, as earnest of (*her inseparable*) union[5] with the (*spring*) season[5].

शकुन्तला—ण से विस्ससामि । अज्जउत्तो एव्व णं धारेदु
[नास्य विश्वसिमि । आर्यपुत्रः एवैनद्धारयतु] ।

Śakuntalā—(*I*) trust it not. Let my husband himself keep it.

V. L.—'प्रमृष्ट-बाष्पा' &c.—B 'नाममुद्रां विलोक्य'—R. V. M. S. 'तदेतत्'—B. 'एतत् तत्'—V. M. S. 'एतत् ते'—R. 'अथकिम्'—B. 'अस्याद्भुत'&c.—B "अस्य अङ्गुलीयस्य उपलम्भात्'—V. 'अस्मादङ्गुलीयोपलम्भात्'—R. M. S; R and M omit 'मया' । 'प्रत्यायन'—B. M. P. Ś. 'प्रत्यय'—R. S. V. 'समवाय'—R. V. M. S. 'समागम०'—B. P. Some B Mss. read 'समागमाशंसि' । 'सङ्गम-सूचकम्'—S.

राजेति । 'अथकिम्' इति स्वीकारे । 'अस्य' अङ्गुरीयकस्य अद्भुतोपलम्भात्' (७।१।६७) रोहित-मत्स्योदरात् आश्चर्यरूपेण प्राप्तत्वात् । **शकुन्तलेति** । 'विषमं' विरुद्धं दारुणमित्यर्थः । 'प्रत्यय-काले' 'विश्वासोत्-पादन-वेलायाम् । **राजेति** । 'तेन' इदमङ्गुलीयकम् यदि मत्प्रत्यायकं तस्मात् । 'हि' इत्यवधारणे । 'लता' कर्त्री 'ऋतोः समवायस्य' समागमस्य 'चिह्नं' सूचकं 'कुसुमं' 'प्रतिपद्यतां' धारयतु । लतायां यथा तिष्ठति कुसुमम् तद्वत् इदङ्गुलीयकं तवैव हस्ते तिष्ठतु । (अत्र लतयेव तन्व्या त्वया मत्प्रत्यायकम् अङ्गुलीयकं धारणीयम् इति प्रस्तुते यल्लता-कुसुम-वृत्तान्तोऽन्यः प्रस्तुतः उक्तः सादृश्येन **साऽप्रस्तुतप्रशंसा** । "राजा—प्रिये" इत्यादिना एतदन्तेन **परिभाषणं** नामाङ्गमुपक्षिप्तम् । तल्लक्षणं यथा दशरूपके—"मिथः संजल्पनं यत् स्यात्तदाहुः **परिभाषणम्**" इति) ।

257n.—1. प्रमृष्ट-बाष्पा—With a view to making amends for the past misdeed, while the king was wiping away the tears of Śak., the ring was noticed by her. **2. प्रत्यय** &c.—'प्रत्यय' is settled belief, conviction. Cf. 'मूढः पर-**प्रत्यय**-नेय-बुद्धिः'—*Māla.* 1; *Ku. VI.* 30. **'स्थान-प्रत्ययात्'**—Act *VII.* 'आकृति-**प्रत्ययात्**'—*Māla. I;* Also *PA & MD.* 8. **'प्रत्यायन'**—does note seem to be a **common** word with

Kāli. **विषमम्**—Acted contrarily **'एनेन'**=अनेन–(6n. 6). **3. समवाय**—समवाय्यते। अय गतौ। घञ् (३।३।१९)॥—"समवयन्ति अनेन अस्मिन् वा। 'घञ्'(३।३।१९)—(RM)—[तन्न॥ "अजब्म्याम्—"(वा: ३।३।१२६) इति वार्तिक-विरोधात्]—*BhD.* **समवाय—Constant and inseparable connection.** ("अवयवाऽवयविनो गुण-गुणिनो: क्रिया-क्रियावतो: जाति-व्यक्त्यो नित्य-द्रव्य-विशेषयोश्च य: सम्बन्ध: स **समवाय:**"—*Sidhānta-Muktāvali*). **4. तेन हि** &c.—Just as blossoms are the symbols of union of a creeper with the vernal season, in a similar way let this ring testify to the union of you with me. (*Com.*). Here ऋतु (*m*) stands for दुष्यन्त, लता (*f*) for शकुन्तला, and कुसुमम् (*n*) for अङ्गुलीयकम्। The instrumental of **'तत्'** is often used **with** an adverbial force in the sense of '*therefore*', '*in that case*', Cf. "**तेन हि** प्रगृह्यतां वाजिन:"—Act. I-(p. 39); '**तेन हि** लघु" &c.—*II. p.* 186. '**तेन हि** गृहीतपाथेय:'—II. p. 191. **5. अस्य विश्वसिमि** —Ordinarily **locative** is used with 'वि+श्वस्', (*also* अप्+राध्, प्र+सद्, अप्+कृ & क्षम)। [Cf. '**पुंसि** विश्वसिति कुत्र कुमारी"—*NC. V.* 110; "**तस्यां** हरिणा विशश्वसु:"—*Ku V.* 15. "सर्व: **सगन्धेषु** विश्वसिति'—*Act V.* "**तुष्टे विष्टे** च विश्वास:"—*Rājaśekhara.* "**कस्मिन्नपि पूजार्हे** अपराद्धा"—*Act IV.* "अपराद्धं **युवतीषु**" —*III.* 7. But **genitive is also often found.** Cf. "**अपराद्धोऽस्मि** "युष्यत्-गोत्रस्य **कण्वस्य**"—(262*n.* 1). 'दिश: प्रसेदुर्मरुत: बबु: सुखा:"—*Ra II*;. 14 "न किञ्चित् मया तस्य अपकर्तुं शक्यम्"—*PT.* 'क्षा हि **तयो: क्षमा**' —*Ra XI.* 5. "मलिनी हि यथादर्शो **रूपालोकस्य** न क्षम:'—*Y. III.* 141. **षष्ठी** in such cases is **'शेषे'**]। **6. आर्यपुत्र * * धारयतु** &c.—Perhaps uttered a bit *jocosely* and cunningly too. The idea is :—The absence of the ring was not a bar to my recognizing you as my husband, but you, on the other hand, without it could not recognize me as your legally married wife. Thus it is meet that the ring should have a place in the finger of you and not of mine, so that in future you can put a stop to such calamity, Cf. 'तदेषा तवैव कण्ठाभरणं भवतु रत्नावली'—MK. VI.

Text :—(तत: प्रविशति मातलि:)—

मातलि:—दिष्ट्या' धर्मपत्नी-समागमेन पुत्र-मुख-दर्शनेन चाऽऽयुष्मान् वर्धते।

(*Enter Mātali*)—Mātali—Fortunately[1] does His Long-lived (*Highness*) prosper by (*his*) reunion with (*his*) lawful wife and by the sight of (*his*) son's face.

राजा—अभूत् सम्पादित-स्वादु-फलो मे मनोरथः। मातले ! न खलु विदितोऽयम् आखण्डल[2]स्यार्थः ? King—My desire has has had a sweet fruition. Mātali, may not this affair be known to Indra[2] ?

मातलिः (सस्मितम्)—**किमीश्वराणां परोक्षम्। एह्यायुष्मन्। भगवान् मारीचस्ते दर्शनं वितरति**[3]। Mātali (*With a smile*)—What is out of the ken of the omnipotent ? Come, My Long-lived (*king*). His Holiness Mārīca vouchafes[3] you an audience.

राजा—प्रिये। अवलम्ब्यतां पुत्रः। तां पुरस्कृत्य भगवन्तं द्रष्टुमिच्छामि। King—My darling ! please take up (*your*) child. Placing you in the van, (*I*) wish to see His Reverence

शकुन्तला—हिरिआमि अज्जउत्तेण सद्धं गुरुअण-समीवं गन्तुं [जिह्रेमि[4] आर्यपुत्रेण सार्धं गुरुजन-समीपं गन्तुम्) । Śakuntalā—(*I*) feel[4] coy to approach (*my*) elders in company of my husband.

राजा—अप्याचरितव्यमभ्युदय-कालेषु[5]**। एह्येहि।** (इति सर्वे परिक्रामन्ति)।

King—Even (*this*) may be observed in auspicious[5] times[5]. Do **come.** (*This said, all turn round.*)

(ततः प्रविशति अदित्या सार्धं मासनस्थो मारीचः) । मारीचः (राजानमवलोक्य)—**दाक्षायणि !**

पुत्रस्य ते रण-शिरस्यग्रयमग्र-यायी
वसन्ततिलका **दुष्यन्त इत्यभिहितो भुवनस्य भर्ता।**
(तभजगग) [1]**चापेन यस्य विनिवर्तित-कर्म-जातं**[2]
तत् कोटिमत्[3] **कुलिश**[4]**माभरणं मघोनः ॥२६॥**

(*Enter Mārica seated together with Aditi*).

Mārica (*Looking at the king*)—Dākṣāyaṇī this (*is*) he, the forerunner of the battles of (*thy*) son (*and*) the protector of the world, named Duṣyanta, by whose bow[1] with[2] (*its*) functions fully done,[2] the [3]sharp-edged thunder-bolt[4] has become a (*mere*) ornament to Indra.

V. L.—'आखण्डलस्यार्थः'—B. S. HS. 'आखण्डलेन वृत्तान्तः स्यात्'—R. V. M. In S the following speech 'किमीश्वराणां परोक्षम्' with **'अथवा'** before it, has been attributed to the king.'. वितरति'—

R. V. M. S. 'इच्छति'—B. 'प्रिये'—B. P. HS. 'शकुन्तले'—R. V. M. S. 'गुरु'—R. V. M. S. 'गुरुजन'—B. P. HS.

राजेति । 'सम्पादितं' सौभाग्येन विहितं 'स्वादु' मधुरं' हृदयानन्द-**वर्धनम् इति** यावत् 'फलम्' उदर्कः यस्य तथाभूतः । 'अयम् अर्थः' दुष्यन्तस्य सपुत्र-पत्नी-समागम--रूपः विषयः ['अर्थो विषयाऽर्थनयो-धन-कारण-वस्तुषु' इत्यमरः] '**आखण्डलस्य**' इन्द्रस्य ["क्तस्य च वर्तमाने"–(२।३।६७)-इति षष्ठी] 'न खलु' इति **वाक्यालङ्कारे** 'विदितः' इति काकुः । 'वितरति' इति भविष्यति लट् । **मातलिरिति । यज्ञभाग**-समुत्सुकेन सर्वज्ञेन इन्द्रेणैव आत्मनः प्रेषितत्वात् कौतुकेन जातं मातले र्हास्यमिति ज्ञेयम् । 'ईश्वराणा' प्रभूणां ['स्थेशभास'–(३।२।१७५)–इति वरच्] 'किं परोक्षम्' अतीन्द्रियम् अगोचरम्, न किमपि इत्याशयः । **राजेति ।** 'प्रिये अवलम्ब्यताम्' **अङ्के** ध्रियताम् । [क्वचित् "**शकुन्तले**" इति पाठ. । स तु न **मनोरमः' शास्त्रकारैः कलत्र-नामोच्चारणस्य निषिद्धत्वात्** । तथा चोक्तम्—"आत्म-नाम गुरोर्नाम नामाऽतिकृपणस्य च । श्रेयस्कामो न **गृह्णीयात् ज्येष्ठ-पुत्र-कलत्रयोः" इति** कर्मलोचनम्] । **शकुन्तलेति ।** 'गन्तु' गमनात् [**कृदन्त-शब्दानाम् अव्ययत्वात्** विभक्ति-लोपः । 'जुगुप्सा-विराम-प्रमादार्थाना मुपसंख्यानम्",—(वा-५८७)-**इति** ५मी) '**जिह्रेमि**' लज्जे । **राजेति ।** 'अभ्युदय-कालेषु' **मङ्गलोत्सव-समयादिषु** पत्या सह मिलित्वा गुरुजन-वन्दनादिकम् 'आचरितव्यम्' **कर्तव्यम्** 'अपि' **इति कामचार-क्रिया-द्योतकः** ["अपि संभावना-प्रश्न-**शङ्का-गर्हा-समुच्चये । तथा** युक्तपदार्थे च **कामचार-क्रियासु** च" इति विश्वप्रकाशः] । "एह्येहि" **इति** संभ्रमे द्विरुक्तिः । **पुत्रस्येति ।** हे 'दाक्षायणि' दक्षपुत्रि । ["वा नामधे-**यस्य**"—(वाः-१।१।७३)-इति **वृद्धसंज्ञायां** "उदीचां वृद्धादगोत्रात्"—(४-१ १५७)—इति फिञ् । **गौरादित्वात्** (४।१।४१) ङीष्] "ते' तव '**पुत्रस्य**' **इन्द्रस्य** 'रण-शिरसि' समर-मूर्धनि 'अग्रयायी' सर्वेषां सैन्यानाम् अग्रे गन्ता [अने-नास्य महावीर्यम् । अथच त्वदीय-तनय-संबन्धित्वात् अयं तवापि **प्रेमपात्रम् इति** व्यज्यते] 'दुष्यन्त इति' नाम्ना 'अभिहितः' लोकैराख्यातः 'अयं' जनः 'भुव-नस्य' भूमण्डलस्य 'भर्त्ता' पालकः 'यस्य' दुष्यन्तस्य 'चापेन' धनुषा 'विनिर्वर्तितं' समापितं 'कर्म' देवारि-घातन-रूपं कार्यं यस्य तथोक्तं सत् 'कोटयः' तीक्ष्णाग्राणि विद्यन्ते यस्य तत् 'कोटिमत्' साध्वग्र-भाग-युक्तमित्यर्थः ['कोटिः स्त्री **धनुषो-** ऽग्रेऽश्रौ संख्या-भेद-प्रकर्षयोः' इति मेदिनी । प्राशस्त्ये मतुप्] 'तत्' **सुप्रसिद्धम्** [अतः यच्छब्दा-भावेऽपि तच्छब्दः-प्रयोगः] 'कुलिशं' दम्भोलिं वज्रमिति यावत् ['कुलिशो न स्त्रियां प्रोक्तो दम्भोलौ, ना झषान्तरे' इति मेदिनी । ['मघोनः' **इन्द्रस्य** 'आभरणं' परिच्छेद-रूपं 'जातम्' [वीर्य-लक्षणस्य वस्तुनोऽतिशयितत्वेन **वर्णनात् उदात्तालङ्कारः** । आभरणत्वं प्रति **विनिर्वर्तित-कर्म**-जात-पदस्य **आर्थो**

हेतुः इति पदार्थहेतुकं काव्यलिङ्गम्। चाप-कर्तृक-कुलिश-कर्म-जात-विनिवर्तनात् कार्यादसुर-वध-लक्षण-कारणं प्रतीयते, अतः पर्यायोक्तमलङ्कारः। आभरणमित्यत्र निरङ्गं केवलरूपकञ्च। स्यस्येति ययायीति छेक-वृत्त्यनुप्रासौ। वसन्त-तिलका वृत्तम्)।

258n.—1. '**प्रिये**—is better than' शकुन्तलेति' (R), as the **utterance of the name of wife** by the husband is **prohibited.** The king had already used this epithet more than once. Cf. '**प्रिये** क्रौर्यमपि'—*VI. p.* 'प्रिये स्मृति-भिन्न-मोह-तमसो'—VII. 22. (*Com.*) *and* (82n. 8). **वितरति**—Cf. 'वितरति गुरुः प्राज्ञे विद्यां'—&c. *UC.* II. 4. **2. गन्तुं जिह्रेमि**—The Fifth Case in 'गन्तुम्' is elided, as 'तुमुन्' here is in भावे [*i. e.* अव्यय]–*Vide* (31*n.* 3). [*Vārt*(५३७) *quoted in Com.* is **rejected by Patañjali.** Read–"यदा तु जुगुप्सते इत्यादेर्निवर्तत इत्यर्थः आश्रीयते तदा बुद्धि-कृत-विश्लेषावधित्वमादाय अपादानत्वाद्धेव सिद्धमिति वार्तिकमिदं भाष्ये प्रत्याख्यातम्"–*BM.* Also *T* on (2. 3. 28)]. (Śak.'s bashfulness clearly shows that the women in our country in old days, did **not approach** their superiors either singly or along with their husbands. Cf. also the speech of द्रौपदी—"गुरुस्थाना गुरवश्चैव सर्वे तेषामग्रे नोत्सहे स्थातुमेव"—*Mahā.* **3. अप्याचरितव्यं**—'**अपि**' here is indicative of '**कामचारक्रिया**' (*Com*) i. e. 'indifference on the part of the speaker, where he permits another to do as he likes'. Cf. "अपिस्तुह्यपि सेधास्मांस्तथ्यमुक्तं नराशन"—*BK.* *VIII.* 92. **4. पुत्रस्य ते**–This is purposely mentioned **to rouse motherly affection** towards Duṣyanta, who always ungrudgingly helps her son. **अग्रयायी**—Cf. "प्रवेश्य चैनं पुरमग्रयायी"—*Ra. V.* 62 'मानधनाग्रयायी'–*Ra. V.* 3. Also "तस्य त्वं रणशिरसि स्मृतो निहन्ता"—*VI.* 30. *Supra.* **5. दुष्यन्त**—(अभिहिते प्रथमा) as '**इति**' here is (**प्रातिपदिकार्थ-द्योतक**)—(In. 7). [But when **इति** is (**शब्द-स्वरूप-द्योतक**) **i.e. refers to a mere word without having any reference to its meaning,** then the word with which it is used, gets **no विभक्ति।** Cf. "राम रामेति कूजन्तं मधुराक्षरम्"—*Rām.* "अतएव गवित्याह"—*Bhartṛhari.* And when it is (**पदार्थ-द्योतक**) **i.e. refers to the meaning of a word with its कारक,** then the word with which it is used takes its *proper* **विभक्ति।** Cf. "निषादो मार्गवं सूते दासं नौ-कर्मजीविनम्। (**कैवर्तम् इति यं**)

प्राहू रार्यावर्त-निवासिनः"—*MS. X.* 34. "कीर्तयिष्यन्ति मनुजाः (शताक्षीम् इति मां) ततः"–*Caṇḍi*]. **6. तत् कुलिशम्**–That **famous (Com.) thunderbolt** by which in days of yore, your son extirpated the hosts of demon. कुलि=हस्त ('कुलिर्हस्तः'—*Trikāṇḍa-śeṣa*). Hence 'कुलौ' (अर्थात् हस्ते) शेते इति डः by 'अन्येभ्योऽपि दृश्यते', वा:—३।२।१०१)। That which rests in the hands of Indra, or 'कुलिनः' पर्वतान् श्यति कुलि+शो (तनूकरणे)+कः ['आतोऽनुपसर्गे'—३।२।३]—*BhD.*

Text:—अदितिः—सम्भावणीआणुभावा से आकिदी ['सम्भावनीयाऽनुभावा अस्य आकृतिः]। Aditi—His is a form of impressive[1] majesty[1]

मातलिः—आयुष्मन्! एतौ पुत्र-प्रीति-पिशुनेन[2] च चक्षुषा दिवौकसां पितरा वायुष्मन्त मवलोकयतः। तावुपसर्प।

Mātali—My Long-lived (*king*) ! here the parents of the dwellers of heaven are looking at you with eyes betokening[2] an affection as for a son[2]. Approach them.

राजा—मातले!

शार्दूल-विक्रीडित (मसजसततग)

प्राहुर्द्वादशधा स्थितस्य मुनयो यत्तेजसः कारणं[3]
भर्तारं भुवन-त्रयस्य सुषुवे[4] यद्यज्ञ-भागेश्वरम्।
यस्मिन्नात्म-भवः[5] परोऽपि पुरुषश्चक्रे भवाया[6]ऽऽस्पदं[7]
द्वन्द्वं दक्ष-मरीचि-सम्भवमिदं तत् स्रष्टुरेकान्तरम्[8] ॥२७॥

King—Mātali ! is this that pair, born of Dakṣa and Marīci, separated only by one (*progenitor*) from the creator, which the [2]sages declare (*to be*) the source[3] of energy subsisting in twelve forms, which begot[1] the sustainer of the three worlds and the lord of the sharers of sacrifices, (*and*) which even the selfborn[5] supreme (*Viṣṇu*) resorted to as the place[7] of (*his*) birth[6]. (27).

V. L.—'अनुभावा'—R. V. M. S. 'प्रभवा'—B. 'तत्'—B. S. 'तावत्'—R. V. M. 'आत्मभवः'—R. V. 'आत्मभुवः'—B. S. K. C. M.

अदितिरिति। 'संभावनीयः' अनुमातुं योग्यः 'अनुगतः भावः'–(३।३।२४)–इति 'अनुभावः' प्रभावः सामर्थ्यमिति यावत् [**'अनुभावः प्रभावे स्यान्निश्चये** भावसूचके' इति विश्वः] यस्याः तथोक्ता। **मातलिरिति।** 'एतौ' पुरतः दृश्यमानौ 'दिवौकसां' देवानाम्। 'पितरौ'—(१।२।७०)—अदिति-कश्यपौ इत्यर्थः। 'पुत्रे' इन्द्रस्य सखित्वेन पुत्रस्वरूपे त्वयि या 'प्रीतिः' तस्या यत् 'पिशुनं' सूचकं ['पिशुनौ खल-सूचकौ' इत्यमरः] तेन 'चक्षुषा' दृष्टया [**आत्यैकत्वम्**]। **प्राहुरिति।** 'मुनयः' व्यासाद्याः महर्षयः [अनेन एषां विप्रलम्भ-करणा-पाटवादि-

—राहित्यं ध्वन्यते। तेन च तदुक्ते वेदानुमानेन प्रामाण्यम्) 'यत् द्वन्द्वं 'द्वादशधा' ["संख्याया विधाऽर्थे धा"—(५।३।४२)—इति क्रियायाः प्रकारार्थे धा-प्रत्ययः] मासि मासि आदित्य-भेदात् द्वादशभिः प्रकारैः 'स्थितस्य' वर्तमानस्य 'तेजसः' तेजोमयस्य सूर्यस्य 'कारणम्' उत्पत्ति-मूलम् 'प्राहुः' वदन्ति। द्वादशादित्या यथा भारते चोक्ताः। **'धाता मित्रोऽर्यमा शक्रो वरुण स्त्वंशुरेव च। भगो विवस्वान् पूषा च सविता दशमस्तथा॥ एकादशस्तथा त्वष्टा द्वादशो विष्णु-**रुच्यते। **जघन्यस्तु** सर्वेषामादित्यानां गुणाधिकः" ॥] **अथवा**, 'द्वादशधा स्थितस्य'. द्वादश-कलात्मकस्य इति व्याख्येयम् [तथोद्धृतं राघवपादैः—"तपिनी तापिनी धूम्रा मरीचिर्ज्वलिनी रुचिः। सुषुम्ना भोगदा विश्वा बोधिनी धारिणी क्षमा॥ कभाद्या (?) वसुधाः सौर्या ठण्डान्ता (?) द्वादशेरिताः।] यत् द्वन्द्वं 'यज्ञे भागो" येषां ते 'यज्ञभागाः' देवाः, तेषाम् 'ईश्वरम्' अधीशम् इन्द्रमित्यर्थः। **अथच** भुवन-त्रयस्य' भूर्भुवः-स्वः-संज्ञकस्य लोकत्रयस्य 'भर्तारं' पालकं "सुषुवे' उत्पादयामास ["यज्ञ-भागेश्वरं, न सुरेश्वरम्, न भुवनस्य भर्तारम्। **अपि तु त्रयस्य,** इति तस्य उत्कर्षं वदता पद-समुदायेन तदुत्पादकत्वात् तस्य कोऽपि अतिशयः ध्वनित" इति राघवचरणाः]। 'यस्मिन्' द्वन्द्वे 'आत्मनः भवः' ['जन्महरौ भवौ' इत्यमरः] जन्म यस्य तथोक्तः। **स्वयंजात** इत्यर्थः। 'परः' श्रेष्ठः [**'परः श्रेष्ठाऽरिदूरा**-न्योत्तरे क्लीवं तु केवले' इति मेदिनी] 'पुरुषः' पुरुषोत्तमः विष्णु-रित्यर्थः। 'भवाय' वामन-रूपेण उत्पत्तये 'आस्पदं'-(६।१।१४६)-पदं स्थान-मिति यावत् [**'आस्पदं पद**-कृत्ययोः' इति शब्दाब्धिः] 'चक्रे' [अनेन **आत्मनेपद-प्रयोगेण** तत्रोत्पत्तिः परम-पुरुषस्य अपेक्षिता इति व्यज्यते। तस्योत्पत्तिरुक्ता यथा विष्णुपुराणे—**'मन्वन्तरे च सम्प्राप्ते** तथा **वैवस्वते** द्विज। वामनः कश्य-पात् विष्णुः अदित्यां संबभूव ह' ॥] 'दक्षः' ब्रह्मणः वृद्धाङ्गुलीतः जातः प्रजापतिः, 'मरीचिः' तस्यैव ज्येष्ठः मानसपुत्रः, तौ 'सम्भवः' उत्पत्ति-स्थानम् [**अप् अत्र अपादाने**] यस्य तत् 'दक्ष-मरीचि-सम्भवम्' अतएव 'स्रष्टुः' ब्रह्मणः 'एकम् एक-पुरुषमात्रम् 'अनन्तरं' व्यवधानं यस्य तादृशं। [तथा चोक्तं भारते—'अव्यक्त-प्रभवो ब्रह्मा शाश्वतो नित्यश्चाव्ययः। तस्मान्मरीचिः संजज्ञे दक्षश्चैव प्रजापतिः॥ अङ्गुष्ठाद् दक्ष मसृजत् चक्षुर्म्याञ्च मरीचिनम्। मरीचेः कश्यपः पुत्रः दक्षस्य दुहितुरिति॥] 'तत् इदं द्वन्द्वं' मिथुनं किमिति काकुवशेन प्रश्नो व्यज्यते। ['अङ्ग-भूत-महापुरुष-चरित-वर्णनम् **उदात्तम्'** इति लक्षणात् पादत्रये **मालोदात्तालङ्कारः।** 'आत्मभवः भवाय' इत्यादिना **विरोधाभासः।** मारीचाऽदित्योः निरतिशय-प्राधान्य-प्रतिपादन-कार्यं प्रति अनेक-कारणो-पन्यासात् समुच्चयालङ्कारश्च। **भवो** भवेत द्वन्द्वेति **छेक-वृत्त्यनुप्रासौ।** कारणं सुषुवे, भवाय आस्पदं चक्रे इति पर्यायै रेकस्यैवार्थस्य ग्रहणात् **अर्थावृत्तिरलङ्कारः। शार्दूलविक्रीडितं** छन्दः] ॥२७॥

259n.—1 सम्भावनीय&c.—Duṣyanta's form was such as his prowess can be well inferred from it. **2. द्वादशधा** &c.—With the **change of months,** the sun also **changes his form,** hence this phrase refers to the twelve आदित्यs—The representatives of the Sun in the twelve months of the year. They were born of *Kāśyapa* and *Aditi*. *Vide Mitākṣarā* (दिव्यविधिप्रकरण), *VP*. 1. *XV*. 129-131; [Also "**अरुणो** माघ-मासे तु सूर्यः **पूषा** तु फाल्गुने" ।। "चैत्रे मासि भवेदंशु **र्धाता** वैशाख-तापनः । ज्यैष्ठे मासि **भवेदिन्द्र**, आषाढ़े तपते **रविः** । **विवस्वान्** श्रावणे मासि, प्रौष्ठपद्यां **रविः** स्मृतः । पर्जन्यश्चाश्विने **त्वष्टा** कार्त्तिके मासि **भास्करः** ।। [But "**गभस्ति** श्रावणे मासे **यमो** भाद्रपदे तथा । इषे **हिरण्यरेताश्च** कार्त्तिके च दिवाकरः"–*VP*] ।।" मार्गशीर्षे **भवेन्मित्रः**, पौषे **विष्णुः** सनातनः । इत्येते द्वादशादित्याः काश्यपेयाः प्रकीर्तिताः"–*KP*. *Ch*. 42, 19-22]. According to some, these refer to the **12 digit of the sun** (*Com*.). **3. यज्ञ** &c.—यज्ञभागः = God; and Indra was the "lord of the Gods" (*Com*.). Or 'यज्ञेषु' अर्प्यमाणाः ये 'भागाः' तेषाम् 'ईश्वरः' प्राधान्येन ग्रहणात्— This will also **refer to Indra** as it is he who gets the **principal share** of the sacrificial food. For similar idea Cf. "मखांश-भाजां प्रथमो मनीषिभीः त्वमेव देवेन्द्र ! सदा निगद्यसे"—*Ra*. *III*. 44. **4. आत्म-भवः**—Refers to Viṣṇu. Though *self-born* (आत्म-भवः) still he chose this pair as the fit place for his **birth** (भव). Hence विरोधाऽऽभासालङ्कारः–(*R*). This is a very **common idea** in Sanskrit. Cf. "गुणैर्वरं भुवनहित-च्छलेन यं (सनातनः) पितरमुपागमत् स्वयम्"—*BK*. *I*. *I*. '**आत्मभुवः परः**' (M)—does not seem to give a very good sense. It only implies the superiority of the great-grand-son to the great-grand-father (*i. e.* ब्रह्मा) । **5. परः पुरुषः**—Read—'महतः परमव्यक्तम् अव्यक्तात् पुरुषः परः । पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः'–*Kātha*. 11; Kāli. here represents **Viṣṇu as the Supreme** पुरुष, while in *Vik*. **superiority** has been given to **Śiva.** This will also testify to the **absence of sectarianism** in him. (*Vide Introduction—Religious View*). **द्वन्द्वम्**—(74*n*. 7). **6. आस्पदं चक्रे**—Refers to the *Dwarf* (वामन) *Incarnation* of Viṣṇu *Vide Com. and ŚPB*. *XIV*. 70. आपद्यते अस्मिन् इति आ+पद्+घ अधिकरणे = आस्पदम् —Abode, '**आस्पदं प्रतिष्ठायाम्**'-(६।१।१४६)-**इति साधुः**–*BhD*. **7. एकान्तरम्**

—The couple was separated from the creator by *one* step only. ब्रह्मा>मरीचि>कश्यप and ब्रह्मा>दक्ष>अदिति (*Com.*). Now for marriage between "fast cousins" read—235n. 5 (end).

Text :—मातलिः—अथकिम् ।—Mātali—Yes.

राजा (प्रणिपत्य)—उभाभ्यामपि वां वासव-नियोज्यो[1] दुष्यन्तः प्रणमति ।

King (*Prostrating himself*)—To both of you, Indra's servant[1] Duṣyanta bows down.

मारीचः—वत्स ! चिरं जीवन् पृथिवीं पालय ।

Mārica—My son, may you live long to protect the earth.

अदितिः—वच्छ ! अप्पडि-रहो होहि [वत्स ! अप्रतिरथो[2] भव] ।

Aditi—My child, may (*your*) car be unchecked[2].

(*Śakuntalā prostrates herself with her child at their feet*).

मारीचः—वत्से ! "आखण्डल[3]-समो भर्ता जयन्त-प्रतिमः[4] सुतः ।

श्लोक आशीरन्या न ते योज्या पौलमी-मङ्गला[5] भव" ।।२८।।

Mārica—My child ! (*your*) husband is Indra's peer (*and*) *your*) son is like Jayanta. Therefore no other blessing apropos of you should be uttered (*by us*). May you be as lucky as Paulamī[5] (28).

अदितिः—जादे ! भत्तुणो बहुमवा होहि । अअञ्च दीहाऊ वच्छओ उहअ-कुल-णन्दणो होदु । उवविसह ।

(जाते ! भर्तुर्बहुमता भव । अयञ्च दीर्घायुर्वत्सक उभय-कुल-नन्दनो भवतु । उपविशतम् । (सर्वे प्रजापति मभित उपविशन्ति) ।

Aditi—My child ! may (*you*) be (*your*) husband's beloved. And may this (*your*) little son be long-lived and a delight to both the families. Sit down (*here*) [*All sit down around the Prajāpati.*].

V. L.—'प्रणिपत्य'—B. 'उपगम्य'—Others '०नियोज्यः'—B. P. HS. '०अनुयोज्यः'—R. V. M. S. 'जीवन्'—B. 'जीव'—R. M. ; Patankar omits both. 'शकुन्तला पुत्रसहिता' &c.—B.—which is substituted by the following speech of Śak. in other editions :—'दारक-सहिता वां पादवन्दनं करोमि' । "पौलमी-मङ्गला'—B. P. HS: 'पौलमीसदृशी —R. V. M. & S; R. M. V read 'अभिमता' for 'बहुमता' । R has 'योग्या' for 'योज्या' ।

राजेति । 'उभाभ्यांम् वाम्' उभौ युवाम् अनुकूलयितुमित्यर्थः [कर्मणि ४र्थी-(२।३।१४) "उभाभ्यां प्रति प्रणाम-क्रियाया अभिप्रेतत्वात् चतुर्थी । 'क्रियया

यमभिप्रैति सोऽपि संप्रदानम्" इति विद्याम्बुधिपादाः]। **दैत्यानां 'वासं वाति' बध्नाति यः सः 'वासवः'** [वा गति-बन्धनयोः। "आतोऽनुपसर्गे कः"—२।२।३] तस्य 'नियोज्यः' दासः [युजेः ण्यता (३।१।१२४), **"प्रयोज्य-नियोज्यौ शक्यार्थे"** -(७।३।६८)-इति साधुः]। **आखण्डलेति**। तव 'भर्ता' स्वामी दुष्यन्तः 'आखण्ड--लस्य' इन्द्रस्य 'समः' तुल्यः। 'सुतः' सर्वदमनः 'जयन्तेन' सम इति **'जयन्त-प्रतिमः'** [**अ-स्वपद-विग्रह-नित्यसमासः**]। अस्मादेव कारणात् 'ते' तव सम्बन्धे 'अन्या आशीः' आशीर्वादः 'न योज्या' अस्माभिः प्रवर्तनीया। केवलं 'पौलम्याः' इन्द्रपत्न्याः शच्या 'मङ्गलमिव' 'मङ्गलम्' अवैधव्यम् भर्तृ-बहुमतत्वादिरूपं यस्याः तादृशी 'भव' [तृतीय-चरणार्थं प्रति पूर्वार्धस्य हेतुत्वेन नियुक्तत्वात् **वाक्यार्थ-हेतुकं काव्यलिङ्गम्। उपमानुप्रासौ**। अत्र **'आशंसा'** नाम नाट्यालङ्कारश्चोक्तः। 'आशंसनं **स्यादाशंसा** इति दर्पण-लक्षणात्। **श्लोको** वृत्तम् ॥२८॥ **अवि-तिरिति**। उभे कुले इति **'उभयकुले' [उभ-शब्दात्** वृत्ति-विषये नित्य **अयच्** स्यात् स्वार्थे। विस्तरस्तु तत्त्वबोधिन्यां द्रष्टव्यः-२१७] मातृकुलं पितृकुलञ्च तयोः 'नन्दनः' (२७९६) अर्थात् "आनन्द-वर्धनः" "भवतु"

260n.—1. वासव &c.—**नियोज्य**=Servant. Our modest king elsewhere also calls himself a servant of Indra. Cf. 'सिध्यन्ति कर्मसु महत्स्वपि **यन्नियोज्याः**'—*VI*;. 4. **2. शकुन्तला पुत्र-सहिता** &c.—This stage-direction is **certainly better** than the speech of Śak. ('दारकसहिता वां पादवन्दनं करोमि'—R.), because **it is faulty not being followed by a stage-direction—(इति पादवन्दनं करोति)** —(*Vide*. 133*n*. 2). Besides this reading is not in consonance with her *former speech*, viz. "जिह्रेमि आर्यपुत्रेण सह गुरु-समीपं गन्तुम्"। She was **bashful** even **to go up** to the sage accompanied by her husband,—**what to speak of her any utterance in his presence.** Note also that after she has said "जिह्रेमि &c.", **she broached not a single word up to the end of the book. 3. जयन्त-प्रतिमः**—(*Com.*)—[66*n*, 6]. **4. आशि(स्)**—Vide (134n. 8). **पौलमी मङ्गला** &c.—शची is so called as she is the daug--hter of पुलमन्—a **demon** [and not a **मुनि** as *BhD* explains] killed by Indra himself. [Read **"कृत्वा संबन्धकं चापि विश्वसेत् शत्रुणा नहि। पुलोमानं जघानासौ जामाता सन् शतक्रतुः"**--*HV. XX*. 133. Also "एतस्मि-न्नन्तरे वीरः पुलोमा * * **दैत्येन्द्रः**" &c.—*Rām. VII. Ch.* 28, 19-20]. **'पौलमी-मङ्गला'** is indicative of husband's **'बहुमान'** & eternal free-

dom from 'वैधव्य' (*Com.*). Cf. 'चिरमङ्गला' भव—*PN*. VIII. सर्वे प्रजापति &c.—Cf.— "सर्वे नारदमनु उपविशन्ति"—*Vik. V.* (*before Śl.* 20.).

Text:—मारीचः—(एकैकं निर्दिशन्)—

श्लोक **दिष्टया[1] शकुन्तला साध्वी सदपत्यमिदं भवान् ।**
श्रद्धा वित्तं विधिश्चेति त्रितयं तत् समागतम् ।।२९।।

Mārīca (*Pointing to each*)—Fortunately[1] virtuous Sakuntalā, this noble boy, and Your Honour, indeed the famous triad—the Faith, Fortune and Formal performance, are (*here*) united. (29)

राजा—भगवन् ! प्रागभिप्रेत-सिद्धिः[2], पश्चाद्दर्शनम्, इत्यपूर्वः खलु वोऽनुग्रहः । कुतः—

वंशस्तनित **उदेति पूर्वं कुसुमं, ततः फलं, घनोदयः[3] प्राक् तदनन्तरं पयः ।**
(जतजर) **[4]निमित्त-नैमित्तकयो रयं क्रम[5] स्तव प्रसादस्य[6] पुरस्तु सम्पदः ।।३०।।**

King—Almighty Sir ! first (*came*) the success of (*my*) desires, (and) afterwards (*your*) sight. Thus thy favour (*is*) indeed unprecedented. For—The blossoms come first, then the fruit-tage; first the rising[3] up of clouds, afterwards the shower. This (*is*) the (*true*) sequence[5] of the cause[4] and effect[4]. But (*my*) fortunes have had (*their courses*) in advance of your favour[6] (30).

मातलिः—आयुष्मन् । एवं विधातारः प्रसीदन्ति । Mātali—O Long-lived One ! thus do the creators show (*their*) grace.

V. L.—'तत्'—R. V. B. M. 'वः'—S. 'इत्यपूर्वः'—B. 'अतोऽपूर्वः—R. V. M. 'अपूर्वः'—S. For 'कुतः'——S reads 'पश्यतु भवान्' । 'आयुष्मन्'—B. D alone reads "विधिः" for "क्रमः" ।

दिष्टयेति । 'दिष्टयेति' इत्यानन्दे । 'साध्वी' पतिव्रता 'शकुन्तला इदं सत्' उत्कृष्टम् 'अपत्यं' सर्वदमनरूपं 'भवान् [इत्यर्थान्तरसक्रमितवाच्यम् । तेन तत्तद्गुण-गरिष्ठो भवान्, इत्यनेन **विशेषण-प्रक्रम-भङ्गः** परिहृतः] 'श्रद्धा' शास्त्रेषु दृढ़-विश्वासः ['**प्रत्ययो धर्माकार्येषु तथा श्रद्धा इत्युदाहृता**' इति प्रायश्चित्त-तत्त्वे देवलः] 'वित्तं' यागाद्यनुष्ठान-साधकं धनं 'विधिः' शास्त्रोक्त-कर्मानुष्ठानं 'च इति' सुप्रसिद्धं 'त्रितयं' त्र्यवयवं वस्तु [तयप्—(५।२।४२), पक्षे अयच् (५।२।४३—त्रयम्] । 'समागतम्' सम्मिलितम् [श्रद्धादिभिः औपम्यस्य कल्पितत्वात् अत्र **निदर्शनालङ्कारः** ।। "शकुन्तलां प्रति श्रद्धायाः, अपत्यं प्रति वित्तस्य, दुष्यन्तं प्रति विधेः उद्देशक्रमेणानुद्देशात् **यथासंख्यमलङ्कारश्च** । अनयोः गुण-प्रधान-भावेन अङ्गाङ्गि-भावात् सङ्करः । वामनादिभिः आलङ्कारिकैः 'अस्ति', भवति', 'विद्यते' इत्यादि क्रियाणाम् अनुपादानेऽपि सामर्थ्यादवगत्या न्यून-पदत्व-दोषाऽनङ्गी-

कारात् न न्यून-पदत्व-दोष" इति सिद्धान्तवागीशपादाः ।। श्लोको वृत्तम्] ।।२९।। राजेति । अत्राश्रमे आगमनात् 'प्राक्' पूर्वम् 'अभिप्रेतस्य' अभिलषित-फलस्य 'सिद्धिः' लाभः शकुन्तला-लाभरूप-मङ्गलम् इत्यर्थः ["अभिप्रेतार्थसिद्धि र्मङ्गलम्" इति तिथि-तत्त्वम्) 'पश्चात्' तदनन्तर दर्शनं तत्साधकः भवादृशानां साक्षात्कारः 'अपूर्वः' अभिनवः कारणस्य पश्चाद्भावित्वात् । उदेतीति । 'पूर्वं' फलोत्पत्तेः प्राक् कुसुमं' फलस्य निमित्त-भूतं प्रसूनम् 'उदेति' उत्पद्यते 'ततः' तदन्तरम् एव 'फलं' तत्कार्य-भूतं चूतादि जायते, न तु कुसुमोदयात् प्राक् । तथा 'घनानां' पयोनिमित्त-भूतानां मेघानां [' घनः मेघः, घनः सान्द्रः, कांस्य-तालध्वनि र्घनः । घनः स्वर्गः, घनो नित्यः, घनः स्यात् लौह-मुद्गरः' ।। इति गदसिंहः । हन्तेः "मूर्तौ घनः"-(३।३।७७)-इति अप् घनादेशश्च, अन्यथा "वधः"] 'उदयः', उद्गमः अस्मादेव कारणात् 'निमित्तस्य' कारणस्य 'नैमित्तिकस्य' कार्यस्य च पूर्वोक्त-रूपः 'अयं क्रमः' रीतिः अर्थात् आदौ हेतुना उद्भवितव्यम् पश्चात् तु हेतुमता । न कुत्रापि एतस्य विपर्यय इति भावः । 'तव प्रसादस्य' सम्पद्-कारणी-भूतस्य अनु--ग्रहस्य ['प्रसादोऽनुग्रहे काव्य-प्राण-स्वास्थ्य-प्रसत्तिषु' इति मेदिनी] 'तु' इति भेदे । 'पुरः' पूर्वं 'सम्पदः' तत्कार्यभूताः स्त्री-पुत्रादि-लाभ-रूपा-श्रियः । अतएव अलौकिक एव ते महिमा । [पूर्वार्धे आदिक्रियादीपकम् । तृतीय-चरणार्थं प्रति पूर्वार्धगत-वाक्यानां हेतुत्वात् वाक्यार्थ-हेतुकं काव्यलिङ्गम् । प्राकरणिकत्वेन प्राकरणिकार्थपातात् मालाऽर्थापत्तिः । 'तु' इत्यनेन व्यतिरेकः । तृतीय--चरणे अर्थान्तरन्यासः (न्यायञ्चाननपादानां मते दृष्टान्तालङ्कारः) । चतुर्थ-चरणे कार्य-कारण-विपर्ययात् अतिशयोक्तिः । 'सम्पदः इत्यत्र शकुन्तला-पुत्र-लाभ इति प्रस्तुतस्य विशेषस्य गम्यत्वे अप्रस्तुप्रशंसा च । छेक-वृत्त्य-नुप्रासौ । अत्र 'मधुरं" नाम भूषणञ्चोपक्षिप्तम्—'यत् प्रत्ययेन मनसः पूज्यपूजयितुर्वचः । स्मृतिप्रकाशनं यत्तत् स्मृतं "मधुर-भाषितम्" ।।—इति तल्लक्षणात् । दर्पण--कारमते 'प्रियोक्ति'रस्य नाम । श्लोकश्चायमपि तेनैव षष्ठ-परिच्छेदे उदाहृतः । 'वंशस्थविल' इत्यपरनाम 'वंशस्तनितं वृत्तम्) ।।३०।।

261n.—1. एकैकं—(467*n.* 2). The *abstact* metaphor of 'श्रद्धा' and 'विधि' has also been mentioned in Ra. II. 16. "तां देवता-पित्र-तिथि-क्रियार्थमन्वग्ययौ मध्यम-लोकपालः । बभौ च सा तेन सतां मतेन, श्रद्धेव साक्षात् विधिनोपपन्ना"—Kāli. must have lived in those days when **sacrifices were performed constantly** by the पूर्वमीमांसकs, and the Vedic कर्मकाण्ड (पूर्वमीमांसा) was highly esteemed. Vide (185n. 5). **2. त्रितयं समागतम्**—Note the **'Prolepsis'**—(64n. 2 middle.) and **anticipatory use of**

'तयप्' ["संख्याया: अवयवे तयप्"—(1843). "द्वि-त्रिभ्यां तयस्य अयज् वा"—(1844)]. It has been used before the three components 'श्रद्धा', 'वित्त' and 'विधि' by their appearance have formed the triad. In this connexion read the discussions made in *T* for the justification of "मुनि-त्रयम्" under (1844). Cf. the idea with "अत्र रामश्च सीता च लक्ष्मणश्च महायशः । सत्यं शीलञ्च भक्तिश्च येषु विग्रहवत् स्थिता"—PN. *IV*. 4. **3. भगवन्**—(118*n*. 23; 142*n*. 3). **4. अभिप्रेतार्थ-सिद्धिः**—Refers to the king's longing i.e. his auspicious reunion with his wife and child. (*Com*.). Read—'शकुन्तला-प्रापकं भवद्दर्शनं भविष्यति इत्येवं ममाभिप्रेतम् आसीत् त्वत् प्रभावात् दर्शनपूर्वं निर्व्यूढम्"—*S* **5.** अपूर्वः—Because of the **change of order** (क्रम) of the cause (निमित्त) and effect (कार्य). Cf. 'तथाच नैमित्तिकानन्तरं निमित्तोत्पत्ति-इति अनुग्रहस्य अपूर्वत्वमिति भावः–*Ibid*. Note the **double sense** (*i.e.* '*not occurring before*' & '*strange*'). For the figure. **अतिशयोक्ति** (i.e. *inversion* of *Cause & Effect*) read:—'हृदय—मधिष्ठितमादौ मालत्याः कुसुम-चाप-वाणेन । चरमं रमणोवल्लभ लोचन-विषयं त्वया भजता" ॥ —KM. 97. **6. उदेति**'—'उत्+ई' has been used **figuratively** to mean "to come", "to be produced". Cf. 'आफलोदय-कर्मणाम्'——*Ra*. 1. 5. "वीजाङ्कुरः प्रागुदयात् इवाम्भः"—*Ku III*. 18; "अपमेघोदयं वर्षमदृष्ट-कुसुमं फलं । तर्कितोपपन्नं वो दर्शनं प्रतिभाति मे" ।।—Ku. VI. 54. (Also read 'रात्रौ **उदयते** चन्द्रो दिवो**दयति** भास्करः । **उदेति** यः सदोर्व्यां च **नोदीयन्ते** च सर्वशः" ।।—*KR*. 23.). **7. पुरः**—(77*n*. 4). Like many other poets, Kāli. has also used the word '**पुरतः** [*Cf*.. 'मे चरणौ **पुरतः** प्रवर्तेते'—(137., 1); 'इयं च तेऽन्या **पुरतो** विडम्बना'—*Ku*. *V*. 70; 'पिङ्गाक्षं **पुरतः** स्थितम्'—Rām. V. 50] "स्यात पुरः **पुरतो**ऽग्रतः"—AK. which according to host of grammarians is wrong. **Paṇḍita-Rāja Jagannātha,** author of **मनोरमा-कुच-मर्दनम्**" and tutor of **Dārā Seko,** son of Shaha-Jahan, is **furious against** this word in his **"रसगङ्गाधर"** । **JS, however, gives a probable derivation.** Read 'कथं तर्हि "पश्यामि तामित इतः **पुरतश्च** पश्चात्" इति भव-भूतिः—(*MM*. 1. 40), "स्यात् पुरः **पुरतोऽग्रतः** इत्यमरः, "पुरतः प्रथमे चाग्रे" इति विश्वश्च । 'समानकालीनं', 'पूर्वकालीनम्' इत्यादिवत् **प्रामादिकमेव** इति बहवः । केचित्तु "दक्षिणोत्तराभ्यां तसुज्विधिनैव इष्टसिद्धौ "अतसुच्"

(५।३।३४) इत्यकारोच्चारण-मन्यतोऽपि विधानार्थम् ।। तेन पुरत इति सिध्यति ।। 'पुर अग्र-गमने क्विपि पुर् 'र्वोः' इति दीर्घस्तु न भवति, भत्वात्'—*T.* 1976. "पुरति 'पुर अग्रगमने' बाहुलकात् अतसूक्"—BhD.

Texts:—राजा—भगवन् ! इमामाज्ञाकरीं वो गान्धर्वेण विवाह-विधिना उपयम्य[1] कस्यचित् कालस्य बन्धुभिरानीतां स्मृति-शैथिल्यात् प्रत्यादिशन्[2] [3]अपराद्धोऽस्मि तत्रभवतो युष्मत्-गोत्रस्य[4] कण्वस्य । पश्चादेनामङ्गुलीयक-दर्शनाऽऽरूढ़-स्मृतिः ऊढ़पूर्वामवगतोऽहम् । तच्चित्रमिव[5] मे प्रतिभाति ।

उपजाति [जतजगग ततजगग]

यथा गजो नेति समक्ष-रूपे,[6] तस्मिन्नपक्रामति[7] संशयः स्यात् ।
पदानि दृष्ट्वा तु भवेत् प्रतीति[8] स्तथाविधो मे मनसो विकारः ।।३१।।

King—Your Reverence this servant-maid of yours, I wedded according to the Gāndharva-form of marriage and when after sometime (*her*) relatives brought (*her to me*) I repudiated (*her*) *per lapsus memoriae*, (*and thus*) offended His Holiness, Your cognate[4] Kaṇva. Afterwards with (*my*) memory regained by the sight of (*this*) ring, I came to know her as having previously married. All that appears, as it were strange to me.

The change of my mind is of similar nature as to say that this is not an elephant, when it is present[7] with (*its*) form before the eye,[7] and to have a doubt (*as to whether it is an elephant or not*) when it is passing[8] (*out of sight*)[8], and (*then*) to have (*firm*) conviction[9] (*that it was an elephant*) after seeing (*its*) foot-prints" (31)

V. L.—'दर्शनारूढ़-स्मृतिः'—B. H. S. P. '०दर्शनात्'—R. V. M. S. '०गोत्रस्य'—B. P. HS. '०सगोत्रस्य'—R. V. M. S. 'गजः'—R. V. M. S. 'गजे'—B. 'नेति'—R. V. M. S. 'साधु'—B. B has 'कस्मिन्—for 'तस्मिन्' । 'अपक्रामति'—R. V. 'अतिक्रामति'—M. S. 'अपिक्रामति'—B. For 'तु' B has—'अथ' ।

राजेति । "आज्ञाकरीं" सेवकाम् (इत्यनेन विनयोक्तिः । "कृञो हेतु-ताच्छील्याऽनुलोम्येषु'—(३।२।२०, २९१४)-इति टः । टित्वात् ङीप् (४।१-१५) । **'उपयम्य'** विवाह्य । 'कस्यचित् कालस्य' अनन्तरम् **इत्यध्याहारेण** तद्योगे षष्ठी, यद्वा 'षष्ठी अतसर्थ-प्रत्ययेन—(६०९)—इत्यनेन 'परस्तात्' इति पदस्य **गम्यत्वे** षष्ठी, (**"गम्यमानापि क्रिया कारक-विभक्तीनां निमित्तम्" इत्युक्तेः**) स्मृति-शैथिल्यात्' स्मृति-भ्रंशात् हेतोः न तु स्वयम् इति द्योत्यते अनेन । 'प्रत्या-दिशन्' अस्वीकुर्वन् । 'त्वमेव **गोत्रम्' आदिपुरुषः** यस्य तस्य काश्यपस्य 'कण्वस्य' **'सम्बन्ध-मात्र-विवक्षया** षष्ठी । **"वंश-परम्परा-प्रसिद्धमादिपुरुष-ब्राह्मणरूपं**

गोत्रम्" इति उद्वाह-तत्त्वम्। 'ऊढ़-पूर्वां' पूर्व-परिणीतां शकुन्तलां (पूर्व-शब्दस्य पर-निपातः पाक्षिकः-१९९९)। 'चित्रं' विस्मयकरम्। अत्र **'उपगूहन'**-नामकमङ्गमुपक्षिप्तम्—"तद्भवेत् **उपगूहनम्**। यत् स्यात् अद्भुत-सम्प्राप्तिः" इति दर्पण-लक्षणात्। **यथेति**। 'यथा' येन प्रकारेण ('प्रकार-वचने थाल्'-५।३।२३) 'समक्षं' प्रत्यक्षीभूतं 'रूपम्' आकृतिः यस्य तादृशे कस्मिन् गजे सति, अयं 'गजः न इति' निश्चयात्मकं मिथ्याज्ञानं भवति। अनन्तरं 'तस्मिन्' गजे 'अपक्रामति' चक्षुर्विषयमतिगच्छति सति 'संशयः' गच्छन्नयं जीवः गज इवालक्ष्यते' किमयं गजो नवेति इत्याकारः सन्देहः स्यात्। पश्चात् 'पदानि' तदपक्रमणेन उद्भूतान् विचित्रान् पादन्यासान् (**'पादन्यासे** पादमुद्रा सुप्तिङन्ते **पदं** भवेत्' इति क्षीर-स्वामी) 'दृष्ट्वा तु' इतः गज एव गत इति 'प्रतीतिः' निश्चयात्मकं ज्ञानं 'भवेत्'। 'मे मनसः विकारः' **स्वरूपाऽन्यथा-भावः** (**'सतस्वतोऽन्यथा प्रथा विकार इत्युदाहृतः'** इति वेदान्ते) आसीत् इति शेषः। **साक्षादुपस्थितायां** शकुन्तलायां नेयं परिणीत-पूर्वा इति प्रतीतिः। **पश्चात् तदपक्रमण-वेलायां**, "बलवत्तु दूयमानं प्रत्याययतीव मां हृदयम्", (५।३१) किमियं मया परिणीता इत्याकारः सन्देहः जातः। ततः **अङ्गुरीयात्मक-चिह्न-दर्शनेन** 'ऊढ़पूर्वेव सा' इति प्रतीतिर्जाता, न तु **तस्याः साक्षात्-दर्शनेन** इति विचित्रो मे मनसः विकार इति सरलार्थः (**निदर्शनानुप्रासश्च। उपजातिर्वृत्तम्**) ॥३१॥

262n.—1. युष्मत्-गोत्रस्य—'गोत्र'—means **'the first person of a particular class'** (*Com.*), hence 'त्वमेव' (कश्यप इत्यर्थः) गोत्रम् (आदिपुरुष इत्यर्थः) यस्य–Of whose race you are the first progenitor. **'युष्मत्-सगोत्रस्य** (R)—Has been objected to by N, for 'सगोत्र' means 'समानं गोत्रं यस्य सः'—[समान=स, 6. 3. 85], hence कश्यप **being himself a progenitor** cannot be said **to be possessed of a** 'गोत्र'। [For षष्ठी 257*n.* 5]. Kaṇva is called 'काश्यप' in Mahā. (I. 67) but in the genealogies we **do not find** his name among the descendants of Kaśyapa. Same is the case in VaP. **तच्चित्रमिव** &c.—Because his power of recognizing Śak. failed when she had **actually presented herself,** but was roused at the finding of the ring given to her. **3. यथा गजो** &c.—**R construes differently** thus:—'समक्षरूपे' (गजे) 'गजः न' वा 'इति संशयः स्यात्'। 'तस्मिन् अपक्रामति मनि पदानि भूमौ दृष्ट्वा यथा, (गज एवायम् इति) प्रतीतिः भवेत्'। 'तथाविधः—&c. The meaning is obvious. (**अति**+"**क्रम्**") *generally* in Kāli. means '*to*

disregard', '*neglect*'. [Cf. 'प्रथितयशसां प्रबन्धान् **अतिक्रम्य**'—*Māla*. 1. 'किंवा परिजन-मतिक्रम्य भवान् संदिष्टः'—*Ibid. IV*.], sometimes '*to cross beyond*'. 'अद्रेरुपतट' **मतिक्रम्य**'–*PA & MD*. 58. '**सोऽतिक्रान्तः**'–*Ibid II*. 42. Hence '**अपक्रामति**' seems to be **preferable. समक्ष** &c.—(1*n*. 9.). **4. तथाविधो** &c.—(254n. 8 end)—Because the king could not recognize Śak. ('चिन्तयन्नपि न खलु स्वीकरणमत्रभवत्याः स्मरामि'—Act V. pp. 262) when she was actually *present*. But when she was passing, the king became **doubtful** about the correctness of **his** memory—['**सन्दिग्धबुद्धिं** मां कुर्वन् अकैतव इवास्याः कोपो लक्ष्यते' —Act V. pp. 278 'मूढः स्यामहमेषा' &c. *V*. 29; 'राजा शाप-व्यवहित-स्मृतिः शकुन्तलागतमेव चिन्तयति' ; 'बलवत्तु दूयमानम् &c'.—*V*. 31.] Next he could remember her as his legally married wife at the **finding of the ring**. ['श्यालः—तस्य दर्शनेन भर्तुरभिमतः जनः स्मारितः' —*VI. pp*. 18. 'कञ्चुकी—यदैव अङ्गुलीयकदर्शनादनुस्मृतं देवेन सत्यमूढपूर्वा मे तत्रभवती शकुन्तला रहसि &c.—Act VI. pp. 37.]

Text:—मारीचः—वत्स ! अलमात्मपराध-शङ्कया । संमोहोऽपि त्वय्यु-पपन्नः[1] **। श्रूयताम्**—Mārīca—My son, away with (*any*) mistrust of your own fault. Even the great stupor in you (*is*) quite justifiable[1]. Please listen—

राजा—अवहितोऽस्मि । King—I am all heed.

मारीचः—यदैव अप्सरस्तीर्थाऽवतरणात् प्रत्यक्ष-वैक्लव्यां[2] **शकुन्तलामादाय दाक्षायणीमुपगता मेनका, तदैव ध्यानादवगतोऽस्मि दुर्वाससश्शापादियं तपस्विनी सह-धर्मचारिणी**[3]**त्वया प्रत्यादिष्टा**[4]**, नान्यथेति । स चायमङ्गुलीयक-दर्शनाऽवसानः**[5] **।**

Mārīca—Even when Menakā came to Dākṣāyaṇī, bearing Śakuntalā, whose[2] calamity was visible[2] to(*Menakā*) owing to her descent into the *Nymph's shirine*, just then I knew by meditation, that this poor (*girl*), your fellow-worker[3] of piety[3] (i.e. wife) had been disavowed[4] by you (*entirely*) by the imprecation of Durbāsas, (*and*) not otherwise. And that (*the spell*) was[5] to terminate with the finding of the ring[5].

राजा (सोच्छ्वासम्)—एष वचनीया[6]**न्मुक्तोऽस्मि ।**

King—(*With a heaved breath*)—Here I am free from blame[6].

शकुन्तला (स्वगतम्)—दिट्ठिआ अकारण-पच्चादेसी ण अज्जउत्तो । ण उण सत्तं आत्ताणं सुमरेमि । अहवा ण सुदो विरह-सुण्ण-हिअआए मए अअं सावो ।

जदो सहीहिं अच्चादरेण सन्दिट्ठम्हि—"सो राजा जइ तुमं ण सुमरेवि, तदा एवं अंगुलीअअं दंसेसि" त्ति ।

[दिष्ट्या अकारण-प्रत्यादेशी[7] न आर्यपुत्रः। न पुनः शप्तमात्मानं स्मरामि। अथवा न श्रुतः विरह-शून्य-हृदयया मया अयं शापः। यतः सखीभ्यामत्यादरेण सन्दिष्टास्मि[8]—"स राजा यदि त्वां न स्मरति, तदा इदमङ्गुलीयकं दर्शयसि" इति।

Śakuntalā (*Aside*)—Luckily (*my*) husband did[7] not repudiate (*me*) without (*good*) reason[7]. But I don't remember myself to have been imprecated. Or, perhaps the imprecation was not heard by me with my heart distracted by separation, for I was directed[8] by my friends with great care thus -"In case the king do not recognize you, then show him this ring."

V. L.—S reads '०अपचार' for '०अपराध' ।। 'उपपन्नः'—B. S. V. 'अनुपपन्नः'—R. M. 'प्रत्यक्ष०'—R. V. M. S. 'प्रत्याख्यान'—B. 'नान्यथेति'—Omitted by B. 'शप्तम्'—R. V. M. S. 'सत्यम्'—Śr. K. B. 'न श्रुतः'—B. 'न विदितः'—R. V. M. S. 'अत्यादरेण'—B. P. S. Dr. Omitted by others. 'स राजा'-&c.—B. 'भर्तुः अङ्गुलीयकं दर्शयितव्यमिति' —R. V. M. S.

मारीच इति। "कण्वस्याहम् अपराद्धः" इति 'शङ्कया अलम्' इति निषेधे। 'उपपन्नः' सम्भवपरः 'एव' शाप-हेतुकत्वादित्याशयः। **मारीच इति।** 'अप्सरस्तीर्थे'-यत् 'अवतरणं' स्वकर्तव्य-पालनार्थं पर्यायेण आकाशात् अवरोहणम् तस्माद् हेतोः। 'प्रत्यक्षं वैक्लव्यं' दुःखं यस्याः ताम्। 'इयं तपस्विनी' शोच्या शकुन्तला 'शापात् हेतोः प्रत्यादिष्टा'। 'न अन्यथा' न स्व-बुद्ध्या इत्याशयः। **राजेति।** 'वचनीयात्' **अकारण-धर्मपत्नी-परित्याग-रूप-कौलीनात्।** **शकुन्तलेति।** 'अकारणं' हेतुं विनैव यः 'प्रत्यादिशति' निराकरोति तादृशः। 'शप्तं' दुर्वास-श्शाप-विषयीभूतम्। 'अथवा' इति पक्षान्तरे 'विरहेण' भर्तृ-वियोगेण 'शून्यं' विषयान्तराऽस्पृष्टं 'हृदयं' यस्याः तादृशी, अतएव 'मया न श्रुतः'। तस्य मानमाह। 'यतः' यस्मात् 'सखीभ्याम्' अनसूया-प्रियंवदाभ्यां 'सन्दिष्टास्मि' भर्तृ-गृह-निर्गमण-वेलायाम् इत्याशयः। "मारीच—वत्स। अलमात्मा—"इत्यादिना एतदन्तेन **'निर्णयः'** नामाङ्गमुपक्षिप्तम्। तल्लक्षणं यथा दशरूपके—"अनुभूतार्थ-कथनं **निर्णयः** समुदाहृतः" इति)।

263n—1. अलम् ०शङ्कया—करणे ३या।—(250n. 2.) **'अपचार'** (S) for 'अपराध' gives the same sense. Our poet has already used this word in this book and elsewhere. Cf. 'आहोस्वित्' प्रसवो ममापचरितै विष्टम्भितो विरुधाम्'—*V.* 9; *Ra. XV.* 47. But **'अपराध'**

seems to be the **original** reading as it has been used in the **previous sentence.** i. e. 'प्रत्यादिशन् अपराद्धोऽस्मि' &c. **2.** ध्यानादवगतः—ध्यान=प्रणिधान, (now *see* 190*n*. 7). The knowledge of Durbāsā's imprecation is a *sine qua non* for the entire and everlasting commingling of the two hearts. As otherwise. the king, unable to account for the past misbehaviour to his legally married wife, would surely feel constant inquietude, specially when near his consort whose devotion for him had not a jot diminished even after such a long lapse of time. Śak. also though she was united with her husband and was informed of his unaccountable mental infatuation, would surely have perturbed mind, as there was nothing to bar the recurrence of the similar stupor (*amnesia*) in her husband. And owing to this she requested him to wear the ring to put a stop to such future calamity. (*Cf* "नास्य विश्वसिमि। आर्यपुत्र एव एतत्धारयतु—257n. 6. Our poet. purposely did not make Śak. aware of the curse before her meeting with the king, only to show that if material love, being purged of all worldly considerations, is transformed into spiritual love, it takes no cognizance of the past deeds, however sinful, and always condones a sinner, who has suffered terribly and is penitent. **3.** त्वय्युपपन्नः—Even (अपि) infatuation was possible in a person like you. तपस्विनीः—(126*n*, 6). सह-धर्मचारिणी= Wife—(151*n*. I). **4.** विष्ट्या अकारण &c.—Śak. was all the while under the notion that she had been disavowed without any reason. But now from her knowledge of the curse, she is made aware of the whole situation and consequently her mind, free from inquietude, has become perfectly serene. Thus has been possible a permanent and complete commingling of the two souls. (*Supra*). Note that this and the previous speech of Mārīca are **absolutely necessary** for the dramatic point of view. **5.** न श्रुतः—&c.—In a somewhat similar manner King Dilīpa could not hear the **curse of Surabhi.** 'स शापो न त्वया राजन्! न च सारथिना श्रुतः। नदत्याकाश-गङ्गायाः स्रोतस्यु-द्दाम-दिग्गजे ॥"—*Ra. I.* 76-78.

Text :—मारीचः (शकुन्तलां विलोक्य)—वत्से! चरितार्थासि। तदि-दानीं सह-धर्मचारिणं प्रति न त्वया मन्युः[3] कार्यः। पश्य—

शापादसि प्रतिहता स्मृति-रोध-रूक्षे[3]

सिंहोन्नता भर्तर्यपेत-तमसि प्रभुता[4] तवैव ।

(तभजजगग) छाया न मूर्छति[5] मलोपहत-प्रसादे[6]

[7]शुद्धे तु दर्पण-तले सुलभाऽवकाशा ॥३२॥

Mārīca (*Looking at Śākuntalā*)—My child ! [1]fulfilled is thy object[1]. So you should not now be wroth[2] towards (*thy*) fellow-worker in piety. For—You were disavowed when (*your*) husband was rude[3] through the obstruction of memory[3], by reason of the imprecation; (*his*) gloom (*now*) gone, yours alone (*is*) the mastery[4], (*upon your husband*). An image tells[5] not on the surface of a mirror with[6] (*its*) transparency clogged by dirt[6], but it gains[8] an easy scope[8] when it is clean (32).

राजा—यथाह भगवान् । King—(*It is*) as Your Reverence says.

V. L.—'शकुन्तलां प्रति'—B. Omitted by others. 'विदितार्थां'—B. V. S. 'चरितार्था'—R. M. K. S. 'तदिदानीं'—B. Dr. Omitted by others. '०रोध'-R. M. V. '०कोप'—B. '०दोष'—Mackenzie Mss. 'प्रभुता तवैव'—R. V. B. M. 'प्रभुता तथैव'—S.

मारीच इति । 'चरितार्था' लब्धार्था, कृतार्था । [पाठान्तर-पक्षे तु अवगतः अर्थः' पत्युः अपराधाऽभाव-रूपः वृत्तान्तः यया तादृशी] 'तत् तस्माद् हेतोः । 'मन्युः' क्रोधः [**'मन्यु र्दैन्ये क्रतौ क्रुधि'** इति हैमः] "न कार्यः" यतस्तथात्वे सहधर्म-चरणस्यैव व्याघातः स्यात् । 'पश्य' इति वाक्यार्थस्य कर्मत्वम् । **शापादिति ।** 'शापात्' दुर्वाससा दत्तात् अभिसम्पातात् हेतोः 'स्मृतेः' स्मरण-शक्तेः 'रोधात्' व्याहतत्वात् 'रूक्षे' कठोर सति 'भर्तरि' स्वामिनि दुष्यन्ते, त्वं 'प्रतिहता' प्रत्याख्याता 'असि' । [**शापादित्यनेन तस्य दोषाऽभावः उक्तः**] । 'अपेतम्' अधुना दूरीभूतं 'तमः' स्मृत्याऽऽवरक मज्ञानं यस्मात् तादृशे 'भर्तरि' [इति मध्यमणि-न्यायेन देहली दीपक-न्यायेन वा अत्रापि अनुषज्यते] 'तवैव प्रभुता' आधिपत्यम् ['एव'-कारेण अस्याः भर्तुर्बहुमान-सूचक-महादेवी-पद-प्राप्तिः सूच्यते] । तथाच 'मलेन' धूल्या--दिना 'उपहतः' नाशितः 'प्रसादः' निर्मलता यस्य तादृशे 'दर्पण-तले' दर्पणे मुकुरे इत्यर्थः ['अधः **स्वरूपयोरस्त्री तलम्** इत्यमरः] 'छाया' प्रतिबिम्बं ['**छाया सूर्यप्रिया कान्तिः** प्रतिबिम्बमनातप' **इत्यमरः**] 'न मूर्छति' प्रसरति । 'तु' किन्तु सा छाया 'शुद्धे' निर्मले दर्पणतले 'सुलभः' सुकरः 'अवकाशः' विम्बपात इत्यर्थः यस्याः तादृशी भवतीति शेषः नितरां व्यक्ता दृश्यते इत्यर्थः। [छाया-शकुन्तलयोः साम्यस्य प्रणिधानेन गम्यत्वात् अत्र **दृष्टान्तालङ्कारः । हेतुश्च ।** 'तवैव प्रभूता' इत्यत्र **असम्बन्धे संबन्धातिशयोक्तिः, भर्तृसम्बद्धायाः प्रभुतायाः प्रसिद्धत्वात् । अथ च**

यो भर्ता स प्रभुः, या वनिता सा गुणभूता इति शास्त्र-स्थितौ भर्तृत्वं तस्मिन्, प्रभुता चास्याम्, **इत्यसङ्गतिश्च।** **अतिशयोक्त्या सहाङ्गाङ्गिभाव** इति राघव-पादाः। ततताततेति तमतिमेति **छेक-वृत्त्यनुप्रासौ।** **'सिंहोन्नता'** इत्यपरनाम **वसन्ततिलकं** वृत्तम्) ॥३२॥

264n.—1. **शकुन्तलां विलोक्य**—This stage-direction is necessary. **चरितार्था** (R)—has **weighty support** from elsewhere, Cf. 'साम्प्रतं चरितार्थं म.धवसेनं सभाजयितुं गच्छामः'-Māla. V. 'राम-रावणयोर्युद्धं **चरितार्थ** मिवाभवत्'—*Ra. XI*;. 87; "बभूव कृतसंस्कारा **चरितार्थेव** भारती"—*X*. 36; '**चरितार्थं**' स्तपस्विभिः'-XV 20; 'राज्ञां तु **चरितार्थता**'—p.424; Cf. Also 'तत् सर्वथा कृतकृत्योऽस्मि विष्णुभक्त्याः प्रसादात्'—PC. VI. ['**विदितार्था**' means—"*You are now aware of the facts.*"]. **भर्तरि**—Construe with both '०रूक्षे' and '०तमसि'। (*Com.* & 228*n*, 1.) **2. मूर्च्छति**—(168*n*, 10). '०**प्रसादे**—'**प्रसाद**' means '*limpidness*', '*brightness*'. Cf. 'गङ्गरोध-पतन-कलुषा गृह्णतीव प्रसादम्'-*Vik. I.* 8. **3. दर्पण-तले**–'**दर्पणः**' is a **looking glass.** 'लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति'—Cāṇakya-Śatakam; *Ku VII*. 26; *X*. 10; *XVI*. 37. Cf. "निश्वास-बाष्पाऽपगमात् प्रसन्नः प्रसादमात्मीयमिवात्मदर्शः—
—*Ra. VII*. 68.

Remark:—Long before the **Phoenicians,** the **Hindus knew the art of making glass,** specially looking-glasses which formed a part of their toilette and were designed as ornaments for room. It will be interesting to note that even the word '**काच**' for glass, occurs in works considerably over *two thousand* years old. The Singhalies who borrowed all the arts of civilized life from the Hindus, make mention in the *Dipavaṁśa* of a **glass pinnacle** placed on the top of the *Hunawelle Dagoba* by *Suidaitissa*, brother of *Detugaimuna*, in 200 B. C, and of a **glass mirror in** 300. B. C. (*Vide Tennent's Ceylone I, pp*. 454). **Pliny** describes the glass of India being **superior** to all others from the circumstances of its being **made of pounded crystal.** (*Lib. XXXV*;. 66.).

Text:—मारीचः—वत्स! कच्चिदभिनन्दित स्त्वया अस्माभि र्विधिवदनुष्ठित: जात-कर्मादि-क्रियः पुत्र एष शाकुन्तलेयः।

Mārīca—My son ! I think you have greeted this son (*of yours*) born of Śakuntalā, with his natal ceremony and other rites duly performed by me.

राजा—भगवन्! अत्र खलु मे वंश-प्रतिष्ठा' (इति बालं हस्तेन गृह्णाति)

King—Your Reverence ! in him, indeed, (*is*) the permanency[1] of my family.[1] (*This said, holds the boy by the hand*).

मारीचः—तथाभाविनं चक्रवर्तिनमेन मवगच्छतु भवान् । पश्य—

रथेनाऽनुद्घात-स्तिमित-गतिना[२] तीर्ण-जलधिः
शिखरिणी **[३]पुरा सप्तद्वीपां जयति वसुधा मप्रतिरथः[४] ।**
(यमनसभलग) **इहायं सत्त्वानां[५] प्रसभ-दमनात्[६] सर्वदमनः**
पुनार्यास्यत्याख्यां भरत इति लोकस्य भरणात् ॥३३॥

Mārīca—Let Your Majesty know that he will be such (*and*) will also be a paramount sovereign (*of the earth*). Behold—Having crossed the oceans in[2] a chariot with a steady motion,[2] through the absence of resistance, he, without[4] a rival[4] will erelong[3] conquer the seven-isled earth. Here (*in this hermitage*), he is (*called*) "Sarva-damana" from his forcible taming of the (*savage*) [5]creatures, but he will again, from (*his*) supporting the world, get the (*famous*) appellation [6]of 'Bharata' (*i. e. the protector*). (33)

V. L.—'वत्स'—Omitted by M. '० जात-कर्मादि-क्रियः'—B. HS. P. '० जातकर्मा'—R. V. M. S. 'बालं हस्तेन गृह्णाति'—B. HS. Omitted by others. 'तथाभाविनम्'—R. V. M. K. 'तथा भाविनम्'—Others. B omits—तथा । 'अनुद्घात'—R. B. V. Dr. 'अनुत्खात'—M. S. K. Mackenzie Mss.

मारीच इति । 'विधिवत्' यथाशास्त्रम् 'अनुष्ठिताः' जात-कर्मादयः क्रियाः' यस्य तथाविधः । 'शकुन्तलाया अपत्यं पुमान्' इति 'शाकुन्तलेयः' ['स्त्रीभ्यो ढक्' -(४।१।१२०)—इति ढक् । शकुन्तलायाः अप्सरो-जातत्वात् **'अवृद्धाभ्यो नदी-मानुषीभ्य स्तन्नामिकाभ्यः'**–(४।१।११३)–इति **अणा ढक् न बाध्यते**] । त्वया 'अभिनन्दितः' विशेषेण आदृतः कच्चित्' इति वेदितुमिच्छामि इत्यर्थः । ['कच्चित् कामप्रवेदने' इत्यमरः । 'कामप्रवेदनं नाम इष्ट-प्रश्नः' इति भानुजिः ॥ "कच्चित् इति इष्टप्रश्ने" इति तत्त्वबोधिनी च] । **राजेति ।** 'वंशस्य प्रतिष्ठा' स्थितिः [**'प्रतिष्ठा** गौरवे **स्थितौ'** इति **हैमः**] अतः नूनमेव अभिनन्दित इत्याशयः । **मारीच इति ।** 'तथा' वंश-स्थिति-भूतः अवश्यं 'भविष्यति' यस्तथाभूतम् ['आवश्यकाऽऽधमर्ण्ययोः णिनिः'-(३।३।१७०)-इति आवश्यके णिनिः] अथच 'चक्रवर्तिनं' समग्र-पृथ्वीश्वरं ['चक्रवर्ती सार्वभौम' इत्यमरः] । **रथेनेति ।** 'अविद्यमानः प्रतिरथः' प्रतिद्वन्द्वी यस्य तादृशः अर्थात् 'तुल्य-योद्धृ-रहितः' [इति पुराणम्] । 'अयं' पुरो वर्तमानः ते पुत्रः 'अनुद्घातेन' अरि-कृत-प्रतिबन्धाऽभावेन हेतुना 'स्तिमिता निश्चला 'गतिः' गमनं यस्य तादृशेन 'रथेन' रथाकारेण व्योम-यानेन, अश्व-

चालितेन सामान्य-रथेन समुद्र-लङ्घनस्य असम्भाव्यत्वात्। 'तीर्णाः' लङ्घिताः 'जलधयः' समुद्राः येन तादृशः। 'पुरा' आगामिनि काले ['स्यात् प्रबन्धे चिरातीते निकटागामिके पुरा' इत्यमरः। निपातोऽयम् निश्चयं द्योतयति। "यावत् पुरा निपातयो र्लट्"-(३।३।४)-इति भविष्यति लट्] 'सप्तद्वीपा' जम्बु-प्लक्षादि-द्वीप-सप्तक-युतां [तथाचोक्तं कौर्मे—"जम्बुद्वीपः प्रधानोऽयं प्लक्षः शाल्मलिरेव च। कुशः क्रौञ्चश्च शाकश्च पुष्करश्चैव सप्तमः॥ एते सप्त महाद्वीपाः समुद्रैः सप्तभिर्वृताः।] 'जयति' नूनं जेष्यति। 'इह' अत्राश्रमे' "सत्त्वानां सिंहादि-जन्तूनां 'प्रसभं' बलात्कारेण ['प्रसभं तु बलात्कारो हठ' इत्यमरः] 'दमनात्' शासनात् अयं 'सर्वदमन' इत्युच्यते इति शेषः। 'पुनः लोकस्य' जनानां भुवनस्य वा 'भरणात्' रक्षणात् पोषणाद्वा 'भरत' इति ['क्वचित् निपातेनाभिधानम्' इत्युक्तेरत्र प्रथमा] 'आख्यां' नाम ['आख्याह्वे अभिधान च नामधेय च नाम च' इत्यमरः] 'यास्यति' प्राप्स्यति ['पुरा जयति' इत्यादिना भाविकालङ्कारः। "प्रत्यक्षा इव यत्रार्था क्रियन्ते भूतभाविनः। तद्भाविकम्" इति तल्लक्षणात्। छेक-वृत्त्यनुप्रासौ। काव्यलिङ्गञ्च। शिखरिणी वृत्तम्] ॥३३॥

265n.—1. कच्चिद्—An indeclinable particle of interrogation, often translatable by '*I hope*'. Cf. Lat. Nonne". Cf. कच्चिदहमिव:' &c.–(Vide 201*n.* 5). 'कच्चित् मृगीणामनघा प्रसूतिः'–*Ra. V.* 7; *V.* 6; **जात-कर्मादि**–(250*n.* 5). **2. अत्र** &c.—**In this son of Śak.; K** supported by **M** takes it **as referring to** **Śāk.** "अत्र अस्या शकुन्तलाया कुलोद्धारक-पुत्रोत्पादकत्वेन"–"**In this Śak. because she has given birth to a son, the upholder of my family".** But this is to be **rejected,** as elsewhere the **stability** of the race of Dilīpa is **ascribed by the poet to** his **son**. Cf. 'अमंस्त चानेन परार्घ्यजन्मना स्थितेरभेत्ता स्थितिमन्त-मन्वयम्'—*Ra. III.* 27. Besides **'तथा'** in the next line is **not in consonance** with this view. Cf. 'अप्रतिष्ठे रघुज्येष्ठे का प्रतिष्ठा कुलस्य नः'—*UC. V.* 25. 'वंश-प्रतिष्ठां नीत'—*Kād., ŚPB. II.* 34. Contrast this meaning with that in, *Act. III.* 17. and *Ku. VII.* 27. **3. तथा-भाविनं**—*One compound word* (**K**), or construe 'भाविनम्' with **'चक्रवर्तिनम्'** (*i. e. would-be paramount ruler*). **4. चक्रवर्तिनम्**—Cf. 'तस्य तत् प्रार्थितं चक्रं प्रावर्तत महात्मनः * * * स राजा चक्रवर्त्यासीत् सार्वभौमः प्रतापवान्'—*Mahā*; (Vide 15 n. 4). **5. अनुद्घातः** &c.—The motion of the car will be steady on account of the **absence of jolting,** or because it will move through the air, ('तेन विशेषणेन रथस्य

आकाश-गामित्वम्'—*K*), or through water. ('जले स्खलनासंभवात्—*R.*), "ययौ अनुद्घात-मुखेन मार्गम्"—*Ra. II.* 72; *ŚPB. XII.* 2. **रथेन—** By an aerial car having the appearance of a chariot, or it may mean a **consecrated miraculous chariot** which could move through the **air or water.** Read "**वसिष्ठ-मन्त्रोक्षणजात् प्रभावात् उदन्वदाकाश-महीधरेषु ।** मरुत्सखस्येव बलाहकस्य गति विजघ्ने नहि तद्रथस्य"—*Ra. V.* 27. **6. पुरा जयति**——'पुरा' (*usually with* लट्) means '*in a short time,*' '*soon*'. It has also the latent sense of '**certainty**'. "**निपातौ एतौ निश्चयं द्योतयतः**"—*BhD.* (41*n.* 1). [Cf. '**पुरा** दूषयति स्थलीम्'—*Ra. XII.* 30;; "आलोके ते निपतति **पुरा** सा"—*MD. I*;. 24—*Qtd Prabhā.* '**पुरा** प्रत्यासीदति'—*Ki. XI.* 36; *X.* 50. '**पुरा** ग्रसन्ते' —*Mahā.* (कर्ण–67-27); (द्रोण–(137-19); '**पुरा** हन्ति'–(Śalya–88); (शान्ति–*Ch.* 37); *ŚPB. XV.* 56; *NC. I.* 18]. **सप्तद्वीपां**—According to Purāṇic theory this earth consists of seven islands, or rather insular continents each enclosed by a sea which was caused by the wheels of the dazzling chariot of king Priya--vrata, who with a view to changing night into day, with vehement velocity circumambulated the earth seven times like the sun—*Kalpa. pp.* 461; *KP.* 44; *VP. II. Vap.* 34. Our poet elsewhere speaks of 18 **द्वीप**s. Cf. '**अष्टादश-द्वीप**-निखात-यूपः'—*Ra. VI.* 38. In fact the **number** of islands are **differently** stated by **different** authorities. **8. सत्त्वानां** &c.—Cf. '**बद्धा** मृगेन्द्रं तरसा **क्रीडति** स्म स बालकः'—*Bhāgabata*, ९ स्कन्धः, *Ch.* 20; "सिंह-व्याघ्र-वराहांश्च महिषांश्च गजांस्तथा । **बबन्धे** वृक्षे बलवानाश्रमस्य समीपतः ।। **अस्त्वयं सर्वदमनः** सर्वं हि दमयत्यसौ । **स सर्वदमनो नाम कुमारः समपद्यत**' —*Mahā*, (आदि, 95); (द्रोण–68); (शान्ति–29); *Brahmāṇḍa Purāṇa, Ch.* 13; *HV. I.* 32; *PP. Ch. V.* **9 भरत** &c.—'बिभर्ति' इति डुभृञ् +अतच् (by "भूमृदृशि"—उ-397) '**शाकुन्तलं, महात्मानं दौष्मन्तिं भर पौरव । भर्तव्योऽयं त्वया यस्माद् अस्माकं वचनादपि ।।** तस्माद् भवत्वयं नाम्ना भरतो नाम ते सुतः । * * * दुष्मन्तस्तु तदा राजा पुत्रं शाकुन्तलं तदा । भरतं नामतः कृत्वा यौवराज्येऽभ्यषेचयत् ।—*Ibid.* *M* observes:—"Many Indian princes were so named, but the most celebrated was the **son of Duṣyanta and Śak,** *who so extended his empire that from him the whole of India was* **called Bhārata or**

Bhāratavarṣa". But this is not **accurate,** *for India came to be known as* **भारतवर्ष** *from the name of* **'मनु' who also from his supporting the world got the epithet** of 'भरत'। Read–'उत्तरं यत् समुद्रस्य हिमवद्दक्षिणञ्च यत्। वर्षं तद्भारतं नाम यत्रेयं भारती प्रजा। भरणाच्च प्रजानां वै (मनु भरत) उच्यते। निरुक्तवचनाच्चैव वर्षं तद्भारतं स्मृतम्"—*VaP.* 45, 75-76. These ślokas exactly occur in *Brahmāṇḍa* Purāṇa. *Ch.* 49, and with a little variation in *MP. Ch.* 114. [For further discussion vide Bhāgavata. IX. 20. 33; Mahā. I. 73. 129; *VP. II.* 3.1; "Cosmography & Geography in Early Indian Literature" by D.C. Sarkar].

Text.:—राजा—भगवता कृतसंस्कारे सर्वमस्मिन् वयमाशास्महे[1]।

King—Your Reverence having performed his purificatory ceremonies, all this we hope in him.

अदितिः—भअवं! इमाए दुहिदु-मणोरह-सम्पत्तीए कण्णो वि दाव सुद-वित्थरो करीअदु। दुहिदु-वच्छला मेणआ उण इह मं उवचरन्ती सण्णिहिदा एव्व। (भगवन्, अस्या दुहितृ-मनोरथ-सम्पत्तेः कण्वोऽपि श्रुत-विस्तरः[1] क्रियताम्। दुहितृ-वत्सला मेनका पुनरिह माम् उपचरन्ती[3] सन्निहितैव)।

Aditi—Your Reverence! of this fulfilment of his daughter's wish, let Kaṇva, too, be now informed[2] at length[2]. Menakā, fond of (*her*) daughter, however, is even present here waiting[3] on me.

शकुन्तला (आत्मगतम्)—**मणोगदं मे वाहरिदं भअवदीए** [मनोगतं मे व्याहृतं भगवत्या)। Śakuntalā (*Aside*)—Her Reverence has, indeed, broached[4] what is in (*my*) heart.

मारीचः—तपःप्रभावात् प्रत्यक्षं सर्वमेव तत्रभवतः।

Mārīca—Palpable (*is*) all this to His Reverence (*Kaṇva*) through the power of penance.

राजा—अतः खलु माममभिक्रुद्धो[5] मुनिः।

King—Hence, indeed, the sage was not[5] angry[5] with me.

मारीचः—तथाप्यसौ प्रियमस्माभिराप्रष्टव्यः[1]। कः कोऽत्रऽत्र भोः?

Mārīca—Nevertheless (*this*) happy news should be imparted to him by us. Who, who is there, ho?

(प्रविश्य) **शिष्यः—भगवन्! अयमस्मि।**

(*Entering*) Pupil—Here I am, Your Reverence.

मारीचः—गालव ! इदानीमेव विहायसा° गत्वा मद्वचनात् तत्रभवते कण्वाय प्रियमावेदय यथा पुत्रवती शकुन्तला तच्छाप-निवृत्तौ स्मृतिमता दुष्यन्तेन प्रतिगृहीतेति ।

Mārīca—Gālava ! just now having gone through the air, inform at my bidding, His Holiness Kaṇva of the happy news that together with her child, Śakuntalā has been accepted by Duṣyanta with his memory revived on the expiry of the malison.

शिष्यः—यदाज्ञापयति भगवान् । (निष्क्रान्तः) ।

Pupil—As Your Reverence commands. (*Exit*).

V. L.—'० विस्तारः—R. B. M. '०विस्तरः'—S. G. 'ज्ञात-विस्तरः—Ś. 'मां परिचरन्ती'—B. P. Dr. Mackenzie Mss. 'उपचरन्ती'--R. S. 'मनोगतं—B. V. 'मनोरमः'—R. M. 'मनोरथः'—S. K. 'व्याहृतम्'—B., 'भणितम्'—V. 'भणितः—R. M. S. 'मामनभिक्रुद्धः'—S. 'ममानतिक्रुद्धः'—M. B. 'मम नातिक्रुद्धः'—R. V. 'विहायसा गत्वा'—R. V. M. S. 'वैहायस्या गत्या'—B. HS.

अदितिरिति । 'दुहितुः' शकुन्तलायाः यो 'मनोरथः' भर्तृ-पुत्र-समागत-रूपः तस्य 'सम्पत्तिः' सिद्धिः तस्याः' 'श्रुत.' आकर्णितः 'विस्तरः बाहुल्यं [शब्द-बहुत्वे अप् (३।३।५७), अन्यथा घञ् (३।३।३३) । **"विस्तारो विग्रहः व्यासः, स च शब्दस्य विस्तरः"** इत्यमरः । अन्यत्र-**"विष्टरः'; वृक्षाऽऽसनयोः विष्टरः'**—(८।३।९३), इत्युक्तेः] येन तादृशः ['सापेक्षत्वेऽपि गमकत्वात् समासः'] 'माम् उपचरन्ती मां सेवमाना [अनेन मेनकान्तिके वार्ता-प्रेरणस्य प्रयोजनाऽभावः सूच्यते] । **शकुन्तलेति ।** ['मनोगतं खलु' इत्यादिना **'कृति'**-नामकमङ्गमुपक्षिप्तम् ।—"लब्धार्थशमनं **कृतिः"** इति दर्पण-लक्षणात्] । **राजेति ।** 'मां' ('क्रुध-द्रुहोरुपसृष्टयोः कर्म', —१।४।३८—इति कर्मत्वम्) । 'अनभिक्रुद्धः' **अभिशापाऽकरणेन फलाऽदर्शनेन च तदनुमानात् इत्याशयः । अयमेव पाठः साधीयान् । मारीच इति ।** 'तथापि' तपसा जानन्नपि । 'असौ प्रियम् आप्रष्टव्यः' श्रावयितव्यः ('अप्रधाने दुहादीनां प्रधाने नी-हृ-कृष्-वहाम्' इत्युक्तेः **गौणे कर्मणि प्रथमा) । मारीच इति ।** 'इदानीमेव' अविलम्बेनैव इत्यर्थः । 'विहायसा' गगन-मार्गेण 'गत्वा' । 'विहायाः शकुनौ पुंसि गगने पुंनपुंसकम्' इति मेदिनी । अनेन द्रुतगमनं सूच्यते) ।

266n.—1. भगवता कृतसंस्कारे &c.—We expect him to be able to do all that are mentioned in the previous Śloka, as his natal and other ceremonies have been performed by Your Worship. Read "**चित्रं कर्म यथानेकैरङ्गैरुन्मील्यते शनैः । ब्राह्मण्यमपि तद्वत् स्यात् संस्कारै-**

-विधि-पूर्वकैः"—**Angirāh. 2.** **श्रुत-विस्तरः**—To imply **expatiation,** **'विस्तर'** is the **only** form. Read–["वारि-**विस्तारः।** पटस्य **'विस्तारः।** अशब्दे **किम्? वाक्यार्थे मा भूत्।** वाक्यस्य **विस्तरः।** अलम् अति**विस्तरेण"—Prabh**ā Also *Com.* 'सुविस्तरता वाचो' &c.—*ŚBP. II.* 24; **"विस्तरेण** श्रोतुमिच्छामि" —*MR. I.* **'०विस्तरेण** * * कथय'—*Gītā X.* 18. **०विस्तार'** is **not a good reading.** To mean **'वृक्ष'** & **'आसन'**, (वि + स्तृ अप्) will give the form **'विष्टर'** by 'वृक्षाऽऽसनयो विष्टरः'–(8.3.93). **3. इह माम् उपचरन्ती**&c.– Hence it is not necessary to inform Menakā. (*Com.*) 'उप् + चर्' means '*to serve*', '*wait upon*'. Cf. 'गिरिश **मुपचचार'**—*Ku. I.* 60; **'उपचारद**र्पितश्रीः'—*Ra. V.* 62; *V.* 20, *MK.* 1. 31; *MS. III.* 193. **4.** **'माम् अनभिक्रुद्धो मुनिः'**—is **better** than any other reading. For the use of Genitive (मम) in place of ४र्थी is not good. (*Com.*). Besides **'अनतिक्रुद्धः** or **'नातिक्रुद्धः'** will imply that **the sage** was **angry with** 'दुष्यन्त', and hence it will **not be in consonance with** 'तपःप्रभावात् **प्रत्यक्षं'** &c. which **clearly proves** that **Kaṇva was fully aware of the curse, and the repudiation** of Śakuntalā by Duṣyanta through infatuation. **5. तच्छाप-निवृत्तौ**—At the expiry of the curse on Śak. of which he is already aware by his power of penance.

Text:—मारीचः:—वत्स! त्वमपि सापत्य-दारः[1] **सख्यु राखण्डलस्य रथ मारुह्य ते राजधानीं प्रतिष्ठस्व।** Mārica—My son ! you too having mounted the car of your friend Indra, along with[1] (*your*) child and wife[1], set out for your capital.

राजा (सप्रणामम्)—यदाज्ञापयति भगवान्।

King *(Bowing)*—As Your Reverence commands.

मारीचः—अपि च—

तव भवतु बिडौजाः[2] **प्राज्य-वृष्टिः**[3] **प्रजासु**
मालिनी **त्वमपि वितत-यज्ञो**[4] **सगिणः भावयालम्**[5]**।**
(ननमयय) **युग-शत-परिवृत्ते रेव मन्योऽन्य-कृत्यैर्**[7]
"जयत मुभय-लोकानुग्रह-श्लाघनीयैः[8] **॥३४॥**

Mārīca—Moreover—Let Indra[2] (*of all pervading energy*) be [3]bountiful of showers[3] to your subjects. Do you, too, by your [4]extensive sacrifices[4] immensely[5] reverence[6] the celestials (*to their*

satisfaction). May (*both of you*) thus prosper[7] with reciprocal[8] acts (*of piety and benevolence*), lasting for a cycle of a hundred Yugas and laudable[9] because of favours (*bestowed*) on both the worlds.[8] (34)

V. L.—'सापत्यदार:'—B. P. HS. 'स्वापत्य–दार-सहित:'—R. M. S· 'सा ात्यदार-सहित:'—V. 'सप्रणामम्'—B. Omitted by others. **'वज्रिणं** प्रीणयालम्'—N. 'स्वर्गिण: प्रीणयालम्'—M. K. S. **'स्वर्गिण: भावयालम्'** —S.A. 'स्वर्गिण: प्रीणयस्व'—V. परिवृत्तै:'—B.P. 'oपरिवर्तनम्'—V.M.S. 'जयतम्'—B. P. HS. 'नयतम्'—V. M. S.; R has **omitted** this Śloka, while Kāshmirian Mss. reads the following instead—"वत्स,ऋतुभिरुचित-भागस्त्वं सुरान् **भावयालम्** सुरपतिरपि वृष्टया तत्प्रजार्थं विधत्ताम् ।। इति च समुपकार-व्यञ्जित-श्रीमहिम्नो, व्रजतु बहुतिथो वां सौहृदय्येव काल:" ।। One Devanāgara Mss. reads this very Śloka with a little variation thus :—"ऋतुविरचितभागैस्त्वं सुरान् **भावयालम्** सुरपतिरपि वर्षं त्वत् प्रजास्वातनोतु । अविरतमुपकार-व्यञ्जके स्वे महिम्नि, व्रजतु बहुतिथो वां सौहृदेनैव काल:" ।

मारीच इति । 'अपत्यं दारा च' इति 'अपत्य-दारे' ["क्रोड़ा हारा तथा **दारा** त्रय एते यथाक्रमम् । क्रोड़े हारे च **दारेषु** शब्दा: प्रोक्ता मनीषिभि:"—इति हट्टचन्द्र: ।। **द्वित्वम्**(१।४।२२ ; १८६)] ताभ्यां 'सह' 'वोपसर्जनस्य-(८।३।६२) इति सहस्य स:] 'प्रतिष्ठस्व' गच्छ ['समवप्रविभ्य: स्थ:'-(१।३।२२) इति तङ्) ['मारीच:—वत्से' इत्यादिना—एतदन्तेन च कर्तव्य-विषयस्य उल्लेखात् **'ग्रथनं'** नामकमङ्गमुपक्षिप्तम् । "उपन्यासस्तु कार्याणां **ग्रथनम्**" इति दर्पण-लक्षणात् । 'उपन्यास' उल्लेख इति तट्टीका] । **नवेति ।** 'विड़ौजा:' इन्द्र: ['इन्द्रो वृद्धश्रवा: स्यादयमपि कथित: ज्ञै: **विड़ौजा:विड़ोजा:**' इति वोपालित:] 'तव प्रजासु' मध्ये 'प्राज्या' बहुला ["प्रभूतं प्रचुरं प्राज्यमदभ्रं बहुलं बहु' इत्यमर:] 'वृष्टि:' यथाकाल-वर्षणं यस्य तथाभूत: 'भवतु' । 'त्वमपि वितता:' विस्तीर्णा विस्तृत-भावेन सततं वा अनुष्ठिता इत्यर्थ: 'यज्ञा' येन तथाभूत: सन्' स्वर्गिण:' देवान् 'अलम्' अत्यर्थं ["अलं भूषण-पर्याप्ति-शक्ति-वारण-निषेधेषु" इति बालमनोरमा।।] **'भावय' आराधय** "आप्यायय' इति शङ्कराचार्या: । "हवि-र्भागै: संवर्धय' इति श्रीधरस्वामिपादा: । **'प्रीणय** इति पाठे **'सन्तोषय'** इत्यर्थ:] । ["धूञ्प्रीञो नुंग् वक्तव्य:"-वा:—२५७२ इति नुगागम:] यत: आराधितेषु देवेषु सत्सु प्रचुर: वृष्टिपात: स्यात् [तथाचोक्तं दण्ड-नीत्याम्—"राजा स्वर्थान् समाहृत्य कुर्यादिन्द्र-महोत्सवम् । प्रीणितो मेघ-वाहस्तु **महतीं वृष्टिमावहेत्**" ।।) "युगानां सत्य-त्रेतादीनां 'शतं' यावत् 'परिवृत्तै:' सर्वतो-भावेन वर्तमानै: 'उभौ लोकौ' स्वर्गमर्त्यौ इति 'उभय-लोकौ' (उभ-शब्दाद् वृत्ति-

